Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. २८९२

Title भगवद्गीता ६ टीकासहिता
द्वितीय स्थाने

Author

Extent ५४० Age

Subject वेदान्तशास्त्र

नं०: २८१२ - घ

श्रीमद्भगवद्गीतायाः द्वितीयोऽध्यायः षोडशटीका-
सहितम् (शांकरभाष्यात् पंचोली टीकापर्य्यन्तं तथा
सप्तदश संख्याको भाषानुवादः)

पत्राणि ४४०

द्वितीयाध्याय: ॥

शांकरभाष्य
आनंदगिरिकृतटीका
स्वामिकृता श्रीधरी
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्तकृतटीका
परमार्थप्रपाटी
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद १ ॥

संजयउवाच तंतथाकृपयाविष्टमश्रुपूर्णाकु
लेक्षणं विषीदंतमिदंवाक्यमुवाचमधुसूदनः १

भाष्यंनास्ति

आनंदगिरिकृतटीका

अहिंसापरमोधर्मो भिक्षाशनञ्चेत्येवं लक्षणयाबुद्ध्यायुद्धवैमुख्यम
र्जुनस्य श्रुत्वा स्वपुत्राणांराज्यमैश्वर्यमप्रचलितमवधार्य स्वस्थहृ
दयं धृतराष्ट्रंदृष्ट्वातस्यदुराशामपनेष्यामीति मत्वायथा सञ्जयस्तम
प्युक्तवानित्याह सञ्जयइति परमेश्वरेण स्मार्यमाणोपि कृत्याकृ
त्येसहसा नार्जुनः स्मरति विपर्ययप्रयुक्तस्य शोकस्य दृढतरमोहहे
तुत्वात्तथापि तंभगवानुपेक्षितवानित्याह तंतथेति तंप्रकृतं पार्थं
तथास्वजनमरणप्रसङ्गदर्शनेन कृपया करुणयाविष्टमधिष्ठितम
श्रुभिः पूर्णेसमाकुले चेक्षणे यस्यतंअश्रुपूर्णाकुलेक्षणं विषीदन्तं
शोचन्तमिदं वक्ष्यमाणंवाक्यं सोपपत्तिकं वचनं मधुनामानमसुरं
सूदितवानिति मधुसूदनो भगवानुक्तवान्नतु यथोक्तमर्जुनमुपेक्षि
तवानित्यर्थः १ ॥

स्वामिकृतटीका

द्वितीये शोकसन्तप्तमर्जुनं ब्रह्मविद्यया प्रतिबोध्य हरिश्चक्रे स्थित
प्रज्ञस्यलक्षणं ततः किंवृत्तमित्यपेक्षायां सञ्जयउवाच अश्रुभिः तंतथेति
पूर्णेआकुले ईक्षणेयस्य तंतथाउक्तप्रकारेण विषीदन्तमर्जुनंप्रतिम
धुसूदन इदंवाक्यमुवाच १ ॥ पिशाचभाष्यंनास्ति.

रामानुजभाष्यटीका

तंतथेत्यारभ्य क्लैब्यंइत्यंतं १ ॥ २ ॥ एवमुपविष्टेपार्थे कुतोयमस्थानेशोकउपस्थित इत्यादिपुनरिमं
विषमस्थंशोकमविदितात्मवित्तंपरलोकविरोधिनमकीर्तिकरमतिक्षु
द्रंहृदयदौर्बल्यकृतंपरित्यज्य युद्धायोत्तिष्ठेति श्रीभगवानुवाच १

अभिनवगुप्तटीका

आदौ लोकव्यवहारप्रयोजनेनैव श्रीभगवानर्जुनंप्रतिबोधयति क्रमात्तु
ज्ञानंकथयिष्यतीत्यतोऽनार्यजुष्टमित्याह क्लैब्यमादिभिर्निर्भर्त्सनमभिदध
दधर्मोवधर्माभिमानोयमित्यादिदर्शयति १ ॥ भीष्मंद्रोणंचेत्यादिना भुञ्जीय
भोगानित्यनेनच कर्मविशेषानुसन्धानंफलविशेषानुसन्धानंचद्वयंतथापूर्वपदे सूचयति नचै
तद्विद्म इत्यनेनच कर्मविशेषानुसन्धानमाह निरभिसन्धानंतावत्कर्मनोपपद्यते नचपराजयम
भिसन्धाययुद्धेप्रवर्तते जयोपिवायमनर्थएव तदाह हत्वागुरून् भेदमपिचर्तुंश्रेयः एतच्चनि
श्चेतुमशक्यं किंजयंकोदामः किंवापराजयमुजयोपिबन्धूनांविनाशात् ॥ २ ॥

परमार्थप्रपाटीका

ततः किं वृत्तमित्यपेक्षायां संजयउवाच तंतथेति कृपयाविष्टंस्वजननृप
या पार्थं विषीदंतं विषादंप्राप्तं अतएवाश्रुकल्पितेक्षणं यस्यतं प्रतिमधु
सूदनः स्वयंदैत्यहंता कृष्णउवाच १ ॥

वनमालीटीका

ततः किं वृत्तमित्यपेक्षायां संजयउवाच तमितिअश्रुभिराकुलेक्षणेयस्य
तं १ ॥

कुसुमवैजयंतीटीका

देहात्मनोः कर्मणश्चस्वरूपज्ञानमुत्तमं द्वितीयेमोहशांत्यर्थमुक्तंकृ
ष्णेनवर्णितम् एवं वधुवधात्मकदोषदृष्टेरर्जुनस्ययुद्धादुपरतिं निश
म्यस्वात्मजानांस्थिरीभूतमवेत्यि राज्यंचनिष्कंटकंभविष्यतीतिमनसोद्य
नराष्ट्रस्यास्वास्थ्यं जनकंततः किं वृत्तमितिमनोरथंपरिहरन् संजय।
स्तमकथयदिति जनमेजयमाह वैशंपायनः संजयउवाच तंतथेति
तथोक्तप्रकारेणैवेत्यर्थः अथवा इति ममताजनितमोहकारणानुरागविशे
षः कृपाशब्दवाच्यस्तया आविष्टमाप्तं अतोविषीदन्तमेतेमरिष्यन्तीतिचे
तस्यदुःखंजीवामीतिआमोहेनातिदुःखमाप्नुवंतं अतएवाश्रुभिः पूर्णे
आकुलेवीक्षणात्मेईक्षणेनेत्रेयस्यतंप्रहदंतमित्यर्थः एवंनिरतिशय
स्नेहशोकाभ्यामतितरांदुःखार्णवमग्नं पूरत्वादिस्वकीयंसाधारणधर्मं
त्यक्तंतंपरधर्ममाश्रयन्तन्तमर्जुनंप्रती दंवक्ष्यमाणंवाक्यमनेकार्थगर्भं
कमवाचमधुसूदनइत्यनेनयः पूर्वंमध्यादिदैत्यानवधीत्सएवेदानीमर्
जुनस्योपदेशान्नः स्वपुत्राणांजीवितनाशंकरिष्यतीतिध्वनितम् [धृतराष्ट्र]स्याभि
प्रायेणेत्यपरेवमधुसूदनस्यवचनमवतारयतिसंजयोद्वाभ्याम् १ ॥

मधुसूदनीटीका

[४]कृपयामैत्रैतइतिव्यामोहनिमित्तः स्नेहविशेषः तयाआविष्टंस्वभावसि
द्धयाव्याप्तमर्जुनस्यकर्मत्वं कृपायाश्चकर्तृत्वं वदतानस्याआगंतुकत्वंसूचितं
अतएवविषीदंतंस्नेहविषयस्वजनविच्छेदाशंकापरपर्य्यायः चित्तव्या
कुलीभावोविषादः तंप्राप्नुवंतं तत्रविषादस्यकर्मत्वेनार्जुनस्यकर्तृत्वेन
चतस्यागंतुकत्वंसूचितं अतएवकृपाविषादवशादश्रुभिः पूर्णंआकुलं।

[१] मित्यनेनयथाभगवतः सर्वजनेषुस्वाभाविकीनिर्हैतुकीकृपानतथानद्भक्तस्यापि इतिसूचितम्

[४] अहिंसापरमोधर्मोभिक्षाशनंचेत्येवंलक्षणयावुद्ध्यायुद्धेमुख्यमर्जुनस्यपुत्राणांराज्यमप्रचलितमवधार्यस्वस्यहृदयस्थजयसुखस्पर्शनिमित्तां ततः किंवृत्तमित्याकांक्षामपनिनीषुः संजयः तंप्रत्युक्तवानित्याह वैशंपायनः निः१ संजयउवाच १०

लेर्दर्शनादेमेवद्रुतलोनेत्रेयस्मरन्तं एवमस्कृपात आकुलीभावाख्य
कार्यहृदयजनकतया परिपोषं गताभ्यां कृपाविषादाभ्यामाविष्टमर्जु
नं इदं सोपपत्तिकं वक्ष्यमाणं वाक्यमुवाच न तूपेक्षितवान् मधुसूदन
इति स्वयं दुष्टनिग्रहकर्त्तार्जुनं प्रत्यपि तथैव वक्ष्यतीति भावः १ ॥

सदानंदीटीका

ॐ पीतं वासो दधानं विजयरथगतं ब्रह्मरुद्रादिवंद्यं भूमेर्भारं जिहीर्षुं नवज
लदरुचं शंखचक्राब्जहस्तं पार्थव्याजेन लोकं निगममतरसै योजयंतं
महेशं ध्यायेन्नित्यं सुसेव्यं स्वजनमतिगदं कृष्णमानंदकंदं १ लक्ष्मीपतिः
कृष्णसखो नियंता ब्रह्मादिलोकस्य च नंदसूनुः गोपीप्रियो गोपवपुः स्व
आत्माखिलस्य कृष्णो मतिदो ममास्तु २ अहिंसा परमो धर्मो महान्दोषः
कुलक्षये आक्रांतो मे न राज्याद्वार्जुनस्येति पश्यते ३ धृतराष्ट्रस्तदा
कार्यममत्वाभिनिवेशतः राज्यदार्ढ्यं स्वपुत्राणामवधार्यातिहर्षितः
४ अज्ञमत्वस्य मनाइत्यमवलोक्याह संजयः ॥ हे राजन्यथावृत्तं स
माधानेन चेतसा ५ आमोदो यो ममैते हमे नेषामिति दुःखदः स्नेहभेदः
कृपा सोक्ता तया व्याप्तस्त्वद्रूपया ६ स्वभावसिद्धया व्याप्तं शोचंतं तं तथा
पाविधं तद्दृशाद्दृश्यभिः पूर्णैराकुले दर्शनात्तमे ७ इत्यक्षेप्यस्पतं मो
हाद्विरं चार्जुनं प्रति इदं सयुक्तिकं वाक्यं वक्ष्यमाणमुवाच ह ८ न तू
पेक्षितवानीशो यतो सो मधुसूदनः स्वयं दुष्टनिहंता जस्तथा वक्ष्यतीति
प्रति ९ ॥ १

नीलकंठीटीका

अर्जुने युद्धादुपरते मत्पुत्रा निष्कंटकं राज्यं प्राप्स्यंतीत्याशावंतं राजानं प्रति
संजय उवाच तं तथेति तमर्जुनं तथा स्वजनेष्वि कथं दृष्टा ममरविनःस्या
मस्माधवे मुक्तप्रकारेण कृपयाविष्टं देनं नतदयपापरदुःखप्रहाणेच्छा
रूपया तस्याः परदौर्बल्यनिश्चयोत्तरभावित्वात् अर्जुने यदि वा नो जयेयुरि
ति स्वपराजयमाशंकमानेऽसंभवित्वात् यानेव हत्वा न जिजीविषामइति
स्नेहातिशयसूचकवाक्यशेषविरोधाच्च आविष्टं व्याप्तं विषीदंतं सी
दंति ममगात्राणीत्यादिनोक्तरूपं विषादं प्राप्नुवंतं इदं वक्ष्यमाणं वा

कथंवचनीयंउवाच मधुसूदनइतिदुष्टैस्तत्वादेवार्जुनेनेति मित्रीकृतमत
स्तुत्रानपिहन्तिष्यतेवेतित्वयाजयाशानकार्येतिभावः ८ ॥

आनंदी टीका

एकं समस्तमहसंतमसां विनाशे विश्वावभासनविधौ च पदार्थ
सारं प्रसिद्धमनस्वरमात्मतत्त्वमहं तमयि स्फुरतु वाङ्मयदेवते
तत् ग्रंथे तस्मिन्निःश्रेयसप्रकरणे गीताशास्त्रे उद्देशपर्वणि सर्व
प्रकरणार्थबीजभूते द्वितीयाध्याये प्रथमाध्यायोक्तप्रकारात्समा
सन्नमरणं बंधुवर्गमवेत्य देहाहंभावनया विभावशोकमोहसं
कटोत्कटया करुणया स्वधर्मत्यागे निश्चितमर्जुनं श्रीभगवान्
स्वधर्मसमुच्चितस्य ज्ञानस्य श्रेयःसाधनतोपदेशेन योधयितुमि
च्छतीति धृतराष्ट्रं प्रतिबोधयन्संजय उवाच तथाप्रोक्तप्रकारेण
कृपयाविष्टं पिशाचेव गृहीतांतःकरणमतएव बाष्पपरितेक्षणं
सीदमानं तमर्जुनं शोकमोहापनोदायेदमनुत्पन्नबोधत्वात्ताव-
ल्लोकदृष्ट्यैव वक्ष्यमाणं वाक्यं मधुसूदनः १ ॥

रामकंठी टी॰

ग्रंथेवंव्यामोहवशाद्विसंस्थुलमर्जुनं प्रतिसंजातानुजिघृक्षस्य भ
गवतः परमार्थोपदेशप्रक्रममपिशुनानि वाक्यानि उपक्षेपसंज
य उवाच तत्रेति ॥ १ ॥

लासिकी टीका

तमर्जुनं कृपयाव्याप्तं अश्रुणा पूर्णे आकुले दर्शने तस्मै चेक्षणे
यस्य तं तथोक्तप्रकारेण वक्ष्यमाणं वाक्यं श्रीकृष्ण उवाच १ ॥

3

रणवीरसमिद्धार्थिनी ॥

कार्तवीर्यार्जुनाय नमः ॥ भिक्षाशनमेवाधर्मभयात्कुरुवधादि
पर्यवसायिनो युद्धादुपरमित्येवंलक्षणया मनीषया संग्रामविमुख
मर्जुनं न्यस्तशस्त्रं निशाम्य स्वात्मजानामैश्वर्यमव्यभिचारि निश्चित्य
हर्षविकसितकपोलस्य धृतराष्ट्रस्याकृतिं विलोक्य तन्मनोराज्यमप
निनीषुः संजयस्तं प्रत्युक्तवानित्याह वैशंपायनः संजय उवाचेति
॥ यद्यपि विधेयाविधेये हृषीकेशेन भगवता स्मारितोऽप्यर्जुनो
दृढतरमोहहेतुशोकाविष्टतया तत्कालं न स्वीकृतवांस्तथापि तं
नोपेक्षितवान्भगवानित्याह तमिति तं प्रकृतमर्जुनं तथा बन्धुजनव
धप्रसंगदर्शनेन कृपया करुणयाविष्टमधिष्ठितमश्रुपूर्णाकु
लेक्षणमश्रुव्याप्तनयनं विषीदंतं शोचंतमिदं वक्ष्यमाणं वा
क्यं सोपपत्तिकं वचनं मधुसूदन उवाचेति संबंधः मधुसूदन इति
विशेषणं च यथा सर्गादौ ब्रह्मणः प्रवृत्तिनिरोधकं मधुं नाशितवां
स्तथैवार्जुनं प्रत्यपि विपक्षमेवोपदेक्ष्यतीति धृतराष्ट्रप्रतिबोध
नाभिप्रायकं ॥ १ ॥

तदेवं प्रथमाध्यायेन च श्रेयो न पश्यामीत्यत्र रणे हतस्य परिव्राट्
समत्वयोगयुक्तेमत्वोक्तेर्यथा श्रेयो मोक्षाख्यमन्यत् श्रेयोन्यदुत।
वाश्रेय इति श्रुतिसिद्धमुक्तं नैव हंतारित्याशयेवदतोर्जुनस्य।
मुमुक्षुत्वप्रतीतेर्न कांक्षे विजयं कृष्णेत्यादिवदतश्चैहिकफलवि
रागप्रतीतेर्नरके नियतं वास इत्यादिवदतश्च देहातिरिक्तात्मवि
वेकाप्रतीतेः किं नो राज्येन गोविन्देत्यत्र आख्यानवर्त्मनाश्रमप्र।
तीतेः किं भोगैरिदमप्रतीतेः यद्यप्येते न पश्यंतीत्यत्र स्वरूपभो।
गाभावप्रतीतेस्तन्मे क्षेमकरमिति तितिक्षाप्रतीतेरधीरत्वे
ब्रह्मज्ञानेऽप्रतीतेः यद्यपि तथापि विविधवदुपसत्त्यभावान्मोक्ष
तात्विकस्वरूपाज्ञानाल्लिंगातिरिक्तज्ञानाभावादतदुपदर्शि
तसर्वकं सोपकारकत्वानोपदेशाय द्वितीयोध्यायश्चारभते ॥
यथा चैतदस्मिन्नध्यायेन प्रतिपाद्यते तथा तत्र तत्र स्थले प्रदर्शि
यिष्यामः तथा किं वृत्तमित्यपेक्षायां संजय उवाच तं तथे
ति स्वयं दुष्टनिग्रहकर्ता अर्जुनं प्रत्यवितथैव वक्ष्यतीति भा
वः स्पष्टमन्यत् ॥ १ ॥

भाषा अनुवाद

अहिंसा परम धर्म्महै इससे भिक्षाकरि निर्वाह करना उचितहै
संजयके मुखसे ऐसी बातैं अर्जुन की हानि औार युद्धसे विमुख
जानि अपने पुत्रोंका अचल राज्य मानि मनप्रसन्न स्वस्थहृदय
धृतराष्ट्रको देखि फेरि संजय धृतराष्ट्र की उस दुष्ट आशा को
दूर करते यह वचन बोलि कि हे राजन् इस प्रकार कृपायुक्त
अश्रुधारा पूर्ण लोचन विषाद करते हुये अर्जुनसे दुखमोचन
श्रीभगवान ब्रह्मविद्या जो ज्ञान तिससे प्रबोध करन यह वच
न कहते भये १ ॥

दोहा ॥ संजयवाक्य ॥

कृपायुक्त कौंतेय सें ते हिं अश्रु पूर्ण विकलनैन पीडत को
मधुसूदन कहित भए यह बैन १ ॥

5

श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे स
मुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन
२

भाष्यं नास्ति

आनन्दगिरिकृतटीका

किन्तदा वाक्यमित्यपेक्षायामाह श्रीभगवानुवाच कुतो हेतोस्त्वा त्वां सर्व
क्षत्रियप्रवरं कश्मलं मलिनं शिष्टगर्हितं युद्धात् पराङ्मुखत्वं विषमे
सभयस्थाने समुपस्थितं प्राप्तमनार्यैः शास्त्रार्थमविद्भिः जुष्टं सेवितमस्व
र्ग्यं स्वर्गानर्हं प्रत्यवायकारणमिह चाकीर्तिकरमयशस्करमर्जुनेतिनाम्ना प्र
ख्यातस्य तवैतेन तत्प्रयुक्तमित्यर्थः २ ॥

वा

स्वामिकृतटीका

तदेव वाक्यमाह श्रीभगवान् कुत इति कुतो हेतोः त्वा इति त्वां विषमे संक
टे संग्रामे इदं कश्मलं उपस्थितं अयं मोहः प्राप्तः यतः अनार्यैरसेवितमस्व
र्ग्यमधर्म्यमयशस्करं च २ ॥

पिशाचभाष्यम् नास्ति

रा

रामानुजभाष्यं नास्ति

एवमवस्थिते पार्थे कुतोऽयमस्थाने समुपस्थितः शोकः विष
मस्थले शोकमविद्वत्सेवितं परलोकविरोधिनमकीर्तिकरमित्यादेहात्मप
र्यवसितमस्य युद्धायोगाद्विरतिरिति २ ॥

अभिनवगुप्तटीका २ ॥ नास्ति

परमार्थप्रपाटीका

कुत इति विषमे संग्रामसंकटे त्वा इति त्वां इदं कश्मलमज्ञानं कुतो हेतोः त्वां स
मुपस्थितं प्राप्तं अथ तत्स्वरूपमाह अनार्यजुष्टेन आर्याः अनार्याः तैर्जुष्टं
सेवितं आर्यैरसेवितं एतद्विषयमज्ञानकश्मलमिति ज्ञात्वा त्याज्यमित्यर्थः
यतः इहामुत्र च गर्हितं तत्कथमित्याह अकीर्तिकरं अस्वर्ग्यं चेति २

वनमालीटीका

हे अर्जुन कुतो हेतोस्त्वा त्वामिदं कश्मलं विषये युद्धसमये समुपस्थितं प्रा
प्तं यतोऽनार्यैरबुद्धैः सेवितमतोऽस्वर्ग्यमत एवाकीर्तिकरम् २ ॥

कुसुमवैजयन्तीटीका

गी॰ टी॰

द्वि॰

४ १ ऐहिकामुष्मिकभोगेच्छावद्भिः सर्वैरेव तस्मात्त्यमेव तत्रापि मन्मित्रस्य तव नेहृशाचरणं महदयोग्य मिति विशेषणत्रयाणामाशयः अर्जुनेति सम्बोधनेन स्वरसतैरजीयोपि शंकरस्य याजितोग्य तद्व लेकुतोगतमिति सूचितम्

+ श्रीभगवानुवाच कुतस्त्वेति निरतिशयशोकमोहाकुलितातिशिथिलसर्वाग रोमांचनकम्पाश्रुपातादिरूपमिदं कश्मलं मलिनं विषमेयुद्धस्थाने आनार्यैः कुष्टरूपैर्जुष्टं सेवितं अस्वर्ग्यं स्वर्गप्राप्त्युपायभूतस्वधर्मविरोधित्वेन स्वलो काःप्रापकं अकीर्त्तिकरं अयशस्करं १ २ ॥

मधुसूदनीटीका

१ इदं स्वधर्मात्पराङ्मुखत्वं कृपाव्यामोहाश्रुपातादिपुरःसरं कश्मलं शिष्टग र्हितत्वेन मलिनं विषमे सभये स्थाने त्वा त्वां सर्वक्षत्रियप्रवरं कुतो हेतोः स मुपस्थितं प्राप्तं किं मोक्षेच्छातः किं वा स्वर्गेच्छातः अथवा कीर्तीच्छातः इति किंशब्देनाक्षिप्यते हेतुत्रयमपि निषेधति त्रिभिर्विशेषणैः यथाक्रमं आर्यै र्मुमुक्षुभिर्न जुष्टमसेवितं स्वधर्मेणाशयशुद्धिद्वारा मोक्षमिच्छद्भिरपक्वकषा यैर्मुमुक्षुभिः कथं स्वधर्मस्त्याज्यः स्यात् संन्यासाधिकारी तु पक्वकषायो ग्रे वक्ष्यते अस्वर्ग्यं स्वर्गहेतुधर्मविरोधित्वात् न स्वर्गेच्छया सेव्यम् अकीर्ति करं कीर्त्यभावकरमपकीर्त्तिकरं वा न कीर्तीच्छया सेव्यं तथा च मोक्षकामैः स्वर्गकामैः कीर्तिकामैश्च वर्जनीयं तत् कामपवत्तेस्तवसर्वकामहो अनुचित्त चेष्टितं तवेति भावः २ ॥

सदानन्दीटीका

तदेव संजयो वाक्यमवतारयति स्फुटं समग्रैश्वर्यसम्पन्न उवाच भगवानि ति १ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भ गइतीगना २ नित्यमप्रतिबंधेन वर्तते यत्र षड्विधं समग्रैश्वर्यमत्यन्तं स भगवानिति ३ शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते श्रीकृष्णो भग वच्छब्दः सर्वकारणकारणे ४ अन्यत्र भगवच्छब्द उपचारेण वर्तते उत्प त्तिं प्रलयं चैव भूतानामागतिं गतिं ५ वेत्ति विद्यामविद्यां च स वाच्यो भगवा निति ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ६ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः इदं स्वधर्माहैमुख्यमामोदैकनिबंधनं ७ शिष्टवि गर्हितत्वाच्च मलिनं कुत आगतं संग्रामे क्षत्रियश्रेष्ठं त्वां विषमे पवकारिणि ८ मोक्षेच्छातोथवा स्वर्गकामतो वा किमागतं किं कीर्तिकामतो वा त्वां किंशब्देनेति सूचितम् ९ त्रिभिर्विशेषणैर्हेतूनमीनेवैशेषानिरस्यति आ र्यैर्मुमुक्षुभिर्नैतत्सेवितं शुद्धिमिच्छुभिः १० यतः स्वधर्मत्यागेन चित्त

तदेव भगवतो वाक्यमवतारयति श्रीभगवानुवाच ऐश्वर्यस्य समग्र धर्मस्य यशसः श्रियः वैराग्य स्य मोक्षस्य षण्णां भग इतीङ्गना ग्रस्येति अन्येत संम्बध मोक्ष मिति तत्साधनस्य ज्ञानस्येङ्गना सं पत्तादृशं समग्रमैश्वर्यादिकं नि प्रतिबंधेन यत्र वर्तते स भगवान् पयोगे मनुष्य तयोत्पत्तिं च विना भूतानामागतिं गतिं वेत्ति विद्या विद्यां च स वाच्यो भगवानिति अत्र ज्ञानामिति अन्येव संबध्यते उत्पत्ति नाशशाढ्यानत्कारणस्य पुपत्त आगतिं गती आगामिन्यो संपदा एतादृशो भगवच्छब्दार्थः श्री वासुदेव एव पर्यवसित इति तथाच्य

१०

तस्युद्धेनजायते। नवास्वर्गोक्र्यासेव्यंस्वर्गादेनविरोधतः ११ स्वधर्मत्यागि
नांस्वर्गः स्वप्नेप्यस्मिंतदुर्लभः। नवाकीर्त्तिक्र्यासेव्यंकीर्तिनाशकरंयतः
१२ तस्मात्स्वधर्मवैमुख्यंवर्ज्जनीयंशुभेप्सुभिः मोहकीर्त्तिफलेप्सुत्वंकि
महोसेवसेमलम् १३ ॥ २

नीलकंठीटीका

अर्जुनंसंयोजयन् श्रीभगवानुवाच कुतइति कश्मलंवैक्लव्यंविषमेयु
द्धसंकटे अनार्यैर्मोहभिर्जुष्टंसेवितंनतत्वादर्शिभिः शूरैः नआर्यैर्जुष्टमिति
वायतआर्यैर्जुष्टमितिवायतआर्यैरजुष्टमितिविग्रहोदर्शितस्तदर्थैक्य
पिपदस्युत्क्रमदोषाद्रूपेदं अतएवास्वर्ग्यमकीर्तिकरंच हेअर्जुनस्वच्छ
स्वभाव तवनैतद्युक्तमितिभावः २ ॥

7

आनंदी टीका

हेअर्जुनइदंकश्मलंस्वधर्मत्यागेनमोहरूपंपापंविषमेहियोग
समयेयद्युद्धयोगात्संकटेकालेदेशेच त्वाविमर्शकंकुतःसमु
पस्थितं किमप्यत्रकारणंनजानामीत्यर्थः कश्मलंकीदृश
मनार्यजुष्टंआर्यैःशिष्टैःस्वामिभिश्चनसेवितम् अतएवा
स्वर्ग्यमकीर्तिकरंचभयलोकविरुद्धमित्यर्थः २ ॥

रामकंठी टीका

दावभगवां
न्न

इदमेवंविधप्रस्तुतावश्यकरणीयस्वकर्मकरणेवसादका
रणव्यामोहात्मकंकश्मलंपापंत्वांभवन्तंकुतःकस्मान्निमि
त्ताद्विषमेसंकटेउपस्थितमागतं हेअर्जुनकीदृशंकश्म
लमनार्यजुष्टमशिष्टसेवितमतएवास्वर्ग्यंस्वर्गप्राप्तिप्रतिकू
लमकीर्तिकरमपवादसंपादकं इतिपदसंगतिःस्फुटेव
अर्थविशेषस्त्विमंगभीकृत्यभगवानेतदाह अर्जुनशब्दोयमन
संत्रिमात्रसंबोधनार्थः किंतुतदन्तसकृष्णाभिजनमहापरा
क्रमादिगुणगणविस्मयप्रत्ययनार्थः तवदेहोपिपरमार्थतोमो
हादिमलविविक्तस्वभावस्यात्मनःप्रत्यायकत्वेनप्रयुक्तः
[illegible] तेनवस्तुतोयत्त्वतस्यानेनव्यामोहकलंकेनसं
बन्धःप्रकाशस्यतमसेवात्यन्तमसंभाव्यइति कुतस्त्वामिदमु
पस्थितमित्यनेनवाक्येनगभीकृतं अतएवचैतत्पापमनार्यैर
तत्वविद्भिरसाधुभिःसेवितम् इत्याद्यके [illegible]
[illegible] २ ॥

१ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा एवमैश्वर्यादिर्यस्य नित्ययोगेन विद्यते स भगवान् श्रीकृष्ण उवाच १

लासिकी टी·

१ हेअर्जुन तु कीर्त्याख्यातः स्वर्गख्यातः कीर्तिख्यातोवास्वधर्मपरांमुखत्व
कुं समुपपन्नं संकटेसंग्रामेयतआर्यैःसाधुभिर्दिगुरुभिःस्वकुलज्येष्ठैःपूर्वपि
तामहादिभिर्वानसेवितम् २ ॥

श्रीगीतासुबोधिनी॥

तदेव वाक्यमवतारयति श्रीभगवानुवाचेति ऐश्वर्यस्य समग्रस्य
धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गनेति
परिभाषितः संपूर्णैश्वर्यादिरूपः षड्विधो भगो नित्यमस्या
स्तीति भगवानिति नित्ययोगे मतुप् उवाच वक्ष्यमाणमिति शेषः
॥ तदेवोदाहरति कुतस्त्वेत्यादिना अरं स्वधर्मपरं रक्षणापार
कमत्तुपानादिपूर्वं कश्मलं मोहः मूर्छा तु कश्मलं मोह इत्यमरः
विषये समभये स्थाने नानासवं तानिय प्रवरमर्जुनं ऊ तोदैमोः सम
परिस्थितं प्राप्तं अनेनाभिधयाविद्युतस्य तवैतद्युक्तमिति भावः
ननु शिष्टसंप्रदायैर्हि काम्यविकल्पत्वानि प्रवृत्तिनिवृत्त्योः सामा
न्येन प्रयोजकानि लोके दृष्टानीति तत्राह कथमनौचित्यमित्य
तेनाशंकामपनेतुं तदन्यतमस्याप्यभावमशदर्शयन्नाह अना
र्येति ॥ २

किमुवाचेत्यतआह ण्

कुतइति त्वांत्वांकश्मलंस्वधर्मपरित्यागलक्षणंविषमेविषयवत्परि मवि
रुद्धे वासुदेवेमयिसमीपस्थेकुतइतिमोक्षेच्छातोवास्वर्गेच्छातोवाकी
र्तीच्छातोवासमुपस्थितंप्राप्तमित्याक्षेपः प्रथमंनिषेधयति अनार्येति
आर्यैर्मुमुक्षुभिरसेवितंस्वधर्मैत्याशयमुद्दिश्यामोक्षमिच्छतः कथंस्व
धर्मस्यत्यागोतिभावः अथवाअनार्याः केवलंकलत्रादिभरणव्यग्रास्ते
र्जुष्टंस्वधर्मत्यागंकथंमुमुक्षुः कुर्यादितिभावः नद्वितीयमित्याह
स्वर्ग्यमिति स्वस्ववर्णाश्रमप्रयुक्तान् धर्मान्त्यजन्कामेष्ज्योतिष्टो
मादिभिरपिस्वर्गंप्राप्नोतीत्युक्तस्वधर्मस्यकाम्येष्वनधिकारादितिभा
वः यद्वा स्वर्ग्यंनरकप्राप्तिहेतुंकथंस्वर्गकामः कुर्यादितिभावः
नतृतीयइत्याह कीर्तिभावकरमयशः संपादकंचेत्यर्थः विषमेसं
वं कटेइतिसंप्रदायादेवोपादेनत्विकिंवाहंकुर्यां वंधुजनमवेक्ष्यमेध
नुर्धारणोपिशक्तिःनप्रभवतीत्याह २ ॥

9

भाषा अनुवाद १

अर्जुन को कातर देखि यह वचन श्रीकृष्ण बोले कि हे अर्जुन ऐसे असमयमे लड़ाईके बीच मूरख कायर शास्त्र हीन मनुष्योंके योग्य जो लोकमें दुर्यश करने वालाहै और अस्वर्ग्य जिससे स्वर्ग जाय और नरक मिलै ऐसा कश्मल कहे मोह अर्जुन इस जानेसे भूतल प्रसिद्ध वीरमें तुम ऐसेको आय कर प्राप्त हुआ यह बड़ाही आ चरजहै २ ॥

दोहा

कैसेंतो को मोहयह विषमस्थानभयो आय त्यागितयमादर
स्वर्गहर हे अर्जुनप्रगटाय २॥

क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्ब
ल्यं त्यक्त्वोत्तिष्ठ परंतप ३ ॥

भाष्यं नास्ति आनन्दगिरीकृतटीका

पुनरपि भगवानर्जुनं प्रत्याह क्लैब्यमिति क्लैब्यं क्लीबभावमधैर्यं मास्मग
मः मागाः हे पार्थ पृथातनय नहि त्वयि महेश्वरेणापि कृताहवे प्रख्यातवीर्यो
रूपे महामहिमन्येतदुपपद्यते क्षुद्रं क्षुद्रत्वकारणं हृदयदौर्बल्यं मनसो दुर्ब
लत्वमधैर्यं त्यक्त्वोत्तिष्ठ युद्धायोपक्रमं कुरु हे परंतप परं शत्रुं तापयतीति
तथा संबोध्यते ३ ॥

स्वामिकृतटीका

तस्मात् क्लैब्यमिति हे पार्थ क्लैब्यं कातर्यं मास्मगमः न प्राप्नुहि यतस्त्वय्येत
न्नोपपद्यते योग्यं न भवति क्षुद्रं तुच्छं हृदयदौर्बल्यं कातर्यं त्यक्त्वा युद्धायो
त्तिष्ठ हे परंतप शत्रुतापन नाहं कातरतयैव युद्धादुपरतोस्मि किंतु [illegible]
साध्यतादिति ३ ॥

पैशाचभाष्यं नास्ति

रामानुजभाष्यटीका नास्ति

[illegible]
वाद ३ ॥

अभिनवगुप्तकृतटीका ३ नास्ति

परमार्थप्रपाटीका

तस्मात्किं कर्तव्यमिति भगवानाह क्लैब्यमिति भो पार्थ त्वं क्लैब्यं पुमर्थवि
धुरत्वं पदिमामप्रतीकारमशस्त्रं शस्त्रपाणय इत्यादिवाक्यप्रकाशितं मास्म
गमः न प्राप्नुहि यतस्त्वयि गांडीवधन्वनि न युज्यते तर्हि किं कर्तव्यमिति
चेत्तत्राह क्षुद्रमिति भो परंतप शत्रुतापन क्षुद्रमल्पविचाररूपं हृदयदौर्बल्यं सं
कल्पितममतोत्पन्नशोकरूपं त्यक्त्वा युद्धायोत्तिष्ठ ३ ॥

वनमालीटीका

हे पार्थ क्लैब्यं कातर्यं माश्मगमः न प्राप्नुहि यतस्त्वय्येतन्नोपपद्यते न संभा
व्यते क्षुद्रं तुच्छं हृदयदौर्बल्यं त्यक्त्वा युद्धायोत्तिष्ठ परंतप शत्रुतापनसम
र्थ ३ ॥

१ नारायणस्य मम पितृस्वसा

कुमवैजयंतीटीका

पुनरर्जुनस्यामर्षमुत्पादयन्नोषगर्भकं वाक्यमाह क्लैब्यमिति हे पार्थ पृथा-
यास्तपसा लब्धोऽनगावतारस्त्वं क्लैब्यं षण्ढत्वं शौर्य्यवीर्य्यधैर्य्यतेजोबलहता-
दिरूपमत्वं मागमः मागाः यतस्त्वय्यप्रतिहतेऽरुवीरशिरोमणौ त्वयिएतन्नो-
पपद्यतेन घटते अतो हेतोः त्वं इन्द्रजनसेवितं तद्रूपस्याधैर्य्यादेरुत्पाद-
कं वा हृदयदौर्बल्यं मनो मात्रदुर्बलतां न पुनरस्मत्संग्रामसामग्रीकुन्तात्मका-
विचारेणापनीयत्वम् उत्तिष्ठ युद्धाय युद्धयत्नपरो भव शत्रुतापन वीर्य्यस्य
तवैतन्नमहदनुचितमितिसंबोधनकथनाभिप्रायः ३ ॥

३ इन्ताखंडल खाङ्गरख्यान लेमन्तिते

६ परन्तप पराननि सपूहात्सपतीति नपात्वद्रूपेणनमा त्रेणेवार्योतिश जीतपर्: २

सेनावेदनज्ञानेनाधैर्येणधनुरपिधारयितुमशक्नुवताम

मधुसूदनीटीका

यादि किं कर्तुं शक्यमित्यत आह ......

क्लैब्यं क्लीबभावमधैर्य्यमोजस्तेजआदिभंगरूपं मास्मगमः मागाः हे पार्थ
व॰ पृथातनय पृथया देवप्रसादेन लब्धे तनये मात्रे वीर्य्यातिशयस्य प्रसिद्धत्वा-
त् पृथातनयत्वेन क्लैब्यायोग्य इत्यर्थः अर्जुनत्वेनापि तदयोग्यतामाह
अर्जुनत्वेनापि तदयोग्यतामाह नैतदिति त्वय्यर्जुने साक्षात् महेश्वरेणा-
पि सहकृताहवे प्रख्यातमहाप्रभावेनोपपद्यते नोपयुज्यते एतत् क्लैब्यमि-
ति सामानाधिकरण्येन तदयोग्यत्वनिर्देशः ननु न वशक्तोऽस्म्यवस्थातुं भ्रमतीव च
म॰ मे मन इति पूर्वमेवोक्तमित्याशंक्याह क्षुद्रमिति हृदयदौर्बल्यं मनसो
भ्रमणादिरूपमधैर्य्यं क्षुद्रत्वकारणत्वात् क्षुद्रं सुनिरसनं वात्मज्ञावि-
वेकेनापनीय उत्तिष्ठ युद्धाय सज्जो भव हे परंतप परं शत्रुं तापयतीति त-
थासंबोध्यते हेतुगर्भम् ३ ॥

सदानंदीटीका

नन्वहं सक्तधैर्योऽस्मि न यत्नुधीरणोऽलम् स्वजनानवेक्षणे नैव कम्पं च हं चाति-
दुःसहे १ इत्याशंक्याह मागाः क्लैब्यं तेजो मत्वा परे देवप्रसादात् पृथया ल-
ब्धस्त्वं वीर्यवत्तरः २ साक्षान्महेश्वरेणापि कृतयुद्धेऽर्जुने त्वयि महाप्रभा- दा॰
वे कातर्य्यं नैवेतद्युज्यते मलं ३ तदन्तादेतत्कं क्षुद्रं हे धैर्य्यं स्वविवेकतः
त्यक्त्वा युद्धाय शीघ्रं त्वं सज्जीभव रणादितो ४ यतस्त्वं शत्रुसंतापकारी शू-
रतमो मतः ५ ३ ॥

नीलकंठीटीका

तदेवाह क्लैब्यमिति क्लैब्यं निर्वीर्यत्वं न च शक्नोम्यवस्थातुमित्युक्तरूपं मा
गाः नैतत् त्वयि महादेवप्रतिभटे युक्तं अतः क्षुद्रं तुच्छं हृदयकृतमेव त।
दौर्बल्यं न तु शक्तिसहायाद्यभावकृतं तत्त्यक्त्वा उत्तिष्ठ युद्धाय परंतप
शत्रुतापन ३ ॥

रामचंद्रसरस्वतीकृतटीका

12

आनंदी टीका

हे कौंतेय इति संबन्धकथनात्प्रेमविश्वासयोराविष्करणं क्लैब्यं कातरतां मा गच्छ त्वयि तेजस्विन्येतैः कर्मभिः प्रख्यातपौरुषे एतत् क्लैब्यं नोपपद्यते हे परंतपेति शत्रुतापनसामर्थ्यम् क्षुद्रमसारम् हृदयदौर्बल्यं हित्वा त्यक्त्वा हृदयविक्लवतां करुणात्मिकां उत्तिष्ठ रणोपस्थायी भव युद्धार्थं सज्जीभव ३ ॥

रामकंठी टीका

अनेनैव क्रमेण तद्विशेषणमाह + ह✓

+ हे परंतप शत्रुजनतापजनक क्लैब्यं कापुरुषत्वं मा गाः यतस्त्वयि जगद्विख्यातविक्रमादिगुणमहिम्नि नैतदेवंविधमल्पसत्त्वजनोचितमुपपद्यते तस्मात्क्षुद्रमसारं हृदयदौर्बल्यमाश्रयकार्श्यं विहायोत्तिष्ठ स्वधर्मत्वेन संग्रामकर्मणि धर्मेष्ठ क्लीबं प्रयोक्तुं त्वद्रूपपूर्वोक्तार्थगंभीकारेण प्रयोगो मन्तव्यः क्लैब्यशब्दस्य च विवेकशून्यत्वगंभीकारेणात्यन्तदपि विशेषणमेवं योजनीयमिति ३ ॥ न्य✓

कातर्यमसाधेव✓ [illegible] टीका लासिकी टीका

वक्ष्यमाणयोपपत्त्या तस्माद्धैर्यमेवेत्याह क्लैब्यमिति हे पार्थ कातर्येण प्राप्तुं हि वीरवरेण योग्यं न भवति त्वं कातर्यं युद्धाय सज्जो भव ३ ॥ त्वं तु✓ हि✓

रणवीरस्वमिद्धोथिनी ॥

नतु बोधवाधवेदत्यस्मजातेनाधैर्येणपन्नरयितारयितमयाकृत।
ता मया किंकर्तव्यमित्यत आह क्लैव्यमिति क्लैव्यं पांडभावो
चित्तधैर्याभावमोजन्मजप्रादिभंगरूपं मास्मगमः मागाः पार्थ।
पृथातनयेति स्वबोधनेन कुंत्या देवप्रसादलब्धे त्वय्येकस्मिन्नेव
तत्तेजोवीर्यातिशयस्य प्रसिद्धत्वात्क्लैव्यायोग्योसीति ध्वनितं अन्ये
न नाम्नातव तदयोग्यत्वमित्याह नैतदिति त्वयि महेश्वरेणापि
कृताहवे विश्रुतपौरुषे महामहिमस्यर्जुने पन्नक्लैव्यं नोपपद्यते
न युज्यते इति तदेवं दूतापादकं सर्वाकारनिरसनं च हृदयस्यम
नसौदौर्बल्यं भ्रमरूपं तत्त्वलगारस्थोत्रादकत्वरूपं चात्यक्तोत्तिष्ठ
युद्धायोपक्रमस्व परंतप नच धर्माक्रोम्यवस्यानमित्यर्जुनोक्तमपास्त
परंतपेत्यनेन शत्रूणामेव हृदयतापाविर्भावानां प्रबुसंता
पकानां त्वबियाणामिति ध्वनितं ३॥

क्लैब्यमिति क्लैब्यं श्रोजस्तेजआदिभंगं पार्थानुचितं मागाः एतत्त्वयिमहा
वीरेऽस्मि तप्रभावेनोपपद्यत इत्यर्थः ननु मम तीव चमेमन इति पूर्वमेवम
योक्तमित्याशंक्याह क्षुद्रमिति हृदयदौर्बल्यं चेतःकपटादित्वक्त्वेरमन नि
ति मित्युक्ता त्तिष्ठ युद्धाय सज्जोभव परंतपेति हेतुगर्भं ननु नकारणांतरेण
स्वधर्मत्यागोयं किंतु धर्मत्वाभावादधर्मत्वाद्धाऽस्य युद्धस्य त्याग इत्याह
र्जुनः ३ ॥

14

भाषा अनुवाद

फेरभी भगवान अर्जुनसे कहतेहै कि हे परन्त शत्रु संहार करने
वाले अर्जुनहै कौंतेय कुंतीपुत्र वीरभाव छोड इस क्लीव कहे नपु
सकके भावको नगहो यह तुमारे योग्य नहीहै इस आचरनमे
तुमारी शोभा जगतमे कुछनही इससे इसतुछ कहे तुछ
हृदय की दुर्बलता कहे कादर पनको छोडकर उठो और
धीरज धरिसंमे के अनुसार कार्य करो कुंतीपुत्र संबोधनसे ।
जनाया कि मातृस्वभाव कन्याको होता पुत्रको पितृ स्वभावही
उचितहै और परंतप से सोचाया कि उठकर शत्रुवोंको मार
लो तुम अनेकबार संग्राममे जय पायेहो ३ ॥

दोहा ॥

क्लीवभावंनहि प्राप्तहो पार्थ योगनतो मे पर तुछहृदय।
दुर्बल्यको स्थित अर्जुनतज कोद ३ ॥

अर्जुन उवाच कथं भीष्ममहं संख्ये द्रोणं च मधुसू
दन इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ४

आनंदगिरिकृतटी०

एवं भगवता प्रतिबोध्यमानोपि शोकाभिभूतत्वादप्रतिबुध्यमानः सन्नर्जुनः
स्वाभिप्रायमेव प्रकटं भगवन्तं प्रत्युक्तवान् कथमित्यादिना भीष्मं पिताम
हं द्रोणं चाचार्यं संख्ये रणे हे मधुसूदन इषुभिः यत्त्वाचापि योत्स्यामीति त्र
वक्तुमनुचितं तत्र कथं बाणैर्योत्स्य इति भावः सायकैस्तैः कथं प्रतियोत्स्या
मि प्रतियोत्स्ये तौ हि पूजार्हौ कुसुमादिभिरर्चनयोग्यौ हे अरिसूदन सर्वा
नेवारीन् यत्नेन सूदितवानिति भगवानेव संबोध्यते ४ ॥

स्वामिकृतटीका

नाहं कातर्येन युद्धादुपरतोस्मि किंतु युद्धस्यान्याय्यत्वात् अर्जुन उवाच क
थं भीष्ममिति भीष्मद्रोणौ पूजार्हौ पूजायामर्हौ पूजायोग्यौ तौ प्रति कथमहं
योत्स्यामि तत्रापि इषुभिः यत्त्वाचापि योत्स्यामि इति वक्तुमनुचितं तत्र
बाणैः कथं योत्स्यामि इत्यर्थः हे अरिसूदन शत्रुसूदन ४

पिशाचभाष्यं ४ ॥

रामानुजभाष्य

पुनरपि पार्थः स्नेहकारुण्यधर्माधर्मभयाकुलो भगवदुक्तं हितमजानन्निद
मुवाच भीष्मद्रोणादिकान्बहुमंतव्यान्गुरून्कथमहं हनिष्यामि कथं
तरां भोगेष्वतिमात्रसक्तांस्तान्हत्वा तैर्भुज्यमानांस्तानेव भोगांस्तद्रुधिरेणो
पसिच्य तेषां सन्नेव उपविश्य भुंजीय तेषां सक्ता भवेम इति ४ ॥

अभिनवगुप्तकृतटी० ४ ॥

परमार्थप्रपाटी० ॥

अथात्मलाभात्पुत्रादिवधशंकावकाशः श्रुतिगर्हितस्य ब्रह्मवधस्य का
गतिरित्याशयेनार्जुनः प्राह कथमिति भो मधुसूदन केवलं दैत्यनिर्व
हण अहं संख्ये संग्रामे भीष्मं द्रोणं च इषुभिर्बाणैः कथं प्रतियोत्स्यामि प्र
तिपक्षत्वेन कथं युद्धं करिष्यामि यतस्तौ पूजार्हौ आचार्यत्वेन पूज्यौ न तु ब्रा
ह्मणमात्रत्वेनावस्थितौ अथार्थी शातपथी श्रुतिरपि तस्माद्यद्यपि राजा
परमतां गच्छति ब्रह्मैवांतत उपनिश्रयति स यो नीय उपनं हि नस्ति स्वां स
योनिमृच्छति स पापीयान्भवति यथा श्रेयांसं हिंसित्वेति एवं श्रुतौ तत्रप

गी॰
टी॰
द्वि॰

तत्रशोचत्यन्तीत्यादिनाराज्ञान्नत्रियः यद्यपिपरमंतांगच्छतिराजन्नहत्यादिनो
त्कृष्टोभवतितथास्वधर्माचरणेनांतेतत्रवसानेब्रह्मैवब्राह्मणत्वमेवउपने
श्रयतिश्रयंतेप्राप्नोति एवंसति उक्तिविचार्ययःक्षत्रियःस्वायोनिंप्रामवश्या
नेपनेब्राह्मणेहिनास्तिचानयतिसकोयोनिंपितरंगच्छति हिनस्तिअतएव
सपापीयान्भवति किंवतुयथाश्रेयासंमहानुभावाहिंसिता अथतैत्तिरीय
केपियावतीर्वैदेवतास्ताःसर्वावेदविदिब्राह्मणेवसंतितस्माद्ब्राह्मणेभ्योवेद
विद्भ्योदिनेदिवेनमस्कुर्यान्नाश्लीलंकीर्तयेदितिभाष्यं दिवेदिवेप्रतिदिवसंन
मस्कुर्वीतएवंनकदापिनाश्लीलंकीर्तयेत् उन्मर्यादंनवदेत् शेषंस्पष्टं एवं
सतिभीष्मादीनांवधःकथंकर्तुंशक्यतइतिभावः ४ ॥

वनमालीटी॰

ननुनाहंकातर्येणयुद्धान्निवृत्तः किंतुयुद्धस्यान्याय्यत्वादित्याशयेनभगवत
उक्तंहितमजानन्नर्जुनआह कथमित्यादिपंचभिः भीष्मंद्रोणंचपूजार्हौतौप्र
तिकथंयोत्स्यामि तत्रापिइषुभिः यत्रवाचापियोत्स्यामीतिवक्तुमनुचितंतत्र
बाणैः कथंयोत्स्यामीत्यर्थः अरिंशत्रुमरिणाचक्रेणसूदयतीत्यरिसूदन ४

अनुभवैजयंतीटी॰

एवंपुरुषोत्तमेनोक्तोपिअर्जुनस्नेहमोहकारुण्यादिवशीभूतस्तद्वचनंहितमप्य
हितंमन्यमानोयुद्धारंभोयम्महानधर्मएवेतिभगवन्तमाह अर्जुनउवाचकथ
मिति भीष्मंजितेंद्रियंसत्यवादिनंपितृवत्सलं अतएवकुलरीतिकंपितामहं द्रोणं
वर्णाश्रमशास्त्राणांप्रदेष्टारंगुरुंचसंख्येसंग्रामेइषुभिर्बाणैःकथंप्रतियोत्स्यामि
प्रतीपोभूत्वाकथंयुद्धंकरिष्यामिकथंचिदपिनेत्यर्थः युद्धाकरणेहेतुमा
ह पूजार्हाविति पूजार्हौपूजनयोग्यौपाद्यार्घ्यादिभिरर्हणयोग्यौतयोर्बाणैर्म
याहननंकथंकर्तव्यमितिभावः ननुमधुसूदनारिसूदनयोःसंबोधनयोर्द्वयोः
पृथक्कथनेपुनरुक्तिदोषावहं यतस्तयोरेकार्थपरत्वमितिचेन्नतयोर्भिन्नार्थ
परत्वेनभिन्नविषयत्वात् तथाहि विष्णुकर्णमलोद्भूतंमधुनाममहासुरं ब्रह्म
णोपचितिंकुर्वन्जघानपुरुषोत्तमः तस्मात्तावद्दैत्यादेवदानवमानवाः मधुसूद
नइत्याहुः स्तुवंत्यथजनार्दनं इतिभारतवचनात् तदाद्यावसुरौघोरौविख्यातौ
मधुकैटभौ विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौइति पुराणवचनाच्चमधु
सूदनेत्यनेनस्वपुत्रस्यब्रह्मणोवैरिणोपिमहासुरंमधुनामानंभवानेववधीन्नत
स्वजनवधायअथवा अरिसूदनेत्यनेनस्वधर्मविरोधिनःसर्वजनवैरिणस्त्वङ्क
हेषिणीबकीवककेशिकंसादीस्त्वमेववधीर्नतुधर्मवतः एतौतुहन्यहननेपा
पीनां हद्धः कुरुपितामहः भारद्वाजात्मजश्चैवश्रातरूप्यायसंयतौ जयो
स्तपांडुपुत्राणामित्युच्चवचनरितिस्मो युयुधानेनवार्ष्णेय यथासमयः

हन इति धृतराष्ट्रंप्रति संजयवचनादस्मद्विज
यैषिणौ सद्धर्मचारिणौ गुरुपितामहौ म
याकथंहंतव्यावित्यभिप्रायेणार्जुनेन द्वौ
संबोधनौ कथितावतो न पुनरुक्ति दोष
गन्धस्यस्पर्शः ४ ॥

मधुसूदनी टीका ॥

ननु नायंस्वधर्मस्यत्यागः शोकमोहादिवशा
त् किंत्वधर्मत्वाभावादधर्मत्वाच्चास्ययुद्ध
स्यत्यागो मयाक्रियते इति भगवदभिप्राय
मप्रतिपाद्यमानस्यार्जुनस्याभिप्रायमवता
रयति संजय अर्जुनउवाचेत्याह वैशम्पा
यनो जन्मेजयंप्रति भीष्मंपितामहं द्रोण

माचार्यसंख्येरणेइषुभिःसायकैःप्रतियोत्स्या
मिप्रहरिष्यामिकथंनकथंचिदपीत्यर्थः य
तस्तौपूजार्हौकुसुमादिभिरर्चं ॥

नयोग्येपोपूजार्हाभ्यांसहक्रीडास्थानेपिवाचापिहर्षफलकमपिलीलायुद्धम
नुचितं किंपुनर्युद्धमसौशरैः प्राणत्यागफलकंप्रहरणामित्यर्थः मधुसूदना सू॰
रिसूदनेतिसंबोधनद्वयंशोकव्याकुलत्वेनपूर्वापरपरामर्षवैकल्यात् अतो
नमधुसूदनारिसूदनेतिस्यार्थस्यपुनरुक्तत्वंदोषः युद्धमात्रमपियत्रनोचि
तंहिएतत्रवधइति प्रतियोत्स्यामीत्यनेनसूचितं अथवापूजार्हौकथंप्रतियो त्स्या
मीतिपूजार्हयोरेवविवरणंभीष्मंद्रोणंचेति द्रोणब्राह्मणोभोजयदेवदत्तंचे दत्तंयद॰
तिवत्संबंधः अयंभावः दुर्योधनादयोनाःपुरस्कृत्यभीष्मद्रोणौयुद्धाय
सज्जीभवंति तत्रताभ्यांसहयुद्धंनतावद्धर्मः पूजादिवद्विहितत्वात् नचा
यमनिषिद्धत्वादधर्मोपिनभवतीतिवाच्यं गुरुंहुंकृत्यत्वंकृत्येत्यादिनाशु
ष्कमात्रेणापिगुरुद्रोहेप्रदर्शितदुष्टफलत्वप्रदर्शनेननिषिद्धः तदाकिंवाच्य
ताभ्यांसहसंग्रामस्याधर्मत्वेनिषिद्धत्वेचेति ४ ॥

सदानंदीटीका

नन्वस्वधर्मसंग्रामोनायंशोकवशात्कृतः किंतुयुद्धस्यधर्मत्वाभावाद्धा
धर्मरूपिणः १ मयास्मिक्रियतेत्यागःस्याह्वाऽर्जुनभ्रातरं भीष्मंपितामहं
द्रोणमाचार्यंसायकैः रणे २ नजातुप्रहरिष्यामिपूजार्हौकुसुमादिभिः
पूजार्हाभ्यांसहक्रीडास्थानेवाचापिलीलया ३ हर्षार्थमपिसंग्रामोनो
चितः किंशरैरणे प्राणत्यागकरोयुद्धम्मोवाच्यमितिस्फुटं ४ संबोधन
द्वयंमोहादेकार्थकमुदाहृतम् ५ ४ ॥

नीलकंठीटीका

नन्वशत्रवोवास्वभावदुष्टावातापनीयाः नत्वबांधवाः सायकैस्तमर्जु
नउवाच कथमिति मधुसूदनारिसूदनेतिसंबोधयन् त्वमपिदुष्टानेव
शत्रूनेवतापयतः पूजार्हौअदुष्टौगुरूचभीष्मद्रोणौजहीतिवक्तुमयु
क्तमितिसूचयति समानार्थकमिदंसंबोधनद्वयंवक्तुः शोकेनविक्लव
त्वात्रपौनरुक्त्यदोषावहमित्यन्ये इषुभिरिति ताभ्यांसहवाचापियोद्धु
मशक्यंकिमुतबाणैरितिभावः ४ ॥

18

आनंदी टीका

अनात्मत्वाद्देहमेवात्मत्वेनाभिमन्यमानो गुर्वादिवधं
महापातकोत्पत्तिं पश्यन्मया नाद्रेष्टव्यमित्यभिप्रायेणार्जुन उ
वाच स्पष्टम् ४ ॥

रामकंठी टीका

अथ संग्रामनाविर्भूतात्मनात्मस्वरूपविवेचनं तमप्राप्तत्वाद्दे
हादिकमेवात्मत्वेन प्रतिपद्यमानो गुर्वादिवधमहापातक
पर्यवसायि समराङ्गणे दोषाद्भावेन प्रतिषिद्धमर्जुन उवा
च हे मधुसूदन कथं केन शास्त्रोपपत्तेन प्रकारेण भीष्मपिता
महं द्रोणं च गुरुं ब्राह्मणं संगवेसायकैः प्रतीपं संप्रहारेणयो
जयिष्यामि यद्वा प्रतिशब्दयोगे द्वितीयाव्याख्येया युधिष्ठि
कर्मकपव पवेश्रपदमत्रक्षादसं प्रत्युत्पेष्यवंद्रष्टव्यो यतः
नो विद्याभिधानं यन प्रदानपरमोपकारिणोर्गुर्वोरपि पवित्रो
नो विशालीयहृदयोः पूजनमेवार्हतः प्रत्येतेनकथमितिप्रकारप्रश्न
नप्रस्तुतेरणपरिजिहीर्षायाः कश्मलत्वं भगवतोपन्यस्तं य
मविरोधाद्नुपपन्नमेवेत्यभिप्रायः सूचितोर्जुनेन [illegible] ४

लाक्षिकी [illegible] टीका

नाहं कातर्येण युद्धादुपरतोस्मि किं त्वेतद्युद्धमन्याय्यत्वात् इत्यर्जु
न आह मधुसूदनारिसूदनेति संबोधनद्वयं शोकव्याकुलतया
कथितवान् भीष्मपितामहद्रोणाचार्यौ पूजायोग्यौ तौ प्रति
कथमहं योत्स्यामि न कथंचिदपि तत्रापीषुभिः यत्र वाचापि यो
त्स्यामीति वक्तुमनुचितम् ४ ॥

रणत्त्वोत्तिष्ठ परंतपेति॥

ननु न शोकमोहौ स्वधर्मभूतं युद्धे वैमुख्यप्रयोजकौ किंतु गुरुव
धादिनाधर्मभयाभावोधर्मत्वविचारणेवतन्नयोजिकेत्येवंरूपं भग
वदभिप्रायानभिज्ञस्यार्जुनस्याशयमवतारयति अर्जुन उवाचेति॥
कथमिति भीष्मं पितामहं द्रोणं च गुरुं वेदोपदेष्टारं संख्ये युद्धे इषुभिः
मार्गणैः कृत्वा प्रतियोत्स्यामि प्रहरिष्यामि अपि तु न कथमपीति॥
यतः पूजार्हौ कुसुमादिभिरर्चनयोग्यौ अर्घ्यादिभिरेव हि प्रायेण गु
रुं प्रवर्तते अत्यतिरिक्तमिषुभिरिति तिपरं पत्रक्रीडाविनोदादिषु वा
ग्वाग्रेणापिशीतिनन कं योत्स्यामीति वक्रमनुचितं न तु इषुभिः प्रा
णहरणफलं युद्धं कथमेतावित्यमावदेदिति सर्वथाधर्मभयाभावे
नाधर्मजनकतया वास्माहै युद्धमेव परमो धर्म इति विज्ञापयति
४॥

कथंभीष्ममिति दुर्योधनादयःशत्रवस्तुभीष्मद्रोणौचपूज्यावस्माकंभवतः न
अतस्ताभ्यांसहयुद्धंतावदधर्मः अविहितत्वात् पूजादिवत् नचायमनिषिद्ध
त्वाच्छ्येनादिवदधर्मोपिनभवतीतिवाच्यं गुरुंहुंकृत्यत्वंकृत्येतिब्राह्मण
मात्रेणापिगुरुद्रोहेदोषगतिप्रदोषपदाविरुद्धफलत्वनिदर्शनेननिषिद्धत्वात्किं
वाच्यंताभ्यांसहसंग्राममधर्मत्वेनिषिद्धत्वेवेमर्थः प्रतियोत्स्यामीतिवद
म न् युद्धमेवतावद्गुरुविद्रावणफलकंपितधर्मः हेतेनधर्मतिसूचयति म
धुसूदनारिसूदनशब्दाभ्यांपुनरुक्तिरूपोवदन्नात्मनःशुर्वोपरोक्तिप्रताम
वि वैधुर्यंप्रकटीकरोति ननुगुरोरप्यवलिप्तस्यकार्याकार्यमजानतः उ
त्पथंप्रतिपन्नस्यपरित्यागोविधीयतइत्युक्तेस्तेषामवलिप्तानांकार्याकार्य
विवेकशून्यानांउत्पथनिष्ठानां गुरुत्वेनैवस्वीकारोनुचितःइत्याशंक्य
नतावत्तेउत्पथंप्रतिपन्नाः तातधर्मोपजीविनांअद्याभिनिवेशस्याभुक्त
त्वात् अतस्तैःसहयुद्धमेवश्रेयस्करमित्याशंक्याह ४ ॥

20

भाषा अनुवाद

इसप्रकार भगवतसे प्रबोध कराये भी गये अर्जुन तौभी शोकग्रस्त अपने मनका मनोरथ प्रकाश करते हुये कृष्ण भगवानसे फेर कहने लगे कि हे मधुसूदन पूजा करनेके योग्य जो भीष्मपितामह और द्रोणाचार्य तिनसे संग्राममें बाणोंसे कैसे युद्धकरूं और उनको मारै जिनसे वचनसे भी संग्राम करनेकी बात नहीं कर सकतेहै हे अरिसूदन कहे शत्रु नाशन अभिप्राय यह कि यत्न कहे उपायसे शत्रुनाश करने वाले ४ ॥

अर्जुनवाक्य दोहा ॥

कैसें भीष्म द्रोणको मधुसूदन रण युद्ध बुगतकदोंगो बाणसों पूजायोग्य विरुद्ध ४ ॥

गुरूनहत्वाहिमहानुभावान्श्रेयोभोक्तुंभैक्ष्यम
पीहलोके हत्वार्थकामांस्तुगुरूनिहैवभुंजी
यभोगान्रुधिरप्रदिग्धान् ५ ॥

आनंदगिरिकृतटी०

राज्ञांधर्मोपियुद्धेगुर्वादिवधेहननिमात्रफलंत्वंगृहीत्वापापमारोप्यह्
ते गुरूनिति गुरून्भीष्मद्रोणादीन् आतादींश्चात्रमामान् अहिंसित्वा महा
नुभावान्महामाहात्म्यान् श्रुताध्ययनसंपन्नान् श्रेयःप्रशस्यतरंभोक्तं
भोक्तुमभ्यवहर्तुंभैक्ष्यंभिक्षाणांसमूहंभिक्षाशनंनृपादीनांनिषिद्धम
पिइहलोकेव्यवहारभूमौ नहिगुर्वादिहिंसयाराज्यभोगोऽपेक्षितःकिंच
हत्वागुर्वादीनर्थकामानेवभुंजीयतन्मोक्षमनुभवेयमिहैव भोगान्
स्वर्गे अर्थकामानेव विशिनष्टि भोगानितिभुज्यंतइतिभोगास्तान्रुधि
रप्रदिग्धान् लोहितलिप्तानिवात्यंतगर्हितानभोगान् गुरुवधादिसाध्या
न् परित्यज्यभिक्षाशनमेवयुक्तमित्यर्थः ५ ॥

स्वामिकृतटी०

तर्हितानहत्वातवदेहयात्रापिनस्यादितिचेत्तत्राह गुरूनिति गुरून्द्रो
णादीन्अहत्वापरलोकविरुद्धंगुरुवधमकृत्वा इहलोकेभिक्षान्नमपि
भोक्तुंश्रेयउचितं विपक्षेतुनकेवलंपरत्रदुःखंकिंतुइहैवचनरकदुः
खमनुभवेयमित्याह हत्वेति गुरून्हत्वा इहैवतुरुधिरेणप्रदिग्धान् प्र
कर्षेणलिप्तान् अर्थकामात्मकान्भोगान् अहंभुंजीयाश्नीयान् यद्वा
र्थकामानिति गुरूणांविशेषणं अर्थलुब्धत्वादेतेतावद्युद्धान्ननिव
र्तेरन् तस्मादेतद्वधःप्रसज्येतैवेत्यर्थः तथाचयुधिष्ठिरंप्रतिभीष्मेणोक्तं
अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित् इतिसत्यंमहाराजबद्धो
स्म्यर्थेनकौरवैरिति ५ ॥

पैशाचभाष्यं स्पष्टार्थः ५ ॥

रामानुजभाष्यं स्पष्टार्थः ५ ॥

अभिनवगुप्तकृत टीका ॥

स्पष्टार्थः ५ ॥

परमार्थप्रपा टीका

अथोक्तमेवविवियाह गुरूनिति महानुभावान् गुरून्द्रोणादीनहत्वा

लोकशास्त्रविरुद्धं गुरुवधमकृत्वा इह लोके भैक्ष्यं भिक्षया प्राप्तमन्नं भोक्तुं
श्रेयः उचितं परं तु गुरून् हत्वा रुधिरप्रदिग्धान् तद्रुधिराक्तानर्थकामात्मका
न्भोगानिहैव लोके कथं भुञ्जीय गुरुवधशङ्काकलङ्कितः कथमश्री
या परलोककथा दूरतोपास्तेत्यर्थः अतिरपि प्राप्तस्वधर्मं हित्वा तु तस्मा
द्ब्राह्मणेनापद्येवं न निहन्यान्न लोहितं कुर्यादेतावता हन्ता भवतीति
भाष्यात स्मृतेन पातयेयानिहन्यादिति सर्वथातो निषिद्धमस्ति तस्माद्ब्रा
ह्मणायेति चतुर्थी द्वितीयार्थेवगम्यते ब्राह्मणेनापद्येवं क्रोधाविर्भावे
न नोद्गिरेत् तथा न निहन्यात् हस्तपादाद्यभिघातं न कुर्यात् तथा न लो
हितं शस्त्रादिना रुधिराक्तं न कुर्यात् हि यतः कारणादेतावता दुष्कर्मणा
पन सा भवति पातकेन संपद्यते ५ ॥

वनमालीटीका

नन्वेतेषां वधं विना तव देहयात्रापि कथं स्यादत आह गुरूनिति गुरून् हत्वा
गुरुवधमकृत्वा इह लोके भैक्ष्यान्नमपि भोक्तुं श्रेय उचितं हननपक्षे न केव
लं परत्र दुःखं किं त्विहापि दुःखमनुभवेयमित्याह हत्वेति गुरून् हत्वा तु इ
हैव तेषां रुधिरेण प्रदिग्धान् प्रलिप्तान् तैर्भुज्यमानत्वात् अर्थकामात्मकान्
न. भोगान् भुञ्जीय अर्थकामान् गुरूनिति वा ५ ॥

उत्तमवैजयन्ती टी.॥

नन्वेवं चेत्तर्हि त्वत्तराप्युन्मार्गवर्तिनः कथं न हंसीत्याशङ्क्यान्येपि कृपादयो
गुरवो बहवः सन्तीति हृदय गुरोरपि अवलिप्तस्य कार्याकार्यमजानत उ
त्पथं प्रतिपन्नस्य परित्यागो विधीयत इति स्मृतेस्तादृशस्यापि गुरोस्त्याग एव
निरूपितो न तु वधः अतो राज्यनिमित्तात् गुरुवधरूपाद्युद्धात् भिक्षाटनाद्या
दिभिरेव देहपालनमेव श्रेय इत्याह गुरूनिति महानुभावान् महानु
भावः श्रुतिस्मृत्युदितधर्माचरणरूपः प्रभावो येषां तान् यद्वा अहिमहा
नुभावानित्येकं पदं अहिमे तापं हन्तीति अहिमहाश्चन्द्रस्तस्येवानुभावः सा
मर्थ्यं येषां तान् संसारतापनाशकानित्यर्थः यद्वाहिमहानुभावान् हिमं
हन्तीति हिमहा रविस्तस्येवानुभावस्तेजो येषां तान् दुःसहशापतापानित्य
र्थः गुरून् ज्ञानाद्यधिकारनिरोधकान् गुकारस्त्वन्धकारः स्याद्रुकारस्तन्निरोध
कः तयोरेकं पदं ब्रह्म गुरुरित्यभिधीयत इति वचनात् अहत्वा हननमकृ
त्वा इह मनुष्यलोके भैक्ष्यं भिक्षया लब्धमन्नमपि भोक्तुं श्रेयो निप्रशस्यं
भवति इत्यनेन क्षत्रियाणामस्माकं भैक्ष्यान्नेन देहपालनमिह विरुद्धमपि पर
लोके शुद्धमेवेति सूचितं अर्थेप्सव कामोभिलाषो येषां तान् अर्थकामा
न् तथा चोक्तं भीष्मद्रोणकृपैर्युधिष्ठिरं प्रति अर्थस्य पुरुषो दासो दासस्त्वर्थो

न कस्यचित् इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैरिति तान् हत्वापि गुरून् हत्वा रुधिरप्रदिग्धान् तेषां रु
धिरैः प्रकर्षेणावलिप्तान् लोकापकीर्तिकरत्वेनातिनिंद्यान् भुञ्जीय इति भोगान् विषयाः कर्मणि घञ् ता
निहैवास्मिन्नेव लो.

केभुंजीय भैक्ष्यमपीह लोके श्रेयो भोक्तुं भैक्ष्यमपीह लोके । हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्

केभुंजीय श्रहमश्नीयाम् परलोकस्य तु का कथा अथवा अर्थकामानि ति भोगविशेषणं अर्थाश्च कामाश्च ते अर्थकामास्तान् अर्थकामरूपभो गानेव भुंजीय न तु धर्ममोक्षाविसर्थः ५ ॥

ननु भीष्मद्रोणयोः पूजार्हत्वं गुरु मधुसूदनीटीका ॥ त्वेनैव एवमन्येषामपि कृपादीनां न वत्तेषां गुरुत्वेनैव स्वीकारः साम्प्रतमुचितः गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथप्रतिपन्नस्य परित्यागो विधीयते इति स्मृतेः तस्मादेषां युद्धगर्वेणावलिप्तानामन्यायराज्यग्रहणेन प्रियद्रोहेण च कार्याकार्यविवेकशून्यानामुत्पथनिष्ठानां वध एव श्रेयानित्याशंक्याह ^

^ गुरूनहत्वा परलोकस्तावदस्त्येव अस्मिंस्तु लोके तैर्हतराज्यानां नोऽस्मदीनां निषिद्धं भैक्ष्यमपि भोक्तुं श्रेयः प्रशस्ततरमनुचितं न तु तद्वधेन राज्यमपि श्रेय इति धर्मेऽपि युद्धे हननमात्रफलत्वं हीत्वापापमारोप्यत्ते ननु वलिप्तत्वादिना तेषां गुरुत्वाभाव उक्त इत्याशंक्याह महानुभावानिति महाननुभावः श्रुताध्ययनतपआचारादिनिबंधनः प्रभावो येषां तान् तथाच कालकामादयोऽपि यैर्वशीकृतास्तेषां गुणातिशयशालिनां नावलिप्तत्वादिलक्षणपापसंबंध इत्यर्थः हि महानुभावानित्येकं वा पदं हि मंत्रान्यमपरंतीति हि महाः आदित्यो ग्निर्वात सेवानुभावः सामर्थ्यं येषां तान् तथाचापि तेजस्वित्वात्तेषामवलिप्तत्वादिदोषो नास्त्येव धर्मव्यतिक्रमो हृष्टईश्वराणांच साहसं तेजीयसां न दोषाय वन्हेः सर्वभुजो यथेत्युक्तेः ननु यदर्थं लुब्धाः संतो युद्धे प्रवृत्ताः तदैषां विक्रीतात्मत्वात्कृतस्य सर्वोत्कृष्टमहात्म्यं तथाचोक्तं भीष्मेण युधिष्ठिरं प्रति अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैरित्याशंक्याह हत्वेति अर्थलुब्धा अपि ते मदपेक्षया गुरव एव भवंत्येवेति पुनर्गुरुग्रहणेनोक्तं तथाह्यपि अर्थे ईदृशानपि गुरून्हत्वा भोगानेव भुंजीय न तु मोक्षं लभेय भुज्यंत इति भोगा विषयाः कर्मणि घञ् ते च भोगा इहैव न परलोके तत्रापि रुधिरप्रदिग्धा इव अपयशोव्याप्तत्वे नात्यंतजुगुप्सिता इत्यर्थः यदेहाप्येवं तदा परलोकदुःखं किं वक्तव्यमिति भावः अथवा गुरून् हत्वार्थकामात्मकान् भोगानेव भुंजीय न तु धर्ममोक्षाविसर्थकामपदस्य भोगविशेषणतया व्याख्यानांतरं द्रष्टव्यम् ५ ॥

सदानंदीटीका ॥

तन्वेषां भीष्मद्रोणानां पूज्यत्वं सांप्रतं कथं युद्धगर्वेण हमानां कार्याकार्यमजानतां । गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथं प्रति

पत्रस्यपरित्यागोविधीयते २ इतिस्मृतेर्वधः श्रेयान्शिष्यद्रोहवन्नामि
ति एवमाशंक्यसफन्नयावाक्यमाहगुरूनिति १ अहत्वातावदस्येव
परलोकस्तुंवदिनः अस्मिंल्लोकेत्वपादीनांतिष्ठित्रैभेक्षमप्युत ४ उ
चितंभोक्तमस्माकंनगुरूणांवधोवरः उत्कृष्टोध्ययनाचारतपआदिभि
र्बधनः ५ येषांप्रभावस्तेषांतमहानुभावएवंतांसतां नत्वेश्वरत्वमत्वा
दिभिर्दोषैः क्षतिर्मनाक् ६ अपहेतिदिमंघोग्निरादिस्याबास्तिनत्वमे ये
षांसामर्थ्यमेतेषांत्वद्वैर्दोषैर्नवातत्ति: ७ यमेव्यतिक्रमोदृष्टः ईश्वरा
णांचसाहसं तेजीयसांनदोषायवन्हेः सर्वभुजोयथा ८ नत्वर्थलो
भिनःसतः प्रवृत्तायेरणेधुना तेषांविक्रीतदेहानांकुतोयंमहिमाद्भुतः
९ तथैवोक्तंद्रोणद्योगेभीष्मेणापियुधिष्ठिरे अर्थस्यपुरुषोदासंदास
स्त्वर्थोनकस्यचित् १० इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैः इत्याशं
क्याहमहार्थाद्गुरुभक्तिसमन्वितः अर्थलुब्धानपिगुरून्हत्वाभुंजीयके
वलं विषयान्येनोभोक्तंतेपीहनपरत्रच ११ इदाप्यपयशोव्याप्तानिसा
रक्तप्लुतान्द्रवाः १४ ॥ ५ ॥

नीलकंठीटीका

नन्वयुद्धोद्यतानांगुरूणामपिवधः श्रेयानितिमाशंक्याह गुरूनिति यद्यपि
त्वदुक्तेमप्रशस्तमेवतथापि महानुभावान् गुरून्नहत्वा भैक्ष्यमेवभोक्तुं
श्रेयःप्रशस्ततरं एवंतर्हि गुरूंस्त्यक्त्वा दुर्योधनादीनेवहुणान् जहीत्या
शंक्याह अर्थकामानिति धनार्थिनोगुरवोवश्यं दुर्योधनस्साहाय्यं
करिष्यंति तेनतद्वधोपिप्रसक्तएवेत्यर्थः तशब्दः पक्षांतरोपन्यासा
र्थः इहैवनतुपरलोके भुंजीयेति संप्रसेलिङ् गुरून्हत्वाभैक्ष्यंश्रेयः
उतहत्वाभोगसंपादनं श्रेयइति संप्रश्नस्वयमेवोत्पत्ते दूषणमाह
रुधिरप्रदिग्धानिति ५ ॥

आनंदी टीका

गुरुहत्यायोगाद्धि गुरूणां वधः परिहृतो भवति। एवं सति राज्यला
भात्मकाशनात् इहास्मिंल्लोके लोकानां दोषेद्वारे भैक्षमितामस
स्पृहेयासमात्रमपि सार्थयिते श्रेयोऽतिप्रशस्तम् तत्पुनः स्व
र्थकामो राज्याभिलाषी गुरून्विहत्य तच्छोणितेन लिप्तान्भो
गान्त्रतनहि भुंजीय नचितिनिपातसमुदायोनहीत्यर्थः ५

रामकंठी टीका

पंतमाद्र यस्मात्तेषामपरिहारेण गुरूणां वधः परिहृतो भवति तोऽस्मीह
लाभिलाषमप्यव्यवहरतेष्व भाष्यस्यात्मनः पुनरवेहधर्मलिप्सु
त्वात् आपाद्य तच्छोणितोपचितानि हान्विषयान्भक्षमश्नीया
म ५ ॥

लाक्षिकी [illegible] टीका

गुरुहत्यामहापातकरूपं परलोकविरुद्धं तेषां वधं अकृत्वा
तद्विषयस्यानिषिद्धमपि भिक्षान्नं हि सामान्यत्वाल्लोके श्रेयः प्रश
स्ततरं न केवलं पारलौकिकं दुःखमेव तेषां वधे इहापि शोक
निंदात्मकं दुःखमस्त्येवेत्याह गुरूनिति ५ ॥

नन्वगुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथप्रतिपन्न-
स्य परित्यागो विधीयते इति स्मृतेर्द्रोणादीनामवलिप्तानामन्याय-
राज्यग्रहणेन शिष्यद्रोहेण च कार्याकार्यविवेकशून्यानामात-
तायिनां चैषां वधः श्रेयानेवेत्याशंक्याह गुरूनिति गुरून्भीष्म-
द्रोणादीनहिंसित्वा इहास्मिँल्लोके यतेर्हं नराज्यानामस्माकं भै-
क्ष्यमपि क्षत्रियाणां निषिद्धं भिक्षान्नमपि भोक्तुं श्रेयः प्रशस्यत-
रं न पुनस्तद्वधेन राज्यसुखानुभव इति राज्ञायमे पिशुद्धेऽपि मा-
व फलत्वे दृष्टे तावत्पापमारोप्यते कुतो न तद्वधः श्रेयानित्याह
महानुभावानिति महाननुभावः श्रुताध्ययनादिनिबंधनः प्र-
भावो येषां तान् तथा चावलिप्तत्वादिकं त्वदुक्तं पापं न तादृशानां व-
धप्रयोजकमिति भावः यद्वा हि महानुभावानित्येकं पदं हिमं जाड्यं
हन्तीति हिमहा सूर्योऽग्निर्वा तस्येवानुभावो येषामिति तथा च ध-
र्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं तेजीयसां न दोषाय वह्नेः स-
र्वभुजो यथेति स्मृतेरुक्तदोषस्तेषां नास्त्येवेति भावः नन्वर्थस्य
पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोऽस्म्य-
र्थेन कौरवैरिति युधिष्ठिरं प्रति भीष्मोक्तेरर्थलोभेन ते युद्धे प्रवृत्ति-
दर्शनाद्विक्रीतात्मनामेषां कुतस्त्यं पूर्वोक्तं माहात्म्यं येनैषां वधोऽध-
र्मः स्यादित्याशंक्यार्थलुब्धत्वे तेषां महत्त्वेन गुरुत्वं न हीयते इत्याह
हत्वेति अर्थकामान् ते इत्यर्थकामानर्थलुब्धानपि तादृशानपि गुरू-
न्हत्वाहमिहैव लोके परलोकं विना तावद्भुञ्जीयामिति
भावः भुञ्जीय इति भोगान्विषयांस्तान्रुधिरप्रदिग्धानिव जुगुप्सिता-
न्परयशोव्याप्तत्वेनारुन्तुदत्वादकान्भुञ्जीय यद्वा भोगानेवेति संबंधः
भोगानेव भुञ्जीय न तु पुनर्मुक्तः स्यामिति यद्वार्थकामरूपान्भोगानेव भु-
ञ्जीय न तु धर्ममोक्षौ भजेयमिति भिक्षाशनमेव मे तु श्रेयस्कमिति भावः ५॥

गुरुमित्यर्द्धेन गुरूनहत्वा परलोकस्तावदस्त्येवास्मिंस्तु लोके तैर्हीनता।
ज्ञातीनां नो भैक्ष्यमपि भोक्तुं श्रेयउचितं न तु तद्वधेन राज्यमपि श्रेय इतिभावः
ननु तैर्हतस्य ज्ञातस्य भैक्ष्यमपीत्याह महानुभावानिति महानुभावत्वात्त्वा
क्षत्रशस्त्रं मां ते न ममातिथ्यं करिष्यंतीतिभावः यद्वा किमितिभैक्ष्यं पुष्यते
२ सितान्हत्वा राज्यं तावद्गृहाण पश्चाद्गुरुवधप्रायश्चित्तकथनाय गुरुर्मिला
किं विहास्यत्यत आह महानुभावानिति कालकामादयो यैर्वशीकृतास्ते
मयाकथं हंतव्या इतिभावः यद्वा कार्याकार्यमजानतोऽकृतो गुरुत्वं येन तत
हत्याद्विसाकर्तव्यता सीत्याशंक्याह हिमहानुभावानिति हिमं जाड्यम
तत्त्वं परगतं जहाति पराकरोतीति हिमहस्ता दृगनुभावः सामर्थ्यं येषा
मित्यर्थः ये परास्तानं निराकर्तुं शक्तास्ते कथं कार्याकार्यं तानविद्युरा
सुरितिभावः अवलिप्तत्वाभावेपीदमेवयोज्यं यद्वाऽज्ञानस्ते भिन्नाभिन्ना
घस्तहृणस्यज्ञातः वृद्धैर्लेलयाः पत्यप्रायेणसहयुद्धमारब्धं त्वयाकि
मर्थमेताहशीयुक्तिरारब्धेत्यत आह अहिमहानुभावानिति हिमशब्दे
नहिमजन्यः कंपो लक्ष्यते ततश्चसर्पादीनामनुभावो दि महोभवति प
तेषां तन्नतर्यं अधिककंपजनकइत्यर्थः ततः कृतोऽयुद्धाशेतिभावः अ
स्मिन्नेवार्थे वाअहि महानुभावानिति सर्पतुल्यपराक्रमानितियोज्यम्
ननुयद्वाऽर्थकामाः संतो युद्धे प्रवृत्तास्ते दोषं कृतास्मनोऽत्रत्वं पूर्वोक्तंसा
मर्थ्य तथाचोक्तं भीष्मेण युधिष्ठिरंप्रति अर्थस्य पुरुषो दासो दासस्त्वर्थो
न कस्यचित् इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवै रित्याशंक्याह हत्वे
ति तः पूर्वोक्ततत्त्वरूपाद्वैलक्षण्यपरिहारकं तं अर्थाशयाद्धनप्रभावे
द्वापि मदपेक्षया गुरवो भवंतीति पुनर्गुरुग्रहणेनोक्तं ईदृशानपि हत्वा
ये भोगास्ते इहैव न परलोके ते च रुधिरप्रदिग्धा इत्यपयशोव्याप्ता इत्यर्थः ॥५॥
किंच भीष्मद्रोणादीनां महतो विजयप्रवास्माकं लोके लाघवावहोऽ
नत्वहं लीयिष्यते घ्रुमास्तविजय इतिकयापि भं गयाह ५ ॥

25

भाषा अनुवाद

फेरभी अर्जुन कहतेहै कि यद्यपि युद्ध करना राजोंका धर्महै तोभी
लोभसे जीविका हीके अर्थवे अनर्थ रूप पाप करतेहै और जो क
हो कि इनलोगोंको विनामारे हमारी देह यात्रा कोहू जीवनहेति
भोजनवस्त्रभी न चलेगा निर्वाह कहो कैसे संसारमें होगा इ
सवात पर कहतेहै कि जिसलिये महानुभाव महात्मा गुरुलो
गोंको नमारके भीखमांग खाना भी मेरेजान लोकमें श्रेय कहे
अति उत्तम कल्याण रूपहै और नहीं गुरु आदि बडे लोगोंको मारि
उनके लोहूसे लपेटे भोग हम चाहते क्यों कि जो कहो कि परलोक
मे जो होगा सो होगा किसने देखा परलोक कहीं मे दुःख नहीहै
यहांभी दुर्यश और संताप रूप दुखहै और जो कहो कि लोकमें
तो सुख मिलेगा तो तुच्छ सुखके हेतु भक्ति और स्वर्ग लोकमे य
श कौन छोडेगा ५ ॥

कवित्त॥

वेदउपदेशिनको महा अनुभाविनको गुरुनको मारकहो कैसे
यश पावेगो योग्य हमे भिक्षा अन्न भोगनको निश्चयकरजा
न्यो इह लोक माहि यहि हम पावेगो हनन कर गुरुनको इ
हां अर्थ लोभिनको बडो अघ पाप करि कौन यश आवेगो
भोगकरी भोगनको रुधिरसनो बात कौनको लिये लगावेगो
५॥

96

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीविषामस्ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः ६ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

क्षत्रियाणां स्वधर्मत्वाद्युद्धमेव श्रेयस्करमित्याशङ्क्याह न चैतदिति एतदपि न जानीमो भैक्ष्ययुद्धयोः कतरन्नोऽस्माकं गरीयः श्रेष्ठं किं भैक्ष्यं हिंसाशून्यत्वादुत युद्धं स्वधर्मत्वादिति सन्दिग्धा च जयस्थितिः किं साम्यमेवोभयेषां यद्वा वयं जयेमातिशयेम यदि वा नो ऽस्मान् धार्तराष्ट्रा दुर्योधनादयो जयेयुः जातोऽपि जयो न फलवान् यतो यान् बन्धून् हत्वा न जिजीविषामो जीवितं नेच्छामस्त एवाव[illegible]स्थिताः प्रमुखे सम्मुखे धार्तराष्ट्रा धृतराष्ट्रस्यापत्यानि तस्माद्भैक्ष्याद्युद्धस्य श्रेष्ठत्वेन सिद्धमित्यर्थः ६ ॥

स्वामिकृतटीका

न चैतदिति एतद्द्वयोर्मध्ये नः अस्माकं कतरत् किं नाम गरीयः अधिकतरं भवतीति न विद्मः तदेव द्वयं दर्शयति यद्वा जयेम एतान् वयं जेष्यामः यदि वा नः अस्मान् एते जयेयुः जेष्यन्तीति किं वास्माकं जयोऽपि फलतः पराजय एवेत्याह यानेव हत्वा जीवितुं नेच्छामः त एवैते सम्मुखे ऽवस्थिताः ६ ॥

पिशाचभाष्यं नास्ति

रामानुजभाष्यं [illegible] नास्ति

[illegible]भुञ्जीयते [illegible]भवेमइति ६ ॥

अभिनवगुप्तकृतटीका ६ नास्ति

परमार्थप्रपा ६

अथ तेभ्यो ऽस्माकं जये [illegible] पराजये वा मरणमेवावशिष्यत इत्याह न चैतदिति जय[illegible] पराजयव्यवस्थानं दैवाधीनां तथापि यत् यदि वयं जयेम यदि वा ते ऽस्मान् जयेयुः अनयोः पक्षयोर्मध्ये कतरद्गरीयः किं श्रेष्ठं न·

किं च यद्यधर्मं गरीयः करिष्यामस्तथापि किमस्माकं जयः पराजयो वा गरीयान्भवेदिति न ज्ञायत इत्याह

यद्वेति

गी॰
टी॰ द्वि॰

न्न विद्मः न जानीमः यतो ऽस्माकं पराजयो मरणमेव वा विशिष्टं [illegible]
[illegible] नपलापनमिन्द्रसेदिग्धं तथास्माकं जयपक्षे सर्वेषामा
चार्याणां गोत्रिणां च वधो भविता अनेन रमस्माभिः किं जीवितव्यं परिशेषा
लोकशास्त्रगर्हीभयात्मतेवमेवेत्याह यानेवेति यान्हत्वा वयं न जिजीविषामः
न जीवितमिच्छामस्ते धार्तराष्ट्राः प्रमुखे रणमुखे अवस्थिताः सन्ति ६

वनमालीकृतटीका

यद्यपि कर्म करिष्यामस्तथापि जयः पराजयो वेति न जानीमः तस्मादाह न चैत
दिति द्वयोर्मध्ये नोऽस्माकं कतरत्कतरद्गरीयः अधिकतरं भविष्यतीति न विद्मः यद्वा य
द्वा वयमेव तान्जयेम तत्रैव यदि वा नोऽस्मान्जयेयुः जेष्यन्तीति च न वि
द्मः किं चास्माकं जयोऽपि पराजय एवेत्याह यानिति यान्हत्वा जीवितं नेच्छाम
स्त एते सम्मुखे स्थिताः वीरस्याबलवधुवधो लोके निंद्यत्वादस्मादस्यायमिति भावः

कुसमवैजयंतीटीका

किं च [illegible]
न दितिविवयमेतान्जयेम जेष्यामः यदि वै ते नोऽस्मान्जयेयुः जेष्यन्ति एतद्भुभ
योर्जयपराजययोर्विपरीतकर्मणोः प्रमाणानां नोऽस्माकं कतरत्कतरद्वा नाम
ध्ये कतरत्गरीयः श्रेष्ठतरो भविष्यतीति वयं न विद्मो न जानीमः [illegible]
[illegible] यानिति यतो यान्नेव बन्धून्धनादीनेव ह
त्वा वयं न जिजीविषामः जीवितुमेव नेच्छामस्त एव धार्तराष्ट्रा अन्यस्य पुत्राः
प्रमुखे संग्रामे स्थिताः मरणमङ्गीकृत्य स्थिताः अत एवैतेषां वधे ऽस्माकं जयो
ऽपि पराजयो भवेदिति भावः ६

स्वधर्ममत्वा मद्धोरतरं गोत्र
मित्राचार्यादिवधात्मकं कर्मा
न्तरं कृत्वापि युद्धे प्रवृत्तानाम
स्माकं मध्ये केषां जयः केषां
पराजयो वा भवेदिति वयं न
[illegible] जानीमस्तयोर्द्वयोर्वा धीन
त्वा[illegible]दित्याह

तुभेत्याशनस्यन्दविंयं प्रतिनिषिद्धत्वाद्युद्धस्य चविहिततत्वात्

मधुसूदनीटीका

धर्मत्वेन युद्धमेव न च श्रेयस्करं भिक्षाशनं वा
एतदपि न जानीमो भैक्षयुद्धयोर्मध्ये कतरत् नोऽस्माकं गरीयः श्रेष्ठं किं भै
क्षं हिंसाशून्यत्वात् उत युद्धं स्वधर्मत्वादिति इदं च न विद्मः आरब्धेऽपि युद्धे यद्वा वयं
जयेमातिशयेमहि यदि वा नोऽस्मान्जयेयुर्धार्तराष्ट्राः उभयोः साम्यपक्षो
ऽपि ध्येयः किं च जयोऽपि नः फलतः पराजय एव यतो यानेव हत्वा
जीवितमपि वयं नेच्छामः किं पुनर्विषयानुपभोक्तुं त एव अवस्थिताः सम्मुखे धा
र्तराष्ट्राः धृतराष्ट्रसंबन्धिनो भीष्मद्रोणादयः सर्वेऽपि तस्माद्भैक्षयुद्धयोर्मध्ये श्रेष्ठ
त्वेन निश्चयमित्यर्थः तदेवं प्राक्तनेन ग्रन्थेन संसारदोषनिरूपणात्तदधिकारि
विशेषणानुक्त्वा तत्र न चाऽप्योत्पन्नामिदत्वात्स्वजनमाहवं अन्यत्रपो

हतस्य परिव्राट्समानयोगक्षेमतो लोकेऽस्मिन् श्रेयो न्याय्यं नैव श्रेय इत्यादिकृतिसिद्धं श्रे
यो मोक्षाख्यमुपन्यस्तं अर्थाच्च तदितरदश्रेय इति नित्यानित्यवस्तुविवेको दर्शितः
न कांक्षे विजयं कृष्णेत्यत्रैहिकफलविरागः अपि त्रैलोक्यराज्यस्य हेतोरित्यत्र पार
लौकिकफलविरागः नरके नियतं वास इत्यत्र स्थूलदेहातिरिक्त आत्मा किं
नो राज्येनेति व्याख्यातवर्त्मना शमः किं भोगैरिति दमः यद्यप्येते न पश्यन्तीत्यत्र
निर्लोभता तन्मे क्षेमतरं भवेदिति तितिक्षा इति प्रथमाध्यायार्थः संन्यास
साधनसूचनं अस्मिंस्त्वध्याये श्रेयो भोक्तुं भैक्ष्यमपीत्यत्र भिक्षाचर्योपलक्षितः
संन्यासः प्रतिपादितः गुरूपसदनमिदानीं प्रतिपाद्यते समधिगतसंसारदोष
जातस्यातितरां निर्विण्णस्य विधिवद्गुरुमुपसन्नस्यैव विद्याग्रहणेऽधिकारात् ५

सदानंदीकृत

ननु भिक्षाशनं निंद्यं क्षत्रियप्रतिशास्त्रतः धर्म्ययुद्धं च विहितं श्रेयो नेत्याह
नेति च १ एतच्चापि वयं विद्मो मध्ये संग्रामभैक्ष्ययोः कतरन्नो गरीयोऽस्माकं भै
क्ष्यं संग्राम एव वा २ इदं चापि न जानीमः प्रारब्धेऽस्मिन् रणे वयं जयेम यदि वास्मा
ञ्जयेयुः शत्रवो रणे ३ सिद्धेऽपि विजयेऽस्माकं फलतः स्यात्पराजयः स्वज
नानन्वयं हत्वा नेच्छामस्त्रापि जीवितुं ४ किं पुनर्विषयान्भोक्तुं न एते व्यवस्थिता
रणे भीष्मद्रोणादयः सर्वे न धार्तराष्ट्राः सुयोधनादयः ५ अतः शास्त्रं न पश्येऽनेन संशयविन
ष्टापरे तस्माच्छ्रेयाद्दशास्यापि श्रेष्ठं नैव सिध्यति ६ ॥

नीलकंठीकृत

एवं तर्हि भैक्ष्यमेव नः श्रेय इत्याशंक्याह न चैतदिति यद्यपि क्षत्रियस्य भैक्ष्यमे
वेष्टं तथापि नः अस्माकं क्षत्रियाणां भैक्षभोगयोर्मध्ये कतरत् गरीय इति वयं न वि
द्मः ननु तर्हि युद्धमेव गरीय इति तत्राह यद्वेति यदि वा वयं जयेम शत्रून् यदि वा नो
स्मान् शत्रव एव जयेयुः इदमपि न विद्मः अन्यपक्षे पुनर्मरणमप्रार्थितं भैक्षमेव
वा पद्यत इति भावः ननु मध्ये सहाये सति त्वं जय एव निश्चित इत्यत आह याने
वेति इष्टनाशजयोऽपि पराजयरूप एवेत्यर्थः यत्तु निश्चितेऽपि भैक्षश्रेयस्त्वे पुनर्यु
द्धभैक्षयोः कतरन्नः श्रेय इति संशयो नोचितः अतो नः अस्माकं मध्ये कतरन्नैस
न्यं गरीय इति व्याख्येयमिति तदसत् धर्मसंमूढचेता इति वाक्यशेषाद्धर्मसं
शयस्यैवोचितत्वात् सैन्यगरीयस्त्वसंशये नैव जयसंशयेऽन्यथासिद्धेऽन्य
तरसंशयस्यैव पर्याप्तत्वात् विशेषाध्याहारदोषाच्च ६ ॥

गी·
टी·हि

९८

एतत्तावदास्तामिदमपरं विचा **ज्ञानेदी टीका** र्यतामित्याह

नचैतज्जयपराजययोर्योर्द्वयोर्मध्ये न तयोर्जानीमः कतरद्बलेनोऽस्माकं धार्तराष्ट्राणां च मध्याद्बलवत्तरं स्यादिति यद्वा वयं तान्जयेम यदि वा ते अस्माञ्जयेयुरिति यानेव गुरुप्रभृतीन्व्यापाद्य वयं न जिजीविषामः जीवितुं नेच्छामः ते अमी धार्तराष्ट्राः धृतराष्ट्रस्य सेनायां समवेता भीष्मादयो धृतराष्ट्रपुत्रा दुर्योधनादयो ऽप्यत्र प्रमुखेऽवस्थिताः ६ ॥

रामकंठी टीका

किंचैतदेव न जानीमो द्वयोर्मध्यात्कतरद्बलमस्माकं प्रयोजनवत्तया गरीयो गुरुतरं स्यात् कयोस्तयोर्वस्तुनोरित्याह यदि वा वयं तान्प्रतिहन्तृन्जयेम अतिरस्कुर्वीमहि यदि वास्मांस्तिरस्कुर्वीरन् एतयोरर्थयोरेकतरस्य गरीयस्त्वापरिज्ञाने कारणमाह यस्माद्यान्कृत्स्नान्व्यापाद्य बंधून्विहत्य प्राणानेव धारयितुं नेच्छाम स्ते धृतराष्ट्रपुत्रा भ्रातरोऽस्माकं पुरः स्थिताः किमुक्तं भवति यदि तावदस्माभिः जता हताः स्युस्तदस्य पक्षस्य कागरीयस्त्वाद्दुःखमात्रफलत्वात् एवं चार्थादिदमुक्तं स्यात् यदि ते अस्माञ्जयेयुः स पक्षो गरीयान्भवेत [illegible]

[illegible]

[illegible] ६ ॥

लासिकी **नवयमी टीका**

न त्र युद्धाज्जमतावपि जयपराजययोः संशयास्पदत्वेन युद्धमनर्थावहमेव भातीत्याह नचैतदिति नयाद्युधिष्ठिरस्य भीमं प्रति [illegible] इति [illegible] नन्वस्माकं जय एव श्रेयानित्यत्र दोषमाह यानेवेति ६ ॥ यानेव हत्वा जेवितुं नेच्छाम स्त एव ते धार्तराष्ट्राः संमुखे वस्थिताः ॥ ६ ॥

द्वयोर्जयपराजययोर्मध्ये नोऽस्माकं कतरन्नो गरीयोऽधिकतरं भवेत्येतन्न विद्मस्तदेव द्वयमाह येतान्जयेम जेष्यामो यदि नो नेतधार्तराष्ट्रा जयेयुर्जेष्यन्तीति ६

पैशाची टीका

किंच यद्यप्यधर्ममपि अंगीकरिष्यामस्तथापि अस्माकं जयः परा
जयो वा भवेदिति न ज्ञायत इत्याह नचैतदिति च पुनः एतद्द्वयं न
विद्मः नोस्माकं कतरत् किं नाम गुरूणां हननं अहननं वा गरीय
अधिकतरं भविष्यतीति न विद्मः यद्वा एतान्वयं जयेम जेष्यामः
यदि वा नोस्मानेते जयेयुः जेष्यंतीति न विद्मः किंच अस्माकं
जयेपि फलतः पराजय एवेत्याह यानेवेति किंच जयपक्षेपि
जयप्रवृत्तिरस्माकं न युक्ता यस्मात् यानेव धार्तराष्ट्रान्वयं ह॰
त्वा न जिजीविषाम एव न जीवितुमिच्छामो राज्यादिभ्यो भोगस्य
शंकापि का ते एव धार्तराष्ट्राः प्रमुखे अग्रे युद्धार्थमवस्थिताः प्र
वर्तंते ६ ॥

रामवीरसमिहोयिनी ॥

ननु युद्धमेव स्वधर्मत्वाच्छ्रेयस्करं तव न तु भैक्षचर्येत्याशंक्याह
न चैतदिति भैक्षचर्यायुद्धयोर्मध्ये कतरन्नोस्माकं गरीयः श्रेय॰
स्करमित्येतदपि वयं न विद्मः किं भैक्ष्यं गुरुवधादिपापजनकत्वा
भावाच्छ्रेयस्करमुत युद्धं स्वधर्मत्वादिति कोटिद्वयस्य तुल्यत्वा॰
दुत्कटैककोटिज्ञानाभावेन संदिहाना एव वयमिति भावः न च प्रवृत्ततया
स्वहतिरूपस्य युद्धस्यैव यथाकथंचित्कर्तव्यतायां निश्चितायाम
पि किंचित्फलं पश्यामो नेदं पपते जयस्य संदिग्धत्वादित्याह यद्वे
ति वयं धार्तराष्ट्रान्किं जयेम किं वा ते नोस्मान् जयेयुः अस्तु वा जया
निश्चयः फलाभावान्न प्रवृत्तिप्रयोजको भवतीत्याह यानेवेति
यतो यान्वयं हत्वा न जीवितुमपि नेच्छामः किं पुनः राज्यसुखानि॰
भोक्तुं ते एव धार्तराष्ट्राः धृतराष्ट्रसंबंधिनो भीष्मद्रोणादयो नोस्मा
कं प्रमुखे संमुखे अवस्थिताः युद्धार्थमिति शेषः तस्माद्भैक्षाद्युद्धमवर
मिति सिद्धम् ६ ॥

नचैतद्विद्मइति उभयोर्बलसमानयोर्मध्येकतरन्नोगरीयः गरीयोन
भवतिर्लघवावहमित्येतन्नविद्मइतिसंबंधः कयोरुभयोस्तदाह यद्वेति
वाइतिवेः यद्विधिषाचरणेनवयंभीष्मादीनूगुरून्जयेमयदिवापापभ
यात्पक्षपाताज्ञानस्मान्तेजयेयुः एतयोर्मध्येः स्माकंकिंलाघवावह
मितिनविद्मइतिपूर्वपक्षपक्षेलाघवावहइतिभावः संप्रदायव्याख्या
तपापभयाडुपरतेः अर्जुनेनोचिता अस्मिन्निहितव्याख्यानेद्वीउयापिपूर्व
त्यागस्यसंभावितत्वात ननुतर्हिभीष्मद्रोणादीनन्यानगुरूनपरित्यज्य
दुर्योधनादीनांवधेकिमितिनयतसेइत्याशंक्याह यानेवेति यानेवभी
ष्मादीन्हत्वावयंदयजीविताननिति इच्छामहेः तएवभीष्मादयोधा
र्तराष्ट्राः संतोदुर्योधनादीनांतादात्म्यापन्नाः संतस्तान्दृष्ट्वेनोनिहतिप्र
मुखेविमुखेस्थिताः कथमेतान्परित्यज्यदुर्योधनादयोहंतव्याइतिभा
वः॥ तदेवंभीष्मादिसंकटव पापाभिलाषचरंतीतिश्रुतिसिद्धमिदाच
र्येनस्याभिलाषंप्रदर्श्यविधिहुपसत्तिमपितस्संकटव्याजेनैवदर्श्यय
ति ६ ॥

गी॰
टी॰ द्वि॰

30

भाषाअनुवाद

औरजो हम अधर्म्म अंगीकार करैं तौभी तो हमारी जयवा पराजय होगी यह भीहम नहीं जानते हैं कि दोनों मे क्या होगा सोई कहते हैं कि होय हमी रणमे उनको जीतलें नतुवा वेई सव हमे जीतैं पर न्तु हमारी जीत होनेसे भी विचार देखो कि वहहमारी हारही है क्यों कि जिनकोनाश करिके हम और संसार मे प्राणधारण करना नहीं चहते सोई धृतराष्ट्रके पुत्र सव रण भूमि मे हमारे सामने अ र्थ खडे हैं ६।

कवित॥

नहि हमजानें यहका दरता साथी कहों कादरता हमारी पतो वडीसरवदाइहे जोउ हमजीतपावें इनहीकोजीतकर अथवा यहजीतें हमे हमकोहराइहै॥ औरइक वात यह जिनहूकोमार हमजीवनकी आसको उनदेउगेभुलाइहे॥ सोइधृतराष्ट्रसुतकौरव विचारदेखो षडे़ पसमयुद्धमाहिस नमुखआइहै ६॥

गी
टी· द्वि·

31

कार्पण्यदोषोपहतस्वभावः पृछामित्वांधर्म्म
संमूढचेताः यच्छ्रेयः स्यान्निश्चितंब्रूहितन्मे
शिष्यस्तेहंशाधिमांत्वांप्रपन्नं ७ ॥

भाष्यंनास्ति

आनंदगिरिकृतटीका

सममधिगतसंसारदोषजातस्यातितरां निर्विण्णस्य मुमुक्षोरुपसन्नस्या
त्मोपदेशसंग्रहणेऽधिकारं सूचयति कार्पण्येति योऽल्पां स्व-
ल्पामपि स्वक्षतिं न क्षमते स कृपणस्तद्विधत्वादखिलोऽनात्मविद
आत्मपरमपुरुषार्थतया कृपणो भवति यो वा एतदक्षरं गार्ग्यविदित्वा-
स्माल्लोकात् प्रैति स कृपण इति श्रुतेः तस्य भावः कार्पण्यं दैन्यं तेन दो
षेणोपहतो दूषितः स्वभावश्चित्तमस्येति विग्रहः सोऽहं पृच्छाम्यनुप
न्नेत्वा त्वां धर्म्मसंमूढचेताः धर्मो धारयतीति परं ब्रह्म तस्मिन् संमूढ
मविवेकतां गतं चेतो यस्य ममेति तथाह मुक्तः किं पृच्छसि यन्निश्चि
तमैकान्तिकमनापेक्षिकं श्रेयः स्यात्तेरागनिहत्निवर्त्यैकान्तिक
मनात्यन्तिकं स्वर्गवदापेक्षिकं वा तन्निःश्रेयसं मे मह्यं प्रब्रूहि ना
पुत्रायाशिष्यायेति निषेधात् न मे वक्तव्यमिति मा मंस्थाः यतः शि
ष्यस्तेहं भवामि शाध्यनुशाधि मां निःश्रेयसं त्वामहं प्रपन्नोस्मि ७

स्वामिकृतटीका

तस्मात्कार्पण्येति एतान्हत्वा कथं जीविष्याम इति कार्पण्यं दोषः स्व
कुलक्षयकृतः ताभ्यामुपहतः अभिभूतः स्वभावः शौर्यादिलक्षणो य
स्य सोऽहं त्वां पृच्छामि तथा धर्मे संमूढं चेतो यस्य सः युद्धं त्यक्त्वा भिक्षाटनम
पि धर्मो वा अधर्मो वेति संदिग्धचित्तः सन्नित्यर्थः अतो मे यन्नि
श्चितं श्रेयो युक्तं स्यात् तद्ब्रूहि किंच तेऽहं शिष्यः शासनार्हः अतस्त्वां
प्रपन्नं शरणागतं मां शाधि शिक्षयोपदेशं कुरु ७ ॥

पिपुराणबभाष्यंनास्ति

रामानुजभाष्यं

ननु गुरुमारभ्य निहत्य या पापानां भवतो धार्तराष्ट्रान्समस्यादस्युरिति चेत्
अस्तु नद्धलब्धजयात् धर्मादस्माकं धर्माधर्ममजानन्त्रि स्मैर्हननं मे।

गी·
टी·द्वि·

वगरीयऽइतिमेमतिर्भातिऽस्ववकायत्नस्यं श्रेयऽइतिनिश्चितंनतत् नवशर।
णागतायतवशिष्यायमेब्रूहीतिमात्रकृपणोभगवत्पदांबुजमधुपस
मार ७ ॥ [illegible]

अभिनवगुप्तकृतटीका ७ ॥ नास्ति

परमार्थप्रपा

अथवाकुलचित्तःसन्श्रीकृष्णमेवपृच्छतिकार्पण्येति स्नेहानुबंधिनो
गोति विर्णाजीवरक्षणमेवकार्पण्यं तथानहवेदोषलाभाउपह
तःस्वभावश्चित्तंयस्यसतथाकार्पण्येनात्रधर्मपरित्यागः हिंसायांच
श्रोतधर्मपरित्यागः एवमुभयथाधर्मसंमूढचेताः धर्मविषयेविमू
ढचेतोयस्येत्यर्थः अतःपरमुभयधर्मसरक्षणेनयच्छ्रेयऽइतित
स्यात्तन्मेनिश्चितमसंदिग्धंयथास्यात्तथाब्रूहियतोहंतेशिष्यःअ
तस्त्वांप्रपन्नंशरणागतंमांशाधिशिक्षयएतत्प्राचार्यवाक्यहवोवेरेतिश्रुतेः ७

वनमालीकृत

ततःकिमित्यतआहकार्पण्येतिएतान्हत्वाकथंजीविष्यामऽइतिका
र्पण्यदोषश्चकुलक्षयकृतस्ताभ्यामपहतोभिभूतःस्वभावःपौरुष
लक्षणोयस्यसोहत्वांपृच्छामि तथाधर्मेसंमूढचेतोयस्यसःयुद्धंस
क्षाभिक्षाटनंक्षत्रियधर्मःउत्तयुद्धंकृत्वाराज्यपालनंधर्ममितिसंदिग्ध
चित्तःसन्निर्णयःअतोममयन्निश्चितंश्रेयःयुक्तंस्यात् तद्ब्रूहिकिंचते
हेशिष्यःशासनार्हःअतस्त्वांप्रपन्नंशरणागतंमांशिक्षय ७

कुसमवैजयंतीटीकी

एवंनकारुहेविजयमित्यपिनैलोक्यराज्यस्यनत्रवैहिकामुष्मिक
फलनिर्वेदःकिंज्ञेयराज्येनतत्रशमःकिंभोगैरित्येवदमःनत्मेहेम
नरमित्यवज्ञान्तिःपश्यपाते नपरपन्नीयत्रलोभाभावरन्यादिसाध
नकदम्बसम्पन्नोपिगुरुपसत्तिविनोपायाःसर्वेनसिद्धरितिवि
चिन्त्यास्माकंधर्म्योधर्ममजानतोकिंभिक्षाटनंश्रेयउतस्वधर्मभूतंयु
द्धंवेतिजिज्ञासार्थंश्रीकृष्णंस्वसारथिंजगद्गुरुंकृतवानितिसंजयो
श्रुतराष्ट्रंप्रत्याहकार्पण्येतिदेहात्मनोर्याथात्म्यस्वभावाज्ञानेनयानेव
हत्वानजिजीविषामस्तितिदेहात्मकममत्वंकार्पण्यंयोवायतदर्दा ।

गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः कथं न ज्ञेयमस्माभिः
पापादस्मान्निवर्त्तितुमित्यादिना कुलक्षयकृतो दोषः कार्प्पण्यदो
षाभ्यामुपहतो विनष्टः स्वभावः शौर्यादिलक्षणो यस्य स तथा
अत एव धर्मसंमूढचेताः को वा मम धर्मः एतान्हत्वा राज्यपालनं वा
सर्वास्त्यक्त्वारण्यगमनं वेति धर्मनिर्णयविषये सम्यङ्मूढमनिश्चितं
चेतो यस्य स तथा अतस्त्वां पृच्छामि मां किं पृच्छसीति चेत्तत्राह यच्छ्रेय इति
मम यतः श्रेयः परमार्थरूपं फलं स्यात् तन्निश्चित्यातिदुस्तरागाधधर्मसं
शयरूपाकूपारे निमज्जमानाय मे मह्यं ब्रूहि ममैवाग्रे किं करवाणीत्यात्मीयं मां
ज्ञात्वा कथयेत्यर्थः ननु स्वशिष्यानेव गुरवो धर्मानुपदिशन्ति त्वं तु मम
मित्रमसि त्वामहं कथमुपदेक्ष्यामीति चेत्तत्राह शिष्य इति तेऽहं शि-
ष्यः शासनार्हस्त्वयि दृढविश्वस्तोऽस्मि त्वदाज्ञां सर्वं करिष्यामीति भावः
त्वां प्रपन्नं शरणागतं मां त्वं शाधि शिक्षय मम यमपि शिष्यः अहमेनं कथं क
थयामीत्येवंरूपं संदेहमन्यकामा मा मा त्वमसाकृत्वा स्वस्वाभाविककारुण्
याशिक्षयेत्यर्थः ७ ॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं ॥ ७ ॥

मधुसूदनीटीका

तदेवं भीष्मादिसंकटवशाद्युध्यायाः भिक्षाचर्यं वरं नीति स्फुरति सि
द्धभिक्षाचर्यं ज्ञानसाभिलाषं प्रदर्श्य विधिवदुपसत्तिमपि तत्संकटवा
ज्ञेनैव दर्शयति योऽल्पः स्वल्पामपि वित्तक्षतिं न क्षमते स कृपण इति लो
त्वाद के प्रसिद्धस्तद्धर्मयोगित्वादनात्मविदप्राप्तपुरुषार्थतया कृपणो भवति यो
वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः तस्य भा
वः कार्पण्यमनात्माध्यासवत्तन्निमित्तोऽस्मिन्जन्मन्येव मदीया एते
षु हतेषु किं जीवितेनेत्यभिनिवेशरूपो ममतालक्षणो दोषः तेनोपहत
स्तिरस्कृतः स्वभावः क्षात्रो युद्धोद्योगलक्षणो यस्य स तथा धर्मविषये निर्ण
यकप्रमाणादर्शनात्संमूढं किमेतेषां वधो धर्मः किमेतत्परिपालनं धर्मः
तथा किं पृथिवीपरिपालनं धर्मः किं वा यथावस्थितोऽरण्यनिवास एव
धर्मः इत्यादिसंशयैर्धर्मे चेतो यस्य स तथा न चैतद्विद्मः कतरन्नो गर-
रीय इत्यत्र व्याख्यातमेतत् एवंविधः सन्नहं त्वामिदानीं पृच्छामि

गी.
टी. द्वि

श्रेयः श्रवणं तत्संगः अतो यत्नि स्थिरं ऐकान्तिकमात्यन्तिकं च श्रेयः परमपुरुषा
र्थभूतं फलं तस्मात्केमहे ब्रूहि साधनानंतरमवश्यंभावित्वमैकान्तिकत्वं जा
तस्याविनाश आत्यंतिकत्वं यथा लोके औषधे कृते कदाचिद्रोगनिवृत्तिर्न भवेद
पि जातापि च रोगनिवृत्तिः पुनरपि रोगस्य विनाशात् एवं
कृतेपि यागे प्रतिबंधवशात् स्वर्गो न संभवेदपि जातोपि स्वर्गो दुःखा
क्रान्तो न श्यतीति चेति नैकान्तिकत्वमात्यन्तिकत्वं वानयोः तदुक्तं दुःखत्रया
भिघातात् जिज्ञासा तदपघातके हेतौ दृष्टे सापार्था चेन्नैकान्तात्यन्ततो
भावादिति दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः तद्विप
रीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानादिति च ननु त्वं मम सखा न तु शि
ष्योऽतस्त्वादृशि ष्यस्येदमिति तदनुशासनयोग्यता ददत एव शिष्यप
द्मवाप्तिं न सखात्वस्य तज्ज्ञानत्वात् अतस्त्वां प्रपन्नं शरणागतं मां शाधि
शिक्षय करुणयानतु ऽ शिष्यत्वपाकयोपेत्वणीयोदमित्यर्थः प
नेनतद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं
२ मुंडवैवाहणीवं रूणांपितेन मुपसन्नायाधीहि भगवो ब्रह्मेत्यादि गुरूपस
त्तिप्रतिपादकश्रुत्यर्थो दर्शितः ७ ॥

सदानंदीकृत

तदेवं सर्वसंदर्भसंसारदोषवारिधिः कृत्स्नेन विवेकादिसाधनान्यपि
कारिणः १ शोकादिमोहसंपाशस्योपाहृत्तत्वेन कृत्स्नशः नच श्रेयोन्व
पश्यामीत्यत्र श्रेयोपवर्गकः २ उपन्यस्तस्ततो न्यत्र श्रेयः श्रत्यर्थितः स्फुटं नि
त्यानित्यविवेकोऽसौ दर्शितः स्पष्टहेतुकः ३ नकांक्षे विजयं कृष्ण त्रै
हिकफलेऽरतिः अपि त्रैलोक्यराज्यस्येत्यत्रामुत्रफलेऽरतिः ४ किंनो
राज्येनचेत्यत्र शमः प्रोक्तस्तथा दमः यद्यप्येते न पश्यन्तीत्यत्र निर्लोभ
तात्मनः ५ तन्मे क्षेममन्तरं चैत्यनि तितिक्षासाधनान्तरं मोक्षेभ्यस्मपीत्य
त्र भिक्षाचर्योपलक्षिता ६ संन्यासो दर्शितो ज्ञायत्कृपसदनस्फुटं ज्ञा
तसंसारदोषस्य निर्विण्णस्य पुनोच्यते ७ तदेवद्रोणभीष्मादिवधसंकटहे
तुकां भिक्षाचर्यं जनस्येच्छां प्रदर्श्याथ यथाविधि ८ तत्संकटच्छलेनैवमु
पसत्तिः प्रदर्श्यते कृपणोऽनात्मवित्स्वभावः कार्पण्यमुच्यते नत्रिमि

तोममैतेहमेतेषामितिनिश्चयः दोषस्तेनोपहतः स्वभावोयस्यसतथा ९
निर्णायकप्रमाणस्यादर्शनाद्धर्मगोचरे किमेतेषांवधोधर्मः किमेतत्परि
पालनं इत्यादिसंशयग्रस्तचेतोयस्मादमीदृशः त्वांपृच्छाम्यधुनाश्रेयआ
त्यंतिकमसंशयं १२ यन्निश्चितंस्यात्तन्मह्यंब्रूहिशिष्योर्थिनेपरं ननुत्वंमम
सखाकस्मिन्शिष्योसीतिचेच्छृणु १३ तवानुशासनार्हत्वाच्छिष्यएवभवाम्य
हं नसखात्वान्न्यूनबोधत्वादतस्त्वांशरणंगतं १४ कृपयाशिक्षयत्वंमांनोपे॰
क्षेथाःशिष्यशोकया १५

नीलकंठी

उक्तसंशयग्रस्तानेवहृच्छति कार्पण्येति कार्पण्यंदीनत्वं स्वभावःशौर्यंते
जोधृतिर्दाक्ष्यमित्यादिनावक्ष्यमाणलक्षणः शेषंस्पष्टं ७ ॥

गी·
टी·टि·

34

एवमनुक्रोश्य संकटपातेन **ज्ञानेद्री टीका** किंकर्तव्यता मूढो भगवन्तं विज्ञापयति

कार्पण्येन बन्धुस्नेहजनितेन जयाख्येन चित्तवैक्लव्येनोपहतः
स्वभावो धैर्यं यस्याहं विवेकादिर्यस्याहं सोऽतः पृच्छामि धर्मसंमूढचेता अदि
(वीतेधिपतायां) नायां संशयितचित्तस्त्वां शास्तारं पृच्छामि यत्ममयत्किंचि
च्छ्रेयः प्रशास्ततरं तन्निश्चितं ब्रूहि यतस्तवाहं शिष्यः शासनी
यः प्रतो मां प्रपन्नाशिष्यं शरणागतं शिक्षय ७ ॥

रामकंठी टीका

हे भगवन्नहं कार्पण्यदोषेण बन्धुहिंसाजनितेन दैन्येनोपहृ
तस्वभावः प्रध्वंसितत्त्वधर्मो नष्टवधर्मे पृच्छामि त्वा दितेषाया
वेषु संमूढचेताः संशयितमनस्कोऽभवन्नतः पृच्छामि यतस्तु
यन्मे वस्तु श्रेयः प्रशस्यतरं स्यात्तन्निश्चितं निःसन्देहमादिश
यतः शिष्यः शासनीयस्तवाहम् एतेन प्रपन्नस्तु प्रपन्नं सन्तं
गुरुर्भूत्वा मां शाधि युग्मादयेति किंच ७ ॥

(Left margin: ...यसमस्कर्मोत्... नेधर्मस्तुल्वं... क्लान्या ... तया प्रतिपा... स्वात्मनिवेदु... भिमानदोषमा... कमानो भवति... यात्मानमात्मा... वेदयन्नाह)

लाभिकी टीका

(नस्मा) कार्पण्येत्येतान्हत्वा कथं जीविष्याम इति दैन्यं दोषः स्वकुलक्ष
यकृतः ताभ्यां संमूढमिताटनेयुद्धं वा त्वमियस्य श्रेय इत्येवं
सान्दिग्धचित्तः शिष्यः शासनार्हः नत्वसावा शिक्ष
यशरणागतं मां ७ ॥

(Left margin: नस्मा / तस्तिरस्कृतः शौर्यधैर्यत्वद् स्वसत्ताधा; right margin: एवंविधसंतापच्छामि येनेयन्निश्चितं श्रेयः प्रशस्तरं स्यात्तद्ब्रूहि निर्वाहितं; below line: तस्मात्)

पंचोली टीका

तस्मात्संशयानो निर्णेतुं पृच्छति कार्पण्येति एतान्हत्वा कथं जी
विष्याम इति कार्पण्यदोषस्वकुलक्षयकृतः ताभ्यामुपहतस्वभि
भूतः स्वभावः शौर्यलक्षणो यस्य सोऽहं कार्पण्यदोषोपहतस्वभा
वः कृपणो वा कृपणस्य भावः कार्पण्यं दैन्यमज्ञाननिमित्तो शोचना
तदेव दोषस्तेन उपहतस्वभावस्त्वं नत्वां पृच्छामि कथं धर्मसंमूढ
चेताः धर्मे संमूढं चेतो यस्य विवेकविज्ञानाभावादयात् प्रथवाध
र्मसंमूढं युद्धं त्यक्त्वा भिक्षाटनमपि क्षत्रियस्य धर्मः प्रधर्मो वेति सं
हिग्धं चेतः चित्तं यस्य सोऽहं धर्मसंमूढचेताः प्रतो यन्मे श्रेयः हित
स्यात्तन्निश्चितं ब्रूहि किंच तेऽतव शिष्योऽहं शिष्यः शासनार्हः प्रतस्त्वां प्र
पन्नं शरणमागतं मां शाधि शिक्षय ७ ॥

अथ समरकर्मानुष्ठानं धर्मसुखबाधकत्वात्स्वविदार्थेन त्यागमति
प्राप्यापि स्वात्मनि वैदुष्याभिमानदोषमाशंकमानो भगवति
समाधानमात्मानमावेदयन्नाह कार्पण्येति यद्वा भिक्षाशन
मेव शुद्धश्रेयस्करमिति मते यद्यपि सम्यक्तया निश्चितवांस्त
थापि गुरुसमक्षमेव सम्यक्त्वं द्रष्टुं पृच्छति इति मत्वा भगवंतमेव पु
नः पृच्छति कार्पण्येति यः स्वल्पामपि स्वक्षतिं न क्षमते स कृप
णो लोके प्रसिद्धस्तस्य भावः कार्पण्यं तत्र च बंधुहत्याजनितदै
न्यं तदेव दोषोऽल्पस्य राज्यार्थं बहुफलनाशकत्वात्तेनोपहतस्ति
रस्कृतः स्वभावः क्षात्रोद्बुद्धशौर्यगलक्षणो यस्य स तादृशः अ
तएव धर्मविषये निर्णायकप्रमाणाभावात्संमूढं किमेतेषां व
धो धर्मः किं वैतत्परिपालनमित्यादिभिः संशयैर्व्यामिश्रं चेतो यस्य
स तादृशोऽहं त्वां धर्मनिर्णायकं पृच्छामि द्वयोर्मध्ये यच्छ्रेयस्कं
स्यान्निश्चितं निःसंशयं यथा स्यात्तथा मे मह्यं ब्रूहि उपदिश न
नु नाशिष्यगुणाय धर्मं प्रब्रूयादिति स्मृतेः कथं त्वां सत्त्वायं प्रब्रू
यामित्याशंक्याह शिष्य इति अहं ते तव शिष्यः शासनीयोऽस्मि त
तोऽन्यत्वानन्नवादीति भावः अतश्शाधि मां प्रपन्नमात्मशरणागतं शिक्ष
यादय करुणया शिक्षय न तु शिष्यमां कथयोपेक्षणीयोऽहमि
ति भावः ७ ॥

कार्पण्येति कार्पण्यं अस्मिन्जन्मन्येतावन्महीयांस्तेषु हतेषु किं जी
वितेनेत्येवं विधानुसंधानेन एवं ममतालक्षणो दोषस्तेनोपहत
स्तिरस्कृतस्वभावः क्षात्रो योगलक्षणो धर्मो यस्य सः तथा धर्मे धर्मवि
षये निर्णायकप्रमाणादर्शनात् किं तेषां वधो धर्मः किं वा एतत्परि
पालनं धर्मस्तथा किं पृथ्वीपालनं धर्मः आहोस्विद्यथावस्थितेऽरण्ये
निवास एव धर्म इत्यादि संशये मूढांतःकरणः सन् त्वामिदानीं पृच्छा
मि अयं प्रश्नानुषंगः अतो यन्निश्चितं ध्रुवं चलं मम विनाशं सर्वशास्त्रावि
रुद्धं श्रेयो भवति तन्मे ब्रूहि ननु त्वं मम सखा न तु शिष्यो अहं शि नैत्रा
ष्यस्तेऽहमिति वदन्नुपासनयोग्यत्वादहं शिष्य एव न सखा त्वं तु ज्ञा
नत्वादिति भावः अतः प्रपन्नं शरणागतं मां शाधि शिक्षयेत्यर्थः ७

गी·
टी·टि·

36

भाषाअनुवाद

इनकुटुंबकेलोगोंका वधकरिके अपने प्राण कैसे करि राखेंगे इस
चिन्ता कोकार्पण्य कहते और दोष जो कुलक्षय कृत पाप हैं य
ही दोनो बातों से हमारी शूरता नष्ट होगई इस से धर्म विचार मे
हमारी बुद्धि भ्रष्ट है किसंग्राम छोड़ भिक्षान्न भोजन करना उचित
को उचित किअनुचित इस संदेह से व्याकुल हो हम आपसे पूछते हैं आप कृपा करि कहो
कि जिसमे अत्यन्त परम कल्यान हमारा होसो क्यों कि हम आपके
शिष्य औ शरणागत हैं शरणागत पर दया करना महात्माकोउ
चित है ७

सवैया॥

कार्पन्यसो को प्रगट्यो आपकहांजादिके दोषते ना
ष्टयो स्वभाव है पूछौं हौं याहिते हम्सपनो को मे धर्म
में मूढ़चित मूढ़िप्रभाव है होवें कल्याणनिश्चयना
हीसें सो उपदेश मोकों कीजें करुभाव है आके मैं मो हू
कहो समझाय अब सरणमें पर्यो तेरो शिष्यभाव है ७॥

37

नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ८ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

कुतो निःश्रेयसमेव त्वं पृच्छसि तत्राह नहीति यस्मान्न प्रपश्यामि किं न प्रपश्यसि ममापनुद्यादपनयेत् यच्छोकमुच्छोषणं शतप नमिन्द्रियाणां तन्न पश्यामि ननु शत्रून्निहत्य राज्ये प्राप्ते शोकनि वृत्तिस्ते भविष्यति नेत्याह अवाप्येति अविद्यमानः सपत्नः शत्रु र्यस्य तदसपत्नं युक्तं राज्यं राज्ञः कर्म प्रजारक्षणपरिपालनादि तदिदमसां भूमाववाप्यापि शोकापनयकारणं न पश्यामीत्यर्थः नहि देवेन्द्र त्वादिप्राप्तौ शोकापनयस्ते भविष्यति नेत्याह सुराणामपीति तेषामाधिपत्यं अधिपतित्वं स्वाम्यमिन्द्रत्वं ब्रह्मत्वं वा तदवाप्या पि मम शोको नापगच्छेदित्यर्थः ८ ।

स्वामिकृतटीका

त्वमेव विचार्य यद्युक्तं तत्कथं विं निवेत तत्राह नहीति इंद्रियाणामुच्छो षणमतिशोषकरं मदीयं शोकं यत्कर्मापनुद्यात् अपनयेत् तदहं न प्र पश्यामि यद्यपि भूमौ निष्कण्टकं समृद्धं राज्यं प्राप्स्यामि तथा सुरेन्द्रत्वम पि यदि प्राप्स्यामि एवमपीदं तत्सर्वमवाप्यापि शोकापनोदोपायं न प्रपश्यामीत्यन्वयः ८ ॥ नो

पिशाचभाष्यं नास्ति

रामानुजभाष्यं नास्ति

एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गतं क्षत्रियाणां युद्धं परमधर्ममप्यधर्मं मन्वानं धर्मबुभुत्सया शरणागतं पार्थमुद्दिश्या त्मयाथात्म्यज्ञानेन युद्धस्य फलाभिसंधिरहितस्य स्वधर्मस्यात्मयाथार्थ्या त्मप्राप्त्युपायताज्ञानेन च विना अस्य मोहो न शाम्यतीति मत्वा भगवता परमपुरुषेणाध्यात्मशास्त्रावतरणं कृतं ८ ॥

गी·
टी· हि·

अभिनवगुप्तकृतटीका ८ नास्ति

परमार्थप्रपा

उद्धांनीत्वमेवविचार्यपृष्टेनत्वकृष्णेतिचेत्तत्रोर्वरीतंप्रमेयंप्र
नर्वदतिनहिप्रपश्यामीति अस्मिन्संग्रामेकार्यंयद्यपितेनकिं
अस्माकंजयेभूलोकराज्यं तथास्माकंमरणेस्वर्लोकराज्यंअनयो
रुभयोर्मध्ये ... एकमपितथानप्रपश्ये यदस्माकंशोकमपनुद्या· प·
त्नाशयेत् किंभूतंशोकं इंद्रियाणामुच्छोषणं सकलेंद्रियव्या
त्नकं अथभूलोकराज्यंवर्णयति असपत्नं निष्कंटकंऋद्धंसमृद्धं
स्वर्लोकराज्यंचसुराणांत्रयस्त्रिंशत्कोटिप्रमितानांदेवानामाधिप
त्यंतत्रभूलोकराज्येयेभोगास्तेरुधिराक्ताः स्वर्लोकभोगाअपिपुन·
र्भवनात्क्षणभंगुराः अतः शोकप्रदाः नतुशोकशामकाइत्यर्थः
॥ ८ ॥

वनमालीकृत व्

इंद्रियाणामुच्छोषणं यन्ममशोकमपनुद्यान्नाशयेत् तं नहिप्र
पश्यामियद्यपिभूमावकंटकंराज्यंप्राप्स्यामितथासुरपतित्वम·
पिप्राप्स्यामि एवंयदिद्वेनतत्सर्वंप्राप्स्यामिशोकापनोदनायतन्न
प्रपश्यामीत्यर्थः ८ ॥

कुसमवैजयंतीटीका

ननुवर्णाश्रमादिश्रेयस्करात्धर्मविदोऽनेकेब्राह्मणाउपदेष्टारःस
२ न्तितान्हित्वात्वत्तएवश्रेयवंशोऽवंनवमानत्वेयंमामेवात्मनःश्रेयःकथं
पृच्छसीतिचेत्तत्राह नहीति हियस्मात्यथायत्तववचोममेंद्रिया·
णांबाह्यान्तःकरणानामुच्छोषणमतितापकरंशोकमपनुद्यात् अ
पनयेत् तथाम्येषांब्रह्मरुद्रेन्द्रादीनामपितद्वचोनप्रपश्यामिनानुभ
वामितस्मात्सर्वेषामुपदेष्टॄणांत्वामेवात्मश्रेयसेप्रपन्नएकाकित्वामे
वप्रपन्नंमांशाधीतिभावः नन्वेतान्जित्वायदाराज्यादिकंप्राप्स्यसि
तदैवविशोकोभविष्यसीत्यर्थप्रश्नेनरूपसम्पाकिमितिचेत्तत्राह

अवाप्येति भूमौअसपत्नंरिपुरहितंऋद्धंधनादिसम्पन्नंसंपन्नंराज्यं-
सुराणांचस्वा दिनामाधिपत्यंचअवाप्यप्राप्यापिसकलसम्पन्नस
म्पन्नैहिकामुष्मिकभोगभोक्तुरपिममशोकापनोदनापनववचना
दन्यत्किमपिनभवेदित्यभिप्रायः ८ ॥

मधुसूदनी टीका

ननुस्वयमेवत्वंश्रेयोविचारयकृतसंप्रश्नोसिकिंमांशिष्यत्वेनेत्यत
आहयच्छ्रेयःप्राप्तसत्कर्तममशोकमपनुद्यादपनुदेन्निवारयेत्त
त्प्रपश्यामि हियस्मात्तस्मात्मांशाधीति सोहंभगवः शोचामिते·
त्व माभगवान्शोकस्यपारंतारयत्विति श्रुत्यर्थोदर्शितः शोकानपनो
दो देकीदृशस्माच्छोकात्नहिशोषणमाह इंद्रियाणामुच्छोषणमितिस
र्वदासंतापकरमित्यर्थः ननुपृथ्वीप्रयतमानेवशोकनिहत्रिभ· नस्य
विष्यति जेष्यसिचेत्तदाराज्यप्राप्स्यसनरथावस्वर्गप्राप्स्या द्वाविमौ
दे पुरुषौलोकेत्यादिधर्मशास्त्रादित्याशंक्याह अवाप्येत्यादिना शत्रुवर्जि
तेसस्यादिसंपन्नंचराज्यंतथासुराणामाधिपत्यंहिरण्यगर्भत्वपर्यं·
तमैश्वर्यमवाप्यस्थितस्यापिममयच्छोकमपनयात्तन्नप्रपश्यामीत्य
न्वयः नचयथेहकर्मचितोलोकः क्षीयतएवमेवामुत्रपुण्यचितो·
लोकःक्षीयतइतिश्रुतेःयत्कृतकंतदनित्यमित्यनुमानात् अस्य·
हेण्यैहिकानांविनाशदर्शनात्तुत्रैहिकआमुत्रिकोवाभोगःशो
कनिवर्तकः किंतुसंसत्ताकालेपिपारतंत्र्यादिनाविनाकालेपिवि ग्र
च्छेदाच्छोकजनकएवेतिनयुद्धंशोकनिवर्तकंयेनतुष्येयमित्यर्थः एते
नैहामुत्रभोगविरागोधिकारीविशेषणत्वेनदर्शितः ८

सदानंदीकृत

ननुत्वंकृतिसंपन्नः स्वयंश्रेयोविचारय परशिष्यतयाकिंनेत्या
शंक्याहसद्गुरुः २ यच्छ्रेयःकर्तव्यंमेसन्ममशोकंनिवारयेत् न
तत्प्रपश्याम्यहंयस्मात्तस्मान्मांशाधिशोकिनं २ शोकंसंतापकं
नित्यमिंद्रियाणामशोषकृत नत्वाजौघ्नतमानस्यशोकस्तेलयमे

गी·
टी हि·
39

ष्यति ३ तेष्वसितंतदाराज्यप्राप्त्यावास्वर्गतोन्यथा अत्राहाविभि
ष्ठीनेराज्यंसस्यादिसंपन्नं ४ हिरण्यगर्भपर्यंतमैश्वर्यंप्राप्यसर्वतः
यत्स्थितस्यापिमेशोकमपनुयात्तनलभे ५ नचघ्येद्वैतिवेदनकृ
तकेनास्तिनित्यता कृतकंयत्तदनित्यमुक्तापीतिविनिश्चितं ६
नैहिकामुष्मिकौभोगौममशोकनिवर्तकौ दृष्टामुत्रफलेनेन·
विरागोदर्शितःपुनः ७ ॥८॥

नीलकंठी

ननुत्वदंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतपेतियुद्धमेवश्रेयइत्युक्तं
किंपुनःपृच्छसीत्यतआह नहीति बंधुनाशनिमित्तःशोकोराज्य
लाभेनस्वर्गाधिपत्यलाभेनवानिवर्तयिष्यतइतिपुद्वादन्यंकं
चित्तनिवृत्तिरूपशमोपायंब्रूहीत्याशयः अत्रार्जुनविषादव्या·
जेनब्रह्मविद्याधिकारिविशेषणंभेदचर्याऽदृष्टामुत्रार्थफलभोग
विरागश्चदर्शितः ८ ।८

आनंदी टीका

भूमावसपत्नमृद्धं राज्यं च प्राप्य सुराणामपि इंद्रियाणां बाह्याभ्यं
तराणां शुच्छोषणं संतापकं शोकं योपनुद्यात् निरसेत् तं
तं विना न पश्यामीति त्वाहं प्रपन्नः ८ ॥

रामकंटी टीका

दिव्य राज्यं सुराधिपत्यं चावाप्य यच्छोचनं मम स्यात् तन्निवारकं कं
चिदपि न पश्यामीति संबन्धः यस्मात् महं कंचित्त्वां वर्ज
यित्वा न तर्कयामि यो मम शोकं शोचनमपसारयेत् कीदृशं
मिंद्रियाणां बाह्याभ्यंतराणां करणानां शुच्छोषणं संतापकं
किं कृत्वा शोचनं निर्विपक्षे स्फीते भूपालाधिपत्यं लब्ध्वापि अथ
वा त्वल्पमिदमुच्यते देवानामपि स्वर्गमधिगम्य मम कार्पण्य
दोषोपहतस्वभावस्य शोचनमेव स्यात् अतो मां शाधीति प
वं शोचनक्रियापेक्षमवाप्य क्रियायाः पौर्वकाल्यमवसेयम्
न त्वपनोदनक्रियापेक्षम् सत्यपि हि सति निष्कंटकत्वा
त्कृष्टदोषः समन्वयाभावात् स्वार्थे दोषाद्वा निवारः स्यात् [illegible]
॥

लाक्षिकी [illegible] टी.

त्वमेव विचार्य यदुक्तं तत्कुरु इति चेत्तत्राह तत्किमपि अहं
न पश्यामि अनपेयं यद्वस्तु इंद्रियसंतापकं शोकं राज्यं यद्यप्यत्र भूमौ समृद्धं
प्राप्स्यामि निष्कंटकं तथा स्वर्गे इंद्रत्वमपि यदि प्राप्स्यामि एवं सर्वमभीप्सितं प्राप्यापि शोकापनोदनोपायं
न पश्यामीत्यन्वयः ॥ ८ ॥

पैचोली टीका

त्वमेव विचार्य यद्युक्तं तदुक्तं विनिश्चित्य तत्राहत्रियाणामुद्दे
स्वधर्म इति तदेव निश्चयेन कर्तव्यमिति भगवदुपदेशः स्वयमेवा
शक्या युद्धे क्रियमाणे जयस्तावत्पाक्षिकः निश्चयपक्षेपि
युद्धफलं भूमौ राज्यं तच्च असपत्नं निष्कंटकं ऋद्धं च तत् अवा
प्यापि मम शोकं मदीयं यत्कर्म अपनुदेत् तदहं न हि प्रपश्य
मि किं विशिष्टं शोकं इंद्रियाणामुत् प्रतिशोषकं न केवलं भू शोषणं
मौ राज्यं शोकविच्छेदकं न भवति सुराणामपि अधिपत्यं युद्धे
मरणपक्षे प्राप्तमिति तन्मात्रेपि स्वजनवधनिमित्तशोकं शां

गी॰ तिं न पश्यामीत्यर्थः भूमावसपत्नं शत्रुरहितं ऋद्धं राज्यं च सुर
टी॰ रेश्वराणामपि आधिपत्यं अवाप्य यत्कर्म कृतं तन्मम इंद्रिया
हि॰ णां शोषणं शोकं अपनुद्यात् अपनयेदहं न हि प्रपश्यामीत्य
न्वयः ८ ॥

गूढार्थसंदीपिनी॥

ननु स्वयमेव त्वं श्रेयो विचारय श्रुतसंपन्नत्वात् किं मच्छिष्यभावेनेत्यत आह नहीति हि यतः अहं तत्किमपि वस्तु वा विचारयन्न पश्यामि यद्वस्तु मम इंद्रियाणामुच्छोषणमतिसंतापकं शोकमपनुद्यादपनयेत् ननु हेतुसद्भावे भूमिराज्यलाभात्सुरराज्ये वा संग्राममरणादिना स्वर्गादिलोकप्राप्ते श्रेयसः संभवात् ततः शोकापकामाश्यत्यत आह अवाप्येति असपत्नं निर्विपक्षमृद्धं सस्यादिसमृद्धिस्फीतं भूमौ राज्यं भूपालाधिपत्यमवाप्य अथवा किं यदेतत् सुराणामाधिपत्यमिंद्रत्वमपि प्राप्य शोचनमेव मे स्यात् बंधुविरहजनितात्यंतासह्यशोकाभिभूतत्वादित्यतस्त्वमेव गुरुर्भूत्वा मां शुस्मादय येन शोकानभिभूततया एकवनिश्चयवान्भूयासमिति भावः ८ ॥

ननु त्वमेव किं ब्रूषे यो विचारय त्वत्तः संपन्नो भीत्याशंक्याह नहीति
ममयच्छोकमपनुद्यात्तत्तन्नपश्यतः प्रपश्यामि यतः प्राप्नोमीति सो
२ हं भगवन् शोचामि त्वं मां भगवान् शोकस्यापनेता रक्षयितेति निगूढः
अत्रार्थः शोकं विशिनष्टि इंद्रियाणामुच्छोषणमिति। इंद्रिया
णां स्वस्वविषयग्रहणप्रतिबंधकमित्यर्थः ननु भूमौ साम्राज्यमि
द्रपदं वा शोकापनोदकं स्यादित्याशंक्याह अवाप्येति अवस्थित
स्येत्यध्याहारः यद्यहं तेन तावन्नतः स्यां किमहं तेन न कुर्यामित्यत्रार्थो
निगूढः एवमर्जुनोक्तिमनूद्य संजयप्राह ८ ॥

41

भाषाअनुवाद

जोकहोकितुमी विचार करके जो करनेयोगयहोसोकरो ति
सपर कहते है कि इन्द्रियों की चैतन्य शक्तिका नाश करने
वाला जो यह शोक हमै आपके प्राप्त भयाहैसो किसी उपा
यसे दूर होगायह हम किसी भांति नहीं देखते है और यद्य
पि हम निष्कण्टक पृथिवी भरकाराज्यकरैं या देवाधिपत्यक
हे स्वर्ग राज्य इन्द्रपद प्राप्त करैं तौभी इस शोक सागर केपार
जाने को उपाय हम नहीं देखतेहैं ८।

सवैया॥

नाहिन देखों में ऐसो पदारथ जो मेरे याहि को दूर करे
है जो यह इंद्रिय सोषक शोक भयो मोहि चिंतन थीय रे
है प्रापत होयके भूमि अकंटक राज्य समृद्धिको भोग
सरेहे वो है जो देवको राज्य मिलें अब तो भी न निश्चय शो
क टरे है ८॥

संजयउवाच एवमुक्त्वाहृषीकेशंगुडा·
केशःपरन्तपः नयोत्स्यइतिगोविन्दमु
क्त्वातूष्णींबभूवह ९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

एवमर्जुनेनस्वाभिप्रायंभगवन्तंप्रतिप्रकाशिते सञ्जयोराजा
नमावेदितवानित्याहसञ्जयइति एवंप्राकृप्रकारेण भगव
न्तमुक्त्वापरन्तपोऽर्जुनोनयोत्स्येनसंग्रहरिष्ये अस्मात्संग्रा
मोकस्मादिति गोविन्दमुक्त्वातूष्णीमब्रुवन् बभूव किलेत्यर्थः
॥ ९ ॥

स्वामिकृतटीका

एवमुक्त्वार्जुनःकिंकृतवान् इत्यपेक्षायांसंजयउवाच एवमिति ९

रामानुजभाष्यं नास्ति पैशाचभाष्यं नास्ति

अस्थानस्नेहकारुण्यधर्माधर्मधियाकुलंपार्थंप्रपन्नमुद्दिश्य
शास्त्रावतरणंकृतमितितंप्रदेहात्मनोर्याथात्म्यज्ञाननिमित्त
शोकाविष्टंदेहातिरिक्तात्मज्ञाननिमित्तंचधर्मंयुद्धाख्यंभाषमाणं
परस्परविरुद्धगुणान्वितमुभयोः ९

अभिनवगुप्तकृतटी अपक्रमे एवमुक्त्वाहृषीकेशमिति सेनयोरुभयोर्मध्य इति अनेनेदंसूचयति संशयाविष्टोऽर्जुनोनेकपदेएवगुडा निवृत्तोयतएवमाहस्मगाधिमांप्रयत्नमिति अत उभयोरपिज्ञानाज्ञानयोर्मध्यगोभगवताऽनुशिष्यते ॥ ९ ॥

परमार्थप्रपा

अथायंकिंकृतमितिसंजयआहएवमुक्त्वेतिस्पष्टं ९

वनमालीकृतटीका· [illegible] ९ सहमू

कुसुमवैजयन्तीटीका

धर्मवुभुत्सयाभगवच्छरणमुपगतोऽर्जुनस्ततःकिंकृतवा
नित्याशंकासंजयोधृतराष्ट्रमाह एवमिति हेपरन्तप परंत्वद्वि
वलयोरुषादिभिःतत्कृष्णान्वनपतिवनवासादिभिःपीडयति
इतिपरंतपोधृतराष्ट्रस्तत्संबुद्धौहेपरंतपअर्जुनस्यविशेषणांचे

१५

+ एवं कथं भीष्ममहमिति द्वाभ्यां युद्धस्य महदधर्मरूपत्वं तत्रापि न चैतद्विद्म इत्यनेन जयपरा-
+ जययोरपि अनिश्चिततत्वं चोक्त्वा तदनन्तरं कार्पण्यदोषेत्यादि द्वाभ्यां [illegible]
[illegible] आत्मनो गुरूपसत्तित्वमुक्त्वा अप्यर्थकोयं हकारः ततः पश्चात् अहं
न योत्स्ये इत्यपि उक्त्वा तूष्णीं सकलेन्द्रियक्रियाशून्यो बभूव सर्वेन्द्रियप्रवर्तकस्य सर्वज्ञस्य
गुरोरग्रे परतंत्रोप्यहं न योत्स्यामि स्वातंत्र्येण कथं भूयामिति लज्जया, योवदनो गुडाकेशोपि पर-
न्तपोपि पार्थस्तूष्णीमेवासीत्पुनः किं विब्रुवावेति तूष्णीं भवेत्यभिप्रायः

परंतपो ऽरिकदनतापनः गुडाकेशो जितनिद्रः पार्थो हृषीकेशो
वाह्यांतःकरणप्रवर्तकं गोविंदं सकलसुरासुरनरपशुपक्ष्यादी-
नां गां वाणीं विंदति साक्षात्त्वात्मनेतीति तथा तैर्विशेषणद्वयैर्भ-
गवतोऽन्तरात्मत्वे सर्वज्ञत्वं च सूचितं + ९

मधुसूदनीटीका

संजय उवाच

तदनंतरमर्जुनः किं कृतवानिति धृतराष्ट्राकांक्षायां, गुडाकेशो जि-
तालस्यः परंतपः शत्रुतापनोऽर्जुनः हृषीकेशं सर्वेंद्रियप्रवर्तकत्वे-
नांतर्यामिणं गोविंदं गां वेदलक्षणां वाणीं विंदतीति व्युत्पत्त्या सर्व-
वेदोपादानत्वेन सर्वज्ञं आदौ एवं कथं भीष्ममहं संख्ये इत्यादिना
युद्धस्यानुपायत्वमुक्त्वा तदनंतरं न योत्स्य इति युद्धफलाभावं चो-
क्त्वा तूष्णीं बभूव बाह्येंद्रियव्यापारस्य युद्धार्थस्य उपरमं कृत्वा नि-
र्व्यापारो जात इत्यर्थः स्वभावतो जितालस्ये शत्रुतापने च तस्मिन्ना-
गंतुकमालस्यं संतापकत्वं च नास्त्यदमाधास्यतीति योजयितुं द्व-
यं गोविंद हृषीकेश पदाभ्यां सर्वज्ञत्वसर्वशक्तित्वसूचकाभ्यां भगव-
तः तन्मोहापनोदनमनायासतः साध्यमिति सूचितम् ९ ॥

सदानंदीकृतटीका

ततः किं कृतवान्पार्थ इत्यत्रोवाच संजयः जितालस्योऽर्जुनः शत्रु-
तापनश्चेंद्रियेश्वरं १ सर्वज्ञं भगवंतं तमेवमुक्त्वा वचो युजं कथं भी-
ष्ममहं वेति स्वरूपापापपतारणे २ न योत्स्य इति युद्धस्य फलाभा-
वं ततः परं उक्त्वा तूष्णीं बभूवेत्यथ निर्व्यापारतया स्थितः ३ स्वभाव-
तो जितालस्ये सर्वशत्रुप्रतापने संतापकत्वमालस्यं तदा यास्य-
तिनास्त्यदं ४ इति द्योतयितुं हे तितथा नायासतो हरेः बोधात्क्षोका-
पनेतृत्वं गोविंदेति पदध्वनिः ५ ९

नीलकंठीटीका [illegible]

९ नास्ति ९

[illegible]

गी॰
टी॰ टि॰

43

एवंपार्थप्रतिज्ञातामुक्तिमुपसंह **आनंदी टीका** रन्नुष्टनस्यं सन्नयउवाच

एवंकथंभीष्ममहमित्यादियुद्धे स्वस्यानौचित्यं हृषीकेशगुडाकातेनानंतरंनयोत्स्यइतिगोविंदंगांवाचंविंदतीति सर्वज्ञंसर्वाभिप्रायज्ञं उक्त्वातूष्णींबभूवह युद्धव्यापारान्निवृत्तमित्यर्थः ९

रामकेवी टी॰ ॅप्रथयुद्धनिषेधनिश्चितबुद्धित्वंधनंजयस्यप्रतिपादयितुं संजयउवाच ॅ

१०ॅ श्लोकमेतद्व्याख्येयम् किंवहृषीकाणींद्रियाणितेषामीशोनियंता भगवान् गुडाकानिद्रामावृणुते तस्माईशात्तयानभिभवनीयइत्यर्जुनविशेषणंव्याख्येयम् इति ९ ॥

लासिनी [illegible] **टीका**

एवंसर्वकर्मा[illegible]शिनं[illegible]श्लोक[illegible]नेन[illegible]नी [illegible]वः ९ हि परंतपराजमुधतराष्ट्रश्रीष्ट्रक्ष्णमेवमुक्त्वायुत्स्यासन्धोथ्यनयोत्स्यइतियालितमुक्त्वातूष्णींबभूवतत्प्रसिद्धो ॥९॥

पंचोली टीका

एवमुक्त्वार्जुनः किंकृतवानित्यपेक्षायामाह संजयउवाच गुडाकेशोर्जुनः हृषीकेशंश्रीकृष्णंप्रतिपूर्वोक्तप्रकारेणकथंभीष्ममहंसंख्येयात्स्यामीत्यादि हेपरंतपहेधृतराष्ट्रअहंनयोत्स्येयुद्धंनकरिष्यामीतिगोविंदंप्रतिउक्त्वातूष्णींबभूवमौनमाश्रितवान् ९ ॥

रणावीरसमिद्धार्थिनी ॥

एवं भगवंतंशरणं प्रपद्यस्वाभिप्रायंप्रकाशयंतमर्जुनंधृतराष्ट्रप्रत्यावेदितवान्संजयइत्याह संजयउवाचेति ॥ प्रथयुद्धनिषेधनिश्चितबुद्धित्वमर्जुनस्यप्रतिपादयितुमाह एवमिति एवंकथंभीष्ममहं संख्येइत्यादिनास्वस्ययुद्धायोग्यतांहृषीकेशंसर्वनियंतारंभगवंतंप्रति प्रतिपाद्य तदनंतरं गोविंद गोवेदलक्षणांवाणींविंदतेइतिव्युत्पत्त्यासर्ववेदोपादनेनसर्वज्ञंप्रतिनयोत्स्येन मह रिष्यामितासर्वशोकप्रसंगादितिफलाभावंचमहर्षेसायुद्धनिषेधमुक्त्वापरंतपः शत्रुनिर्मूलनसमर्थोपिगुडाकेशोजितनिद्रालस्यप्रमादोर्जुनस्तूष्णींबभूव निर्व्यापारः स्थितः इतिप्रसिद्धो ९॥

रामचंद्रसरस्वतीकृतटीका

एवमिति एवंतप्रभृति नाशात्माईहप्रासंकल्पेकृतवानितिभा

वः तूस्नींबभूवेतिशोकापनोदकंब्रूहीत्युक्तवानतदनस्यवचन

स्यानौचित्यादितिभावः तितः किंवृत्तंतदाह ॥

45

84

भाषाअनुवाद

इसप्रकारकीबातें भगवानसे कह कर अर्जुन ने फेरका कि
यासो संजय धृतराष्ट्र से कहते हैंकि निद्राविजयी शत्रु ना
शन धनंजय अर्जुन भगवान से कहाकि हेगोविन्द हम युद्ध
न करेंगे जो होय सो होय यह कहि कर मौन हीरहे ९

संजयवाक्य॥दोहा॥

कहि ऐसे श्रीकृष्ण को गुडाकेश अरिताप हे गोविंदनमे
लरें कहि चुप भयो प्रलाप ९॥

46

तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरु
भयोर्मध्ये विषीदंतमिदं वचः १० ॥

आनंदगिरिकृतटीका

तमर्जुनं सेनयोर्वाहिन्योरुभयोर्मध्ये विषीदंतं विषादं कुर्वंतमति
दुःखिते शोकमोहाभ्यामभिभूतं स्वधर्मात् प्रच्युतप्रायं प्रतीत्य प्र
हसन्निवोपहासं कुर्वन्निव तदाश्वासार्थं हे भारत भरतान्वय इत्येवं
संबोध्य भगवानिदं प्रश्नोत्तरं निःश्रेयसाधिगमसाधनं वचनमुवि
तवानित्याह तमुवाचेति १० ॥

स्वामिकृतटीका

ततः किं वृत्तमित्यत आह तमुवाचेति प्रहसन्निवेति प्रसन्नमुखः स
न्नित्यर्थः १० ॥

पिशाचभाष्य

अस्य संबन्धाभिधेयप्रयोजनान्युच्यंते मोदस्तावत्प्रयोजनं सच गीता
शास्त्रप्रतिपादितात्परमार्थस्वरूपमभिधेयं परमार्थस्वरूपावबोधस्या
स्य च शास्त्रस्य साध्यसाधनलक्षणः संबंध इति विशिष्टप्रयोजनसंबंधा
भिधेयवत् गीताशास्त्रं अर्जुनस्य राज्यार्थं शत्रूञ्जिगीषोर्योधनरा
ष्ट्रैस्सह युद्धं संग्रामं तत्र सहायार्थं केन न भगवता वासुदेवेन सह रथ
मारूढस्य योद्धुं युद्धभूमिप्रविष्टोऽर्जुन उभयोरपि सेनयोर्मध्ये योद्धुं व्यव
स्थितानाचार्यपितृपितामहपुत्रमित्रादीन्दृष्ट्वैते मयाहंतव्या मदर्थं
चैते म्रियिष्यन्ति इति पर्यालोच्य शोकमोहाभिभूतचित्ततया बहुप्रल
पनयोत्सृष्टशस्त्रको युद्धादुपरराम एवमुपरतायतस्मैतद्विषादमूल
शोकमोहापनोदाय परमकारुणिको भगवान्भक्तवत्सलो वासुदेवो
वेदान्तवाक्यैः समधिगम्यं परमार्थतत्त्वमुपदिदेश अनन्तरं पाण्डवा
नीकं दृष्ट्वारभ्य यावन्न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह इत्येवमनेन
ग्रंथः प्राणिनां शोकमोहबहुलसंसारो विद्यामूल इति प्रदर्शनार्थं
त्वेन व्याख्येयः १० ॥

रामानुजभाष्य

एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गतं क्षत्रियाणां प

रंस्वधर्ममप्यधर्ममन्वानं धर्मंबुभुत्सया शरणागतं पार्थमुद्दिश्यात्मया
थात्म्याज्ञानेनयुद्धस्यफलाभिसंधिरस्यस्वधर्मस्यात्मयाथात्म्यप्राप्त्युपा
यताज्ञानेनचविनास्यमोहोनशाम्यतीतिमत्वाभगवतापरमपुरुषेण
ध्यात्मशास्त्रावतरणंकृतं तदुक्तं अस्थानेस्नेहकारुण्यधर्माधर्मधिया
कुलंपार्थंप्रपन्नमुद्दिश्यशास्त्रावतरणंकृतमिति तमेवदेहात्मनोर्या
थात्म्याज्ञाननिमित्तशोकाविष्टं देहातिरिक्तात्मज्ञाननिमित्तंचधर्माध
र्मंभाषमाणंपरस्परविरुद्धगुणान्वितमुभयोःसेनयोःयुद्धायोद्युक्तयोर्मध्ये
अकस्मान्निरुद्योगंपार्थमालोक्यपरमपुरुषःप्रहसन्निवपरिहासवाक्यं
वदन्निवात्मपरमात्मयाथात्म्यंतत्प्राप्त्युपायभूतकर्मयोगज्ञानयोगभ
क्तियोगगोचरंनत्वेवाहंजातुनासमित्यारभ्य अहंत्वासर्वपापेभ्योमोक्ष
यिष्यामिमाशुचइत्येतदन्तमुवाचेत्यर्थः १ ॥

अभिनवगुप्तकृतटी॰ ॥

१ ॥

परमार्थप्रपाटी॰ ॥

अथार्जुनेविषादेननयोत्स्यइतिनिश्चित्यतूष्णींभूतेसतिभगवानाह त
मुवाचेति हृषीकेशःआशयज्ञःकृष्णस्तमर्जुनंप्रतिप्रहसन्निवप्र
हासगर्भमिववचनमुवाच तत्रविषादावसरेहासानुक्रमेऽपिकथ
मुक्तंप्रहसन्निवेतितन्नोच्यते विषादोत्पत्तेरकारणत्वात् यतोदी
नानाथवधादेवविषादोत्पत्तेर्दर्शनात् प्रकृतेतुभीष्मद्रोणकर्णदु
र्योधनाद्याःशौर्येणशक्रमप्यवगणयन्तःतांश्चधर्ममनुसृत्यप्रहन्तुः
नतुमहत्त्वेनतेषुकथंकृपापात्रत्वं तथातेमद्धाप्यवेतिकुतोज्ञाने
स्वभुजप्रतापविश्वासादुन्नतमहाशयीभूतानांतदभावात् नाद्यःअस्मा
न्मतिस्वभुजप्रतापव्यापनस्यानौचित्यात् किंचप्रसन्नमहाशयानु
पयोगात् कौतुकदर्शनार्थंचेत्रलोकवत्किंचित्करत्वेनागम
स्यवैयर्थ्यात् नद्वितीयःवधस्यास्यनिमित्तकत्वेनविषादानुत्प
त्तेः अतोऽपिविषादकारणमुक्तंतत्प्रतारणमात्रंकर्मत्वेनःकर्ममार्ग
वर्त्तितमित्याशयेनपक्षद्वास्यतुत्वोभूत्वासोवाचेत्यर्थः १ ॥

वनमालीकृतटीका

हृषीकेशः इंद्रियप्रेरकोंतर्यामी ज्ञानिनस्तवममसंदेहः कथमीदृशी
परि॰ बुद्धिरितिहासंकुर्वन्निवेत्यर्थः १० ॥

ऊसमेवेजयंतीटीका

ननुयच्छ्रेयस्स्यान्निश्चितंममसंब्रूहितेहंशिष्यःप्रपन्नंमांशाधीत्येव
मात्मश्रेयसेहंसंप्रपन्नोभूत्वापुनःगुरोरग्रेनउत्तरंविनैवातिधार्ष्ट्ये
नाहंनयोत्स्यइत्यनुचितंवदन्नतूष्णीभूतेनकृष्णःकिमुक्तवंमादाद्य
वानन्नमनधिकारिणमनोपेक्षांकृतवानितिसबलजामात्रराश·
ध्येज्ञात्वासंजयस्तन्निरस्यनाहंनामितिउभयोस्सेनयोर्मध्येयथाश्रुत
त्ययाऽपूर्वमागतेत्वेदंकारुण्याभ्याप्तंस्मकाविषीदन्तमतिशायमोहंप्रा
प्तवंतंतंपार्थंप्रहसन्निव श्रद्धोपूर्वकामात्रवयाप्तवंशयाःशापहृषिते
नैकरथेनापित्वयास्वधर्मरक्षणायसाभिमानेनसर्वंकुरुवलेविजि·
त्यगावोऽमुच्यतइदानींतुसमादेहिरागीवलेनपरिहृतस्यापिमतस्त
स्याप्यस्यापितवेदंस्वधर्मविसर्जनमुचितमेवनकोप्येवंभूतस्त्वदन्योभ
वेदितिव्यज्योत्क्रावदिंप्रहसन्निवनततकर्मनाहंशाटस्याभ्यन्नवाम्
लासेप्रहसतीतीवशब्देनैवायमर्थःसूचितइतिभावःहृषीकेशउ
त्युपलक्षणंसर्वेषांचेतनाचेतनानांप्रेरयिताऽस्मनेनसर्वप्रेरणाक
र्तुस्तवतत्स्यापेदंनयोत्स्यइत्यर्जुनप्रतिज्ञायाःस्थितिर्नभविष्यती
तिसूचितम्इदंवदस्माणमतिशयगंभीरार्थंकंवचवाचनदनह
कर्मालोकानोपेक्षांकृतवानित्यर्थःभारतेतिसंबोधनेनराजर्षेर्भर
तस्यवंशेनुतेनेराभक्तस्त्वदितरोऽभक्तस्तनकोप्यभवत्नापिभवि
ष्यतिचेतिसूचितम् १० ॥

मधुसूदनीटीका नु

एवंयुद्धमुपेक्षितवत्यर्जुनेभगवान्नोपेक्षितवानितिप्रतिहऽरा
प्यानिराससाधाह तेनयोरुभयोर्मध्येयुद्धोद्यमेनागमनहितोधितं
विषादंमोहंप्राप्तवंतंतमर्जुनंप्रहसन्निवअनुचिताचरणप्रकाशने
नलज्जांबुधौमज्जयन्निवहृषीकेशःसर्वांतर्यामीभगवानिदंवच

मारणमशोच्यानित्यादिवचः एवमगंभीरार्थमनुचिताचरणप्रका
शकमुक्तवान् ननूपेक्षितवानित्यर्थः अनुचिताचरणप्रकाशने
न लज्जोत्पादनेप्रदासः लज्जा च दुःखोल्लिकेति द्वेषविषयएव स
त्यः अर्जुनस्य तु भगवत्कृपाविषयत्वाद् नुचिताचरणप्रका
शनस्य च विवेकोत्पत्तिहेतुत्वादेकदलाभावेन गौणएवायंप्रह
सउक्तिकृपया पि नमिव शत्रूः लज्जामुत्पादयितुमिव विवेकमुत्पाद
यितुमर्जुनस्यानुचिताचरणं भगवताप्रकाश्यते लज्जोत्पत्तिस्तु
तांतरीयकतया स्वमात्वे विवक्षितेतिभावः यदि द्विसुहारं
भात्स्यागेव गृहे स्थितो मुहूर्तमपेक्षेतो न तदा तावत्वितं कुर्यात् महता
संरंभेणागत्य युद्धभूमावागत्य तद् पेक्षणमतीवानुचितमिति कथयि
तुं सेनयोरित्यादि विशेषणं एतच्चाशोच्यानित्यादौ स्पष्टं भविष्यति १०

सदानंदीकृतटीका

एवमप्यर्जुनेयुद्धमुपेक्षितवती श्वरः नैवोपेक्षितवानित्यमुं प्र
त्याह संजयः १ आगात्सेनयोर्मध्ये युद्धायोगेन चार्जुनं शोकवंत
विषादं च संमोहं युद्धरोधकं २ तं स्वेच्छया हसनो वितन्वहसनेन प्रकाश
यन् अंतर्यामी तमाहेशो लज्जायोमजयन्निव ३ वक्ष्यमाणमिदं
वाणि गंभीरं सारवहचः ४ १०

नीलकंठीकृतटीका

तमिति मृत्योप्ययममृत्युवद्वदतीति प्रहसन्निव इदं वक्ष्यमाणं १०

[illegible]

आनंदी टीका ९

तंपार्थमुभयोःसेनयोर्मध्येशोकप्रकारेणसीदमानंशोकाभिभू
तंयुद्धंप्रतिनिरुत्साहंप्रहसन्निवविकृतचेष्टादर्शनादुप
हसन्निवहृषीकाणामिंद्रियाणामीशःप्रेरयितापरमात्मारू
पस्तत्परात्माभगवान्देहाहंभावनाविभूतमिथ्याज्ञानस्या
स्यानयोत्स्यामीतिकृतसंकल्पस्यतत्त्वज्ञानोपदेशंविनामि
थ्याज्ञाननिवृत्तेरसंभवइतितत्त्वोपदेशपूर्वंस्वकर्मणिप्रव
र्तयिष्यन्देहदेहिनोःसंयोगवियोगस्वरूपमुपदिशन्नुवाचे
त्यर्थः ९ ॥

रामकेदी टीका

एवमविद्यामोहपरिप्लुतसंग्रामाध्यवसायमर्जुनंसम्यग्ज्ञा
नोपदेशेनात्रस्वकर्मणिप्रवर्तयिष्यन्भगवानुवाच ९

लासिकी [illegible] टीका

सेनयोरुभ विषदन्तम [illegible] तमुवाचवि हृ४ ततःकिंवृत्तमित्यतआह तमिति[illegible] प्रहसन्निवबोधयुक्त
स्याप्यर्जुनस्यव्यामोहकलेनस्वमायाशक्तेर्वैभवंचमत्कुर्वन्
नत्वर्जुनमुल्लंठयन्नितिइवशब्दप्रयोगः [illegible] १०

पंचोली टीका

ततःकिंवृत्तमित्यपेक्षायामाह हेभारत हृषीकेशःश्रीनाराय
हसन्निव णःप्रहसन्निववदनःसन्नुभयोःसेनयोर्मध्येविषीदंतंविषादंकुर्व
तंतमर्जुनंप्रतिइदंवक्ष्यमाणंवचःवाक्यमुवाच ९ ॥

रणवीरसमिद्धाथिनी॥

एवं गुरुं निर्धिपेदंयनंनयंभगवान्नोपेक्षितवानित्याह तमुवाचेति
सेनयोरुभयोर्मध्ये समराध्यवसायेनागत्यतत्कालानुचितंविषादं
कुर्वंतं तमर्जुनं प्रहसन्निवलज्जितंकुर्वन्निवहृषीकेशः सर्वांतर्या
मीभगवान् इदंवक्ष्यमाणंवचःसोपपत्तिकं तत्कालोचितंवचन
मेदर्भमुवाच नतूपेक्षितवान् लज्जावारणंवै समरोद्यमेनैवागतस्य पश्चा
ततएवनिवृत्तेरुन्मत्तस्वभावस्येवप्रकाशनादुत्पाद्यतेइति १०॥

49

मधुभाष

नजकेनयोर्मध्येबांधवादिमोहजोनसंहृतंविषीदंनकर्त्तुंनंम
गवानुवाव १०॥

रामचंद्रसरस्वतीकृतटीका·

नमस्कारेति नमितिसमस्ताङ्गानतेपिदेववशादुपपन्नसर्वस
मस्तुलक्षणउदमेवचभगवद्गीताकथनेनिदानं व्याख्यातमा
यमयत् एवमनायाससमस्तमुमुक्षुलक्षणमर्जुनंवीक्ष्यात्माना
त्मतत्त्वविवेकप्रदर्शनपूर्वकशोकापनोदहेतुभूतं येत्यक्त्वानस क्या
र्वसत्कार्यसमीचीनंमोक्षस्वरूपादिचोपदिदिक्षुः किंस्थूलदे
हान् शोचसिभीष्मादीनांकिमात्मानंशोचसीतितावद्विकल्प्यारं
भ्याकर्तुंप्रतिजानीते १० ॥

50

भाषाअनुवाद
तिसके अनन्तर क्या भयासो कहते हैं कि दोनो सेनाके बी
चमे विषाद को प्राप्तभये अर्जुन को संबोधन करि भगवा
न हसते हुये वर्तमानये वचन कहने लगेहे भारतधृतराष्ट्र
॥ १० ॥

दोहा॥

हे भारत हसके ते दिक दिन भए हृषीकेश सेना दोउ
मध्यमे हिं पावन प्रबल कलेश १० ॥

51

श्रीभगवानुवाच

शांकरभाष्यं

दृष्ट्वा तु पाण्डवानीकमित्यारभ्य न योत्स्य इति गोविन्दमुक्त्वा तू
ष्णीं बभूव हेत्येतदन्तः प्राणिनां शोकमोहादिसंसारदुःखबीज
भूतदोषोद्भवकारणप्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थस्तथा अ
र्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसम्बन्धिबान्धवेष्वहमेषां
ममैते इत्येवं भ्रान्तिप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तावा
त्मनः शोकमोहौ प्रदर्शितौ कथं भीष्ममहं संख्ये इत्यादिना
शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वत एव क्षात्रधर्मे यु-
द्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम परधर्मं च भिक्षाजीवनादि
कं कर्तुं प्रववृते तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्ट
चेतसां स्वभावत एव स्वधर्मपरित्यागः प्रतिषिद्धसेवा च स्यात्
त् स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः
फलाभिसन्धिपूर्विकैव साहंकारा च भवति तत्रैवं सति धर्मा
धर्मोपचयादिष्टानिष्टजन्मसुखदुःखादि प्राप्तिलक्षणः संसा
रो नुपरतो भवतीति अतः संसारबीजभूतौ शोकमोहौ तयोश्च
सर्वकर्मसंन्यासपूर्वकादात्मज्ञानात् नान्यतो निवृत्तिरिति तदुप
दिदिक्षुः सर्वलोकानुग्रहार्थं अर्जुनं निमित्तीकृत्याह भगवान् वा
सुदेवः अशोच्यानित्यादि तत्र केचिदाहुः सर्वकर्मसंन्यासपूर्वका
दात्मज्ञाननिष्ठामात्रादेव केवलात् कैवल्यं न प्राप्यत एव किं तर्हि
अग्निहोत्रादिश्रौतस्मार्तकर्मसहितात् ज्ञानात् कैवल्यप्राप्तिरिति
सर्वासु गीतासु निश्चितोर्थ इति ज्ञापकं चाहुरस्यार्थस्य अथ चे
त्त्वमिमं धर्म्यं संग्रामं न करिष्यसि कर्मण्येवाधिकारस्ते कुरु कर्मै
व तस्मात्त्वमित्यादि हिंसादियुक्तत्वाद्वैदिकं कर्म अधर्मायेतीयमा
शंका न कार्या कथं क्षात्रं कर्म युद्धलक्षणं गुरुभ्रातृपुत्रादि हिंसा

गी·
टी·द्वि

52

दिलक्षणमत्यन्तक्रूरमपि स्वधर्म्म इति कुर्वतो नाधर्म्माय तदकरणे च ततः स्वधर्म्मं कीर्त्तिं च हित्वा पापमेवाप्स्यसीति ब्रुवता यावज्जीवादिश्रुतिचोदितानां स्वकर्म्मणां पश्वादिहिंसालक्षणानां च कर्म्मणां प्रागेव नाधर्म्मत्वमिति सुनिश्चितमुक्तं भवतीति।

तदसत् ज्ञानकर्म्मनिष्ठयोर्विभागवचनात् बुद्धिद्वयाश्रययोर् शोच्यानित्यादिनाग्रन्थेन भगवता यावत् स्वधर्म्ममपि चावेक्ष्येत्य तदन्तेन ग्रन्थेन यत् परमार्थात्मतत्त्वनिरूपणं कृतं तत् सांख्यं तद्विषया बुद्धिरात्मनो जन्मादि षड्विक्रियाभावादकर्त्तात्मेति प्रकरणार्थनिरूपणात् या जायते सा सांख्यबुद्धिः सा येषां ज्ञानिनामुचिता भवति ते सांख्याः एतस्या बुद्धेर्जन्मनः प्रागात्मनो देहादिव्यतिरिक्तस्य कर्त्तृत्वभोक्तृत्वाद्यपेक्षो धर्म्माधर्म्मविवेकपूर्व्वको मोक्षसाधनानुष्ठाननिरूपणलक्षणो योगः तद्विषया बुद्धिर्योगबुद्धिः सा येषां कर्म्मिणामुचिता भवति ते योगिनः तथा च भगवता विभक्ते द्वे बुद्धी निर्द्दिष्टे एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृण्विति तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोग निष्ठां सांख्यानां विभक्तां वक्ष्यति पुरा वेदात्मना मयाप्रोक्तेति तथा च योगबुद्ध्याश्रयां कर्म्मयोगेन निष्ठां विभक्तां च वक्ष्यति कर्म्मयोगेन योगिनामित्येवं सांख्यबुद्धिं योगबुद्धिं चाश्रित्य द्वे निष्ठे विभक्ते भगवतैवोक्ते ज्ञानकर्म्मणोः कर्त्तृत्वाकर्त्तृत्वैकत्वानेकत्वबुद्ध्याश्रययोरेकपुरुषाश्रयत्वासम्भवं पश्यता यथैतद्विभागवचनं तथैव दर्शितं शातपथीये ब्राह्मणे एतमेव प्रव्राजिनो लोकमिच्छन्तो ब्राह्मणाः प्रव्रजन्तीति सर्वकर्म्मसंन्यासं विधाय तच्छेषेण किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति तत्रैव च प्राग्दारपरिग्रहात् पुरुषश्चात्मा प्राकृतो धर्म्मजिज्ञासोत्तरकालं लोकत्रयसाधनं पुत्रं द्विप्रकारञ्च वित्तं मानुषं दैवञ्च त

त्र मानुष्यं वित्तं कर्म्मरूपं पितृलोकप्राप्तिसाधनं विद्याञ्च दैवं वि
त्तं देवलोकप्राप्तिसाधनं सोऽकामयतेति अविद्याकामवत एव स
र्वाणि कर्म्माणि श्रौतादीनि दर्शितानि तेभ्यो व्युत्थाय प्रव्रजन्ती
ति व्युत्थानमात्मानमेव लोकमिच्छतोऽकामस्य विहितं तदेतद्वि
भागवचनमनुपपन्नं स्यात् यदि श्रौतकर्म्मज्ञानयोः समुच्च
योऽभिप्रेतः स्याद्भगवतः ॥ न चार्ज्जुनस्य प्रश्न उपपन्नो भवति
ज्यायसी चेत् कर्म्मणस्ते इत्यादिः एकपुरुषानुष्ठेयत्वासम्भवं बु
द्धिकर्म्मणोर्भगवता पूर्वमनुक्तं कथमर्ज्जुनोऽश्रुतं बुद्धेश्च कर्म्म
णो ज्यायस्त्वं भगवत्यध्यारोपयेत् मृषैव ज्यायसी चेत् कर्म्मणस्ते
मता बुद्धिरिति किञ्च यदि बुद्धिकर्म्मणोः सर्वेषां समुच्चय उक्तः
स्यात् अर्ज्जुनस्यापि स उक्त एवेति यच्छ्रेय एतयोरेकं तन्मे ब्रूहि
सुनिश्चितमिति कथमुभयोरुपदेशे सत्यन्यतरविषय एव प्रश्नः
स्यात् नहि पित्तप्रशमनार्थिना वैद्येन मधुरं शीतलञ्च भो
क्तव्यमित्युपदिष्टे तयोरन्यतरत् पित्तप्रशमनकारणं ब्रूहीति प्रश्नः
सम्भवति अथार्ज्जुनस्य भगवदुक्तवचनार्थविवेकानवधारणनि
मित्तः प्रश्नः कल्प्येत तथापि भगवता प्रश्नानुरूपं प्रति वच
नं देयं मया बुद्धिकर्म्मणोः समुच्चय उक्तः किमर्थमित्थं त्वं भ्रान्तोसी
ति न तु पुनः प्रतिवचनमननुरूपं पृष्टादन्यदेव द्वे निष्ठे मया पुरा
प्रोक्ते इति वक्तुं युक्तं नापि स्मार्त्तेनैव कर्म्मणा बुद्धेः समुच्चयेऽभि
प्रेते विभागवचनादि सर्वमुपपन्नं किञ्च क्षत्रियस्य युद्धं स्मार्त्तं क
र्म्म स्वधर्म्म इति जानतस्तत् किं कर्म्मणि घोरे मां नियोजयसीत्युपा
लम्भोऽनुपपन्नस्तस्मात् गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्त्ते
न वा कर्म्मणात्मज्ञानस्य समुच्चयो न केनचिद्दर्शयितुं शक्यः ।
यस्य त्वज्ञानाद्रागादिदोषतो वा कर्म्मणि प्रवृत्तस्य यज्ञेन दानेन त
पसा वा विशुद्धसत्त्वस्य ज्ञानमुत्पन्नं परमार्थतत्त्वविषयमेकमे

गी·
टी· द्वि

53

वेद सर्व्वब्रह्मलोककर्त्तृ चेति तस्य कर्म्मणि कर्म्मप्रयोजने च निवृत्तेपि
लोकसंग्रहार्थं यत्नपूर्व्वं यथाप्रवृत्तिस्तथैव कर्म्मणि प्रवृत्तस्य य
त् प्रवृत्तिरूपं दृश्यते न तत् कर्म्म येन बुद्धेः समुच्चयः स्यात् यथा
भगवतोवासुदेवस्य क्षत्रधर्म्मचेष्टितं न ज्ञानेन समुच्चीयते पुरु
षार्थसिद्धये तद्वत्तत्फलाभिसन्ध्यहङ्काराभावस्य तुल्यत्वात् विदु
षः तत्त्वविन्नाहं करोमीति मन्यते न च तत्फलमभिसन्धत्ते यथा
च स्वर्गादिकामार्थिनोऽग्निहोत्रादिकर्म्मानुष्ठानायाहिताग्नेः का
म्य एवाग्निहोत्रादौ प्रवृत्तस्य सामिकृते विनष्टेपि कामे तदेवाग्नि
होत्राद्यनुतिष्ठतोपि न तत् काम्यमग्निहोत्रादि भवति तथा च द
र्शयति भगवान् कुर्व्वन्नपि न करोति न लिप्यते इति । अत्र यच्च
पूर्व्वैः पूर्व्वतरं कृतं कर्म्मणैव हि संसिद्धिमास्थिता जनकादय इति त
त्प्रविभज्य विज्ञेयं तत्कथं यदि तावत् पूर्व्वे जनकादयः तत्त्व
विदोपि प्रवृत्तकर्म्माणः स्युस्ते लोकसंग्रहार्थं गुणा गुणेषु वर्त्तन्त
इति ज्ञानेनैव संसिद्धिमास्थिताः । कर्म्मसन्न्यासे प्राप्तेपि कर्म्मणा
सहैव संसिद्धिमास्थिता न कर्म्मसन्न्यासं कृतवन्त इत्यर्थः । अथ
न ते तत्त्वविद ईश्वरसमर्पितेन कर्म्मणा साधनभूतेन संसिद्धिं सत्त्व
शुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इति व्या
ख्येयं एतमेवार्थं वक्ष्यति भगवान् सत्त्वशुद्धये कर्म्म कुर्व्वन्तीति स्व
कर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इत्युक्त्वा सिद्धिप्राप्तस्य च
पुनर्ज्ञाननिष्ठां वक्ष्यति सिद्धिं प्राप्तो यथा ब्रह्मेत्यादिना तस्माद्गीता
सु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः न कर्म्मसमुच्चितादिति निश्चि
तोऽर्थः यथा चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्या
मः । तत्रैवं धर्म्मसंमूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे
निमग्नस्यार्ज्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान् वासु
देवस्ततः कृपयार्ज्जुनमुद्दिधारयिषुरात्मज्ञानायावतारयन्नाह ।

मित्याशंक्या
तन्मध्यमवाक्यस्यकथमेकवाक्यत्वमित्येकत्वा

आनन्दगिरिकृतटीका

(अस्यैव वचनमुदाहरति श्रीभगवानिति)

अतीतसन्दर्भस्य तात्पर्यमर्थं विवक्षित्वा तस्मिन्नेव वाक्यविभाग नº
मवगमयति दृष्ट्वेतीति धर्मक्षेत्रे कुरुक्षेत्रे इत्यादिराद्यश्लोकस्तावदे
कं वाक्यं शास्त्रस्य कथासम्बन्धपरत्वेन पर्यवसानात् दृष्ट्वेत्यारभ्य या
वत् तूष्णीं बभूव हेति तावच्चैकं वाक्यं अत आरभ्य इदं वच इत्यन्तो
ग्रन्थो भवत्यपरं वाक्यमिति विभागः। नन्वाद्यश्लोकस्य पृथगेक वाक्य
वाक्यत्वे प्रकृतशास्त्रस्य महाभारतेनावान्तरवाक्यत्वमस्या
पि सम्भवत्येकवाक्यत्वमर्जुनप्रश्नसार्थतया प्रवृत्तत्वादित्याह प्रा
णिनामिति। शोको मानसस्तापो मोहो विवेकाभाव आदिश
ब्दस्तदवान्तरभेदार्थः स एव संसारस्य दुःखात्मनो बीजभूतो
दोषस्तस्योद्भवे कारणमहङ्कारो ममकारस्तद्धेतुरविद्या च त
त्प्रदर्शनार्थत्वेनेति योजना। संग्रहीतमर्थं विवृणोति तथा
हीति। राज्यं राज्ञः कर्म परिपालनादि पूजार्हा गुरवो द्रोणा
दयः पुत्राः स्वेनोत्पादिताः सौभद्रादयः सम्बन्धान्तरमन्तरेण
स्नेहगोचरा गुरुपुत्रप्रभृतयो मित्र सौहृदेनात्यन्तोपकारनिर
पेक्षतया स्वयमुपकारिणो हृदयानुरागभाजो भगवत्प्रमुखाः
सुहृदः स्वजना ज्ञातयो दुर्योधनादयः सम्बन्धिनः श्वशुरस्याल
प्रभृतयो द्रुपदधृष्टद्युम्नादयः परम्परया पितृपितामहादिष्वनु
रागभाजो राजानो बान्धवास्तेषु यथोक्ते प्रत्यये निमित्तीकृ
त्य यः स्नेहो यश्च तैः सह विच्छेदो यच्चैतेषामुपघाते पातकं
या च लोकगर्हा सर्वं तन्निमित्तयोरात्मनः शोकमोहयोस्तावे
तौ संसारबीजभूतौ कथमित्यादिना दर्शिताविस्यर्थः। कथं पु
नरनयोः संसारबीजयोरर्जुने सम्भावना उपपद्यते नहि प्रथित
महामहिम्नो विवेकविज्ञानवतः स्वधर्मे प्रवृत्तस्य तस्य शोक

गी·
टी·टि·

मोहावनर्थहेतू सम्भावितावित्याशंक्य विवेकतिरस्कारेण तयो
र्विहिताकरणप्रतिषिद्धाचरणत्वादनर्थाधायकयोरस्ति तस्मिन्
सम्भावनेत्याह शोकमोहाभ्यामिति । भिक्षया जीवनं प्राणधार
णमादिशब्दादशेषकर्म्मसन्न्याससलक्षणं पारिव्राज्यमात्माभिध्यान
मित्यादि गृह्यते किञ्चार्जुने दृश्यमानौ शोकमोहौ संसारबीजं
शोकमोहत्वादस्मदादिनिष्ठशोकमोहवदित्युपलक्ष्यौ शोकमोहौ
प्रत्येकं पक्षीकृत्यानुमातव्यमित्याह तथाचेति शोकमोहादीत्यादि
शब्देन मिथ्याभिमानस्नेहरागद्वेषयो दृष्टान्ते स्वभावतश्चित्तदोष
सामर्थ्यादिरर्थः अस्मदादीनामपि स्वधर्म्मप्रवृत्तानां विहिताकर
णत्वाद्यभावान्न शोकादेः संसारबीजतेति दृष्टान्तस्य साध्यविक
लतेति चेत्तत्राह स्वधर्म्मेति । कामादीनामित्यादिशब्दाद्विशिष्टा
नीन्द्रियाणामादीयन्ते फलाभिसन्धिस्तद्विषयेऽभिलाषः कर्तृत्वभोक्तृत्वा
भिमानोऽहङ्कारः । प्रागुक्तप्रकारेण वागादिव्यापारे सति किं सि
ध्यतीत्यत आह तदेति । शुभकर्म्मानुष्ठानेन धर्म्मोपचयादिष्टं देवा·
दिजन्म ततः सुखप्राप्तिः अशुभकर्म्मानुष्ठानेनाधर्म्मोपचयाद
निष्टं तिर्य्यगादिजन्म ततो दुःखप्राप्तिः व्यामिश्रकर्म्मानुष्ठानादु
भाभ्यां धर्म्माधर्म्माभ्यां मनुष्यजन्म ततः सुखदुःखे भवतः एव
मात्मकः संसारः सन्ततो वर्त्तत इत्यर्थः । अर्जुनस्यान्येषाञ्च शो
कमोहयोः संसारबीजत्वमुपपादितमुपसंहरति इत्यत इति । त
देवं प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्यात्माज्ञानोत्थ·
निवर्त्तनीयशोकमोहाख्यसंसारबीजप्रदर्शनपरत्वं दर्शयित्वा व
क्ष्यमाणसन्दर्भस्य सहेतुसंसारनिवर्त्तकस्वकृतज्ञानोपदेशे ता
त्पर्य्यं दर्शयति ततोऽस्येति । तथोक्ते ज्ञानमुपदिदिक्षुरुपदेष्टुमि
च्छन् भगवानाहेति सम्बन्धः । सर्वलोकानुग्रहार्थं यथोक्ते ज्ञाने
भगवानुपदिदिक्षतीत्ययुक्तं अर्जुने प्रत्येवोपदेशादित्याशंक्य

ह अर्ज्जुनमिति । नहि तस्यामवस्थायामर्ज्जुनस्य भगवतोपयोक्तं
ज्ञानमुपदेष्टुमिष्टं किन्तु स्वधर्म्मानुष्ठानाद्बुद्धिशुद्ध्युत्तरकालमित्य
भिप्रेत्योक्तं निमित्तीकृत्येति । सर्वकर्म्मसन्न्यासपूर्वकादात्म-
ज्ञानादेव केवलात् कैवल्यप्राप्तिरिति गीताशास्त्रार्थः स्वाभिप्रेतो
व्याख्यातः सम्प्रति वृत्तिकृतामभिप्रेतं निरसितुमनुवदति तेत्वे
ति । निर्द्धारितः शास्त्रार्थः सति समस्या परामृश्यते । तेषां श्रुति
मेव विवरणवत्वादौ सैद्धान्तिकमभ्युपगमं [illegible]
[illegible] । [illegible] प्रमादिशतीति सर्वकर्म्माणीति । वैदिके
न कर्म्मणा समुच्चयं व्युदसितुं मात्रपदं स्मार्त्तेन कर्म्मणा स
मुच्चयं निरसितुमवधारणं । अभ्यासनम्बन्धं गृह्णीते केवलादि
ति । नैवेत्येवकारः सम्बध्यते केन तर्हि प्रकारेण ज्ञानं कैवल्य-
प्राप्तिकारणमित्याशंक्याह किं तर्हीति किंतत्र प्रसाधकमित्याशं-
क्य इदमेव शास्त्रमित्याह इति सर्वाग्विति यथा प्रयाजानुयाजाद्यु
पकृतमेव दर्शपूर्णमासादि स्वर्गसाधनं तथा श्रौतस्मार्त्तकर्म्मो
पकृतमेव ब्रह्मज्ञानं केवल्यं साधयति विमतं सेतिकर्त्तव्यता
कमेव स्वफलसाधकं कारणत्वाद्दर्शपूर्णमासादिवत् तदेवं ज्ञा
नकर्म्म समुच्चयपरं शास्त्रमित्यर्थः इति पदमाकृष्यतेन सर्वे
ण सम्बध्यते । पौर्वापर्य्यपर्य्यालोचनया शास्त्रस्य समुच्चयप
रत्वं न निर्द्धारितमित्याशंक्याह ज्ञापकं चेति । न केवलं ज्ञानस्य
किंहेतवरपि न समुच्चितमित्यस्यार्थस्य स्वधर्म्माननुष्ठाने पाप
प्राप्तिवचनसामर्थ्यलक्षणं लिङ्गं गमकमित्यर्थः । शास्त्रस्य
समुच्चयपरत्वे लिङ्गवद्वाक्यमपि प्रमाणमित्याह कर्म्मण्येवे
ति तत्रैव वाक्यान्तरमुदाहरति कुरुकर्म्मेति । ननु न हिंस्या-
त् सर्वभूतानीत्यादिना प्रतिषिद्धत्वेन हिंसादेरनर्थहेतुत्वा
वगमात्तद्रूपेण वैदिके कर्म्मधर्म्मापेति नानुष्ठानं शाक्यते

गी·
टी· द्वि·
55

तथा चतस्य सापेक्षत्वात्तेन समुच्चयो न सिध्यतीति सांख्यमत·
माशंक्य परिहरति हिंसादिनेति । आदिशब्दादुच्छिष्टभक्षणं गृ
ह्यते । यथोक्ता शङ्का न कर्त्तव्यमज्ञाकांक्षापूर्वकं हेतुमाह
कथमित्यादिना । स्वभावेन हानिर्यो विवक्षते श्रद्धाकरणे हवि
षस्य प्रत्यवायश्रवणात्तस्य न भवति नित्यत्वेनावश्यकर्त्तव्यत्वं
[illegible] प्रतीतेर्गवादिहिंसायुक्तमपि क्रूर
मपि कर्म्म नाधर्म्मायेति हेत्वन्तरमाह तदकरणे चेति आचा
र्य्यादिहिंसायुक्तमतिक्रूरमपि युद्धं नाधर्म्मायेति ब्रुवता भगव
ता श्रौतानां हिंसादियुक्तानामपि कर्म्मणां दूरतो नाधर्म्मत्व
मिति स्पष्टमुपदिष्टं भवति सामान्यशास्त्रस्य यर्थहिंसानिषे
धार्थत्वात् क्रतुविषये चोदितहिंसायास्तदविषयत्वात् अतो वै
दिककर्म्मानुष्ठानानुपपत्तिरित्यर्थः ज्ञानकर्म्मसमुच्चयात् कैव
ल्यसिद्धिरित्यप संहृतमिति भावः । यत्तावद्ब्रह्मज्ञानं सेतिकर्त्त
व्यताकं स्वफलसाधकं करणत्वादिति अनुमानं तद्दूषयति तदस
दिति । न हि शुक्तिकादिज्ञानमज्ञाननिवृत्तौ स्वफले सहकारि
किंचिदपेक्षते तथा चव्यभिचारादसाधकं करणत्वमित्यर्थः य
त्तु गीताशास्त्रे समुच्चयस्यैव प्रतिपाद्यतेति प्रतिज्ञातं तदपि
विभागवचनविरुद्धमित्याह ज्ञानेति । सांख्ये बुद्धिर्योगे बुद्धिरिमां
ति बुद्धिद्वय तत्र सांख्यबुद्ध्याश्रयां ज्ञाननिष्ठां व्याख्याय सांख्य
शब्दार्थमाह अशोच्यानित्यादिना इति अशोच्यानित्यादिना स्वधर्म्म
मपि चावेक्ष्येत्यतः तदन्तं वाक्यं यावद्भविष्यति तावता ग्रंथेन परमप
रमार्थभूतमात्मतत्त्वं भगवता निरूपितं तद्यथा सम्यक् ख्याया
यते प्रकाश्यते सा वैदिकी सम्यक्बुद्धिः संख्या तया प्रकाश्यत्वे
न सम्बन्धि प्रकृतं तत्त्वं सांख्यमित्यर्थः सांख्यशब्दार्थमुक्त्वाशिकां बु तत्स्यका
द्धिं तद्वतश्च सांख्यान् व्याकरोति तद्विषयेति तद्विषया बुद्धिः सां

ख्यबुद्धिरिति सम्बन्धः तामेव प्रकटयति आत्मन इति न जाय
ते म्रियते वेत्यादि प्रकरणार्थ निरूपणद्वारेणात्मनः षड्भाव
वि क्रियासम्भवात् कूटस्थोसाविति सा बुद्धिरुत्पद्यते सासां
ख्यबुद्धिः तत्पराः सन्न्यासिनः सांख्या इत्यर्थः सम्प्रतियोगबु
द्ध्याश्रयां कर्म्मनिष्ठां व्याख्यातकामो योगशास्त्रार्थमाह एतस्या
इति यथोक्तबुद्ध्युत्पत्तौ विरोधादेवानुष्ठानायोगात्तस्यास्तन्निव
र्त्तकत्वात् पूर्वमेव तदुत्पत्तेरात्मनश्च देहादिव्यतिरिक्तत्वाय
पेक्षया धर्म्माधर्म्मौ निश्चित्य तेनेश्वराराधनरूपेण कर्म्मणा पु
रुषो मोक्षाय युज्यते योग्यः सम्पद्यते तेन मोक्षसिद्धये परम्प
गु रया साधनीभूतश्रौतधर्म्मानुष्ठानात्मको योग इत्यर्थः अथयो
गबुद्धिं विभजन् योगिनो विभजते तद्विषयेति उक्ते बुद्धिद्वये
भगवतोऽभिमतिं दर्शयति तयोश्चेति सांख्यबुद्ध्याश्रया ज्ञान
निष्ठेत्येतदपि भगवतोऽभिमतमित्याह तयोश्चेति ज्ञानमेव
योगो ज्ञानयोगस्तेन द्विलक्षणा युज्यते तादात्म्यमापद्यते ते
न संन्यासिनो निष्ठा निश्चयेन स्थितिस्तात्पर्येण परिसमाप्ति
स्ता कर्म्मनिष्ठातो व्यतिरिक्ता निष्ठयोर्मध्ये निश्चित्य भगवान्
वक्ष्यतीति योजना लोकोस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया
नघ ज्ञानयोगेन सांख्यानामित्येतद्वाक्यमुक्तार्थविषयमर्थतो
नुवदति पुरेति योगबुद्ध्याश्रया कर्म्मनिष्ठेत्येतदपि भगवदनु
मतिमादर्शयति तथाचेति कर्म्मैव योगः कर्म्मयोगस्तेन बु
द्धिशुद्धिद्वारा मोक्षहेतुज्ञानाय पुमान् युज्यते तेन निष्ठां कर्म्मि
णां ज्ञाननिष्ठातो विलक्षणां कर्म्मयोगेनेत्यादिना वक्ष्यति भग
वानिति योजना निष्ठाद्वयं बुद्धिद्वयाश्रयं भगवता विभज्योक्तमु व
पसंहरति एवमिति कथा पुनरनुपपन्ना भगवता निष्ठाद्व
ये विभज्योक्तमित्याशङ्क्याह ज्ञानकर्म्मणोरिति कर्म्मि हि क

गी·
टी·टि

56

रित्वाद्यनेकानर्थाश्रयं ज्ञानं पुनरकर्तृत्वैकत्वाद्याश्रयं तदुभ
यमिदं विरुद्धसाधनसाध्यत्वान्नैकाश्रयस्यैव पुरुषस्य सम्भवत
तीत्युक्तमेव तयोर्विभागवचनमित्यर्थः । भगवदुक्तविभागव
चनस्य मूलत्वेन श्रुतिमुदाहरति । तत्र ज्ञाननिष्ठाविषयं वा
क्यं पठति एतमेवेति प्रकृतमात्मानं नित्यविज्ञप्तिस्वभावं वे
दितुमिच्छन्तः त्रिविधेऽपि कर्मफले वैतृष्ण्यभाजः सर्वाणि क
र्माणि परित्यज्य ज्ञाननिष्ठा भवन्तीति पञ्चमलकारस्वीकारे
ण संन्यासविधिं विवक्षित्वा तस्यैव विधेः शेषेणार्थवादेन किं
प्रजयेत्यादिना मोक्षफलं ज्ञानमुक्तमित्यर्थः । ननु फलाभावा
ज्ञा त् प्रक्षेपो नोपपद्यते पुत्रेणैतल्लोकजयस्य वाक्यान्तरसिद्धत्वा
दित्याशङ्क्य विद्याप्रजासाध्यमनुष्यलोकस्यात्मव्यतिरेकेण
भावादात्मनश्चासाध्यत्वात्तदपेक्षो युक्तिमानिति विवक्षित्वाह
येषामिति । इतिशब्दार्थं दर्शितमिति शेषः तस्मिन्नेव ब्राह्मणे
कर्मनिष्ठावाक्यं दर्शयति तत्रैवेति प्राकृतत्वमनात्मदर्शित्वेना
ज्ञत्वं सच ब्रह्मचारी सन् गुरुसमीपे यथाविधि वेदमधीत्या
र्थज्ञानार्थं धर्मजिज्ञासां कृत्वा तदनन्तरकाले लोकत्रयप्राप्ति
साधनं पुत्रादित्रयं सोऽकामयत जाया मे स्यादित्यादिना का
मितवानिति श्रुतमित्यर्थः वित्तं विभजते द्विप्रकारमिति ।
तदेव प्रकारद्वैरूप्यमाह मानुष्यमिति । मानुष्यं वित्तं याच
ष्टे कर्मरूपमिति तस्य फलपर्यवसायित्वमाह पितृलोके
ति दैवं वित्तं विभजते विद्येति तस्यापि फलनिष्ठत्वमाह
ष देवेति कर्मनिष्ठाविषयत्वेनोदाहृतश्रुतेस्तात्पर्यमाह अविद्ये
ति अज्ञस्य कामनाविशिष्टस्यैव कर्माणि सोऽकामयतेत्यादि
ना दर्शितानीत्यर्थः । ज्ञाननिष्ठाविषयत्वेन दर्शितश्रुतेरपि
तात्पर्यं दर्शयति तेभ्य इति । कर्मसु विरक्तस्यैव सन्न्यासपूर्वि

त

कार्ज्ञाननिष्ठामार्गद्वयं क्रमा दर्शितेत्यर्थः अवस्थाभेदेन ज्ञान
कर्म्मणोर्भिन्नाधिकारत्वस्य श्रुतत्वात् तन्मूलेन भगवतो वि
भागवचनेन शास्त्रस्य समुच्चयपरत्वशङ्कितज्ञानमपवादितमि
ति साधितं किन्तु समुच्चयो ज्ञानस्य श्रौतेन वा कर्म्मणा विव
क्षिते यदि प्रथमं तत्राह तदेतदिति । समुच्चयेऽभिप्रेते प्रश्ना
नुपपत्तिं दोषान्तरमाह नचेति । तामेवानुपपत्तिं प्रकटय-
ति एकपुरुषेति । यदि समुच्चयः शास्त्रार्थो भगवता विव
क्षितस्तदा ज्ञानकर्म्मणोरेकेन पुरुषेणानुष्ठेयत्वमेव तेनोक्त
मर्ज्जुनेन च श्रुतं तत् कथं तदसम्भवमनुक्तमश्रुतं च मिथ्यैव
श्रोता भगवत्यारोपयेन्नच तदारोपादृते किमिति मां कर्म्मणि
वातिक्रूरे युद्धलक्षणे नियोजयसि इति प्रश्नोऽवकल्पते तथा
च प्रश्नालोचनया प्रष्टृप्रतिवक्त्रोः शास्त्रार्थतया समुच्चयो-
ऽभिप्रेतो न भवतीति प्रतिभातीत्यर्थः किञ्च समुच्चयपक्षे क
र्म्मापेक्षया बुद्धेर्ज्यायस्त्वं भगवतासर्वमनुक्तमर्ज्जुनेन वाश्रुतं
कथमसौ तस्मिन्नारोपयितुमर्हतीति ततश्चानुवादवचनं श्रोतुरनु- पु
चितमित्याह युक्तश्चेति । अतश्च समुच्चयः शास्त्रार्थो न सम्भवत
न्यथा पञ्चमादावर्ज्जुनस्य प्रश्नानुपपत्तेरित्याह किञ्चेति । प्रस्तुतो टि॰ ननुसर्वानु
पि समुच्चयेनार्ज्जुनं प्रत्युक्तोऽसाविति तदीय प्रश्नोपपत्तिरित्याश
ङ्क्याह यदीति एतयोः कर्म्मतत्त्यागयोरिति यावत् । ननु क-
र्म्मापेक्षया कर्म्मत्यागपूर्वकस्य ज्ञानस्य प्राधान्यात्तस्य श्रेयस्त्वात्त
द्विषयप्रश्नोपपत्तिरिति चेन्नेत्याह नहीति तथैव समुच्चये पुरुषा-
र्थसाधने भगवता दर्शिते ममान्यतरगोचरो न प्रश्नो भवतीति शेषः
समुच्चये भगवतोक्तेऽपि तदज्ञानादर्ज्जुनस्य प्रश्नोपपत्तिरिति शा
ङ्कतेऽथेति अज्ञाननिमित्तं प्रश्नमङ्गीकृत्यापि प्रत्याचष्टे तथापी
ति । भगवतो भ्रान्त्यभावेन पूर्वापरानुसन्धानसम्भवादित्यर्थः ॥

गी॰
टी॰ टि॰

51

प्रश्नानुरूपत्वमेव प्रतिवचनस्य प्रकटयति मयेति आवर्त्तमंशं
मादर्शयति नत्विति प्रतिवचनस्य प्रश्नाननुरूपत्वमेव स्पष्टयति
[illegible] स्पष्टादिति श्रौतेन कर्म्मणा समुच्चयो ज्ञानस्येति प
क्षे प्रतिक्षिप्य पक्षान्तरं प्रतिक्षिपति नापीति । स्मृतिस्थयो-
र्ज्ञानकर्म्मणोर्विभागवचनमादिशब्दगृहीतं बुद्धेर्ज्यायस्त्वे प्रश्न
मादौ प्रश्नो भगवत्प्रतिवचनं सर्वमिदं श्रौतेनैव स्मार्त्तेनापि क
र्म्मणा बुद्धेः समुच्चये विरुद्धं स्यादित्यर्थः द्वितीयपक्षासम्भवे हे
त्वन्तरमाह किञ्चेति समुच्चयपक्षे प्रश्नप्रतिवचनयोरसम्भवा
न्नेदं गीताशास्त्रं तत्परमित्युपसंहरति तस्मादिति विशुद्धब्र-
ह्मात्मज्ञाने सफलसिद्धौ न सहकारि सापेक्षमज्ञाननिवृत्तिफ
लत्वाद्रज्ज्वादितत्त्वज्ञानवत् अथवा बन्धः सहायानपेक्षेण ज्ञाने
न निवर्त्त्यते अज्ञानात्मकत्वात् रज्जुसर्पादिवदिति भावः ननु क
र्म्मोहितां त्वया सक्तश्चिकीर्षुर्लोकसंग्रहमिति वक्ष्यमाणत्वात्
कथं गीताशास्त्रे समुच्चयो नास्ति तत्राह यस्यत्विति । चोदनाशा
स्त्रानुसारेण विधितोऽनुष्ठेयस्य कर्म्मणो धर्म्मता यथा परमार्थस्य-
तथात्वाभावात्तत्त्वविदस्तु वर्णाश्रमाभिमानशून्यस्याधिकारप्रति
पत्त्यभावाद्रागादिप्रवृत्तीनामविद्यालेशतो जायमानानां कर्म्मा
भासत्वात् कुर्य्याद्विद्वानित्यादिवाक्यं न समुच्चयज्ञापकमिति भा
वः वाशब्दस्त्वर्थे द्वितीयस्तु विविदिषावाक्यस्य साधनान्तरसंग्रहा
र्थः । सांसारिकं ज्ञानं व्यावर्त्तयति परमार्थेति । तदेवाभिनय
ति एकमिति । प्रवृत्तिरूपमिति रूपग्रहणमाभासत्वप्रदर्शना
र्थं कर्म्माभाससमुच्चयस्तु यादृच्छिकत्वान्न मोक्षफलयतीति शे
षः । किन्त्वज्ञानिनो रागादिप्रवृत्तिर्न ज्ञानेन तत्फलेन समुच्चीयते
फलाभिसन्धिविकलप्रवृत्तित्वादहङ्कारविधुरप्रवृत्तित्वाद्वा भगवत्प्र
वृत्तिवदित्याह यथेति । केनहेतुनासिद्धिमाशङ्क्य परिहरति तत्र

विदिति । कूटस्थं ब्रह्मैवाहमिति मन्वानो विद्वान् प्रवृत्तिं तत्फलं
वा नैव स्वगतत्वेन पश्यति रूपादिवद्दृश्यदृग्धर्मत्वायोगात् कि
न्तु कार्यकारणसंघातत्वेनैव प्रवृत्त्यादि प्रतिपद्यते तत्तत्त्ववि
दो व्याख्यानभिक्षाटनादौ प्रवृत्तस्य तत्प्राप्त्यादिफलाभिसंधेरभा
वत्वान्नासिद्धं हेतुद्वयमित्यर्थः । ननु ज्ञानोदयात् प्रागवस्थाया·
मिवोत्तरकालेऽपि प्रतिनियतप्रवृत्त्यादिदर्शनात्तत्त्वदर्शिनिष्ट
प्रवृत्त्यादेराभासत्वमिति तत्राह यथा चेति । स्वर्गादिरेव काम्यमा·
नत्वात् कामस्तदर्थिनः स्वर्गादिकामस्याग्निहोत्रादेरपेक्षितस्व
र्गादिसाधनस्यानुष्ठानार्थमग्निमाधाय व्यवस्थितस्य तस्मिन्नेव का
मे कर्मणि प्रवृत्तस्यार्द्धकृते केनापि हेतुना कामे विनष्टे तदेवा
ग्निहोत्रादि निर्वर्त्यते न तत् काम्यं भवति नित्यकाम्यविभागस्य
स्वाभाविकत्वाभावात् कामोपबन्धानुपबन्धकृतत्वात् तथावि
दुषोऽपि विध्यधिकाराभावाद्गात्रादिप्रवृत्तीनां कर्माभासतेत्य·
र्थः । विद्वत्प्रवृत्तीनां कर्माभासत्वमित्यत्र भगवदनुमतिमु
पन्यस्यति तथा चेति । ननु विद्वद्व्यापारेऽपि कर्मशब्दप्रयोगद
र्शनात् तद्व्यापारस्य कर्माभासत्वानुपपत्तेः समुच्चयसिद्धिरि
ति तत्राह यद्येति । ज्ञानकर्मणोः समुच्चितयोरेव संसिद्धिहेतुत्वे
प्रतिपन्ने कुतो विभज्यार्थं ज्ञानमिति शङ्कते तत्कथमिति ।
तत्र किं जनकादयोऽपि तत्त्वविदः प्रवृत्तकर्माणः स्युराहोस्विदत
त्त्वविद इति विकल्प्य प्रथमं प्रत्याह यदीति । तत्त्ववित्वे कथं प्रवृ
त्तकर्मत्वं कर्मण्यकिञ्चित्करत्वादित्याशङ्क्याह ते लोकेति ।
तेषामुक्तप्रयोजनार्थमपि न प्रवृत्तिर्युक्ता सर्वत्राप्युदासीनत्वा^
दित्याशङ्क्याह गुणा इति । इन्द्रियाणां विषयेषु प्रवृत्तिद्वारा तत्त्व
विदां प्रवृत्तकर्मत्वेऽपि ज्ञानेनैव तेषां मुक्तिरित्याह ज्ञानेनेति ।
उक्तमेवार्थं संक्षिप्य दर्शयति कर्मेति । कर्मणोऽत्यादौ बाधिता

गी॰
टी॰ टि॰

58

तत्त्वज्ञाभावो श्रूयते । द्वितीयमनुवदति अथेति । तत्र वाक्यार्थं कथयति ईश्वरेति विभज्य विज्ञेयत्व वाक्यार्थस्योक्तमुपसंहरति इति व्याख्येयमिति कर्म्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वमित्युक्तेर्थे वाक्यशेषं प्रमाणयति एतमेवेति योगिनः कर्म्म कुर्व्वन्तीत्यादि वाक्यमर्थतोनुवदति सक्त्वेति स्वकर्म्मणा इत्यादौ साक्षादेवमोक्षहेतुत्वं कर्म्मणां वदतीत्याशंक्याह स्वकर्म्मणेति स्वकर्म्मणा इत्यादौ साक्षादेव मोक्षहेतुत्वं कर्म्मणां वदतीत्याशंक्याह स्वकर्म्मणेति । स्वकर्म्मानुष्ठानादीश्वरप्रसादद्वारा ज्ञाननिष्ठायोग्यता लभ्यते ततो ज्ञाननिष्ठया मुक्तिस्तेन न साक्षात् कर्म्मणां मुक्तिहेतुत्वेनेत्यग्रे स्फुटीभविष्यतीत्यर्थः । तत्त्वज्ञानोत्तरकाले कर्म्मासम्भवे फलितमुपसंहरति तस्मादिति । ननु यद्यपि गीताशास्त्रं तत्त्वज्ञानप्रधानमेकं वाक्यं तथापि तन्मध्ये श्रूयमाणं कर्म्म तदङ्गमङ्गीकर्त्तव्यं प्रकरणप्रामाण्यादिति समुच्चयसिद्धिस्तत्राह यथावेति । अर्थवादेनात्मज्ञानमेव केवलं कैवल्यहेतुरितिश्रूयते । इतिकृतामभिप्रायं प्रत्याख्याय स्वाभिप्रेतः शास्त्रार्थः समर्थितः संप्रत्यशोच्यानित्यस्मात्प्राक्तनग्रन्थसन्दर्भस्य प्रागुक्तं तात्पर्यमाह तत्रेति । अत्र हि शास्त्रे त्रीणि काण्डान्यष्टादशसंख्याकानामध्यायानां षट्कत्रितयमुपादाय त्रैविध्यात् तत्र पूर्व्वषट्कात्मकं संख्याकानामध्यायानां षट्कत्रितयमुपादाय त्रैविध्यात् तत्र पूर्व्वषट्कात्मकं पूर्व्वकाण्डं त्वम्पदार्थं विषयीकरोति मध्यमषट्करूपं मध्यमकाण्डं तत्पदार्थं गोचरयति अन्तिमषट्कलक्षणमन्तिमं काण्डं तयोः पदार्थयोरैक्यं वाक्यार्थमधिकरोति तत्त्वज्ञानसाधनानि तत्र तत्र प्रसङ्गादुपन्यस्यन्ते तत्त्वज्ञानस्य तदधीनत्वात् तत्त्वज्ञानमेव केवलं कैवल्यसाधनमिति च सर्व्वत्र विभागे एवं पूर्वोक्तरीत्या गीताशास्त्रार्थे परिनिश्चिते

१ सतीति यावत् धर्मसंमूढं कर्त्तव्याकर्त्तव्यविवेकविकलं चेतो यस्य तस्य मिथ्याज्ञानवतोऽहंकारममकारवतः शोकाख्यसागरे दुस्तरे प्रविश्य क्लिश्यतो ब्रह्मात्मैकत्वलक्षणवाक्यार्थज्ञानमात्मज्ञानं तदन्तरेण केनोद्धरणासिद्धेः तमतिभक्तमतिस्निग्धं शोकादुद्धर्त्तुमिच्छन् भगवान् यथोक्तज्ञानार्थं तं अर्जुनमवतारयन् पदार्थपरिशोधने प्रवर्त्तयन्नादौ त्वम्पदार्थशोधयितुमशोच्यानित्यादिवाक्यमाहेति योजना ।१०

गी·
टी हि·

59

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः
॥११॥

शांकरभाष्यं

अशोच्यानित्यादि नशोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वा
त् परमार्थरूपेण च नित्यत्वात् तानशोच्यानन्वशोचो ऽनुशो·
चितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं करिष्या
मि राज्यसुखादिनेति त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि
च भाषसे तदेतन्मौढ्यं पाण्डित्यं विरुद्धमात्मनि दर्शयस्युन्म
त्त इवेत्यभिप्रायः यस्माद्गतासून् गतप्राणान् मृतान् अगता
सूनगतप्राणान् जीवतश्च नानुशोचन्ति पण्डिताः आत्मज्ञाः
पण्डा आत्मविषया बुद्धिर्येषां ते हि पण्डिताः पाण्डित्यं निर्वि
द्येति श्रुतेः परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढो ऽ
सीत्यभिप्रायः ११।

आनन्दगिरिकृतटीका

यस्याज्ञानं तस्य भ्रमो यस्य भ्रमस्तस्य पदार्थपरिशोधनपूर्वकं स
म्यक् ज्ञानं वाक्यादुदेतीति ज्ञानाधिकारिणमभिप्रेत्याह अशो
च्यानित्यादीति यत्तु केश्चिदात्मा वा अरे द्रष्टव्य इत्याद्यात्मया
थात्म्यदर्शनविधिवाक्यार्थमनेन श्लोकेन व्याचष्टे स्वयं हरि
रित्युक्तं तदयुक्तं कृतियोग्यतैकार्थसमवेतश्रेयःसाधनता
याः पराभिमतनियोगस्य वा विध्यर्थस्यात्राप्रतीयमानस्य क
ल्पनाहेत्वभावात् न च दर्शने पुरुषतन्त्रत्वरहिते विधेयत्वा
दिविलक्षणो विधिरुपपद्यते कृत्यन्तर्भूतस्य तदर्थत्वात् नचो

न विधिमधिकरोतीत्यभिप्रेत्याचष्टे न शोच्या इति कथं तेषाम
शोच्यत्वमित्युक्ते भीष्मादिशब्दवाच्यानां शोच्यत्वं तत्स्यदलस्याणां
वेति विकल्प्याद्यं दूषयति सद्वृत्तत्वादिति ये भीष्मादि शब्दैरु
च्यन्ते ते श्रुतिस्मृत्युदीरिताविगीताचारवत्त्वान्न शोच्यतामर्हन्ती
त्यर्थः द्वितीयं प्रत्याह परमार्थेति अर्जुने रज्जुबुद्धिवदशो
च्येषु शोच्यबुद्ध्या भ्रान्तोसीत्याह त्वमिति अनुशोचनप्रकारम
भिनयन् भ्रान्तिमेव प्रकटयति ते म्रियन्त इति पुत्रभार्यादि
प्रयुक्तं सुखमादिशब्देन गृह्यते त्वमनुशोचितवानसीति सम्बन्धः
विरुद्धार्थाभिधायित्वेनापि भ्रान्तत्वमर्जुनस्य साधयति त्वं प्रज्ञा
वतामिति उत्सन्नकुलधर्माणामित्यादीनि वचनानि किमेतावता
फलितमिति तदाह तदेतदिति तन्मौढ्यमशोच्येषु शोच्यदृष्टिव
मेतत् पाण्डित्ये बुद्धिमतां वचनभाषित्वमिति यावत्। अर्जुनस्य
पूर्वोक्तभ्रान्तिभाक्त्वे निमित्तमात्माज्ञानमित्याह यस्मादिति। ननु
स्थूलबुद्धिमात्रमेव पाण्डित्यं न त्वात्मज्ञानं हेत्वभावादित्याशङ्क्या
ह तेहीति। पाण्डित्यं पण्डितभावमात्मज्ञानं निर्विद्य निश्चयेन ल
ब्ध्वा बाल्येन तिष्ठासेदिति बृहदारण्यक श्रुतिमुक्तार्थमुदाहरति
पाण्डित्यमिति यथोक्तं पाण्डित्यराहित्ये कथं ममावगतमित्याशं
श्री काकार्य्यदर्शनादित्याह परमार्थतस्त्विति यस्मादित्यस्यापेक्षितं दर्श
यति त्वत इति ११

स्वामिकृतटीका

देहात्मनोरविवेकादस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं
श्रीभगवानुवाच अशोच्यानिति शोकस्याविषयभूतानेव बन्धून्
त्वमन्वशोचः अनुशोचितवानसि दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समु
पस्थितं इत्यादिना तत्र कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं इत्या

दिनामया वोधितोपि पुनश्च प्रज्ञावादान् प्रज्ञावतां पंडितानां वादा
न् भाषसे न कथं भीष्ममहं संख्ये इत्यादीन् केवलं भाषसे न तु पंडितो
सि यतः गतासून् गतप्राणान् मृतान् अगतासूंश्च जीवतोपि वंधून्
बुद्धीना एते कथं जीविष्यंतीति नानुशोचंति तेनेदमाह ११ पण्डिता विवेकिनः

पैशाचभाष्यं

अशोच्यान शोच्या भीष्मद्रोणादयः धार्मिकत्वाद् सत्त्वतश्च परमा
त्मस्वरूपत्वात् अन्वशोचः अनुशोचितवानसि प्रज्ञापरमात्मज्ञा
नं तन्निमितांश्च वादान् वचनानीह भाषसे गताः असवः प्राणा येषां
ते गतासवस्तान् गतासून् अगतासून् गतासून् अगतप्राणांश्च
पंडिताः परमार्थविदो नानुशोचंति अतो मूढस्त्वं प्रज्ञापरमात्म
न्तस्ते ११

रामानुजभाष्यटीका

अशोच्यान्नत्वमनुशोचसि पतंति पितरो ह्येषां लुप्तपिंडोदकक्रिया
इत्यादिकान् देहात्मस्वभावप्रज्ञानिमित्तवादांश्च भाषसे देहात्म
स्वभावज्ञानवतां नात्र किंचिच्छोकनिमित्तमस्ति गतासून् देहान् अ
गतासूंश्चात्मनश्च प्रतिनियोर्याथात्म्यविदो न शोचंति अतस्त्व
यि किं प्रतिविरुद्धमिदमुपलभ्यते यदेतान्हं निहनिष्यामीत्य
नुशोचनं यच्च देहातिरिक्तात्मज्ञानकृतं धर्माधर्मभाषणं अतो दे
हस्वभावं न जानासि तदतिरिक्तमात्मानं च नित्यं तत्प्राप्त्युपायभू
तं युद्धादिकं धर्मं च इदं युद्धं फलाभिसंधिरहितमात्मयाथात्म्या
वाप्त्युपायभूतं आत्मा हि न देहजन्माधीनजन्मा न देहमरणाधी
न विनाशश्च तस्य जन्ममरणयोरभावात् अतः स न शोकस्थानं
देहस्त्वचेतनः परिणामस्वभावस्तस्योत्पत्तिविनाशयोगः स्वाभा
विक इति सोपि न शोकस्थानमित्यभिप्रायः ११ ॥

अभिनवगुप्तकृतटीका

अनयोः ...ज्ञानाज्ञानयोर्मिथ्याग: श्रीभगवतानुशिष्यते
तमभ्युपेणोपदर्शितं तदात्मा विषादमोहाभिभवादिसंज्ञः कृ
पागृहीतः समवीक्ष्य स्वं भूतमभिप्रपन्नान्स्वमेवं तत्कस्य मानुषा
मनुष्यभावः अंतकसुखे स्वयमेते प्रविष्टा इति तत्र को वाधः ११

परमार्थप्रपादीका

अथात्मनस्तत्त्वज्ञानकर्मोपदेशार्थं विषादं परिहरन् त्रिविकारिणं
त्रिविकारिणं तस्मा के भगवानाह अशोच्यानिति अशोच्यान्
शोकानर्हानेवंभूतान् अन्वशोचः शोचितवान
सि त्वं मत्स्वजनानहं हंस्यामीति अनन्तरकातरता करमलमिदमि
त्यादिना स्माभिबोधितोपि प्रज्ञावादान् प्रज्ञया वचनवान्तुः
मात्रेण वादान् वशात्त्वं भाषसे तज्ज्ञान प्रलपितवद्द
दसितसेतावहंशं भाषणं तवचिपकमित्यर्थः यतः पण्डिताः
ज्ञातारः गतासून् गतप्राणान् तथा गतासून् जीवतोवं
ती प्रातीनकथं जीविष्यंति न तु शोचंति ११ ॥

वनमालीकृतटीका

सर्वज्ञो दासीन तथाका शवदसंगोपि स्वत्तरूपभावः स्वशरणा
गतपत्नपालीपरमकारुणिको भक्तवत्सलो नादिसंसारप्रवा
हपतितानात्मरवमिश्लतोऽः रंविजिज्ञासमनस्तदुपायमज्ञानतो जीवा
न् विलोकसंसारसिंधुतरणायस्वविषयकसर्वात्मनथीरर्वकावि
क्रिवेशप्रवाहरूपसंभक्तार्थं विवहितमारोपयितं प्रथमसोपानं
स्वस्वरूपानुसंधानपूर्वकं स्वधर्मानुष्ठानं वक्तुं स्वसरवेनरावतारं सं
विदितात्मनानमर्जुनमुपलक्षणीकृत्य भगवानात्मनात्मविवेक
माह अशोच्यानितिहेअर्जुनत्वं यां प्रत्यशोचः दृष्टेमंमित्यादिना शो
नं

अशोच्या शोचितुमशक्यं कलेवरं सदा नश्वरत्वात् अशोचनार्हं चा
त्मानं शोचसि नकश्चिद् नास्तु र्ननो गतासुर्जीवन्वा शोच्योस्ति नय
दि आत्मा तावद दिनाशी नानाशरीरेषु सञ्चरते तस्य शोच्यता न
च देहान्तरसञ्चार एव शोच्यता एवं यौवनादावपि शोच्यता भवे

टि॰
टी॰टि॰

61

चिंतवानसि ते अशोच्याः शोकार्हा न भवंति यांश्च भाषसे प्राप्यमेवाश्र-
येदस्मात्तिन्नादिना ते प्रज्ञावादाः स्वमनैवेवादास्त्वमनीषोत्था न
तु शास्त्रोपदेशादिजाता इत्यर्थः यद्वा प्रकर्षेण ज्ञानेन नीतिप्रज्ञाः ते-
[मता] षां वादास्तद्विरुद्धवादा इत्यर्थः सिद्धे शोकं भाषणं चानुचितं सिद्धयोरशो-
चनप्रज्ञमतविरोधयोर्विधानार्थं विभक्तिविपरिणामेनान्वयः
कथमाससत्वविनाशान्न शोच्या इत्यत आह गतासूनिति पंडिता आ-
[म] त्मानात्मतत्वविदः गतासवः प्राणा येभ्यस्ते गतासवो देहास्तद्वि-
रुद्धत्वाज्जीवा अगतासवः पुरुषस्य मरणे त्वमन प्राणा भागा न एव
न अपि देवं प्राप्नुवंति भागतो नुव्रजंतीति मितिस्मृतेः यद्यपि मु-
क्तो जीवस्यापि प्राणवियोगो भवति न तस्य प्राणा उत्क्रामंति इहै-
वलीयंत इति श्रुतामुक्तौ प्राणानामशेषतो जीवगतस्य सकार-
णप्रलयस्य चोक्तत्वात्तथापि देहात्मनो वियोगं मरणरूपं यदव- [बुधा]
स्थायां प्राणानां भागेन जीवेन सह गमनमस्ति देहे तु भागे नापि
संबंधो नास्ति तथा च संसारावस्थायां गतप्राणा गतप्राणत्वेन दे-
हात्मानो विवक्षितो देहः [illegible]
[illegible]
[illegible] परिणामीनश्वरस्वभावे न शोकस्थानं आत्मा अ- [ना]
पपत्तिविनाशादिविकारशून्य इति न शोकस्थानमित्यर्थः यद्वा गत-
निर्गताः कदाचित्संयुक्ता अनंतरं निर्गता असवः प्राणा येभ्यस्तान् [देहान्]
न हि रुद्धान् अगतास्तु न स संयोगरहितान् नित्यानंदस्वरूपांश्चेतनान्
श्च न शोचंति यद्यपि प्राणसंबंधो बद्धावस्थायां चेतनेष्वस्ति तथा-
पि प्राणाधीनचेष्टावत्त्वमेव प्राणित्वं तच्च देहएवास्ति न चेतने मु-
क्तौ प्राणाभावेपि सत्त्वप्रतीतेर्जक्षत्क्रीडन्रममाण इति श्रुतेर्नो चे-
ष्टाया उक्तत्वात् न हि स्वामित्वमात्रेणैव प्राणित्वमीश्वरस्यापि प्राणि-

त्वापत्तेः न च जीवस्य प्राणजन्मभोगाश्रयत्वेन प्राणित्वमीशस्य भो-
गाभावात्प्राणित्वमिति वाच्यं प्राणादिप्रयुक्तस्वाभाविकभोगस्य·
जीवेऽप्यभावात् अनाद्यविद्यावशाद्देहादावहंममेत्यभिमानात्सुखेन
हृष्टेहं नष्टः इतिवज्जीवभोगस्वाभाविकत्वात् आत्मनो देहाधीनजन्मम-
रणादिकं नास्त्येवेति स न शोकस्थानं देहस्तु परिणामस्वभावस्तस्यो-
त्पत्तिविनाशयोः प्रतिक्षणं स्वाभाविकत्वात्सोपि न शोकस्थानं अतो
देहात्मनोः स्वरूपेण ज्ञानोपायभूतं फलानि संवेधि रहितं प्रज्ञावादांस्त्व-
यं मे जानन्नपि मन्यसे वेति तत्त्वविदित्वाऽशोचनं प्राज्ञमतानां विरुद्धभाष·
णं च विरुध्यतीति बुद्धमयोपलभ्यत इति भावः ११

कुसुमवैजयंतीटीका

अस्यात्मानात्मनोर्यथार्थस्वरूपस्वभावाद्यविवेकादयं मोहः स्यात
योर्ज्ञानं विना न शाम्यतीति निश्चित्य तच्छोकापनोदनाय तयोः स्वभा-
वादिकं प्रवदन् श्रीभगवानुवाच अशोच्यानिति यतो शोच्यान् शो-
चितुमनर्हान् बांधवान्प्रति त्वमन्वशोचः दृष्ट्वेमं स्वजनं कृष्णेति द
स्यार्थेराष्ट्राः पतन्ति पितरो ह्येषामित्यादिभिर्यतश्च प्रज्ञावादानक-
थं भीष्ममहं संख्ये इत्यादिना प्रज्ञावतां देहात्मस्वभावविदां वादान्
प्राज्ञानेव केवलं भाषसे वदसि न त्वेषामिव कर्माचरसि अतस्त्व-
ं पंडितमान्येवासि न तु पंडितोसि महद्युद्धारंभे कृत्वानेकदेशेभ्यो ऽ
नेकान्वीरानाहूय स्वप्राबल्येन लक्षणगोचरो भूत्वा सर्ववीरसमक्षं तस्य
नैवं भाषितं मम वा नैत्रपायिता यातीत्यभिप्रायः शोचनस्य भाष-
णाद्भूतकालत्वाद्भूतनिर्देशो नानुपपन्नः भाषणस्य तु शोचना-
ऽनंतरत्वाद्वर्तमानत्वनिर्देशोऽप्यविरुद्ध एव ननु वन्धुविश्लेषजन्यः
शोकः प्रज्ञावतामपि दृष्टो भवेन्न केवलो ममैवेति चेत्तत्राह ग-
तासूनिति गतासवः प्राणा येषां तान्देहानगतासून् अवि-
गतप्राणानात्मनश्च पंडितास्तु यथार्थात्मज्ञानवन्तो नानुशो-
चंति एते मरिष्यन्ति चेत्तर्ह्यहं कथं जीविष्यामीत्येवं न विमृशन्ति

गी· टी·हि·

त्वयि तु महद् इदं विपरीतं पश्यामि यतोऽशोच्ये देहात्मस्वरूपे शोकं देहातिरिक्तात्मविवेकवतामिव धर्माधर्मभाषणं च करोषि अत स्त्वं देहात्मनोः स्वभावस्य शास्त्रोपायभूतस्य धर्मस्य च न जानासि [illegible] ॥ ११ ॥

मधुसूदनी टीका

तत्रार्जुनस्य युद्धाख्ये स्वधर्मे स्वतो जातापि प्रवृत्तिर्द्विविधेन मोहे न तन्निमित्तेन च शोकेन प्रतिबद्धेति द्विविधो मोहस्तस्य निराकरणीयः तत्रात्मनि स्वप्रकाशपरमानंदरूपे सर्वसंसारधर्मासंसर्गिणि स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयाऽविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूपः एकः सर्वप्राणिसाधारणः अपरस्तु युद्धाख्ये स्वधर्मे हिंसादिबाहुल्येनाधर्मत्वप्रतिभासरूपोऽर्जुनस्यैव करुणादिदोषनिबंधनोऽसाधारणः एवमुपाधित्रयविवेकेन शुद्धात्मस्वरूपबोधः प्रथमस्य निवर्तकः सर्वसाधारणो द्वितीयस्य तु हिंसादिमत्त्वेपि युद्धस्य स्वधर्मत्वेनाधर्मत्वाभावबोधोऽसाधारणः शोकस्य तु कारणनिवृत्त्यैव निवृत्तेर्न पृथक्साधनांतरापेक्षा अभिप्रेत्य क्रमेण भ्रमद्वयमनुवदन् अशोच्यानन्वशोचस्त्वमित्यादिना भगवान् भीष्मद्रोणादीन् आत्मसहितांस्त्वं पंडितोऽपि सन् अन्वशोचः अनुशोचितवानसि एते म्रियंते मन्निमित्तं अहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेत्येवमर्थकेन दृष्ट्वेमं स्वजनमित्यादिना तथा चायं शोचभ्रमः पश्वादिसाधारणः तवासन्नपंडितस्यानुचिततरः तथा च कुतस्त्वा कश्मलमित्यादिना मद्वचनेनानुचितमिदमाचरितं मयेति विमर्शो यामेपि त्वं स्वयं प्राज्ञोपि सन् प्रज्ञानामवादान्प्रज्ञैर्वक्तुमनुचितान् कथं भीष्ममहं संख्ये

इत्यादीन्भाषसेवदसि नचलज्जयानम्रीभवसि अतःपरंकिमनु
चितमस्तीतिसूचयितुंचकारः तथाचाधर्मेधर्मत्वभ्रांतिर्धर्मेचाध
र्मत्वभ्रांतिरसाधारणीतवातिपंडितस्यनोचितेतिभावः प्रज्ञावतां
पंडितानांवादान्भाषसेपरंनतुबुद्ध्यसमुतिवा भाषणापेक्षयाऽनु
शोचनस्यप्राक्कालत्वादतीतत्वनिर्देशः भाषणस्यतुतत्का
लत्वेनाव्यवहितत्वाद्वर्तमानत्वनिर्देशः क्रोदसेनातिद्व्यनयेनानु
शोचसीतिवर्त्तमानत्वं व्याख्येयं ननुबंधुविच्छेदेशोकोनानुचितः
वसिष्ठादिभिर्महाभागैरपिकृतत्वादित्याशंक्याहगतासूनितियेपं
डिताः विचारजन्यात्मतत्त्वज्ञानवंतस्तेगतप्राणानगतप्राणांश्चबंधु
त्वेनकल्पितान् देहान्नानुशोचंति एतेमृताः सर्वोपकरणपरित्या
गेनगताः किंकुर्वंतिकुत्रतिष्ठंति एतेचजीवंतोबंधुविच्छेदेनकथंजी
विष्यंतीतिनव्याकुर्वंतिसमाप्तिसमयेतत्प्रतिभासाभावात् अन्या
नसमयेतत्प्रतिभासेपिमृषात्वेननिश्चयात् नहिरज्जुतत्वसाक्षा
त्कारेणसर्पभ्रमेऽपनीतेतन्निमित्तभयकंपादिसंभवति तथापि
नोपहतेंद्रियस्यकदाचिद्गुडेतिक्तताप्रतिभासेपितत्कार्थितया
तत्रप्रवृत्तिः संभवतिमधुरत्वनिश्चयस्यबलवत्त्वात् एवमात्मस्व
रूपाज्ञाननिबंधनत्वाच्छोकभ्रमस्यतत्स्वरूपज्ञानेनतदज्ञानेऽ
पनीतेतत्कार्यभूतः शोकभ्रमः कथमवतिष्ठेतेतिभावः वसि
ष्ठादीनांप्रारब्धकर्मप्राबल्यात्तथातथानुकरणंनशिष्टाचारतया
न्येषामनुष्ठेयतामापादयति शिष्टैर्धर्मबुद्ध्यानुष्ठीयमानस्यालौ
किकव्यवहारस्यैवतदाचारत्वात् अन्यथानिष्ठीवनादेरप्यनुष्ठानप्र
संगादितिद्रष्टव्यम् यस्मादेवंतस्मात्वमपिपंडितोभूत्वाशोकंमा
कार्षीरित्यभिप्रायः ११

सदानंदीकृतटीका

तत्रार्जुनस्यसंग्रामेप्रवृत्तिरभवत्ततः मोहेनद्विविधेनैषाप्रति

गी॰
टी॰ द्वि॰

63

वहासवद्वियथा १ मोहश्चादौ निराकार्यस्तत्स्वरूपं प्रदर्श्यते स्वप्रका
शोपरागे देहमुद्दे संसारिणि स्थितः २ शरीरचिन्तयाध्यासात्संसारे स
न्ततामतिः अनात्मनि शरीरादावात्मताधीर्भ्रमात्मिका ३ सर्वसा
धारणो मोह एकोऽसाधारणोऽपरः स्वधर्मे धर्मताबुद्धिर्युद्धे पार्थस्य
याभवत् ४ मोहोपशमने योऽत्रासाधारणाः प्रदाभियः देहत्रयाद्वि
विच्यात्मतत्त्वं प्रत्यंचमागमैः ५ योवोपः सोऽस्त्रायस्य मोहस्य विनि
वर्तकः स्वधर्मत्वेन युद्धस्य हिंसादीनां न दोषता ६ एवं वोधो हितो
यस्य से मोहस्य निवर्तकः हेतुनाशेन शोकस्य विनिवृत्तिः स्वतो भ
वेत् ७ इत्यभिप्रेत्य भगवांस्तत्र हृद्यंक्रमशोऽवदत् उवाच सर्वशोका
पथ्याः समूलं निवर्तयन् ८ भीष्मादीनात्मसहितान्योगत्येनेव
शोचितं पंडितः सन्नहोनांस्त्वमनुशोचितवानसि ९ म्रियंते म
न्निमित्तं ते किं करिष्यामि तैर्विना किं नो राज्यादिनेत्यादिवचोभिर्वुद्ध
याधमात् १० शोच्यत्वमस्त्वेषां शोच्ये सामान्यास्तिर्यगादिभिः अत्यंत
पंडितस्यायं नोचितः सर्वथा भवेत् ११ प्राज्ञैर्वक्तुमयोग्यांश्च शब्दा
न्वदसि नैकथा कथं भीष्ममहं संख्ये इत्यादीस्त्वं न लज्जया १२ स्त्र
स्त्रीभवसि किं ते स्यादनौचित्यमतः परं यद्हि प्रज्ञावतां वादान्भाष
सेन नत्ववुध्यसे १३ मौढ्यं पांडित्यमेकत्र न त्वयि दृष्टं नदद्भुतं ननु वंधु
वियोगेन तु शोकः स्याद्धीमतामपि १४ मैवं धीमत्वमेतज्ञः महासा
येव कल्पते ये पंडिता परोः श्रुत्वा वेदांतविषयं परं १५ ब्रह्मैकं यु
क्तिभिर्मत्वा निदिध्यास्य निरंतरं साक्षात्कृतात्मतत्त्वास्ते नष्ट वि
द्यामलावुधाः १६ मृतान्वा जीवतो वंधून्नानुशोचंति कस्मितान्
एते सर्वे परित्यज्य गतास्तिष्ठंति कुत्र ते १७ जीविष्यंति कथं चैते
जीवंतो वंधवो मम वंधुविच्छेदतश्चैवं न व्यामुह्यंति पंडिताः १८ प
रमात्मानजभ्रांत्या कल्पिता वंधवो मृताः जीवंतो वा न ते वोधे शोक
मोहप्रदाः सतां २० देहादेर्नश्वरात्मत्वान्नित्यत्वात्प्रत्यगात्मनः नशो

थाः प्राणिनः सर्वे स्वात्मनत्व विदां सतां २१ एवं त्वं पंडितो भूत्वा मा

कृथाः शोकमात्मजे स्वात्मनस्त्वेसदा स्थैर्यमास्थायाशु योद्धरे:२२ ११

नीलकंठीकृतटीका

अर्जुनस्य देहनाशे आत्मनाशधीः स्वधर्मे युद्धे चाधर्मधीरिति मोहद्

वयं तत्राद्यं बलविद्यासत्वभूतैर्विशात्यास्नोकैरपनिनीषन् श्रीभ

गवानुवाच अशोच्यानन्वशोचस्त्वमिति जीवापेतं वाव किलेदं म्रि

यते न जीवो म्रियत इति श्रुतेर्देहाद्युपाधिनाशेप्याकाशवन्नाशर

हितत्वेन अशोचनीयान् भीष्मादीनन्वशोचः कथमेते मया हत

व्याः कथं वा तैर्विनाहं जीविष्यामीति शोकं कृतवानसि एवं मूढोपि

त्वं प्रज्ञावादान् प्रज्ञावतां देहादन्यमात्मानं जानतां वादान् शाब्दानन

रेकेनियतं वासः एतेनिपितरोस्येषामित्यादीन् भाषसे परं न त्वप्र

ज्ञावानसि तत्र हेतुः गतासूनिति गतासून् गतप्राणान् देहान्त्र

शोचंति प्रसूतनिर्देहंत्येव एतेन प्राणएव शोन तत देहः तथा च श्रु

तिः प्राणोह पिता प्राणो माता प्राण आचार्य इत्यादिः अत एव सप्रा

णानेतान् श्रवणाद्यं तं न रं पित्रादिहं तात्वमसि पितृकामिति वदंति

उत्क्रांतिप्राणान् दहंतमपि नैवं वदंती लोकवेद प्रसिद्धिः तस्मात् आ ति

त्मा देहादन्यः [illegible] चेतनत्वात् व्यतिरेकेण घटवत् देहो न

चेतनः दृश्यत्वात् घटवत् यदि देहश्चेतनः स्यात् मृतेपि तत्र चैत

न्यमुपलभ्येत तस्मात् देहनाशेनात्मनाशं मन्वानो मूर्ख एवासीत्यर्थः

एतत्प्रज्ञानां पंडितानां प्रवादान् वक्रमयोग्यान् भाषसे इति तार्किक

व्याख्यानं तत्र हार्द्धं यजो दुर्लभत्वात् विशेषाध्याहारसापेक्षत्वा

च्चोपेक्ष्यं ११ ॥

49

आनंदी टीका

सम्यग्ज्ञानाभावमेवाह भीष्मादीनशोच्यानन्वक्ष्यमाणनीत्याशोचनान
र्हान् त्वमनुशोचः शोचितवानसि च पुनः पापमेवाश्रयेदस्मान्हित्वा
दि श्रेयस्त्वं तेभैक्षमपीत्यादि च प्राज्ञवद्बुद्धिमानिव न भाषसे पंडिताः
प्राज्ञाहि गतासून्मृतान् अगतासूंश्च जीवितश्च नानुशोचंति जन्म
मरणयोरावश्यकत्वात् अयं भावो देहश्चपवाणिस्थूलसूक्ष्मप्रकृतिरूप
समुदायात्मनोर्देहदेहिनोः देहश्यपयो वक्ष्यमाणं भेदमाश्रित्याशो
ने आत्मानात्मतत्त्वज्ञानोपदेशप्राप्तिवितः तथाहि अशोच्यानित्य
त्वेनात्मनो विनाशाभावदर्शनादशोच्यनीयान् शोचितवानसि
पंडिता नित्यानित्यविचारकाः गतासून्नगतासूंश्च तेषु तेषु शरीरे
ष्ववस्थितानवस्थितप्राणत्वात् जीवन्मृतव्यपदेशभाजो नित्याज्ञी
वात्मनो नानुशोचन्तीति ११ ॥ त्वमात्मविषयेणापहृतान्तरात्माविषा
दमोहाभिभवाद्विसंज्ञः कृपागृहीतः समवीक्ष्य बन्धूनभिप्रपन्नान्मृ
त्युमंतकस्य ॥ मानुष्येण मनुष्यजातिस्वलभेन रजोगुणस्वभावेन
संशयविपर्ययज्ञानप्रायेण चित्तचापल्येनोपहृतो मलिनीकृतोन्तरा
त्मान्तःकरणं यस्य सः इहशास्त्रे अन्तकस्य मुखमभिप्रपन्नान्देहदेहिनो
स्संयोगस्य पर्यवसानकारयति कैंगोशाहेगृणयति इति कालस्वरूप
स्येश्वरस्य दर्शयामास समवीक्ष्य कृपागृहीतः युद्धे ममैते बन्धवो ह
न्यन्ते युद्ध्यागाद्धिताः स्युरिति ममतानिबन्धनकारुण्येनैव वि
षण्णेन गृहीतश्चाविष्टो न पर्वते म्रियन्ते इति विषादस्य शोकस्याभि
भवेन तथा त्वन्मे त्वयुद्धे पतेरक्षिताः स्युरिति मोहस्य मिथ्याज्ञानस्य
चाभिभवाद्विगतस्य सम्यग्ज्ञानेसीत्यर्थः ११ ॥

रामकंठी टी॰

अत एवाह त्वं ज्ञातिगुर्वादिविषयपर्यवसायिनः समरव्यापारस्याथ
मोत्पदःखोदर्कत्वाद्यं मन्यसे लोकद्वयबाधकत्वे प्राज्ञवद्बुद्धिमानि
व न जल्पसि नैषां नेष्टकी बुद्धिः शरीरशरीरिविवेकज्ञानाभावज
निताविमतिरेवैषा न ह्येते गुर्वादयोवश्यं विनाशा शरीरमात्रात्म
काः किंतु नित्याः शरीरिणस्तेन तत्त्वनिर्णिक्ताः अतएव किं जीवंत्व

65

शाज्ञवच्चाभिभाषसे । अशोच्यान् विनाशाभावात्परमार्थतस्तुदुःखयो
गाभावादशोचनीयान्परिदेवनस्याविषयीभूतानन्वशोचस्त्वं शोक
विषयत्वेन भावयन् यतस्त्वेते नित्याः अत एव तोऽनुगतासूंस्तेभ्यस्ते
भ्यः शरीरेभ्य उत्क्रान्तप्राणेभ्यस्तद्व्यपदेशभाजस्तथा वागतासूंस्त
स्मिंस्तेषु शरीरेष्ववस्थितप्राणत्वाज्जीवव्यपदेशभाजः पण्डिताविज्ञा
ज्ञातपरमार्थाः नानुशोचन्ति ॥ ११ ॥ त्वमानुष्येणोपहतान्तरात्मा
विषादमोहाभिभवाद्विसंज्ञः कृपागृहीतः समवीक्ष्य बन्धून् अभिप्र
पन्नान्मुखमेतकस्य ॥ उपदेशाभावात्सेत्यत्रुदितैदेवसगोवित
शाज्ञस्त्वं मानुष्येण मनुष्यभावेन संशयविपर्ययज्ञानबहुलेनोप
हतान्तरात्मा प्रत्यभिज्ञानाभातिरस्कृतसत्यात्मस्वरूपो वर्तसे इति
शेषः यस्माद्विषादेन शोकजेनानध्यवसायेन मोहेन च विपर्ययप्रत्य
यहेतुना वैचित्त्येन यस्त्वेऽभिभवसामर्थ्यभंगः कृतस्तस्माद्धेतोर्विसं
ज्ञो विवक्ष्यमाणसम्यग्ज्ञानो मिकृत एव ददवगतमित्यादि यतस्त्वं ड
निवारप्रसरस्य कृतानस्य वदनेन प्रविष्टान्बान्धवान्निरूप्य कृपागृ
हीतो गृहीतकृपास्वीकृतकरणः संहृतः आहिताग्न्यादेराकृति
गणत्वाद्गृहीतशब्दस्य पूर्वनिपाताभावोऽत्रावसेयः तेन बहुव्रीहि
रेवायं न तत्पुरुषः तस्मिन्सति भिन्नकर्तृकप्रसंगाः अनेन श्लोके
न वक्ष्यमाणस्यात्मज्ञानस्य प्रथमप्रतिपाद्यं शरीरशरीरिविवे
कज्ञानमासूचितं यत एकान्तविनश्वरशरीरसन्निवेशबद्धबन्धु
बुद्धित्वेऽदं शरीरिस्वरूपापरमर्शनिबन्धनम् ॥ ११ ॥

लासिकी टीका

शोकावेगेन वशीकृतस्यात एव विस्मृतात्मतत्त्वस्य वमर्षितयानित्य
त्वादि तदुमेयाममवितयंतोऽर्जुनस्य स्मृतिदानाय श्रीभगवानु
वाच अशोच्यानिति अशोच्यान् शोकस्याविषयीभूतान्बन्धूंस्त्व
बोधयुक्तोऽपि सन्नन्वशोचः अनुशोचितवानसि हे दृष्ट्वेमं स्वजनं कृ
ष्णेत्यादिना नश्वरस्य देहस्य शोचितुमशक्यत्वात् नित्यस्यात्म
नाशोचनानर्हत्वादशोच्यत्वम् कुतस्त्वा कश्मलमित्यादिनाम
याबोधितोऽपि प्रज्ञावतां बहिर्मुखत्वनया वै शाणप्रयुक्तानावादान्क

ख्ये भीष्ममहं संख्ये इत्यादि युक्तिवचनानि च न भाषसे अस्तु तत्कथय
सि यतो गतप्राणान् बंधून् गतांश्च जीवतोपि बंधुहीनान् एतत्कथं जी॰
विष्यंतीति नानुशोचंति पंडिता सदसद्विवेकजन्या बुद्धिः संजाता तेषा॰
मिति पंडिता अविवेकिनः अतस्त्वं पंडितस्य शोके न युक्तः तथा हि
आत्मनस्तावन्नानाशरीरेषु संचरतः कस्य शोचिता नवदेहांतरसं
चार एव शोचिता एवं हि बाल्ययौवनादिष्वात्मा वपि शोचनीयः स्यात् ११

पंचोली टीका ॥

देहात्मनो रविवेकादहंकारपूर्वको शोकमोहो संजातोर्जुनस्य हृद
यस्यात्मज्ञानेनांतरेण तयोर्निवृत्तिर्न संभवतीति देहादिभ्योभेदेन॰
आत्मानं दर्शयितुमाह हे अर्जुन त्वं अशोच्यान् भीष्मद्रोणादीन् सत्
त्वात् परमार्थस्वरूपेण नित्यान् अत एव अशोच्यान् तान् अन्वशो
चः अनुशोचितवानसि ते भीष्मद्रोणादयो मन्निमित्तं म्रियंते तैर्विना
भूतो हं राज्यसुखादिना किं करिष्यामीति च पुनः प्रज्ञावादान् बुद्धिम
तां वादान् शब्दान् कथं भीष्ममहं संख्ये इत्यादीन् केवलं भाषसे न तु पं
डितोसि तदेतन्मौढ्यं पांडित्यं विरुद्धमात्मनि दर्शयसि उन्मत्त इवेत्य
भिप्रायः यस्मात् पंडिता आत्मज्ञाः गतासून् गतप्राणान् अगतासून्
गतप्राणांश्च नानुशोचंति न यतस्त्वं पंडितः पंडितत्वनिष्ठा बुद्धि
स्तां प्राप्नुवंते पंडिताः न तु घटपटादिज्ञाने कदक्षाः गतासून् अग
तासून्वा आत्मनो अन्यथाभावं न पश्यंतीत्यर्थः परमार्थतस्तु त्वं तो
नित्या अशोच्यान् त्वं अनुशोचसि अतो मूढोसि जनस्ते अशोच्या
यतो नित्याः कथमित्याह ११ ॥

रणावीरसमिद्धोधिनी ॥

अर्जुनस्य युद्धारंभे स्वधर्मे जातापि प्रवृत्तिर्मोहेन तन्निमित्तेन शोकेन
च प्रतिरुद्धेति तन्निवारणपूर्वं तस्मिन्नेव स्वधर्मे तं प्रवर्तयितुं भ
गवानुवाच अशोच्यानिति त्वमित्यनेन पदेन पंडितत्वं चाभिहितं भी
क्रियते ततस्त्वं पंडितोपि सन् अशोच्यान शोचितुं अयोग्यान् भीष्म
द्रोणादीन् अन्वशोचः दृष्ट्वेमं स्वजनं कृष्णेत्यादिना अनुशोचितवानसि य

तेमन्निमित्तं म्रियंते यैर्विरहितोहं क्षणमपि न स्यां तेहं हन्मि इति शोक
स्तवातिपंडितस्य न युक्त इति भावः तथा प्रजानंतीति प्रज्ञा बुद्धिस्तद्व
वंतः पंडितास्तेषामेवादाननुचितानालापान् कश्मलमपश्यादृशामिहालापा
त् कथं भीष्ममहं संख्ये इत्यादि नृपालापमेवदसि न च लज्जयान्
म्रीभवसि अतिपंडितस्य नवा पाश्चोच्यपशोच्यभ्रमः उक्तत्वात् कश्मलमि
दमित्यादिनामहद्वचनेन मयैतदनुचितमेवाचरितमिति विमर्शप्रा
प्तावपि तादृशानुचितमाहृ भाषणं च पश्चादिसाधारणमनुचित
मिति भावः ननु वसिष्ठादीनामपि शोकस्य दृष्टत्वात्कथं तस्यानौचि
त्तं तत्राह गतासूनिति पंडिताः स्वधर्माचरणस्यैव सर्वश्रेयः
स्करत्वं निश्चितवंतो भवादृशाः क्षत्रियप्रवीराः गतासून्नष्टप्रायदे
हभाजो वधादीन् कथमेते विरहितमद्वीपकरणात् स्थितिभाजः
स्युरित्येवं प्रकारेणानुशोचंति अगतासून् जीवतश्च कथमेते प्रि
यजनैर्विनाकृताः सुखभाजः स्युरिति चनानुशोचंति सर्वेषामपि
देहिनामंते देहवियोगस्यावश्यंभावित्वादिति भावः ११ ॥

मधुभाष्य ॥

तत्र सेनयोर्मध्ये बांधवादिमोहजालसंहतं विषीदंतमर्जुनं
भगवानुवाच प्रज्ञावादांस्त्वमनीषोत्यवचनानि कथमशो
च्याः गतासून्किमिति ११ ॥

[margin:] ...कथमशोच्याः गतासून्किमिति

अशोच्यानिति अशोच्यान्शोकानर्हान्भीष्मादिदेहांस्त्वमशो·
चइतिसंबंधः यद्वायांस्त्वमशोचोभीष्मादिदेहांस्तेनित्यमहोअ
शोच्याइतियत्तदोध्याहारेणसंबंधः देशात्तविशिष्टज्ञानसंप
न्नेतिसंबोध्यतेयस्त्वंप्राज्ञकरीत्याशमादिसंपन्नोहिविषफल
विरागवानापात ज्ञात्मानात्मविवेकसंपन्नः इत्थंनशोकतर
णो क्वावान्भित्वयापिशरीरयात्रायामनुकोऽत्युपदेशापेक्षः
सकथंवानप्राज्ञोविशिष्टज्ञानसंपन्नइति यद्वाईदृशस्यापित्व
ल्लदेहविषयेशोकइतिमहदिदंप्रज्ञत्वमित्युपहासः नकेवल
शोचसिअपितुप्रज्ञावानवत्कव्यानिवाक्यानिसीदंतिममगात्रा
णीत्येवमादीनिभाषसे ननुजरामरणयोर्देहधर्मत्वात्देहा
नांचमरणाभिमुखत्वात्कथंनशोच्यतेत्यतआह गतासूनिति
अत्रचशब्दोऽप्ययनार्थकिमुतेत्यर्थे तथाचपंडिताःशास्त्रीयबुद्धि
संपन्नागतासून्मृतान्देहान्नानुशोचंतिकिमगतासूनित्यर्थः
अतएवतत्रमेदेहाइत्युपसंहारेदेहानांपरामर्शाऽउपक्रमेपिअ
शोच्यानित्यत्रदेहाएववाच्यंतइतिसाध्विवभाति(निवृत्ता दा) ने
गतासून्त्वावेहणानंतरंमृतानामभीष्मादिशरीराणांस्वस्वगाला
ग्निकि मिनाशिनानांपुनःकुत्रमावोपलब्धिरितिशोचमीत्याश
काकैमृतिवन्त्यायेनपुनमिदीयतदीयभीष्मादिशरीराणांनत्र
त्रुगोष्टुत्वादेहांतरस्थितानामिवैवानशोच्यतेत्यतआह

भाषाअनुवाद

प्रथम अध्याय के २८ श्लोक से लेकर तुम जो कुटुम्बकेजनोंका शोक करतेहो सो वे सब तुमारे शोचने योग्य नहीं है और द्विती य अध्याय के २ श्लोकसे लेकरमसे प्रबोध कराये अर्थात् समझा ये भी गये जो तुम पण्डितमानी के समान ये वचनउच्चारन क रते अर्थात् कहते हो कि भीष्मको संग्राममे कैसे मारें इससे यह प्रतीतिहोतीकि तुम यथार्थ पण्डित नहींहो जिसहेतु बुद्धिमा न पण्डित जोहैं वे गतप्राण अगतप्राण अर्थात् मरेओजीवते कोनहीं शोचते हैंकि बन्धु विहीन रहकैसे जियेंगे ११

दोहा॥

नहिशोचनके योग्य जो तिहतंशोचतजाय बुद्धिवाद को विविध विधताकों तुअब गाय ११॥

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचै
वनभविष्यामःसर्वेवयमतःपरं १२॥

शांकरभाष्यं

कुतस्तेऽशोच्याः यतो नित्याः कथं नत्वेव जातु कदाचिदहं नासं
किन्त्वासमेव अतीतेषु देहोत्पत्तिविनाशेषु घटादिषु वियदिव
नित्यमेवाहमासमित्यभिप्रायः तथा न त्वं नासीः किन्त्वासीरेव तथा
नेमे जनाधिपाः नासन् किंत्वासन्नेव तथा न चैवं न भविष्यामः
किन्तु भविष्याम एव सर्वे वयमतोऽस्माद्देहविनाशादुत्तरकाले
ऽपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः देहभेदानुवृत्त्या बहुव
चनं नात्मभेदाभिप्रायेण १२

आनंदगिरिकृतटीका

नित्यत्वमशोच्यत्वे कारणमिति सूचितं विवेचयितं विवेचयितुं प्रश्न
पूर्वकं प्रतिजानीते कुत इत्यादिना नित्यत्वमसिद्धं प्रमाणाभावादि
ति चोदयति कथमिति आत्मा न जायते प्रागभाववत्वान्नरवि शून्य
षाणवदिति परिहरति नत्वेवेति किन्त्वात्मानित्यो भावत्वे सत्यज्ञा
नत्वाद्यतिरेके घटवदित्यनुमानान्तरमाह न चैवेति यत्तु कैश्चि
दात्मयाथात्म्यं जिज्ञासितं भगवानुपदिशति नत्वित्यादिना श्लोकच
तुष्टयेनेत्यादिष्टं तदसद्विशेषवचने हेत्वभावात् सर्वत्रैवात्मयाथा
त्म्यप्रतिपादनाविशेषादित्याशयेन पदच्छेदः पदार्थोक्तिर्विग्रहो वा
क्ययोजनेति त्रितयमपि व्याख्यानाङ्गं प्रतिपादयति नत्वित्यादिना न
न्वात्मनो देहोत्पत्तिविनाशयोरुत्पत्तिविनाशप्रसिद्धेस्तत्कमनुमानद्वयं
प्रसिद्धिविरुद्धतया कालात्ययापदिष्टमिष्टमिति नेत्याह अतीतेष्वि
ति घटादिव्यपाश्रयस्तस्मादिति न्यायेनात्मनो जन्मविनाशप्रसिद्धे
रौपाधिकजन्मविनाशविषयत्वान्निरुपाधिकस्य तस्य जन्मादिराहि
त्यमिति भावः यद्यपि नत्वेवास्यात्मजन्मराहित्यं तथापि कथंममेत्या

गी॰
टी॰ टि॰

69

शंकामाह नत्वेवेति तथापि भीष्मादीनां कथं जन्माभावस्तत्राह तथा ते
मइति द्वितीयमद्धमानं प्रपंचयन्नुत्तरार्द्धं व्याचष्टे नचेमादिना ननु
देहोत्पत्तिविनाशयोरात्मनो जन्मनाशाभावेपि महासर्गमहाप्रल
ययोस्तस्याग्निविस्फुलिंगदृष्टान्तश्रुत्या जन्मविनाशाविष्टावित्या
शंक्य नात्माश्रुतेरिति न्यायेन परिहरति त्रिष्वपीति यावद्विका
रन्तु विभागो लोकवदिति न्यायेन भिन्नत्वाद्विकारित्वमात्मनामनु
मीयते भिन्नत्वं च बहुवचनप्रयोगप्रमितमित्याशंक्याह देहेति १२

स्वामिकृतटीका

नत्वेवाहमिति यथाहं परमेश्वरो जातु कदाचित् लीलाविग्रहस्या
विर्भावतिरोभावेनापि नासमिति न नैव अपितु आसमेवानादित्वा
त् नत्वं नासीर्नो भूः अपितु आसीरेव इमे च जनाधिपा नृपा नासन्नि
ति न अपितु आसन्नेव अहंशत्वात् तथातः परं इतः ऊर्ध्वं अपि न भवि
ष्यामः न स्थास्याम इति च नैव अपितु स्थास्यामः एवं जन्ममरणशून्यत्वा म४
द् एषोच्या इत्यर्थः १२

पिशाचभाष्यटीका

कुतस्तेऽशोच्याः जन्ममरणादिमत्वासंभवादित्याह नत्वेवेति जातु
जातु शब्दः कदाचिदित्येतस्मिन्नर्थे वर्तते नाहं कदाचिन्नासं अपितु आ
समेव नत्वं नासीः आसीरेवेत्यर्थः नेमे भीष्मादयो नासन् किं त्वास
न्नेव न चैव न भविष्यामः सर्वे वयमतः परं त्वमहमिमे वा राजानः
अस्मर्वे वयं जातु न भविष्यामः अपितु भविष्याम एव अतो नैषु दे
होत्पत्तिविनाशेषु सर्वेषामेवास्माकमुत्पत्तिविनाशौ न स्तः यस्मादात्म
स्वरूपेण नित्यत्वात् तथा भविष्यद्देहोत्पत्तिविनाशशंका न कर्तव्येत्य
भेदा र्थः बहुवचनं देहाद्देहाभिप्रायेण बहुदेहेषु जायमानेषु विनश्यत्सु
चात्मनो जन्मविनाशौ न स्त इत्युक्तं भवति १२

रामानुजभाष्यटीका

प्रथमं तावदात्मनां स्वभावं शृणु अहं सर्वेश्वरस्तावदतो वर्तमा

नात्पूर्वस्मिन्ननादौ कालेनैनासं अपि त्वासमेव त्वमप्येते नरेश्वरास्तथा
क्षेत्रज्ञा न नासन् अपि त्वासन्नेव सर्वे वयं चैव वयमतः परस्मिन्न· स
नंते काले न चैव न भविष्याम एव यथाहं सर्वेश्वरः परमात्मा नि
त्य इति नात्र संशयस्तथैव भवंतः क्षेत्रज्ञात्मानोऽपि नित्या एवेति मंत
व्यं एवं भगवतः सर्वेश्वरादात्मनां च भेदः पारमार्थिक इति भगव
तैवोक्तं इति प्रतीयते अज्ञानमोहितं प्रति तन्निवृत्तये पारमार्थिक
नित्यत्वोपदेशः अहं त्वमी मे सर्वे वयमिति व्यपदेशात् औपाधिका
त्मभेदवादे त्वात्मभेदस्यातात्विकत्वेन तत्त्वेनु तत्त्वोपदेशसमये भेदनि धा
र्देशो न संगच्छते भगवदुक्तात्मभेदः स्वाभाविक इति श्रुतिरप्याह नि
त्या त्यो नित्यानां चेतनश्चेतनानामेको बहूनां विदधाति कामानिति नित्या
नां बहूनां चेतनानां य एकश्चेतनो नित्यश्च कामान्विदधातीत्यर्थः
अज्ञानकृतभेददृष्टिवादे तु परमपुरुषस्य परमार्थतत्त्वदृष्टेर्निर्वि
शेषकूटस्थनित्यचैतन्यात्मयाथात्म्यसाक्षात्कारान्निवृत्ताज्ञानतत्का
र्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशरूपं व्यापारं च परमपुरुष
स्याधिगताद्वैतज्ञानस्य बाधितानुवृत्तिरूपमिदं भेदज्ञानं दग्धपटा-
दिवन्न बंधकमित्युच्यते नैतदुपपद्यते मरीचिकाजलज्ञानादिकं
द्य हि बाधितमनुवर्तमानमपि न जलाहरणादिप्रवृत्तिहेतुः एवमत्रा-
प्यद्वैतज्ञानेन बाधितं भेदज्ञानमनुवर्तमानमपि मिथ्यार्थविषयत्व
निश्चयान्नोपदेशादिप्रवृत्तिहेतुर्भवति न चेश्वरस्य यथाभूताधिगतत
त्त्वज्ञानतया बाधितानुवृत्तिर्वक्तुं शक्यते तथा च श्रुतिः यः सर्वज्ञः
सर्ववित् परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया·
च वेदाहं समतीतानीत्यादिश्रुतिस्मृतिविरोधात् किंच परमपुरुष
स्येदानींतनगुरुपरंपरायाश्चाद्वितीयात्मस्वरूपनिश्चये सति अनुवर्त
मानेऽपि भेदज्ञाने स्वनिश्चयानुरूपमद्वितीयमात्मानं कस्मादुपदिश
तीति वक्तव्यं प्रतिबिंबवत्प्रतीयमानेभ्योऽर्जुनादिभ्य इति चेन्नैतदुपपद्यते

गी·
टी·हि·

नचात्मनः कोपि मणिकृपाणादर्पणादिषु प्रतीयमानेषु स्वात्मप्रति
बिंबेषु तेषां स्वात्मनोनन्यत्वज्ञानात्तेभ्यः कस्मप्यर्थमुपदिशन्ति बाधि
तानुवृत्तिरपि नैनं शकनेवकं बाधकेनाहितीयात्मज्ञानेनात्मव्यति
रिक्तभेदज्ञानकारणस्याप्यज्ञानादेर्विनष्टत्वात् हि चंद्रज्ञानादौ तु चं
द्रैकत्वज्ञानेन पारमार्थिकतिमिरादिदोषस्य हि चंद्रज्ञानादेर्न च·
द्वैकत्वज्ञानेन पारमार्थिकतिमिरादिदोषस्य हि चंद्रज्ञानहेतोरवि
नष्टत्वाद्बाधितानुवृत्तिर्युक्तानुवर्त्तमानमपि प्रबलप्रमाणबाधितत्वे
नाकिंचित्करं इह तु भेदज्ञानस्य सविषयस्य सकारणस्यापारमार्थि
कत्वेनावस्तुतयात्मज्ञानविनष्टत्वान्न कथंचिदपि बाधितानुवृत्तिः संभ
वति अतः सर्वस्य वस्तुदानीं तनगुरुपरंपराणां च तत्त्वज्ञानेत्तौ निचे
द्वैददर्शनतत्कार्योपदेशाय संभवः भेददर्शनमस्तीति चेन्न अज्ञा·
नस्य तद्धेतोः स्थितत्वेनाज्ञानादेव सततमुपदेशोन संभवति किं
च गुरोरद्वितीयात्मज्ञानादेव ब्रह्मज्ञानेस्य सकार्यस्य विनष्टत्वा·
च्छिष्यं प्रत्युपदेशोनिःप्रयोजनः गुरुस्तदैव तु चकल्पितमिति चेन्न शि
ष्यतज्ज्ञानयोरपि कल्पितत्वात्तदप्यनिवर्त्तकं कल्पितत्वेपि पूर्वविरोधि
त्वेन निवर्त्तकमिति चेत्तदाचार्यज्ञानेपि समानमिति तदेव निवर्त्तकं
भवति तु कृतउपदेशानर्थकामेवेति कृतमसमीचीनवादैर्निरस्तैः ११

अभिनवगुप्तटीका

[illegible] चित्तमपश्यंश्च तेषां सदा नश्वरत्वात् [illegible]
[illegible] नयाविशेषात् [illegible]
[illegible] विनाशि नानाशरीरेषु [illegible] कास्य शोककाल [illegible]
[illegible] एवं हि चैव नादावपि [illegible] भवेत् १२

परमार्थप्रपाकृतटीका

ननु शोकः किं जीवनिमित्तको देहनिमित्तको वानाद्यः तेषां नित्य·
त्वात् नापरः तेषां पुरोनिहितवद्वर्त्तमानत्वादिमांशोकाश्रयोच्यते हे

[illegible]मर्थदुर्यमाद नदोषवाद
[illegible]नरदेहिनास्मि [illegible]
[illegible] महं हि नैव नमास्तम
आसं एतत्वमपि अमीराजा

कृ॰
म॰

द्रू

नमाहनत्वेवाहमिति [illegible] यतोहमोस्मिजातुकदाचित्वेल्लाय्य
नविग्रहस्याविर्भावतिरोभाववान्पूर्वंनासमितिनकिंत्वासमेवा
नादित्वात् नचत्वंनासीःकिंत्वासीरेव इमेजनाधिपाराजानो
नासन्नितिनकिंत्वासन्नेव मदंशत्वान्नयावतःपरमेश्वरस्य
वैप्राज्ञिःपितानैवभविष्यामइतिकिंतुभविष्यामएव ननुजी
पं वनिरूपणोअहमितिदेनगमनागमनरहितस्येश्वरस्यकथंम
मंगइतिचेन्नपरमार्थतोविचारेजीवोपिमदंशत्वान्निमोनादिश्र
का तिनाद्धिपरितानप्रत्रशोचंतीत्यर्थः १२ ॥

वनमालीकृतटीका

नन्वस्तुदेहभिन्नात्मनःप्राणसंयोगवियोगादिरूपजन्ममरणाभा
न वः ईदृशंचदेहसत्वजीवनाशसंभवात्कथंनशोकःकार्यइत्यतआ
ह नत्वेवेतिसर्वेषांआत्मनांस्वभावंशृणु अहंसर्वेश्वरोवर्तमाना
त्पूर्वस्मिन्कालेनासमितिनअपितुआसमेव जातुकदाचित्त्वमि
मेजनाधिपाश्चसर्वेजीवाःसच्चिदानंदस्वरूपामन्नियम्यानासन्नि
तिनअपितुआसन्नेवएवमहंयूयंसर्वेवयमतःपरंप्रलयेमुक्तौ
चनभविष्यामःइतिनअपितुभविष्यामएवंबहुवचनस्यातिशो
येनप्रकृतार्थस्यबोधकत्वात् आसनैवभविष्यामःएवेत्यर्थः
इदानींस्मइतिनोक्तंसिद्धत्वात् येर्जुनादयोहश्रीकृष्णस्यसामर्थ्या
ज्ञातननित्यत्वाश्चतान्प्रतियथाहसर्वेश्वरोनित्यःकालत्रयसं
बंधीनयात्वमेतेजनाधिपाश्चनित्याःकालत्रयसंबंधिनइत्युप
देशाःनववेदांतेरीश्वरनित्यत्वंजानंतोननएवजीवनित्यत्वस्या
पिज्ञानंभविष्यतीतिकिमत्रजीवनित्यत्वोपदेशेनेतिचेन्न नि
त्योनित्यानांचेतनश्चेतनानामितिश्रुतौहिनित्यानामितिनिर्धार
णसामर्थ्याज्जीवानांनित्यत्वमौपचारिकंपरमनित्यत्वंतीश्वरस्ये
[illegible]

गी॰
टी॰ द्वि॰

मनितमन्वेनीयावसैवे निशंकानिरासायहनित्यत्वसाम्यतयाऽती
तनित्यत्वं भगवतोक्तं अन्तःस्थवृत्तीनसैवं यमाचेतत्तु निर्धार
णो भेदव्यपदेशाच्चान्यः शारीरश्चोभयेपिहि भेदेनैनमधीयते
अधिकं तु भेदव्यपदेशादित्यादिसूत्रैः ज्ञाज्ञौ द्वावजावीशानी
शौ य आत्मनि तिष्ठन्नात्मानमंतरोयमयति यो विज्ञाने तिष्ठ
न् विज्ञानमंतरोयमयति पृथगात्मानं प्रेरितारं च मत्वा जुष्ट
स्ततस्तेनामृतत्वमेतीतिश्रुतिभिः अन्यश्च परमोराजंस्तथान्यः
प्र॰ पंचविंशकस्तथादिस्मृतिभिश्च प्रतिपादितस्य भेदस्य त्रिका-
त्य॰ लावाध्यत्वरूपसत्वे कालत्रयेप्येवं रूपं नित्यत्वं च भगवता प्रतिपा स॰
वद॰ दितं नत्वेवाहमीश्वरः इतिमन्देनैव भेदसिद्धोपदेशवैयर्थ्यमि-
तिवाच्यं प्रत्यक्षस्य वर्तमानमात्रग्राहित्वेन वर्तमानभेदसिद्धावप्य
तीतानागतभेदस्य प्रत्यक्षासिद्धस्य बोधकत्वेनोपदेशस्य सार्थ
कात् यद्यपि भेदवाचकेऽस्मिन्नैव पदे नास्ति तथाप्युक्तसूत्रैः
श्रुतिभिर्भेदपरत्वेन व्याख्यातत्वात् भगवद्वाक्ये यद्यपि भेदवो
धकं पदं नास्ति तथाप्यात्मनस्तथा मत्स्यदेवादिस्व आकृ
ती नित्यादौ यथावद्रूपसंख्यास्तत्ता नास्ति स्व आकृतयः सिद्धांति
तथा वयमित्युक्तबहुत्वसंख्याया भेदः सिद्धांति यथा चक्रं नृपय तन्न
सिदध्यानयति सा वैश्वदेव्यामिक्षेत्यत्रामिक्षाद्रव्यके यागवि
धाय वाजिभ्यो वाजिनमिति वाजिनाख्यगुणविहितस्यामि-
क्षाद्रव्यावरुद्धे यागे निवेशासंभवेन पूर्वयागाद्भिन्नयाग- द॰
बोधकत्वम् तथा भगवदुक्तस्मच्छब्दगतबहुत्वस्य भगवतस्तथा स्प
संभवेन तत्र श्वेतनांतरस्य बोधकत्वं सिद्धान्तिनः दिस्वसेवस्य
तिपाद्यत्वम् तवस्वभेदो मिथ्याज्ञानकोन्तरममाराः वि
रं जनः परं साम्यमुपैतीति श्रुतिश्चमोक्षेपि भेदप्रतिपादका
त् तत्वमोवांतरमोदः परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनि

नच

ष्यत इति स्वस्वरूपाविर्भावलक्षणस्य परिमुक्तित्वात् मैवाभेद
स्य मायिकस्य मायामोहं विना दर्शनासंभवेनोपदेशाद्यसंभवात्
न हि स्वप्नज्ञो वचनरूपमुपदेशं स्वप्नेवं करोति न च स्वामिकगुरु
शिष्यवदुपदेशाद्युपपत्तिः स्वामिकोपदेशोपलब्धज्ञानमोक्षा
देरपि पारमार्थिकत्वाभावेन तस्य मिथ्यात्वापत्तेः स्वप्नोपनीतो न ह्युद्बोधकवेदस्य न
डुपायबोधकवेदस्य न दृष्टान्तेन वेदमात्रस्य वा प्रामाण्यापत्तेः क
यं ल्पितत्वमज्ञानेनैव स्यैवोपदेशकत्वसंभवेऽपि तज्ज्ञानतो भगवत उ
पदेशकत्वासंभवात् कल्पितभेदकल्पितत्वेनाज्ञानतो भ्रान्त
त्वापत्त्येश्वरत्वहानेः तद्धानिस्वीकारे तत्कृतार्थाकृतत्वावयंतयेव
निरीश्वरवादिना किं च भेदः स्वरूपेण कल्पितो विशिष्टेन वा नाद्यः
प्रसे स्वरूपैककल्पकत्वेन स्वरूपस्य कल्पकत्वासंभवात् न द्वितीयः क
ल्पकस्याधिकसत्ताकत्वनियमेन कल्पस्य भेदाभूतस्य विशि- भि
ष्टस्य कल्पकत्वासंभवात् किं च जीवः प्रतिबिम्बो वा छिन्नो वा ना
द्यः उपाध्यन्तर्गतस्योपाधौ प्रतिबिम्बासंभवात् न हि जलस्य घट स्य
देर्जले प्रतिबिम्बः उपाधेरेकदेशस्यापि तन्त्रीकारे ब्रह्मणः सदे-
शत्वापत्तेः न वाकाशस्य जले प्रतिबिम्बः तस्य सदेशत्वेनोपाधिव
हिः स्थस्य तत्संभवात् वल्लनत्वनात्सैवाकाशप्रतिबिम्बो जलादे
र्वास्तवत्वापत्तेः न च वायुस्पर्शप्रतिबिम्बस्यावास्तवत्वो भवति प
र्माधर्मवायुपिशाचादेः [illegible] पि प्रतिबिम्बस्यापि वास्तवत्वा
पत्तेः किं तु प्रभामण्डलस्यैव प्रतिबिम्बः पारमार्थिकस्य ब्रह्मणः स
न्यूनसत्ताकव्यावहारिकोपाधौ प्रतिबिम्बासंभवात् न हि रश्मीवि
जले सूर्यप्रतिबिम्बः संभवति न द्वितीयः उपाधिना त्वेकदेशोव-
च्छिद्यते कृत्स्नं वा आद्ये सदेशत्वापत्तेः द्वितीये तदुपाधेर्भेदकत्वा
संभवेन कृत्स्नस्य जीवत्वमीशत्वं वा स्यात् अन्योन्यमिश्रात्मनास्त्वो
भयथाविरोधात् न हि घटावच्छिन्नस्य महदावच्छिन्नाकाशत्वम्

गी॰
टी॰ हि॰

महावच्छिन्नस्य घटावच्छिन्नाकाशत्वमस्ति । तथाजीवोपाध्यंतर्गतस्ये
शत्वं तत्रात्मनस्यांतः प्रविश्यपतियामकत्वरूपमंतर्यामित्वं तथा
स्तकैतेयस्याध्येयत्ववत्परब्रह्मणएवजीवत्वं तथाप्यमनुपदेशस्यद्
तज्जलांजलितापत्तेः नहिबाधेयपवत्वेनबाधेयो न भवति किंतु कैं
तेयइतिबाधेयस्योपदेशानिममुक्तत्वबोधकश्रुतीनां निर्विषय
त्वापत्तेश्च नत्वतत्वमस्यादिवाक्यसिद्धो जीवेश्वराभेदः कथम
पलप्यत इति चेत्तद्वाक्येन हि स्वरूपातिरिक्ताभेदादिबोधनेऽप्येव
गर्थकत्वहानिः लदबोधनेभेदस्यबाधकाभावेन पारमार्थिक
त्वसिद्धिः स्वरूपस्याज्ञानाद्यधिष्ठानतयासदासिद्धत्वेनवाक्यवैय
र्थ्यं स आत्मा तत्वमसीत्यत्रातत्वमसीतिपदच्छेदेन स्वारस्यादश्रय
मेवजीवेनत्वाबोध्यते भेदबोधकनवदृष्टान्तानुरोधात् तथा
दिपरिभ्रमणेनश्रांतः सूत्रबंधः पक्षी शंकुमेवाश्रयतितथा
जागरादौ श्रांतो जीवः सुषुप्तौ परेशं संश्रयतीत्याह यथाश
कुनिः सूत्रेणप्रबद्ध इत्यादिना यथामधुकैः गृहीता रसा अपे
मामुष्याहं रसस्मीति भेदं न विदंति तथा जीवे विद्यमानोऽप्यवि
द्यावृत्तिर्नेश्वरभिन्नतयाज्ञायतेपरेशामित्याह यथा सोम्यमधुक
त इत्यादिना यथावेतनाभिः समुद्रे मिलिताभिर्नदीभिः इयं
गंगाहं यमुनेति न ज्ञायते तथा त्वयि स्थित ईश्वरस्त्वया न ज्ञायत
इत्याह यथासोम्येमादिना यथाहत्तस्यविद्यातेन विद्यमानस्या
पीश्वरानुग्रहात्तत्वमवस्थानं तदभावे वविद्यातकाभावेपिशु
ष्कतातथाजीवस्यमात्रुपादिदेहेपीश्वराधीनत्वमित्याह यथा
सोम्यमहतो वृक्षस्येत्यादिना यथावटबीजेमहावटः सूक्ष्मतया सन्न
न॰ पितोलभ्यते तथा जीवे गोचरतो ईश्वरो न दृश्यत इत्याह न्यग्रोधफल
मित्यादिना यथाजले प्रहितलवणं धर्मेणापि नेत्रेण गृह्यमाणमपि ल
वणं तद्रसनेन तथा वटावस्थानदेहेत्वसामर्थ्येऽगृह्यमाणोऽपि सत्त्व

ते
रत्नं इत्याह लवणमुदके वधार्येत्यादिना यथा लोके कश्चित्पुरुषो व
द्धाक्षो देशान्तरे नीतो मुक्तः स्वग्रामं स्वदेशमायाति तथाऽज्ञो यो
पीश्वरो गुरूपदेशादिना ज्ञेय इत्याह यथा सोम्य पुरुषमित्यादिना
यथा रोगी यस्तु व्यापारः प्रारब्धस्यात्र वेदनया मुमुक्षोरुपरेण संप
त्स्यते जीवस्तेन वेदेत्याह पुरुषं सोम्योपतापिनमित्यादिना यथा
कश्चित्पुरुषो राजभटैरानीतः स्तेयमिति यदा स चोरः स्यात्तदा
ऽग्रयदा न चोरः स्यात्तदा न तथा योऽहं ब्रह्मेति ज्ञानी ... न दे
~~हैवदोषस्तद्वयो देहविशिष्टं ... ने ... ज्ञाने तर्वाको~~
~~लोसत्त्व ... विधिविशेषे ... नामोहे ... वोध्यते ... वेण~~
~~सदाभावाभिनेमवेद्म~~ पाकीयब्रह्मत्वापहारकत्वात् देहः
मद्भिन्नं ब्रह्मेति जानन्वदेत्याह पुरुषमित्यादिना स्वस्य संसारि
त्वादिकं मत्वा तस्य जीवस्य सच्चिदानंदाकारत्वनिश्चयकत्वादिने
श्वरसादृश्यं वोध्यते वाक्येन न च सादृश्येन सम्यक् सिद्धं जीवपू
र्णानंदतायाश्च विपर्यासहननत्वात् अत एव जहदजहल्लक्षणापि
परस्य निरस्ता न पुनर्हि यदहं यद्वा सर्वज्ञत्वादिविशिष्टं रूपं
धी गृहीतादज्ञाना ... धिष्ठानत्वाभावात्तन्न सदृत्यादि प्रत्यक्ष
सिद्धत्वाच्च तन्मात्रादधिकार्थस्य लक्षणा जन्यवोधे अभावेन त
स्त्व
तेवैयर्थ्यात् भानेच वाक्यस्य सार्वकालार्थिकत्वापत्तेः शुद्धेन ज्ञाने स्व
नैवप्रतने विशिष्टस्य भानेपि शुद्धं न भासते न स्वहेतोयापद्य वा
क्यस्यार्थकमिति वाच्यं विशिष्टभाने विशेषभानावश्यकत्वात्
न हि दंडिनि भाते पुरुषव्यक्तिर्न भासते शुद्धभानं विना जगदा
धापतेः न ह्यधिष्ठानभानं विनाध्यस्तस्य भानं भवति तथा विष
ते च शुद्धमधिष्ठानं प्रपंचस्तत्राध्यस्त इति च यत् न च हि नीयादेभ
र्यं भवतीति विरोधः द्वितीयाद्धि हेतुत्वात्समादपि कार्यं लोके यामे
भयमनुवदति श्रुतिर्यतः अत एव यथार्थं वा त्वं पुरुषो वेदेत्यादि श्रु

पूर्वोत्तरवाक्येन भेदस्यैव बोधनात् यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वा
न्कामान्सह ब्रह्मणा विपश्चिता इतिश्रुत्या मोक्षे भेदो बोध्यते यत्र पुत्रेण सह आग
तः पिता इति अत्रेव प्रधान

तिविरोधः स्यात् एकाकी न रमते एकाकी बिभेति स द्वितीयमैच्छद्वह्व
इति [illegible] क्रियान्वयेन तुल्यजातीयक्रियाकर्तृत्वेन किंवा पत्न्या इव आनु
गी॰ कूल्यमात्रेण नाद्यः ब्रह्मणोपि भोगप्रसंगात् नांत्यः ईश्वरस्य प्राणि
टी॰ हि॰ मात्रभोगे नज्ञानदानादेः प्राधान्यापत्तेश्चेति तत्र ब्रह्मणा सहेत्यत्र स
र्वान्कामान्सह युगपदश्नुत इति योजनेपि मोक्षे भेदसिद्धेः यो मे
वेष वृणुते तेन लभ्य इति श्रुतेः ब्रह्मणा चतुर्मुखेन सहेति
वार्थः सहशब्दस्य प्रलये प्रतिसंचरे परस्यांते कृतात्मनः इत्यत्र सहार्थत्व
णकाले अप्रसिद्धकालोशादोप्रतीतेर्विभक्तिव्यत्ययेन सह
वार्ति शब्दस्य कालपरत्वेकादावुक्तमित्यन्नापि चतुर्मुखस्य मुक्तिकाले
द्विपरार्द्धाते सर्वान्कामानश्नुते आविर्भूतनिरतिशयानंदराशिर्भ
वतीत्यर्थः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्म
नः प्रविशंति परं पदमिति स्मृतेः परस्य कर्तृकर्मक्रियादिपदानां
वैयर्थ्यमेव नहि तन्मते स्वरूपभिन्ने मोक्षे किमप्यस्ति न च यद
दरमंतरं कुरुते इति श्रुतिविरोधः अंतर्यामित्वादिना प्रसक्तेश्वरभे
दस्यानया निषेधात् नच नेह नानास्ति किंचनेत्यादिश्रुतिविरो
अवतारं धः अंतर्यामित्वादिना प्रसक्तेश्वरभेदस्यानया निषेधात् नच ने
ह नानास्ति किंचनेत्यादिश्रुतिविरोधः अवतारांतर्यामित्वादिना प्र
सक्तेश्वरभेदनिषेधानुभावप्रधाननिर्देशेन नानाशब्दस्य नाना
त्वार्थकत्वात् अन्यथा नानानिषेधस्यैव ब्रह्मभिन्नत्वाद्वितैमात्र नु
निषेधोर्वाहतः नच भिन्नाभावो ब्रह्मस्वरूपः ब्रह्मस्वरूपस्य सदा
सिद्धत्वेनोपदेशवैयर्थ्यात् सप्रतियोगिकभ्रमकालात्तानस्य
नानानिषेधस्यापि प्रतियोगिकभ्रमकालज्ञानब्रह्मस्वरूपत्वा
संभवात् अभावस्यातिरिक्तस्य मन्मते स्वीकारे भावत्वाधेय
त्वाधिकरणत्वादीनां भावानामपि मन्मते तावत्प्रकत्वात् न चैवं मे
वाद्वितीयमिति सजातीयविजातीयस्वगतभेदनिषेधकश्रुति

विरोधः एकपदेन ब्राह्मणत्वस्य बोधनात् एके ब्राह्मणा अन्ये केवला इति को
॰न ष्यात् द्वितीयपदे समानाधिकरणाद्विस्य बोधनात् एवकारेण विशेषण
संगतेन शंखः पाण्डुर एवेत्यादाविव विवर्णत्वादेर्वैस्तुत्ये अयोगो व्यव
च्छिद्यते नत्वत्र विशेषसंगत एवकारो येन पार्थ एव धनुर्धर इत्यादावि
वान्ययोगव्यवच्छेदो बोध्येत किंच द्वितीयपदेनैव द्वितीयमात्रनिषे
धसिद्धेः पदान्तरवैयर्थ्यात् विशेषणतयोपलक्षणतया वा अन्य
स्माद्द्वितीयाभावबोधने तेनैवाद्वैतहानेः अन्यतिविहितस्य द्विती
याभावस्य आत्मनापत्त्यापत्तेः अन्यानिषेधासंभवात् चिन्मात्र·
स्यैव बोधने चिन्तानित्यसिद्धत्वेनोपदेशवैयर्थ्यात् चिन्मात्रज्ञान
स्यैवेनाविरोधित्वेन द्वैतस्य सत्यत्वोपपत्तेः नहि भूतलमात्रज्ञाने·
घटस्य तदभावस्य वा धियो विरोधि संति च भेदश्रुतेः षड्विधता
त्पर्यलिंगानि आथर्वणे द्वा सुपर्णेत्युपक्रमः परमं साम्यमुपैती
त्युपसंहारः तयोरन्यः अत्त अनश्नन्नन्यः अन्यमीशमित्यभ्यासः शास्त्रै
कगम्येश्वरप्रतियोगिकस्य तदनुयोगिकस्य चैकालिकभेदस्य शा
स्त्रं विना प्राप्तेरपूर्वता पुण्यपापे विधूयेति फलं अस्य महिमानमे
तीति स्तुतिरूपोर्थवादः अनश्नन्नित्युपपत्तिः अन्तर्यामिब्राह्मणे
पि षड्विधलिंगोपेतेवाक्यं तथाहि वेत्थनु काप्य त्वं तमन्तर्यामिण
मित्युपक्रमः एष त आत्मान्तर्याम्यमृत इत्युपसंहारः आलोयेविधविध
लिंगोपेतेवाक्यं तथाहि वेत्थनु काप्य त्वं तमन्तर्यामिणमित्युपक्र:
मः एष त आत्मान्तर्याम्यमृत इत्युपसंहारः एष आत्मेत्याद्येकविंश
तिकृत्वोभ्यासः अन्तर्यामित्वस्य मानान्तराप्राप्तेरपूर्वता स वै ब्रह्मवि
॰त्यादि दित्यादि स्तुतिरूपोर्थवादः यस्य पृथिवी शरीरं पृथिवी यं न वेद यस्यात्मा
शरीरं आत्मा यं न वेदेत्याद्युपपत्तिरिति नचवाच्यमीश्वरश्रुतिप्रत्य ति॰
क्षयोर्भेदसिद्ध्या श्रुतिरनुवादिकेति वाच्यं प्रत्यक्षस्य प्रामाण्ये हि
तेनैव भेदसिद्ध्या भेदश्रुतिर्निरर्थानुवादः प्रत्यक्षस्य प्रामाण्ये श्रु

गी·
टी· हि·

74

तेदन्त्ववादकत्वासंभवात् अप्रमाणगृहीतमात्रग्राहित्वेनानुवादक
त्वस्वीकारेऽप्रमाणगृहीतमात्रग्राहित्वेन श्रुतेरप्रामाण्यापत्तेः तत्त्व
भेदस्याप्रत्यक्षत्वात्सिद्धत्वेन शास्त्रारंभो व्यर्थः ईश्वरप्रतियोगिकभेदस्य
प्रत्यक्षसिद्धत्वेप्यनेन गुणपूर्णस्य श्रीहरेरप्रत्यक्षत्वात् श्रवणम
नननिदिध्यासनादिना तमपरोक्षीकर्तुं शास्त्रारंभस्य सार्थकत्वा
त् १२॥

ऊं समवेजयंतीटीका

[1] नत्वेवाहमिति त्वाद्वेन देहेंद्रियमनोबुद्धिप्राणादिभ्यो विलक्षण
त्वस्य चितम् यथाहं सर्वात्मा सर्वेश्वरेश्वर इतो वर्तमानात्पूर्व
स्मिन्नतीते भूतकाले जातु कदाचिदपि नासमिति न अपि त्वासमेव
व तथा त्वमपि नासीरिति न अपि त्वासीरेव इमे जनाधिपा राजान
श्च किन्नासन्नपि त्वासन्नेव एवं अतो वर्तमानात्परस्मिन्ननेहे
भविष्यत्काले तथावत्वं न च नामेषां सर्वजीवात्मनामपि नित्यत्वं मत्वा
त्वं शोकं मा कुरु इत्येवं जीवेश्वरयोरभेद इति वदतां प्र[illegible]च्छिन्नत्वा
ज्ञानां मुखे धूलीकुर्वता भगवता परमपुरुषेणैव श्रुतिस्मृत्याद्य
विरोधेनैव स्वस्मात् जीवजातमनादिपारमार्थिक एव भेद उक्तः तेषां
मतेन तु अनेनाहं कोऽज्ञेषमाणेनापुशोते जन्मनोऽनेनाभुक्तभोगामजो
न्यः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोर
न्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ज्ञाज्ञौ द्वावजावीशानीशौ
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्
न शरीरस्थोऽभयेऽपि भेदेनेनमपीयते भेदव्यपदेशाच्चान्यः अधिकं
तु भेदनिर्देशादित्यादिभेदप्रतिपादकशास्त्रकदंबविरोधाज्जी
वेश्वरयोरभेदकथनमसदनुपपन्नमेव तन्त्वसमसिद्धांतेऽज्ञान
प्रयुक्ताध्यासेनैव सर्वस्य भेदस्य तद्विषयकशास्त्रस्य च सर्वलौ
किकवैदिकव्यवहारस्य च सिद्धत्वात् नन्वनुपपन्नमेतन्न न स्यात्

[1] नन्वात्मनां देहाधीनजन्ममरणयोः सुप्रसिद्धत्वात्कथमशोच्यत्वमित्याशंक्य तेषां त्रैकालिकनित्यत्वं परस्परभेदस्वभावं च स्वयमेव वदन्नशोच्यत्वं साधयति

अन्यकाले अहं त्वं इमे च सर्वे वयं न भविष्याम इति न अपि तु भविष्याम एव यथा परमेश्वरस्य मम नित्यः संशयं नित्यत्वं

प्रच्छन्न वाज्ञानां

सिद्धत्वेनाज्ञानप्रयुक्ताध्यासेनैव सर्वस्यैव स्वात्मनि दृश्यमानत्वात्
सर्वलौकिकवैदिकव्यवहाराणां सिद्धेः कथमनुपपन्नत्वमभेदक
^भावेना थनस्येति चेन्न अधिष्ठानाध्यासस्यैवासम्भवात् तथा हि शुद्धब्रह्म
निर्विशेषाद्वितीयचेतनमात्रस्य वस्तुनोऽधिष्ठानत्वेनासम्भवात् य
तः सामान्यविशेषधर्मवत्त्वस्याधिष्ठानत्वप्रयोजकत्वं सामान्येन ज्ञा
ते विशेषेणाज्ञातमेवाधिष्ठानं लोके प्रसिद्धं यथेदं रजतमित्यत्र
इदन्त्वं सामान्यधर्मो रजतस्य साधकः शुक्तौ वर्तते शुक्तित्वं च विशे
षधर्मस्तस्य बाधकः सर्वानुभवप्रसिद्धः न तथा निर्धर्मके चिन्मा
त्रे वस्तुन्युभयधर्मवत्त्वं वक्तुं शक्यं सिद्धान्तभङ्गात् कथंचित्सामान्य
धर्माङ्गीकारेऽपि विशेषधर्मानङ्गीकारेणानद्धारणयोगात् अथारोप्या
सिद्धाप्यध्यासासिद्धिः यत्रारोप्यते तत्रत्यस्य प्रधानं शुक्तिरूप्यादि
वत् यत्रैवं तत्रैवं शशशृङ्गादिवदित्यन्वयव्यतिरेकव्याप्तेः सर्व
वादिसम्मतत्वात् अथ भ्रमसामान्यभावाद्ध्यासाभावः तथा
हि भ्रममात्रे सावयवत्वेन्द्रियसंयुक्तत्वयथार्थत्वसादृश्यपूर्वप्र
माजन्यसंस्कारदोषश्चापेक्षितः तत्रायं क्रमः अधिष्ठाने दोषसं
स्कारौ तत्ज्ञातृपुरुषनिष्ठौ यथेदं रजतमित्यत्रेन्द्रियसंयुक्तत्वयथार्थ
त्वं सावयवत्वं परमार्थरजतसादृश्यं शुक्तौ प्रत्यक्षप्रमाणसिद्ध
त्वं संस्कारदोषौ पुरुषनिष्ठौ न तथा दार्ष्टान्तिके निरवयवनिर्गुणपरो
क्षात्मनि गुणावयवसादृश्यादीनामयोगात् केवलो निर्गुणश्च नि
ष्कलं निष्क्रियमित्यादिश्रुतेः नापि दोषसंस्कारौ भवतः तदाश्रय
स्य ज्ञातुरन्तरस्याभावात् अधिष्ठानमात्रस्यैव तदा सत्त्वात् जीवस्य भ्रम
कार्यत्वेन तदुत्तरभावित्वात् अथ ज्ञानस्याश्रयविषयप्रयोजका-
भावाद्ध्यासाभावः तत्राज्ञानाश्रयो ज्ञानमात्रं ब्रह्मैव जीवो वा
द्यः नाद्यः ज्ञानमात्रस्य स्वयंज्योतिषो वस्तुनोऽज्ञानाश्रयत्वानर्हत्वात्
सूर्यस्यान्धकाराश्रयत्वमनुन्मत्तः को ब्रवीतीति भावः नापि जीवः

गी·
टी· द्वि

तस्याध्यासकार्यत्वेनतदुत्तरभावित्वात् न तृतीयः उभयभिन्नत्वेन तत्
स्यादृष्टश्रुतत्वात् तथाकोवाऽज्ञानविषयः शुद्धानुभवमात्रंउत
तद्भिन्नंनाद्यः तस्यभवन्मतेज्ञानविषयत्वेनाज्ञानविषयत्वानर्हत्वा
त् अज्ञानतन्निवर्तकज्ञानयोरेकाधिकरणत्ववदेकविषयत्वस्यापि
नियमाच्च नद्वितीयः ज्ञानाज्ञानोभयभिन्नस्यतदानीमभावात्
तद्भिन्नस्यसर्वस्यापितत्कार्यत्वेनतद्विषयत्वायोगात् ननुरज्जोद
रहतितमसोयथारज्जुमेवाश्रयोविषयश्चेतिप्रसन्नसिद्धः तथा
त्रापिशुद्धंब्रह्मैवाज्ञानस्याश्रयोविषयश्चेतिचेन्न दृष्टान्तवैषम्या
त् रज्जुतमसोरज्ञानरूपत्वेनेतरेतराविरोधत्वात् दार्ष्टान्तिकेतुज्ञा
नाज्ञानयोरत्यन्तविजातीयत्वेनेतरेतरविरोधित्वात् नहिसूर्यस्यान्ध
काराश्रयत्वंतद्विषयत्वंवाकोटिचतुर्भिरपिसंभावयितुंशक्य
म् किंचाध्यासोपादानमज्ञानंब्रह्मणाप्रयुक्तंब्रह्मप्रयुक्त
मन्यप्रयुक्तंवेतिविवेचनीयम् नाद्यः आत्माश्रयदोषप्रसंगात्त
दुपस्प्रयोक्तृत्वासम्भवाच्च अन्यथाघटादावपिप्रयोक्तृत्वापत्तेः न
द्वितीयः प्रयोक्तृत्वस्यकर्तृत्वविशेषधर्मत्वात्तस्यत्वन्मतेध्यासव
स्तुरूपाश्रयत्वात् शुद्धेतदसम्भवात् अपिचेदंवक्तव्यं ब्रह्मप्र
नारकादियोनिप्राप्तिरूपानर्थहेतोरविद्यायाः स्वरूपं शुद्धंब्रह्मजा
नातिनवा [illegible] जानातिचेत्तथाज्ञात्वाकोवाकुमित्रः स्व
तन्त्रात्मानिष्टमाप्नुयात् ज्ञातत्वापत्ताभवन्मतेशुद्धस्यानेश्च नजा वै
नातिचेदज्ञतापत्त्याब्रह्मत्वासिद्धेः शुद्धंचिन्मात्रेणब्रह्मअज्ञत्वात्
संसारिजीववदित्यनुमानात् नापितृतीयः उभयोरनवस्थानङ्गीका
रात् अङ्गीकारेवतत्राप्युक्तप्रत्यप्रयोजकान्तरेतस्यानयदिमनवस्था
पत्तेः किंचाज्ञानस्यसत्वमसत्त्वंवानाद्यः भवतामनङ्गीकारात् नद्वि
तीयः असतः आवरकत्वासंभवात् अधिष्ठानावरणाभावेऽध्या
साभावः नहिशुक्तिस्वरूपेभासमानेरजतारोपोभवतीतिभावः कि

वस्तुप्रकाशेप्यावरणासम्भवेपि अध्यासार्थं स्वाग्रहेणांगीका
रेण च किंतत् ब्रह्मस्वरूपावरकं तद्धर्मविशेषावरकं वेति वाच्यम् ना
द्यः जगदान्ध्यप्रसङ्गात् न द्वितीयः स्वरूपेतरधर्मानङ्गीकारात् अ
न्यथा सिद्धांतभङ्गप्रसङ्गात् ननु निर्विशेषश्रुतिबाधभयाद्धिव ध
र्मानङ्गीकारेपि स्वरूपस्यैवानन्दांशमात्रस्याज्ञानावृतत्वेपि सत्तां
शस्यानावृतत्वान्नोक्तदोष इति चेन्न असंभवात् निरवयवेव
स्तुन्यंशादिकल्पनाया अप्ययुक्तत्वात् सांशत्वापत्त्या मिथ्यात्वापत्तेश्च
ब्रह्म मिथ्या सांशत्वात् घटादिवदित्यनुमानात् निरवयवश्रुत्या
कोपात् निर्विशेषवादभंगाच्च अथाद्वितीयनिर्विशेषवस्तुनः
सत्वे किंचित्प्रमाणमस्ति न वेति वक्तव्यम् अस्ति चेत्तत्र न तावत्प्रत्य
क्षं अतीन्द्रियत्वात् नाप्यनुमानम् लिङ्गशून्यत्वात् नेन्द्रियाणाना
नुमानानामिति श्रुतेः नापि शाब्दः शब्दस्याविषयत्वात् न तत्र तावद्
क्तिविषयत्वं जातिगुणाकारप्रकृतिप्रत्ययाद्यर्थत्वाभावात् ना
पि लक्षणाविषयत्वं सम्बन्धशून्यत्वात् असङ्गो ह्ययं पुरुष इति श्रु
तेः ननु सत्यसंबंधाभावेपि शाखाचन्द्रवत्कल्पितसंबंधस्य सत्त्वा
न्न दोष इति चेन्न दृष्टान्तवैषम्यात् तत्र हि शाखाचन्द्रयोरुभयोरपि
द्व सावयवत्वात् प्रत्यक्षविषयत्वात् किरणद्वारा संबंधस्यापि सत्त्वात्
दार्ष्टान्तिके तु अत्यन्तवैपरीत्यान्नोक्तार्थसिद्धिः नापि गौण्या विषयत्व
म् निर्गुणत्वात् विषयत्वांगीकारे च मिथ्यात्वप्रसङ्गः द्वैतापत्ति
श्च तथा च प्रयोगः ब्रह्म मिथ्या प्रमाणविषयत्वात् नेदमनेकप्रपञ्चव
दिति नापि द्वितीयः सर्वप्रमाणहीनत्वेन शशशृङ्गतुल्यत्वापत्तेः
निर्विशेषं ब्रह्मावस्तु सर्वप्रमाणशून्यत्वात् शशशृङ्गाद्यवस्तुग
नवदित्यनुमानादिति संक्षेपः एवं पराभिमताध्यासगिरिवज्रेण
पराभिमताध्यासलक्षणादीनामपि वक्ष्यप्रकारेणैव स्पष्टैर्निरस्तत्वा
द्विस्तरभयादत्रोपरम्यते १२ ॥

गी॰
टी॰ द्वि॰

76

मधुसूदनीटीका

नत्वेवाहमित्येकोनविंशतिश्लोकैरशोच्यानन्वशोचस्त्वमित्येतस्य विवर
णं क्रियते स्वधर्ममपि चावेक्ष्येत्याद्यष्टभिः श्लोकैः प्रज्ञावादांश्च भाष
स इत्यस्य समाहारस्य पृथक्प्रयत्ननिराकर्तव्यत्वात् तत्र स्थूलश
रीरात्मानं विविक्तं तस्य नित्यत्वं थयति तुशब्दो देहादिभ्यो व्यतिरेकं सू ठौं
चयति यथा अहं इतः पूर्वं जातु कदाचिदपि नासमिति नैव अपि
तु आसमेव तथा त्वमप्यासीः इमे जनाधिपाश्चासन्नेव एतेनं भावा प्राग
प्रतियोगित्वं दर्शितं तथा सर्वे वयं अहं त्वं इमे जनाधिपाश्चातः परं
म न भविष्याम इति न अपितु भविष्याम एवेति ध्वंसाप्रतियोगित्वमुक्तं
अतः कालत्रयेऽपि सत्तायोगित्वादात्मनो नित्यत्वेनानित्याद्देहाद्वैल॰
क्षण्यं सिद्धमित्यर्थः १२

सदानंदीटीका

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे इति पादद्वयस्यैव विवृतिः
क्रियतेऽधुना १ नत्वाद्येकोनविंशत्या पादस्याद्यस्य विस्तरः तत्र प्रथममि
त्याद्यष्टाभिर्द्वितीयस्योच्यते तथा २ मोहद्वयं निराकार्यं पृथक्प्रयत्ने
न दुःखदं स्थूलदेहात्पृथक्कर्तुमात्मानं साक्षिणं परं ३ तस्मादात्मनः
नित्यत्वं तत्र सूत्रार्थमीश्वरः देहादिभ्यस्तु शब्देन व्यतिरेकोऽस्य सूच्य॰
ते ४ नैवाहं जातु इतः पूर्वं नासं किंत्वासमेव हि तथैव त्वं तथाप्यासी
रासन्नेते जनाधिपाः ५ एतेन प्रागभावस्याप्रतियोगित्वमीरितं
तथाहं त्वमिमे भूपा न भविष्याम एव किं ६ अत ऊर्ध्वं तनोः पातात्
वयं भाविनो न च किंतु सर्वे भविष्यामो वयं नित्यं तथात्मनः ७
एतेनैवात्मनः प्रोक्ता ध्वंसस्याप्रतियोगिता अतः कालत्रये सत्ता
योगित्वात्प्रत्यगात्मनः नित्यत्वेनास्य संसिद्धं वैलक्षण्यं शरीरतः दे
हाद्युपाधिभेदेन भेदोऽहं त्वमिमे त्विति ९ नात्र स्वाभाविको भेदो ह्या
त्मनो हरिणेरितः तत्पदार्थविशुद्ध्यर्थं भेदमुद्दिश्य लौकिकं १० आ

त्मनोतिरस्ताहाराविलक्षणं शरीरतः शास्त्रसंपक्रमेयस्मात्रि
साधयिषितेहरेः ११ यत्तत्राभिमतोविभोर्भेदः स्वाभाविकःकिल
अन्यथेदशोपदेशस्यावसरेकथमीरयेत् १२ अहंत्वंचयमित्यादि
भेदमित्याहुर्विपश्चितः उपदेश्योपदेशादिव्यवहारोस्तिकल्पितः
भेदस्तेनैवतन्सिद्धिर्नवास्तवइहेष्यते नतिरोधेनचोमत्रिर्न १३
वहोनचसाधकः १४ नमस्तुत्वेनैवमुक्तउत्पद्यापरमार्थता इ
त्यादिस्फातिनिर्णीतोहेतनत्वाविमर्शनात् १५ भेदवादोमता
मिष्टोनमतत्वविमर्शिनाम् १६ ॥१२॥

नीलकंठीटीका

ननुदेहादन्योपिदेहनाशेननश्यतीतिकोशोकावसरश्चकोशोकनाश
इतिनेत्याह नत्वेवाहमिति त्वमहमिमेचसर्वेअनादयोऽनंता
श्चेत्यर्थः जातुकदाचित् अहंनआसंइतिन अपितुआसमेव
तथात्वमपिनासीरितिन अपित्वासीरेव इमेजनाधिपाःराजा
नउपलक्षणंसर्वस्यजंतुजातस्य नासन्नितिन अपित्वासन्ने
वेतियोजना अनादित्वादनंतत्वमप्याह नचेति नभविष्यामइ
तिनैवकिंतुसर्वेभविष्यामएव ननुदेहस्यानात्मत्वेकथंप्राचीनक
र्मव्यतिरेकेणजीवनंनोपपद्यते कृतहानाकृताभ्यागमप्रसंगात्
तात् इत्यादिप्रतिपादिका थेतत्पीडयायंपीडनइतिचेद्यत्तत्र
भिमानमात्रादितिभ्रमः घटादिषुतुःपरशरीरेविशतितदानत्पी
डयादेहपतिर्नबाध्यते नस्यतदानीदेहाभिमानाभावात् यत
स्तुबाध्यतेऽभिमानमत्रादितिलोकेप्रसिद्धं किंचप्राचीनकर्मव्य
तिरेकेणजीवनंनोपपद्यते कृतहानाकृताभ्यागमप्रसंगात् इ
त्यादिष्वपिप्राक्कर्मानीत्यनुमेयं स्थावरजीविकाप्राक्कर्मपूर्वि
का जीविकात्वात् पाकादिक्रियापूर्वकाम्मदादिजीविकावत् अ
पिचक्रियावैचित्र्यात्कार्यवैचित्र्यंदृष्टंघटशरावोदंचनादिष्वतदृदि

दिहापिसुखेडःखेदिवैचित्र्यंप्राक्कर्मवैचित्र्यादनुमेयं तथासद्योजा
तस्यगोवत्सस्यस्तनपानादौप्रवृत्तिर्जन्ममात्रस्यमरणत्रासश्चप्रा
ग्भवीयानुभवजनितसंस्कारजन्योभोजनादिप्रवृत्तिश्चोच्छ्वासादि
वदित्यतोस्तिप्राचीनंकर्म अपिचकौलिकशास्त्रप्रसिद्धमेतत् य
थादेवदत्तःस्वशरीरेकंटकव्यथेनव्यथतेएवंशत्रुकृतायांदेवद
ति॰ त्तप्रमायांकंटकेनविद्धायांदेवदत्तोव्यथते नत्रव्ययादेवदत्तांतर
यात्रैवंमन्नापिवास्तकंटकव्यथादिकिंतुकेवलंप्राक्कर्ममात्रं
एवंचबीजांकुरन्यायेनकर्मतज्जन्यसंस्कारपरंपरयाऽनादिःसंसा
रइतिनदेहनाशादात्मनाशोस्तीतिनभीष्मादयःशोचनीयाः अ
त्रपूर्वस्मिन्श्लोकेआत्मनोदेहादन्यत्वमुक्तंगतासूनदेहानिति
विशेषणेन अत्रतुतस्यशरीरविशिष्टस्यात्मनोव्यवहारदृष्ट्यानि
त्यत्वंसाधितमितिभेदः १२ ॥

आनंदी टीका

जीवानामविनाशित्वमेवलक्षयति हिनित्विये अहमितोनी
वर्तमानः जातुकदाचिन्नासम अपितु अहं आक शरीरे स्थित
एवेदानीमपिवर्ते एवं त्वमपि जातु नासीः अपितु आसीरेवअ
यभूतइदानीमपिवर्तसे चपुनः इतः परमस्मादेहादनंतरेनभ
विष्यामः अपितु भविष्याम एव शरीरांतरे इति त्रिष्वपि कालेषु
सत्तया नित्यत्वादेषामविनाशित्वमित्यर्थः १२ ॥

तथाच जीवावस्थायामेवैषां नावनित्यत्वं रामकंठी टीका प्रतिपादयितुमाह +

+ येमोवर्तमानेमन्यसेसोहं जातु नासं नत्वहमेव सर्वकालभाव
मेवप्रकृतंप्रतिपादयति नाहमभूत्वाभवामि किंतु प्रागपिस्थित्वे
दानीमपिभवामि ✓ यथाचत्वमेवमिमेपिवर्तमानत्वेन प्रतिभासमा
नाः सर्वेराजानः पूर्वमासन्नेव नपुनरभूत्वाभवपंति नचसर्वेप
वयमतः परमस्माच्छरीरादनंतरंभविष्यामः भविष्यामएवेत्य
दि नेनयुष्मदस्मदादिप्रविभेदेन व्यवस्थितस्य जीवलोकस्य कालत्र
येपिसत्तासंभवान्नित्यत्वंप्रतिजानीते आसमित्यादिनभूतादिकि
याकर्तृत्व व्यपदेशोविनाशधर्मकशरीरसामानाधिकरण्यभ्रम
कृतः नतु नित्यस्य भूतादिव्यपदेश उपपद्यत इति ननुदेहस्पेह
[illegible]
[illegible]
देनपरिहर्तुमाह १२ ॥

तामिकी टीका

एवंहिकालत्रयेऽनादिप्रागभावप्रतियोगित्वानास्यात् प्रशोच्यत्वे आ
त्मनः स्थूलदेहवैलक्षण्यमेवाजनेनानुभूतपूर्वं हेतुमाह नत्वे
वाहमिति अहंपरमेश्वरो लीलागृहीततनुः लीलाविग्रहस्यावि
र्भावे तिरोभावेवा जातुनासं इति नैव अपितु आसमेवानादित्वात्
अतः कालत्रयेपिसत्तायोगित्वादात्मनोनित्याद्देहाद्वैलक्षण्यमसि
द्धम् १२ ॥

पंचोली टीका

कालत्रयसत्तानिरूपणेनआत्मनोनित्यत्वंसाधयति नत्वेवाहमि
ति यथाहंपरमेश्वरोजातुकदाचित्लीलाविग्रहस्याविर्भावेति

✓ यथाहंतथात्वमपिसम्प्रति वर्तमानत्वेन प्रतिभासमानः पू
र्वमप्यासीरेवनतु अभूत्वाभवसि

✓ नत्वंनासीरपितु आसीरेवेमेनृपा ननासन्नपितु आसन्नेवसदंशत्वात्
एतेनप्रागभावाप्रतियोगित्वमुक्तम् तथातः परं देहविनाशादुत्त
रकालेनभविष्यामइतिनकिंतु भविष्याम एवात्मस्वरूपेणनित्यत्वा
त् एवंध्वंसाप्रतियोगित्वमुक्तम् देहाभेदापेक्षया बहुवचनमुक्तंन
त्वात्मभेदाभिप्रायेण ✓

गी. रोभावेपि नासं न त्वपित्वासमेव कस्मादनादित्वात् अतीतेषु देहो
टी. त्पत्तिविनाशेषु नित्यमेवाभूवमित्यर्थः तथा त्वं नासीर्नाभूः अ
हि. पित्वासीरेव तथा इमे जनाधिपाः नृपाः नासन्निति न अपित्वास
न्नेव तथा नवयं सर्वे अतः परं अस्माद्देहपातात्परे उत्तरकालेपि
न भविष्यामः अपितु स्याम एव आत्मस्वरूपेण त्रिष्वपि कालेषु व
यं सर्वे नित्या नित्या एव अत्र वयं सर्वे इत्यत्र देहभेदानुवृत्त्या बहु
वचनं नात्मभेदाभिप्रायेण तत्र कथमेव नित्यत्वमात्मनः १२

78

श्रनवीरसमिद्बोधिनी ॥

इदं यद्देवप्रागभावप्रतियोगि तदेव ध्वंसप्रतियोगि च भवतीति स्थि
ते तत्त्वं च देहस्यैव संभवति न त्वात्मन इति प्रतिपादयन्नुक्तमेवार्थं
द्रढयति नत्वेवेति हि अभ्यां यं मां वर्तमानं मन्यसे सोहमितः पूर्वं जा
तु कदाचिदपि नासमिति न त्वैवापि त्वासममेवेति नञ्द्वयेन प्रकृत
मेव पूर्वकालभावित्वं प्रतिपादयति एवं त्वमप्यासीरिमे च जनाधि
पा आसन्नेव अतः परं चैतस्माज्जन्मन उत्तरकाले च वयं सर्वे न भवि
ष्याम इत्येतन्नैव किं तु भविष्याम एवेति कालत्रयेपि युष्मदस्म
त्स्वरूपभेदेन व्यवस्थितस्य जीववर्गस्य स्थितिर्नित्येति भगवता
प्रतिज्ञायते १२

मधुभाष्य

न त्वेवाहमीश्वरानित्यत्वस्याप्रकृतत्वाद्दृष्टांतत्वेनाह ॥ नत्वे
वेति यथाहं नित्यः सर्ववेदांतेषु प्रसिद्धः एवं त्वमेते जना
धिपाश्च नित्याः देहिनो भाव एतद्भवति तदेवासिद्धमिति चे
न्न देहिनोस्मिन्यथा कौमारादि शरीरभेदेपि देही तदीति ता
सिद्धः एवं देहान्तरप्राप्तावपि तदित्वात् न हि जडस्य शरी
रस्य कौमाराद्यनुभवः संभवति मृतस्यादर्शनात् मृतस्य
चाद्याद्यनुभवाभावः अहं मनुष्य इत्याद्यनुभवाच्चैतत्सिद्धमि

तिचेन्न सन्त्येवाविशेषे देहे ऽस्म्यादौ ज्ञानादिविशेषा
दर्शनात् तस्य वाद्याद्यनुभवाभावः सर्वे सर्वस्याभि
मानेमनसि काष्ठादिवच्च श्रुतेश्च प्रामाण्यं च प्रत्यक्षा
दिवत् न च बौद्धादिवत् अपौरुषेयत्वात् न ह्यपौरुषेये
पौरुषेयाज्ञानादयः कल्पयितुं शक्याः विनावकस्य
विद्धाकस्यापौरुषेयत्वं सर्वसमयाभिमतधर्मोपसिद्धेः
यश्चैतौ नांगी कुरुते नासौ समयी अप्रयोजकत्वात् मा
स्त्वधर्मो निरूप्यत्वादितिचेन्न सर्वाभिमतस्य प्रमाणं वि
ना निषेद्धुमशक्यत्वात् न च सिद्धिः प्रमाणिकस्येतिचेन्न
सर्वाभिमतेरेव प्रमाणत्वात् अन्यथा सर्ववाचैकव्यवहा
रासिद्धेश्च न च मयाश्रुतमिति तव ज्ञातुं शक्यम् अन्यथा
वाप्रत्युत्तरं स्यात् भ्रान्तिवीतत्वं स्यात् सर्वदुःखकारणत्वं
वा स्यात् एको वान्यथा स्यात् रचितत्वे च धर्मप्रमाणस्य
कर्त्तुरज्ञानादिदोषशंका स्यात् न वा दोषत्वं स्ववाक्येनैव
सिध्यति न च येन केनचिदपौरुषेयमित्युक्तमनुक्तवाक्य
समम् अनादिकालपरिग्रहसिद्धत्वात् अतः प्रामाण्यं श्रु
तेः ननु कृतकैर्थीरस्तु न भवति अथ वा जीवनापादे
हनाभवाऽपेद्यशोकः ननावजीवनापानित्यत्वादित्याह
नन्वेवेति ११॥

79

नत्वेवाहमिति अहंपुनस्थूलशरीरोपहितः सन्जात्विति कदा·
चिन्नासमितिनैवेतिकिंत्वासमेवेत्यर्थः तथात्वंजातुनासीरित्यपि
नैवेतिपुरुषविपरिणामः इमेजनाधिपादुर्योधनादयोनासन्निति
नैवेतिवचनविपरिणामोपिउत्तरार्धंस्पष्टं तनुनानिभिन्नान्येव
शरीराणिभविष्यंतिअनंतानिचयतेषांशरीराणांतैभिःशरीरैः
शोच्यनास्त्येवेत्याशंक्याह ॥

भाषाअनुवाद

भीष्मआदिके प्रति जो शोच करना अनुचित है इसमे श्रीभगवा
न कारन कहते है कि देखो हम परमेश्वर हमारा शरीर धारन के
वल लीलाके अर्थ है इससे उस देहके होने जाने वशते हम कर्मे
पूर्विमे नहीं रहेहुथे यह संभव नहीं होता जिस हेतु हम अनादि औ
र हमारे अंशते उत्पन्न तुम औरये सव राजालोकभी कभीनंही
रहेथे यह भीसंभव नंही है इससे हम सव जैसे पहले थे तैसे
अव भीहैं फोर आगेभी हम सव होंयगे इससे आत्मस्वरूपके
जन्म मरन का स्वभाव है तो फिरि स्वजनविनाश कहा शोक
का विषय कैसे है नहींहै १२ ॥

मेहोंतं महोनहिनदि यहराजेहोय यातेकेरन हमसभी
होंगे यह मतजोय १२॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा त
थादेहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति १३

शांकरभाष्यं

तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह देहिन इति देहोऽस्यास्तीति
देही तस्य देहिनो देहवतः आत्मनः अस्मिन् वर्तमाने देहे यथा ये
न प्रकारेण कौमारं कुमारभावो बाल्यावस्था यौवनं यूनो भावो म
ध्यमावस्था जरा वयोहानिर्जीर्णावस्था इत्येताः तिस्रोऽवस्था अन्यो
न्यविलक्षणास्तासां प्रथमावस्थानाशेन नाशो द्वितीयावस्थोपज
नने नोपजननमात्मनः किं तर्ह्यविक्रियस्यैव द्वितीया तृतीयाव
स्थानाशेन नाशो द्वितीयावस्थोपजनने नोपजननमात्मनः किं तर्ह्य
विक्रियस्यैव द्वितीया तृतीयावस्थाप्राप्तिरात्मनो दृष्टा यथा त
द्वदेव तद्वदेव देहादन्यो देहो देहान्तरं तस्य प्राप्तिर्देहान्तरप्राप्ति
रविक्रियस्यैवात्मन इत्यर्थः धीरो धीमांस्तत्रैवं सति न मुह्यति न
मोहमापद्यते १३

आनन्दगिरिकृतटीका

ननु पूर्वदेहं विहायापूर्वं देहमुपाददानस्य विक्रियावत्त्वेनोत्पत्तिविना
शवत्त्वविभ्रमः समुद्भवेदिति शङ्कते तत्रेति अशोच्यत्वप्रतिज्ञायां
नित्यत्वे हेतूक्ते सतीति यावत् अवस्थाभेदे सत्यपि वस्तुतो
विक्रियाभावादात्मनो नित्यत्वमुपपन्नमित्युत्तरश्लोकेन दृष्टान्ताव
ष्टम्भेन प्रतिपादयतीत्याह दृष्टान्तमिति न केवलमागमादेवात्म
नो नित्यत्वं किन्त्ववस्थान्तरवज्जन्मान्तरे पूर्वसंस्कारानुवृत्तेश्चेत्याह
देहिन इति देहवत्त्वं तस्मिन्नहंममाभिमानभाक्त्वं तासामिति निर्धा
रणे षष्ठी आत्मनः श्रुतिस्मृत्युपपत्तिभिर्नित्यत्वज्ञाने धीमानित्य
त्र धीर्विवक्षिते एवं सतीति तत्त्वतो विक्रियाभावान्नित्यत्वे समधिगते
सतीत्यर्थः १३

स्वामिकृतटीका

ननुईश्वरस्यतवजन्मादिशून्यत्वंसत्यमेवजीवानांतुजन्ममरणेप्रसिद्धे इत्यत्राह देहिनइति देहिनोदेहाभिमानिनोजीवस्ययथास्मिन्स्थूलेदेहेकौमाराद्यवस्थादेहनिबंधनाएवनतुस्वतः पूर्वावस्थानाशेवस्थांतरोत्पत्तावपिसएवाहमितिप्रत्यभिज्ञानात् तथैवदेहनाशेदेहांतरप्राप्तिरपिलिंगदेहनिबंधना नतुतावदात्मनोनाशः जातमात्रस्यपूर्वसंस्कारेणस्तन्यादौप्रवृत्तिदर्शनात् अतोधीरोधीमान्तत्रतयोर्देहनाशोत्पत्त्योर्नमुह्यति आत्मैवमृतोजातश्चेतिनमन्यते १३ ॥

पिशाचभाष्यम् ॥

अस्मिन्वर्तमानेदेहेयथाकौमारंकुमारभावेयौवनंयूनोभावेजराहृद्धत्वं तथातद्देहांतरप्राप्तिःधीरोधीमान् तत्रनमुह्यतिनमोहंगच्छति यथाअस्मिन्देहेकौमारंयौवनंजरास्वात्मनोभेदएवमिन्द्रियशरीरावस्थाःएवंशरीरांतराणीत्यर्थः १३ ॥

रामानुजभाष्यम् ॥

एकस्मिन्देहेवर्त्तमानस्यदेहिनः कौमारावस्थांविहाययौवनाद्यवस्थायामात्मनःस्थिरत्वबुद्ध्यायथात्मनष्टइतिनशोचतिदेहाद्देहांतरप्राप्तावपितथैवस्थितआत्मेति बुद्धिमान्नशोचतिअतःआत्मनोनित्यत्वात्तदात्मानोनशोकस्थानं एतावदत्रवक्तव्यंआत्मनांनित्यानामेवानादिकर्मवशतयातत्तत्कर्मोचितदेहतरसंसृष्टानांतैरेवबंधनिवृत्तयेशास्त्रीयंस्ववर्णोचितंयुद्धादिकर्मानभिसंहितफलंकर्मजर्वतामिंद्रियैर्जरायाइंद्रियार्थस्पर्शाः शीतोष्णादिप्रयुक्तसुखदुःखदायाआविर्भवंतितेतुयावच्छास्त्रीयकर्मसमाप्तिमर्तव्याइतिसमर्थमनंतरमेवाह १३ ॥

अभिनवगुप्तकृतटीका ॥

[illegible] देहिनोस्मिन्निति आकारांतरेचसतियदिशोच्यतातर्हिकौमाराद्यौवनावाप्तौकिमितिनशोच्यते योधीरःसनशोचति धैर्यंचेतच्छरीरेपियस्यास्थानास्तितेनसुकरंअतस्त्वंधैर्यमन्विच्छ १३ ॥

परमार्थप्रपा टी॰

एवं शोकस्य जीवनिमित्तकत्वं निवार्य देहनिमित्तकत्वं निवारयति
देहिन इति देहिनो देहाभिमानिनो जीवस्य कौमारयौवनजरावस्था
वस्थात्रयस्यानुभवो दृष्टः यथाहं कौमारदशायां नग्नो बालिशोक्री
डितवान् स एवाहं यौवने सभ्यत्वमुपागतोस्मि पुनः स एवाहं संप्रति
देहाद्युपलवेन स्थविरत्वं प्राप्तोस्मीति योस्ति तदके कस्तु वायं जडो
मूको देही भवति वाच्यवेति तथा च तस्य पूर्वावस्थातिक्रमे उत्तरावस्था
प्राप्तौ किं पित्रादीनां शोको भवति तथैव देहान्तरप्राप्तावपि शिशुतो॰
पि बालः पूर्वसंस्कारवशात् स्तनग्रहणरोदनादिषु प्रवर्तते एवम
नुभूय धीरस्तत्र विषये न मुह्यतीत्यर्थः १३ ॥

वनमाली टी॰ ॥

ननु स्वीयदेहनाशरूपं मरणं तु जीवस्य स्यादेव तत्राह देहिन इति यथै
कस्मिन्देहे वर्तमानस्य देहिनः कौमारावस्थां विहाय यौवनाद्यवस्था॰
प्राप्तस्य स्थिरत्वबुद्ध्या न शोको भवति तथैकं देहं विहाय देहान्तरप्रा॰
प्तिस्तत्र प्राप्तौ धीर आत्मा स्थिर इति धीमान्न मुह्यति आत्मा मृत इति न मु
ह्यति ननु देह एवात्मा स्थूलोहं गौरोहं गच्छामीति प्रतीतेः जातो दे
मृतो वदत्तो मैत्र इति प्रतीतेर्देहजन्मनाशाभ्यामात्मनोपि जन्मनाशोपपत्ते
रनुमानागमादेः प्रामाण्यानंगीकारेण देहभिन्नात्मनोप्रत्यक्षभूत्वा
दिति लोकायतिकास्तान्प्रतिवाह देहिन इति योहं बाल्ये पितरं न
न्वभूवं सोहं वृद्धो नप्तॄननुभवामीत्यवस्थाभेदाद्देहभेदेप्यात्मनः स्थि
रत्वप्रत्यभिज्ञानान्न यथाभेदस्तथा योहं स्वप्ने पूर्वं व्याघ्रदेहो नन्तरं पशु
देहः स एवाहं मनुष्यदेह इत्यननुगतदेहेष्वनुगतात्मज्ञानी तत्र दे॰
हान्तरप्राप्तौ देहभिन्नात्मनि न मुह्यति उक्तदेहात्मनोरभेदप्रत्यय॰
स्तु कर्दमलिप्तवस्त्रे कृष्णवस्त्रप्रत्ययवत् नष्टेहे नष्ट इत्यादिवदौपचा
रिकः मम देहः स्थूल इत्यादिप्रत्ययस्य बाधकत्वेनाभेदारोपासंभवा
त् देहातिरिक्तात्माभावे स्तनपानादौ बालस्य प्रवृत्तिर्न स्यात् इष्टसा
धनताज्ञानाभावात् अनुभावकस्य तदानीमसत्वात् प्राचीनस्तन
पानानुभवितुरिदानीमसत्वेन स्मरणासंभवाच्च यथैकस्मिन्देहे प
रिणामिनि नानावस्था जायंते तत्यागप्राप्तिभयात् स्वधर्मानुष्ठानेन

गी॰ त्याज्यं तदुत्पत्त्यादेरवर्जनीयत्वात्तथाविद्यमानदेहनाशे देहांतरो
टी॰ त्पत्ते रावश्यकत्वात्तद्भयात्स्वधर्मानुष्ठानं न त्याज्यं [illegible]मि
द्वि॰ तिभावः देहिन इत्येकवचनं तु जीवस्यानेकावस्थादिगतस्याप्येक
२ त्वलाभाय एकवचनानुरोधेन जीवैकत्वेश्वरादिमोक्षप्रतिपाद॰
९३ कशास्त्रस्याप्रामाण्यं स्यात् तदंगीकारे विनिगमकाभावेन जीवै
कपरत्वाभिमतस्याप्रामाण्यापत्तेः स जीवोहमेवेति निश्चयाभावे
न श्रुत्युक्तश्रवणादौ वक्ष्यायाससाध्यनिष्कंपप्रवृत्तिर्न स्यात्
यः सर्वज्ञः सर्वविदित्यादिनित्यसर्वज्ञत्वबोधकश्रुतिविरोधापाताच्च
बद्धमुक्तगुरुशिष्यादिव्यवहारस्यानुपपत्तेश्च न च स्वमतवदुपप॰
त्तिः मोक्षस्य ब्रह्मस्वरूपस्य च त्वदभिमतस्य स्वाभिकगुर्वादिवन्मि
थ्यात्वापत्त्यास्य ष्टाशून्यवादापत्तिः ११ ॥

अस्तमवैजयन्ती टीका ॥

एवमात्मनां त्रैकालिकनित्यत्वमुक्त्वेदानीं शरीरसंयोगवियोगेपि
नित्यत्वमाह देहिन इति पुण्यापुण्यरूपकर्मप्रयुक्ताः सु
रासुरनरतिर्यगाद्याकारा देहाः सन्त्यस्य देही तस्य जीवस्यैकस्मि
न्नपि देहे यथा कौमारावस्थां परित्यज्य यौवनावस्था भवति पुनस्तां
विहाय जरावस्था भवति तथैवैकस्माद्देहाद्देहान्तरस्यान्यदेहस्य
प्राप्तिर्भवति तत्र देहान्तरप्राप्तौ धीरः जीवे नित्य इति ज्ञानवान् न मुह्य
ति देहे नष्टे जीवोपि नष्ट इत्येवं मोहं न प्राप्नोतीत्यर्थः देहिन इत्येकव
चनं जात्यभिप्रायेणान्यथा अशोच्यानन्वशोचः गतासूनगतासूंश्च न
सर्वे वयमतः परमिति पूर्वोक्तविरोधः स्यात् एवमन्यत्रापि यत्र यत्रा
त्मनामेकवचनं भगवतोक्तं वर्तते तत्र तत्र सर्वत्र जात्यभिप्रायेणै
वबोध्यम् देहान्तरप्राप्तिरित्यनेनात्मनो हरेरधीनत्वं शरीरसंयोग
वियोगयोग्यत्वमणुपरिमाणकत्वं प्रतिदेहभिन्नत्वं च सूचितम् तत्र
कौ॰ हरेरधीनत्वं शरीरसंयोगवियोगनामकं श्रीकृष्णेन मायत्तस्वरूपस्थि
तिप्रवृत्तिकत्वं स्वातंत्र्याभाववत्त्वमित्यर्थः तमेव भान्तमनुभाति स
र्वं एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते इत्यादि
श्रुतेः शरीरसंयोगवियोगयोग्यत्वं मोक्षार्हत्वं शरीरशब्देनात्रानादि
प्रकृतिरुच्यते कार्यकारणयोरभेदात् अयं भावः अनादिकर्मात्मि॰

चं॰२

भ्य उन्निनीषते एष एवासाधु कर्म कारयति तं यमेभ्यो लोके ॰ १

काविद्यानादिप्रकृतिसंबन्धावच्छिन्नोदेवतिर्यङ्मनुष्यादिदेहरू
पेसंसारचक्रमनुभवन् श्रीभगवद्भिर्हैतुककृपाकटाक्षावलो
कितश्चाचार्यदेवोभूत्वातस्यवेनिर्जवितसच्छास्त्रस्तथाश्रावित
संशयादिरोगोभगवत्स्वरूपादिविषयकध्यानसन्ततिपरिपाक
लब्धसाक्षात्कारनिरस्तकर्मबन्धोभगवद्भावापत्तिलक्षणमोक्ष
भागीभवतीति यमेवैषवृणुतेतेनलभ्यः तमक्रतुंपश्यतिवी
तशोकः यदापश्यःपश्यतेरुक्मवर्णंकर्तारमीशमित्यादिश्रुतेः
अणुपरिमाणकत्वंच आराग्रमात्रकत्वं आराग्रमात्रोह्यवरोपिदृ
ष्टः अणुरेषआत्माचेतसावेदितव्यः वालाग्रशतभागस्यशतधा
कल्पितस्यचेत्यादिश्रुतिभ्यः इत्यनेनवैभवमाध्यमपरिमाणवादि
नोतार्किकवादिनोनिरस्तो प्रतिदेहभिन्नत्वंच देहंदेहंप्रतिभिन्नत्वं
ब्रह्मादिस्थावरान्तेषुचतुर्विधेषुयोनिष्वपिभिन्नत्वमित्यर्थः इत्य
नेनात्मपरमात्मनोर्जीवानांचमहद्वैलक्षण्यं अथचप्रत्यगात्मना
मपिमिथोभेदसिद्धान्तंस्थापयतेनचैकजीववादिपक्षोनिरस्तइत्यक्षर
त्यलम् ॥ १२ ॥ मधुसूदनीटीका ॥
देहाःसर्वेभूतभविष्यद्वर्तमानजगन्मंडलवर्तिनोऽस्यसंतीति
देही एकस्यैवविभुत्वेनसर्वदेहयोगित्वात् सर्वत्रचेष्टोपपत्तेर्न
प्रतिदेहमात्मभेदेप्रमाणमस्तीतिसूचयितुमेकवचनं सर्वेव
यमितिबहुवचनंतुपूर्ववत्रदेहभेदानुवृत्त्यानत्वात्मभेदाभिप्रायेण
इतिनदोषः तस्यदेहिनएकस्यैवसतोऽस्मिन्वर्तमानेदेहेयथाकौ
त्यं^ मारंयौवनंजरेत्यवस्थात्रयंपरस्परविरुद्धंभवति नतुतद्भेदादात्म
भेदः यएवाहंबाल्येपितरावन्वभूवंसएवाहंवार्द्धकेप्रणप्तॄननु
भवामीतिदृढतरप्रत्यभिज्ञानात् अन्यानिष्टसंस्कारस्यचान्यत्रा
नुसंधानाजनकत्वात् तथातेनैवप्रकारेणाविकृतस्यैवसतःआ
त्मनोदेहान्तरप्राप्तिः एवमस्माद्देहादत्यंतविलक्षणदेहप्राप्तिःस्व
प्नेयोगैश्वर्येचतत्तद्देहभेदानुसंधानेपिसएवाहमिति प्रत्यभिज्ञा
प॑ नात् तथाचयदिदेहैवात्माभवेत्तदाकौमारादिभेदेनदेहेभिद्य
मानेप्रतिसंधानंनस्यात् अथतुकौमाराद्यवस्थानामत्यंतवैल
क्षण्येप्यवस्थावतोदेहस्ययावत्प्रत्यभिज्ञंवस्तुस्थितिरितिन्याये

नतुदेहमात्रंचैतन्यविशिष्टमात्मेतिलौकायतिकाः तथाचस्थूलोहंगौरोहंगच्छामिचेत्यादि प्रत्यक्षप्रमाण
प्रतीतीनांप्रामाण्यमनपनोदितंभविष्यति अतःकथंदेहादात्मनोव्यतिरेकेपिकथंवाजन्मविनाशशून्यत्वंजातो
देवदत्तोमृतोदेवदत्तइतिप्रतीतेर्देहजन्मनाशाभ्यांसहात्मनोपिजन्मविनाशोपपत्तेरित्याशंक्याह देहिनइति

व्यतिरेको २४

अपेयं वाधस्याभयत्रतुल्यत्वात् एतच्च न जायत इत्यादौ प्रपंचयिष्यते एतेन देहाद्व्यतिरिक्तो देहेन सहोत्पद्यते विनश्यति चेति पक्षो ॥ २

नैकं स्यान्नदापि स्वप्नयोगेस्वप्नयोर्देहयोर्धर्मिदेशनिर्मेयानंन स्था
दित्युभयोदाहरणे अतो मरुमरीचिकादावुदकादिबुद्धेरिवसर्व
लोहमित्यादिबुद्धेरपिभ्रमत्वमवश्यमपि संबुकः तत्रावस्थाभेदेन
प्रत्यभिज्ञोपपन्नावपिधर्मिणो देहस्य भेदे प्रत्यभिज्ञानुपपत्तेः अ
थवा यथा कौमारायवस्थाभिर्विक्रतस्यात्मन एकस्यैव तथा
देहान्तरप्राप्तिरेतस्माद्देहादुत्क्रान्तौ तत्र स एवाहमिति प्रत्यभि
ज्ञाभावेपि जातमात्रस्य हर्षशोकभयादिसंप्रतिपत्तेः पूर्वसंस्का
रजन्याया दर्शनात् अन्यथा स्तनपानादौ प्रवृत्तिर्नस्यात् तस्या इ
ष्टसाधनतादिज्ञानजन्यत्वस्याहृष्टमात्रजन्यत्वस्य वाभ्युपगमा
त् तथा च पूर्वापरदेहयोरात्मैक्यसिद्धिः अन्यथा कृतनाशाकृ
ताभ्यागमप्रसंगादित्यन्यत्र विस्तरः अथवा देहिन एकस्यैव तव
यथाक्रमेण देहावस्थोत्पत्तिविनाशयोर्न भेदो नित्यत्वात् तथा
युगपत्सर्वदेहान्तरप्राप्तिरपि तवैकस्यैव विभुत्वात् मध्यमपरि
माणत्वे सावयवत्वेन नित्यत्वायोगात् अणुत्वे सकलदेहव्यापि
सुखाद्यनुपलब्धिप्रसंगाद्विभुत्वे निश्चिते सर्वत्र दृष्टकार्यत्वात् सर्व
शरीरेष्वेक एवात्मात्वमिति निश्चितोर्थः तत्रैवं सति वध्यघातक
भेदकल्पनया त्वमधीरत्वात् असि धीरस्तु विद्वान्न मुह्यति अ
हमेषां हन्ता एते मम वध्या इति भेददर्शनाभावात् तथा च विवा
दगोचरापन्नाः सर्वे देहा एकभोक्तृका देहत्वात् त्वद्देहवदिति ।
श्रुतिरपि एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मे
त्यादि एतेन यदाहुर्देहमात्रमात्मेति चार्वाकाः इंद्रियाणि मनः
प्राण इति तदेकदेशिनः क्षणिकं विज्ञानमिति सौगताः देहाति
रिक्तः स्थिरो देहपरिमाण इति दिगंबराः मध्यमपरिमाणस्य नि
त्यत्वानुपपत्तेर्नित्योणुरित्येकदेशिनः तत्सर्वमपार्थकं भव
ति नित्यत्वविभुत्वस्थापनात् नन्वात्मनो विभुत्वे नित्यत्वे च न विव
दामः प्रतिदेहमेकत्वं न तु सहामहे तथाहि बुद्धिसुखदुःखेच्छा
द्वेषप्रयत्नधर्माधर्मभावनाख्यनवविशेषगुणवन्तः प्रतिदेहं भि
न्ना एव नित्या विभवश्चात्मान इति वैशेषिका मन्यन्ते इममेव पक्षं
तार्किकमीमांसकादयोपि प्रतिपन्नाः सांख्यास्तु विप्रतिपद्यमा
ना अप्यात्मनो गुणवत्त्वं प्रतिदेहं भेदेन विप्रतिपद्यन्ते अन्यथा तु

खड्गःखादिसंकरप्रसंगात् तथाचभीष्मादिभिन्नस्यममनित्यत्वेवि
भुत्वेपिसुखदुःखादियोगित्वाद्भीष्मादिवधेदेहविच्छेदेसुखवियो
गोदुःखसंयोगश्चस्यादितिशोकमोहौनानुचि+विनिअर्जुनाभिप्राय
माशंक्यलिंगशरीरविवेकायाह १३ ॥ तौ+

सदानंदी टीका ॥

ननुस्थूलोहमित्यादिप्रत्ययस्तुमार्जितंभवेत् आत्मनोदेहभिन्नत्वेस्वी
कृतेतच्चनोचितं १ विष्णुशर्मामृतोजातइतिप्रत्ययमानतः शरीर
जन्मनाशाभ्यांसहैवास्यात्मनोपितौ २ जन्मनाशौप्रसिद्धौस्तइत्या
शंक्याहमाधवः देहाःसर्वेत्रिकालस्थाजगन्मंडलवर्तिनः ३ अस्य
संतीतिदेहीस्यात्तस्यैकस्यात्मनोविभोः ब्रह्मादिस्थावरांतेषुशरीरेषु
खिलेष्वपि ४ व्यापिनोनास्तिभेदस्यगंधइत्यपिदर्शितं हरिणैकत्व
निर्देशाद्देहिनोस्मिन्नितिस्फुटं ५ देहभेदात्तुहत्याक्तंवयंसर्वेपराः
त्विति तस्यैकस्यात्मनोदेहवर्तमानेसतोयथा ६ कौमारंयौवनं
जीर्णंचेत्यवस्थात्रयंयतः परस्परविरुद्धंतत्तद्भेदाद्दात्मनोभिदा ७ ।पौत्रा।
वाल्ययएवपितरावन्वभूवंसएवहि वार्द्धकेहंप्रपौत्रादीनेतान
नुभवाम्यसौ ८ प्रत्यभिज्ञाभवत्येषाप्रत्यगात्मैकगोचरा येषु
व्यावर्तमानेषुनैवव्यावर्ततेत्वयः ९ यत्तेभ्योभिद्यतेहंतत्कहेम
भ्यइवस्वतः निर्विकारस्यबालाद्यायथासंत्यत्रदेहिनः १० तद्वद्दे
हांतरप्राप्तिर्निर्विकारस्यवस्तुतः एतस्माद्देहतोन्यतभिन्नदेहात
गात्मनः ११ योगैश्वर्येतथास्वप्नेनास्तितेनभिदात्मनः सोहमित्येव
विज्ञानंप्रत्यभिज्ञात्मकंयतः १२ प्रत्यगात्मनितेनायंदेहादतिवि
लक्षणः आत्मैकःकेवलःशुद्धोदेहाध्यासादयंभ्रमः १३ स्थूलोहम
सुकोजातोमृतइत्यादिकोन्वयं बाल्याद्याजाग्रदाद्याश्चव्याहता
स्ताःपरस्परं १४ अवस्थाःकल्पिताध्यात्माप्रत्यगात्मनिकेवले ज्ञा
तमात्रस्यहर्षादिःपूर्वसंस्कारजोभवेत् १५ अन्यथास्तन्यपाना
दौप्रवृत्तिःस्यान्नदेहिनां अदृष्टाद्वाप्रवृत्तिःस्यादिष्टसाधनताधि
या १६ तथाचात्मैक्यसंसिद्धिःपूर्वापरशरीरयोः अन्यथाकृतना
शादिदोषोपिस्याद्दुरुद्धरः १७ एवंदेहादितत्त्वात्मज्ञानाद्धीमान्न
मुह्यति शोकमोहाद्यसंस्पृष्टोधीरधीस्त्वमतोभव १८ ॥ १३ ॥

यद्यप्येवं तथापीष्टदेहवियोगजः शोको भवत्येवेत्याशंक्याह दे
हिन इति देहो स्थूलसूक्ष्मो विद्यतेऽस्य स देही चिदात्मा तस्य यथा
स्मिन् स्थूलशरीरे कौमाराद्यवस्थासु देहभेदेऽप्येक एवाहं बाल
श्चासमिदानीं वृद्धोस्मीत्यभेदप्रत्यभिज्ञानादैक्यं बालादिशरीरे
भ्योऽन्यत्वं च व्यावृत्तेभ्योऽनुवृत्तं भिन्नं कुसुमेभ्यः सूत्रमिवेति न्या
यात् एवं देहांतरप्राप्तिरपि स्थूलशरीरादन्येषां लिंगशरीराणां
सूक्ष्माणां स्थूलशरीरारंभकारिणां प्राप्तिः अयमर्थः यथैक
मपि स्थूलं शरीरं कौमाराद्यवस्थाभेदादनेकरूपमेवं नित्यमपि
लिंगशरीरं प्राणिकर्मभेदात्सुरनरतिर्यगाद्यवस्थाभेदादने
कं भवति तत्र चोक्तन्यायेन स्थूलादिवत्सूक्ष्मादपि शरीरादा
त्मा विविक्त एव एवं च शोकादिधर्मिणो लिंगादपि विभिन्नस्य
तवेष्टवियोगजः शोकोपि न युक्तः अत एव तत्र तस्मिन्विषये
धीरो न मुह्यति अभिमानिकौ शोकमोहौ देहद्वयाभिमान
त्यागाद्धीरं न बाधेते अतस्त्वमपि धीरो भवेति भावः पूर्वश्लोके
योर्गलाहमिति वयमिति च बहुवचनेनोपाधिभेदाभिप्रायं
अत्र तु देहिन इत्येकवचनेनोपाधेयचिदात्मैक्याभिप्रायमिति
ज्ञेयं तथा च श्रुतिरेकस्यात्मन औपाधिकभेदमाह यथा ह्ययं
ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना
क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मेति क्षेत्रेषु वल्पमा
णलक्षणेषु स्थूलसूक्ष्मदेहद्वयात्मकेषु एको देवः सर्वभूतेषु
गूढः सर्वव्यापी सर्वभूतांतरात्मेति च एकत्वाच्च विभुत्वमप्यस्य
सिद्धं तेन देहादीनामनित्यानामविभूनां च पराभिमतमात्म
त्वं प्रत्याख्यातं वेदितव्यं ॥ १३ ॥

आनंदी टीका

तदेवं सामान्येनोक्ताविशेषेण नित्यत्वे लोकप्रसिद्धं दृष्टान्तमाह
अस्मिन्वर्तमाने देहे एतद्देहविषया बालाद्यवस्था नश्यन्त्यः देहि
नः सर्वास्ववस्थास्वेकरूपस्य नित्यस्याविनाशिनो यथा विनाशशं
का शोककारणं न भवति तथैवास्माद्देहाद्देहान्तरप्राप्तिरपीति
धीरो बुद्धिमांस्तत्र न मुह्यति अनात्मनि देहे आत्मविषयं शोकं न क
रोतीत्यर्थः १३ ॥

रामकंठी टीका

+ अस्मिन्वर्तमानतयापरिगृहीते देहे यथास्य देहिनः तत्संवेदितु॰
रात्मनः कौमारं कुमारभावो बाल्यं तथा यौवनं तारुण्यं तथा जरा वृ
द्धभावः इत्यवस्थात्रयमनित्यं तेन देहिनाशत्वादित्वेनानुबन्धीयमा
नं संबध्यते तथा तेनैव निदर्शनेन इतो देहादन्यस्य देहस्य प्राप्तिस्त॰
स्यात्मनो देहद्वयव्यापकस्यापि तैव तत्र तत्त्वज्ञो मोहं न गच्छति शा
रीरविनाशे शारीरिणमविनष्टं मन्यते नित्यमेव तमवगच्छति कि
मनेनोक्तं भवति यथा बाल्याद्यवस्थाविनाशे न कश्चिदात्मविनाशं
मन्यते किंतु सर्वः कश्चित्प्रतिपन्ना बाल्याद्यवस्था अतीतानागत॰
त्वेनानुसंदधानः प्रतिपत्तारमात्मानमेकं स्थितं मन्यते तथैव नाना
देहसम्बन्धमतीतानागतत्वेनानुसन्दधानः प्रबुद्धो नित्यमात्मान
मवगच्छति एताभिश्च स्थूलाभिः कौमाराद्यवस्थाभिः सूक्ष्माः स्व
प्नजागरादयोऽप्यवस्थाः प्रतिपादिता वेदितव्याः तथाहि तास्वन्यो
न्याभिन्नरूपास्वप्रवर्तमानास्वुत्पादविनाशवतीषूपलब्धत्वेनैकेन ल
क्षणेनानुस्यूतस्ताभ्योऽत्यन्तविलक्षणस्वभाव आत्मा सर्वेष्वेव स्वसंवेदन
सिद्धो व्यापकत्वेन व्यवस्थितस्तत्र यथैकस्मिन्देहे परस्परविविक्त
क्षणिकस्वभावजागराद्यवस्थाविशेषसंवेदितृत्वमात्रैकलक्षण
एक आत्मा सिद्धः तथा देहान्तरेष्वपि लक्षणविशेषस्य [illegible]
प्यभावादेक एव सिद्धः [illegible]
[illegible]
[illegible] एवं त
[illegible] माह १३

+ ननु देहनिष्ठस्य
जीवस्य कर्तृत्व
तादृत्वाद्युपलंभ
स्तत्कथं तद्विनाशे
तस्य नित्यत्वं स्यादि
त्याशंकां प्रत्यक्षो
पलभ्य निदर्शनेन प्र
तिपादनेन परिह
र्तुमाह देहिनेति

[illegible]कीटीका

नन्वीश्वरस्य तव जन्मादि स्यान्नत्वेतत्सत्यमेव जीवानां पुनर्जातो देवदत्तो मृतो देवदत्त इति प्रतीत्या देह जन्मनाशाभ्यामात्मनो जन्मनाशौ वितिभ्रान्तिरित्याशंक्याह देहिन इति ॥१२॥

२ स्या॰ देहेषु सर्वव्यापी सर्वभूतान्तरा

श्री॰ टी॰ हि॰ देहिनो देहाभिमानेन जीवभूतस्य मम एकस्यैव सर्वभूतेषु विभुत्वादेकवचननिर्देशः यथा चश्रुतिः एको देवः सर्वभूतेषु गूढ इति यथास्मिन्देहे कौमाराद्यवस्थाः स्थूलदेहनिबन्धना न तु स्वतः एवावस्थान्तराशावस्थान्तरात्यन्तौ स एवाहमिति प्रतिभिज्ञानात् ॥ नन्वीश्वरस्य तव जन्मादि स्यान्नत्वेतत्सत्यमेव जीवानां पुनर्जातो देवदत्तो मृतो देवदत्त इति प्रतीत्या देहजन्मनाशाभ्यामात्मनो जन्मनाशौ वितिभ्रान्तिरित्याशंक्याह देहिन इति ॥१३॥

१४ तथैव तद्देहनाशे तस्यैवात्मनः देहान्तरप्राप्तिरपि लिंगदेहनिबंधना जातमात्रस्य पूर्वसंस्कारेण स्तन्यादौ प्रवृत्तिदर्शनात् अतो धीरो धीमान्बुद्धिमान् तयोर्देहनाशोत्पत्त्योर्न मुह्यति आत्मैव जातश्च मृत इति न मन्यते

पंचोली टीका

परमात्मनो नित्यत्वेपि जीवानां जन्ममरणयोः प्रसिद्धत्वात्कथं नित्यत्वमित्याशंकायामाह दृष्टान्तेन आत्मनो नित्यत्वं साधयति देहिनोस्मिन्निति देहिनो देहवतः आत्मनोस्मिन्वर्तमाने देहे यथा येन प्रकारेण कौमारं बाल्यावस्था यौवनं मध्यमावस्था जरा जीर्णावस्था देहनिबंधना एव न तु स्वतः इति पतालिस्तावस्था अन्योन्यविलक्षणा अविकृतस्यैवात्मनो भवति एवावस्थानाशे यथात्मनो न

१८ नाश उत्तरावस्थोपजनने आत्मनो न उपजननं स एवाहमिति प्रत्यभिज्ञानात् तथा तद्देहवर्तमानदेहाद्देहान्तरप्राप्तिः अविक्रियस्यात्मनो भवति लिंगदेहनिबंधनात् न तु तावतात्मनो नाशः जातमात्रस्य पूर्वसंस्कारेण स्तनपानादौ प्रवृत्तिदर्शनात् तत्रैवं सति धीरो ज्ञानी तत्र तयोर्देहनाशोत्पत्त्योर्न मुह्यति आत्मैव जातो मृत इति न मन्यते यद्यप्यात्मनित्य इति जानतः आत्मनाशनिमित्तो शोकमोहो न संभवतः शोकश्चान्तःकरणपरिणामः मोहश्चाविवेकः ॥ १३

तथापि तद्देहसंयोगजन्यत्वेदेहवियोगजन्यदुःखं संयोगवियोगनिमित्तो शोकमोहो संभवत इत्यर्जुनस्यैवचनमाशंक्याह ॥१३॥

रामानुजभाषा हिन्दी ॥

इसमें देहिनो नित्यता कहकर देहस्य अनित्यता प्रतिपादयति देहिन इति देहिनो देहधारिणो जीवस्यास्मिन्वर्तमाने देहे यथा कौमारं बाल्यं यौवनं तारुण्यं जरा वृद्धत्वमित्यवस्थात्रयमनित्यमवश्यंभावि तथा देहान्तरप्राप्तिः पूर्वपूर्वदेहनाशे उत्तरोत्तरदेहसंबंधः

प्रकारान्तररूपतया भवति इति धीरः धियं राति ददातीति धीरः
पते पदे शोपि द्वमोभवात् प्राप्तं च देहनाशेन भ्रंशति मोहं ना
प्नोति शोकस्यापि परवशो न भवतीति वपुजन नदेहनाशेस
त्यपि वंपूर्नांतथैव देहांतरसंबंधादनंतानन्तसुखः शोकस्या
वनोचितोन्यथा कौमारादेर्यौवनावाप्तौ तस्य शोच्यता प्रसज्ये
नेति भावः १३ ॥

मधुमाष·

नापि देहनाशमित्याह देहिनइति यथा कौमारादि देहस्य
नेन जरादिप्राप्तावशोकः एवं जीर्णदेहस्य नेन देहान्त
रप्राप्तावपि तथापि मदर्शनाभावादिनाशोक इति चेन्नेत्या
ह १३ ॥

भाषा अनुवाद

जो कहो कि तुम ईश्वर तुमारा जन्म और विनाश नहोना संभ
वहै परंतु हम लोग जीवहै इससे हमारा जन्म मरन प्रसिद्ध
है इस विषयमें भगवान कहतेहै कि देखो देहाभिमानी जी
वको इसस्थूल शरीरमे जैसे कौमार यौवन और वृद्धा अव
स्था प्राप्त होतीहै परन्तु जीवस्वरूप को नही और यही सब
अवस्थोके मध्यमे पूर्व अवस्थाके गये और और अवस्था प्राप्त
भये भी संसकार वशाते सोई हमहै यह ज्ञान रहता है तैसे
ही जीवकी स्थूल देह नाश हो लिंग शरीरके द्वारा देहान्तर
प्राप्ति होनेसे भी आत्माका नाश नही देखो तुर्तके भये बा
लकको पूर्व संसकार वशाते जन्म होते मात्र दूध पीनेसे
प्रवृत्ति देख पडतीहै इसीसे स्थूल देहके जन्मनाश भये धी
र पुरुष मूढ नही होते अर्थात् आत्मा का जन्म मरण अंगी
कार नही करतेहै १३ ॥

दोहा

देहविषें ज्यों जीवको बालक यौवन वृद्ध त्यों देहांतर प्राप्तिहैं
धीरन मोह प्रसिद्ध १३॥

৪৪

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःख
दाः आगमापायिनोऽनित्या स्तांस्तितिक्षस्व
भारत १४ ॥

शांकरभाष्यम् ॥

यद्यप्यात्मविनाशनिमित्तो मोहो न संभवति नित्य आत्मेति विजानतस्तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते सुखवियोगनिमित्तो मोहो दुःखसंयोगादिनिमित्तश्च शोक इत्येतदर्जुनस्य वचनमाशङ्क्याह मात्रास्पर्शा इति मात्रा आभिर्मीयन्ते शब्दादय इति श्रोत्रादीनींद्रियाणि मात्राणां स्पर्शाः शब्दादिभिः संयोगास्ते शीतोष्णसुखदुःखदाः शीतमुष्णं सुखं दुःखं च प्रयच्छन्तीति अथवा स्पृश्यन्त इति स्पर्शा विषयाः शब्दादयः मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः शीतं कदाचित् सुखं कदाचिद्दुःखं तथोष्णमप्यनियतस्वरूपं सुखदुःखे पुनर्नियतरूपे यतो न व्यभिचरतोऽतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणं यस्मात्ते मात्रास्पर्शादयः आगमापायिनः आगमापायशीलाः तस्मादनित्या उत्पत्तिविलयरूपत्वात् अतस्तान् शीतोष्णादींस्तितिक्षस्व प्रसहस्व तेषु हर्षं विषादं वा माकार्षीरित्यर्थः १४ ॥

आनन्दगिरिकृतटीका ॥

आत्मनः कृत्यादिप्रमिते नित्यत्वे तदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेपि प्रकारान्तरेण शोकमोहौ स्यातामित्याशङ्कामनूद्यानन्तरश्लोकमवतारयति यदीत्यादिना शीतोष्णयोस्ताभ्यां सुखदुःखयोश्च प्राप्तिं निमित्तीकृत्य यो मोहादिर्दृश्यते तस्यान्वयव्यतिरेकाभ्यां दृश्यमानत्वमाश्रित्य लौकिकविशेषणमशोच्यानित्यत्र यो विद्याधिकारी सुविरक्तस्तस्य तितिक्षुः समाहितो भूत्वेति श्रुतेः तितिक्षुत्वं विशेषणमिहोपदिश्यते आद्यमेव पदमुपादाय करणव्युत्पत्त्या तस्येन्द्रियविषयत्वं दर्शयति मात्रा इत्यादिना षष्ठीसमासं दर्शयन् भावव्युत्पत्त्या स्पर्शशब्दार्थमाह मात्राणामिति तेषामर्थक्रियामादर्शय

गी॰
टी॰
हि॰

ति ते शीतेति सम्प्रतिशब्दद्वयस्य कर्मव्युत्पत्त्या शब्दादिविषयपरत्वमु
पेत्य समासान्तरं दर्शयन् विषयाणां कार्यं कथयति अथवेति ननु
शीतोष्णप्रहतेः सुखदुःखप्रदत्वस्य सिद्धत्वात् किमिति शीतोष्ण
योः सुखदुःखाभ्यां पृथक्ग्रहणमिति तत्राह शीतमिति विषये
ष्वपि पृथक्कथने तदन्तर्भूतयोरेव तयोः सुखदुःखहेत्वोरानुकू
ल्यप्रातिकूल्ययोरुपलक्षणार्थं अध्यात्मं हि शीतमुष्णं वानुकूल्य
प्रातिकूल्यवासनापायवाद्या विषयाः सुखादि जनयन्ति ननु विषयें
द्रियसंयोगस्यात्मनि सदासत्त्वात्तत्प्रयुक्तशीतादेरपि तथात्वात्तन्नि
मित्तौ हर्षविषादौ तन्निमित्तापत्त्यादित्याशंक्योत्तरार्द्धं व्याचष्टे यस्मा
दित्यादिना अत्र च कौन्तेय भारतेति संबोधनाभ्यामुभयकुलशु
द्धस्यैव विद्याधिकारित्वमिति एतदेव द्योत्यते १४

स्वामिकृतटीका ॥

ननु गतासून् अगतासूंश्च न शोचामि किंतु तद्वियोगादिदुःखभाज
मात्मानमेवेति चेत् तत्राह मात्रास्पर्शा इति मीयन्ते विषया आभिरि
ति मात्रा इंद्रियवृत्तयः तासां स्पर्शा विषयैः संबन्धाः ते शीतोष्णादिप्र
दा भवन्ति ते त्वागमापायित्वादनित्या अस्थिराः अतस्तांस्तितिक्ष
सहस्व यथा जलातपादिसंपर्काः तत्तत्कालकृताः स्वभावतः शीता
दि प्रयच्छन्ति एवमिष्टसंयोगवियोगा अपि सुखदुःखादि प्रयच्छ
न्ति तेषां चास्थिरत्वात्सहनं तव धीरस्योचितं न तु तन्निमित्तहर्ष
विषादादिपारवश्यमित्यर्थः १४ ॥

पिशाचभाष्यटीका ॥

यद्यप्यात्मनाशनिमित्तः शोको न संभवति नित्य आत्मेति जानत
स्तथापि शीतोष्णनिमित्तः शोकः संभवतीत्येतदर्जुनस्य वचनमा
शंक्याह मात्रास्पर्शास्त्विति मीयन्ते आभिः शब्दादय इति मात्राणां मात्रा इंद्रि र्त
स्पर्शाः शब्दादिभिः संयोगाः शीतोष्णसुखदुःखदाः शीतं च उष्णं च शी
तोष्णे ते एव सुखदुःखे ददतीति शीतोष्णसुखदुःखदाः आगमा
पायिनः आगमापायशीलास्तस्मादनित्यास्तान्मात्रास्पर्शांस्तितिक्ष
स्व सहस्व तेषु हर्षविषादौ माकार्षीरित्यर्थः १४ ॥

रामानुजभाष्यम् टी० ॥

शब्दस्पर्शरूपरसगंधाः साश्रयास्तन्मात्रकार्यत्वान्मात्रा इत्युच्यंते
श्रोत्रादिभिस्तेषां स्पर्शाः शीतोष्णमृदुपरुषादिरूपसुखदुःखदा भवं-
ति शीतोष्णशब्दः प्रदर्शनार्थः तान्धैर्येण यावद्युद्धादिशास्त्रीयक-
र्मसमाप्ति तितिक्षस्व ते चागमापायित्वेऽध्रुवं तान्तद्योग्या अनि-
त्यत्वं च अनित्यत्वं च बंधहेतुपापनाशे सति आगमापायित्वेना-
पि न तु नित्यत इत्यर्थः १४ ॥

अभिनवगुप्तकृतटीका

अर्थीयांस्तु मात्राशब्दवाच्यैरर्थैर्ये कृताः स्पर्शा इंद्रियद्वारेणात्मनः संबं-
धाः तत्कृता याः शीतोष्णसुखदुःखावस्था अनित्याः ता पिशाचे-
ति न त्वं धीराः इत्याह मात्रास्पर्शास्तु कौंतेय अथवा मात्राभिरिंद्रि-
यैर्येषां स्पर्शो न तु साक्षात्परम[illegible] ॥ स्मा नाः
आगमवत्त्वान्निरपायो विनाशापत्तयुक्तौ तितिक्षस्व १४ ॥

परमार्थप्रपा टीका ॥

ननु न ताननहं शोचामि किं तु तद्वियोगोद्भूःखभाग्भवामीति चेत्तत्राह
मात्रास्पर्शा इति मीयंते ज्ञायंते विषया आभिरिति मात्रा इंद्रियवृत्तय-
स्तासां स्पर्शा विषयैः सह संबंधास्ते शीतोष्णादिसुखदुःखप्रदा भवंति
ते चागमापायित्वादनित्याः अतस्तांस्तितिक्षस्व सहस्व यतस्त्वं भार-
तः भरतवंशोत्पन्नोसि वीरोसि अतस्तदुक्तं भवति अत्र शोकादिविष-
यास्ते हार्थं भ्रश्यंते अतः सर्वान्कृष्णो विषयोदेहः एवंविधमपि देहं व-
णे वीरास्तृणीकुर्वंति किं पुनः एतद्वियोगजनितं भंगुरं शीतोष्णादि तु-
च्छमित्यर्थः १४ ॥

वनमाली टीका ॥

नन्वात्मनो नित्यत्वाद्देहस्य नश्वरत्वाच्च भयं शोकस्यानं यद्यपि तथापि प्रि-
यास्पदानां स्वजनानामदर्शनस्पर्शनालापादिकं सुखहेतुस्तेनश्चत्तेषु म-
महसुखहानिः तेषां स्वस्यातितीव्रशस्त्रच्छेदभेदादिदर्शनादत्यंतदुः-
खं स्यादतः कथं न शोच्यमत आह मात्रेति मीयंते ज्ञायंते इति मात्राः
शब्दस्पर्शाद्याः विषयास्तेषां स्पर्शाः श्रोत्रादिभिः सह संबंधः शीतोष्णश-
ब्दौ सर्वविषयोपलक्षकौ ततोपि विषयसामान्योपलक्षकौ विष-

गी॰ टी॰ हि॰

याः सुखानुभवद्वारा सुखदुःखदा इत्यर्थः शब्दादीनां श्रोत्रादिभिः सह
सन्निकर्षास्ततस्तद्विषयसाक्षात्कारास्तत्रेष्टविषयज्ञानात्सुख
मनिष्टविषयज्ञानाद्दुःखं भवति तान्धैर्येण यावच्छास्त्रीययज्ञादि
कर्मसमाप्तिस्तावत्तितिक्षस्व तेषामागमापायित्वादनित्वाद्धैर्यवतां ह
तेयोग्याः बंधहेतवविद्यानिवृत्तौ देहादावहंममेत्यभिमाननिवृत्तौ
चांतःकरणे सुखदुःखयोरुत्पन्नावपि जीवन्मुक्तानामागमापायि
नामपि दुःखादीनामिवाशाङ्कस्य खानुभवाभावात्तेषामनित्यत्वं यावत्
स्वाभाविकसंबंधशून्यत्वं देहादावहमित्यभिमानं विहाय दुःखाद्य
धिकरणे मन एवेति विभावयन् ज्ञानानंदस्वरूपं चात्मानं संचिंतय
न् यावत्स्वधर्मानुष्ठाने शीतादिप्रयुक्तं दुःखादिकमवश्यं सोढव्य
मिति भावः १४ ॥

अथ मवैजयन्तीटीका

नन्वात्मनामनादिकर्मवशात्कौमाराद्यवस्थावद्देहान्तरस्य प्राप्ति
र्यो भवद्भिरुक्ता तस्याः केनोपायेन निवृत्तिः स्यादपि च धीरस्तत्र न मु
ह्यतीति यदुक्तः सोपि धीरस्य मोहः कथं रीत्या न भवेदित्याशंकायां तत्त्व
वैतितितत्त्वयैव भवतीति वक्तुंगतां हृनइत्यस्यार्थं दर्शयन्नचेतन
कार्याणां स्वभावमाह मात्रास्पर्शा इति मात्राः शब्दादिपंचविषया
स्तन्मात्रकार्यत्वात् ज्ञानेंद्रियैर्मीयन्त इति वा मात्राशब्देनोच्यते
तेषां स्पर्शाः स्वस्वकर्णैः श्रोत्रादिभिः सह संयोगाः शीतोष्णसुखदुः
खदाः शीतोष्णशब्दोपलक्षिताः सुखरूपकरूपस्पर्शगंधदुर्गं
धसुस्पर्शदुःस्पर्शमधुरतिक्तादिनिमित्तभूतास्तैः सुखंदुःखं च दद
तीति ते तथा आगमापायिनः जन्मनाशभवनस्वभावाः अनित्याः चि
रकालस्थित्यनर्हाः तान्तितिक्षस्व सहस्व तु शब्देनायमर्थो ज्ञाप्यते
एते सुखदुःखदाः अपि यावद्भोगकालं तावदन्येरुपायैर्नसामर्थ्यातिप
स्यादचिरस्थायित्वात्स्वयमेव समिष्यन्तीति मत्वा यथाधीरस्तान्सह
ते तथा त्वमप्येवं विचार्य सहस्व अस्य द्वितीयोप्यर्थोस्ति तथाहि
मात्राः पंचभूतात्मकदेहास्तन्मात्रकार्यत्वान्मात्राशब्देनाभिधेयास्ते
षां स्पर्शाः मिथः पितामहादिरूपसंबन्धाः शीतोष्णसुखदुःखदाः
अत्र शीतोष्णशब्दौ चंद्रसूर्यपर्यायमैत्र्यमित्रादिभेदविवक्षयायथा चं

दुःखं च यथा च सूर्यः स्वोष्णकरेण शीतार्तानां सुखं

दुःखं शीतलकरेण तेषां ग्रीष्मार्तानां सुखं शीतार्तानां दुःखं मातपार्तानां
सुखमातपार्तानां दुःखं ददाति तथा तेपि पुत्रमित्रकलत्रादि
देहसंयोगेन सुखं तद्वियोगेन दुःखं शत्रुव्यालव्याघ्रादिवियोगे
न सुखं तत्संयोगेन दुःखं च ददतीत्यर्थः आगमापायिनः गता
गतस्वभावाः अतो नित्याः सदैकरसस्थितिरहिताः तान् तितिक्षस्व
पितृस्वसुर्ये पितामहाद्या ये गुरवो ये भ्रातरः यानिमान् हत्वा न जिजी
विषाम इत्यादिरूपाः स्नेहमोहप्रयुक्तास्तेषु स्वकीयत्वबुद्धिस्त्यक्ता
स्ववर्णोचितं जयपराजयादिफलानुसंधानरहितमेतस्माथ
न भूतं युद्धं निश्चित्य संयोगवियोगाभ्यां हर्षशोकप्रदस्वभावान्
नानुपेक्षस्वेत्याशयः यतस्त्वमसि तत्परस्तपस्विन्याः कुन्त्याः
पुत्रोसि तत्रापि सत्यवादिन्याः सकेतलायाः पुत्रस्य महाप्रताप
पितो राजर्षेर्भरतस्य वंशे जातोसि अतस्त्वैतदुपेक्षायां नाति
प्रयासः इति कौन्तेय भारतयोः संबोधनयोरभिप्रायः १४ ॥

नन्वात्मनो विभुत्वे नित्यत्वे मधुसूदनी टीका ॥ व

मीयंते आभिर्विषया इति मात्रा इंद्रियाणि तासां स्पर्शा विषयैः संबं
धाः तत्तद्विषयाकारांतःकरणपरिणामा वा ते आगमापायिनः उत्प
त्तिविनाशवंतोंतःकरणस्यैव शीतोष्णादिद्वारा सुखदुःखदाः न त
नित्यस्य विभोरात्मनः तस्य निर्गुणत्वान्निर्विकारत्वाच्च न हि नित्यस्य
नित्यधर्माश्रयत्वं संभवति धर्मधर्मिणोरभेदात् संबंधांतरानुपप
त्तेः साहपस्य मात्रे धर्मत्वानुपपत्तेश्च तदुक्तं न तस्या हि क्रियाद्रः
वीसा स्यान्नाका अविकारिणः धीविक्रियासहस्राणां साक्ष्यतोहमवि
क्रिय इति तथा च सुखदुःखाद्याश्रयीभूतांतःकरणभेदादेव सर्वं
व्यवस्थोपपत्तेर्न निर्विकारस्य सर्वभासकस्यात्मनो भेदे मानम
स्ति सद्रूपेण स्फुरणरूपेण च सर्वत्रानुगमात् अंतःकरणस्य ता
वत्सुखदुःखादीजनकत्वमुभयवादिसिद्धं तत्र समवायिकार
णत्वस्यैवाभ्यर्हितत्वात्तदेव कल्पयितुमुचितं न तु समवायिका
रणांतरानुपस्थितौ निमित्तत्वमात्रं तथा च कामः संकल्प इत्या
दिश्रुतिर्निबाधनारंतस्सर्वं मनएवेति कामादिसर्वविकारोपादा

^न विवदामः प्रतिदेह
मेकत्वं न तु सहामहे तथाहि
शुद्धिसुखदुःखे ब्राह्मेषु धर्म
त धर्माधर्म भावनाख्य नव
वि शेषगुणवंतः प्रति
देह का^ भिन्ना एव नित्या
विभवश्चात्मान इति वैशेषि
कामन्यंते इममेवं पक्षं ता
र्किक मीमांसकादयोपि प्र
तिपन्नाः सांख्यास्तु विशति
पद्यमानाश्चयात्मनो गुण
वत्वे प्रतिदेहभेदेन विप्रति
पद्यंते अन्यथा सुखदुःखा
दिसंकरप्रसंगात् तथा च
भीष्मादिभिन्नस्य मम नित्यत्वे
विभुत्वेपि सुखदुःखादियो
गित्वाद् भीष्मादिबंधुदेहवि
च्छेदे सुखवियोगे दुःखं
संयोगश्च स्यादिति कथं
शोकमोहो नानुचिंता
विम र्नेनाभिप्रायं आशं
क्यालिंगशरीरविवेकायाह ^

२४ पं: अन्तःकरणस्यागमापायित्वाद्दृश्यत्वाच्च नित्य
दृग्रूपात्ततो भिन्नस्य सुखादिजनकाये मात्रास्प
र्शास्तेप्यनित्याः

गी. ननु ममभेदनिर्देशादात्मनस्तदाह आत्मनस्तु स्वप्रकाशज्ञानानंदरू
टी. पत्वस्य श्रुतिभिर्बोधनात्तत्कामाद्याश्रयत्वं अतो वैशेषिकादयो
द्वि. भ्रांता एवात्मनो विकारित्वं भेदं चांगीकृतवंत इत्याह अनियतरूपाः
एकदा सुखजनकस्यैव शीतोष्णादेरन्यदा दुःखजनकत्वदर्श
१ नात् एवं कदाचिद्दुःखजनकस्याप्यन्यदा सुखजनकत्वद
र्शनात् शीतोष्णग्रहणमाध्यात्मिकाधिभौतिकाधिदैविकसु
खदुःखोपलक्षणार्थं शीतमुष्णं च कदाचित्सुखं कदाचिद्दुःखं
शी^ सुखदुःखे तु कदापि न विपर्येते इति पृथङ्निर्देशः तथा चात्म
नास्थिरात् तद्भिन्नस्याविकारिणः सुखदुःखादिप्रदान् भीष्मा अंतःकरण
दिसंयोगवियोगरूपान् मात्रास्पर्शांस्तितिक्षस्व नैते मम
किंचित्करा इति विवेकेनोपेक्षस्व दुःखितादात्म्याध्यासेनात्
मानं दुःखिनमाज्ञासीरित्यर्थः कौंतेय भारतेति संबोधनद्वयेनो
भयकुलविशुद्धस्य तवाज्ञानमनुचितमिति सूचयति ननु अंतः अनर्थोकार्थं
करणस्य सुखदुःखाद्याश्रयत्वे तस्यैव कर्तृत्वेन भोक्तृत्वेन च
चेतनत्वमभ्युपेयं तथा च तद्व्यतिरिक्ते तद्भासके भोक्तरि माना
भावान्नाममात्रे विवादः स्यात् तदभ्युपगमे च बंधमोक्षयोर्वैय
धिकरण्यापत्तिः अंतःकरणस्य सुखदुःखाद्याश्रयत्वेन बद्धत्वा
त् आत्मनश्च तद्व्यतिरिक्तस्य मुक्तत्वादित्याशंकामर्जुनस्याप
नेतुमाह भगवान् १४ ॥

सदानंदी टी० ॥

नन्वात्मनो न नित्यत्वे विभुत्वे वा विकल्पना एकत्वं तु कथं सिद्धे
जीवत्वाद्वैतवादिषु १ वैशेषिकादयः सर्वे तार्किकाः कापिला
तथा देहभेदेन भिन्नत्वमात्मनस्तु प्रपेदिरे २ अन्यथा सुखदुः
खादिसंकरः सर्वदेहिनां एवं भीष्मादिभिन्नस्यानित्यमेममस्त्व
पि ३ सुखदुःखादियोगित्वात्तत्संयोगवियोगजौ शोकमोहौ क
थं न स्तामित्याशंक्याह मापत्तिः ४ मीयंते विषया आभिर्मात्राः
सर्वेंद्रियाणि ताः तासां स्पर्शास्तु विषयैः संबंधाः क्षणभंगुराः
५ परिणामाधियः सर्वे तत्तदाकारहेतवः बुद्धेरध्यं तवंतस्तु

खेदुःखप्रदाःसुखाः ५ शीतोष्णादिष्ववैनैतेनत्वनित्यस्यदेहिनः
कौटस्थ्यान्निर्गुणत्वाच्चसाक्षिणःसुखःकथंत्विमे ६ नित्यस्यानि
त्यधर्माणामाश्रयत्वंनसंभवेत् साक्ष्यस्यसाक्षिधर्मत्वान्नुपपत्ते
श्चसर्वथा ७ नवैस्याद्विक्रियादुःखीसाक्षिताकाविकारिणः ८
धीविक्रियासहस्राणांसाक्ष्यतोहमविक्रियः ९ इत्थंकवार्ति
केतस्मात्साक्षिणोनैवविक्रियाः अंतःकरणधर्मास्तेसुखदुः
खादयोखिलाः नात्मनोनिर्विकारस्यतेनभेदविकल्पना १०
कस्मिन्नद्वितीयेस्मिन्भेदोनास्तिमनागपि ११ वैशेषिकादयो
ध्यात्मामन्यंतेविक्रियाभिदां आद्यंतवत्वाद्दृश्यत्वात्सुखाद्याःक्ष
णभंगुराः १२ परिणामाधियःसर्वेभिन्नायाःसाक्षिणोदृशः
वैलक्षण्यमतःसिद्धमात्मनोलिंगदेहतः १३ सर्वसुखादिवैचि
त्र्यंलिंगधर्मोनचात्मनः प्रतिदेहमसोबुद्धिर्भिन्नादुःखादिधर्मि
णी १४ तत्रकूटस्थआत्मैकोभात्यवत्प्रतिबिंबतः प्रमातृत्वंगतो
नानारूपेणप्रतिभासितः १५ पात्रस्थसलिलेष्वर्कोयथैवप्रति
बिंबितः स्वच्छेषुस्वच्छवद्भातिमलिनेषुतथाविलः १६ चलेषु
चलवद्भातिस्थिरेष्वस्थिरवत्तथा चंचलत्वादयोधर्माःसूर्येसं
तिनतावता १७ तथासुखादयोबुद्धेर्नानात्वात्स्फुरनेकधा
आत्मनोनैवतेसंतिसूर्यस्येवाविकारिणः १८ एतेनस्वर्गनर
कौबंधमोक्षौभवाभवौ व्याख्यातौमातृनिष्ठत्वान्मातृणांबुद्धि
भेदतः १९ भिन्नत्वान्नैवतेनात्मालिप्यतेव्योमसूर्यवत् एक
स्मिन्नपिदेहेस्मिन्मातुर्दुःखसुखेयथा २० पादाद्यंगेषुभिन्ने
षुभिन्नेनहस्तजगत्स्वच पादेमेसुखमत्रघवेदनाशिरसीति
च २१ अनुभूतिस्तथानासौभिद्यतेजीवएककः तथात्मास्य
कएवासौसर्वदेहेषुभासकः २२ उपाधेरेवभिन्नत्वान्नभेदःप्र
त्यगात्मनि श्रुतिसिद्धात्मनोभेदमाननमन्यत्रदृश्यते २३ ये
नभेदप्रसिद्धिःस्यात्तस्माद्भेदोनवास्तवः प्रत्यक्षादेःप्रमाण
स्याविषयत्वेनचात्मनः २४ तद्भेदस्यकथंयुक्तमानस्यगोचरता

गी॰ भवेत् प्रतियोग्यात्मविज्ञानाधीनज्ञानाभिदायतः २५ अ
टी॰ त आत्मैक एवास्तीति सिद्धमित्युपपत्तिभिः शीतोष्णसुखैर्देहि
द्वि॰ नः कदाचिद्दुःखकारणं २६ एवमुक्ते मतो भिन्नतयास्वीकारए
तयोः अनात्मताश्रित्यात्वतो भिन्नस्यैव विकारिणः २७ धर्मा ह्य
नस्य दुःखादिदायिनः क्षणभंगुरान् मात्रास्पर्शांस्तितिक्षस्व
नैते किंचित्करा मम २८ एवं तांस्त्वमुपेक्षस्व विवेकेन चिदा
त्मनः देहाद्यध्यासतो मा त्वं जानीहि स्वं सदुःखिनं २९ कुल
हृयविशुद्धस्य तत्त्वाज्ञानेन शोचितं कौंतेय भारतेत्येवं संबो
धनयुगद्ध्वनिः ३० ॥ १४ ॥

नीलकंठी टीका ॥

नन्वात्मनो लिंगशरीरादन्यत्वेऽपि अहं दुःखीत्याद्यनुभवाद्दुःखा
दिधर्माश्रयत्वं दुर्वारं ततश्च भीष्मादिबंधुवर्गनाशे सति दुःखसं
बंधो भवत्येवेत्याशंक्याह मात्रास्पर्शा इति मीयंते विषया आभि
रिति मात्रा इंद्रियवृत्तयः यद्वा दश प्रज्ञामात्राः वागादयः दश भू
तमात्राः नामादयः कौषीतकिप्रसिद्धा इंद्रियविषयरूपास्ताः
तासां स्पर्शाः परस्परं विषयविषयिभावेन संबंधा इति व्याख्येयं
यद्वा मात्रा प्रमात्रा सह स्पर्शाः विषयेंद्रियसंबंधाः स्पर्शशब्दस्य
तद्वाचित्वं स्पर्शान्कृत्वा बहिर्बाह्यानित्यत्र दृष्टं तत्र स्पर्शपदेन त
द्वतोः विषयेंद्रिययोरपि लाभः तेन प्रमातृप्रमाणद्वारा प्रमेयेण
सह संबंधाः सर्वे शीतोष्णादिवदागमापायिनः उत्पत्तिविनाश
शीलाः अत एवानित्याश्च तद्वदेव सुखदुःखदाश्च अतस्तान् तिति
क्षस्व सहस्व हे कौंतेय भारतेत्युत्तमवंशप्रधीरत्वमस्य सूचयति
प्रमातृत्वादिरनर्थो हि सुषुप्तिसमाधिग्रहावेशादिष्वभावादागं
तुकमादौ भावाच्च कदाचित्कतया आत्मनि प्रतीयमानोऽपि रज्जुर
गादिवन्मिथ्याभूतः सन्न तद्धर्मत्वं भजते यद्धि यत्राभेदेन कदा
चिद्भाति कदाचिन्न तत्तत्राध्यस्तं रज्ज्वामिव सर्पः प्रमात्रादिश्च प्र
तीचि प्रत्यगभेदेन कदाचिद्भाति अतो मिथ्येति निश्चिते तेन प्र

तीतिप्रमातृसंबंधएवनास्ति सत्यमिथ्यावस्तुनोर्वास्तवसंबं-
धायोगात् प्रमातृधर्माणांदुःखादीनांतुप्रतीतिसंबंधोध्यारोपएव
व कथंतर्ह्यात्मनिदुःखित्वप्रत्ययः तत्तदुपाधितादात्म्याध्यासादि-
तिब्रूमः अतएवजाग्रतिदृष्टंदुःखंस्वप्नेनानुवर्तते स्वप्नदृष्टंवा
जाग्रतिनदृश्यते तथाचश्रुतिः सयत्तत्रपश्यतिपुण्यंचपापंचा
नन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइति कामःसंकल्पोविचि-
कित्सेत्यादिश्रुतिरेवतत्सर्वंमनएवेतिप्रभेदनिर्देशात्कामादिसर्व
विकारोपादानत्वंमनसएवाह तस्मात्स्वप्नइवात्मनिदुःखित्व
प्रतीतिर्भ्रांतिरेवेतिइष्टवियोगजनितांतांतितिक्षस्वेतिभावः १४॥

आनंदी टीका

मीयन्तेआभिर्विषयाइतिमात्राइंद्रियवृत्तयःतासांस्पर्शाःदेहसम-
वायेनविषयैःसंयोगाःशीतोष्णसुखदुःखदादेहिनःशीतत्वेनसु-
खदाःउष्णत्वेनदुःखदाःसन्तः आगच्छन्त्यपयान्तिचेत्यागमापायि-
नःनियमहीनाअनित्याःसन्ति नियमाभावोह्येषाम् एकदासुखज-
नकस्यैवशीतादेरन्यदादुःखदायित्वात् शीतोष्णग्रहणमत्रोपल-
क्षणं तेनयत्किंचिदाध्यात्मिकंसुखंदुःखंचेतिज्ञेयं अतएवानित्यता
न्निवारयितुंशक्याइत्याह तांस्तितिक्षस्व अज्ञानात्कृपयोत्पन्नमपि
दुःखंतावत्सहस्वेत्यर्थः १४ ॥

तदनेनमात्रैकीकृतदेहदेहिव्यतिरेको **रामकंदी टीका** पपत्तिप्रतिपादनद्वारेणपारमार्थिकमात्माद्वैतमुपक्रम्येदानीं यथा प्रतिपादितमात्मस्वरूपंयेनद्वै तेनासर्वज्ञेनबोद्धुंशंति अन्य थैवतंप्रतिपद्यन्ते तत्प्रतिपाद नद्वैतंतत्प्रतिषेधोपायमुपदे शमाह +

+मीयन्तएताभिरितिकृत्वादेहत्वविशिष्टस्यप्रमातुःप्रमेयार्थपरिच्छे-
दसाधनेमात्राइंद्रियशक्तयःउच्यन्ते स्पृश्यन्तेवेद्यन्तयापरामृश्यन्त
इतिस्पर्शाइंद्रियार्थास्तेद्विप्रकाराःश्रोत्रादिबाह्येंद्रियस्पृश्यमानाः
शब्दादिरूपाःकेवलान्तःकरणस्पृश्यमानाःसुखादिरूपाःतत्रदेह-
व्यतिरेकेपरमार्थतोनित्यस्यात्मनोमात्रास्पर्शाःपुनःशीतोष्णसुख
दुःखदाइतिसंबन्धः तेच शरीरेणसम्बध्यमानाःशीतमनुभवा
म्युष्णमनुभवामीतिप्रत्ययंददति अन्तःकरणेनसंबध्यमानाःसु
खमनुभवामिदुःखमनुभवामीतिप्रत्ययंददति ततश्चशीतोष्णसु
खदुःखादिधात्मधर्मत्वमारोपयन्तः उत्पादविनाशस्वभावत्वाद
नित्याआत्मन्यनित्यताभ्रममुत्पादयंतःसर्वप्राणिसंमोहयन्तीत्य

पृ॰

गी॰ र्थः यतस्त्वेते परमार्थतः प्रतिक्षणविनाशिनः ततः शोकादिनोपप
टी॰ त्यानित्यमात्मानं प्रत्ययमयं संतानीति निश्चित्य सहस्व ततस्तमपि तेना
द्वि॰ नित्यत्वलोहादिस्पर्शमात्रेणानित्यनिर्विकारस्यात्मावष्टंभप्रतिष्ठा
मात्मानः यथा त्रैलोक्यैकवीरेण त्वया दुर्वारदर्पोद्धुरमापततः
प्रतिद्वंद्विनो निष्कंपनिजपौरुषपरिस्पंदस्थास्थितेन मनागप्य
प्यनवरूपजातविक्रियेण सकलमावल्गच्छूढभरतया सोढा
93 का॰ स्तथैव निसर्गनिर्विशेषस्वात्मन्यहंकारमारोप्यतेपि स्पर्शाख्याः
प्रतिद्वंद्विनः प्रकृतिनिःसारतत्त्वरूपनिरूपणमात्रेण सह्यंतां
यथास्थितवस्तुविमर्शाभावमात्रजनितो यश्चामोहो यदात्मनि
देहबुद्ध्यादिधर्मारोपणकृशोहं पूर्णोहं स्थविरोहं दुःखितोहमि
स्था॰ त्यादयः प्रत्ययास्सामानाधिकरण्येन प्रादुर्भवन्ति तत्त्वतः पुन
स्तस्यात्मैक्येनावस्थितो बहिरन्तःकरणशक्तिभिः केवलं स्पृश्य
ते न तु तावता कांचिदप्यात्मनो विकारकणिकां संपादयितुं
क्षमाः स्फटिकदर्पणोपमाद्वयमात्मा नीलपीताद्याभासकल्पा
भिः स्फुरन्तीभिरपि निकटस्थावादिप्रतीतिभिर्नान्यथाकर्तुं शक्य
ते यथोक्तम् ग्रासक्तिसामर्थ्यवशाद्धि विश्वाः पदार्थजातस्य वि
भान्ति भासः अपयन्ते न तु तज्जातु धीमान्विकारमादर्श इव प्रस
न्नः अत एव मात्रास्पर्शा इह नैन्द्रियार्थव्यपदेशः कृतः तदनेन
श्लोकेन सर्वसंवेद्यभेदस्वभावकामारजागराद्यवस्थावत्त्वा
द्यवस्थास्वपि सर्वप्राणिगतासु स्वसंवेदकत्वेनैवैकेन स्वभावेन
युक्तो नित्यो व्यापक एवात्मा प्रतिपादितः न चैतावतैकस्याहं
खित्वादौ सति सर्वस्य खत्वादिप्रसंगः यतो मायाकल्पितान्या
न्यभेदाभासा एव प्रमातारः सन्ततेपरस्परविभक्तमात्मानमव
गच्छंति न तु पारमार्थिकः परः प्रमाता न चापि एकस्मिन्सर्व
मसर्वथा निर्विशेषस्वभावसर्वमिदं प्रतिबद्धं यथोक्तं तेषाप
येप्रज्ञास्तत्त्वमिति उपक्रमप्यास्मि विप्रतितेनेतीह कैसंख्यावति
इति सदसद्रूपिणे विश्वविश्वागोविश्वकर्मणीति तदेव स्वभा॰

पिकानामा[illegible]परोक्षसंभवात् निःसामान्यनिर्विशेषस्यब
ह्मणः सामान्यतो ज्ञातत्वेसत्यज्ञातविशेषवत्वरूपाधिष्ठानत्वा
संभवे नविश्वस्यारोपितत्वासंभवात् नहि निरधिष्ठानकोभ्र
मः सजातीयादिभेदाभावस्येवभिन्नत्वेन भेदमात्रनिषेधासंभ
वात् अद्वितीयपदेन द्वितीयमात्रनिषेधसंभवे शेषवैयर्थ्याच्च
विशेषणतयोपलक्षणतया वा द्वितीयाभावबोधितेनैवाद्वैत
हानिः [illegible] बोधने
स्वतन्त्राद्वैतस्य सत्यत्वं भेदघटितनवदृष्टान्तानुसारात् स आत्मा
तत्त्वमसीत्यत्र तत्त्वमितिपदच्छेदेन जीवस्येश्वरभिन्नत्वं सदृष्टा
न्तं मन्त्रार्थस्य बोध्यते किंच स्वभिन्नमभेदादिकं तत्त्वमित्यनेन बो
ध्यते नवा आद्ये तेनैवाद्वैतहानेः द्वितीयस्वरूपस्याज्ञानाद्यधि
ष्ठानतयापातान्त्ये वाक्येन च सिद्ध्येत् त्वदभिमतमहावाक्यस्य
वैयर्थ्यापत्तेः एके शुद्धो न्यकेवला इत्यत्रसारात् एकपदेन
ब्रह्मणोद्वित्वं [illegible] अद्वितीयपदेन समाभ्यधिकशून्यत्वं
पूर्वकारेण श्रावेः पांडुपवेत्यादिवृत्त्याव्यत्वादेर्ब्रह्मणएवयोगव २०
च्छेदो बोध्यते वाचारंभणशब्दस्यमृद्घटात्वेयोगरूपेरभावा
त् वाचारंभणं वाक्करणं निर्वर्तितं वागिंद्रियारब्धभाषाशब्दो
विकारोदेशादिभेदेन विकृतः मृत्तिकेति संस्कृतं सत्यमेक
रूपं यथा भाषाशब्दा यावानव्यवहारस्तन्नदधिकं च संस्कृता
द्भवति तथादेवतोनवज्ञानाद्यफलं तन्नधिकं च ब्रह्मज्ञाना २०
द्भवतीत्यत्र वाचारंभणमित्यादि दृष्टान्तः सत्त्वरूपब्रह्मकार्ये
कत्वेन तदाधारकत्वेन च समनुकूलकत्वादिकं प्रजानां न च ला
घवादेकमेव सत्त्वं स्वीकार्येन देवाधिष्ठानगते घटः सन्नित्या
दौ घटादिनिष्ठतया भाति अनिदमिहरूपेण इदंरूपमित्यत्र शु
क्तिनिष्ठेदन्तावदिति वाच्यं मद्भेत्यत्राप्यधिष्ठानसत्त्वस्यैव
भानात्प्राग्ब्रह्मणोऽसत्त्वापत्तेः सत्त्वत्रैविध्यस्य च याप्यंगीका

सत्त्वलाघवेन सत्त्वापलापेऽतिलाघवे सत्त्वस्य सत्त्वमपि न स्वी॰
कार्यं स्यादिति लघुवाक्यं च सत्त्वे विनापि सत्त्वं रूपत्वं स्यादिति कस॰
त्वेनाप्युपपत्तौ अनतिप्रसङ्गो बटः इत्यपि क्रियात्वादिवत्सत्त्वं यत्र वृत्ति
सत्त्वमपि न विष्टमेव न च यदि कालावच्छिन्नत्वादिरूपकालसंबं
धित्वात्सर्वरूपमस्तीति प्रतीतिकेऽपि कालसंबंधोऽस्तीति वाच्यं
कालसंबंधित्वेन प्रतीतिर्वह्नि न कालसंबंधोऽपि क्रियाद्यापत्तेः
अप्रमेयत्वेऽप्रमेयमिति वत्तस्य स्वस्मिन्नपि सत्त्वाच्च १६ ॥

अथ प्रमेयवैजयन्तीटीका ॥

ननु मात्रास्पर्शानामनित्यत्वे सति प्रकृतिकार्यत्वाविशेषादन्ये
षामपि कार्याणामनित्यत्वापत्त्या सत्त्वमपि स्यात्तथा च
तक्षकसर्पविषमर्दितं तक्षकस्य निर्विषकरणे यथा तक्ष॰
रूपदेहवदस्यात्मनस्तन्नाशकत्वेऽथ च गमनागमविदरूगन्धा
वामयेइवतद्दुराज्यादिभोगप्राप्तये न कोऽप्यनुत्मनतो गुरु॰
गोत्रादिवधरूपपापं करोमीत्येवमर्जुनाभिप्रायं ज्ञात्वा त
स्मात्तर्कयुक्तिर्नेन्दनो द्वितीयो भगवान्स्वप्रकृतिकार्याणां दे
हादीनामतुच्छत्ववाच्यत्राह नेति असतः तुच्छस्य रज्जुसर्पा
देः भावः सत्यता न विद्यते न संभवति यथा यतोऽस्यावस्तु
त्वेन सत्त्वधर्मानधिकरणत्वात्प्रमाणाभावाच्च सतः सतः
देहादिकार्यस्य अभावः असत्यता न विद्यते न संभवति यतो
ऽस्य वस्तुत्वधर्माश्रयत्वेनावस्तुत्वधर्माश्रयत्वासम्भवात्
अप्रमाणाच्च असत्यसत्त्वेनाति सर्वं न विद्यते इत्यर्थः ननु
यथा त्वं वदसि तथान्योऽपि कोऽपि ज्ञानं प्रमवेन्नपेक्षायामा
ह उभयोरिति उभयोरसत्तुच्छयोः सन्नयोर्भावाभावयोः
अन्तः निर्णयः दृष्टः निश्चितः कैरित्यपेक्षायामाह उभयो
स्तत्त्वदर्शिभिर्यथार्थस्वरूपविद्भिः कुमारव्यासादिभिः

अपिशब्द स्वार्थकत्वेन शास्त्राणि संदृश्यन्ते तच्छब्दावधारणा
र्थकत्वेनान्ययोगव्यवच्छिद्यते तथा चायमर्थः तत्वद
र्शिभिरेव सच्छास्त्रेष्वेव निश्चितः तत्त्वयथार्थविद्भिः सच्छा
स्त्रैः कृतर्कपरैश्चेति शास्त्राणि च यदिदं किंचित्तत्सत्यमि
त्याचक्षते सदेव सोम्येदमग्र आसीत् सत्यस्य सत्यं प्राणा वै स
त्यं प्रथेनमाहुः सत्यकर्मेति सत्यं ह्येवेदं सृजते अनाद्यन
न्तं जगदेतदीदृक्प्रवर्त्तते नात्र विचारमस्ति ऊर्ध्वमूला
वाक्शाखपत्रोऽश्वत्थः सनातन इत्यादिश्रौतानि ऊर्ध्वमूल
मधः शाखमश्वत्थं प्राहुरव्ययमिति स्वयमेववक्ष्यते व्य
तिरेके निन्दाश्रवणाच्च तथा हि असत्यमाहुर्जगदेतद
ज्ञाः शक्तिं हरेर्ये न विदुः परां हि यः सत्यरूपं जगदेतदी
दृक्सृष्टवांस्सत्यकर्मा महात्मा इत्यादिश्रौतानि असत
त्यमप्रतिष्ठं ते जगदाहुरनीश्वरमित्यादिवक्ष्यमाणानि
च तथानुमानान्यपि इदं सत् सत्यप्रतिपादकश्रुतिगम्य
त्वात् ब्रह्मवत् इदं सत्यं सत्यशक्तेः कार्यत्वात् यद्येवं त
त्रैवं वृष्णिगोयवत् इदं सत्यं सत्यपरिणामित्वात् क्षीर
वदित्यादीनि श्रुतिस्मृतिरूपाण्यनुमानानि जगतः सत्यत्वं
प्रतिपादयन्ति नन्वसद्वा इदमग्र आसीदित्यादिनासत्वस्या
पि श्रवणात्कथं कार्यस्य सत्यतेति चेन्न अस्य वाक्यस्यावि
कारित्वरूपासत्वपरत्वात्तत्कारणावस्थाप्रतिपादनपरत्वा ति
द्वा तथा हि विकारिसत्ताक[illegible]स्येदंकारास्पदस्य जगतः
कारणावस्थायां अनभिव्यक्तनामरूपकत्वादसदादिश
ब्दवाच्यत्वाभिधानमविरुद्धं कार्य्यावस्थायां तु अभिव्य
क्तनामरूपकत्वादाविर्भूतविस्तारकं सदादिशब्दवाच्य
तां भजते इत्यविरोधः कृत्यर्थः अन्यथा कथमसतः सज्जा
येतेति वाक्यशेषविरोधात् तथा चाह भगवान् पराशरः

गी. तदेतदनंतं नित्यं जगत्तु निवृत्ताविलं आविर्भावतिरोभावज
टी. न्मनाशविकल्पवदिति विष्णुपुराणे तथैवर्षिणाप्युक्तं न्य
द्वि. ग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः संयमे विश्वमखि
लं बीजभूते तथा त्वयि बीजादंकुरसंभूतो न्यग्रोधः समुपस्थितः
विस्तारं च यथा याति त्वत्तः सृष्टौ तथा जगदिति तथा भगवान्
95 सूत्रकारोप्याह पटवच्च यथा संवेष्टितः पटः पटत्वेनागृह्यमा
णोपि पट एव प्रसारणेन तु स्पष्टतया गृह्यते एवं तथा तिरोभाव
दशमव्यक्तमपि जगत्कार्यत्वेन नामरूपाभ्यामगृह्यमाणम
पि सदेव आविर्भूतं तु प्रत्यक्षागमाभ्यां सत्वेन स्पष्टं गृह्यते इति
सूत्रार्थः ननु मायाकार्याणां देहादीनां सत्यत्वे सति केषाम
प्यात्मनां बंधनिवृत्तिर्न स्यादिति चेन्न सत्यस्यैव यनवस्त्रादेर्दा
हनादिना सत्यस्यैव मलपंकादेः प्रक्षालनादिना निवृत्तिदर्श
नात् भूयश्चांते विश्वमायानिवृत्तिरिति श्रुतेः मायामेतां त
रंति ते इति वक्ष्यमाणप्रमाणाच्च यथा प्रसन्ने राज्ञि तदपराधि
नः तस्करादेर्निगडादिना बन्धो जायते पुनस्तस्मिन्प्रसन्ने सति
तन्निवृत्तिः स्यान्न तु तत्स्वरूपनाशः तथा सर्वेश्वरे मय्यप्रसन्ने
मद्विमुखानां तेषामज्ञानां मायया बन्धो भवति पुनर्मयि प्रसन्ने
मदनुग्रहेणैव तेषां मायानिवृत्तिः स्यान्न स्वरूपनाशः तए श्रं
ववस्तुनो बन्धकत्वमोचकत्वादिकं संभवति नाशतो वन्ध्या
पुत्रादेरवस्तुत्वात् तस्मात्सत्यशक्तेर्मम शक्तिकार्यत्वादस्य
सत्यत्वं मत्वा धैर्येण मात्रास्पर्शान् संसह्य मत्प्रसन्नायै मदाज्ञये हु
वैतान् हत्वा राज्यं भुंक्ष्वानेन त्वं मय्यमत्तत्वं प्राप्स्य वा किं त्वरा स्य
ज्येन गोविंद किं भोगैर्जीवितेन वा अपि त्रैलोक्यराज्यस्य हेतोः
किं नु महीकृते श्रेयो भोक्तुं भैक्ष्यमपीह लोके इत्याद्युक्तरू
पेण वैराग्येण पूर्वमेव राज्यभोगादिषु विरक्तस्य तवाप्येतत
न कार्याणां मात्रास्पर्शानामागमापायित्वमनित्यत्वं च मनःकृत
गमा

५४ मीयन्ते विषया आभिरिति मात्रा इंद्रियवृत्तयस्ताभिः स्पर्शा विषयैः सह संबन्धाः ते शीतोष्णादिप्रदा अन्योन्यविरोधि बाह्याभ्यंतरभोगप्रदाः पुरुषस्य भवन्ति स्पर्श ग्रहणेन नात्मा एतैः स्पृश्यते नतु नित्ययोगतया मलिनी क्रियते इति सूच्यते ते तु त्यक्ति विनाशवत्त्वादनित्याः अस्थिराः अतएवोदितदशामाश्रित्य तास्तितिक्षस्व सहस्व त्वाम्मावष्टंभ प्रतिष्ठां मा त्याक्षी रित्यर्थः एतेन सुखदुःखादय आत्मधर्मतया नार्द्धिकोक्तानि दृष्टाः यथा जलसंपर्कोस्तत्कालहृताः शीतोष्णादि प्रयच्छंति एव

मिष्टसंयोगवियोगात्प्रि सुखदुःखादि प्रयच्छंति तेषां चास्थिरत्वात्सहनं तव धीरस्योचितम् नतु तन्निमित्तहर्षविषादपारवश्यमित्यर्थः

वेसत्वेस्वात्मनिरूह्यवास्थितत्वेन्द्रमलक्षणमिति प्रतिपादयितुमाह १४ ॥

नामिसरी टीका

ननु म्रतोजीवतोवाहं नशोचामि किंतु तद्वियोगादिदुःखभाजमात्मानमेवेति चेत्तत्राह मात्रेति १४ ॥

पेचोली टीका

तथापि तद्देहसंयोगजंसुखंदेहवियोगजं दुःखंसंयोगवियोगनिमित्तो शोकमोहौ संभवतइत्यर्जुनस्य वचनमाशंक्याह +

+मात्रेति मीयंते शब्दादयो विषयाः आभिस्ताः मात्राः श्रोत्रादीनींद्रियाणि स्पृश्यंतइति स्पर्शाः शब्दादयो विषयाः मात्राश्च स्पर्शाश्च मात्रास्पर्शाः अथवा मात्राणां इंद्रियाणां स्पर्शाः शब्दादिभिः संयोगाः ते मात्रास्पर्शाः शीतोष्णसुखदुःखदाः शीतउष्णसुखदुःखप्रयच्छंतीति आगमापायिनः उत्पत्तिविनाशशीला अतएव अनित्यास्तस्मात्तांस्तितिक्षस्व हे भारत तेषु हर्षविषादमाकार्षीः हे कौंतेय तु पुनः मात्रास्पर्शाः शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः अतएव हे भारत तान्तितिक्षस्व १४ ॥

ति

रमावीरसमिद्धोयिनी॥

नन्वस्त नित्यत्वं देहस्य तथापि प्रत्यक्षमुपलभ्यमानभीष्मादिबंधुजनदेहविच्छेदस्य सुखवियोगदुःखसंयोगयोजनकस्य स्मरणेन कथं शोकमोहाववसरतः इत्यर्जुनाभिप्रायमाशंक्य तदुच्छित्तये प्राह मात्रास्पर्शा इति मीयंते नु भूयंते आभिर्विषया इति मात्रा इंद्रियाणि तासां स्पर्शा इंद्रियार्थसन्निकर्षाः शीतोष्णसुपलक्षणं शीतोष्णादिरूपसुखदुःखजनकाः आगमापायिनः उत्पत्तिविनाशशालिनः अत एवानित्याः ततस्तांस्तितिक्षस्व सहस्व तद्वशो माभूः एतदुक्तं भवति इंद्रियार्थसन्निकर्षेणैव शोकः प्रादुर्भवति न तु तत्त्वतः सोस्ति तस्मात्तस्यानित्यतयातज्जन्यस्य शोकस्यापि नित्यत्वं युज्यते इति तद्वशो

५४

न मास्मतं स्वात्मावष्टंभप्रतिष्ठां त्याक्षीरिति भावः भारतेति
भरतकुलोत्पन्नस्य तव धीरत्वमेवोचितमित्यभिप्रायेण
संबोधयति १४॥

मधुभाष

मात्रास्पर्शा इति मीयंत इति मात्रा विषयास्तेषां स्पर्शाः संबंधाः
त एव शीतोष्णसुखदुःखदाः देहे शीतोष्णादिसंबंधाद्धि
शीतोष्णाद्यनुभव आत्मनः ततश्च सुखदुःखे न ह्यात्मनः
स्वतो दुःखादिः संभवति कुतः आगमापायित्वात् यद्या
त्मनः स्वतः स्युः सुषुप्तावपि स्युः अतो यतो मात्रास्पर्शाः जा
ग्रदादावेव ते संति नान्यदैवेति तदन्वयव्यतिरेकित्वात्तन्नि
मित्ता एव नात्मनः स्वतः आत्मनश्चैतैर्विषयविषयिभावसं
बंधादन्यः संबंधो नास्ति न चागमापायित्वेपि प्रवाहरूपे
णापि नित्यत्वमस्ति सुषुप्तिप्रलयादावभावादित्याह अ
नित्या इति अत आत्मनो देहाद्यात्मभ्रम एव सुखदुःखका
रणम् अतस्तादृङ्मुक्तस्य बंधुमरणादिदुःखं न भवति
अतो मिथ्याभिमानं परित्यज्य तान् शीतोष्णादीन्तितिक्ष
स्व अतः प्रयोजनमाह १४॥

भाषा अनुवाद ।

जो कहो कि हम भीष्म आदिके प्रति शोक नही करतेहै पर न्तु उनके वियोगमे हमे दुःख करना होगा इस लिये हम अपनेको शोचतेहै इस वात पर कहतेहै कि सकल वस्तु जिसके द्वारा परिमाण की जाय ऐसी जो सब इंद्रिय हैं तिनके संयोग और उनके द्वारा जो विषयो का स्पर्श होता यही शीत उष्णादि द्वारा सुख दुःख देताहै किन्तु वे अनित्यहै इससे उनको सहो जैसे जल धर्म आदि संयोगसे कालस्वभा व वशते शीत उष्ण होनेसे सुख दुःख होता है तैसे इष्ट और अनिष्ट प्राप्त होनेसे भी सुख दुःखहोताही है परन्तु वह अ नित्य और मिथ्याहै इससे तुमको उनका सहना उचितहै तुम ऐसे धीर पुरुषको उनमे हर्ष विषाद करना अयोग्य और वृथाहै १४ ॥

दोहा॥

अर्जुन मात्रा स्पर्श यह शीतोष्ण सुखदुःखदत होवतनाश अनित्यहै तिनको सहु भारत ॥ १४॥

97

यंहिनव्यथयन्त्येते पुरुषंपुरुषर्षभ समदुःख
सुखंधीरं सोऽमृतत्वायकल्पते १५ ॥

शांकरभाष्यम् ॥

शीतोष्णादीन् सहतः किंस्यादिति शृणु यंहीति यंहिपुरुषंसमे
दुःखसुखे यस्यतं समदुःखसुखं सुखदुःखप्राप्तौ हर्षविषादर
हितं धीरं धीमन्तंनव्यथयंति नचालयन्ति नित्यात्मदर्शनादेते य
थोक्ताःशीतोष्णादयःसनित्यात्मस्वरूपदर्शननिष्ठोद्वन्द्वसहिष्णुरमृ
तत्वाय अमृतभावाय मोक्षायेत्यर्थः कल्पतेसमर्थोभवति १५

आनंदगिरिकृतटीका ॥

अधिकारिविशेषणं तितिक्षुत्व नोपयुक्तं केवलस्य तस्यपुमर्थाहे
तुत्वादिति शङ्कते शीतेति विवेकवैराग्यादिसहितं तन्मोक्षहेतु
ज्ञानद्वारा तदर्थमिति परिहरति शृण्विति तितिक्षमानस्यविवक्षि
तं लाभमुपलम्भयति यंहीति हर्षविषादरहितमित्यत्र शमादिसा
त्व^ यनसम्पन्नत्वमुच्यते धीमन्तमिति नित्यानित्यविवेकभागित्वमेतच्चो
भयं वैराग्यादेरुपलक्षणं नित्यात्मदर्शने त्वमर्थज्ञाने साधनचतु
ष्टयवन्तमधिकारिणमनूद्य त्वंपदार्थज्ञानवतस्तस्य मोक्षोपयिक
वाक्यार्थज्ञानयोग्यतामाह सनित्येति १५ ॥

स्वामिकृतटीका ॥

तत्प्रतीकारप्रयत्नादपितत्सहनमेवोचितंमहाफलत्वादित्याह यं
हीति एतेमात्रास्पर्शायंपुरुषंनव्यथयंतिनाभिभवंति समेसुखदुः
खेयस्यतंसतैरविक्षिप्यमाणोधर्मज्ञानद्वाराअमृतत्वायमोक्षायक
ल्पतेयोग्योभवति १५ ॥

पिशाचभाष्यम् ॥

मात्रास्पर्शान्सहमानस्यकिंस्यादित्यत्राह यंहीति यंहिपुरुषंनव्यथ
यंतिनचालयंतिएतेमात्रस्पर्शाःसमदुःखसुखंसुखदुःखप्राप्तौहर्
षविषादरहितंधीरंधीमंतं सोऽमृतत्वायअमृतभावायमोक्षायेत्यर्थः
कल्पतेसमर्थोभवति १५ ॥

रामानुजभाष्यम् ॥

गी॰
टी॰
द्वि॰

ततस्तोतिः किमर्थमित्यत आह यं पुरुषं धैर्यादिगुणकमवर्जनीयदुः
खे सुखवन्मन्यमानममृतत्वसाधनतया स्ववर्णोचितयुद्धादिकम
नभिसंहितफलं कुर्वाणं तदंतर्गतशस्त्रपातादिमृदुक्रूरस्पर्शा न व्य
थयंति स एव तत्वं साधयति नत्वाहृशो दुःखासहिष्णुरित्यर्थः अत
आत्मनां नित्यत्वादेव तत्कर्तव्यमित्यर्थः १५ ॥

अभिनवगुप्तकृतटीका

नास्ति

ननु यत एवागमापायिन एते सर्वे दशाविशेषास्तत एव शोच्यंते मे
वे तथाहि कोयमागमो नाम उत्पत्तिरिति चेत् सापि का असत आत्म
लाभः सा इति त्वसत् असत्स्वभावता हि निःस्वभावता निरात्मता नि
रात्मा स्वभावः स्वभावाभावो वा स्वभावीकर्तुं शक्यः अनीलं हि न नीलीकर्तुं श
क्यं स्वभावान्तरापत्तेर्दुष्टत्वात् तथा च प्राह नहि स्वभावो भावानां
व्यावर्तेतौष्ण्यवद्रवेरिति अथ सत एवात्मलाभ उत्पत्तिः तदा लब्धात्म
लाभ उत्पत्तिः तदा लब्धात्मनो स्वात्मन्यभावान्नित्यत्वेनैवागमो नाश
एव एवमपायोपि सतोसतो वा असतावदसदेव सत्स्वभावस्यापि
कथमसत्स्वभावः द्वितीयेन तेनासत्स्वभाव इति चेत् अथ सत
एवाद्वितीयेन कश्चिद्भावः स्यात् स्वभावत्यागात् अथ मुद्गरादिना
घटनाशः क्रियते स यदि व्यतिरिक्तो भावस्य किं हतं न दृश्यते इति चे
त् मा नामदर्शि भावो न त्वन्यथाभूतः घटाहत इव अव्यतिरिक्तत्वा
त्तविरुद्धं तदेतत्संक्षिप्याह १५ ॥

परमार्थप्रपाटीका ॥

अथ दुःखसहनेनावदुपायद्वयमस्ति धैर्यं विवेकश्च तत्र प्रथममाह
यं हीति एते मात्रास्पर्शा यं पुरुषं पुरुषार्थाधिष्ठानभूतं न व्यथयंति
नाभिभवंति हे पुरुषर्षभ पुरुषश्रेष्ठ तथा च अविक्रियं सहनशी
लं समदुःखसुखं सुखे अस्पृहं दुःखे निर्विषादमिति पुरुषविशेष
णानि स पुरुषः अमृतत्वाय जीवन्मुक्तत्वाय कल्पते १५ ॥

वनमालीटीका ॥

ननु दुःखाभावहृत् पुरुषार्थस्य युद्धादिस्वधर्मानुष्ठानेनापि संभवा
त् किं तत्कृत्वा असक्तदुःखस्याभावाभिमानत्यागेनेति हृदयस्थमा
शंकामपाकर्तुमभिमानत्यागाद्वचनदुःखाभावः स्वयं पुरुषार्थोपि

परमानंदस्वस्वरूपाविर्भावरूपमोक्षहेतुश्च भवतीत्याह यं ही
ति यं देहादावहमित्याद्यभिमानशून्यं एते मात्रास्पर्शाः न व्यथ
यंति सुखदुःखे वैषम्ययुक्तं न कुर्वंति सोऽमृतत्वाय मोक्षाय कल्प
ते योग्यो भवति न तु सुखदुःखाद्युपमर्दनमप्यहमित्याद्यभिमा
नाभावादमृतत्वं स्यादत आह पुरुषमिति पुरुषमेव संतं देहाद्यनु
संधानवंतं जाग्रतमित्यर्थः यद्वाभिमानत्यागजन्यदुःखाभाव
मात्रात्कथं मोक्षत्वमेव हि विद्वानमृत इह भवतीति श्रुतिविरोधा
दत आह पुरुषमिति पुरुषः ब्रह्म संपद्यते ज्ञानीति पुरुषो ब्रह्म ना॰
ज्ञानी तं कीदृशं सुखदुःखसमं अनात्मधर्मत्वात्पुरुषार्थत्वाच्च
दुःखं यथा हेयं वैषयिकसुखमप्यनात्मधर्मत्वान्मोक्षविरुद्धत्वाच्च
तथा हेयमिति हेयत्वेन समे दुःखसुखे यस्य तादृशं समत्वमेव
कथं स्यादत उक्तं धीरमिति सुखदुःखकार्यहर्षविषादयोरलंभ
कं धैर्यवंतमित्यर्थः अयं भावः यथा स्वेनोत्पन्नधनेन हस्तेनोत्प ९
न्नदंडेन च संबंधविशेषेण पुरुषस्य धनित्वं दंडित्वं तथा सदृसुत्प
न्नेन दुःखादिना अविद्यासहकृतस्वामित्वेन दुःखादिजनकादृ
ष्टप्रयोजकाविद्यावत्त्वेन वा संबंधेन जीवस्य दुःखादिमत्त्वं जीवन्
मुक्तानां तु तस्या अविद्यालेशस्य दग्धपटन्यायेन देहाद्यहमभि
मानाप्रयोजकत्वेन तन्निमित्तादृष्टाप्रयोजकत्वे शरव्यथकर्मजन्या
दृष्टफलदुःखादिभोगसंपादकत्वे च परमसौख्यविषये च दुःखाद्य
नुभवरूपसंसारहेतुरिति संसारहानाय देहादावहं ममेत्यभिमा
नं विहाय कर्माणि मदीयमिदं कर्मानेनेदं फलं प्राप्यमिति चाभि
मानं विहाय शास्त्रोक्तस्वस्वरूपानुसंधानपूर्वकं स्वोचितकर्मानुष्ठा
नेन ततः सर्वात्मत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपापराभक्तिस्त
तो भगवत्प्रसादस्ततो मोक्ष इति पुरुषमित्येकवचनेन राजा धार्मि
को भवेत् ब्राह्मणः शांतो दांतो भवेदितिवज्जात्यभिप्रायेणोपपन्नं त्या॰
यत्त्वेकवचनानुसारादेक एव सर्वेषु देहेषु जीव एको देवः सर्वभूतेषु
गूढ इति श्रुतेरिति तन्न अविद्यायामंतरे वर्तमानाः स्वयंधीराः पंडितं
मन्यमानाः अविद्यारमणीयचरणा इत्यादौ कर्मबंधस्य सति संपद्य

गी॰ टी॰ द्वि॰

नविदुरित्यादौ स्तुष्टमेः वेदांतेज्ञानसुनिश्चितार्था इत्यादौ तत्वज्ञा
नस्योपदिशंतीति सर्वे इत्यादौ मोक्षस्य चेतनधर्मस्यानेकेषूक्तेर
संगत्यापत्तेः वेदांतज्ञानसुनिश्चितार्था इत्यादौ तत्वज्ञानस्योपदे
शं तन्मतेप्यादौ। तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जना
इति श्रुत्यो ज्ञानिनस्तत्वदर्शिभिः उपदेक्ष्यंति ते ज्ञानं ज्ञानिन इत्यात्मतत्व
वित्सु बहुत्वश्रवणाच्च तथैयादेवानां प्रत्यबुध्यत स एव तदभ
था॰ वत्तथर्षीणां तथा मनुष्याणां अजो ह्येको जुषमाणोनुशेते ज
हात्येनां भुक्तभोगामजोन्यः नित्यो नित्यानां चेतनश्चेतनानामे॰ ना॰
को बहूनां यो विदधाति कामानिति श्रुतेः बहवो ज्ञानतपसा
पूता मद्भावमागता इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः
ये च मुक्ता भवंतीह नरा भरतसत्तम तेषां लक्षणमेतद्धि तत्स्वेतद्वी
पनिवासिनामिति स्मृतेश्च बहूनां मुक्तिप्रतिपादिकाया विरोधा
पत्तेः नहि मुक्तो बहुत्वं घत्यत्वादिमात्रे प्रदर्शयेत नचैकजीव
वादे मुक्तामुक्तव्यवस्थापि श्रुत्यसिद्धानां शुकादीनां त्वदभिग
तानां गौडपादादीनां ब्रह्मविदां मुक्तिर्नासीत् तदुपदेशात्तव भवि
ष्यतीति विजं किंच जीवैकत्वे सुखदुःखभोगसांकर्यं देहोपा
धिभेदेपि योगिनां भोगसांकर्यदर्शनात् अंतःकरणस्योपाधि
त्वे सुषुप्तौ तन्नाशाद्बंधस्य मोक्षयोरनुभवस्य सांकर्यापत्तेः प्र
तिदिनं सुषुप्तौ नष्टस्य संस्काराः स्मरणाद्यनियामकत्वाच्च नच
कारणात्मना सुषुप्तावस्थितः करणमस्ति कारणस्याविद्याद्रूप
स्यैकत्वेन स्वस्त्वाद्यनियामकत्वादित्यलं १५ ॥

उत्तमवैजयन्ती टीका ॥

नन्वेतेषामुपेक्षायां किं फलं भविष्यतीत्यपेक्षायामाह यं हि नेति
यं स्वधर्मनिष्ठं धैर्यादिगुणसंपन्नं पुरुषं प्रविदेहेशेन इति तथातेते
त्रत्रमात्मानं समदुःखसुखं समदुःखसुखं वयस्यतं इष्टानिष्टप्राप्ता
वपि हर्षविषादरहितमित्यर्थः अत एव धीरं युद्धादौ निशितशस्त्रा स्त्रा
दिपातेन विदीर्यमाणानवयवेषु नतु द्विग्नचित्तमित्यर्थः हि यस्मा
देते सुखदुःखदा अपि मात्रास्पर्शा न व्यथयन्ति न पीडयन्ति तस्मा॰

+ नन्वंतःकरणस्य सुखदुःखाश्रयत्वे तस्यैव कर्तृत्वेन भोक्तृत्वेन च चेतनत्वमभ्युपेयं तथा च तद्व्यतिरिक्ते तद्भासके भोक्तरि मानाभावान्नाममात्रे विवादः स्यात् तदनभ्युपगमे च बंधमोक्षयोर्वैयधिकरण्यापत्तिः अंतःकरणस्य हि सुखदुःखाद्याश्रयत्वेन बद्धत्वात् आत्मनश्च तद्व्यतिरिक्तस्य मुक्तत्वादित्याशंकामर्जुनस्यापनेतुमाह भगवान् +

त्स्थैर्यादिवान्पुरुषोऽमृतत्वाय मोक्षभावाय कल्पते योग्यो भवति पुरुषर्षभेति संबोधनेन सर्वेषां पुरुषाणां मध्ये श्रेष्ठोऽसि अतस्त्वामेते न व्यथयिष्यन्ति त्वमेतान्सहिष्यस एवेति सूचितम् ॥१५॥

मधुसूदनी टीका ॥

+ यं स्वप्रकाशत्वेन स्वत एव प्रसिद्धं अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुतेः पुरुषं पूर्णत्वेन पुरि पुरि शयानं स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंचनासंवृतमिति श्रुतेः समदुःखसुखं समे दुःखसुखे अनात्मधर्मतया भास्यतया च यस्य निर्विकारस्य स्वयंज्योतिषस्तं सुखदुःखग्रहणमशेषांतःकरणपरिणामोपलक्षणार्थं एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयानिति श्रुत्या वृद्धिकनीयस्त्वरूपयोः सुखदुःखयोः प्रतिषेधात् धीरं धियमीरयति प्रेरयतीति व्युत्पत्त्या चिदाभाससंचाराद्धीतादात्म्याध्यासेन धीरं धीमवंतं केवलसाक्षिणमित्यर्थः स धीः स्वप्नो भूत्वेमं लोकमतिक्रामतीति श्रुतेः एतेन बंधप्रसक्तिर्दर्शिता तदुक्तं यतो मानानि सिध्यंति जाग्रदादित्रयं तथा भावाभावविभागश्च स ब्रह्मास्मीति बोध्यत इति एते सुखदुःखदा मात्रास्पर्शाः हि यस्मात् न व्यथयंति परमार्थतो न विकुर्वंति सर्वविकारभासकत्वेन विकारायोग्यत्वात् सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः अतः स पुरुषः स्वस्वरूपभूतब्रह्मात्मैक्यज्ञानेन सर्वदुःखोपादानतदज्ञाननिवृत्त्युपलक्षिताय निखिलद्वैतानुपरक्तस्वप्रकाशपरमानंदरूपायामृतत्वाय कल्पते योग्यो भवतीत्यर्थः यदि ह्यात्मा स्वाभाविकबंधाश्रयः स्यात् स्वाभाविकधर्माणां निवृत्तिमंतरेण निवृत्तेर्न कदापि मुच्येत तथा चोक्तं आत्मा कर्त्रादिरूपश्चेत् माकांक्षीस्तर्हि मुक्ततां नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेरिति प्रागभावासहवृत्तेर्युगपत् सर्वविशेषगुणनिवृत्तेर्धर्मिनिवृत्तिनांतरीयकत्वदर्शनात् अथात्मनि बंधो न स्वाभाविकः किंतु बुद्ध्याद्युपाधिकृतः आत्मे

दि°

क°

धर्मितं√

गी॰ द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति श्रुतेः तथाच धर्मिस
टी॰ द्भावेपि तन्निष्ठत्वाश्रुत्यनुपपत्तिरिति चेत् हंत तर्हि यः स्वधर्मम
द्वि॰ न्यनिष्ठतयाभासयति स उपाधिरित्यभ्युपगमाद्बुद्ध्यादिरुपाधिः
स्वधर्ममात्मनिष्ठतयाभासयतीत्यायातं तथाचायातं मार्गे बं
धस्यासत्यत्वाभ्युपगमात् नहि स्फटिकमणौ जपाकुसुमोपा
धिनिमित्तो लौहित्याभासः सत्यः अतः सर्वसंसारधर्मासंसर्गिण
आत्मन उपाधिवशात्तत्संसर्गित्वप्रतिभासो बंधः स्वस्वरूपज्ञा
नेन तत्स्वरूपाज्ञानतत्कार्यबुद्ध्याद्युपाधिनिवृत्त्या तन्निमित्तनि
खिलभ्रमनिवृत्तौ निरस्तनिखिलभासोपरागतया शुद्धस्य स्व
प्रकाशपरमानंदतया पूर्णस्यात्मनः स्वत एव कैवल्यं मोक्ष इति
न बंधमोक्षयोर्वैयधिकरण्यापत्तिः अत एव नाममात्रे विवाद इत्य
पास्तं भास्यभासकयोरेकत्वानुपपत्तेः दुःखी स्वव्यतिरिक्तभास्यः
भास्यत्वात् घटवदित्यनुमानात् भास्यस्य भासकत्वादर्शनादेक
स्यैव भास्यत्वे भासकत्वे च कर्तृकर्मविरोधात् आत्मनः कथ
मिति चेत् न तस्य भासकत्वमात्राभ्युपगमात् अहं दुःखीत्यादि
वृत्तिसहितो ऽहंकारो भासकत्वेन तस्य कदापि भास्यकोटावप्र
वेशात् अत एव दुःखी न स्वातिरिक्तभासकापेक्षः भासकत्वा
त् दीपवदित्यनुमानमपि न भास्यत्वेन स्वातिरिक्तभासक
साधकेन प्रतिरोधात् भासकत्वं च भानकरणत्वं स्वप्रकाशभा
नरूपत्वं वा आद्ये दीपस्येव करणांतरानपेक्षत्वेपि स्वातिरिक्त
भानसापेक्षत्वं दुःखिनो न व्याहन्यते अन्यथा दृष्टांतस्य सा
ध्यवैकल्यापत्तेः द्वितीये त्वऽसिद्धो हेतुर्व्यधिकरणतया भा
स्यत्वहेतुरेव विजयते बुद्धिवृत्त्यतिरिक्तभानानभ्युपगमा
द्बुद्धिरेव भानरूपेति चेन्न भानस्य सर्वदेशकालानुस्यूततया
भेदकधर्मशून्यतया च विभोर्नित्यस्यैकस्य चानित्यपरिच्छिन्ना
नेकरूपबुद्धिपरिणामात्मकत्वानुपपत्तेः उत्पत्तिविनाशा
दिप्रतीतेश्चावश्यकल्प्यविषयतयाप्युपपत्तेः अन्यथा तज्ज्ञा
नोत्पत्तिविनाशभेदादिकल्पनायामतिगौरवापत्तेरित्याद्यन्य

न्र^ त्वविस्तरः तथा च श्रुतिः नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽवि
नाशित्वात् आकाशवत्सर्वगतश्च नित्यः महद्भूतमनंतमपारं
विज्ञानघन एवैतदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमा
त्मा ब्रह्म सर्वानुभूरित्याद्या विभु नित्य स्वप्रकाश ज्ञानरूपतामा
त्मनो दर्शयति एतेनाविद्यालक्षणादुपाधेर्व्यतिरेकः सि^ ध्यु^
द्धः अतोऽसत्योपाधिनिबंधनबंधभ्रमस्य सत्यात्मज्ञानेना^
निवृत्तौ मुक्तिरिति सर्वमवदातं पुरुषर्षभेति संबोधयन् स्व
प्रकाशचैतन्यरूपत्वेन पुरुषत्वं परमानंदरूपत्वेन चात्मन
ऋषभत्वं सर्वद्वैतापेक्षया श्रेष्ठत्वमजानन्नेव शोचसि अतः
स्वस्वरूपज्ञानादेव तव शोकनिवृत्तिः स्वकारणनिवृत्तिशोकमा
त्मविदिति श्रुतेरिति सूचयति अत्र पुरुषमित्येकवचनेन सां
ख्यपक्षो निराकृतः तैः पुरुषबहुत्वाभ्युपगमात् ॥

[illegible]

॥ १५ ॥

सदानंदी टीका ॥

नन्वंतःकरणस्यैव भोक्तृत्वे सुखदुःखयोः तस्यैव चेतनत्वात्स्या
दात्मत्वं न ततः परं १ भोक्तुरन्यस्य चात्मत्वे मानं नैव हि दृश्य
ते स्यादेकाधिकरण्यं च यस्मान्नास्या बंधमोक्षयोः २ वदं मनो वि
मुक्तोऽन्यश्चात्मेत्याह माधवः यस्ततः स्वप्रकाशत्वात्प्रसिद्धः पू
र्णमद्वयं ३ मात्रास्पर्शान ऊर्वंति विक्रियां वस्तुतो न च पि दृश्य

यमेतयाऽयस्पष्टः स्वस्वविषमेद्द्रशः ४ धीवंधीप्रेरकं स्वात्मना।
दात्म्याध्यासतोविभुः चिच्छायायाद्वारतो बुद्धिसाक्षिणं वस्तुतः पर
मार्थस्त्वं यथा चिष्णाने तदुक्तं सांप्रदायिकैः यतोमानानि सिद्ध्यं
ति जाग्रदादित्रयं तथा भावाभावविभागश्च स ब्रह्मास्मीति बोध्य
ते ६ स्वतः स पुरुषः साक्षी ब्रह्मात्मैक्यधियाखिलं ७ सविलासम
हामोहं ध्वस्त्वा मोक्षाय कल्पते अनात्मन्यात्मताध्यासाद्द्वयस्त
त्रैव काल्पितः ८ तन्निवृत्तेकविज्ञानान्मुक्त इत्युपचर्यते वस्तु
तो बंधमोक्षादिनास्त्येवाद्वैतवस्तुनि ९ स्वाभाविकत्वे बंधस्य
मुक्तिर्न स्यात्ततो विभोः नस्वभावविपर्यासः प्रामाण्येनाशते
ऽपि १० तस्माद्बंधस्य मिथ्यात्वं तदुक्तं वार्तिके स्फुटं आत्माकर्त्रा
दिरूपश्चेन्माकांक्षीस्तर्हि मुक्तता ११ नहि स्वभावो भावानां व्या
वर्तेतौष्ण्यवद्रवेः मिथ्याज्ञानप्रयुक्तोऽयं बंधो ध्यस्तश्चिदात्मनि
सम्यगद्वैतबोधेन तन्निवृत्त्यास्य मुक्तता स्वप्रकाशपरानंदरू
पत्वेनैव पूरुषः १२ स्वयमः सर्वतः श्रेष्ठोऽद्वैतोऽस्पृष्टश्चिदद्वयः
इत्याद्यज्ञानेन हरिणा बोधितः पुरुषर्षभः १३ अज्ञात्वेनादृशं
वस्तुरूपं त्वं पुरुषर्षभ शोचसीत्येवतात्पर्यं गम्यते श्रीहरेर्वि
भोः १५ ॥ १५ ॥

नीलकंठी टीका ॥

तितिक्षाफलं प्रत्यक्षमेवेत्याह यंहीति एते मात्रास्पर्शाः प्राकृत्या
ख्यातरीत्या त्रिविधा अपि यं जाग्रति स्वप्ने सप्रज्ञातसमाधौ वा न व्य
थयंति स्वास्थ्यात्प्रच्यावयंति पुरुषं पूर्णं अष्टास्ववसतीति पुरुष
स्तं पुरवस्त्वं कर्मेंद्रियाणि खलु पंच तथापराणि ज्ञानेंद्रियाणि मन
आदिचतुष्टयं च प्राणादिपंचकमथो वियदादिकं च कामश्च कर्म
च तमः पुनरष्टमी पूरिति प्रसिद्धाः यद्वा स्थूलसूक्ष्मोपाधिमध्यप
तितानामाकाशादीनां मध्ये प्रत्यकृ तिलगानपव भाव प्रतिपादनेनाप्य
आत्मनो विविक्तत्वं दर्शितं पुरुषर्षभेति त्वमप्येतदनुभवितुं यो
ग्योऽसि सर्वपुरुषश्रेष्ठत्वादिति सूचयति उपाधित्रयत्यागादेवस

दुःखाय

मेदुःखसुखेयस्यतं नहिसमाधिस्थस्यसुखोपायैवाशीतोसस्पर्शै भवतइतियुक्तमस्यसमदुःखसुखत्वं धीरंप्रायेनयोगिनंनव्य थयंतिसोऽमृतत्वायमोक्षायकल्पतेयोग्योभवति ॥ १५ ॥

ज्ञानेश्वरी टीका

तत्सहनप्रकारमेवाह अमृतत्वायमोक्षायकल्पतेसमर्थःस्या दित्यर्थः १५ ॥

रामकंठी टी॰

++ येपुरुषपुरुषलक्षणंज्ञानेकुशाननिर्विकल्पस्थैकृतयापुरुष वस्थायोवर्तमानमतएवधीरंपरिज्ञानसदसत्पदार्थमतएवस समदुःखसुखं समेममनोवृत्त्यमात्रेणैकेनरूपेणस्फुरमानेन लेपदुःखसुखेयस्यतथाविधंघटादिवदेहात्वमात्राविशिष्टरूपेः स्थावादिभिरन्तरङ्गपज नितविकारैसतमेतेजन्मविनाशधर्मयो गादनित्याःसुखितोहमित्यादिविपर्ययप्रत्ययहेतवःस्पर्शशब्दा भिहिताविषयाःशब्दादयोनव्यथयंतिचालयन्ति नहिविकल्प दैकैकस्वभावात्सत्यादात्मनोनप्रच्यावयन्ति सोऽमृतत्वायपर मार्थसत्यपरमात्मसमापत्तिवशादविनाशित्वायकल्पतेसम्यग तेप्रक्षोभवतीत्यर्थः [illegible] ॥ १५ ॥

[illegible] टीका

स्वात्मपरामर्शात्पागेनतत्सहनस्यमहाफलित्वमित्याह यमिति नव्यथयन्तिआत्मदर्शनात्प्रच्यावयन्ति [illegible] सएवंविधोज्ञानाधिरूढोमोक्षाय कल्पतेसमर्थोभवति १५ ॥

हे प्रसिद्धे [illegible] सिद्धमेवे तदित्यर्थः

येतेमात्रास्पर्शायंपुरुषं धीरंतत्त्वतं तथासम दुःखसुखंसुखदुःख प्राप्तौहर्षविषादरहितं

धारा अमृतत्वाय

पंचोली टीका

तत्प्रतीकारप्रयत्नादपितत्सहनमेवउचितंयतःतत्सहनेनिरति शयफलमित्याह यंहीति हेपुरुषर्षभहियस्मादेतेशीतोष्णा दयोविषयाःइंद्रियाणिचयं आत्मदर्शनेसमदुःखसुखंसमेसु खदुःखेयस्यसमतेसुखदुःखप्राप्तौहर्षविषादरहितंधीरंधीमंतं पुरुषंनव्यथयंति नचालयंतिसज्ञानीद्वंद्वसहिष्णुःअमृतत्वा

गी॰
टी॰
हिं॰

102

यमोत्तायकल्पतेससमर्थोभवति १५ ॥

रणवीरसमिद्धोयिनी॥

धीराणं विषय संबंध सहनफलमाह यंहिनेति यतेसर्वो
त्काइंद्रियार्थसन्निकर्षायंपुरुषंयोकषलप्तणषालिनंधीरं
धैर्यगुणषालिनमेतएवसमदुःखसुखंसुखदुःखेअनपेद्य
वप्रवर्तमाने नव्यथयंतिनकंपयंतिसेदादर्जनकतयाधर्म
धर्मविबुद्ध्यैवस्थापनेनवस्वत्रुषितस्वधर्मकर्तव्यतानिश्च
यान्नव्यावर्यति सःपुमानमृतत्वाय अविद्यमानेमृतंमरणं
मत्ययमोयस्यसोमृतोमरणस्तत्वंदेहपतानदर्थंकल्पतेयो
ग्योभवति युद्धेसम्मुखमरणादितिभावः अथवा हेयाविता
याविनयोर्येषांसर्वंमृतामृतेइतिकोशादविद्यमानेमृतेया
वितमन्नादिकंभक्ष्यंनास्येतिमृतोयाचितोपभोक्तानत्वम
मृतत्वेवासनवदभिक्षितान्नभोजित्वंतदर्थंकल्पतेयुद्धेमागु
जयेपृथिवीराज्यलाभादितिभावः अथवामृतत्वायमोक्षाय
वकल्पतेइति १५॥

मधुभाव

यंहीति यमेतेमात्रास्पर्शानव्यथयंति दुरितायमेवसंतंपा
पीरसंबंधाभावेसर्वेषामपिव्यथाभावात्पुरुषमितिवि
शेषणंकथंनव्यथयंति समदुःखसुखत्वात् तत्कथम्
धैर्यगुणा नित्यआत्मेत्युक्तम् किमात्मेवनित्यः अहोस्विद
न्यदपि अन्यदपि नाकिमितिआह १५

भाषा अनुवाद

किस हेतुसे उपाय अवलम्बन करि शीत उष्ण वारन करने से उनका सहना ही उचितहै उसमे बड़ा फलहै यह कहतेहै कि हे पुरुष श्रेष्ठ अर्जुन जिन धीर पुरुषोंको सुख दुःख समान भाव अर्थात् शीत उष्णमे क्लेश नही होता सोई विक्षेप रहित पुरुष धर्म ज्ञानके द्वारा मोक्ष प्राप्ति के अधिकारी है १५ ॥

दोहा

पीड़ें नहि जिह पुरुषकों यह विषये नरश्रेष्ठ समरूप सुख
दुःखधीरको सोहैं मुक्त वरिष्ठ ॥१५॥

नासतोविद्यतेभावो नाभावोविद्यतेसतः उ
भयोरपिदृष्टोऽन्त स्त्वनयोस्तत्वदर्शिभिः १६

शांकरभाष्यं

इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तं यस्मात् नास
तइति नासतोऽविद्यमानस्यशीतोष्णादेः सकारणस्यनविद्यते
नास्तिभावोभवनमस्तिता नहि शीतोष्णादिसकारणंप्रमाणै
र्निरूप्यमाणंवस्तुसद्भवति विकारोहिसः विकारश्चव्यभिचरा
ति यथाघटादिसंस्थानंचक्षुषानिरूप्यमाणंमृद्व्यतिरेकेणानुप
लब्धेरसत्तथासर्वोविकारःकारणव्यतिरेकेणानुपलब्धेरसज
न्मप्रध्वंसाभ्यां प्रागूर्ध्वंचानुपलब्धेः कार्यस्य घटादेर्मृदादिका
रणस्यतत्कारणस्यच तत्कारणव्यतिरेकेणानुपलब्धेरसत्वं
तदसत्वेसर्वाभावप्रसंगइतिचेन्न सर्वत्रबुद्धिद्वयोपलब्धेः स
द्बुद्धिः सद्बुद्धिरिति यद्विषयाबुद्धिर्नव्यभिचरति तत्सत् यद्विष
याव्यभिचरति तदसत्इति सदसद्विभागेबुद्धितंत्रेस्थितेसर्व
त्रद्वेबुद्धीसर्वैरुपलभ्येते समानाधिकरणेननीलोत्पलवत् सन् पन
घटः सन् पटः सन् हस्तीत्येवंसर्वत्रतयोर्बुद्ध्योर्घटादिबुद्धिर्व्य
भिचरति तथाचदर्शितं नतुसद्बुद्धिस्तस्मात् घटादिबुद्धिवि
षयेसन् व्यभिचारात् नतुसद्बुद्धिविषयोऽव्यभिचारात् घटे
विनष्टेघटबुद्धौव्यभिचरन्त्यांसद्बुद्धिरपिव्यभिचरतीति चेत्न
पटादावपि सद्बुद्धिदर्शनात् विशेषविषयैवसासद्बुद्धिरतो
पिनविनश्यति यथासद्बुद्धिवत् घटबुद्धिरपि घटान्तरेदृश्य
ते इतिचेन्नपटादावदर्शनात् सद्बुद्धिरपिनष्टेघटेनदृश्यतइ
तिचेत् नविशेष्याभावात् सद्बुद्धिःविशेषणविषयासतोविशे
ष्याभावेविशेषणानुपपत्तौ किंविषयास्यात्नतुपुनःसद्बुद्धि
र्विषयाभावात् एकाधिकरणत्वंघटादिविशेष्याभावेनयुक्तं
इतिचेत् नसदिदमुदकमिति मरीच्यादावन्यतराभावेपिसामा

गी॰ नाधिकरणपदर्शनात् तस्माद्देहादेर्द्वन्द्वस्य च सकारणस्यासतो
टी॰ न विद्यते भाव इति तथा सतश्चात्मनः अभावोऽविद्यमानता न
द्वि॰ विद्यते सर्वत्राव्यभिचारादित्यवोचाम एवमात्मानात्मनोः सदस
तोरुभयोरपि दृष्टः उपलब्धोऽन्तो निर्णयः सत्सदेवासदसदेवेति
तु अनयोर्यथोक्तयोस्तत्वदर्शिभिः तदिति सर्वनाम सर्वं च ब्र
104 ह्म तस्य नाम तदिति तद्भावस्तत्वं ब्रह्मणो याथात्म्यं तद्द्रष्टुं शीलं ६८
येषां ते तत्वदर्शिनस्तैस्तत्वदर्शिभिस्त्वमपि तत्वदर्शिनां दृ॰
ष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियत
रूपाणि द्वन्द्वानि विकारोऽयमसदेव मरीचिजलवन्मिथ्यावभा
सत इति मनसि न्यस्य तितिक्षस्वेत्यभिप्रायः १६ ॥

आनंदगिरिकृतटीका ॥

अधिकारिविशेषणे तितिक्षुत्वे हेत्वन्तरपरत्वेनानन्तरश्लोकमवता
रयति इतश्चेति इतःशब्दार्थमेव स्फुटयति यस्मादिति यतः शी
तादेः क्लेशादिहेतोरनात्मनो नास्ति वस्तुत्वं वस्तुनश्चात्मनो नि
र्विकारत्वेनैकरूपत्वं अतो मुमुक्षोर्विशेषणं तितिक्षुत्वं युक्त
मित्याह नेत्यादिना कार्यस्यासत्त्वेऽपि कारणस्य सत्त्वेनात्यन्तास
त्त्वासिद्धिरित्याशंक्य विशिनष्टि सकारणस्येति नासत इत्युपा
दाय पुनर्नकारानुकर्षणमन्वयार्थं असतः शून्यस्यास्तित्वप्र
संगाभावादप्रसक्तप्रतिषेधप्रसक्तिरित्याशंक्याह नहीति
विमतमतात्त्विकमप्रामाणिकत्वात् रज्जुसर्पवत् नहि धर्मिग्रा
हकस्य प्रत्यक्षादेस्तत्त्वावेदकं प्रामाण्यं कल्प्यते विषयस्य दुर्नि
रूपत्वादतोऽनिर्वाच्यं द्वैतमित्यर्थः कथं पुनरध्यक्षादिविषय
स्य शीतोष्णादिद्वैतस्य दुर्निरूपत्वेनानिर्वाच्यत्वं तत्राह विकारो
हीति ततश्च विमतं मिथ्या आगमापायित्वात् सम्प्रतिपन्नवदि
ति फलितमाह विकारस्येति वाचारम्भणश्रुतेः द्वैतमिथ्यात्वे
अनुग्राहकत्वं दर्शयितुं चकारः किंच कार्यं कारणाद्भिन्नमभि॰
न्नं वेति विकल्पाद्यं दूषयति यद्धीति निरूप्यमाणमन्तर्बहि॰

श्चेति शेषः विमतं कारणात्मतत्त्वतोभिद्यते कार्यत्वाद्घटवदित्य
र्थः इतोपि कारणाद्भेदेन नास्ति कार्यं आदावन्ते च यन्नास्ति वर्तमा
नेपि तत्तथेति न्यायादित्याह जन्मेति यदि कार्यं कारणादभिन्नं
तदा तस्य भेदेनासत्त्वे पूर्वस्मादविशेषः तादात्म्येनावस्थानं तु
न युक्तं तस्यापि कारणव्यतिरेकेणाभावात् कार्यकारणवि
भागविधुरे वस्तुनि कार्यकारणपरम्पराया विश्रमत्वादित्यभि
प्रेत्याह मृदादीति कार्यकारणविभागविहीनं वस्त्वेव नास्ती
ति मन्वानश्चोदयति तदसत्त्व इति अनुवृत्तव्यावृत्तबुद्धिद्वयद
र्शनादनुवृत्तेश्च व्यावृत्तानां कल्पितत्वादकल्पितं सर्वभेदक
ल्पनाधिष्ठानमकार्यकारणं वस्तु सिध्यतीति परिहरति न सर्व
त्रेति सम्प्रति सतो वस्तुत्वे प्रमाणमनुमानमुपन्यस्यति यद्विष
येति यद्व्यावृत्तेष्वनुवृत्तं तत्तमर्थं सत् यथा सर्पधारादिष्वनुग
तो रज्ज्वादिरिदमंशः विमतं सत्यमव्यभिचारित्वात् सम्प्रतिपन्न
वदित्यर्थः व्यावृत्तस्य विकल्पितत्वे प्रमाणमाह यद्विषयेत्या
दिना यद्व्यावृत्तं तन्मिथ्या यथा सर्पधारादि विमतं मिथ्या व्यभि
चारित्वात् सम्प्रतिपन्नवदित्यर्थः इत्यनुमानद्वयमनुसृत्य स
तोऽकल्पितत्वं असतश्च कल्पितत्वं स्थितमिति शेषः ननु ने
दमनुमानद्वयमुपपद्यते समस्तद्वैतवैतथ्यवादिनो विभागा
भावादनुमानादिव्यवहारानुपपत्तेस्तत्राह सदसदिति उक्ते
विभागे बुद्धिद्वयाधीने स्थिते सत्यनुमानादिव्यवहारो निर्वह
ति प्रातिभासिकविभागेन वियोगात् परमार्थस्यैव तद्वत्त्वे
केवलव्यतिरेकाभावादित्यर्थः ननु सदसद्विभागस्य बुद्धिद्व
याधीनत्वे बुद्धिविभागस्यापि तदभावात्तत्राह सर्वत्रेति व्यव
हारभूमिः सममित्यर्थः बुद्धिविभागस्यापि कल्पितस्यैव बोध्यवि
भागप्रतिभासहेतुत्वेनेति भावः बुद्धिद्वयमनूद्य सदसद्विभा
गे सतः सामान्यरूपतया विशेषाकांक्षा^ सामान्यविशेषे द्वे व या^
स्तुनी वस्तुभूते स्यातामिति चेत्तत्राह समानाधिकरण इति।

गी॰
टी॰
द्वि॰

105

पदयोः सामानाधिकरण्यं तयोरुपचर्यते सोऽयमिति सामाना-
धिकरण्यवद्घटः सन् इत्यादि सामानाधिकरण्यमेकवस्तुनिष्ठ
वस्तुभेदे घटपटयोरिव तदयोगादित्यर्थः नीलमुत्पलमितिव
द्धर्मधर्मिविषयतया सामानाधिकरण्यस्य सुवचत्वान्न वस्त्वैक्य
विषयत्वमिति चेन्नेत्याह न नीलेति नहि सामान्यविशेषयोर्भे
देऽभेदे च तद्भावो भेदाभेदौ च विरुद्धावतो जातिशक्त्योः सामाना-
धिकरण्यं नीलोत्पलयोरिव न गौणं किन्तु व्याहतमतुहृतेक
ल्पितमित्येकनिष्ठमित्यर्थः सामान्यविशेषयोरुक्तन्यायं गुण
गुण्यादावपि दिशत्येवमिति तुल्यो हि तत्रापि विकल्पदोषावि
तिभावः सामानाधिकरण्यानुपपत्त्या द्वे वस्तुनी सामान्यविशे-
षाविति पक्षं प्रतिक्षिप्य विशेषा एव वस्तूनीति पक्षं प्रतिक्षिपति
तयोरिति बुद्धिव्यभिचाराद्बाध्यव्यभिचारेऽपि कथं व्यावृत्तानां वि
शेषाणामवस्तुत्वमित्याशंक्याह तथा चेति विकारो हि सदित्या
दाविति शेषः नचैकं वस्तु सामान्यविशेषात्मकमेकस्य द्वैरू
प्यविरोधादित्यभिप्रेत्य सामान्यमेकमेव वस्तु तद्बुद्धेरव्यभि
चारात् बाध्यस्यापि सतस्तथात्वादित्याह नन्विति व्यभिचरती
ति पूर्वेण सम्बन्धः विशेषाणां व्यभिचारित्वे सतश्चाव्यभिचारित्वे
फलितमुपसंहरति तस्मादिति असत्वकल्पितत्व तच्छब्दार्थ
मेव स्फोरयति व्यभिचारादिति सद्बुद्धिविषयस्य सतोऽकल्पि
तत्वे तच्छब्दोपात्तमेव हेतुमाह अव्यभिचारादिति सद्बुद्धिव्य
भिचारद्वारा बाध्यस्यापि व्यभिचारवत्तदव्यभिचारित्वहेतोरसिद्धि
रितिशंकते घटे विनष्ट इति सद्बुद्धेर्घटमात्रबुद्धिवद्घटविषय
त्वाभावान्न घटनाशे व्यभिचारोऽस्ति इति परिहरति न पटादावि
ति सद्बुद्धेरघटविषयत्वे निरालम्बत्वायोगात् विषयान्तरं वा-
च्यमित्याशंक्याह विशेषणेति सतोऽकल्पितत्वहेतोरव्यभि
चारत्वस्यासिद्धिमुद्धृत्य विशेषाणां कल्पितत्वहेतोर्व्यभिचारि
त्वस्यासिद्धिं शंकते सदिति यथा सद्बुद्धिर्घटे नष्टे पटादौ दृष्टा

त अव्यभिचारिण्यव्यभिचारः सतोदर्शितकथाघटबुद्धिरपि
घटे नष्टे घटान्तरे दृष्टत्वाव्यभिचारात् घटे व्यभिचारासिद्धेर्वि
शेषान्तरेपि कल्पितत्वहेतोः व्यभिचारो न सिध्यतीत्यर्थः घट॰
बुद्धेर्घटान्तरे दृष्टत्वेपि पटादावदृष्टत्वेन व्यभिचारात् पटा
दिविशेषेष्वपि व्यभिचारित्वसिद्धिरित्युत्तरमाह नपटादावि
ति विशेषाणामेवं व्यभिचारित्वे सतोपि तदुपपत्तेर्व्यभिचा॰
रित्वहेत्वसिद्धितादवस्थ्यमिति शंकते सद्बुद्धिरिति घटा॰
दिनाशदेशे तदुपरक्ताकारेण सत्वाभानेपि नासत्वं घटाद्य
भावाधिष्ठानतया भानादित्याह न विशेषेति यथा सर्वग॰
ताज्जातिरित्यत्र खण्डमुण्डादिव्यक्त्यभावदेशे गोत्वं व्यञ्जका
भावान्न व्यज्यते न गोत्वाभावात् तथा सत्वमपि घटादिना॰
शे व्यञ्जकाभावान्न भाति न स्वरूपाभावादित्युक्तमेव प्रपञ्च
यति सदित्यादिना सप्रतियोगिकविशेषणव्यभिचारेपि स्व
रूपाभावादिव्यभिचाराद्युक्तं सतः सत्यत्वमितिभावः द्वयोः
सतोरेव विशेषणविशेष्यत्वदर्शनात् घटसतोरपि विशेषण
विशेष्यत्वे द्वयोः सत्त्वश्रौव्यात् घटादिविकल्पितत्वानुमाने सा
मानाधिकरण्यधीबाधितमिति चोदयति एकेति अनुभवम
नुसृत्य बाधितविषयत्वमुक्तानुमानस्य निरस्यति नेत्यादि॰
नाघटादेः सतिकल्पितत्वानुमानस्य दोषराहित्ये फलितमु
पसंहरति तस्मादिति प्रथमपादव्याख्यानपरिसमाप्तिविति
शब्दे नन्वेतद्व्याख्यानं भाष्यकाराभिप्रेतं सर्वद्वैतशून्यत्व
विवक्षायां शास्त्रतद्भाष्यविरोधात् केनापि तु नदुर्विदग्धेन
स्वमनीषिकयोत्प्रेक्षितमेतदिति चेन्मैवं किमिदं द्वैतप्रपंच
स्य शून्यत्वं किं तुच्छत्वं किं सद्विलक्षणत्वं नाद्योऽनभ्युपगमात्
द्वितीयानभ्युपगमे तु नैव शास्त्रविरोधो भाष्यविरोधश्च स॰
र्वं हि शास्त्रं तद्भाष्यं च द्वैतस्य सत्यत्वानधिकरणत्वसाधनेना॰
द्वैतसत्यत्वपर्यवसितमिति त्रैविध्यहेद्वैतत्र तत्र प्रतिष्ठापि॰

गी॰ ते तथा च श्रुतेः पाशंकां सम्प्रदायपरिचयाभावादिति द्रष्टव्यं प्र
टी॰ नात्मजातस्य कल्पितत्वेनावस्तुत्वप्रतिपादनपरतया प्रथम
द्वि॰ पादं व्याख्याय द्वितीयपादमात्मनः सर्वकल्पनाधिष्ठानस्याक
ल्पितत्वेन वस्तुत्वप्रसादनपरतया व्याकरोतीति नेति नन्वा
त्मनः सदात्मनाविशेषेऽपि विनाशित्वतदुपरक्तस्य विनाशः स्या
दित्याशंक्याविशिष्टनाशेऽपि स्वरूपानाशस्योक्तत्वान्मैवमित्या
ह सर्वमिति ननु कदाचित्सदेव पुनः सत्त्वमापद्यते प्रागस
तो घटस्य जन्मना सत्त्वाभ्युपगमात् सच्च कदाचिदसत्त्वं प्रति
पद्यते स्थितिकाले सतो घटस्य पुनर्नाशेनासत्त्वाङ्गीकारादेवं
सदसतोरव्यवस्थितत्वाविशेषादुभयोरपि हेयत्वमुपादेयत्वं
वा तुल्यं स्यादिति तत्राह एवमिति तुशब्दो दृष्टशब्देन सम्ब
म^ ध्यमानो दृष्टिमवधारयति नहि प्रागसतो दृष्टस्य सत्त्वमसत्त्वे
स्थिते सत्त्वप्राप्तिविरोधादसत्त्वनिवृत्तिश्च सत्त्वप्राप्त्या चेत् प्रा
प्तमितरेतराश्रयत्वमन्तरेणैव सत्त्वापत्तिमसत्त्वनिवृत्ताववस
त्त्वमनवकाशि भवेत् एतेन सतोऽसत्त्वापत्तिरपि प्रतिनीतेति
भावः कथं तर्हि सतोऽसत्त्वमसतश्च सत्त्वं प्रतिभाति इत्याशं
त्व^ क्य तत्त्वदर्शनाभावादित्याह तत्त्वेति तस्य भावस्तत्त्वं न च तच्छ
ब्देन परामर्शयोग्यं किंचिदस्ति प्रकृते प्रतिनियतमित्याशंक्या
व्याचष्टे तदित्यादिना ननु सदसतोरन्यथात्वं केचित्प्रतिप
द्यन्ते केचित्तु तयोरुक्तनिर्णयमनुसरन्ति तथात्वमेवाभिगच्छ
न्ति तत्र केषां मतमेषितव्यमिति तत्राह त्वमपीति १६ ॥

स्वामिकृतटीका ॥

ननु तथापि शीतोष्णादिकमतिदुःसहं कथं सोढव्यमत्यन्तं त
त्सहने च कदाचिदात्मनाशस्यापि संभवादित्याशंक्य तत्त्ववि
चारतः सर्वं सोढुं शक्यमित्याशयेनाह नासत इति असत्त्वात्
धर्म^ ष्वनात्मत्वादविद्यमानस्य शीतोष्णादेरात्मनि भावः सत्ता
न विद्यते तथा सतः सत्स्वभावस्यात्मनः अभावो विनाशो न।

विद्यते एवमुभयोः सदसतोर्दृष्टो निर्णयो दृष्टः कैस्तत्त्वदर्शि
भिः वस्तुयाथात्म्यविद्भिः एवंभूतविवेकेन सह इत्यर्थः १६ ॥

पिशाचभाष्यटी॰

इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनं यस्मादुक्तं नासत
इति असतः अविद्यमानस्य रज्जुसर्पवत् दृष्टनष्टस्वभावस्य ज
गतः भावः सत्ता न विद्यते तथा परमार्थस्य सतः आत्मनः अभा
वः अविद्यमानता न विद्यते सर्वत्राव्यभिचारात् अनयोः सदसतोस्तत्त्वं विनिश्चित्य
मोहं च हित्वा शीतोष्णादीन्तितिक्षस्वेत्यभिप्रायः १६ ॥

रामानुजभाष्यम् टी॰

यत्त्वात्मनो नित्यत्वं देहानां स्वाभाविकं नाशित्वमशोकनिमित्तमु
क्तं गतासूनगतासूंश्च नानुशोचन्ति पण्डिता इति तदुपपादयितु
मारभते नासत इति असतो देहस्य सद्भावो न विद्यते सतश्चात्मनो
नासद्भावः उभयोर्देहात्मनोरुपलभ्यमानयोर्यथोपलब्धितत्त्व
दर्शिभिरन्तो दृष्टः निर्णयान्तत्वान्निरूपणस्य निर्णय इहान्तशब्दे
नोच्यते देहस्यासत्त्वमेव स्वरूपं आत्मनश्चेतनस्य सत्त्व
मेव स्वरूपमिति निर्णयो दृष्ट इत्यर्थः विनाशस्वभावो ह्यसत्त्वं
अविनाशस्वभावः सत्त्वं यथोक्तं भगवता पराशरेण तस्मिन्नवि
ज्ञानमृतेऽस्ति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातं ज्ञानं यथास
त्यमसत्यमन्यत् अनाशी परमार्थश्चाप्राज्ञैरभ्युपगम्यते तत्तु ना
शि न संदेहो नाशिद्रव्योपपादितं यत्तु कालान्तरेणापि नान्य
संज्ञामुपैति वै परिणामादिसंभूतिं तद्वस्तु नृप तच्च किमिति
अत्राप्यन्तवन्त इमे देहा अविनाशि तु तद्विद्धीत्युच्यते तदेव सत्त्वा
सत्त्वव्यपदेशहेतुरिति गम्यते अत्र तु सत्कार्यवादस्यासंगत
त्वान्न तत्परोऽयं श्लोकः देहात्मस्वभावाज्ञानमोहितस्य तन्मो
हशान्तये ह्युभयोर्नाशित्वानाशित्वरूपविवेक एव वक्तव्यः
स एव अविनाशित्वं अन्तवन्त इमे देहा इत्यनन्तरमुपपादित इ थिष्य^
ति यथोक्त एवार्थः १६ ॥

अभिनवगुप्तकृतटीका ॥

गी॰ नत्वयन्तएवागममपायिनएतेसर्वेदशाविशेषात्तनएवशोच्यते
टी॰ मेवं तथाहि कोयमागमोनामउत्पत्तिरितिचेत् सापिकाश्र
द्वि॰ सतश्चात्मलाभःसाइतित्वसत् असत्स्वभावताहिनिस्स्वभाव
नि॰ तानिरात्मता निरात्माचस्वभावःकथंसस्वभावीकर्तुंशक्यः
अनीलेहिननीलीकर्तुंशक्यंस्वभावोनरापतेर्दुष्टत्वात् त॰
थाचस्मरन्ति नहिस्वभावोभावानांव्यावर्ततेोष्णवद्रवेरिति
अथसतएवात्मलाभउत्पत्तिः तदाल्लब्धात्मनोस्यजात्वप्यभावाभा भा
वान्नित्यतैवेत्यागमकाशैवतत् एवमपायोपिसतोसतोवा
असत्तावदसदेवसत्स्वभावस्यापिकथमसत्ता स्वभावः द्वि
तीयेक्षणेभावसत्स्वभावइतिचेत् आद्येपितथैस्यादितिन॰
कश्चिद्भावःस्यात् स्वभावस्यात्यागात् अथमुद्गरादिनास्य
नाशःक्रियते सच्चमुद्गरव्यतिरिक्तोभावस्यकिंहन्त नदृश्यतेइ
तिचेत् मानामदर्शिभावोनत्वन्यथाभूतःपटादिनइव अथ
व्यतिरिक्तस्तुनासाविल्मुक्तं तदेतत्सर्वंदर्शयन्नाह ' अथचलोक नासत इ
दृष्ट्येनेदमाह असतोनित्यविनाशिनःशरीरस्यनभावःअन
वरतमवस्थाभिःपरिणामित्वात् नित्यसतश्चपरमात्मनोना
स्तिकदाचिद्विनाशःपरिणामधर्मत्वात् तथाचवेदः अवि॰
नाशीवाअरेअयमात्माऽनुच्छित्तिधर्मेति अनयोःसदसतोरन्तः
प्रतिष्ठापदंयत्रानयोर्विश्रान्तिः १६ ॥

परमार्थप्रपाटी॰ ॥

अथद्वितीयोपायमाह नासतइति असतःशुक्तिकारजतव॰
दसद्रूपस्यदृश्यमात्रस्यभावः वर्तमानत्वंवक्तुंनशक्यते त॰
थासतःसच्छब्दव्यपदेश्यस्यात्मनःअभावःअवर्तमानत्वंचवक्तुं
नशक्यते एवमसत्सतोरन्तोनिर्णयस्तत्त्वदर्शिभिःस्वस्वरूप
स्थैर्दृष्टः अत्रैतदुक्तंभवतियत्रोत्तरक्षणेबाधोदृश्यते तदस
च्छब्दव्यपदेश्यं तथायत्सर्वदाप्यबाधितंतत्सच्छब्दव्यपदेश्यं
अतोन्यदार्तमितिश्रुतेः तदुक्तमध्यात्मसारे यद्वल्लक्षणेर्धम
वभातिमरीचिकांभस्सांसंनिधानमपिरज्जुभुजंगमत्वे स्वप्नः

त्राणावधिस्तुष्टस्यवधीहृतद्वद्धिश्रेविभातितदपिप्रवदंति
मत्प सर्वप्रपंचविलयावसरेष्वमोपत्राणवाघुत्तुगतंवि॰ सु॰
दिह्यास्तिनूनं अर्थप्रतीतिवशातोपिचजागरादौतस्मात्स
दित्यभिहितेनवलवित्स्वरूपमिति एवमवस्थात्रयेपणवा
धितेसत्येब्रह्मणिनिविष्टचित्तानांतत्वदर्शिनामसद्रूपशी
तोष्णादिद्वंद्वदुःखसहनेक्रियानायासः यथास्वप्नेसर्पव्या
घ्रादष्टस्यजागरेतत्प्रतीकारासंभवादित्यर्थः १६ ॥

वनमाली टीका ॥

यदुक्तमात्मनोनित्यत्वंदेहानामनित्यत्वंवाशोकानिमित्तादि॰
इति नातदुपपादयति नासत इति असतःपरिणामिनोदेहस्यभा॰
वोपरिणामित्वंनविद्यते सतोपरिणामिनआत्मनोभावःप
रिणामित्वंचनविद्यते अनयोरुभयोर्देहात्मनोरंतस्तत्वद॰
र्शिभिर्दृष्टः निरूपणस्यनिर्णयांतत्वान्निर्णयएवांतःशब्दे
नोक्तःअसतोदेहस्यासत्वमेवसतआत्मनःसत्वमेवस्वरू
पमितिनिर्णयोदृष्टइत्यर्थः अनाशीपरमार्थोसौअंगेरस्य
पगम्यते यत्तुकालांतरेणापिनान्यसत्तामुपैतिवैपरिणा
मादिसंभृतिंतदुक्तंत्वत्पतंत्रेकिमितिवैत्सवोक्तेःयद्वासत्
दसच्छब्दौसत्कर्मासत्कर्मपरौप्रशस्तेकर्मणितथासच्छ
ब्दःपार्थयुज्यते अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत् ।
असदित्युच्यतेपार्थेत्यादिवक्ष्यमाणत्वात् तथासतोदुष्ट
कर्मणःसकाशात्भावःसुखंनविद्यतेतथासतःसुकर्मणो
युद्धादितोभावोदुःखंनविद्यते अनयोरुभयोःसदसत्कर्म
णोःसुखदुःखकारणत्वरूपोंतोनिर्णयस्तत्वदर्शिभिर्दृष्टः वधारितः
युद्धंतत्क्षत्रियस्यप्रशस्ततरं अतःपापमेवाश्रयेदस्मानिति
शोकंजहीतिभावः भवत्यस्मिन्नत्प्रयोजनिकेच्छेतिभावः
सुखंनभवतितादृगिच्छायस्मिन्सोभावोदुःखंयत्वसतोवि

चनास्तिप्रबाधितत्वात्०

गी०
टी०
द्वि०

१०८

स्वस्यभावः सत्वं नास्तिमृषात्वात् सतो ब्रह्मणोऽसत्वं सजाती-
यविजातीयस्वगतभेदशून्यंब्रह्मैवस्वप्रकाशरूपं सत् घटः स
न्नित्यादौ च घटादितादात्म्यापन्नं तदेव भातीति सजातीयाज्जडा
द्भेदः स्वगतो गुणाद्भेदो नास्ति प्रतियोगिनोभावात् तथा च श्रु
तिः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य ए
तदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसि श्वेतकेतो इति उ
पसंहरंती उक्तभेदशून्यमेकं सत्यमाह वाचारंभणं विका
रो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिर्विकारस्यानृ
तत्वमाह सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्र
तिष्ठा इति श्रुतिर्विकारस्य चितिकल्पितत्वमाहेति तत्र वि
श्वस्य मृषात्वे जन्माद्यस्य यत इति सूत्रे यतो वा इमानि भूतानि
भूतानि जायंते इत्यादिश्रुतौ जन्माद्युक्तेरीक्षतेर्नाशब्दमि-
ति सूत्रे स ऐक्षतेति श्रुतौ चेश्वरस्येक्षापूर्वकर्तृत्वस्य लोकव
त्तु लीलाकैवल्यमिति सूत्रे आप्तकामस्य का स्पृहेति श्रुतौ च
प्रयोजनाभावेऽपि सृष्टेः वैषम्यनैर्घृण्ये न सापेक्षत्वादिति
सूत्रे पुण्येन पुण्यं लोकं नयतीत्यादिश्रुतौ च कर्मसापेक्ष
त्वेन वैषम्यस्य तेजोऽतस्तथा ह्याहेति सूत्रे वायोरित्यादिश्रुतौ
च तेजआदेर्वाय्वादिजन्यत्वमस्य विपर्ययेण तु क्रमोऽत उ ७०
पपद्यते चेति सूत्रे पृथिव्यप्सु प्रलीयत इत्यादिश्रुतौ पृथिव्या
देरबादौ लयस्य चोक्तेरयुक्तत्वापत्तेः न हि कल्पिते विरोध
परिहारो युक्तो किंच विश्वस्य मृषात्वे सर्वज्ञेन तत्पालनाद्य
नुपपत्तिः न हि शुक्तिरूप्यं मृषेति जानन्पालयति नैवेंद्र
जालिकवत्तदुपपत्तिः प्रतारकेस्यैंद्रजालिकस्योत्पादकत्व
पालकत्वाद्यभावात् एतन्मंत्रादिप्रयोगादित्थं लोकाः भ्रा
म्यंतीति गुरूपदेशादिना ज्ञातमंत्रादिप्रभावस्यापरोक्षत्वा
भावेऽपीममाश्चर्यं पश्यतेति हि वदति स्वमायामोहं विनामा

वतोस्ययदिकार्यमात्रस्यासत्वप्रतीतिःस्यात्तर्हियेनतच्छुत्वंश्रो
त्यापुरुषेणकथितानीत्येवंमनसिनिधायात्रश्लोकेश्रीकृष्णे
नसत्कार्यवादएवोक्तः येकेचिदत्रासच्छब्देनदेहादिका॰
र्यस्यतुच्छत्वंप्रतिपादयंतितेषामज्ञानमोहितानांभगवदा
शयानभिज्ञानांपरिछिन्नबाह्यत्वस्वभावत्वादसन्नित्यादि
जल्पनमुचितमेव अन्यत्वत्रसत्कार्यवादस्यासंगतत्वात्तत
त्परोऽयंश्लोकः देहात्मस्वभावाज्ञानमोहितस्यतन्मोहशा
न्तयेउभयोर्नाशित्वानाशित्वरूपविवेकएवात्रकथ्यः स
एवगतासूनगतासूंश्चनानुशोचन्तीतिप्रस्तुतः सएवअ॰
विनाशितु अन्तवन्तइमेदेहाइत्यनेनतत्रउपपादितइतिय॰
थोक्तएवार्थः इतिवदन्तितेस्माभिःप्रष्टव्याः भवद्भिर्यदुक्त
मत्रसत्कार्यवादस्यासंगतत्वं तत्कथमितीत्याभगवतःपूर्वा
परोक्तिविरोधत्वेनवाग्रंथस्यप्रकरणविरोधत्वेनवाभवत्स
म्मतविरोधत्वेनवेतिविकल्पनाद्यः ऊर्ध्वमूलोऽवाक्शाखएष
सोऽश्वत्थःसनातनइतिश्रुत्यर्थरूपायाः ऊर्ध्वमूलमधःशा॰
खमश्वत्थंप्राहुरव्ययमित्यादिश्लोकेविरोधात् असत्यमप्र
तिष्ठंतेजगदाहुरनीश्वरमित्यादिनाकार्यासद्वक्तॄणामासुरत्व॰
प्रतिपादनाच्च नापिद्वितीयः कार्यस्यसत्वमुक्त्वापुनस्तस्या
सत्वकथनासम्भवाद्भगवतश्चोपदेशसमयेयथार्थकथ॰
नेनवंचकत्वप्रसंगात् अनाप्ततमत्वप्रसंगाच्च नतुदेहा॰
दिकार्यस्यासत्वकथनेविनार्जुनस्यमोहशान्तिःकथंभवे
दितिवाच्यं असत्योपदेशेनकस्यापिमोहनिवृत्त्यसंभवात्
भ॰ प्रत्युतमोहप्राप्तेरेवसंभवाद्भवतामप्यसम्मतत्वाच्च अन्यथासि
द्धांतभंगाच्च नापितृतीयः भगवतः सर्वज्ञत्वेनचपूर्वाप
रवचनस्याविरोधलेशगन्धाभावात् नापिचतुर्थः स्वप्र॰
कृतिकार्यदेहादिस्वभावनिरूपणप्रकरणस्यसत्वात् न
नुदेहात्मस्वभावाज्ञानमोहितस्यार्जुनस्यमोहशान्तयेयुः

गी. भयोर्नाशित्वानाशित्वरूपविवेकएवदृष्टः सएवगता
टी. सून्गतासूंश्चेतिप्रस्तुतः सएवाविनाशिनस्तुतन्नवंतइमेदे
हि. हाइत्यनन्तरमुपपादितइतियथोक्तएवार्थइतिचेन्नमृतप
पन्नत्वात् तथाहिदेहात्मनःस्वरूपस्यसत्यत्वज्ञानंविना
तयोःस्वभावज्ञानेनस्यात्तदभावेतन्मोहशान्त्यभावः गता
109 विनाशित्वा सूंस्त्वागतासूंस्त्वविनाशित्वांत्तवत्वानन्तवत्वादयः पूर्वापर
पर्यस्याःशास्त्रार्थेदेहात्मनोःकार्यत्वाकार्यत्वप्रतिपा
दनेनसत्कार्यवादमेवद्योतयति तथाचात्रप्रयोगः यद्य द्वे
त्कार्यंतत्तद्गतासुत्वमन्यकार्यत्वात् घटादिवत् यद्यदका
र्यंतत्तदगतासुत्वमन्यकार्यत्वाभावात् यद्यत्कार्यंतत्तद्वि
नाशित्वंघटादिवत् यन्नैवंतन्नैवंचेतनवत् यद्यत्कार्यंत
तन्नैवं^ त्तदन्तवत्वंयन्नैवंजीववदित्येवमनुमानसहकृतार्थद्वारा
तथान्नैवसदसद्भावाभावशास्त्रप्रयोगाच्छब्दद्वारापिचसत्का
र्यवादस्यसंगतिरत्येवनत्वसत्कलेशगंधस्पर्शः नापिपं
चमःभवतः सत्कार्यांगीकारत्वेनासत्कार्यांगीकारात् अ
न्यथासिद्धांतभंगात्सांतमतप्रवेशाच्च नन्वस्मिन्प्रकरणे
सत्कार्यवादरूपस्यशास्त्रस्यपादाभावात्तदसंगतत्वमस्त्वे त्तिच
वमन्याकलितोक्तित्वात् तथाहि नत्वेवाहमित्यस्यभाष्ये
भवद्भिर्यद्वाधितानुवृत्तेःखण्डनेकृतंतदप्यसंगतत्वमेव
समग्रगीताशास्त्रेक्वचित्तरेपिप्रबोधितानुवृत्तिशास्त्रस्यपा
दाभावत्वात् योदोषोस्माकंदीयतेसःयुष्माकमपिस्यात् य
त्रोभयोःसमोदोषःपरिहारोपिवासमः नैवपर्यनुयोक्तव्य
स्ताहगर्थविचारणइतिवचनात् तस्मात्सत्कार्यवादस्यना तं^
संगतत्वमित्यलंकुतर्कनिरासैः १६ ॥

मधुसूदनी टी. ॥

+यत्कालतोदेशतोवस्तुतोवापरिच्छिन्नंतदसत् यथाघटा
दिजन्मविनाशशीलंप्राक्कालेनापरकालेनपरिच्छिद्यते

+ ननुभवतुघटादेकत्वेतथापितस्यासत्यत्वमेवरूपःसत्यएवसंसारः तथाचशीतोष्णादिसुखदुःखकारणे
सतितद्भागस्यावश्यकत्वात्तत्यस्यचज्ञानाद्विनाशानुपपत्तेः कथंतितिक्षाकर्थंवासोमृतत्वायकल्पत
इतिचेन्नकल्पनस्यापिद्वैतप्रपंचस्यात्मनिकल्पितत्वेनतज्ज्ञानाद्विनाशोपपत्तेःशुक्तौकल्पितरजतस्यशु
क्तिज्ञानेनविनाशवत् कथंपुनरात्मानात्मनोःप्रतीत्यविशेषेप्यात्मवदनात्मापिसत्योनभवेत् अनात्म
वदात्मापिमिथ्यानभवेत् उभयोस्तुल्ययोगक्षेम त्वादित्याशंक्यविशेषमाह भगवान् +

ध्वंसप्रागभावप्रतियोगित्वात् कदाचित्कं कालपरिछिन्नं
मित्युच्यते एवं देशपरिछिन्नमपितदवृत्तित्वेनसर्वदेशावृ
त्तित्वात् कालपरिछिन्नस्यदेशपरिछिन्ननियमेपिदेशपरि
छिन्नत्वेनाभ्युपगतस्यपरमाण्वादेस्तार्किकैःकालपरिच्छेदा
नभ्युपगमाद्देशपरिच्छेदोपिपृथगुक्तः सचकिंचिद्देशवृत्ति
रत्यंताभावः एवंसजातीयभेदःस्वगतभेदश्चेतित्रिविधोभे
दोवस्तुपरिच्छेदःयथावृक्षस्यवृक्षांतरात् शिलादेःपत्रपु
ष्पादेश्चभेदः पृथग्वाजीवेश्वरभेदोजीवजगद्भेदोजीवपर
स्परभेदः ईश्वरजगद्भेदोजगत्परस्परभेदइतिपंचविधो
वस्तुपरिच्छेदः कालदेशाऽपरिछिन्नस्याप्याकाशादेस्तार्कि
कैर्वस्तुपरिच्छेदाभ्युपगमात्पृथङ्निर्देशःएवंसांख्यमतेपि
योजनीयं एतादृशस्यासतःशीतोष्णादेःकृत्स्नस्यापिप्रपंच
स्याभावः सत्तापारमार्थिकत्वस्यानुनसत्ताकतादृशपरि स्तू
च्छेदशून्यत्वंनविघटनेनसंभवति घटत्वापटत्वयोरिवपरि॰
छिन्नत्वापरिछिन्नत्वयोरेकत्रविरोधात् नहिदृश्यंकिंचित्
क्वचित्कालेदेशेवस्तुनिवाननिषिध्यते सर्वत्राननुगमात्
नवासद्वस्तुक्वचिद्देशेकालेवस्तुनिवानिषिध्यतेसर्वत्रानु
गमात् तथाचसर्वत्रानुगतेसद्वस्तुन्यननुगतव्यभिचारि नि॰
वस्तुकल्पितंरज्जुखंडइवानुगतेव्यभिचारिसर्पधारादिकमि
तिभावः ननुव्यभिचारिणःकल्पितत्वेसद्वस्त्वपिकल्पितं॰
स्यात्तस्यापितद्व्याहृतत्वेनव्यभिचारित्वादित्यतआह नाभा
वोविद्यतेसतइति सदधिकरणकभेदप्रतियोगित्वंहिवस्तु
परिछिन्नत्वं तच्चनतद्व्याहृतत्वेनतच्छशविषाणादेरस
त्वायोगात् सद्धामभावोनिरूप्यतइतिन्यायात् एकस्यैव
स्वप्रकाशस्यनित्यस्यविभोःसतःसर्वानुस्यूतत्वेनसद्याकि
भेदानभ्युपगमात् घटःसन्नित्यादिप्रतीतेः सार्वलौकिक
त्वेनसतोघटाधिकरणकभेदप्रतियोगित्वायोगात् प्रभा॰

गी॰ वः परिच्छिन्नत्वं देशतः कालतो वस्तुतो वा सत्तः सर्वानुस्यूतस
टी॰ न्मात्रस्य न विद्यते न संभवति पूर्ववद्विरोधादित्यर्थः न तु स
द्वि॰ न्मात्रं किमपि वस्तु नास्त्येव यस्य देशकालवस्तुपरिच्छेदः प्रति
षिध्यते किं तर्हि सत्त्वं नाम परं सामान्यं तदाश्रयत्वेन द्रव्यगुण
110 कर्मसु सद्व्यवहारः तदेकार्थसंबंधेन सामान्यविशेषसम
वायेषु तथा चासतः प्रागभावप्रतियोगिनो घटादेः सत्त्वका
रण[illegible]व्यापारात् सतोपि तस्याभावः कारणनाशाद्भवत्ये
वेति कथमुक्तं नासतो विद्यते भावो नाभावो विद्यते सत इति
एवं प्राप्ते परिहरति उभयोरपीत्यर्धेन उभयोरपि सदसतोः
सतश्चासतश्चांतो मर्यादा नियतरूपत्वं यत्सत्तत्सदेव यद
सत्तदसदेवेति दृष्टो निश्चितः श्रुतिस्मृतियुक्तिभिर्विचारपू
र्वकं कैस्तत्त्वदर्शिभिः वस्तुयाथात्म्यदर्शनशीलैर्ब्रह्मविद्भि
र्न तु तार्किकैः अतः तार्किकाणां न विपर्ययादनुपपत्तिः
तु शब्दो ऽवधारणे एकांतरूपो नियम एव दृष्टो न त्वनेकांतरू
पोन्यथाभाव इति तत्त्वदर्शिभिरेव दृष्टो नातत्त्वदर्शिभिरि
ति वा तथा च श्रुतिः सदेव सोम्येदमग्र आसीदेकमेवाद्विती
५४ यमित्युपक्रम्यैदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतके
तो इत्युपसंहरंती सदेकं सजातीयविजातीयस्वगतभेदशू
न्यं सत्यं दर्शयति वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव
सत्यमित्यादिश्रुतिस्तु विकारमात्रस्य व्यभिचारिणो वाचारं
भणत्वेनानृतत्वं दर्शयति अन्नेन सोम्य शुंगेनापो मूलम
न्विच्छाद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगे
न सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदाय
तनाः सत्प्रतिष्ठा इति श्रुतिः सर्वेषामपि विकाराणां सति क
ल्पितत्वं दर्शयति सत्त्वं च न सामान्यं तत्र मानाभावात् पदा
र्थमात्रसाधारण्येन सत् सदिति प्रतीत्या द्रव्यगुणकर्ममात्र
वृत्तित्वस्य सत्त्वस्योपपादकस्य कल्पनात् वैपरीत्यस्यापि सुवा

वचनात् एकरूपप्रतीतेरेकरूपविषयनिर्वाह्यत्वेन संबंध॰
भेदस्य स्वरूपत्वस्य च कल्पयितुमनुचितत्वात् विषयस्या
नुगमेपि प्रतीत्यनुगमे जातिमात्रोच्छेदप्रसंगात् तस्मादे
कमेव सद्वस्तु स्वतःस्फुरणरूपं ज्ञाताज्ञातावस्थाभासकं स्व
तादात्म्याध्यासेन सर्वत्र सद्व्यवहारोपपादकं सन् घट इति
प्रतीत्या तावत्सद्व्यक्तिमात्राभिन्नत्वं घटे विषयीकृतं त्व॰
सत्तासमवायित्वं अभेदप्रतीतेर्भेदघटितसंबंधानिर्वाह्य॰
त्वात् एवं द्रव्यं सद्गुणः सन्नित्यादिप्रतीत्या सर्वाभिन्नत्वं सतः
सिद्धं द्रव्यगुणादिभेदासिद्धा च न तेषु सत्त्वं नाम धर्मः कल्प्य
ते किंतु सति धर्मिणि द्रव्याद्यभिन्नत्वं लाघवात् तच्चास्त
वेन संभवतीत्याध्यासिकमित्यन्यत् तदुक्तं वार्तिककारैः
सत्तातोपि न भेदः स्याद्द्रव्यत्वादेः कुतोन्यतः एकाकारा हि सं
वित्तिः सद्द्रव्यं सन् गुणो यथेत्यादि सतापि सतो भेदिकानस्या ना॰
प्रसिद्धेः द्रव्यत्वादिकं तु सद्धर्मत्वान्न सतो भेदकमित्यर्थः अ
त एव घटाद्भिन्नः पट इत्यादिप्रतीतिरपि न भेदसाधिका घट
पटतद्भेदानां सदभेदेनैक्यात् एवं यत्रैव न भेदग्रहस्तत्रैव
लब्धपदासमीसदभेदप्रतीतिर्विजयते तार्किकैः कालप
दार्थस्य सर्वात्मकस्याभ्युपगमात्तेनैव सर्वव्यवहारोपपत्तौ
तदतिरिक्तपदार्थकल्पने मानाभावात्तस्यैव सर्वानुस्यूतस्य
सद्रूपेण च सर्वतादात्म्येन प्रतीत्युपपत्तेः स्फुरणस्यापि सर्वा
नुस्यूतत्वेनैकत्वान्नित्यत्वे विस्तरेणाग्रिमश्लोके वक्ष्यते तथा
च यथा कस्मिंश्चिद्देशे काले वा घटस्य पटादेर्न देशांतरे का॰
लांतरे वा घटत्वं एवं कस्मिंश्चिद्देशे काले वा घटस्यान्यत्राघ
टत्वं शक्रेणापि न शक्यते संपादयितुं पदार्थस्वभावभंगा
योगात् एकस्मिंश्चिद्देशे काले वा तुच्छस्यान्यत्र सद्रूपत्वं शा
क्रेणापि न शक्यते संपादयितुं पदार्थस्वभावभंगायोगात्
एवं कस्मिंश्चिद्देशे काले वा सतो देशांतरे कालांतरे वासत्त्व
न्य॰

गी॰
टी॰
द्वि॰

नशक्यतेसंपादयितुंयुक्तिसाम्यात् अतउभयोर्नियतद्रूप
त्वमेवदृष्टव्यमित्यद्वैतसिद्धोविलंबः अतःसदेववस्तुमाया
कल्पितासन्निहत्याऽसत्त्वायकल्पतेमनूमात्रदृष्ट्याचति
तित्वाप्युपपद्यतइतिभावः ॥ ...कोज्ञानामिदं
विपरीतच्छिन्नत्वापत्तेर्ज्ञानानामकत्वमप्युदितं तद्विनाशापत्ति
अन्यथानउत्पत्तेः नचानानाथातिकाज्ञानवद्रूपस्यसत्ता
स्यादर्थानामनपिविरोधादवयवंज्ञानज्ञानवदंशत्वात्
तद्रूपिविषयोविद्व एवंकदर्थंज्ञानस्यपीतिविषनीतिद्रूपस
त्वमर्थेविज्ञानविषयत्वंनिविशेषत्वकालपरिच्छिन्नत्वात्
दृश्यस्यकथंचिद्रूपत्वसनोदेशकालवस्तुपरिच्छेदद्रूप
त्वमिथ्यात्वंचत्वात् १६ ॥

सदानंदी टीका ॥

नन्वस्तुप्रकृष्टैकत्वंतथाप्यस्यनप्रकृता शीतोष्णादेस्तुबंधः
स्यसद्धेतोर्वस्तुत्वावशात् १ एवंकथंतितिक्षास्यात्कथंवाबं
धनाशने सत्यामपितितिक्षायांजातुस्यादात्मनःक्षयः २
इत्याशंक्याहभगवान्मंगलायतनेहरिः समस्तस्यप्रपंच
स्यसद्धेतोर्बंधरूपिणः ३ स्वाज्ञानात्कल्पितत्वेनस्वात्मबो
धोदयात्क्षयः कल्पितस्यभुजंगस्यरज्जौतज्ज्ञानतःक्षयः ४
दृष्टोयथात्रचैतस्यशीतोष्णादेस्तयोर्धिया अन्योन्याध्यास
तोयस्मात्सदात्मानात्मनोर्द्वयोः ५ शीतोष्णादिजगत्सर्वंभा
तितस्मात्स्रगजगत् अन्योन्याध्यासतत्त्वेकथमेकस्यस
त्यता ६ इतरस्यैवमिथ्यात्वमितिचेच्छृणुयुक्तितः परिच्छि
न्नेद्रियग्राह्यदेशतःकालतोर्थतः ७ तज्जन्मनाशशील
त्वादसद्रज्जुभुजंगवत् यथास्वप्नेस्वप्नासर्वंसत्कुंभादिक
मीक्ष्यते ८ तथैवंबंधशोहेनशोकंविश्वंस्वप्नाविलेनाथके
सकदाचित्स्यात्स्वात्मंकुंभादिकंयथा ९ असतोविद्यमान
स्यशीतोष्णादेर्नचालिता सद्धेतोर्निष्प्रमाणत्वाद्विकारत्वा

च्चलत्वतः १० घटांकुरादियत्कार्यं दृष्टंतत्कारणं हि तत् आ
काशादिश्चिनःकार्यंतद्दृष्ट्येवंप्रतीयतां ११ असतश्चेदिदंकार्यं
सर्वस्मादसदन्विते असतःकारणत्वंचनिरात्मत्वान्नसिध्य
ति १२ ध्रुवःसत्कृतेकार्यमयस्कांतोमणिर्यथा कारण
त्वंभवेदेवंकुर्वतोतिशयःकृतः १३ इत्येवंवार्तिकेध्यलका
र्यस्यगतिरीरिता अधिष्ठानस्यसत्यत्वसिद्धेनत्वन्यसिद्धये
यथाघटादिसंस्थानेमृदोभिन्नंनचक्षुषा दृश्यतेसकलंतद
स्मतोभिन्नंजगन्नहि १५ शीतोष्णादेःप्रपंचस्यसहेतोर्नास्ति
सत्यता अन्योन्यव्यभिचारित्वात्कल्पितत्वाच्चिदद्वये १६ अज्ञा
नज्ञापकत्वंहिप्रामाण्यंशास्त्रविन्मते नाज्ञातत्वंप्रपंचस्या
ज्ञानकार्यस्यजाड्यतः १७ सर्वत्रानुगतेसत्यंकल्पितंव्यभिचा
रियत् विश्वंरज्जौयथासर्पदंडादिसन्नतत्तथा १८ सन्घटःस
न्पटोस्तीत्यमनुस्यूतेसदद्वये नघटःपटइत्येवंव्यभिचारिप्र
कल्पिते १९ सामानाधिकरण्येनतुमिथ्यासत्त्ववस्तुनोरपि दृष्टंनी
लंनभोवारिमरीच्यादाविदंयथा २० तस्माद्बंधस्यदेहादेःसहे-
तोर्नास्तिसत्यता तथासतश्चिदानंदापरिछिन्नस्यवस्तुनः २१
अभावोसत्यतानास्तिपरिछिन्नत्वलक्षणः सर्वत्राव्यभिचारि
त्वादनुस्यूतस्यचित्सतः २२ एवंसदसतोरात्मानात्मनोरनयो
र्द्वयोः निर्णयःसत्सदेवासदसदेवेतिनान्यथा २३ दृष्टः
स्तद्दृष्टस्तद्भावोयाथात्म्यंब्रह्मणःसतः तत्वंद्रष्टुंसदाशीलंये
षांतेतत्वदर्शिभिः २४ त्वमप्येवंसमाश्रित्यदृष्टिंतांतत्वदर्शि
नां शोकमोहौपरित्यज्यतितिक्षस्वगतागतं २५ दृश्यस्वरूप
तोप्यस्तंविद्धनेतान्तदात्मकं संसर्गमात्रमध्यस्तमात्मनो
स्मिन्ननात्मनि २६ प्रातीतिकशरीरत्वाद्दृश्यंमिथ्याजडंत्वदं
अबाध्यत्वाच्चिदात्मत्वादात्मासत्यःस्वयंप्रभुः २७ ॥ १६ ॥

नीलकंठी टीका ॥

नत्वप्तिसमाधाटीत्यक्तोपायेरात्मनःसमडःखसुखत्वेपिसो

गी॰ पाधिकदशायांतन्नाशःपिंडस्यदग्धृत्वमिवतस्माद्दुःखित्वंउ
टी॰ पाधिस्वमूलप्रकृतेर्व्यापिकायामायाकृतमितितस्मात्तत्त्वज्ञाननिमि
द्वि॰ लोच्छेदमर्हत्यतःसोऽमृतत्वायकल्पतइत्युपपन्नमित्याशंक्या
ह नासतइति प्रमात्रादेरागमापायित्वेनकादाचित्कत्वात्
ज्वरगादिवत्असतःभावःसत्ताकालत्रयेपिनास्ति अयमर्थः
प्रमात्रादिर्मूलाज्ञानेनचिदात्मनिकल्पितः मूलाज्ञानस्यचा
त्मज्ञानेननिवृत्तौकारणाभावात्पुनःप्रमात्राद्युद्भवोस्तीति
निष्प्रत्यूहममृतत्वंज्ञानात्सिध्यतीति नन्वप्रतीतिमात्रात्प्र
मात्रादेर्मिथ्यात्वोपगमेआत्मनोपिसुषुप्त्यादावप्रतीयमानत्वा
विशेषान्मिथ्यात्वमस्तु उभयोर्वासत्यत्वमस्त्वित्याशंक्याह
नाभावोविद्यतेसतइति सतस्तुनःप्रभावोऽसत्त्वंकदाचिद
पिनविद्यते सुषुप्त्यादावपिअनुभूतयोः सुखाज्ञानयोःसु
खमहमस्वाप्सं नकिंचिदवेदिषमितिउत्थानेपरामर्शदर्शना
त् तदनुभवमंतरेणानयोःपरामर्शासंभवात् अतःसतोऽ
सत्त्वंनास्ति श्रुतिरपिसुषुप्तिकैवल्ययोःप्रमात्राद्यभावेदृशोऽ
नित्यत्वंचाह यद्वैतन्नपश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टु
र्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्ति
ततोन्यद्विभक्तंयत्पश्येदिति यदिप्रमात्रादिःसत्यस्तर्हिस
तोर्थस्यसुषुप्त्यादावदर्शनेसांनिध्याभावाद्वाद्रष्टुर्दृग्लोपा
द्वावक्तव्यः नाद्यःआत्मनिरूपणेनदृष्टस्वभावस्यान्यत्रसद्भावक
ल्पनायोगात् नांत्यःउदाहृतयाश्रुत्यैवतन्निषेधात् तस्मा
दुभयोरपिसत्यत्वेनमिथ्यात्वेनवासाम्यमयुक्तं नन्वसतआ
काशादेःक्वचिदपिदेशेकालेचाभावोयद्यपिनास्तितथापि
सतएवपरमाणोर्देशांतरेऽभावोस्तिप्रागसतोपिघटादेर्भा
वस्तुदृष्टःतत्कथमुच्यते नासतोविद्यतेभावोनाभावोवि
द्यतेसतइत्याशंक्याविद्वदनुभवेननिरस्यति उभयोरपीति
अंतोयाथात्म्यं यथास्वमनभःकुंभरज्जुरगादयोनित्यत्वा

नित्यत्वसत्यत्वासत्यत्वादिधर्मोपितत्तयानिश्चितास्त्रपिप्रबोधेन
बाध्येतेतद्वज्जाग्रद्दृष्टाअपितेतत्वज्ञानेनबाध्येते नतुजाग्रद्द्र
स्नावस्थात्वस्त्रगतनभआदौनित्यत्वादिनिश्चयोभ्रमइतिचे
त् अनादिकालप्रवृत्तप्रागभवीयसंस्कारवशात् जाग्रन्नभ
आदावपिसभ्रमएवेतितत्वं नतुस्वरूपसदेवरजतादिकं
शुक्त्यादावध्यस्यतेनत्वसनुशशशृंगादिकं, गगनादिकंत
त्वज्ञोन्नास्वरूपेणअसदपिकथमात्मन्यध्यस्यतइतिचेन्न अ
ध्यासेहिपूर्वानुभवमात्रमपेक्षतेनत्वनुभूतस्यस्वरूपेणस
त्वमपि दर्पणप्रतिबिंबितेगगनेपिनैल्याध्यासदर्शनात्
नचगगनेनैल्यंस्वरूपेणसत्यमस्ति अथचान्यत्राध्यस्यते
तस्माद्भ्रमपरंपरायाःसंभवात् स्वप्नदृष्टभिरिवास्माभिरदृ
ष्टमपिसदसतोर्याथात्म्यंप्रबुद्धैर्दृष्टंशक्यमेव तथाचश्रु
तयः नेहनानास्तिकिंचन अस्तीत्येवोपलब्धव्यः अतोन्य
नॉ दार्तमित्याद्याःआत्मनोःसत्वंचात्मनस्त्वसत्वंप्रतिपादयंति ९
एवंसतोज्ञानेनासतोबाधात्केवलंसिद्ध्यतीतिभावः १६ ॥

आनंदी टीका

एतदेवप्रपंचयति असतःआगमापायिनःसुखदुःखादेः न
विद्यमानस्यचभावःसत्तास्थैर्यंनास्ति सतःसदेकरूपस्यात्म
नोनित्यस्याभावोविनाशोनास्ति उभयोरप्यनयोःसदसतोर
न्तोमर्यादाव्यवस्थातत्वदर्शिभिःसदसतोर्याथात्म्यवेदिभिर्दृष्टो
निश्चितःअन्तशब्दोत्रमर्यादावाचीग्रामान्तइतिवत् १६ ॥

\+ अथोपपन्नुपन्यासस्सर्वमात्मनोवेदकैक जन्मविनाशवतस्तदभावं

रामकंठी टीका

स्वभावस्यपारमार्थिकीसत्ता तथानत्वमेयरूपस्यदेहादेस्तु प्रतिपादयितुमाह +

इहस्वभावादेवयदविद्यमानंवस्तुतस्यासतोभावःसत्तानास्ति
तथैवस्वभावतःसतोनित्यस्याभावोविनाशोनास्ति एतयोः
सदसतोःप्रकाशतमसोरिवात्यन्तपरस्परविरोधात् किन्त्वे(
तयोर्द्वयोरपितत्वविद्भिःसाक्षात्कृतपरमार्थैरन्तोनिष्ठानिश्च
योदृष्टः(विज्ञातो नत्वतत्वविद्भिरित्यर्थः चिंत्याद्भुतस्वभावपरमे
श्वरमायाशक्त्युद्भावितविषयप्रत्ययतयासत्यमात्मानमप्राप्य

गी.
टी.
हि.

वस्तुछन्नत्वाद्वासदनित्यत्वादिनावास्तवसद्भावरहिते देहादि
वस्त्विदन्तया संवेद्यमानत्वात्सत्त्वेन प्रतिपद्यन्ते परमार्थत
स्तु सच्चित्स्वमात्मतत्त्वमप्रत्यभिज्ञायमानत्वादसत्त्वेन प्रतिप
द्यन्ते [illegible] १६ ॥

113

तासिंवी टीका

अथोपपत्तिरेवंमात्मनस्तात्त्विकीसत्तांदेहादेस्तावश्यकम
भावंसामान्यतः प्रतिपादयति नेति स्वभावादेवासतोवस्तु
नोभावः सत्तानास्ति नैवतयोः सदसतोः प्रकाशतमसोरि
वपरस्परविरुद्धयोः स्वभावविपर्ययेति १६ ॥

+स्वभावतः सतोनि
त्यस्याभावोनास्ति

x तथाचशास्त्रम् नहि
स्वभावोभावानांव्याव
र्ततेतौष्ण्यवद्रवेरिति एतयो
र्द्वयोरपितत्त्वविद्भिर्वस्तु
याथात्म्यविद्भिरन्तोनिश्च
योदृष्टोवितातः सत्ता
देवास्तुदसदेवेति

पंचोली टीका

तत्त्वविचारतोपि शोकमोहौ अकृत्वा शीतोष्णादिसहनेयुक्त
मित्याह नासतइति असतः अनात्मधर्मत्वादविद्यमानस्य शी
तोष्णादेः सकारणस्य अविद्यासहितस्य भावः सत्ता नविद्यते त
थाच सतः आत्मनः अभावः अविद्यमानता नविद्यते तु पुनः तत्त्व
दर्शिभिः ब्रह्मणोयाथात्म्यदर्शनशीलैः उभयोरपि अनयोः स
दसतोः आत्मानात्मनोः अंतो निर्णयोपि दृष्टः १६ ॥

रणवीरसमिद्योयिनी ॥

ननु यद्यपि विषयसन्निकर्षजनितशीतोष्णादिद्वन्द्वसुख
दुःखसहनं महाफलं तथापि तदतिदुःसहं कथं सोढव्य
तत्सहनेनैव कदाचिदात्मविनाशोपि संभाव्यते इत्याशंक्योपप
त्त्युपन्यासपूर्वमात्मनः पारमार्थिकी सत्तां तथा तद्व्यस्य
देहादेर्जन्मविनाशवत्त्वात्तदभावं प्रतिपादयितुमाह नास
तइति यत्कालतो देशतो वस्तुतो वा परिच्छिन्नं तदसत् स्वभा
वादेवाविद्यमानं वस्तु तस्यासतोभावः सत्तापरिच्छेदशून्यता
नास्ति तथैव स्वभावतः सतोनित्यस्य कालादिभिरपरिच्छि
न्नस्याभावोविनाशः परिच्छेदोनास्ति एतयोः सदसतोः प्रका

घातमसोरिवात्यंतं परस्परविरोध इति किंतर्हि योरप्युभयोरन्त
स्त्वविद्धिवेक्तयाथान्यविद्धिंतो निश्चयो दृष्टो निश्चितः न तु
तत्वदर्शिभिस्तेहि परमेश्वराद्भुतमायाविमोहितधियो यथार्थं
न जानंतीति अयं तत्वविचारणयात्मनो विनाशसंभावादेहादे
स्तसंभवाच्च सर्वं सोढव्यमिति भावः १६॥

मधुभाष

नासत इति असतः कारणस्य सतो ब्रह्मणश्चाभावो न वि
द्यते प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तमेति वचनात्
श्रीविष्णुपुराणे पृथग्विद्यत इत्यादरार्थः असतः कार
णत्वं च सदसद्रूपया चासौ गुणमय्या शक्त्यो विष्णुरिति च
श्रीभागवते असतः सदजायतेति च अव्यक्तेश्च संप्रदायत
श्चैतत्सिद्धमित्याह १६॥

भाषा अनुवाद

और जो कहो कि तोभी अति दुःसह शीत उष्णा कैसे कर सैहे और जो बडा क्लेश करिके सैहे तो कदाचित आत्मा का नाश होसकताहै यह शंका करि कहतेहै कि विचार से तो वे सहेजाय सकतेहै जैसे अति तुछ और अनात्म धर्म अर्थात् शरीरके धर्म जो शीत उष्णा प्रभृति उनका आत्मासे कुछ सम्बन्ध नहीहै और सत्यभाव जो आत्मा उसका कभू विनाश होता नही यथार्थदर्शी तत्वज्ञानी इसी प्रकारसे सत और असत दोनो पदार्थकी निर्णय कियाहै इससे विवेक ज्ञानके द्वारा शीत उष्ण आदिको सह्य करो १६ ॥

दोहा॥

जोअसतसोहैनहिसतको नहिअभाव इनदोनोके अंतको
ततदर्शि लखिपाव १६॥

115

अविनाशितुतद्विद्धि येनसर्वमिदंततं विना॰
शमव्ययस्यास्य नकश्चित्कर्तुमर्हति १७ ॥

शांकरभाष्यं ॥

किं पुनस्तत् यत् सदेव सर्वदास्तीत्युच्यते अविनाशीति अवि॰
नाशि नविनष्टुं शीलं यस्येति तुशब्दः सतोविशेषणार्थः त॰
द्विद्धि विजानीहि किं येन सर्वमिदं जगत्ततं व्याप्तं सदाख्येन ॰
ब्रह्मणा साकाशमाकाशेनेव घटादयः विनाशमदर्शनम
भावमव्ययस्य नव्येतिउपचयापचयौनयाति इत्यव्ययं तस्या
व्ययस्य नैतत्सदाख्यं ब्रह्मस्वेनरूपेणव्येति नव्यभिचरति नि
रवयवत्वाद्देहादिवत् नाप्यात्मीयेनात्मीयाभावात् यथा देव
दत्तो धनहान्याव्येतिनत्वेवं ब्रह्मव्येत्यतोऽव्ययस्यास्य ब्रह्मणो
विनाशं नकश्चित् कर्तुमर्हति नकश्चिदात्मानं विनाशयितुं
शक्नोति ईश्वरोप्यात्माहि ब्रह्मस्वात्मनिच क्रियाविरोधात् १७

आनन्दगिरिकृतटीका ॥

ननुसदिति सामान्यं स्वरूपं वा प्रथमेतस्य विशेषसापेक्षतया
प्रलयदशायामशेषविशेषनाशे विनाशःस्यान्न चात्मादयो वि १
विशेषास्तदापि सन्तीतिवाच्यं आत्मातिरिक्तानां विशेषाणां ॰
कार्यत्वाङ्गीकारात् प्रलयावस्थायामनवस्थानादात्मनस्तु सा
मान्यात्मनोधर्म्मित्वेउक्तदोषोद्वितीयेतुस्वरूपस्यव्याहतत्वेक
ल्पितत्वाद्विनाशित्वमनुहृतत्वेन तस्यैव सामान्यतया प्रागु
क्तदोषानुषक्तिरिति मत्वानश्चादयति किंपुनरिति सामा
न्यविशेषभावशून्यमात्मैकरसंसदेवेत्यादिश्रुतिप्रमिते
सर्वविक्रियारहिते वस्तु प्रकृते सद्विवादितमित्युत्तरमाह
उच्यतइति आत्मनःसदात्मनोविनाशराहित्यविज्ञाने सर्व
जगद्व्यापकत्वंहेतुमाह येनेति आत्मनोविनाशाभावेयुक्ति

माह विनाशमिति आत्मनोविनाशमिच्छता स्वतोवा परतोवा
नाशस्तस्योच्यते नाद्यइत्याह अविनाशीति देहादिद्वैतमसत्त्वमुच्य
ते ततःसतोविशेषणं स्वतोनाशराहित्यं तस्यद्योतकोनिपा
तइत्याह तुशब्दइति आकांक्षापूर्वकं विशेष्यंदर्शयति किमि
त्यादिना विमतमविनाशिव्यापकत्वादाकाशवत् नह्यप्रसि
द्धमेवोदाहरणं किन्त्वप्रसिद्धमपीतिभावः नद्वितीयइत्याह
विनाशमिति नत्वव्ययस्यविनाशंकर्तुं कश्चिदर्हतीतिसम्बन्धः
विनाशस्यसावशेषत्वनिरवशेषत्वाभ्यां द्वैराश्यमाश्रित्यव्या
करोति अदर्शनमिति नकश्चिदस्याभावं कर्तुं शक्नोतीत्यत्र
हेतुमाह अव्ययस्येति अस्यहि स्वरूपेणवेति स्वसम्बन्धिना
वेति विकल्पयंदूषयति नैतदिति नहिनिरवयवस्य स्वाव
यवापचयरूपव्ययःसम्भवतीत्यत्रवैधर्म्यदृष्टान्तमाह देहा
दिवदिति द्वितीयंनिरस्यति नापीति तदेवव्यतिरेकदृष्टान्तेन
स्पष्टयति यथेति द्विविधेपिव्ययायोगेफलितमाह अतइति
किंच ब्रह्मपरतोननश्यत्यात्मत्वात्कूटवदित्याह नकश्चिदिति
आत्मत्वहेतोरसिद्धिमुद्धरति आत्माहीति तदात्म्यश्रुतिरत्र ही
तिहेतुःक्रियते अस्तुतर्हि स्वयमेव ब्रह्मस्यात्मनो नाशकत्व
हन्यनादिदर्शनान्नेत्याह स्वात्मनीति १७ ॥

स्वामिकृतटीका ॥

तत्रसत्त्वभावमविनाशवस्तुसामान्येनोक्तंविशेषतोदर्शयति
अविनाशीति येनसर्वमिदमागमापायिधर्मकंदेहादिकंततं
साक्षित्वेनव्याप्तंतत्तुआत्मस्वरूपमविनाशिविनाशशून्यंविद्धि
जानीहि तत्रहेतुमाह विनाशमिति आगमापायिधर्मकम
सद्दर्शयति ॥ १७ ॥

पिशाचभाष्य टी॰ ॥

किंपुनस्तत्सदेवसर्वदासदैवेत्युच्यते अविनाशीति विनष्टुंशी

लमस्येति विनाशि न विनाशि अविनाशि तच्छाश्वतो ऽसतो विशेष-
णार्थः नहि हि जानीहि येन सर्वमिदं जगद्व्याप्तं आकाशेनेव वि
नाशमदर्शनं घटादिवदस्याव्ययस्य ब्रह्मणः विनाशं कर्तुं नाली
ति न कश्चिदात्मानं विनाशयितुं शक्नोति १७ ॥

रामानुजभाष्य टी॰ ॥

आत्मनो विनाशित्वं कथमुपपद्यते इत्याह तदात्मतत्त्वमवि
नाशीति विद्धि येनात्मतत्त्वेन चेतनेन तद्व्यतिरिक्तमिदमचेत वि
नं तत्त्वं सर्वं ततं व्याप्तं व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनो
विनाशानर्हस्य तद्व्यतिरिक्तो न कश्चित्पदार्थो विनाशं कर्तुम
र्हति तद्व्याप्यतया तस्मात्स्थूलत्वात् नाशकं हि शस्त्रजलाग्नि-
वाय्वादिकं नाश्यं व्याप्य शिथिलीकरोति मुद्गरादयोऽपि वेगव
त्संयोगवायुमुत्पाद्य तद्द्वारेण नाशयति अत आत्मतत्त्वमवि
नाशि १७ ॥

अभिनवगुप्तकृतटी॰ ॥

यत्तत्त्वदर्शिभिर्दृष्टः स खल्वनित्यो नित्यो वेत्याशंक्याह तस्मा अविनाशीति
र्थं आत्मन विनाशी १७ ॥

परमार्थप्रपा टी॰ ॥

अथोक्तात्किं येनाध्यासाश्रयीभूतेनाधिकरणरूपेण सर्वमि
ह दं रूपजातं ततं विस्तारं प्राप्तं न हि सत्याश्रयव्यतिरेकेण सत्यभा
सते शुक्तिकायाश्च सत्वे रजतमिवेत्यर्थः अतोऽव्ययस्यास्य
विनाशं कर्तुमर्हति न कोपीत्यर्थः १७ ॥

वनमाली टी॰ ॥

नन्वीश्वरनित्यत्वे मानाभावात्तदृष्टांतेन कथं जीवानां नित्यत्वा
हमित्युक्तं नित्यत्वं सिद्ध्यति नचाविनाशी च वेयमात्मेत्या
दिना परमेश्वरनित्यत्वं सिद्धमिति वाच्यं तद्वाक्यानामुपासना
परत्वेनोपपन्नत्वात् उपासनापाश्रयो वितमग्निध्यायीतेत्या
दिवदसद्विषयकत्वादत आह अविनाशीति येन परं ब्रह्मणा

सर्वमिदंजगत्तेनव्याप्तंतत्तदविनाशिविद्धि अस्यसर्वव्याप-
कस्यविनाशंकर्तुंकश्चिन्नार्हति नहिव्याप्येननियम्येनव्याप
कस्यनियामकस्यविनाशःसंभवति सर्वस्यतदधीनसत्ताक
त्वाद्विनाशकाभावादव्ययस्य तथाचसर्वस्यमदधीनत्वाद्दे
शकालवस्त्वादिनासर्वैरवस्यममनाशोनास्तितथात्वदादी
नांचेतनानामस्मादृशानांनाशोनास्त्यनादिचेतनत्वादितिभावः १७

जन्ममैवेजयन्ती टी॰ ॥

एवंनत्वेवाहमितिद्वाभ्यामात्मनःसत्यत्वमुक्तंततोनासतइ
त्यनेनदेहानामपिसत्यत्वंप्रतिपादितमिदानीमुभयोःस-
त्यत्वेसत्येकतरस्यापिविनाशित्वाभावाद्युद्धकरणमित्या
शंक्य अविनाशीत्यारभ्यदेहीनित्यमवध्योयमित्यन्तेनदेहात्म
नोर्मिथोवैलक्षण्यंवदन्प्रथमंतावदात्मनोविलक्षणत्वमा
ह अविनाशीति तुशब्दोनिश्चयार्थकः तत्जीवस्वरूपंनि
श्चयेन अविनाशिजन्मादिषड्विकारशून्यंविद्धित्वंजानीहि
येनात्मरूपकेनदेहिनाइदंप्रत्यक्षादिविषयभूतंसर्वंदेवति
र्यगादिशरीरंततंदेहंदेहंप्रतिभिन्नभिन्नस्वरूपेणस्वसत्ता
नगुणेनव्याप्तमित्यर्थः अव्ययस्यविशेषेणयान्तिअपगच्छ
न्तिस्वरूपगुणादयोयस्यसव्ययःनव्ययःअव्ययस्तस्यसदै
कस्वरूपगुणकस्येत्यर्थः अस्याविनाशिनःविनाशंस्व
रूपाद्यन्यथाभावंकर्तुंकश्चिदपिवाय्वनलजलास्त्रादिपदा-
र्थःआत्मादिकोवानअर्हति नसमर्थोभवतीत्यर्थः १७

मधुसूदनी टी॰ ॥

\+ विनाशोदेशतःकालतोवस्तुतोवापरिच्छेदःसोऽस्यास्तीतिवि
स्व नाशिपरिच्छिन्नंनविद्यतेविनाशोयस्यतदविनाशिसर्वप्रकारपरिच्छेदशून्यं
तत्पूर्वतत्तद्रूपस्फुरणं तद्विद्धिजानीहि किंतत्येनसद्रूपेण
स्फुरणेनैकेननित्येनविभुनासर्वमिदंदृश्यजातंस्वतःसत्ता-
स्फूर्तिशून्यंततंव्याप्तं स्वसत्तास्फूर्त्याध्यासेनरज्जुशकलेनेव-

\+ नन्वेतादृशस्यसतोज्ञानाद्भेदेपिघटादिवदनात्मत्वापत्तेर्ज्ञानात्मकत्वमभ्युपेयं तच्चनाधात्विकं अन्यथाजडत्वापत्तेः तथा
चाधात्विकज्ञानरूपस्यसतोधात्वर्थत्वादुत्पत्तिविनाशवत्वात्घटज्ञानमुत्पन्नंपटज्ञानंनष्टमितिप्रतीतेश्च एवंचा
हंत्वंज्ञानामीतिप्रतीतेश्च तत्स्यसाश्रयत्वंसविषयत्वंचेतिदेशकालवस्तुपरिच्छिन्नत्वात् स्फुरणस्यकथं
निरूपस्यसतोदेशकालवस्तुपरिच्छेदशून्यत्वमित्याशंक्याह +

सर्पधारादिस्तस्मिन्समावेशिते तदविनाशेऽपि विद्वीत्यर्थः
कस्मात् यस्माद्विनाशे विच्छेदे अन्वयस्यापरिच्छिन्नस्यास्याः
परोक्षस्य सर्वानुस्यूतस्य स्फुरणरूपस्य सतः कश्चित्कोऽपि आ
श्रयो वा विषयो वा इंद्रियसन्निकर्षादिरूपो हेतुर्वा न कर्तुम
र्हतीति समर्थो न भवति कल्पितस्याकल्पितपरिच्छेदकत्वा-
योगात् आरोपमात्रे चेष्टापत्तेः अहं घटं जानामीत्यत्र हि अ
हंकाराश्रयतयाभासते घटस्तु विषयतया उत्पत्तिविना
शवती काचिदहंकारवृत्तिस्तु सर्वतो विशिष्टतस्य सतः स्फु
रणस्याभिव्यंजकतया आत्ममनोयोगस्य परैरपि ज्ञाने हेतुत्वाभ्यु
पगमात् तदुत्पत्तिविनाशेनैव च तदुपहिते स्फुरणरूपे स-
दुत्पत्तिविनाशप्रतीत्युपपत्तेर्नैकस्य स्फुरणस्य स्वत उत्पत्ति
विनाशकल्पनाप्रसंगः घटावच्छेदेन शब्दवत् घटाद्यवच्छे
देनाकाशवच्च अहंकारस्तु तस्मिन्नध्यस्तोऽपि तदाश्रयतया
भासते तद्वृत्तितादात्म्याध्यासात् सुषुप्तावहंकाराभावेऽपि
तद्वासनावासिताज्ञानभासकस्य चैतन्यस्य स्वतः स्फुरणात्
अन्यथैतावन्तं कालमहं किमपि नाज्ञासिषमिति सुषुप्तोत्थि
तस्य स्मरणं न स्यात् न चोत्थितस्य ज्ञानाभावानुमितिरियं-
मिति वाच्यं सुषुप्तिकालरूपपक्षाज्ञानलिंगासंभवाच्च अ
स्मरणादेश्च व्यभिचारित्वात् स्मरणजनकनिर्विकल्पकाद्यभा
वासाधकत्वाच्च ज्ञानसामग्र्यभावस्य चान्योन्याश्रयग्रस्तत्वा
त् तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्य
ति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादि
सुषुप्तौ स्वप्रकाशस्फुरणसद्भावेन तन्नित्यतया दर्शयति प
र्वं घटादिविषयोऽपि तदज्ञानावस्थाभासके स्फुरणे कल्पितः
य एव प्रागज्ञातः स एवेदानीं मया ज्ञात इति प्रत्यभिज्ञानात्
अज्ञातज्ञापकत्वं हि प्रामाण्यं सर्वतन्त्रसिद्धान्तः यथार्थानुभवः

गी.
टी.
द्वि.

118

प्रमेति वदद्भिस्तार्किकैरपि ज्ञातज्ञापिकायाः स्फुतेर्व्यावर्तकमज्ञ
भवपदं प्रयुंजानैरेतदभ्युपगमात् अज्ञातत्वं च घटादेर्न चक्षुरा
दिना परिच्छिद्यते तत्र सामर्थ्यात् तज्ज्ञानोत्तरकालमज्ञानस्या
नुवृत्तिप्रसंगाच्च नाप्यनुमानेन लिंगाभावात् नहीदानीं ज्ञा
तत्वेन प्रागज्ञातत्वमनुमातुं शक्यं धारावाहिकानेकज्ञानविषये
व्यभिचारात् इदानीमेव ज्ञातत्वं न प्रागज्ञातत्वे सतीदानीं ज्ञा
तत्वरूपं साध्यविशिष्टत्वादसिद्धं न चाज्ञाततावस्थाज्ञानमंतरे
ण ज्ञानं प्रति घटादेर्हेतुता ग्रहीतुं शक्यते पूर्ववृत्तित्वाग्रहात्
घटं न जानामीति सार्वलौकिकानुभवविरोधाच्च तस्मादज्ञानं
स्फुरणं भासमानं स्वाध्यस्तं घटादिकं भासयतीति घटादीनाम
ज्ञानकल्पितत्वसिद्धिः अन्यथा घटादेर्जडत्वेनाज्ञातत्वतज्ज्ञाव
योरनुपपत्तेः स्फुरणं चाज्ञातं स्वाध्यस्तेनैवाज्ञानेनेति स्वयमेव
भगवान्वक्ष्यति अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इत्यत्राप
तेन विभुत्वं सिद्धं तथा च श्रुतिः महद्भूतमनंतमपारं विज्ञान
घनएवेति सत्यं ज्ञानमनंतमिति च ज्ञानस्य महत्वमनंतत्वं च
दर्शयति महत्वं स्वाध्यस्तसर्वसंबंधित्वमनंतत्वं त्रिविधपरिच्छे
दशून्यत्वमिति विवेकः एतेन शून्यवादोपि प्रत्युक्तः निरधिष्ठान
भ्रमायोगान्निरवधिबाधायोगाच्च तथा च श्रुतिः पुरुषान्न परं किं
सा १ चित्सा काष्ठा सा परा गतिरिति सर्वबाधावधित्वं पुरुषस्य परिविशिन
ष्टि उक्तं भाष्यकारैः सर्वं विनश्यद्वस्तुजातं पुरुषांतं विनश्यति
पुरुषो विनाशहेत्वभावान्न विनश्यतीति एतेन क्षणिकवादो
पि परास्तः अबाधितप्रत्यभिज्ञानात् दृष्टस्यान्यस्मरणाद्यनु
पपत्तेश्च तस्मादेकस्य सर्वानुस्यूतस्य स्वप्रकाशस्फुरणरूप
स्य सतः सर्वप्रकारपरिच्छेदशून्यत्वादुपपन्नं नाभावो विद्यते
सत इति [illegible]
[illegible]

सदानंदी टीका ॥

नतुज्ञानात्मकंसत्याज्ञानमाद्यंतथाकिल घटज्ञानंसमुत्प
न्नंनष्टंचेतिप्रतीतितः १ घटादेश्चोत्पत्तेभानात्साश्रयंचस
कर्मकं दिक्कालवस्तुविच्छिन्नंज्ञानंस्याद्व्यापकंकथं २ उ
त्पत्त्याद्यविनाशीत्यपरिच्छिन्नंचिदद्वयं स्फुरणेनहिच्छिन्नेके
नयेनैकेनचिदात्मना ३ नित्येनविभुनासर्वमिदंव्याप्तंजडा
त्मकं स्वसत्तास्फूर्तिदानेनसर्वंस्वस्मिन्निवेशितं ४ परिच्छे
देनकोप्यस्यापरोक्षस्याव्ययस्यच सर्वात्मस्फूर्तिरूपस्यसत
कर्तुमिहार्हति ५ नाश्रयोविषयोनेनसन्निकर्षादिका
रणं परिच्छेत्तुंसमर्थोस्त्यपरिच्छिन्नस्यकर्हिचित् ६ तेना
सतोविभिन्नत्वेहेतुघ्नतेसच्चिदात्मनः सत्यंज्ञानमनंतंचा
परिच्छिन्नमबाधितं ७ अत्याज्ञानेविनिर्णीतंसंविद्रूपंसद
द्वयं यात्वायंतवतीकाचिद्बुद्धिवृत्तिर्मताहिसा ८ स्फुर
णस्यास्यनित्यस्याभिव्यंजकतयाखिले घटादौजन्मनाशा
दिप्रतीतिविषयेविना ९ तदुत्पत्तिविनाशाभ्यामनाशि
स्फुरणेपरे जन्मनाशप्रतीतेश्चोपपत्तेनस्वतःसतः १० साश्रया
दिपरिच्छेदवतीभवतुतेनहि नवृत्तिःस्फुरणस्यास्यापरि
च्छिन्नस्यवस्तुनः ११ यथाघटाद्यवच्छेदादाकाशभेदकल्प
ना तथाधीवृत्त्यवच्छेदात्स्फुरणेभेदकल्पना १२ वृत्तेराधी
वृत्त्यभावेपिसतःस्फूर्तिःस्वतोयतः अतश्चौपाधिकस्तस्यप
रिच्छेदोनवास्तवः १३ तदुक्तंवार्तिकेसम्यक्सत्यादिपद
निर्णये नत्वसत्यमनंतंचकथंसम्यक्प्रतीयते १४ देशा
कालादिहेतुत्वात्तदिदानींविभाव्यते वस्तुतोदेशतश्चैव
कालतश्चत्रिधोच्यते १५ आनंत्यंब्रह्मणस्त्वातःसत्यादपिच
सिद्ध्यति अनंतंदेशतोव्योमदेशावस्थकृतित्वतः १६ कारण

नैकदेशंहिकार्येनान्यत्रवर्तते कार्यत्वात्कालतोनास्यवस्तुत
श्चविहायसः ७ वस्तुतस्तस्यसद्भावाद्यानंत्यंवस्तुतोपिनः का
लाकाशादियोनित्वात्सर्वात्मत्वात्तथात्मनः ८ वस्तुतस्तस्य
चासत्वात्तुच्छोनंत्यंपरात्मनः कल्पितेनपरिच्छेदोनह्यकल्पि
तवस्तुनः ९ कल्पितस्त्विहकालादिर्वाचारंभणशास्त्रतः क
ल्पितानामधिष्ठानतयासत्यमबाधितं १० देहादिसर्वविश्व॰
स्यासत्यत्वंसिद्धमित्यलं ११ ॥ १७ ॥

नीलकंठी टीका ॥

यस्याभावोनास्तितस्यसतः सत्वेकिंमानमित्याशंक्याह अवि
नाशीति तच्छब्देनप्रकृतंसत्परामृश्यते येनसताइदंसर्वंवि
यदादिततंव्याप्तं घटःसन्पटःसन्निति सर्वस्यसदभेदानुभवा
त् यथाघटोमृत्शरावोमृदितिघटादीनांमृदभेदानुभवा
न्मृदुपादानकत्वंतद्वत्सर्वस्यापिसदुपादानकत्वंबोध्यं ननुमृ
द्वत्सदपिकिंविकारवद्भवतीत्याशंक्याह अविनाशीति तत्
सत् अविनाशिविद्धि अयमर्थः पूर्वावस्थापरित्यागोविना
शःमृद्धिपिंडाकारंत्यक्त्वाघटीभवतिअतःसाविनाशशीला ।
विकारयोराश्रयत्वात् ब्रह्मतुनतथा किंतर्हिरज्जुवत्स्वयम
विनश्यदेवकार्याकारंभवति स्वकीयेचसत्तास्फुरणेकार्येर्पय
ति अतोऽविनाशि तथाचश्रुतयः अजायमानोबहुधाविजाय
ते जातएवनजायतेकोन्वेनंजनयेत्पुनः अजायमानःजन्मा
ख्यंविकारमलभमानोपिविजायतेवियदादिरूपेणाविर्भवति
तथालोकदृष्ट्याजातोघटादिः परमार्थदृष्ट्यानजायते परि॰
णाम्युपादानस्याभावात् मृदादेस्त्वात्ममृदादिवत्तुच्छत्वा
त् अतएवघटादिकोनुजनयेन्नकोपि उक्तंतर्हिभासतइ॰
तिचेत्रज्जूरगादिवदितिदत्तोत्तरमेतत् तथाप्राणावैसत्यंते
षामेवसत्यं तस्यभासासर्वमिदंविभातीति सतःसत्यत्वेनश्रा

ऽणोपलक्षितस्यप्रपंचस्यसत्यत्वंसतोभानमेवप्रपंचस्यभान
मिति तथाचप्रपंचगतेसत्तास्फूर्तीसतःसत्वप्रमाणमित्यर्थः
श्रुतिश्चअनेनसोम्यशुंगेनापोमूलमन्विच्छअद्भिःसोम्यशुंगे
नतेजोमूलमन्विच्छतेजसासोम्यशुंगेनसन्मूलमन्विच्छसं
न्मूलाःसोम्येमाःप्रजाःसदायतनाःसत्प्रतिष्ठाइतिसतोजग
दुपादानत्वंकार्यलिंगेनद्रढयति सतोऽविनाशित्वेविनाश
हेत्वभावादित्याह विनाशमिति नचैतिनापत्तीयतइत्यव्य
यं एतेनसर्वविकारशून्यस्यविनाशोनास्तीत्यर्थः अपक्षयो
हिजन्मादिविकारवतएवभवतीतिसएवात्रसर्वविकारोप
लक्षणतयाबोध्यः नकश्चिदित्यनेनतदन्यस्यविनाशहेतो
रभावोदर्शितः द्वितीयाद्वैभयंभवतीतिश्रुतेः ॥ १७ ॥

आनंदी टीका

अविनाशिविनाशिशब्दाभ्यांसदसतोर्लक्षणमाह येनजीवात्म
नासर्वमिदंभूतांतःकरणसमवायरूपशरीरंततंव्याप्तंतत्वकर्तृ
त्वादिभिर्धर्मैः तदविनाशिजानीहि व्ययोवस्तुनोदेशकालादि
नाव्यवच्छेदःअवयवविभागः तेनरहितस्यजीवात्मनःनका
श्चिदीश्वरोविनाशंकर्तुमर्हति सावयवस्यावयवविभागेनवि
नाशोभवति ननिरवयवस्येति १७ ॥

+ ननस्वतत्त्वतःकिंसत्किमसदित्यपदेष्टु रामकंठी टीका माह +

एतयोःसदसतोर्मध्यात्तदविनाशिविनाशधर्मरहितत्वात्परमा
र्थतःसद्विजानीहि किंतद्येनेदमन्योन्यभिन्नावभासमयं
सचराचरंवस्तुजातंततंकर्तृत्वविवक्षयाविस्फारितंज्ञातृत्ववि
वक्षयावाप्याप्तं एकएवहिपरमार्थतःसर्वकर्तासर्वज्ञःपरमेश्वरः
परमात्मातद[illegible]वभासितान्योन्यभेदानांतुक्षेत्रज्ञानांदेहादिकम
वात्मत्वेनप्रतिपाद्यमानानांपरिमितविषयकर्तृत्वज्ञातृत्वेव
नवास्तवमेवमस्यात्मतत्वाभिधानस्यवस्तुनोव्ययस्यदेशकाला
द्यवच्छेदरहितत्वादव्ययस्वभावस्यतद्विलक्षणःकार्यतेयरूपोन
कश्चिदर्थोविनाशमभावंकर्तुमर्हति नहिनित्यस्यसर्वेषामेव

गी॰ च्छिन्नमहिम्नोर्थस्यानित्यावच्छेद्यः पदार्थो विनाशाय प्रभ
टी॰ वतीति [illegible]
हि॰ [illegible] १७ ॥

येनतत्त्वमितिहानेन सर्वमिद मागमापायि धर्मकं देहा दिकं साक्षित्वेन व्याप्तं

लाक्षिकी टीका

तत्र सत्स्वभावस्याविनाशाभावे विशेषतो निरूपयति अवि
नाशीति तदात्मस्वरूपमविनाशि विनाशशून्यत्वात् सतज्जा
नीहि तशाद्दासतो विशेषणार्थः [illegible]
[illegible] तयेहत्वमा
ह विनाशमिति अव्ययस्यदेशकालाद्यपरिच्छिन्नत्वादत
यस्मैन [illegible] हि [illegible] ल तलो देशकालादि परिच्छिन्नः कश्चिदपार्थः ईश्वरेवा विना

पंचोली टीका

यत्सतत्स्वभावेअविनाशीवस्तुसविशेषेणोक्तंतद्विशेषनोदर्शी
यति अविनाशित्विति तपुनःयेनइदसर्वंजगत्ततंव्याप्तं तत्स
त्त्वअविनाशिविद्धिनकश्चिदपिप्रमान् अस्याव्ययस्यात्मनःवि
नाशमभावंकर्तुमर्हति १७ ॥

रत्नावीरसमिहाधिनी॥

ननुकिंसत्किंवासदित्यत्रआहाविनाशात्विति एतयोःसदस
तोर्मध्ये तद विनाशिविनाशिहीनत्वात्परमार्थसहि हिनानी
हि किंतदित्यपेक्षायामाह येनात्मनासर्वमिदमागमापाय
धर्मकंदेहादिसंयंकार्यजातेततं साक्षितयाव्याप्तं देहादिसा
क्षीयआत्मातमसदितिजेयइति एवंवास्याव्ययस्यात्मनोविना
शंकश्चिन्नकर्तुमर्हति ततश्चनात्मविनाशःसंभावनीयइति
तात्पर्यम् १७

मधुभाष॥

अविनाशीति नायिप्राणपादिना विनाशइत्याह विनाशमिति
अव्ययंचतद्भवत देहस्यापिकस्यविनित्यत्वमितितेत्याह १७॥

२ [illegible]

भाषा अनुवाद

अविनाशी सत वस्तुका स्वरूप सामान्य से वर्णन करिके फेरि विशेष रूपसे कहतेहैं जो इस अनित्य देहमे साक्षी रूप व्याप्त होकर रहाहै वही आत्माको अविनाशी जानो जिस हेतु उसके विनाश करनेको किसी की सामर्थ्य नही है १७ ॥

दोहा

अविनाशी तिह जानतूं जिहकर विस्तार इह अविनाशीको
नहि मारणयोग्य संसार १७॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः अ
नाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८

शांकरभाष्यं ॥

किं पुनस्तदसत् यत्स्वात्मसत्तां व्यभिचरतीत्युच्यते अन्तव
न्त इति अन्तो विनाशो विद्यते येषां ते अन्तवन्तो यथा मृग
तृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्य
ते स तस्यान्तस्तथेमे देहाः स्वप्नमायादेहादिवच्चान्तव-
न्तो नित्यस्य शरीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोऽ
न्तवन्त इत्युक्ता विवेकिभिरित्यर्थः नित्यस्यानाशिन इति
न पुनरुक्तं नित्यत्वस्य हि द्विविधत्वाल्लोके नाशस्य च यथा दे
हो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते विद्यमानोपि यथाऽ
न्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते तत्राना
शिनो नित्यस्येति द्विविधेनापि नाशेनासम्बन्धोऽस्येत्यर्थः
अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्मा भूदिति
नित्यस्यानाशिन इत्याह अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादि
प्रमाणैरपरिच्छेद्यस्येत्यर्थः नन्वागमेनात्मा परिच्छिद्यते
प्रत्यक्षादिना च पूर्वं न आत्मनः स्वतः सिद्धत्वात् सिद्धे ह्यात्मनि
प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति न हि पूर्वमित्थ
महमित्यात्मानं अप्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रव-
र्तते न ह्यात्मा नाम कस्यचिदप्रसिद्धो भवति शास्त्रं त्वन्त्यं प्र
माणं अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वमा
त्मनः प्रतिपद्यते न त्वज्ञातार्थज्ञापकत्वेन तथा च श्रुतिः
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर इति यस्मादेवं नि
त्योऽविक्रियश्च आत्मा तस्मात् युध्यस्व युद्धादुपरमं मा का
र्षीरित्यर्थः न ह्यत्र युद्धकर्तव्यता विधीयते युद्धे प्रवृत्त एव
ह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्ते तस्य कर्तव्यप्रतिब

न्यापनयनमात्रं भगवता क्रियते तस्माद्युद्ध्यस्वेत्यनुवादमा
त्रेन विधिः १८ ॥

आनंदगिरिकृतटी॰

सदसतोरनन्तरप्रकृतयोः स्वरूपाव्यभिचारित्वेन परमार्थ
तया सन्निर्धारितमिदानीमसन्निर्दिधारयिषया पृच्छति
किं पुनरिति असदेवेति निर्द्धारितत्वात् प्रश्नस्य निरवका
शत्वमाशंक्य शून्यं व्यावर्त्य विवक्षितमसन्निर्धारयितुं तस्य
सावकाशत्वमाह यत्वात्मेति देहादेरनात्मवर्गस्य प्रकृ
तासच्छब्दविषयतेत्याह उच्यतइति तेषां स्वातंत्र्यमुदस्य॰
ति नित्यस्येति आकाशादिव्यावृत्त्यर्थं विशिनष्टि शरीरि
णइति परिणामनित्यत्वं व्यवच्छिनत्ति अनाशिनइति त
स्य प्रत्यक्षाद्यविषयत्वमाह अप्रमेयस्येति देहादेरवस्तु
त्वादात्मनश्चैकरूपत्वाद्युद्धे स्वधर्मे प्रवृत्तस्यापि तव न
हिंसादिदोषसम्भावनेत्याह तस्मादिति ननु देहादिषु
सद्बुद्धेरनुवृत्तेस्तस्याविच्छेदाभावात् कथमन्तवत्त्वं तेषा
मिष्यते तत्राह यथेति तथेमे देहाः सद्बुद्धिभाजोपि प्रमा
णतो निरूपणायामवसाने विच्छेदादन्तवन्तो भवन्ती॰
ति शेषः देहत्वादिना च जाग्रद्देहादेरन्तवत्त्वं सम्प्रतिपन्न
वदनुमातुं शक्यमित्याह स्वप्नेति शरीरादेरन्तवत्त्वेपि
प्रवाहरूपेणात्मनस्तत्सम्बन्धस्यानन्तत्वमाशंक्याह नि
त्यस्येति प्रवाहस्य प्रवाहिव्यतिरेकेण निरूपणात् तदा
त्मना देहाद्यभावे सम्बन्धसिद्धिरित्यभिसन्धायोक्तं विवे
किभिरिति पदद्वयस्यैकार्थत्वमाशंक्य निरस्यति नित्यस्ये
त्यादिना नित्यत्वस्य द्वैविध्यसिद्ध्यर्थं नाशद्वैविध्यं प्रतिज्ञातं
प्रकटयति यथेत्यादिना नाशस्य निरवशेषत्वेन सावशे
षत्वेन च सिद्धे द्वैविध्ये फलितमाह तत्रेति विशेषणाभ्यां
कूटस्थनित्यत्वमात्मनो विवक्षितमित्यर्थः अन्यतरविशे

षणमात्रोपादाने परिणामिनित्यत्वमात्मनः शंकेतेत्यनिष्टा
पत्तिमाशंक्याह अन्यथेति औपनिषदत्वविशेषणमाश्रि
त्याप्रमेयत्वमाक्षिपति नान्विति इतश्चात्मनोनाप्रमेयत्वमि
त्याह प्रत्यक्षादिनेति तेन चागमप्रवृत्त्यपेक्षया पूर्वावस्था
यामात्मैव परिछिद्यते तस्मिन्नेवाज्ञातत्वसंभवादज्ञातज्ञा
पकं प्रमाणमिति च प्रमाणलक्षणादित्यर्थः एतदप्रमेय
मित्यादिश्रुतिमनुसृत्य परिहरति नेत्यादिना कथंमान॰
मपेक्ष्यात्मनः सिद्धत्वमित्याशंक्याङ्के विवृणोति सिद्धे ही
ति प्रमित्सोः प्रमेयमिति शेषः तदेव व्यतिरेकमुखेन वि॰
शदयति नहीति आत्मनः सर्वलोकप्रसिद्धत्वाच्च तस्मिन्न
प्रमाणमन्वेषणीयमित्याह नह्यात्मेति प्रत्यक्षादेरनात्म॰
विषयत्वात् तत्र चाज्ञातज्ञाततायाव्यवहारसम्भवात्तत्प्रा
माण्यस्य च व्यावहारिकत्वाद्विशिष्टे तत्प्रवृत्तावपि केवले
तदप्रवृत्तेर्यद्यपि नात्मनि तत्प्रामाण्यं तथापि तद्धितत्त्व
त्याशास्त्रस्य तत्र प्रवृत्तिरवश्यम्भाविनीत्याशंक्याह शास्त्र
मिति शास्त्रेण प्रत्यग्भूते ब्रह्मणि प्रतिपादिते प्रमात्रादि
विभागस्यव्याहतत्वाच्छुक्तमस्यान्त्यत्वमपोषयतया नि
र्दोषत्वाच्चागमस्य प्रामाण्यमित्यर्थः तथापि कथमस्यप्र
त्यगात्मनि प्रामाण्यं तस्य स्वतः सिद्धत्वेनाविषयत्वादज्ञात
ज्ञापनायोगादित्याशंक्य स्वतोवभासमानोपि प्रतीचोमनु
ष्योहं कर्ताहमित्यादिना मनुष्यत्वकर्तृत्वादीनामतद्धर्मा
णामध्यारोपेणात्मनि प्रतीयमानत्वात् तन्मात्रनिवर्त
कत्वेनात्मनोविषयत्वमनापाद्यैव शास्त्रं प्रामाण्यं प्रतिप
द्यते सिद्धन्तु निवर्तकत्वादिति न्यायादित्याह अतद्धर्मे
तिघटादाविव स्फुरणातिशयजनकत्वेनाकिमित्यात्मनि
शास्त्रप्रामाण्यं नेष्टमित्याशंक्य जडत्वाजडत्वाभ्यां विशे॰
षादिति मत्वाह नान्विति ब्रह्मात्मनोमानापेक्षामन्तरेणस्व

तःस्फुरणेऽप्रमाणमाह तथाचेति साक्षादन्यापेक्षामन्तरेण।
परोक्षादपरोक्षस्फुरणात्मकं यद्ब्रह्म नच तस्यात्मनोऽर्थान्तर
त्वं सर्वाभ्यन्तरत्वेन सर्ववस्तुसारत्वात्तमात्मानं चाचक्षेति।
योजनाप्रमेयत्वेनाविनाशित्वं प्रतिपाद्य फलितं निगम
यति यस्मादिति स्वधर्मनिवृत्तिहेतुनिषेधे तात्पर्यं दर्शयति
युद्धादिति आत्मनो नित्यत्वादिस्वरूपमुपपाद्य युद्धकर्तव्यत्व
विधानात् ज्ञानकर्मसमुच्चयोऽत्र भातीत्याशंक्याह नहीति
युद्धस्वेति वचनात्तत्प्रवर्तकत्वविधिरस्तीत्याशंक्याह युद्ध
इति कथं तर्हि कथं भीष्ममहमित्याद्यर्जुनस्य युद्धोपरमप
रं वचनमिति तत्राह शोकेति यदि स्वतो युद्धे प्रवृत्तिः तर्हि
भगवद्वचनस्य का गतिरित्याशंक्याह तस्येति भगवद्वचन
स्य प्रतिबन्धनिवर्तकत्वे सत्यर्जुनप्रवृत्तेः स्वाभाविकत्वफ-
लितमाह तस्मादिति १८ ॥

स्वामिकृतटीका ॥

अन्तवंत इति अंतो नाशो विद्यते येषां ते अंतवंतः नित्यस्य सर्वदे
करूपस्य शरीरिणः शरीरवतः अतएवानाशिनः अप्रमेयस्या
परिच्छिन्नस्यात्मनः इमे सुखदुःखादिधर्मका देहा उक्तास्तत्व
दर्शिभिः यस्मादेवमात्मनो न विनाशः न च सुखदुःखसंबंधः
तस्मान्मोहजं शोकं त्यक्त्वा युध्यस्व स्वधर्मं मा त्याक्षीरित्यर्थः १८

पिशाचभाष्यटी० ॥

किं पुनस्तत्समन्वयत्वात्मसत्तां व्यभिचरतीत्युच्यते अंतवंत
इति अंतो नाशो विद्यते येषां ते अंतवंतः नित्यस्य शरीरिणः
यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणाच्छि
द्यते मतस्यां तत्त्वे इमे देहाः स्वप्नमायालब्धदेहादिवदंत-
वतः नित्यस्य शरीरिणः शरीरवतः अविनाशिनोऽप्रमेयस्या
त्मनः अन्तवंत इत्युक्ताः पंडितैर्ब्रह्मवादिभिरित्यर्थः अप्रमे
यस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्य नत्वात्मा परिच्छिद्यते।

तथा च श्रुतिः यत्साक्षादपरोक्षाद्ब्रह्म य आत्मेति यस्मादेवं नित्य
स्याविच्छेद्य आत्मा तस्माद्युध्यस्व तदुपरमं माकार्षीरित्यर्थः न
त्वत्र युद्धकर्तव्यता विधीयते युद्धे प्रवृत्त एवासौ मोहान्निवृ
त्तूष्णीमास्ते तस्य प्रतिबन्धापनयने भगवता क्रियते तस्माद्यु
ध्यस्वेत्यनुवादमात्रेण विधिः शोकमोहादिसंसारसागरनिवृ
त्त्यर्थं गीताशास्त्रं प्रवर्तत इति एतस्यार्थस्य साक्षिभूते ऋचे चोप
निनाय भगवान् यत्तु मन्यसे युद्धे भीष्मादयो हन्यन्ते अहमेषां
हन्तेति एषा बुद्धिर्मृषैव सा ते कथं ॥ १८ ॥

रामानुजभाष्य टी. ॥

देहानां तु विनाशित्वमेव स्वभाव इत्याह अन्तवन्त इति उपच
यापचयरूपा इमे देहा अन्तवन्तो विनाशस्वभावाः उपचयात्म
का हि घटादयो अन्तवन्तो दृष्टाः नित्यस्य शरीरिणः कर्मफल
भोगार्थतया भूतसंघातरूपा देहाः अनेन जीवेनात्मनेत्यादि शास्त्रे
रुक्ताः कर्मावसाने विनाशिनः आत्मा त्वविनाशी कुतः अप्रमे
यत्वात् न ह्यात्मा प्रमेयतयोपलभ्यते अपि तु प्रमातृतया त
था च वक्ष्यते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विद इति न चा
नेकउपचयात्मकत्वेनात्मोपलभ्यते सर्वत्र देहे अहमिदं जा
नामीति देहस्य प्रमातृतयैवोपलब्धेः न च देहादिवत्प्रदे
शभेदे प्रमातृराकारभेद उपलभ्यते अत एकरूपत्वेनानु
पचयात्मकत्वात्प्रमातृत्वाद्व्यापकत्वाच्चात्मा नित्यः देहस्तूप
चयात्मकत्वाच्छरीरिणः कर्मफलभोगार्थत्वादनेकरूपत्वाद्व्यापित्वा
च्च विनाशी तस्माद्देहस्य विनाशस्वभावत्वादात्मनो नित्य
स्वभावत्वाच्चोभावपि न शोकस्थानमिति शस्त्रपातादिपरुष
स्पर्शान वर्जनीयान् स्वगतान् अन्यगतांश्च धैर्येण सहस्व अ
मृतत्वप्राप्तये अनभिसंहितफलं युद्धाख्यं कर्मारभस्वेत्यभिप्रा
यः ॥ १८ ॥

अभिनवगुप्तकृत टी. ॥

गी॰ निरूपाधिनाकालेस्थूलविनाशयोगिनः तदन्यथानुपपत्तेरेव
टी॰ चविनाशिनः प्रतिक्षणमवस्थांतरभागिनः यदुक्तं श्रुतेपुरा
द्वि॰ णेदृष्टप्रतिक्षणंनवत्वह्रानिरनुमीयतेइति श्रुतिनापि कला
नांपृथगर्थानांप्रतिभेदः क्षणेक्षणे वर्ततेसर्वभावेषुसौक्ष्म्यात्स
नविभाव्यतेइति पृथगर्थानामितिपृथगर्थक्रियाकारित्वादि
तियावत् देहाअंतवंतोविनाशिनश्च आत्मातुनित्योयतोप्रमे
यः प्रमेयस्यतुजडस्यपरिणामित्वेनतुजडस्यचिदेकरूपस्य।
स्वभावांतरायोगात् एवंदेहानित्यमंतवंतइतिशोचितुमशा।
क्या आत्मानित्यमविनाशीतेननशोचनार्हः तेत्रेणायमेकः
कल्पप्रत्ययोर्द्वयोरर्थयोर्विनादर्शितः अशोच्यानन्वशोच।
इति ॥१८ ॥

परमार्थप्रपा टीका ॥

अथयदर्थमेतदुपक्रमस्तदाह अंतवंतइति नित्यस्यसर्वदैकस्व
भावस्यातएवानाशिनः अप्रमेयस्यापरिछिन्नस्यशरीरिणःशरी
रावछिन्नस्यपरमात्मनः इमेदेहाखंडः खेयोनयोदेहास्तत्वदर्शि
भिरंतवंतः क्षणभंगुराउक्ताः घटांतर्गताकाशस्यघटाइववापक
वे॰ स्यैवबहुभिः स्वरूपैर्नदतोनटस्येत्यर्थः यस्मादेवंतस्माद्भीष्म
ध॰ द्रोणादिविषयेविगतज्वरोभूत्वायुध्यस्वयुद्धंकुरुषयद्वाइमे
स्वमायस्यायामनुभूयमानाउच्चावचदेहाअंतवंतोजाग्रदवस्था
यांनस्वराउक्तावेदेनप्रतिपादिताः संतिकस्यशरीरिणः तच्छ
रीरावछेदेन तत्तद्भोमान्भुंजानस्यात्मनोनित्यस्यावस्यात्रये।
प्यनुस्यूतस्यशेषंपूर्ववत् तदुक्तंस्वंतल्पगतोयेनस्वप्नेदेन्न हे॰
देवादिकतदान् परिभ्रमसिहेरामसंदेहस्तेयसंप्रति क्वतिर
पिशानपथी अथैतत्स्वप्नयाचरतितेह्रास्यलोकास्तउतेवमहा
राजोभवन्तुरतेवमहाब्राह्मणउतेवोच्चावचंनिगछतीति भा स्त॰
वंस्वमयास्वभावस्ययाचरतिव्यवहरति तस्यात्मनोलोकाभोग
स्थानानिशेषंस्पष्टं तदुक्तं स्वप्नेयथापश्यतिदेहमीदृशमित्यादि १८ ॥

नन्वनादित्वाच्चेतनत्वात्स्वतंत्रत्वाच्चेश्वरस्यात्मनित्यत्वं नत्प्रति
बिंबस्यजीवस्य तत्सदृशत्वेपिकथंनित्यत्वंप्रतिबिंबस्यानित्य
त्वनियमात् प्रतिबिंबत्वंजीवस्यरूपंरूपंप्रतिरूपोबभूव ए
कधाबहुधाचैवदृश्यतेजलचंद्रवदितिश्रुतिसिद्धमतआह
अंतवंतइतिनित्यस्यशरीरिणोजीवस्येमेबाल्ययौवनाद्यव
स्थाभेदेनभिन्नाःपरिणामित्वेनप्रत्यक्षसिद्धादेहाअंतवंतः
नाशवंतःपरिणामित्वाद्दीपकलिकावत्श्रुतिभिरुक्ताः
अस्यजीवसमूहस्येमेप्रत्यक्षसिद्धादेहाअंतवंतइतिवार्थः
नित्यस्यदेहाअंतवंतइत्युक्तेपरमेश्वरदेहस्याप्यनित्यत्वप्र
सक्त्यातातःशरीरिणःशीर्यतइतिशरीरंतस्यास्तीतिशरीरीत यं^
स्येश्वरदेहस्यशीर्यमाणत्वाभावात् नित्यत्वेहेतुरनाशिनः
नाशशून्यस्य तत्रहेतुरप्रमेयस्यप्रमातुःनह्यात्माप्रमेयत
योपलभ्यतेपित्विदमहंजानामीति प्रमातृतयैवानुभूय
ते नवादेहादेरिवप्रदेशभेदेप्रमातुराकारभेदःउपलभ्यते
अतएकरूपत्वेनानुपचयात्मकत्वात्प्रमातृत्वादात्मानित्यः
देहस्तूपचयात्मकत्वाच्छरीरिणोभोगायतनत्वादनेकरूप
त्वाच्चानित्यः रूपंरूपंप्रतिजीवंजीवंप्रत्यंतर्यामितयाप्रति
नि^ रूपोमत्स्यादिवन्नित्यैर्नियामकतावद्रूपेहरिरभिव्यक्तोबभू
वएकधास्थूलरूपेणबहुधानियामकरूपैर्दृश्यतेयथापा
त्रादिस्थजलभेदेनैकश्चंद्रोनानादृश्यतेतथैकोप्यनेकनि
यामकरूपैःसत्यैर्नित्यैश्चाभिव्यक्तोभवतीत्यर्थः एकस्य
नित्यवास्तवानेकरूपत्वंत्वचिंत्यशक्त्योपपन्नं प्रसिद्धंहिषो
डशसहस्रसंख्याकानांविवाहेरासमंडलेचैकस्यानेकरूप
त्वं अतोनित्यस्वभावयोर्विदेहयोरशोकविषयत्वमितिशा
स्त्रपातादिप्रकरणस्पर्शानवर्जनीयानुधैर्येणमास्यामस्तत्वाश

कृष्णाश्र^

गी॰ प्राणमये फलेच्छा रहितं प्रज्ञावि(त्)स्तोवितं कर्मारंभस्वरूपत्र पंचकोशा
टी॰ एव देहपदेनोक्ताः तथाहि पंचीकृतमहाभूततत्कार्यात्मको विरा
द्वि॰ त्रे ट्मूर्तराशिरन्नमयः कोशः स्थूलसमष्टिस्तत्कारणीभूतो पंचीकृत
पंचमहाभूततत्कार्यात्मको हिरण्यगर्भः सूत्रममूर्तराशिः सूक्ष्म
समष्टित्रयं वा इदं नामरूपंकर्मेति बृहदारण्यकोक्तः अन्नात्म
कः स कर्मात्मकत्वेन क्रियाशक्तिमात्रमादाय प्राणमयः कोशः
नामात्मकत्वेन ज्ञानशक्तिमात्रमादाय मनोमयः कोशः रूपात्म
कत्वेन तदुभयाश्रयतया कर्तृत्वमादाय विज्ञानमयंकोशः ततः
प्राणमयमनोमयविज्ञानमयात्मक एक एव हिरण्यगर्भाख्यो
लिंगशरीरकोशः तद्धेतुभूतस्तु मायोपहितचैतन्यात्मा सर्वसं
ज्यो स्कारशेषोऽव्याकृताख्य आनंदमयकोश इति तत्र अन्नमयादेर्ब्र
ह्मत्वे तस्याब्रह्मतोक्तिं विनाशिमस्य ब्रह्मत्वेनोपदेशासंभवात्
एकश्रुतिनिरासाय श्रांत्येतरोत्पादनस्यायुक्तत्वात् तस्माद्वा एत
स्मादन्योऽंतर आत्मान्नमय इत्यानंदमयांतमुक्तो तस्माद्वा एतस्मा तम
दानंदमयादन्योऽंतर आत्मेत्युपदेशाभावाच्च अतोऽन्नमयादी
नि पंच भगवद्रूपाण्येव येन ब्रह्मेत्यु सते ये प्राणं ब्रह्मोपासते पा
आनंदं ब्रह्मणो विद्वान् विज्ञानं ब्रह्म वेदेत्यादीनां ब्रह्मश
ब्दाभ्यासात् न चान्नादिना ब्रह्मशब्दाभ्यासादन्नमयादेः कथं
ब्रह्मत्वसिद्धिरिति वाच्यं यथाहि ज्योतिष्टोमाधिकारे वसंते वसं
ते ज्योतिषा यजेतेति ज्योतिःपदमेव ज्योतिष्टोमाभ्यासका
लविशेषविधानपरं तथानंदमयाधिकारे पठितानंदादिप
दैः सहाभ्यस्यमानं ब्रह्मपदमानंदमयादेर्ब्रह्मत्वविधानपरं
न च ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मपदसमभिव्याहारात्पुच्छमेव ब्रह्मे
ति वाच्यं तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः
पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मपदसमभिव्याहारा
त्पुच्छमेवेत्यानंदस्य पदेन पुच्छत्वेनावयवत्वेन पाठादानंदस्य
तस्य

वस्तुत्वात् अवयवापेक्षयावयविनः पूर्णत्वात् वस्तुतत्त्वबु॰
भुत्सोर्ब्रह्मावतरणाय पुच्छत्वेनानन्दरूपस्य ब्रह्मणो हि रूपकमा
त्रेणोक्तं सर्वत्रात्र प्राचुर्ये मयट् न तु विकारे मयड्वैतयोर्भाषाया
मिति सूत्रेण विहितस्य विकारार्थस्य मयटो ब्रह्मण्यसंभ॰
वात् न च ब्रह्म पुच्छं प्रतिष्ठेति प्रतिष्ठाशब्दसमभिव्याहारात्पुच्छं
ब्रह्मेति वाच्यं आनंद आत्मेत्यात्मपदोक्तानंदस्याधारापेक्षाभा
वात् अन्यावयवसाधारणपुच्छस्य कृत्स्नानंदाधारत्वासंभवा
च्च नहि कृत्स्नस्य पक्षिणः पुच्छमेवाधारः पक्षिणां सर्वावयवे॰
षु पुच्छस्य प्राधान्याभिप्रायेण प्रतिष्ठापदं तस्मात्सर्ववयोसिद्ध
छेन प्रतितिष्ठतीति पुच्छेनैव प्रतिष्ठायोत्पन्नेति प्रतिष्ठा हि पुच्छ
मित्येतदीयोक्तेः स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमा
त्मानमुपसंक्रम्य एतं प्राणमयमात्मानमुपसंक्रम्य एतं वि॰
ज्ञानमयमात्मानमुपसंक्रम्य एतमानंदमयमात्मानमुपसंक्र
म्य इमान् लोकान्कामानकामरूप्यनुसंचरन् एतत्साम गाय
न्नास्ते इति श्रुतौ ब्रह्मविदोऽन्नमयादिप्राप्तिरुक्ता नहि ब्रह्मवि॰
दो ब्रह्मप्राप्तिर्युक्ता तस्मादपि विनिर्मुक्ताः अनिरुद्धतनौ स्थि
ताः ततो मुक्तास्तु निर्भिद्य प्रद्युम्नस्य तनौ स्थिताः प्रद्युम्नाच्च॰
विनिर्मुक्ता जीवंकर्षणं ततः ततस्तु गुणहीनास्ते परमात्मा सं॰
नमञ्जसा एकान्तभावोपगता वासुदेवं विशन्ति ते इति मोक्षध
र्मोक्तरीत्या कस्यापि रूपभेदेन क्रमेण प्राप्तिर्युक्ता न तत्स्वप्रा॰
धिष्ठस्यानापेक्षया अन्योऽन्तर आत्मेत्येकस्यैवान्यत्वानवद्दे॰ त्वा॰
कमुपपद्यते नहि ज्ञायसुनेनैव वरुणं पितरमुपससार अधी
हि भगवो ब्रह्मेति पुनः पुनरुपसत्तिस्वीकारेण विशिष्टं कृत्वा
निदिध्यासने तस्मात्तत्त्वगुणांतरविशिष्टविज्ञाने प्रकृत
वचने मयडित्यनेन सूत्रेण प्राचुर्ये मयड्विधीयते अद्यतेऽत्ति
च भूतानि तदन्नमिति श्रुतेः तस्याद्यत्वमुपजीव्यत्वं तत्प्राचुर्यं
ब्रह्मण्येव प्राणं प्रतिवेष्टयतीति प्राणः प्राणेन प्राचुर्यं च तन्मेव

गी.
टी.
द्वि.

126

मतज्ञानेमनः सामान्यज्ञानेविज्ञानंविशेषज्ञानेतन्मात्रुर्यमपि
तैत्रैवनवब्राह्मणमयोग्रामइत्यादावल्पब्रह्मणवदल्पानंदो॥
दस्यापत्तिरितिवाच्यंप्रकाशामयः सवितेत्यादौव्यधिकरणजी
वगतानंदापेक्षयैवभूयस्त्वोपपत्तेः नहिसवितमयः प्रकृषइत्यत्र
तत्रिष्टंडुत्वमपिभासते यत्तुतस्यैवएषशारीरआत्मायःपूर्वस्ये
ति तस्यप्राणमयस्यैषएवशारीरभवः शारीरआत्मायःसत्यज्ञा
नमित्यादिनागुहानिहिततत्वेनोक्तःपूर्वस्यान्नमयस्यैवंप्राणम
यमनोमयविज्ञानमयानंदमयेष्वप्योज्यं तथाचान्नमयादी॥
नामात्मान्तरोक्त्यानात्मत्वसिद्धमितितन्न चैतन्यमस्यस्वरूपं
सच्चिदस्याकारइत्यादिवत्पूर्वस्यान्नमयादेरात्मास्वरूपंसप
वप्राणमयादेरित्यर्थात् शारीरेभवस्तदुत्पत्तिर्हि नजीवस्य
विद्यमानत्वेचब्रह्मणोप्यस्ति जीवस्याहमितिप्रत्यक्षसिद्ध
त्वेनोपदेशवैयर्थ्यात् सत्यंज्ञानमित्यादिनाचुर्द्रंब्रह्मोक्तागुन
या॰ रन्नमयब्रह्मविषयकश्रोत्रुत्पादनायोगाच्च किंचसत्यंज्ञान
मनंतंब्रह्मेतिप्रकृतंचुद्धं ब्रह्मतस्माद्वाएतस्मादात्मनःआका
शःसंभूतइत्यात्मपदेननिर्दिश्यआकाशादिकारणत्वंचप्रति॥
पाद्यानंतरंनिरतिशयानंदत्वेनतस्यात्मत्वविवरणार्थंप्रवृ॥
त्तस्यसंदर्भस्यतत्रैवसमर्पणात्तदनंतरंतस्माद्वाएतस्मादानं
दमयादन्योंतरआत्माब्रह्मेत्युपदेशाभावेनचानंदमयएवब्र
ह्मसोकामयतेत्यनेनतरवाक्येनतच्छब्देनपुंलिंगेनपर
ब्रह्मपरत्वयात्वदभिमतेनाव्यवहितोपास्थितानंदमयस्यैव
स॰ हि परामर्शोनितुनपुंसकलिंगब्रह्मपदार्थस्य किंचसत्यज्ञा
नादिशब्दैःस्वरूपमात्रंबोध्यते सत्यत्वादयोधर्मावाद्येपर्या॥ ग्रा॰
यत्वापत्तिस्तथाचपदांतरवैयर्थ्यं द्वितीयेद्वैतहानिः नन्वम
धासत्यत्वादिकंबोध्यते श्रुतिबोधस्यमिथ्यात्वासंभवात् ।
नचश्रुतेस्तत्रतात्पर्याभावः अलौकिकब्रह्मनित्यसत्यत्वा
दौतात्पर्याभावेतदसिद्ध्यापत्त्यापर्यायत्वानिस्तारात् नचल

लक्षणयाखंडब्रह्मपरंवाक्यं क्वचिदशक्तस्यपदस्यलक्षणासंभ
वात् नचविशिष्टेशक्तस्य शक्तिजन्यबोधाविषयस्यस्वरूपा
भिन्नस्यलाक्षणिकबोधविषयत्वेद्वैतहानेरविषयत्वलक्षण
वैयर्थ्यात् गंगापदलक्ष्यस्यतीरस्यागंगात्ववत्सत्यादिपदल
क्ष्यस्यासत्यत्वापत्तेः १७ ॥ वै^

अत्रमवैजयन्ती टी॰ ॥स्वै

देहानांतुजन्मादिषड्विकारवत्त्वाद्विनाशित्वमाह अन्तव
न्तइति इमेऽपरोक्षविषयाःदेहाःघटादयइवोपचयापचया
त्मकाःस्वरनरायाकाराः अन्तवन्तः विनाशवन्तः अन्तवन्तइ
त्युपलक्षणंजन्मादिषड्विकाराणांजायतेऽस्तिवर्द्धतेविपरि
णमतेऽपक्षीयतेविनश्यतीतिषड्भावविकाराःविद्यन्तेयेषांते
न्तवन्तः यद्वा अन्तंतिस्वस्वविषयैर्बध्नन्तीत्यन्ता नीन्द्रियाणि
तानिविद्यन्तेयेषुतेन्तवन्तः यद्वा अंततिबध्नातीत्यंतं मन
स्तद्विद्यतेयेषुतेन्तवन्तः मनएवमनुष्याणांकारणंबंधमो
क्षयोरितिवचनात् उक्ताःकथिताः तत्त्वदर्शिभिरितिशेषः
बहुवचनेनप्राकृताएवदृश्यन्तेनत्वप्राकृताः यतस्तेषांप्रकृ
तिकालकर्मादिजन्यत्वाभावात् ननुगुणत्रयव्यभिन्नत्वे
सतिशुद्धमायाकार्यत्वमप्राकृतत्वमितितल्लक्षणेनतेषा
मपिशुद्धमायाजन्यत्वात्तेपि अंतवंतइतिचेन्न आदित्यवर्णं
तमसःपरस्तादितिश्रुत्यातमःशब्दवाच्याभ्यांप्रकृतिकाला
भ्यांपरः विलक्षणइत्युक्तत्वात् नित्याएवननाशित्वशंका
गंधोपीतिभावः देहाःकस्येत्यपेक्षायामाह नित्यस्यबद्धमु
प्य^ क्ताद्यवस्थाप्राप्तस्यअच्युतस्वरूपस्यदेहाद्देहान्तरंगच्छत
पिसदैकरसस्वरूपस्येतिवा शरीरिणःशीर्यतेक्षयतेइति
शरीरंतद्विद्यतेयस्यसःशरीरीतस्यनतुशीर्यमाणशरीरस्य
सम्बंधीचेत्तर्हितेनसहात्मापिशीर्णभावंप्राप्नोतीतिचेन्नत्रा

८ गी॰ ह अविनाशिनः देहानां विनाशशीलत्वेऽपि विनाशत्वाभाव
टी॰ स्वभावस्य अतएवाप्रमेयस्याप्रमेयत्वेनानुपलभ्यमानस्याप्र-
द्वि॰ त्यक्षप्रमाणाविषयस्याप्रमाणतः ज्ञातुरित्यर्थः एतयोर्वेत्तिते
शाङ्कः नेयन्तहन्ति तद्विद इति वक्ष्यमाणेन यस्माद्देहात्मनोः त्वा॑
सत्त्वेऽपि देहानां विकारशीलाश्रयत्वादनित्यत्वं आत्मनस्तु
विकारशीलाश्रयत्वाभावान्नित्यत्वं च विद्यते तस्मात्तयोर्ना-
शित्वानाशित्वस्वभावं ज्ञात्वा शोकं च त्यक्त्वा युध्यस्व युद्धं कुरुष
भारतेति संबोधनेन यथा भरतमारभ्य त्वत्पितृपर्यन्ताः सर्वे
मृतास्तु पितॄणां शोकं न करोषि तथैते भीष्मादिदेहाः अपिप
तिष्यन्त्येव नात्मानोऽतएषामप्युभयेषां शोकं माकुरुष्वेति १८

मधुसूदनी टीका ॥

अंतवंतो विनाशिन इमेऽपरोक्षा देहाः उपचितापचितरूपत्वा
च्छरीराणीत्युक्तवचनात् स्थूलसूक्ष्मकारणरूपा विराट्सूत्रा
व्याकृताख्याः समष्टिरूपा आत्मनः सर्वे नित्यस्याविनाशि
न एव शरीरिणः आध्यात्मिकसंबंधेन शरीरवतः एकस्यात्म
नः स्वप्रकाशस्फुरणरूपस्य संबंधिनः दृश्यत्वेन भोग्यत्वेन च
चोक्ताः श्रुतिभिर्ब्रह्मवादिभिश्च तथा च तैत्तिरीयके अन्नमया
द्यानंदमयांतान् पंचकोशान्कल्पयित्वा तदधिष्ठानमकल्पि
तं ब्रह्म पुच्छं प्रतिष्ठेति प्रदर्शितं तत्र पंचीकृतपंचमहाभूत
तत्कार्यात्मको विराड्रूपो राशिरन्नमयकोशः स्थूलसमष्टिः
तत्कारणीभूतोऽपंचीकृतपंचमहाभूततत्कार्यात्मको हिर-
ण्यगर्भः सूत्रमूर्तराशिः सूक्ष्मसमष्टिः त्रयं वा इदं नामरूपं
कर्मेति बृहदारण्यकोक्तः तत्रात्मकः सर्वकर्मात्मकत्वेन
क्रियाशक्तिमात्रमादाय प्राणमयकोश उक्तः नामात्मकत्वे
न ज्ञानशक्तिमात्रमादाय मनोमयकोश उक्तः रूपात्मक-
त्वेन तदुभयाश्रयतया कर्तृत्वमादाय विज्ञानमयकोश उ-

+ ननु स्फुरणरूपस्य सतः कथमविनाशित्वं न स्यादेहधर्मत्वात् देहस्य चानुत्पत्तिविनाशादिमत्त्वात् भूतचैतन्यवादिनस्ता त्रिराजर्वन्नासतो विद्यते भावइत्येनद्विवृणोति + न॑

१२८

क्तः ततः प्राणमयमनोमयविज्ञानमयात्मक[illegible]एव हिरण्य
गर्भाख्यो लिंगशरीरकोशः तत्कारणीभूतस्तु मायोपहितचैत
न्यात्मा सर्वसंस्कारशेषोऽव्याकृताख्य आनंदमयकोशः सर्वेषां
संस्काराणां शेषो यस्मिन् ते च सर्वे एकस्यैवात्मनः शरीराणी
त्युक्तं तस्यैष एव शारीर आत्मा यः पूर्वस्येति तस्य प्राणमयस्यैष एव
शरीरे भवः शारीर आत्मा यः सत्यज्ञानादिलक्षणो गुहानिहित
त्वेनोक्तः पूर्वस्यान्नमयस्य एवं प्राणमयमनोमयविज्ञानमया
नंदमयेष्वपि योज्यं अथवा इमे सर्वे देहास्त्रैलोक्यवर्तिसर्वप्रा
णिसंबंधिन एकस्यैवात्मन उक्ता इति योजना तथा च श्रुतिः
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्मा
ध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति स
र्वशरीरसंबंधिनमेकमात्मानं नित्यविभुं दर्शयेति ननु नित्य
त्वं यावत्कालस्थायित्वं तथा चाविद्यादिवत्कालेन सह ना
उ० शोपि न दूपपन्नमित्यत आह अनाशिन इति देशतः कालतो
वस्तुतश्च परिच्छिन्नस्याविद्यादेः कल्पितत्वेनानित्यत्वेपि याव
त्कालस्थायित्वरूपमौपचारिकं नित्यत्वं व्यवह्रियते यावद्वि
कारं तु विभागो लोकवदिति न्यायात् आत्मनस्तु परिच्छेद
त्रयशून्यस्याकल्पितस्य विनाशहेत्वभावान्मुख्यमेव कूटस्थ
नित्यत्वं न तु परिणामि नित्यत्वं यावत् कालस्थायित्वं चे
त्यभिप्रायः नन्वेतादृशे देहिनि किंचित्प्रमाणमवश्यं वाच्यं
अन्यथा निष्प्रमाणस्य तस्यालीकत्वापत्तेः शास्त्रारंभवैयर्थ्या
पत्तेश्च तथा च वस्तुपरिच्छेदोऽपरिहृतः शास्त्रयोनित्वादिति
न्यायाच्च अत आह अप्रमेयस्येति एकधैवानुद्रष्टव्यमेतदप्र
मेयं ध्रुवं न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति
कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं वि
भातीति श्रुतेः स्वप्रकाशचैतन्यरूप एवात्मा अतस्तस्य सर्वभा

सकस्यस्वभानार्थंनस्वभास्यापेक्षा किंतुकल्पिताज्ञानतत्कार्य
निवृत्त्यर्थंकल्पितवृत्तिविशेषापेक्षाकल्पितस्यैवकल्पितविरो
धित्वात् यक्षानुरूपोबलिरितिन्यायात् तथाचसर्वकल्पितनि
वर्तकवृत्तिविशेषो[illegible]त्यर्थंशास्त्रारंभस्तस्यतत्त्वमस्यादिवाक्य॰
मात्राऽधीनत्वात् स्वतःसर्वदाभासमानत्वात् सर्वकल्पनाधि
ष्ठानत्वात्स्वरूपमात्रभासकत्वाच्चनतस्यवृत्त्यापत्तिः तथाचै
कमेवाद्वितीयंसत्यंज्ञानमनंतंब्रह्मेत्यादिशास्त्रमेवस्वप्रमेया
नुरोधेनस्वस्यापिकल्पितत्वमापादयति अन्यथास्वप्रामाण्या
नुपपत्तेः कल्पितस्यचाकल्पितपरिच्छेदकत्वंनास्तीतिशाक
प्रतिपादिते आत्मनःस्वप्रकाशत्वेचयुक्तिर्तोपिभगवत्पूज्य
पादैरुपपादितेतथाहि यत्रजिज्ञासोःसंशयविपर्ययव्यतिरेक
प्रमाणोमन्यतममपिनास्तितत्रतद्विरोधिज्ञानमितिसर्वत्रदृ
ष्टं अन्यथात्रितयान्यतमापत्तेः आत्मनिचाहंवानाहंवेतिनक
स्यचित्संशयः नापिनाहमितिविपर्ययःव्यतिरेकप्रमावेति
ततस्वरूपप्रमासर्वदास्तीतिवाच्यं तस्यसर्वसंशयविपर्यय॰
धर्मित्वात्नधर्म्यंशेसर्वमभ्रांतं प्रकारेतुविपर्ययइतिन्यायात्
अतएवोक्तं प्रमाणमप्रमाणंचप्रमाभासस्तथैवच कुर्वंत्ये
वप्रमांयत्रतदसंभावनाकुतःइति प्रमाभासःसंशयःस्वप्रका
शेसद्रूपेधर्मिणिप्रमाणाप्रमाणयोर्विशेषोनास्तीत्यर्थः आ
त्मनोभासमानत्वेचघटज्ञानमपिज्ञातंनवा[illegible]त्यादिसंश॰
यःस्यात् नचांतरपदार्थविषयस्यैवसंशयादिप्रतिबंधकत्वं
स्वभावःकल्प्यःबाह्यपदार्थे[illegible]नविरोधिज्ञानेनैवसंशयादि
प्रतिबंधसंभवे आंतरपदार्थेस्वभावभेदकल्पनायाअनौचित्या
त् अन्यथासर्वविप्लवापत्तेःआत्ममनोयोगमात्रंचात्ममात्रा॰
त्कारहेतुः तस्यचज्ञानमात्रेहेतुत्वाद्घटादिभानेप्यात्मभानं
समूहालंबनन्यायेनतार्किकाणांअवश्यमपिदुर्निवारं नच॰

त-भानुपा

वाद्यघत्वमानसत्वादिसंकरः लौकिकालौकिकत्ववदंशभे
देनोपपत्तेः संकरस्यादोषत्वादेर्जातित्वानभ्युपगमाद्वात्र तए नै
वव्यवसायमात्रएवात्मभानसामग्र्याविषमाणत्वादनुव्यव
सायोपपत्तेः नचव्यवसायभानार्थंसलस्यदीपवत्स्वव्य
वहारेसजातीयानपेक्षत्वात्‌ नहिघटतज्ज्ञानयोरिवव्यवसा
यानुव्यवसाययोरपिविषयत्वविषयित्वव्यवस्थापकंवैजा
त्यमस्तिव्यक्तिभेदातिरिक्तवैधर्म्यानभ्युपगमात्‌ विषयत्वा
वच्छेदकरूपेणैवविषयित्वाभ्युपगमेघटयोरपितद्भावाप
त्तेरविशेषात्‌ ननुयथाघटव्यवहारार्थंघटज्ञानमभ्युपेय
ते तथाघटज्ञानव्यवहारार्थं घटज्ञानशब्दप्रयोगस्यविष
यंज्ञानमभ्युपेयं व्यवहारस्यव्यवहर्तव्यज्ञानसाध्यत्वादिति
चेत्‌ कानुपपत्तिरुद्भाविता देवानांप्रियेणस्वप्रकाशवादि
नः नहिव्यवहर्तव्यभिन्नत्वमपिज्ञानविशेषणंव्यवहारहे
तुतावच्छेदकंगौरवात्‌ तथाचेश्वरज्ञानवद्योगिज्ञानवत्स्व
मेयमिति ज्ञानवत्त्वेनैवव्यवहारोपपत्तौनज्ञानान्तरकल्प
नावकाशः प्रत्युतव्यवसायस्यापिघटज्ञानव्यवहारहेतुत्वं
ज्ञान किंघटज्ञानत्वेनकिंवाघटज्ञानत्वेनैवेतिविवेचनीयं उभय
स्यापितत्रसत्वात्‌ तत्रघटव्यवहारेघटज्ञानत्वेनैवहेतुता
याःक्लृप्तत्वात्तेनैवरूपेणघटज्ञानव्यवहारेपिहेतुत्वोपप
त्तौनघटज्ञानज्ञानत्वेहेतुत्वावच्छेदकगौरवानुमानाभावा
च्च तथाच नानुव्यवसायसिद्धिः एकस्यैवव्यवसायस्यव्यव
सातरिव्यवसायेव्यवसायेचव्यवहारजनकत्वोपपत्तेरिति
त्रिपुटीप्रत्यक्षवादिनःप्रभाकराः औपनिषदास्तुमन्यन्तेस्व
प्रकाशज्ञानरूपएवात्मानस्वप्रकाशज्ञानाश्रयः कर्तृकर्म
विरोधेनतज्ज्ञानानुपपत्तेःज्ञानभिन्नत्वेघटादिवज्जडत्वेनक
ल्पितत्वापत्तेश्च स्वप्रकाशज्ञानमात्रस्वरूपोह्यात्माःविषयोप

गी॰
टी॰
द्वि॰

हितःसन्साक्षीत्युच्यते वृत्तिमदंतःकरणोपहितःप्रमातेत्यु-
च्यते तस्य चक्षुरादीनि करणानि सचक्षुरादिद्वारांतःकरण
परिणामेन घटादीन्व्याप्य तदाकारो भवति एकस्मिंश्चांतः-
करणपरिणामे घटावच्छिन्नचैतन्यमंतःकरणावच्छिन्नचैत
न्यं चैकलोलीभावापन्नं भवति ततो घटावच्छिन्नचैतन्यं प्रमा
त्रभेदात्स्वाज्ञानं नाशयदपरोक्षं भवति घटं च स्वावच्छेदकं-
129 स्वतादात्म्याध्यासाद्भासयति अंतःकरणपरिणामश्च वृत्त्याख्यो
ति स्वच्छः स्वावच्छिन्नेनैव चैतन्येन भास्यत इति अंतःकरणवृ
त्तिघटानामपरोक्षता तदेतदाकारत्रयमहं जानामि घटमि
ति भासकचैतन्यस्यैकरूपत्वेपि घटप्रतिवृत्त्यपेक्षत्वात्प्रमा
तृता अंतःकरणवृत्तीः प्रतिवृत्त्यनपेक्षत्वात् साक्षिते
ति विवेकः अद्वैतसिद्धौ सिद्धांतबिंदौ च विस्तरः यस्मादेवं
प्रागुक्तन्यायेन नित्यो विभुरसंसारी सर्वदैकरूपश्चात्मा तस्मा
त्तन्नाशशंकया स्वधर्मे युद्धे प्राक्प्रवृत्तस्य तव तस्मादुपरति-
र्नयुक्तेति युद्धाभ्यनुज्ञायां भगवानाह तस्माद्युध्यस्व भारते
ति अर्जुनस्य स्वधर्मे युद्धे प्रवृत्तस्य ततउपरतिकारणं शोक-
मोहौ तौ च विचारजनितेन विज्ञानेन वाधितावित्यपवादा
पवादे उत्सर्गस्य स्थितिरिति न्यायेन युध्यस्वेत्यनुवादो न वि-
धिः यथा कर्तृकर्मणोः कृतीत्युत्सर्गः उभयप्राप्तौ कर्मणी
त्यपवादः अकाकारयोः स्त्रीप्रत्यययोर्योगे नेति वक्तव्यमि-
ति तदपवादः तथा च शुश्रूषोर्ब्रह्मणो जिज्ञासेत्यत्रापवादा
पवादे पुनरुत्सर्गस्थितेः कर्तृकर्मणोः कृतीत्यनेनैव षष्ठी
तथा च कर्मणि चेति निषेधाऽप्रसराद्ब्रह्मजिज्ञासेति कर्मष
ष्ठीसमासः सिद्धो भवति कश्चित्तु तस्मादेव विधेर्मोक्षे ज्ञान-
कर्मणोः समुच्चय इति प्रलपति तत्र युध्यस्वेत्यतो मोक्षसाध
नकर्मसमुच्चयसाध्यत्वाऽप्रतीतेः विस्तरेण चैतदग्रे भगव-

ह्रीतावचनविरोधेनैवनिराकरिष्यामः ॥ [illegible]

[illegible] १८ ॥

सदानंदी टीका ॥

नासतोविद्यतेभावइत्यतद्व्रिहणोत्पजः स्वप्नमायाशरीरादि वदेतेकल्पिताजडाः १ देहाविनाशिनःसर्वेदेवतिर्यङ्नरादयः नित्यस्यानाशिनोथस्तदेहद्युक्तस्यचात्मनः २ हश्यत्वेन हशःप्रोक्ताःश्रुतिभिर्ब्रह्मवादिभिः नित्यत्वस्यचनाशस्यह्रि विथत्वात्तयोर्यथा ३ भस्मीभूतोमृतोदेहोनष्टस्त्वादर्शनेगतः तद्व्याहत्यर्थमत्रोक्तंनित्यस्यतिशरीरिणः ४ यथाव्याध्यादि भिर्युक्तोदेहोनष्टइतीर्यते तन्निहत्यर्थमत्रोक्तमनाशिनइति स्फुटं ५ अन्यथापरिणामस्यवनित्यःस्यादिवद्भवेत् नित्यः कूटस्थआत्मेतिसिद्धमित्याशयोहरेः ६ नन्वेतादृशचिद्रूपे मानमास्तिनवास्तिचेत् भास्यत्वेनजडत्वस्यात्तदेहस्यापिघटा दिवत् ७ नास्तिचेत्तर्ह्यलीकत्वंखपुष्पादेरिवास्यच इत्यत्राः ह्यप्रमेयस्यापरिछेद्यस्यवस्तुनः ८ स्वप्रकाशस्यचिद्धातोर्मा नापेक्षास्वभासने नास्तिसर्वावभासस्यमानेतेनावभास्यते ९ स्वभानार्थंस्वभास्यस्यापेक्षानैवोपपद्यते स्वप्रकाशस्वभाव स्यमानाभावेपिनक्षतिः १० मानाभावेह्यलीकत्वनियमोऽ स्तिजडेहवै अन्यथास्यादलीकत्वंमानस्याप्यवभासिनः ११ मातृमानप्रमेयाणांयोगपद्येनभासकः साक्षीतत्रप्रमाण स्याकांक्षास्यादित्यहोभ्रमः १२ प्रमाणमप्रमाणंवाप्रमाभा

गी॰ सत्त्वेथैवच कर्तृत्वेवप्रमायत्रतदसंभावनाकृतः १३ इत्युक्तं
टी॰ संप्रदायविद्भिर्वार्तिकेश्रीसुरेश्वरैः नत्वनर्थस्तदाशास्त्रारंभोमा
द्वि॰ नानपेक्षणे १४ शास्त्रयोनित्वसूत्रस्यवैयर्थ्यंचेतिचन्नहि ।
कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थमपेक्ष्यते १५ कथितंमान
मेतेनस्वप्रकाशस्यकाक्षतिः कल्पितस्यैवसाजात्यात्कल्पि
तस्यविरोधिता १६ विरुद्धयोरधिष्ठानभूतस्यनविरोधिता ।
तथाचकल्पितस्यैवाज्ञानादेर्विनिवर्तकः १७ वृत्तिभेदस्तदु
त्पत्त्यैशास्त्रारंभोपिसार्थकः तस्यतत्त्वमसीत्यादिवाक्याधी॰
नतयैवच १८ शास्त्रयोनित्वसार्थक्यंतस्मात्सच्चित्सुखात्म॰
नः सर्वदाभासमानत्वात्स्वतःसिद्धस्यभास्वतः १९ सर्वाधि
ष्ठानभावेनतच्छून्यत्वंचनिराकृतं यस्मात्सर्वांकरीत्यास्तिचि
दात्माव्यापकोच्युतः २० सर्वदैकरसोनित्यस्ततस्तन्नाशशं
कया स्वधर्मेप्राकप्रवृत्तस्ययुद्धेतस्मात्तवाधुना २१ नयु॰
क्तोपरतिस्त्वेवमाहयुद्धाभ्यनुज्ञया युध्यस्वेतिविधिर्नाय
पूर्वप्राप्तानुवादतः २२ ॥ १८ ॥

नीलकंठी टी॰॥

एवंसतआत्मनोनित्यत्वंअसतोदेहादेरनित्यत्वंचोक्तमुपसं
हरन्पुनर्युद्धाभिमुखंकरोति अंतवंतइति यद्यपिनासतो
विद्यतेभावइतिअसतोदेहानांकालत्रयेपिसत्वंनास्तीतिप
रमार्थदृष्ट्याउक्तंतथापितांदृष्टिमप्रतिपद्यमानस्यनरका
दिभयमनुरुध्यमानस्यव्यवहाराभिप्रायेणनित्यानित्यवि॰
भागमभिप्रेत्यदेहानामंतवत्त्वमुच्यतइतिनदोषः नित्यत्वं
कालापरिच्छेद्यत्वंतच्चव्यवहारेनभसोप्यस्तीत्यतउक्तं अ
नाशिनइतिनाशःअदर्शनंतद्वानहिआकाशः नभआत्म
निलीयतइतिस्मृतेः अयंतुनतथेत्यनाशी सर्वदैवप्रका
शमानइत्यर्थः एतदपिनघटादिवदृश्यत्वेनेत्याह अप्रमे
यस्येति तथाचश्रुतिरात्मनोऽप्रमेयत्वमाह एतदप्रमेयं॰

ध्रुवमिति अप्रमेयमित्यस्याप्रमेयत्वमित्यर्थः पतन्नात्मनि
प्रमाणप्रसरान्वयं तथा च श्रुतिः येनेदं सर्वं विजानाति तं
केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति प्रसिद्धि
स्तस्य प्रत्यगात्मत्वादेव यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वा
न्तर इति श्रुतेः उक्तं च प्रमाणमप्रमाणं च प्रमाभासस्तथैव
च यत्प्रसादात्प्रसिध्यति तदसंभावनाक्रान्त इति तस्माद्यु
थास्वभावेन भीष्मादिदेहानां मिथ्यात्वादनित्यत्वाच्च स्वयमे
व नष्टप्रायत्वाद्धननान्निहन्तृत्वयात्वधर्मो न नाशनीय इ
तिभावः १८ ॥

आनंदी टीका

अप्रमेयस्य देशकालादिभिरनवच्छिन्नस्यात एव नित्यस्य श
रीरिणः शरीरसमवेतस्यात्मनः इमे युद्धार्थिता भीष्मादिदेहाः
अंतवन्तः देशकालादिभिरवयवविभागदर्शनाच्छिन्नस्वरू
पाः तस्माद्भीष्मादिजीवात्मनामविनाशित्वाद्युध्यस्वेत्यर्जु
नं स्वधर्मान्निवृत्तं पौनःपुन्येन नियोजयति भगवान् १८ ।

+ सत्स्वरूपं प्रतिपद्यासत्स्वरूपं प्रतिपादयितु रामकंठी टीका ।माह+

+ सर्वशरीरेषु सर्वावस्थास्वप्यविलुप्तोपलब्धृत्वमात्रैकलक्ष
+ णत्वान्नित्यस्याविनाशिनस्तथा देहादिभिरवच्छेत्तुमशक्यत्वा
दप्रमेयस्य यत्तादिकलनाविषयभूतस्य शरीरिण आत्मन
इमे ... देहास्तद्विलक्षणा अन्योन्यभिन्ना आगमापायिधर्मक
त्वाद्विनाशिनो विनश्वरस्वभावत्वात्तथा देशकालादिपरिच्छे
द्यत्वात् अन्तवन्त इयत्तादिकलनाविषयभूता वियत्त्वमात्रे
णसंबद्धा इति देहरूपस्य वस्तुनः परमार्थाविनश्वरस्येय
त्वमात्रादिना हेतुनात्मसंबद्धस्य विनाशे सत्यात्मनोपि वि
नाशप्रतिपत्तिर्विवेचया विद्वद्भिर्न तत्तु युक्तयैनोपपन्न अतोऽय
थाप्रतिपादितात्मतत्त्वप्रतिष्ठितोऽहंकारो वत्प्रमाणयोप
पत्त्याऽपहाय विहितं स्वकर्मानुतिष्ठन्युद्धाख्यं प्रस्तुतं समरक
र्म समाचरेति अथ युद्धं नाम परहननरूपतया हिंसात्मके

131

कर्म तत्कथमहं गुरुज्ञात्यादिवधलक्षणे घोरे कर्मणि प्रवर्ते
य इतियन्मन्यसे तदेतदात्मस्वरूपानभिज्ञत्वजनितमोहवि
लसितमेव[illegible]: १८ ॥

लामिकी टीका

अथात्मस्वभावमाह अन्तेति [illegible] *नित्यस्य
[illegible] सर्वदैकरूपस्य
शरीरिण आध्यासिकसंबन्धेन शरीरवन्तः देशतः कालतोपरिच्छिन्नस्य +आत्मनः नाशिनो
वस्तुतस्त्वशुद्धस्येति हिंसात्मकेकर्मणि प्रवर्तयतीतियन्म
न्यसे तच्चान विलसितमित्याह यदिति एतेहि लक्षणदेश
कालादिपरिच्छिन्नः कश्चिदर्थः ईश्वरोवा देहेष्विवनाशयुक्ताः
१८ ॥

पंचोली टीका

यच्चात्मस्वरूपंस्वात्मसत्ताव्यभिचारिसामान्येनोक्तंतदपिवि
शेषेणोपदर्शयति अन्तवन्तइति हेभारतइमेदेहाः नित्यस्यअ
विक्रियस्यअविनाशिनोविनाशरहितस्यअप्रमेयस्यप्रमाणा
तीतस्यशरीरिणःआत्मनः अन्तवन्तः अन्तोनाशोयेषांतेअन्तव
न्तःनाशोपिलोकेद्विविधःयथादेहोभस्मीभूतप्रदर्शनेगतो
नष्टउच्यते विद्यमानोपियथा अन्यथापरिणतोव्याध्यादियु
क्तोनष्टउच्यते तत्रअस्यआत्मनःअनाशिनःनित्यस्यद्विविधे
नापिनाशेनसंबंधोनास्ति १८ ॥

१ अप्रमेयस्य प्रतित्वादि
प्रमाणैर्देहादिवदपरि
च्छेद्यस्य तदुक्तम् स्वपदा
स्वशिरश्छायां यद्वल्लंघि
तुमीहते पादोद्देशे शिरो
नस्यात्तथेयं वैदेवी कल्पि
इमेसुखदुःखादि धर्मकादे
हा प्रतिक्षणमवस्थान्तर
[illegible]भाक्त्वाप्रमाणेनान्तवंतः
स्वप्रमायादेहादिवन्नाश
युक्ताः अत आत्मतत्त्वप्र
तिष्ठामाश्रित्य

रणवीरससिद्धोधिनी॥

एवंस्वरूपं निर्णीयात्मस्वरूपं प्रतिपादयति अन्तवन्तइति नित्य
स्यसर्वेषुशरीरेषुसर्वावस्थासुचाविलुप्तप्रमात्वेनमात्रैकलक्षण
स्यातएवानाशिनः प्रागभावध्वंसाभयाप्रतियोगिनोनएवाप्र
मेयस्यदेशकालादिभिः परिच्छेत्तुमशक्यत्वादियत्ताकलनाम
विषयभूतस्यशरीरिणोदेहिनआत्मनइमेसुखदुःखादिधर्मक
त्वाद्भुतलक्षणादेहाअन्तवन्तोध्वंसप्रतियोगिनः अतएवप्रागभाव

प्रतियोगिनोपि प्रागभूतस्यैव विनाशप्राप्तित्वात् एवं चात्मनो
नित्यत्वे देहादेरेव प्रपविनश्वरत्वे चात्मनि विनश्वरत्वसंभावन
मयथार्थानुभवविजृंभितं तच्चानुपपन्नमिति भावः तस्मात्ते
यथोपपादितदेहदेहिविनाशिनित्यत्वज्ञानवान्त्वत्प्रमाणयो
पपत्त्याद्युपपादिते स्वकर्मणि तिष्ठस्व प्रकृतं समरकर्म सं
माचरेति १८ ॥

मधुभाष्य

अंतवंत इति अन्तवन्तदि दर्पणनाशप्रतिबिंबनाशवदात्मना
शाङ्कत्यत आह नित्यस्येति शरीरिण इति स्वरव्याहृतये न
वनैमित्तिकनाशमित्याह अनाशिन इति कुत अप्रमेयस्य
स्वरूपत्वात् नत्तूपाधिबिंबनाशेनाशे प्रतिबिंबनाशः
सति च प्रदर्पके स्वयमेवादर्पकः स्थितत्वात् नित्यस्योपाधिः
कश्चिदस्ति प्रतियत्नो विमोचनस्यानित्योपाध्यात्मरूपया
चिद्रूपयायुतो जीवः केवलप्रतिबिम्बक इति भगवद्वच
नात् व्यवहारस्तस्मातत इत्याह १८ ॥

132

भाषा अनुवाद

उत्पत्ति विनाश धर्म विशिष्ट देहादि की अनित्यता देखावते हैं कि नित्य अर्थात् सदा एक रूपसे स्थित और इसीसे अविनाशी और अपरिमेय जानने जोग नहीं ऐसा देही कहे आत्मा है और सुख दुख आदि धर्म विशिष्ट नश्वर विनाशी यह देह है ऐसा तत्वज्ञानी कहते हैं इसीसे जो स्वरूपसे आत्माका विनाश या सुख दुख आदिका सम्बन्ध नहीं है तो मोह जनित शोक को परित्याग करिके युद्धमे प्रवृत्त होउ और अपना क्षत्रीका परम धर्म जो युद्ध सो कभू छोडना नहीं १८ ॥

दोहा॥

अंत वंतकहि देह यह जीव नित्यकी षह अविनाशी अ प्रमाणकी पार्थयुद्धकरता तेह १८॥

133

यएनंवेत्तिहन्तारं यश्चैनंमन्यतेहतम् उभौ
तौनविजानीतो नायंहन्तिनहन्यते १९ ॥

शांकरभाष्यं ॥

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रंनप्रवर्तक
मित्येतस्यार्थस्य साक्षीभूतेऋचावानिनाय भगवान्यत्तुम
न्यसे युद्धे भीष्मादयो मयाहन्यन्ते अहमेव तेषां हन्तेत्येषा
बुद्धिर्मृषैव तेकथं यएनमिति यएनं प्रकृतं देहिनं वेत्ति
विजानाति हन्तारं हननक्रियायाःकर्तारं यश्चैनमन्यो मन्य
ते हतं देहहननेन हतोहमिति हननक्रियायाःकर्मभूतं
तावुभौन विजानीतोनज्ञातवन्तौ अविवेकेनात्मानमहंप्र
त्ययविषयं हन्ताहंहतोस्म्यहमिति देहहननेन आत्मानं
योविजानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः यस्मान्नायमात्मा २८
हन्तिनहननक्रियायाःकर्ताभवति नचहन्यते नचकर्म
भवतीत्यर्थः अविक्रियत्वात् १९ ॥

आनंदगिरिकृतटीका ॥

अविनाशितु तद्विद्धीत्यत्र पूर्वार्द्धेन तत्पदार्थसमर्थनमुत्त
रार्द्धेन निरीश्वरवादस्य परिणामवादस्य वा निराकरणमा
त्मनि जन्मादिप्रतिभानस्योपचारिकत्वप्रदर्शनमन्तवन्तइत्या
दिवचनमिति केचित् अपरे नामायमपिपन्थाःपूर्वोक्तस्य
गीताशास्त्रार्थस्योपेक्षामात्रमूलत्वं निराकर्तुंमंत्रद्वयंभग
वानानीतवानिति श्लोकद्वयस्यसङ्गतिंदर्शयति शोकमो
हादीति तत्रप्रथममंत्रस्यसङ्गतिमाह यत्त्विति प्रत्यक्षनि॰
बन्धनत्वादस्मद्बुद्धेर्मृषात्वमयुक्तमित्याक्षिपति कथं॰
मिति प्रत्यक्षस्याज्ञानप्रसूतत्वेनाभासत्वात् तत्कृताबुद्धि
र्भ्रमेति परिहरति यएनमिति य हन्ता चेन्मन्यते हन्तुं इ॰

त्पाद्यास्त्वमर्थंतोदर्शयित्वा व्याचष्टे यएनमिति हन्तारं हतंचा
त्मानंमन्यमानस्य कथमज्ञानमित्याशंक्याह हन्ताहमिति।
हन्तृत्वादिज्ञानमज्ञानमित्येव हेतुमाह यस्मादिति आत्मनो
हननंप्रति कर्तृत्वकर्मत्वयोरभावे हेतुंदर्शयति अविक्रिय
त्वादिति १९ ॥

स्वामिकृतटीका ॥

तदेवंभीष्मादिमृत्युनिमित्तःशोकोनिवारितः यच्चात्मनोहंतृ
त्वनिमित्तंदुःखमुक्तं एतान्नहंतुमिच्छामितदपितद्वदेवनिर्नि
मित्तमित्याह यएनमिति एनमात्मानंहननक्रियायाःकर्ता
रंकर्मभूतंचवेत्तिकर्मत्ववत्कर्तृत्वमपिनास्तीत्यर्थः तत्रहेतु
र्नायमिति १९ ॥

पिशाचभाष्यम् टी· ॥

यएनमिति यएनंप्रकृतंदेहिनंवेत्तिहंतारं यश्चैनंमन्यतेहतं
देहहननेहतोयमिति हननक्रियायाःकर्मभूतमात्मानं ताउ
भौनविजानीतः अविवेकेनआत्मानमहंत्वयविषयं यो विजा
नीतस्तावुभौचात्मस्वरूपानभिज्ञावित्यर्थः यस्मान्नायमात्मा
हंतिहननक्रियायानकर्तानहन्यते नचकर्मभवतीत्यर्थः
अविक्रियत्वात् ॥ १९ ॥

रामानुजभाष्यम् टी·

एवमुक्तस्वभावमात्मानंहननहेतुंयोमन्यते यश्चैनंकेनापि
हेतुनाहतंमन्यते उभौतौनविजानीतःउक्तैर्हेतुभिरस्यनि
त्यत्वादयंनहननहेतुर्नहंति एवंचआत्मानहन्यते हंतिधा
तोरप्यात्मानकर्मत्वशरीरवियोगकरणवाचीनहिंस्यात्सर्व
भूतानीतिब्राह्मणोनहंतव्यइत्यादीन्यपि शास्त्राणितच्छ
रीरवियोगकरणविषयाणिउक्तैरेवहेतुभिर्नित्यत्वादपरिमि
त्वादात्मनोजन्ममरणादयः सर्वएवाचेतनधर्मानसंतीत्युच्य
ते १९ ॥

अभिनवगुप्तकृतटी॰ ॥

एनमात्मानं देहद्वयोर्हन्तारं हतं च वेत्ति तस्माज्ज्ञानं अत एव
स बद्धः १७ ॥

परमार्थप्रपा टी॰

अथ एतान्न हन्तुमिच्छामीत्यादिना यच्चात्मनो हन्तृत्वनिमित्तं
दुःखमुक्तं तदपि निर्निमित्तमित्याह यस्येति एवमात्मनो
हननक्रियायां कर्मत्वं कर्तृत्वमपि नास्ति यद्वद्घटेनैव घट
स्फोटेन तदन्तर्गताकाशस्य कर्मकर्तृभावो नास्ति तद्वद्देहे तु
मा हन्तायमिति १७ ॥

वनमाली टी॰ ॥

ननु बन्धविच्छेदनिमित्तकशोके अपनीतेऽपि तद्वधकर्तृकत्व॰
निमित्तकं पापं स्यादेव शोकाभावात्पापाभावे ब्राह्मण
वधाच्छोकाविषयात्पापानापत्तेः न तो हं वधकर्ता त्वं प्रेरक
इति द्वयोरपि हिंसानिमित्तकपापापत्तेरित्याशङ्काकण्टक
वाक्येन परिहरति यस्येति यो मीमांसकादिरेनं जीवं हन्तारं
स्वतन्त्रहननक्रियाकर्तारं यश्चालोकायतिकादिर्हतं हनन
कर्म मन्यते तावुभौ तत्स्वरूपं न जानीतो यं न कं चित्स्वतन्त्रो
हन्ति परेशाधीनत्वात् ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठ
ति भ्रामयन्सर्वभूतानि यन्त्रारूढानि माययेति वक्ष्यमाण॰
त्वात् उक्तरीत्या नित्यत्वेन हननकर्मतासम्भवात् अयं भा
वः उक्तरीत्या नित्यत्वात्तस्य न हननकर्मत्वं पराधीनमपि
कर्तृत्वं स्वाभाविकं नास्ति किं त्वनाद्यविद्यावशाद्देहान्तः॰
करणादावहं ममेत्यभिमानाद्बुद्धिस्थत्वादिनाहं करो॰
मीति कर्ता भवति तत्र तत्फलभोगाय सदसद्योनिषु संस
रति न चैवं कर्तृत्वं जीवेऽस्त्येव स्यात्तथा च कर्ता शास्त्रार्थवत्त्वा
दिति जीवस्य कर्तृत्वबोधकं सूत्रं विरुद्धं तापसिद्धेः तत्र स्या
दिति वाच्यं बुद्ध्या उत्पन्नस्यापि कर्तृत्वादेर्विद्यासहकृतत्स्वामि

यथाहि पुरुषस्य दंडित्वं न तु हन्तृत्वम् तथात्र विषयासङ्गकृतस्वामित्वादि संबंधेन जीवस्य कर्तृत्वं
दुःखित्वादिकं तेन संबंधेन +

गी. त्वसंबंधेन वा तस्यैव जीवे सत्त्वात् हन्तात्मनः दंडेन केन चित्सं
टी. बंधेनैवात्र कर्तृत्वं तस्यैव संसारभोक्तृत्वादिकं तत्र अदृष्टादौ जीव
द्वि. २९ स्य संबंधिनियामकोऽयमात्मायविषयासङ्गकृतो देहादावहंकाराभि
मान एव अतः एव विषयाभिमानस्तेनादृष्टादिसंबंधस्त
तः सत्यमेव कर्तृत्वं तेन ततः सत्यमेव दुःखाद्यत्र भवरूपः संसा
रः साभिमानस्य क्षत्रियस्य स्वोचितयुद्धाख्यकर्मानुष्ठानात्
पापं किंतु स्वर्गादिकं भवति त्वं तु मुमुक्षुरतोऽभिमानं विहाय
फलेच्छारहितं स्वधर्मं युद्धमाचरेति १९ ॥

अनुमवैजयन्ती टीका ॥

एवं शरीरे वर्तमानस्याप्यात्मनो नित्यत्वादप्रमेयत्वाच्चाविना
शित्वमुक्तमिदानीमेता[ ]न्हंतुमिच्छामि घ्नतोपि मधुसूदने
त्यस्यापि तत्रैव वदन् तस्य देहवियोगस्य निमित्तत्वे हन्तृत्वे सत्यतोः क
र्मत्वं च वारयन्नाह य एनमिति यः कश्चित्त्वमन्यो वा मोहयु
क्तः पुमान् एनं देहिनं हन्तारं हनननिमित्तं वेत्ति जानाति य
श्च पुनः केनापि शस्त्रादिनिमित्तेनैवमविनाशिनं हतं नाशि
तं मन्यते ते उभौ तौ मोहाविष्टावुभावपि न विजानीतः
आत्मा नित्योऽविनाशी त्येवं विशेषेण न जानीतः यतोऽयं श
रीरी न हन्ति कस्यापि देहवियोगं न करोति न हन्यते स्वयम
पि केनाप्युपायेन न वध्यते तो हन्ति क्रियायाः कर्मापि न भव
तीति भावः ननु अयमेनं हन्त्यनेनायं हत इति लोकप्रसिद्धत्वे
न न हिंस्यात्सर्वाणि भूतानि ब्राह्मणो न हन्तव्य इति वेदप्रसिद्ध
त्वेन चात्मनो हन्तृत्वस्य हन्तः [ ]कर्मत्वे [ ]व हन्तृत्वहननत्वा
त्कथमात्माविनाशीति चेन्न लोके वेदे च हन्तुः प्रयोगस्य देह
वियोगपरत्वादात्माविनाशीत्यर्थः । १९ ॥

मधुसूदनी टीका

+ एनं प्रकृतं देहिनं अहं घूपत्वादिगुणकं योऽयं हन्तारं हननक्रिया
याः कर्तारं वेत्ति अहमस्य हन्तेति विजानाति यश्चान्य एनं मन्य

+ नन्वेवमशोच्यानन्वशोचस्त्वमित्यादिना भीष्मादिबंधुविच्छेदनिबंधने शोके पनीतेपि तद्वधकर्तृत्व
निबंधनस्य पापस्य नास्ति प्रतीकारः नहि यत्र शोको नास्ति तत्र पापं नास्तीति नियमः द्वेष्यब्राह्मण
वधे शोकाविषयेपापाभावप्रसंगात् अतो हं कर्ता त्वं प्रेरक इति द्वयोरपि हिंसानिमित्तपातकापत्ते
रवक्तव्यमिदं वचनं तस्माद्युद्धस्व भारतेत्याशंक्य काठकपठितया ऋचा परिहरति भगवान् +

तेहं तेहननक्रियायाः कर्मभूतं देहहननेनहतोहमितिविजा
नाति यश्चैनमात्मानं हन्तारं हननक्रियायाः कर्मभूतं देह
तावुभौदेहाभिमानित्वादेनमविकारिणमकारकस्वभाव
मात्मानं नविजानीतो नविवेकेनजानीतः शास्त्रात् कस्मात्
यस्मात् नायंहन्ति नहन्यते कर्ताकर्मचनभवतीत्यर्थः अत्र
यएनंवेत्तिहन्तारंहतंचेत्यमत्रावतिवक्तव्येपदानामाहन्तिर्वा
क्यालंकारार्थो अथवायएनंवेत्तिहन्तारंतार्किकादिरात्मनः
कर्तृत्वाभ्युपगमात् तथायश्चैनंमन्यतेहतंचार्वाकादिरा
त्मनोविनाशित्वाभ्युपगमात् तावुभौनविजानीतइतियोज
वादिभेदख्यापनायपृथगुपन्यासः अतिसूत्रातिकानवविध
यतयावापृथगुपदेशः हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेह
तमितिपूर्वार्धेश्रोतःपाठः [illegible]
[illegible]
[illegible] १९ ॥

सदानंदी टीका ॥

ननुत्वदुक्तरीत्यात्मानमात्मशोकस्तथापिमे भीष्मादिवधक
र्तृत्वनिमित्तेनोडुष्करं १ कर्ताहंप्रेरकस्त्वंचहिंसायांपातके
द्वयोः पृथक्स्वितिवचस्तस्मादयुक्तमितिचेन्नहृएव २ यएनंदे
हिनंशुद्धमक्रियंनिष्फलंपरं हननाख्यक्रियायास्तुकर्तारंवे
त्तिमूढधीः ३ अस्यहंताहमित्येवंयश्चैनंमन्यतेहतं हतोहं
तत्क्रियायास्तुकर्मेत्येवंहितावुभौ ४ देहाभिमानिनावेनं
नजानीतोविवेकतः यतोयंतत्क्रियायानोकर्तानैवास्तिक
र्मवा ५ कर्मैनंवेत्तिचार्वाकोदेहमात्रात्मविज्जडः बुद्ध्यादि
गुणमात्मानंकर्तारंवेत्तितार्किकः ६ इत्थंवादिभिदासम्यक्
ख्यापनायपृथक्पुनःउपन्यासःपदानांवासूत्रादिख्यापनाय
वा ७ अतश्चार्वाककाणादपक्षत्यक्तानिहृतः वेदांतमतमा
श्रित्यप्रथमेवत्याप्यायाहवे ८ ॥ १९ ॥

नतुनासतोविद्यतेभावइतिन्यायेनासतोमात्रादेर्मिथ्यात्वेन
निःस्वरूपकत्वात्कर्तृत्वंनसंभवति अतःसतएवकर्तृत्वंबं
धमोक्षभाक्त्वंचवाच्यं अन्यथांतःकरणेबंधआत्मनश्चमोक्ष
इतितयोर्वैयधिकरण्यंस्यात् तथायेनसर्वमिदंततमितिस
तोदेहाद्युपादानत्वंचोक्तं तथाचहननक्रियाप्रत्येकस्यैवक
र्तृत्वंकर्मत्वंचापततिनचविरुद्धं स्वात्मनिस्वव्यापारायोगा
त् नहिवह्निर्वह्निंदहतीतिचेदुक्तमित्याशंक्याह यएनमि
ति यस्तुतार्किकादिरेनमात्मानंहंतारंहननक्रियायाःक
र्तारंमन्यते यश्चचार्वाकादिरेनंहतंहननक्रियायाःकर्मीभू
तंमन्यते तावुभावपिनजानीतः आत्मतत्त्वमितिशेषः यस्मा
त्नायंहंतिनहन्यते नहियःकर्तासआत्मा नापिदेहआत्मा
तयोःप्रागेवानात्मत्वावधारणात् अयंभावः यथायःपिंडेव
ह्निसंबंधादेवदग्धृत्वंनतुस्वतः एवंमात्राद्युदयसमनियतं
कर्तृत्वंमात्रादिधर्मएवनात्मनः आत्मनितुकर्तृत्वप्रतीति
र्मात्रादिसंबंधादेवअतोमात्रादिविशिष्टस्यैवबंधोनकेव
लस्य मोक्षस्तुमात्रावियोगएवेतिनबंधमोक्षयोर्वैयधिक
रण्यं नचमात्रादेर्निःस्वरूपत्वमस्ति सत्वासत्वाभ्यामनिर्व
चनीयस्यव्यवहारयोग्यस्यब्रह्मज्ञानैकबाध्यस्यस्वप्नमाया
गंधर्वनगरादितुल्यस्यतत्स्वरूपस्याभ्युपगमात् तस्मात्क
र्तृत्वमात्मधर्मः यथोक्तं आत्माकर्त्रादिरूपश्चेन्माकांक्षीस्त
र्हिमुक्ततां नहिस्वभावोभावानांव्यावर्तेतौष्ण्यवद्रवेरिति
किंचकर्तृत्वेरागद्वेषादिविकारवत्त्वएवसंभवति तद्वान्दुः
खीतिआत्मनोनुभूयमानंसाक्षित्वंबाध्यते यथोक्तं नतस्या
द्विक्रियादुःखीसाक्षितावाविकारिणः धीविक्रियासहस्रा
णांसाक्ष्यतोहमविक्रियइति नचसतोदेहाद्युपादानत्वेनह
ननक्रियाकर्मत्वंसंभवति विवर्तवादाभ्युपगमात् नह्यध्य
स्तस्यधर्मैरधिष्ठानेविकारोदृश्यते यथोक्तंभाष्ये यत्रयद

ध्वस्तं सत्त्वं कृतेन गुणेन दोषेण वाणुमात्रेणापि न संबध्यत इ-
ति विष्णु नैव तद्बुद्धेः न हि भूमिरूषरवती मृगतृष्णाजलवाहि-
नी सरित्तद्वद्भवति मृगवारिपूरपरिपूरवती न नदी तथा घ-
रभुवं स्पृशतीति एतेन कर्तृत्वकर्मत्वयोरनात्मधर्मत्वाद-
नात्मनश्चानेकरूपत्वादेकत्रात्मनि तदुभयविरोधाद्भावन-
मपि निरस्तं वेदितव्यं एवं चार्वाकतार्किकाभिमतौ देहात्म-
कर्त्रात्मवादौ हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतं उभौ
तौ न विजानीतो नायं हन्ति न हन्यत इति काठकोक्तेन मंत्रेण
पूर्वार्धे पाठभेदात्पठितेन परिहृतौ वेदितव्यौ १९ ॥

श्रीधरी टीका

यत्त्वमन्यसे एतेषां हननेन नरकपातः स्यादिति तदपि नेत्या-
एनमिति ह अनवच्छिन्नस्य निरवयवस्य नित्यस्यात्मनो विनाशाभावात्
स्य हननक्रियायां कर्तृत्वं कर्मत्वं च न संभवतीत्यर्थः १९ ॥

रामकंठी टीका

यतः— यो मायावशादुत्पन्ननिर्विकारपरमार्थसन्तमात्मानमप्रत्यक्ष- व
पेलाद्विलक्षणे देहमेवात्मत्वेन मन्यमानो हननादिदेहधर्मा-
धिरोपेणैनमथमात्मानं हन्तारं हननक्रियाकर्तारं वेत्ति प्रति-
पद्यते यश्च सम्यग्ज्ञानेन न जानीतः सत्यस्यात्मनः स्वरूपं न बु-
द्ध्येते यतोऽयं परमात्मा सर्वमेवेदं परमनिर्विकारचिन्मात्रस्वभा-
वः स्वात्मतया सर्वदा विस्पष्टत्र हन्ति न च हन्यते हेत्वतानि-
बन्धने हननक्रियाकर्तृत्वं न प्रतिपद्यते नापि हन्तव्यतानि-
बन्धने हननक्रियाकर्मत्वं एते हि विकल्पविपर्ययज्ञानात्म-
कव्यवहाराणां तेऽज्ञानामेव संभवन्ति न परमात्मनः १९ ।

नेयच्छेनमेवप्रतिपादितं लक्षण-
मविनाशिनमात्मानं विनाशल-
क्षणं देहधर्माधिरोपेण हन्ते
हिंसितं मन्यते तावुभावपि
मोहवशादनात्मन्यात्माभि-
माने +

लासिकी टीका ।

यमन्त्रादिमन्मानौ देहादिवदपरिच्छेद्यस्य नष्टकं स्पष्टस्वरूप-
रक्षायोयदहं वेत्ति नमी हतेपरो [illegible]
कल्पयतो यमात्मा हननक्रियायां न कर्ता नापि कर्मभूतः अ-
विक्रियत्वात् १९ ॥ युध्यस्वेति हिंसात्मके कर्मणि प्रवर्तयन्नीति यन्मन्यसे तद-
ज्ञानविलसितमित्याह य एनात्मतापनमुक्तलक्षणमात्मानं हन्तारं हननक्रियाकर्तारं वेत्ति
यश्चैनं हननक्रियाकर्मभूतं वेत्ति तावुभावविद्याग्रस्तौ शास्त्रादात्मस्वरूपं न विजानीतो यतो
यमात्मा हननक्रियाया न कर्ता नापि कर्मभूतः अविक्रियत्वात् अविक्रि[illegible] र्तव्यत्वाद्वि
[illegible]

137

पंचोली टीका

यच्चात्मनोहंतृत्वनिमित्तंभीष्मादीनांहन्यमाननिमित्तंदुः
खमुक्तंपश्यामिहेतुमिच्छामीत्यादिनातदपिचात्मविनाशादिहे
तुकशोकमोहवन्निर्मूलमेवेत्याह यएनमिति यःप्रमानएनं
देहिनंहंतारंहननक्रियायाःकर्तारंवेत्तिजानातिचपुनःयः
प्रमानएनंदेहिनंहतंहननक्रियायाःकर्मभूतंमन्यतेतावुभा
वपिनविजानीतः देहेंद्रियादिसंघातएवहंताहन्यतइतितौ
उभौनविज्ञातवंतौअविवेकेनात्मानमहंप्रत्ययविषयंहंता
हतोहमितिदेहहननेनआत्मानंयौविजानीतः तौआत्मस्वरू
पानभिज्ञावित्यर्थः यस्मान्नायमात्माहंतिनहननक्रियायाःक
र्तानचहन्यतेनचकर्मभवतीत्यर्थः अविक्रियत्वात्कथमवि
क्रियआत्माइतिद्वितीयोमंत्रः [illegible]
[illegible] १९ ॥

रणवीरसमिद्धोधिनी ॥

नन्वेवमशोच्यानन्वशोचस्त्वमित्यादिनाभीष्मादिबंधुविच्छेद
निमित्तःशोकोपनीतोभवता तस्माद्युद्धस्वभारतेतिप्रवृत्तस्तु
कंपरहननरूपतयाहिंसात्मकंकर्महियुद्धं तत्कथमहंगुरुज्ञा
त्यादिवधनिबंधनपापस्यप्रतीकारमसंभावयन्स्वतःघोरेकर्मणि
प्रवर्तेयं येनाहंकर्ताप्रेरकश्चमहदुवपिपापभागिनौस्यावामिति
यत्संशयमेतदेतदात्मस्वरूपाज्ञानजनितमोहविलसितमेवेति
प्रतिपादयन्नाह यएनमिति योमोहवशात्देहप्रत्ययजत्वविकारि
परमात्मसदात्मतत्त्वतःहिभिन्नंशरीरमेवात्मतयाभिमन्य
मानोहननादितद्धर्माध्यारोपणेनैनंप्रकृतेसत्यरूपंदेहिनंहंता
रं हननक्रियायाःकर्तारंवेत्ति अहमस्यहंतेति प्रतिपद्यते य
श्चान्यएनमेवप्रतिपादिततत्त्वमविनाशिनंशरीरिणंविना
शलक्षणशारीरधर्माध्यारोपणेनहतंहननक्रियायाःकर्मभू

ते मन्यते देहहननेनैव हतोऽयमिति प्रतिपद्यते तावुभावपि मो
हवशादनात्मन्यात्माभिमानग्रहग्रस्ततया यथार्थानुभवेन विजानी
तः सत्यस्यात्मनः स्वरूपेण विवेकेन बुध्येते यतोऽयं परमात्मा न
हंति हंतृतानिबंधनं हननक्रियाकर्तृत्वं न प्रतिपद्यते न च हन्य
ते हंतव्यतानिबंधनं हननक्रियायाः कर्मत्वं च न प्रतिपद्यते इति
हंतृतानिबंधनं पापं नाश्नुवेतिभावः तथा च काठकश्रुतिः हं
ता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं उभौ तौ न विजानीतो नायं
हंति न हन्यत इति १९॥

मधुभाष्य

यएनमिति कुतः उक्तहेतुभ्यो नायं हंति न हन्यते न हि प्र
तिबिंबस्य क्रिया सद्भिर्बिंबक्रिययैव क्रियावान् ध्यायती
वेतिश्रुतेश्च अग्रमं चवर्णोप्यस्तीत्याह १९ (न जायत इति
न चेश्वरस्ता न वद्भूवाभवि)

138

भाषा अनुवाद

भगवान की इस बातसे महात्मा भीष्मपितामहादिकके मृत्यु हेतुक जो अर्जुन को शोक आयके प्राप्त भयाथा सो दूर। भया अब कुटुम्बके वध करनेवाले हमहै यह दुख प्रथम अध्यायके ३४ श्लोकमे कहाहै सो उस दुखके उत्पन्न होनेमे कोई हेतु नही है यह प्रतीति कराते है कि यह आत्मा न। किसीसे मरता और न किसीको मारताहै और जो इसको हन्ता जानता और इसको हत मानता वे दोनो कुछ भी नही जानतेहै १९ ॥

दोहा॥

जो यह मारणहारा जानहिं मर्योहार जो जान नायहमा
रत नहिंमरत दोउ सो अज्ञान १९॥

139

नजायतेम्रियतेवाकदाचि न्नायंभूत्वाभ
विताबानभूयः अजोनित्यःशाश्वतोयंपुरा
णोनहन्यतेहन्यमानेशरीरे २० ॥

शांकरभाष्ये टी॰ ॥

कथमविक्रियःआत्मेति द्वितीयोमन्त्रः नजायते नोत्पद्य
ते जनिलक्षणात्ववस्तुविक्रिया नात्मनो विद्यतइत्यर्थः
तथा न म्रियतेवा तत्रवाशब्दश्चार्थेनम्रियते चेत्यन्त्याविना
शलक्षणाविक्रिया प्रतिषिध्यते कदाचिछब्दः सर्वविक्रि
याप्रतिषेधैःसंबध्यते नकदाचिज्जायतेन कदाचिन्म्रिय
तइत्येवं यस्मादयमात्माभूत्वाभवनक्रियामनुभूय पश्चाद
भविता अभावंगन्तानभूयः पुनस्तस्मान्नम्रियते योहिभू
त्वा नभविता सम्रियत इत्युच्यते लोके वाशब्दान्नशब्दाच्चा
यमात्माभूत्वावाभविता देहवन्नभूयःपुनस्तस्मान्नजायते
योऽभूत्वाभविता सजायतइत्युच्यते नैवमात्माऽतोनजाय
ते यस्मादेवं तस्मादजोयस्मान्नम्रियते तस्मान्नित्यश्च यद्यप्या
द्यन्तयोर्विक्रिययोःप्रतिषेधेसर्वाविक्रियाःप्रतिषिद्धाभव
न्ति तथापि मध्यभाविनीनांविक्रियाणां तदर्थैःस्वशब्दैरेव
प्रतिषेधःकर्तव्य इत्यनुक्तानामपियौवनादिसमस्तवि
ति॰ क्रियाणांप्रतिषेधोयथास्यादित्याह शाश्वतइत्यादिना शाश्व
तइत्यपक्षयलक्षणविक्रियाप्रतिषिध्यते शश्वद्भवःशा
श्वतोनापक्षीयते स्वरूपेणनिरवयत्वान्निर्गुणत्वाच्च नापि
गुणक्षयेणापक्षयः अपक्षयविपरीतापि वृद्धिलक्षणावि
क्रिया प्रतिषिध्यतेपुराणइति योह्यवयवागमेनोपचीयते
सवर्द्धतेऽभिनवइतिचोच्यते अयंत्वात्मानिरवयवत्वात् पु
रापिनवएवेति पुराणोनवर्द्धतइत्यर्थः तथानहन्यतेन॰

गी॰ विपरिणम्यते हन्यमाने विपरिणम्यमानेपि शरीरे हन्तिवन्न
टी॰ विपरिणमार्थे द्रष्टव्योऽयं न हन्ता येन विपरिणमत इत्यर्थः
द्वि॰ अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्र
तिषिध्यन्ते सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः यस्मा
देवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मंत्रेणास्य संबन्धः २०

आनंदगिरिकृतटी॰ ॥

तदेव साधयितुं न जायते म्रियते वा विपश्चिदित्यादिमन्त्रांत
रमवतारयति कथमिति सर्वविक्रियाराहित्यप्रदर्शनेन हे
तुं विशदयन् मन्त्रमेव पठति न जायत इति जन्ममरणविक्रि
याद्वयप्रतिषेधं साधयति नायमिति अयमात्मा भूत्वा न भ
वा४ विता न भूत्वा भूयो भवितेति योजना न केवलं विक्रियाद्वयमे
वात्र निषिध्यते किन्तु सर्वमेव विक्रियाजातमित्याह अज इ
ति वाच्यमर्थमुक्त्वा विवक्षितमर्थमाह जनिलक्षणेति विक
ल्पार्थत्वं व्यावर्तयति वेति निष्पन्नमर्थं निर्दिशति नेत्यादिना
सम्बन्धमेवाभिनयति न कदाचिदिति अन्त्यविक्रियाभावे हे
तुत्वेन नायमित्यादि व्याचष्टे यस्मादिति उक्तमेव व्यनक्ति
यो हीति आत्मनि तु भूत्वा पुनरभवनाभावान्नास्ति मृत्युरित्य
र्थः आत्मनो जन्माभावेपि हेतुरिहैव विवक्षित इत्याह वाशब्दा
दिति अभूत्वेति छेदः देहवदिति व्यतिरेकोदाहरणं उक्तमे
वार्थं साधयति यो हीति जन्माभावे तत्पूर्विकास्तित्वविक्रि
यापि नात्मनोस्तीत्याह यस्मादिति प्राणवियोगादात्मनो मृ
तेरभावे सावशेषनाशाभाववन्निरवशेषनाशाभावोपि सि
ध्यतीत्याह यस्मादिति ननु जन्मनाशयोर्निषेधे तदन्तर्गं
तानां विक्रियान्तराणामपि निषेधसिद्धेस्तन्निषेधार्थं न पृ
थक् यतितव्यमिति तत्राह यद्यपीति स्वशब्दैर्मध्यवर्तिवि
क्रियानिषेधवाचकैरिति यावत् आर्थिकेपि निषेधे निषेध

स्यसिद्धतया षाड्भावनिषेधो नपृथगर्थवानित्याशंक्याह अत्र॰
कानामिति नित्यशब्देन शाश्वतशब्दस्य पौनरुक्त्यं परिहरन्व्या
करोति शाश्वत इत्यादिना अपक्षयो हि स्वरूपेण वा स्याद्गुणाप
चयतो वेति विकल्पक्रमेण दूषयति नेत्यादिना पुराणपदस्या
गतार्थत्वं कथयति अपक्षयेति तदेव स्फुटयति योहीति न म्रि
यते वेत्यनेन चतुर्थपादस्य पौनरुक्त्यमाशंक्य व्याचष्टे तथे॰
त्यादिना ननु हिंसार्थो हन्तिः श्रूयते तत्कथं विपरिणामो नि
षिध्यते तत्राह हन्तिरिति हिंसार्थत्वसंभवे किमर्थान्तरं ह
न्तेर्विध्यते तत्राह अपुनरुक्ततया इति हिंसार्थत्वे सति निषे
धेन पौनरुक्त्यं स्यात्तन्निषेधार्थो विपरिणामार्थत्वमेष्टव्यमि॰
त्यर्थः पूर्वावस्थात्यागेनावस्थान्तरापत्तिर्विपरिणामः तद॰
र्थश्चेदत्र हन्तिरिष्यते तदा निष्पन्नमर्थमाह नेति न जायते
इत्यादिमन्त्रार्थमुपसंहरति अस्मिन्निति षण्णां विकाराणामा
त्मनि प्रतिषेधे फलितमाह सर्वेति आत्मनः सर्वविक्रियारा
हित्येपि किमायातमित्याशंक्याह यस्मादिति २० ॥

स्वामिकृत टीका ॥

नहन्यत इत्येतदेव षड्भावविकारशून्यत्वेन द्रढयति नेति
न जायत इति जन्मप्रतिषेधः न म्रियते वेति विनाशप्रतिषेधः
वाशब्दश्चार्थे न चायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भज
ते किंतु प्रागेव स्वतः सद्रूप इति जन्मानन्तरास्तित्वलक्षणद्वि॰
तीयविकारप्रतिषेधः तत्र हेतुः यस्मादजः यो हि जायते स
जन्मानन्तरमस्तित्वं भजते न तु यः स्वयमेवास्ति स भूयोपि अ॰
न्यदस्तित्वं भजत इत्यर्थः नित्यः सर्वदैकरूप इति वृद्धिप्रति॰
षेधः शाश्वतः शश्वद्भव इति अपक्षयप्रतिषेधः पुराण इति॰
विपरिणामप्रतिषेधः पुरापि नव एव न तु परिणामतो रूपा॰
न्तरं प्राप्य नवो भवतीत्यर्थः यद्वा न भवितेति एतस्यानुषंगं
कृत्वा भूयः अधिकं यथा भवति तथा न भवितेति वृद्धिप्रतिषे

गी॰
टी॰
द्वि॰

यःअजोनित्यइतिचोभयंहर्षाभावहेतुरित्यपौनरुक्त्यं नदे
वंजायतेअस्तिवर्धतेविपरिणमतेपक्षीयतेविनश्यतीत्येवं
यास्कादिभिरुक्ताःषड्भावविकारानिरस्ताः यदर्थमेतेविकारा
निरस्तास्तेअत्रत्तेविनाशाभावरूपसंहरति नहन्यतेहन्यमा
२० नेशरीरेइति २० ॥

नजायते इ

पिशाचभाष्यं टी॰ ॥

कथं [illegible] तिद्वितीयोमंत्रः नजायतेनोत्पद्यतेजनन
स्यनकर्ताजनितलक्षणवस्तुविक्रियात्मनोनविद्यतइत्य
र्थः तथायंनम्रियतेनकदाचिडुत्पत्तिक्रियायाःसत्तामनुभ
वति उत्पन्नेसत्तानुभवस्यमरणाव्यभिचाराडुत्पत्तेः सनोत्प
द्यतेजननस्यनकर्ताजननलक्षणवस्तुविक्रियानविद्यते
उत्पन्नेसत्तामननुभवन्नम्रियतइत्युच्यते नतोस्तिलक्षणा
भावविक्रियात्मनोनविद्यतइत्यर्थः वाशब्दाश्चार्थे कदाचि
च्छब्दः सर्वविक्रियाप्रतिषेधैःसंबध्यते नकदाचिज्जायते
नकदाचिन्म्रियतइतिसर्वत्रयोज्यं अयंभूत्वाभवितावान
भूयः अयमात्माभूत्वाउत्पत्तिक्रियामनुभूयभूयोभविता॰
अवस्थान्तरंप्राप्य॰ नेअवस्थांतरंनप्राप्नोतिनविपरिणमतइत्यर्थः विपरिणा
मलक्षणभावविक्रियात्मनोनविद्यतेइत्यर्थः अजः अवय
वोपचयरूपेणनोपचीयतेवृद्धिलक्षणभावविक्रियानवि
द्यतइत्यर्थः अजोनित्यःअपक्षयलक्षणभावविक्रियात्मनो
नविक्रियतेहन्यमानेविक्रियमाणेपिशरीरे अस्मिन्मंत्रेषड्
भावविकारालौकिकावस्तुविक्रियाआत्मनिप्रतिषिध्यन्ते
सर्वप्रकारविक्रियारहितआत्मेतिवाक्यार्थःयस्मादेवंत
स्माडुभौतौनविजानीतइतिपूर्वेणमंत्रेणास्यसंबंधः २०

रामानुजभाष्यं टी॰ ॥

तत्र नजायतेम्रियतइतिवर्तमानतयासर्वेषुदेहेषुसर्वैरनु॰
अनुभूयमानेजन्ममरणेकदाचिदात्मानंनस्पृशतः नायंभूत्वा

भविता वा न भूयः अयं कल्पादौ भूत्वा भूयः कल्पान्ते च न भवि-
ता इति न केषुचित् प्रजापतिप्रभृतिदेहेष्वागमेनोपलभ्यमान-
कल्पादौ जननं कल्पान्ते च मरणमात्मानं न स्पृशतीत्यर्थः अ-
तः अजः सर्वदेहगत आत्मा तत एव नित्यः शाश्वतः प्रकृतिवत्सा-
दसत्परिणामैरपि न नीयते अतः पुराणः पुरापि नवः सर्वदा
न पूर्ववदनुभाव्य इत्यर्थः अतः शरीरे हन्यमानेपि न हन्यते
यमात्मापि २० ॥

अभिनवगुप्तकृतटी० ॥

एतदेव स्फुटयति नायं भूत्वेति अयमात्मा न भूत्वा भविताषि
तु भूत्वैव अतो न जायते न च म्रियते यतो भूत्वा न न भविता
पितु भवितैव २० ॥

परमार्थप्रपाटी० ॥ २०

अथ न हन्यत इत्यनेनात्मनः षड्भावविकारशून्यत्वं यदुक्तं त-
देव प्रकटयन्नाह न जायत इति तत्र षड्विकारास्तु जायते अ-
स्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति एतान् क्रमे-
ण निषेधयति न जायत इति जन्मनिषेधः वाशब्दश्चार्थेन
चायं भूत्वा भविता भवति अस्तित्वं भजते किंतु प्रागेव
स्वतः सद्रूप इति जन्मानन्तरास्तित्वलक्षणद्वितीयविकारनि-
षेधः अत्र हेतुः यस्मादजः यो हि जायते स एव जन्मानन्तरम-
स्तित्वं भजते नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः शाश्वत
माण० इति अपक्षीयतानिषेधः निरवयवत्वान्निर्गुणत्वान्निर्गुणत्वा-
च्च पुराण इति विपरिणामप्रतिषेधः पुरापि नव एव न तु प-
रिणामतो रूपान्तरं प्राप्य नवो भवतीत्यर्थः यद्वा न भविता
स्यात् तु षगंकृत्वा भूय अधिकं यथा भवति तथा न भवितेति वृ-
द्धिप्रतिषेधः अजो नित्य इति चोभयं हेत्वाद्यभावहेतु इति न पौ-
नरुक्त्यं एवं यदर्थवेदवादिभिरुक्ताः षड्विकारा निरस्तास्तत्प्र-
स्तुते विनाशाद्यभावमुपसंहरति न हन्यते हन्यमाने शरीरे इ-
ति अत्रार्थे कठशाखीया श्रुतिश्च न जायते म्रियते वा विपश्चिन्ना-

वि०

ने०

गी. येंजूनश्चिन्नबभूवकश्चिनअजोनित्यःशाश्वतोयंपुराणोनहः
टी. न्यतेहन्यमानेशरीरे हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं उभौ
द्वि. तौनविजानीतो नायंहंतिनहन्यते अशरीरंशरीरेष्वन
वस्थेष्ववस्थितं महांतंविभुमात्मानंमत्वाधीरोनशोचतीतिग॰
नार्थेयंश्रुतिः २० ॥

वनमालीटीका ॥

नन्वात्मानंहननक्रियायाःकर्मकर्ताचजूतोनभवति अविक्रि
यत्वादित्याह नजायतइतिंद्वितीयमंत्रेण जायतेस्तिवर्द्धतेवि
परिणमतेपक्षीयतेविनश्यतीतियद्विकारास्तत्राद्यंतौनिषि
ध्यतेनजायतेम्रियतेवेतिवासमुच्चयार्थः नजायतेनम्रियते
चेत्यर्थः कुतोनोत्पद्यतेयतोयमात्माकदाचिदपिकाले नभू
त्वाअभूत्वाप्राक्भूयःपुनरपिभविताजेंपोश्यभूत्वाभवति सउ
त्पत्तिरूपांक्रियामनुभवति अयंतुप्रागपिसत्वाद्यतोनोत्पा
द्यतेअतोजः तथायमात्माभूत्वाप्राक्कदाचिद्भूयः पुनर्न
भवितानवाशङ्खाहाकावपरिहृतिः योहिप्रागभूत्वात्तरंका
लेचनभवतिस्तृतिरूपांक्रियामनुभवति अयंतूत्तरकाले
पिसत्वाद्यतोनम्रियतेनित्योविनाशयोग्यःशाश्वतःसदैकरू
पःअवयवाद्यभावान्नहृद्धिरित्याह पुराणइति पुरापिनवए
करूपोनत्वधुनानूतनांकांचिदवस्थांप्राप्नोतियोहिनूतना
मवस्थांप्राप्नोतिसवर्द्धतेइत्युच्यते अस्तित्वविपरिणामौतुज
न्मविनाशांतर्भूतत्वान्नपृथक्निषिद्धौ यस्मादेवं सर्वविका
रशून्यआत्मातस्माच्छरीरेहन्यमानेतत्संबद्धोपिकेनाप्युपा
येननहन्यतेनहंतुंशक्यतइत्यर्थः २० ॥

अस्तमवैजयन्ती टी॰ ॥

कस्मादयंनहंतिकस्माद्वानहन्यतेइत्यपेक्षायांनहन्यते
इत्यस्यानंतरंवदन्नात्मनोजन्मादिषड्विकारशून्यत्वंदर्शयन्नाह
नजायतइति अयमात्माकदाचित्कस्मिन्नपिकालेनजायतेज
न्मनप्राप्नोतीत्यनेनास्यजन्मरूपविकारोऽपास्तोभवतिवाअ

नरपिकदाचिदयंनम्रियतेमृतस्तुनशाम्नोतीत्यनेनाप्यस्यमरण
२० रूपविकारोपिदूरीकृतोभवति द्वितीयोवाशब्दोप्यर्थेहियस्मा
देनेजन्ममरणेनस्पृशतस्तस्मादयंकदाचित्प्रागदेहोपिभूत्वा
उत्पद्यभूयःपुनरपिसृष्ट्यतेनभविताभविष्यतीतिनकिंतु
प्रागनुत्पद्यचानेभविताभविष्यतीत्यनेनास्त्यस्तित्वलक्षणवि
कारोपिनिराकृतः यस्यस्वरूपगुणादयःपूर्वकालेभूत्वाकं
चित्कालंस्थित्वापश्चाद्विनश्यंतितस्यैवास्तित्वरूपविकारः
संभवति [illegible]ब्रस्यतुसंदे[illegible]शत्वेनकालत्रयेपिस्वरूपगुणा
दीनामुत्पत्तिविनाशासम्भवादस्तित्वरूपविकारस्याप्यसंभ
वइतिभावः ननुयद्ययंनजायतेनम्रियतेनास्तिचेतिविका
रत्रयरहितःस्यात्तर्ह्यस्यवृध्याद्युत्तरस्यैवजन्माद्यभावेनदेहश
व्यभावात्कथंदेहिनस्तस्याद्देहान्तरप्राप्तिःशरीरिणइमेदेहा
२१ इतिपूर्वोक्तःसंघटतेतिचेत्तत्राह अजइति अजतिगच्छती
त्यजःसर्वशरीरगतःब्रह्मादिपिपीलिकांतेषुदेहेषुभिन्न
भिन्नरूपेणप्राप्तइत्यर्थः यद्वाऽजतिक्षिपतीत्यजःस्वस्वविष
येष्विंद्रियप्रेरकःननुस्वतंत्रईश्वरःसर्वमप्रेरयतिजीवस्तुपर
तंत्रःप्रेर्यस्तस्यकथंप्रेरकत्वंसंभवतीतिचेत्सत्यंईश्वरस्यैवा
स्यसर्वप्रेरकत्वासम्भवेपितत्प्रेरणाधीनप्रेरकत्वमस्तिनस्व
तंत्रतया[illegible]नासम्भवोभवतीत्यर्थः नन्वत्राजइत्यनेनजन्मा
भावत्वस्यबोधोजायतेनगतिक्षेपणयोरितिचेन्न नजायते
इत्यनेनैवतज्ज्ञानेजातेपुनःपाठस्यपुनरुक्तिदोषवत्वादजः
जगतिक्षेपणयोरित्यस्यैवरूपंनजनीप्रादुर्भावइत्यस्येत्यर्थः
नन्वयंसर्वदेहगतश्चेत्तर्ह्युपचयापचयात्मकेनदेहेनसहा
स्याप्युपचयापचयौभवतइतिचेत्तत्राह नित्यइतिनित्यःसर्व
कालैकरूपःदेवतिर्यगादिदेहप्राप्तोपिकालप्रयुक्तबालवृद्ध
त्वादिभिर्नोपचीयतेनापचीयतेचेत्यर्थः इत्यनेनवृद्ध्यपक्षयो
निरस्तौक्तपर्ययतःशाश्वतःशश्वद्भावरूपःइत्यनेनास्यप

गी. विणामविकारित्वाभावोपिद्रष्टव्यः अतएवपुराणःप्राचीनः
टी. यथादेहःकालावस्थापरिणामादिभिरयंनतुतेनायंप्राचीन
द्वि. इत्यादिशब्दवाच्यतांभजते तथायंनयतोनित्यःशाश्वतस्त
स्माद्विकारात्मकेशरीरेहन्यमानेपि शस्त्रादिभिःशकली
भावंप्राप्तेर्नपिनहन्यतेकेनाप्युपायेनहंतुंनशक्योभवतीत्य
र्थः २० ॥

143

+ कस्मादयमात्माहननक्रियायाःकर्ता कर्मचनभवति अविक्रियत्वादित्याह द्वितीयेनमंत्रेण ॥+

मधुसूदनी टीका ॥

+ जायतेऽस्तिवर्धतेविपरिणमतेपक्षीयतेविनश्यतीतिषड्भा
वविकाराइतिवार्षायणिरितिनैरुक्ताः तत्राद्यंतयोर्निषेधःक्रि
यते नजायतेम्रियतेवेतिवाशब्दःसमुच्चयार्थो नजायतेम्रि
त्प^ यतेचेत्यर्थःकस्मादयमात्मानोत्पद्यते यस्मादयमात्माकदाचि
त्कस्मिन्नपिकालेनभूत्वाप्राग्भूयः पुनरपिभवितानयोह्यभूत्वा
भवतिसउत्पत्तिलक्षणंविक्रियामनुभवति अयंतुप्रागपि
सत्वाद्यतोनोत्पद्यतेअतोजः तथायमात्माभूत्वाप्राक्कदाचि
नभूयः पुनर्नभविताशब्दाद्वाक्यविपरिवृत्तिःयोहिप्राग्भू
त्वाउत्तरकालेनभवतिसम्रतिलक्षणांविक्रियामनुभवति
अयंतूत्तरकालेपिसत्वाद्यतोनम्रियते अतोनित्यःविनाशाऽ
योगइत्यर्थः अत्रनभूत्वेत्यत्रसमासाभावेपिनानुपपत्तिः ना प^
नुयाजेष्वितिवद्भगवतापाणिनामहाविभाषाधिकारेनञ्
समासस्यावात् यत्तुकात्यायनेनोक्तंसमासनित्यत्वाभिप्रा
येणवावचनानर्थक्यंचेतितद्भगवत्पाणिनिवचनविरोधा
दनादेयं तदुक्तं आचार्यशबरस्वामिना असद्वादीहिकात्या
यनइति अत्रनजायतेम्रियतेवेतिप्रतिज्ञाकदाचिन्नायंभूत्वा
भवितावानभूयइति तदुपपादनं अजोनित्यइतितदुपसं
हारइतिविभागः आद्यंतयोर्विकारयोर्निषेधेनमध्यवर्तिवि
काराणांतद्व्याप्यानांनिषेधेजातेपिगमनादिविकाराणांअ
नुक्तानामप्युपलक्षणायाऽपक्षयश्चवृद्धिश्चस्वशब्देनैवनि

णाक्रियते तत्रकूटस्थनित्यत्वादात्मनोनिर्गुणत्वाच्चनस्वरूप
तोगुणतोवाऽपक्षयःसंभवतीत्युक्तं शाश्वतइति शाश्वत्सर्व
दाभवति नापक्षीयतेनापचीयतइत्यर्थः यदिनापक्षीयते
तर्हिवर्धतामितिनेत्याह पुराणइति पुरापिनवएकरूपो
नत्वधुनानूतनांकांचिदवस्थामनुभवति योहिनूतनांकां
चिदुपचयावस्थामनुभवतिसवर्धतइत्युच्यते अयंतुसर्व
२० दैकरूपत्वान्नापचीयतइत्यर्थः अस्तित्वविपरिणामोतुजन्म
विनाशांतर्भूतत्वात्पृथक्ननिषिद्धो यस्मात्सर्वविकारशू
न्यआत्मातस्माच्छरीरेहन्यमानेतत्संबद्धोपिकेनाप्युपायेन
नहन्यतेनहंतुंशक्यतेइत्युपसंहारः नायंहंतिनहन्यतइति
उपपादितं [illegible]
[illegible] २० ॥

सदानंदी टीका ॥

हननाख्यक्रियायानोकर्तात्मानैवकर्मवा ज्ञातएवमपेक्षा
यामविकारितयोच्यते १ नजायतेयतोनायमभूत्वाभवितानु
नः योह्यभूत्वाभवत्यसावुत्पत्तिंभजतेसच २ यतोयंसत्यए
वास्तिततोनोत्पद्यतेत्यजः कालत्रयेपिसत्यत्वाज्जनिर्नैवास्य
युज्यते ३ तथात्माप्ययंभूत्वापुनर्नभवितेतिन योहिभूत्वा
पुरापश्चान्नभवत्ययमस्तुभाक् ४ अयंतूत्तरकालेपिसत्वान्न
म्रियतेयतः अतोनित्योननाशार्हःकदाचिदपिविद्वनः ५ न
जायतेम्रियतेवाप्रतिज्ञावाक्यमिष्यते कदाचिदितितस्यैवो
पपादनमिहोच्यते ६ अजोनित्यइतीहोपसंहारइतिभागा
शः आद्यंतयोर्निषेधेननिषेधोमध्यवर्तिनां ७ विकाराणां
स्वतःसिद्धेष्वथद्वाहृद्धापक्षयो स्वशब्देननिषिध्येतेशाश्वता
द्युत्यपक्षयः ८ पुरापिनवएवासौनतोनायंविवर्द्धते अवस्था
नूतनांयस्मात्यातिवर्द्धतएवसः ९ अयंसदैकरूपत्वान्नापचीय
तइत्यंततः अस्तित्वविपरीणामोजन्यतांतर्गतोयतः १० निषि

गी॰ टी॰ हि॰ ङ्खोनएषयस्मात्तद्विकारविवर्जितः आत्मानशक्यतेहंतुंह
न्यमानेशरीरके ॥१॥२॰ ॥

नीलकंठी टी॰

नायंहंतिनहन्यतइत्युक्तंतत्रनहन्यतइत्येतदुपपादयतिन॰
नी॰ त्रस्थेनैवद्विष्टेनमंत्रेण नजायतइति अयमात्माकदाचित्रजा
यतेअभिनवोनोत्पद्यते नवाम्रियतेनिरन्वयोननश्यतितार्कि
काभिमतघटवत् तत्रक्रमेणहेतुद्वयं अजोनित्यइति अजत्वा
न्नजायते नित्यत्वाच्चनवाम्रियतइत्यर्थः अस्तुतर्हिक्षणिकवि
ज्ञानधारारूपः तस्यविज्ञानवादिभिरजत्वनित्यत्वाभ्युपगमा
दित्याशंक्याह भूत्वाभवितावानभूयइति अयमित्यनुवर्ततेअ
यंभूत्वाभूयोभवितानभूयोऽसकृत्भूत्वाभवितेतिभवनक्रिया
द्वयस्यक्त्वाप्रत्ययोक्तंसमानकर्तृत्वंधारैक्याभिप्रायेण भूत्वैव
भविता नतुभूत्वास्थित्वाविनश्यति तार्किकाणांहिविज्ञानेउत्प
त्तिस्थितिनाशलक्षणव्यापित्वात्त्रिक्षणवस्थायि विज्ञानवादिनां
तुपूर्वस्यनाशक्षणएवोत्तरस्योत्पत्तिक्षणः सएवतस्यस्थितिक्ष
णस्तेनक्षणिकत्वाद्विज्ञानानांभवनक्रियाद्वयस्याव्यवधाना
द्भूत्वाभवितृत्वमुक्तं तादृशोप्ययंनयतःशाश्वतःशश्वदेकरूपः
योहंबाल्येपितरावन्वभूवंसोहंस्थाविरेप्रणप्तॄननुभवामीतिबा
ल्यस्थाविरयोरात्मैक्यप्रत्यभिज्ञानात् नचसादृश्यात्प्रत्यभि॰ यद्वा
ज्ञानंसादृश्यग्रहीतुःस्थिरस्याभावात् जन्ममरणहीनोपिधर्मा
न्तरविशिष्टःपूर्वंभूत्वापुनर्धर्मान्तरविशिष्टोभवितेत्यपिन भू
त्वैवभवितानत्वभूत्वेतियोजना आर्हताहिशरीरपरिमाणमा
त्मानमभ्युपगच्छन्तोनित्यस्यैवात्मनःक्रमेणव्युत्क्रमेणवामश॰
कमत्कुणमतंगजशरीरप्राप्तौपरिमाणभेदंमन्यमानाभूतस्यैवा
त्मनोविशेषणीभूतपरिमाणभवनादौपचारिकंभवनमभ्युपग
च्छंतितदपिन शाश्वतत्वादेवउपचयापचयवतोमध्यमपरिमा
णस्यवस्तुनोनित्यत्वायोगात् अनेनैवषड्भावविकारवादिमतंनिरा
स्तंआत्मनोक्तंभूत्वाभवनंप्रत्याख्येयं नहिषड्भावविकारधर्मिणःस्व

भा॰

नाशमंतरेणात्यंतिकदुःखोच्छेदः संभवति घटादेर्यावद्रूपना
शादर्शनात् नन्वजत्वे नित्यत्वे शाश्वतत्वे चाकाशे व्याप्तिरत आ
ह पुराण इति पुरापि नव एव एतेनाप
क्षयादिधर्मराहित्यान्मुख्यमजत्वादिकमात्मन एव वियदादेः
त्वमुख्यं तदिति दर्शितं अतएव शरीरे हन्यमाने न हन्यते भाष्ये
न वा शब्दः स्वार्थे न जायते म्रियते चेत्यर्थः तत्रोपपत्तिः अयं न भू
त्वा अनुत्पद्य तभविता घटादिवदतो न जायते अथवा नञः पूर्वा
न्वयित्वं न जायते न वा म्रियत इति यतो भूत्वा अभविता घटवद्वि
नाशी न अतो न म्रियत इति शाश्वतः पुराण इत्येताभ्यामुपचया
पचयौ निषिध्येते इति न हन्यते न विपरिणम्यत इति च व्याख्यातं
केचिदेवमाहुः न जायते म्रियत इति प्रतिज्ञा कदाचिदित्यादिना
तस्योपपादनं अज इत्यादिरुपसंहार इति २० ॥

अत्रोपपत्तिमाह ^

आनंदी टीका

^ न जायते म्रियते वेति जन्ममरणयोरभावहेतुमाह कदाचि
न्नायं भूत्वा अयं भीष्मादिर्जीवगणः कदाचिज्जात्वपि प्राग्भूत्वा^
न^ ननु काऊर्ध्वं चितया प्राग्भूत्वैवास्तीत्यर्थः ततश्चातीतकाल
स्थित्यापि भूत्वाभावित्वलक्षणं जन्म नास्तीत्यर्थः तथा भूत्वा
भूयः पुनर्भविष्यति काले भविता न भविष्यत्येवेत्यर्थः अतए
वाज उक्तलक्षणजन्महीनः अजत्वान्नित्यः नित्यत्वाच्छाश्व
तस्सदैकरूपः अतएव पुराणः चिरंतनः सर्वोत्तरकोटिरहि
तः इत्युत्तरोत्तरं कारणमाला अथवा अत्र शास्त्रसिद्धा जायते अ
स्ति विपरिणमते वर्धते अपक्षीयते विनश्यतीति षड्भावविका ^स्य
राः प्रतिषिध्यन्ते न कदाचिज्जायते इति जन्माख्यस्य विकारस्य नि
षेधः वा शब्दः स्वार्थे न कदाचिन्म्रियते चेत्यन्त्यस्य विनाशाख्यस्य विका म्रि^ पुरा+
हे^ रस्य शाश्वत इति सदैकरूपत्वाद्भूत्वाभावित्वपर्यायस्यास्तित्वस्या
पक्षयाख्यस्य च विकारस्य पुराण इति नायं चंद्रकलावदपचीय
नवीभूत उपचीयत इति वृद्धिनाम्नो विकारस्य न हन्यते हन्यमा
ने शरीरे रूपवस्थान्तरप्राप्तिरूपस्य विपरिणामाख्यस्य विकार

स्यप्रतिषेधः २० ॥

आत्मा रामकंठी टी॰

अयमुक्तलक्षणदेशकालाकारावस्थाद्यवच्छेदरहितचिन्मात्र
स्वरूपत्वान्नजायतेनचोत्पद्यते नित्यशुद्धत्वरूपत्वान्नापिम्रियते
विनश्यति नापिजन्ममरणान्तरालवर्तिस्थित्यवस्थारूपभाव
विकारमनुभवति तेहिजन्मस्थितिविनाशात्मकावस्थाभे
दादेहाद्यनित्यभावाश्रयाः तेहिभावाः अभूतपूर्वधर्माविर्भावे
जाताइत्युच्यन्ते भूतपूर्वधर्मतिरोभावेचविनष्टाइत्युच्यन्ते तद
न्तरालेचतत्तत्स्वरूपप्रवाहसादृश्यभ्रमात्स्थिताइत्युच्यन्ते सदा
तेषामपुनर्भावीभावः आत्मनस्तुसदाभूतस्यनाभावसंबन्धः
सदैकलक्षणाव्यभिचारात् नधर्मान्तराविर्भावतिरोभावाव
ति जन्मस्थितिविनाशलक्षणावस्थात्रयप्रतिषेधोस्यानेनश्लो
केनप्रतिपादितः इदानीमेतएवभावविकारविशेषैरस्यप्र
तिषिध्यन्ते नायमात्मानजायते नोक्तेनक्रमेणोत्पद्यते इत्य
जोजन्मलक्षणानित्यभावविकाररहितः तथानित्यःसदैक
स्वभावाविच्युतइत्यनेनास्यप्रतिक्षणधर्मान्तराविर्भावतिरोभा
वलक्षणोविपरिणामाख्योविकारःप्रतिषिध्यते शाश्वतःशश्व
त्सम्पूर्णेनस्वरूपेणयुक्तइत्यनेनवृद्धिलक्षणोविकारोस्यप्रति
षिध्यते नह्ययमनित्यभाववत्पूर्वमुपचितोभूत्वापचयरूपंवि
कारमापद्यते तथापुराणः पूर्वकोटेरसंभवात्सततमेवचिर
न्तनइत्यनेनापक्षयलक्षणोविकारःप्रतिषिध्यते नह्ययमुपचि
तोभूत्वापुनरपचीयते देहादिभाववत् तथाशरीरेहन्यमाने
नायमात्माहन्यते शरीरस्येवानित्यत्वाज्जन्माद्यवस्थाशेषावि
नाशावस्थापिसंभवति नत्वनित्यस्यात्मनइत्यनेनविनाशलक्ष
णोविकारोस्यप्रतिषिद्धः अस्तित्वलक्षणस्तुषष्ठोविकारःप्रा
गुक्तावस्थात्रयमध्यपतितभावग्रहणेनप्रतिपादितइति अथवाना
कोयदिवाकेचिदस्तित्वंविकारत्वेननस्वीकुर्वन्तीतिनोक्तः [illegible]

[illegible] २० ॥

न जायते इति जन्मप्रतिषेधः न म्रियते चेति
विनाशप्रतिषेधः वाशब्दौ चार्थे न चायं ...

हेतुः यस्मा
ः यो हि जायते
स्मान्तरमस्ति
जते इत्यर्थः
त्यः

स्वामिकी टीका

अविक्रियत्वं षड्भावविकारेण दर्शयति नेति भूत्वाऽन्यथा भू-
यः पुनर्भविता भवतीत्यस्तित्वं भजते किं तु प्रागेव सतः सिद्धः
सद्रूप इति जन्मानन्तरास्तित्वलक्षणद्वितीयविकारप्रतिषे-
धः सर्वदैकरूप इति वृद्धिप्रतिषेधः + तदेवं जायतेऽस्ति वर्धते
विपरिणमतेऽपक्षीयते नश्यतीत्येवं यास्कादिभिरुक्ताः ष-
ड्भावविकारा निरस्ताः यद्वा एते विकारा निरस्तास्ते प्रस्तुते
विनाशाभावे उपसंहरति नेति २० ॥

न हन्यते हन्यमाने शरीरे इति

+शाश्वतः शश्वद्भव इत्य-
पक्षयप्रतिषेधः पुराण
इति विपरिणामप्रतिषेधः
पुरापि नव एव न तु परिण-
मतो रूपान्तरं प्राप्य नवो
भवतीत्यर्थः यद्वा न भवि-
तेत्यस्यानुषंगं कृत्वा भूयो-
ऽधिकं यथा भवति तथा न
भवतीति वृद्धिप्रतिषेधः
अजो नित्य इति चोभयं
वृद्ध्याभावे हेतुरिति न
पुनरुक्तं

पंबोली टीका

अविक्रियत्वात् हननक्रियायाः कर्ता न च हन्यते न च कर्म भवतीत्यु-
क्तं पूर्वस्मिन्मंत्रे तदेव अविक्रियत्वं हेतुभूतं षड्भावविकारराहित्येन सा-
धयति न जायते इति अयमात्मा कदाचिन्नोत्पद्यते वा कदाचिन्न म्रिय-
ते वा अथवा अयमात्मा भूत्वा भूयः अभविता न जायते यस्मादेव तस्माद-
जः न जायते इति अनेन षड्भावविकाररहित्यमुक्तं जायते अस्ति विपरि-
णमते वर्द्धते अपक्षीयते विनश्यति इति षड्भावविकाराः न जायते म्रि-
यते इति आद्यन्तौ विकारौ निरस्तौ शाश्वतः निरवयवत्वात् न स्वरूपेण
अपक्षीयते निर्गुणत्वात् न गुणापक्षयेण अपक्षीयत इति अपक्षयरहित
पुराणः निरवयवत्वात् अवयवोपचयलक्षणा वृद्धिर्नास्ति अतएव पु-
राणः नूतनत्वाभावः पुराण एतेन वृद्धिलक्षणविकाररहितः न हन्यते
न विपरिणम्यते हन्तिरत्र विपरिणामार्थः तेन विपरिणामलक्षणवि- २०
क्रिया निषिध्यते जन्मनिमित्ता अस्तिता नास्ति तेन षड्भावविकाररहितः

रसावीरसमिद्धोधिनी॥

ननु कस्मादात्मा हन्तृहन्तव्यतालक्षणहीन इत्याशंकामपनेतुं
जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते विनश्यतीति षड्भाववि-
कारा इति वास्यानयनोक्तषड्भावविकारहीनतामात्मन उपपाद-
यन्नाह न जायत इति अयमुक्तलक्षण आत्मा न जायते नोत्पद्यते

ऽजत इत्यपेक्षायामाह यतोऽयं कदाचित्कस्मिंश्चिदपि काले न भू-
त्वा भविता पितु भूत्वैव भविता यो हि प्रागभावप्रतियोगी स एवो-
त्पद्यत इति व्यवह्रियते अयं तु न तथेति न जायत इत्यतोऽजो जन्म-
लक्षणविकारहीनः वा शब्दः समुच्चये अयमात्मा न म्रियते न
विनश्यति ध्वंसप्रतियोगी न भवतीति यावत् कुत इत्यपेक्षायामा-
ह यतोऽयं पूर्वं भूत्वा कदाचिदपि भूयः पुनर्न भवितापि तु भवि-
तैव यो हि प्रागभावप्रतियोगी उत्तरकाले च न भवति स ध्वंसप्र-
तियोगी भवति न चायं तथेति न विनश्यतीत्यतो नित्यो विना-
शायोग्यः यस्तु नित्यः स सदैकस्वभाव इति नास्य प्रतिक्षणधर्मान्त-
राविर्भावलक्षणो विपरिणामः इत्यजन्मविपरिणामविनाश-
लक्षणविकारत्रयराहित्यं प्रतिपाद्यापक्षयवृद्धिलक्षणं त-
यराहित्यं दर्शयति शाश्वतोऽयं पुराण इति अयमात्मा शाश्वतः
शाश्वत्सर्वदा भवति नापक्षीयत इति तथा पुराणः पुरापि नव
एकरूपो न तु नः संप्रति कामपि नवीनामवस्थामनुभवति इ-
ति न वर्धते नूतनोपचयावस्थानुभवो हि वृद्धिशब्देनोच्यते य-
द्यपि शाश्वतः शाश्वत्संपूर्णेन रूपेण पुराणः इति न वर्धते यो हि विक-
लः स एव साकल्यरूपो वृद्धिमनुभवतीति पुराण इति पूर्वकोटे-
रसंभवात्सततमेव विद्यमान इति नापक्षीयते यस्यैवोपचयः प्राग-
भावप्रतियोगी स एवापक्षीयत इति पंचभावविकाराणां संभवप्रा-
प्तविषयः साक्षादुपपादितः षष्ठस्त्वस्ति विलक्षणो विकारः ए-
केषां मते नास्तीति न प्रतिपादितः येषां तु सोऽस्ति तेषामपि जन्म-
लक्षणविकारान्तर्भूततया पृथक्प्रतिपादनं नार्हतीति विज्ञेयं
अथ नायं हन्ति न हन्यत इति सामान्येन प्रतिज्ञातयोर्हन्तृहन्तव्यता-
प्रतियोगित्वयोर्मध्ये हन्तव्यताप्रतियोगित्वविशेषेणाह न हन्य-
त इति शरीरे हन्यमानेऽप्यात्मा न हन्यते हननक्रियायाः कर्म

नभवति शरीरस्यैवानित्यत्वाजन्माद्यवस्थाभाक्त्वेन विनाशसंभ
वोन पुनरात्मनइति विनाशलक्षणविकाररहितत्वंप्रतिज्ञातंद
ढीकृतं २०॥

मधुभाष्य

नजायतइति नचेश्वरज्ञानवद्भूत्वा भविता नहि नदेशात
देशतः कालतोयोसाववस्थातःस्वतोन्यतः अविलुप्ताव
बोधात्मेत्यादि श्रुतिस्मृतिसिद्धम् कुतः अजादिलक्ष
णोश्वरसद्रूपत्वात् शाश्वतः सदैकरूपः पुरंदेहमणती
ति पुराणः तथापि न हन्यते हन्यमानेपिदेहे २०॥

147

आत्माका नाश नही यह बात षड्भाव विक्रिया कोहै वि
कारका अभाव कथनके द्वारा दृढ करतेहै कि आत्मा
का जन्म होता नही अर्थात् उसका जन्म रूप विकार ।
नही और कभी मरताभी नही अर्थात् विनाश रूप विका
र नही और आत्मा उत्पन्न होके विद्यमानहै यह भी नही
अर्थात् वर्तमान रूप विकार नही जो जन्मे सोई वर्तमान
होता यह तो अज है पूर्वसे सदा सर्वदा विराजमानहै
इसका फेरि जन्हले विद्यमान होना असंभवहै और यह
नित्य सदा एक रूप अर्थात् इसका वृद्धिरूप विकार नही
और यह शाश्वत अर्थात् क्षय रहित और पुराण अर्थात्
इसका परिणाम नही परिणाम कहते रूपान्तर होने।
को आत्मा पुरातन होके भी नयासा होता देखा परिणत
होकेभी रूपान्तर को प्राप्त नही होताहै ज्योंका त्योंही
रहता औरभी कहते कि पहले नहीथा अब भया और
बढताहै यह कुछ बात भी आत्मामें नहीहै इस अर्थ
में भी वृद्धिरूप विकार रहित होताहै इस विषयमे अज
और नित्य ये दोनो शब्दोंके रहनेसे और कुछ कहनेका
प्रयोजन नही इसी प्रकार आत्माका जन्म विद्यमानता
वृद्धि परिणाम अपक्षय और विनाश ये छ विकारों का
अभाव सांख्य शास्त्रमे निर्णय कियाहै अब जोवाकी ।
सो कहतेहै कि शरीर हत होनेसे भी आत्मा हत होता
नही जिससे वह अविनाशी है २० ॥

कुंडलीया॥

ना यह जन्मे कदाचित नाहि मरे कबि सोय हरब भयो
न होय गो आगे वा पुन सोय आगे वा पुन सोय अजर है नि।
त्य निरंतर पुरुष पुरातन हि जान वपु से सम घट अंतर यह

नहिहोवे हननहैं याकोयहीस्वभाव हन्यमान मेदेहमे
जानोपरमप्रभाव २०॥

वेदाविनाशिनंनित्यं यएनमजमव्ययं क
थंसपुरुषःपार्थ कंघातयतिहंतिकं २१ ।

शांकरभाष्यं टी॰ ॥

यएनंवेत्तिहन्तारमित्यनेन मंत्रेण हननक्रियायाःकर्ता
कर्मच नभवतीतिप्रतिज्ञाय नजायतइत्यनेनाविक्रियत्वंहे
तुमुक्त्वाप्रतिज्ञातार्थमुपसंहरति वेदाविनाशिनमिति वेद
विजानाति अविनाशिनमन्त्यभावविकाररहितं नित्यं वि
परिणामरहितंयोवेदेतिसम्बन्धः एनंपूर्वेणमंत्रेणोक्तलक्ष
णमजं अव्ययं ऽपक्षयापक्षयरहितं कथंकेनप्रकारेणस
विद्वान् पुरुषोऽधिकृतोहन्ति हननक्रियांकरोति कथंवा
घातयतिहन्तारं प्रयोजयति नकथञ्चित्कंचित्हन्तिन
कथंचित्कंचित् घातयतीत्युभयत्राक्षेपएवार्थः प्रश्नार्थासं
भवात् हेत्वर्थस्य अविक्रियत्वस्यचतुल्यत्वाद्विदुषःसर्वकर्म
प्रतिषेधएवप्रकरणार्थोभिप्रेतोभगवता हन्तेस्त्वाक्षेपउदा
हरणार्थत्वेनविदुषः किंचित्कर्मासम्भवेहेतुविशेषंपश्यन्
कर्माण्याक्षिपति भगवान्कथंसपुरुषइति नतूक्तमेवआ
त्मनोऽविक्रियत्वं सर्वकर्मासंभवकारणविशेषः सत्यमुक्तो
नतुसकारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियत्वादात्मनइति
नन्वविक्रियंस्थाणुंविदितवतःकर्मनसंभवतीतिचेन्नविदुष
आत्मत्वान्न देहादिसंघातस्यविद्वत्ताअतःपारिशेष्यादसंहत
आत्मा विद्वानविक्रियइतितस्यविदुषःकर्मासंभवादाक्षेपो
युक्तः कथंसपुरुषइतियथाबुद्ध्याद्याहृतस्य शब्दाद्यर्थस्या
विक्रियएवसन् बुद्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्धा
आत्माकल्प्यतेएवमेवात्मानात्मविवेकज्ञानेनबुद्धिवृत्त्यावि
द्यया असत्यरूपयैवपरमार्थतोऽविक्रियएवात्माविद्वानुच्य
तेविदुषःकर्मासंभववचनात् यानिकर्माणिशास्त्रेणविधी

गी॰
टी॰
द्वि॰

१४९

यज्ञे तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते ननु
विद्याप्यविदुष एव विधीयते विदितविद्यस्यापि पिष्टपेषणवद्विद्या
विधानानर्थक्यात् तत्राविदुषः कर्माणि विधीयन्ते न विदुष इति
विशेषो नोपपद्यते इति चेन्नानुष्ठेयस्य भावाभावविशेषोपपत्तेर
ग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाध
नोपसंहारपूर्वकमनुष्ठेयं कर्ताहं मम कर्तव्यमित्येवं प्रकारवि
ज्ञानवतोऽविदुषो यथानुष्ठेयं भवति न तु तथा न जायत इत्या
त्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवति
किंतु नाहं कर्ता न भोक्तेत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञाना
दन्यत् नोत्पद्यत इत्येष विशेष उपपद्यते यः पुनः कर्ताहमिति
वेत्यात्मानं तस्य ममेदं कर्तव्यमिति अवश्यंभाविनी बुद्धिः स्यात्त
दपेक्षया सोऽधिक्रियत इति तं प्रति कर्माणि सम्भवन्ति स चावि
द्वान् उभौ तौ न विजानीत इति वचनात् विशेषितस्य च विदुषः
कर्माक्षेपवचनात् कथं स पुरुष इति तस्माद्विशेषितस्याऽवि
क्रियात्मदर्शिनो विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधि
कारोऽत एव भगवान्नारायणः सांख्यान् विदुषोऽविदुषश्च कर्मि
णः प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्मयो
गेन योगिनामिति तथा च पुत्रायाह भगवान् व्यासो द्वाविमा
वथ पन्थानावित्यादि तथा च क्रियापथश्चैव पुरस्तात् पश्चा
त्संन्यासश्चेत्येतमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान् अ
तत्त्वविदहंकारविमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्तु ना
हं करोमीति तथा च सर्वकर्माणि मनसा संन्यस्यास्त इत्यादि
तत्र केचित्पण्डितंमन्या वदन्ति जन्मादिषड्भावविक्रियारहितो
विक्रियोऽकर्तैकोऽहमात्मेति न कस्यचित्ज्ञानमुत्पद्यते यस्मिन्स
ति सर्वकर्मसंन्यास उपदिश्यते तन्न न जायत इत्यादिशास्त्रोप
देशानर्थक्यप्रसंगात् यथा च शास्त्रोपदेशसामर्थ्याद्धर्माधर्मा
स्तित्वविज्ञानं कर्तुश्च देहा^रसम्बन्धिज्ञानं चोत्पद्यते तथा च शा

का

१८८

स्यात् नत्वेवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानंकस्मान्नोप
पद्यते इति प्रष्टव्यास्त्वं करणागोचरत्वादितिचेन्न मनसैवानुद्रष्ट
व्यमितिश्रुतेः शास्त्राचार्योपदेशजनितशमदमादिसंस्कृतंम
नआत्मदर्शनेकरणं तथाच तदधिगमायानुमानेआगमेच
सतिज्ञानंनोत्पद्यते इतिसाहसमात्रमेतत् ज्ञानंचोत्पद्यमा
नंतद्विपरीतमज्ञानं अवश्यंबाधतइत्यभ्युपगन्तव्यं तच्चाज्ञानं
दर्शितं हन्ताहं हतोस्मीत्युभौतौनविजानीतइत्यत्रचात्मनोह
ननक्रियायाःकर्तृत्वकर्मत्वं हेतुकर्तृत्वंज्ञानकृतंदर्शितं
तच्चसर्वक्रियास्वपिसमानंकर्तृत्वादेरविद्याकृतत्वमविक्रिय
त्वादात्मनः विक्रियावान्हिकर्तात्मनःकर्मभूतमन्यंप्रयोज
यति कुर्विति तदेतदविशेषेणविदुषःसर्वक्रियासुकर्तृत्वं
हेतुकर्तृत्वंच प्रतिषेधति भगवान् विदुषःकर्माधिकाराभा
वप्रदर्शनार्थं वेदाविनाशिनंकथंसपुरुषइत्यादिनाक्वपुनर्वि
दुषोधिकारइत्येतदुक्तं पूर्वमेवज्ञानयोगेनसांख्यानामिति त
थाच सर्वकर्मसंन्यासंवक्ष्यति सर्वकर्माणिमनसेत्यादिना न
नुमनसेतिवचनान्नवाचिकानांकायिकानांच सन्यासइतिचे
न्नसर्वकर्माणीतिविशेषितत्वात् मानसानामेव सर्वकर्मा
णामितिचेन्नमनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनो
व्यापाराभावे कर्मानुपपत्तेः शास्त्रीयाणांवाक्कायकर्मणांका
रणानिमानसानि मनोव्यापाराणिवर्जयित्वान्यानि सर्वक
र्माणिमनसा सन्न्यस्यास्तइतिचेन्नेवकुर्वन्नकारयन्इतिवि
शेषणात् सर्वकर्मसंन्यासोयंभगवतोक्तोमरिष्यतोनजीवत
इतिचेन्न नवद्वारेपुरेदेही आस्तेइतिविशेषणानुपपत्तेः नहि
सर्वकर्मसन्यासेनमृतस्यतद्देहे आसनं सम्भवत्यकुर्वतोऽका
रयतश्चदेहेसंन्यस्येति सम्बन्धोनदेहे आस्तइतिचेन्नसर्वत्रा
त्मनोऽविक्रियत्वावधारणात् आसनाक्रियायाश्चाधिकरणा
पेक्षत्वात्तदनपेक्षत्वाच्चसन्यासस्यसंपूर्वस्तु न्यासशब्दोत्रत्या

गी॰ गार्थो न निक्षेपार्थः तस्माद्गीताशास्त्रे आत्मज्ञानवतः संन्यास एव
टी॰ वाधिकारो न कर्मणीति तत्र तच्चोपरिष्टादात्मज्ञानप्रकरणे
द्वि॰ दर्शयिष्यामः २१ ॥

आनंदगिरिकृतटी॰ ॥

पूर्वश्लोकार्थस्यैवोत्तरत्रापि प्रतिभानात् पौनरुक्त्यमाशंक्य । वृत्तानुवादपूर्वकमुत्तरश्लोकमवतारयति यएनमित्यादिना कर्तृत्वाद्यभिमानविरोधाद्वैतकूटस्थात्मनिश्चयसामर्थ्यात् प्राप्ते विदुषः संन्यासे विद्यापरिपाकार्थमभ्यनुजानाति वेदेति पदद्वयस्य पूर्वमेव पौनरुक्त्यमाह अविनाशिनमित्यादिना प्रश्नोपि सम्भवति किमिति तत्र उल्लेखेन व्याख्यायते तत्राह उभयत्रेति उत्तरत्र प्रतिवचनादर्शनादत्र प्रश्नः संभवतीत्यर्थः विवक्षितप्रकरणार्थं निगमयति हेत्वर्थस्येति अविक्रियत्वं हेत्वर्थः तस्य विदुषः सर्वकर्मनिषेधे समानत्वादिति यावत् यदि विदुषः सर्वकर्मनिषेधोभिमतस्तर्हि किमिति हन्त्यर्थ एवाक्षिप्यतेतत्राह हन्तेरिति उक्तं हेतुमात्रेणेष्टं हन्ति विदुष इति अभिप्रायमप्रतिपद्यमानो हेतुविशेषं पूर्वोक्तं स्मारयति नन्विति उक्तमंगीकृत्याक्षिपति सत्यमिति विदुषो विज्ञानात्मनो ब्रह्मणश्च वेद्यस्य विरुद्धधर्मत्वेन द्रष्टृत्वाद्धि न वह्नित्वाद्विदुषः सर्वकर्मत्यागेन अस्मै कारणविशेषः स्यादित्याह अन्यत्वादिति अविक्रियत्वादिति छेदः तथापि कूटस्थमविक्रियं ब्रह्म प्रतिपद्यमानस्य कुतो विक्रिया सम्भवेत् ब्रह्मप्रतिपत्तिविरोधादित्याशंक्याह नन्विति अयमात्मा ब्रह्मेत्यादिश्रुत्या समाधत्ते न विदुष इति किंच विद्वत्ता विशिष्टस्य वा केवलस्य वा नाद्यो विशिष्टस्य विद्वत्तायां विशेषणस्यापि तद्ब्रह्मसंगात्त्र च विशेषणीभूतसंघातस्याचेतनत्वाद्विद्वत्तायुक्तेत्याह न देहादीनि द्वितीये तु जीवब्रह्मविभागासिद्धिरित्याह अत इति किंच प्रामाणिकविरुद्धधर्मवत्त्वस्यासिद्धत्वात् प्रातिभासिकस्य च विम्बप्रतिविम्बयोरनेकान्त्याद्भेदा

त्रमाणायोगात् जीवब्रह्मणोरभेदसिद्धिरित्यभिप्रेत्यफलितमा
ह इतिनस्येति नन्वविक्रियस्यब्रह्मरूपतया सर्वकर्म्मासम्भवे
विदुषोविद्वत्तापिकथंसंभवति नहिब्रह्मणोऽविक्रियस्य विद्या
लक्षणाविक्रियास्वीक्रियाभवितुमर्हतीति तत्राह यद्येति बुद्धे
रिन्द्रियादिसहकृतमन्तःकरणं प्रदीपप्रभावद्विषयपर्यन्तं
परिणतं बुद्धिवृत्तिरुच्यते तत्प्रतिबिम्बितंचैतन्यं अभिव्यञ्ज
कबुद्धिवृत्त्यविवेकाद्विषयज्ञानमिति व्यवह्रियते तेनात्मो
पलब्धाकल्प्यते तच्चाविद्याप्रयुक्तमिथ्यासम्बन्धनिबन्धनं त
थैवाध्यासिकसम्बन्धेन ब्रह्मात्मैक्याभिव्यञ्जकवाक्योत्थबु
द्धिवृत्तिद्वारा विद्वानात्माव्यपदिश्यते नचमिथ्यासम्बन्धेन
पारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः अहंब्रह्मेति बु
द्धिवृत्तेर्मोक्षावस्थायामपिभावादात्मनः सविशेषत्वमाशं
क्य तस्य यावदुपाधिमत्त्वमेवेत्याह अस्येति ननुकूटस्थ
स्यात्मनोमिथ्याविद्यावत्त्वेपि तस्य कर्माधिकारनिवृत्तौ कस्य
कर्माणिविधीयन्ते नहिनिरधिकाराणां तेषांविधिरित्याशंक्या
ह विदुषइति कर्माण्यविदुषोविहितानीति विशेषमाक्षि
पति नन्विति कर्मविधानमविदुषोविदुषश्च विद्याविधान
मिति विभागेकाहानिरित्याशंक्याह विदितेति विद्ययाविदि
तत्वं लब्धत्वं कर्मविधिः अविदुषोविद्याविधिरिति विभागा
सम्भवे फलितमाह तत्रेति धर्मज्ञानानन्तरमनुष्ठेयस्य भा
वात् ब्रह्मज्ञानोत्तरकालेच तदभावात् ब्रह्मज्ञानहीनस्यैव
कर्मविधिरिति समाधत्ते नानुष्ठेयस्येति विशेषोपपत्तिमेव
प्रपंचयति अग्निहोत्रादीति ननुदेहादिव्यतिरिक्तात्मज्ञानं
विनापारलौकिकेषु कर्मसु प्रवृत्ते रनुपपत्तेस्तथावि
धज्ञानवता कर्मानुष्ठेयमिति चेत्तत्राह कर्ताहमिति आत्म
निकर्ताभोक्तेत्येवंविज्ञानवत्त्वेपिब्रह्मज्ञानविहीनत्वेनाविदु
षोनुष्ठेयंकर्मेर्थः देहादिव्यतिरिक्तात्मज्ञानवद्ब्रह्मज्ञानमपि
त्य

गी॰
टी॰
द्वि॰

ज्ञानत्वाविशेषात् कर्मप्रवृत्तावुपकरिष्यतीत्याशंक्याह न
त्विति अनुष्ठेयनिरोधित्वादविक्रियात्मज्ञानस्येति शेषः ननु
ब्रह्मात्मैकत्वज्ञानादुत्तरकालमपि कर्ताहमित्यादिज्ञानोत्प
त्तौ कर्मविधिः सावकाशः स्यादिति नेत्याह नाहमिति कार
णाभावादिति शेषः कर्तृत्वादिज्ञानमन्यदित्युक्तं अनुष्ठाना
नुष्ठानयोरुक्तविशेषाद्विदुषोऽनुष्ठाने विदुषो नेत्युपसं
हरति इत्येषइति नन्वात्मविदो न चेदनुष्ठेयं किं विदस्ति क
थं तर्हि विद्वान्यजेतेत्यादिशास्त्रात्तं प्रति कर्माणि विधीय
न्ते तत्राह यः पुनरिति आत्मनि कर्तृत्वादिज्ञानापेक्षया क
र्मस्वधिकृतत्वज्ञाने तथाविधं पुरुषं प्रति कर्माणि विधीयन्ते
सच प्राचीनवचनाद्विद्वानेवेति निश्चीयते न केवलं कर्तृत्वा
दिज्ञानवत्त्वात्तद्विपरीतकर्तृत्वादिज्ञानद्वारा कर्मसु प्रवृत्ति
रित्यर्थः कर्मासंभवे ब्रह्मविदो हेत्वन्तरमाह विशेषितस्ये
ति वेदाविनाशिनमित्यादिनेति शेषः यद्यपि विदुषो नास्ति
कर्म तथापि विविदिषोः स्यादित्याशंक्याह तस्मादिति विद्य
याविरुद्धत्वादिष्यमाणमोक्षप्रतिपन्नत्वाच्च कर्मणामित्यर्थः
यद्यपि प्रवृत्तोराश्रमकर्माण्यपेक्षितानि तथापि विद्यातत्
फलाभ्यामविरुद्धान्येव तान्यभ्युपगतान्यन्यथा विविदिषा
संन्यासविधिविरोधादित्यभिप्रेत्योक्तेऽर्थे भगवतोऽनुमतिमाह
अतएवेति विदुषो विविदिषोश्च संन्यासेऽधिकारोऽविदुषस्तु
कर्मणीति विभागस्येष्टत्वादित्यर्थः अधिकारिभेदेन निष्ठाद्व
यं भगवता वेदव्यासेनापि दर्शितमित्याह तथा चेति अथाय
नविधिना स्वाध्यायपाठे त्रैवर्णिकस्य प्रवृत्त्यनन्तरं तत्र क्रि
यामार्गो ज्ञानमार्गश्चेति द्वौ मार्गावधिकारिभेदेनावेदितावि
त्यर्थः आदिशब्दाद्यत्र वेदाः प्रतिष्ठिता इत्यादि गृह्यते उक्त
योर्मार्गयोस्तुल्यतापरिहृतये उदाहरणान्तरमाह तथेति बु
द्धिशुद्धिद्वारा कर्मतत्फलयोर्वैराग्योदयात् पूर्वं कर्ममार्गो वि

ष्ठितो विरक्तस्य तु नः संन्यासपूर्वको ज्ञानमार्गो दर्शितः स चेतरः
स्मादतिशयशालीत्युक्तमित्यर्थः उक्तविभागे पुनरपि वाक्य
शेषानुकूलमादर्शयति एनमेवेति अहंकारविमूढात्मेत्यस्य
व्याख्यानं तत्त्वविदिति तत्त्वविच्चेति श्लोकमवतार्य तात्पर्या
र्थं संगृह्णाति नाहमिति पूर्वेण क्रियापदेनेति शब्दः सम्बध्यते
विरक्तमधिकृत्य वाक्यान्तरं पठति तथा चेति आदिशब्दस्त
स्यैव श्लोकस्य शेषसंग्रहार्थः अविक्रियात्मज्ञानात् कर्मसंन्या
से दर्शिते मीमांसकमतमुत्थापयति तत्रेति आत्मनो ज्ञानक्रि
याश्रयाधारत्वेनाक्रियत्वाभावादक्रियात्मज्ञानं संन्यासका
रणीभूतं न सम्भवतीत्यर्थः यथोक्तज्ञानाभावो विषयाभावा
द्वा मानाभावाद्वेति विकल्प्याद्यं दूषयति नेत्यादिना न तावद
विक्रियात्माभावो न जायते म्रियते वेत्यादिशास्त्रस्याप्तवाक्य
तया प्रमाणस्यान्तरेण कारणमानर्थक्यायोगादित्यर्थः द्वि
तीयं प्रत्याह यथा चेति पारलौकिककर्मविधिसामर्थ्यासिद्धं
विज्ञानमुदाहरति कर्तव्येति कर्मकाण्डादज्ञाने धर्मादौ विज्ञा
नोत्पत्तिवत् ज्ञानकाण्डादज्ञाने ब्रह्मात्मनि विज्ञानोत्पत्ति
रविरुद्धा प्रमात्वाविशेषादित्यर्थः ज्ञानस्य मनःसंयोगज
न्यत्वादात्मनश्चाश्रुत्या मनोगोचरत्वनिरासान्नात्मज्ञाने सा
धनमस्तीति शंकते करणेति श्रुतिमाश्रित्य परिहरति न
मनस्येति तत्त्वमस्यादिवाक्योत्थमनोवृत्त्यैव शास्त्राचार्योप
देशमननसंस्कृतद्रष्टव्यं तत्त्वमिति श्रूयते स्वरूपेण स्वप्रकाशमा
पि ब्रह्मात्मवस्तु वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्य
वहारावलम्बनं भवतीति मनोगोचरत्वोपचारादसिद्धं करा
णगोचरत्वमित्यर्थः कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनि
षेधश्रुतिरित्याशंक्यासंस्कृतमनोवृत्त्यविषयत्वेति मन्वानः
सन्नाह शास्त्रेति सत्यपि श्रुत्यादौ तदनुग्राहकाभावान्नास्माक
मविक्रियात्मकज्ञानमुत्पत्तुमर्हतीत्याशंक्याह तथेति तस्मा
विक्रियस्यात्मनोऽधिगत्यर्थम् विमतो विकारो नात्मधर्मो वि

कारत्वादुभयाभिमतविकारवदित्यनुमाने पूर्वोक्तश्रुतिस्मृ
तिरूपागमेच सत्येव तस्मिन्नोत्पद्यते ज्ञानमिति वचः साहा
य्यमात्रे सत्येवमानेमेयं नभातीतिवदित्यर्थः ननुयथोक्तं
ज्ञानमुत्पन्नमपि ह्यज्ञानायोपादानाय वा न भवतीति कुतोऽस्य फ
लवत्वं तत्राह ज्ञानं चेति अवश्यमिति प्रकाशशब्देन तमो
निवृत्तिव्यतिरेकेणानुपपत्तिवदात्माज्ञाननिवृत्तिमन्तरेणा
त्मज्ञानोत्पत्तेरनुपपत्तेरित्यर्थः नन्वज्ञानस्य ज्ञानप्रागभाव
त्वात्तन्निवृत्तिरेव ज्ञानेनतु तन्निवर्तकमिति तत्राह नचेति
कथं पुनर्भगवतापि ज्ञानाभावातिरिक्तमज्ञानं दर्शितमि
त्याशंक्याह अत्र चेति विमतं ज्ञानाभावो न भवत्युपादानत्वा
न्मृदादिवदिति भावः ननु हननक्रियायास्तु नहिंस्यादिति
निषिद्धत्वात् तत्कर्तृत्वादेरज्ञानकृतत्वेपि विहितक्रिया
कर्तृत्वादेर्न तथात्वमिति नेत्याह नचेति नतावदात्मनि
कर्तृत्वादि नित्यं तत्र मुक्तिप्रसंगात् नचानित्यमपि निरुपादानं
भावकार्यस्योपादाननियमात् नचानात्मा तदुपादानमात्म
नि तत्प्रतिभानात् नचात्मैव तदुपादानं कूटस्थस्य तस्याविद्यां
विना तदयोगादित्याह अविक्रियत्वादिति कर्तृत्वाभावेपि
कारयितृत्वं स्यादित्याशंक्याह विक्रियावानिति आत्मनि
कर्तृत्वादिप्रतिभानस्यानाद्यनिर्वाच्याज्ञानमुपादानं तन्निवृ
त्तिश्च तत्त्वज्ञानादित्युक्तमिदानीं कर्तृत्वकारयितृत्वयोरवि
द्याकृतत्वे भगवतोनुमतिं दर्शयति तदेतदिति विदुषोय
दि कर्माधिकाराभावो भगवतोभिमतः तर्हि कुत्र तस्य जीव
तोऽधिकारः स्यादिति पृच्छति कस्य तर्हीति ज्ञाननिष्ठायामित्यु
क्तं स्मारयति उक्तमिति तदङ्गभूते सर्वकर्मसंन्यासे च तस्या
धिकारोस्तीत्याह तथेति वक्ष्यमाणे वाक्ये सर्वकर्मसंन्यासो
न प्रतिभाति मानसानामेव कर्मणां विशेषणवशात् त्यागा
वगमादिति शंकते नन्विति विशेषणान्तरमाश्रित्य दूषयति
न सर्वेति मनसेति विशेषणान्मानसेष्वेव कर्मसु सर्वशब्दः सं

कुर्विन:स्यादिति शंकते मानसानामिति सर्वात्मना मनोव्या
पारत्यागे व्यापारान्तराणामनुपपत्तेः सर्वकर्मसंन्यासः सिध्य
तीति परिहरति नेत्यादिना मानसेष्वपि कर्मसु संन्यासे संको
नु चात्र वागादिव्यापारोपपत्तिरिति शंकते शास्त्रीयाणामिति अ
यद्वा कायकर्म न्यानीत्यशास्त्रीयाणि मानसानि तानि च सर्वाणि कर्माणीत्यर्थः
कारणान्यशास्त्री वाक्यशेषमादाय दूषयति नैनैवेति नहि विवेकबुद्ध्या सर्वा
णि कर्माणि अशास्त्रीयाणि संन्यस्य तिष्ठतीति युक्तं नैव कुर्व
न्नित्यादिविशेषणस्य विवेकबुद्धेश्च सर्वत्यागहेतोस्तुल्यत्वा
दित्यर्थः भगवदभिमतसर्वकर्मसंन्यासस्यावस्थाविशेषे संको
चं दर्शयन्नाशंकते मरिष्यत इति संन्यासो जीवदवस्थायामे
वात्र विवक्षित इत्यत्र लिंगं दर्शयन्नुत्तरमाह नन्वेति अनुपप
त्तिमेव स्फोरयति नहीति अन्वयविशेषाव्याख्यानेन लिंगासि
द्धिं चोदयति अकुर्वन्नति विवेकवशाद्विशेषणेपि कर्माणि
देहे यथोचितं निःक्षिप्याकुर्वन्नकारयंश्च विद्वानवतिष्ठते तथा
च देहे कर्माणि संन्यस्याकुर्वतोऽकारयतश्च सुखमासनमिति
सम्बन्धसंभवात् विशेषणस्य सति देहे कर्मत्यागविषयत्वा॰
भावाज्जीवतः सर्वकर्मत्यागो नास्तीत्यर्थः अथवा कुर्वन्नित्या
दिपूर्वत्रैव सम्बन्धनीयं लिंगासिद्धिं चोदयन्न देहे संन्यासेत्याव
श्योऽत्रेयं आत्मनः सर्वत्राविक्रियत्वनिर्द्धारणहेतुसम्बन्धमन्त
रेण कर्तृत्वकारयितृत्वाप्राप्तेरप्राप्तप्रतिषेधप्रसंगपरिहारा
र्थमस्तु उक्तएव सम्बन्धः साधीयानिति समाधत्ते नसर्वत्रेति
श्रुतिस्मृतिश्चेत्यर्थः किंच सम्बन्धस्याकांक्षासन्निधियोग्य
ताधीनत्वादाकांक्षावशादस्मदभिमतसम्बन्धसिद्धिरित्याह
आसनेति भवदिष्टस्तु सम्बन्धो न सिध्यत्याकांक्षाभावादित्या
ह तदनपेक्षत्वाच्चेति संन्यासशब्दस्य विक्षेपार्थत्वात्तस्य चा॰
धिकरणसापेक्षत्वादस्मदिष्टसम्बन्धसिद्धिरित्याशंक्याह सं॰
पूर्वस्त्विति अन्यथोपसर्गवैयर्थ्यादित्यर्थः मनसा विवेकवि
ज्ञानेन सर्वकर्मापरित्यज्यास्ते देहे विद्वानित्यस्यैव सम्बन्धस्य

गी॰ साधुत्वं मत्वोपसंहरति तस्मादिति सर्वव्यापारोपरमात्मनः स
टी॰ र्वकर्मसंन्यासस्याविक्रियात्मज्ञानेनाविरोधित्वात् प्रयोजकज्ञान
द्वि॰ वतो वैधे संन्यासेऽधिकारः सम्यग्ज्ञानवतस्तु वैधे स्वाभाविके फ
लात्मनीति विभागमभ्युपेत्योक्तेऽर्थे वाक्यशेषानुगुण्यं प्रदर्शयति
इतितत्र तत्रेति २१ ॥

स्वामिकृतटीका ॥

अत एवाहंकृत्वाभावोपि पूर्वोक्तः सिद्ध इत्याह वेदेति नित्यं वृ
द्धिशून्यमव्ययमपक्षयशून्यमजमविनाशिनं च यो वेद स पुरु
षः कं हन्ति कथं वा हन्ति एवंभूतस्य वधे साधनाभावात् तथा
स्वयं प्रयोजको भूत्वान्येन कं घातयति कथं वा घातयति न क
थंचिदपीत्यर्थः अनेन मय्यपि प्रयोजकत्वदोषदृष्टिमाकार्षी
रित्युक्तं भवति २१ ॥

पैशाचभाष्य टी॰ ॥

य एनं वेत्ति हन्तारमित्यनेन मंत्रेण हननक्रियायाः कर्त्ता कर्म च
न भवतीति प्रतिज्ञाय न जायत इत्यनेनाविक्रियत्वं हेतुमुक्त्वा
प्रतिज्ञातार्थमुपसंहरति वेदाविनाशिनमिति वेद विजाना
ति अविनाशिनं अन्त्यभावविकाररहितं नित्यं विपरिणामरहितं
यो वेदेति संबंधः एवं पूर्वोक्तमंत्रेणोक्तलक्षणमजं जननः
क्रियारहितं अव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वा
न् पुरुषोऽधिकृतः हन्ति हननक्रियां करोति कथं वा घातयति ह
न्तारं प्रयोजयति न कथंचित् घातयति उभयत्राक्षेप एवार्थः प्र
श्नासंभवाद्धेत्वर्थस्य च तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्र
करणार्थोऽभिप्रेतो भगवता हन्तेस्त्वाक्षेपरूपदाहरणार्थत्वेनो
क्तः विदुषः सर्वकर्मासंभवे के हेतुविशेषं पश्यन् कर्माण्याक्षि
पति भगवान् कथं स पुरुष इति २१ ॥

रामानुजभाष्य टी॰

एवमविनाशित्वेनाजत्वेनाव्ययत्वेन च नित्यमेनमात्मानं यः
पुरुषो वेद तिर्यक्स्थावरशरीरावस्थितेष्वात्मसु कमप्यात्मानं

कथंघातयति कं वा कथं हंति कथं नाशयति कथं वा तत्प्रयो
जको भवतीत्यर्थः एतान्नात्मनो घातयाम्यहमित्यनुशोचन
मात्मस्वरूपाज्ञानमूलमेवेत्यभिप्रायः २१ ॥

अभिनवगुप्तकृत टी० ॥

यएनमात्मानं प्रबुद्धत्वाज्ज्ञानाति न स हंति न स हन्यत इति तस्य
कथं बंधः २१ ॥

परमार्थप्रपा टी० ॥

अत एव हंतृत्वमपि न युज्यत इत्याह वेदाविनाशिनमिति नि
त्यं वृद्धिशून्यं अव्ययमपक्षयशून्यं अजं जन्मशून्यं एभिस्त्रिभि
र्विकारैरेनमात्मानमविनाशिनं यो वेद ज्ञातवान् स कं पुरुषं घा
तयति च स्वयं हननक्रियाप्रयोग्यत्वात् किंच प्रयोजकेपि तथै
वमनेन मय्यपि प्रयोजकत्वदृष्टिमाशंसीत्युक्तं तदुक्तं शुद्धो
निरंजनोनंतो बोधोहं प्रकृतेः परः चेष्टमानमिदं देहं पश्याम्य
न्यशरीरवदिति २१ ॥

वनमाली टी० ॥

जीवस्यानित्यत्वं मन्यमानो मिथ्याज्ञानी त्वमुक्तं ज्ञानी त्वेवं मन्य
त इत्याह वेदेति यएनमविनाशिनं षड्विकाररहितं विकृतज
डदेहादिविलक्षणं सच्चिदानंदस्वरूपं वेद स पुरुषो देवमनुष्यप
श्वादिदेहस्थनाद्यविद्याहंकाराहं ममेत्यभिमानितबंधेन कर्मफ
लभोगार्थं वर्तमानेष्वात्मसु कमप्यात्मानं कथं हंति कथं नाश
यति कथं वा तत्प्रयोजको भवतीत्यर्थः अविनाशिनं नैमित्ति
नित्यं कनाशशून्यं स्वाभाविकनाशशून्यं अजमुत्पत्तिशून्यं अव्ययं स्व
रूपविकारशून्यं यद्वा अविनाशिनं शरीरपाताद्यादिशून्यं नित्यं स्वरूप
त अजं षड्विकारशून्यं अव्ययं निष्पगुणकस्वतंत्रं वैतं श्रीह
रिं यो वेद साक्षात्करोति स तत्प्रसादान्निवृत्ताविद्यो निवृत्तदे
हकाभिमानो निवृत्तसर्वकर्माधिकारश्चाविर्भूतचिदानंद
संदोहस्वस्वरूपः कं घातयति कं वा हंति कथं चेत्यर्थः २१ ॥

गी.
द्वि.
टी.

अथ मदे जयन्ती टी.

एवमात्मनः षड्विकारशून्यत्वादन्यैर्नहन्यतेइत्युक्त्वाइदानीम
स्याविकारित्वेननायंहन्तीत्युपपादयन्नित्यत्वंसाधयतिवेदे
ति अविनाशिनंमरणात्मकान्त्यविकारशून्यस्वभावंनित्यंवृद्धि
पक्षयरहितं अजंजन्मरूपविकारशून्यम् अव्ययंपरिणामा
त्मिकविकाररहितं एवंषड्विकाराश्लिष्टस्वरूपतएतादिकंआत्मा
नंयःवेदशास्त्राचार्योपदेशादिनाजानातिसः निर्विकारोयं
आत्माइतिज्ञातवान् अहमेषःपुरुषःयानःकमन्तरंहन्तकं
घ्नंहन्तिकंकथंवाघातयतिनकेनप्रकारेणहंतिघातयतिवे
त्यर्थः अत्रायंभगवतोभिप्रायःयथाहंसर्वज्ञोपियदिखस्वरू
पगुणादीनामंतरहितानामन्तंनजानामितर्हिममसर्वज्ञता
याहानिर्नस्यात्यदितु अन्तवतोपदार्थानामन्तंनजानामि
तर्हैवतस्याहानिर्भवेत् तथायमात्मापियदिविनाशरहि
तानामात्मस्वरूपगुणादीनांनाशंनकरोति तर्ह्यात्मनःकर्तृ
त्वादिकस्यहानिर्नभवतिकिंतु नाशवतांदेहादिपदार्थानां
नाशंनकरोतिचेत्तर्हि तत्कर्तृत्वादेर्हानिर्भवेत्ततःकरोत्येव
तस्मात्कर्तृत्वाद्यनेकधर्माश्रयेमयीश्वरेजीवात्मनिचकर्तृ
त्वाद्यभावशंकांमाकृथाः यस्मादहमीश्वरोयुष्माकंकर्मा
कारयामियूयंचसर्वेकर्मकुरुथेत्येवंभगवदभिप्रायानभि
ज्ञाम्नूढाएतएवात्मनः कर्तृत्वादिशून्यत्ववदंतिकर्तोशास्त्रा
र्थवत्वादितिसूत्रकारस्याप्याशयंनजानंतिहृथैवजल्पंती
त्यर्थः २१ ॥

मधुसूदनी टीका ॥ इदानीनहंतीत्युपपादयन्नुपसंह
रति नविनष्टुंशीलंयस्यतमविनाशिनं अंत्यविकाररहितंतत्रहेतुः
अव्ययं नविद्यतेव्ययोऽवयवाऽपचयोगुणापचयोःवायस्यत
मव्ययं अवयवापचयेनगुणापचयेनवाविनाशदर्शनात्तदु
भयरहितस्यनविनाशःसंभवतीत्यर्थः नतुजन्यत्वेनविनाश
त्वमत्रमास्यामहेनेत्याह अजमिति नजायतइत्यज माद्यवि॥

कारवहितंतत्रहेतुः नित्यंसर्वदाविद्यमाने प्रागविद्यमानस्य
हि जन्मदृष्टंनतुसर्वदासत इत्यभिप्रायः अथवाअविनाशिन
मव्ययंसत्यमितियावत् नित्यंसर्वव्यापकंतत्रहेतुः अज
मव्ययंजन्मविनाशशून्यं जायमानस्यविनश्यतश्चसर्वव्याप
कत्वसत्यत्वयोरयोगात् एवंसर्वविक्रियाशून्यंप्रकृतमेनं
देहिनंस्वमात्मानंयोवेदविजानातिशास्त्राचार्योपदेशाभ्या
साक्षात्करोति अहंसर्वविकारशून्यःसर्वभासकःसर्वद्वैतर
हितःपरमानंदबोधरूपइति सएवंविद्वान्पुरुषःपूर्णरूपः
कंहंतिकथंहंतिकिंशब्दआक्षेपेनकमपिहंतिनकथमपि
हंतीत्यर्थः तथाकंघातयति कथंघातयतिकमपिनघात
यति कथमपिनघातयतीत्यर्थः नहिसर्वविकारशून्यस्या
कर्तुर्हननाक्रियायांकर्तृत्वंसंभवति तथाचश्रुतिः आ
त्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यका
मायशरीरमनुसंज्वरेदिति अजमात्मानंविदुषस्तज्ज्ञान
निबंधनाध्यासनिवृत्तौ तन्मूलरागद्वेषाद्यभावात्कर्तृत्व
भोक्तृत्वाद्यभावंदर्शयति अयमत्राभिप्रायोभगवतः वस्तु
गत्याकोपिनकरोतिनकारयतिचकिंचित्सर्वविक्रियाशू
न्यस्वभावत्वात्परंतुस्वप्नइवाविद्ययाकर्तृत्वादिकमात्मन्य
भिमन्यतेमूढः तदुक्तं उभौतौनविजानीतइति श्रुतिश्च
ध्यायतीव[illegible]त्यादिः अतएवसर्वाणिशास्त्राण्यविद्व
दधिकारिकाणि विद्वांस्तुसमूलाध्यासबाधान्नात्मनिकर्तृ
त्वादिकमभिमन्यते अखण्डस्वरूपंविद्वानिवबोधयत्वे अतोवि
क्रियारहितत्वाददि्वतीयत्वाच्चविद्वान्नकरोतिनकारयतिवेत्यु
च्यते तथाचश्रुतिः विद्वान्नबिभेतिकुतश्चनेति अर्जुनोहि
स्वस्मिन्कर्तृत्वंभगवतिचकारयितृत्वमध्यस्यहिंसानिमि
त्तदोषमुभयत्राप्याशशंके भगवानपिविदिताभिप्रायोहं
तिघातयतीति तदुभयमाक्षिप आत्मनिकर्तृत्वंमयिच
कारयितृत्वमारोप्यप्रत्यवायशंकामाकार्षीरित्यभिप्रायः

गी॰ अविक्रियत्वप्रदर्शनेनात्मनः कर्तृत्वप्रतिषेधात् सर्वकर्मोहे
टी॰ पि भगवदभिप्रेतेने हंतिरुपलक्षणार्थः अतः स्फूर्तिकत्वात्
द्वि॰ प्रतिषेधहेतोस्तुल्यत्वात् कर्मान्तराभ्यनुज्ञानुपपत्तेः तथाच
वक्ष्यति तस्य कार्यं न विद्यते इति अतोऽत्र हननमात्रापेक्षया क
र्मान्तरे भगवताभ्यनुज्ञायत इति मूढजनजल्पितमपास्तं त
स्यापि अयमेव तस्यत्र हननस्य भगवताभ्यनुज्ञानात् वास्तव कर्तृ
त्वाद्यभावस्य कर्ममात्रे सममत्वादिति दिक् [illegible]
[illegible] व
[illegible]
[illegible] ॥ २१ ॥

सदानंदी टीका ॥

इत्थं निषिद्धं कर्मत्वमात्मनो ह्यविकारिणः इदानीं त्वक्रियामा
त्रे कर्तृत्वं प्रतिषिध्यते १ न विनष्टस्वभावोऽस्य न व्ययोपचयात्
मकः गुणार्थपचयादेव विनाशो हृश्यते यतः २ यथा कर्तृ
विकारीनां गुणनाशे व्ययो भवेत् नाशावयवतो यद्वत्तंतुनाशे
पटव्ययः ३ नाशः स्याद्धर्मतो यद्वत् कटकादि विनाशतः हेमेऽस्ना ना
भवेत्तद्वन्निर्धर्मके परस्त्वात्मनि ४ निर्गुणे निष्फले नाशस्तदभावा
दयुज्यते न जायते यतो नित्यो विद्यमानतया सदा ५ ते सर्वेवि
क्रियाशून्यं स्वात्मानं यस्तु साक्षिणं शास्त्राचार्योपदेशाभ्यामह
मस्मीति चाक्रियं ६ साक्षात्करोति सज्ज्ञानी पूर्णोऽसोऽहमिति कं कथं
घातयेत् तत्र किं शब्दो न कथं न कमप्यसौ ७ हंति वा न कथं क
श्चित्रैव घातयतीह सः ग्रह्ममाक्रियमात्मानं विद्वद्यो ह्यास्य हा
नतः ८ कर्तृत्वप्रेरकत्वादेरभावं दर्शयत्यजः प्रथमज्ञानो
विस्तरो वास्तदेवस्य मापतेः ९ निर्विकारतयात्यन्तमशुद्धत्वाच्चि
हनो ह्ययः न कर्ता प्रेरको नायं जत्रापि परमार्थतः १० देहाद्य
ध्यासतः पुंसोऽप्यात्माकर्तृत्वभोक्तृते अतः सर्वाणि शास्त्राणि
सविहद्विषयाणि च ११ समूलाध्यासबाधात्तु विदुषामात्मनि
विक्रियां कर्तृत्वाद्यात्मिकां कांचिदभिमन्यतऽन्तमः १२ अजे

नःकर्तृत्वंतावदस्मिन्विषयेप्रेरकत्वंतथा आरोप्योभयमपि
दोषंहिंसानिमित्तकं॥२॥ आशंक्येयंभगवान्ज्ञानाभिप्रायई
श्वरः इतिज्ञापयतीत्येवमाक्षेपद्वयेहितत्॥४॥ आत्मन्या
रोप्यकर्तृत्वंप्रेरकत्वंमयीश्वरे माकार्षीर्दोषशंकांत्वमित्य
भिप्रायइतिशिवः॥१९॥२१॥ श्री॥

नीलकंठी टीका

नायंहंतीत्येतदुपपादयति वेदेति विनष्टुमदर्शनंगंतुंशील
मस्येतिविनाशिरज्जूरगवत्तत्प्रपार्थिवंयस्थूलसूक्ष्मकारण
शरीरत्रयंतेनतोन्यमविनाशिनं अतएवनित्यंनाशहीनं नत्वेह
तः अजंजन्मवान्हिअनित्यः अव्ययंअजत्वान्नित्यत्वाच्चेत्यर्थः नतु
विनाशिनःस्वकार्यापेक्षयाअन्यत्वमजत्वेनित्यत्वंचसांख्या
भिमतेप्रधानेनाकिकाभिमतेनअसिद्धमस्ति अतउक्तंअव्यय
मिति नव्येतिपूर्वावस्थामजहतीव्ययमपरिणामि प्रधानंतव त्य
लेशेणहतमितिन्यायेनगुणसाम्यावस्थायामपिपरिणम
मानमेव सर्वदास्तीतितेषामभ्युपगमात् आकाशस्यापित
स्माद्वाएतस्मादात्मनआकाशःसंभूतइतिउत्पत्तिश्रवणादज
त्वाभावादेवनाव्ययत्वं तादृशंआत्मानंयोवेद अपरोक्षीकरो
तिसपुमान्कथंकेनप्रकारेणकमन्यंघातयति हननक्रि
यायांप्रवर्तयति कंवाहंति नकेनचित्प्रकारेणकमपिघात
यतिनवाहंतीत्यर्थः द्वैताभावात्तथाहिश्रुतिर्विद्यावस्थायां
सर्वकारकव्यापारंनिषेधयति यत्रत्वस्यसर्वमात्मैवाभूत्तत्केन
कंपश्येदित्यादि अविद्यावस्थायामेवचसर्वकारकव्यवहारं
दर्शयति यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादि
एतेनसर्वकारकोपमर्दिन्याविद्यायाःसर्वकारकसापेक्षैःक
र्मभिःसहसमुच्चयोनिरस्तः परस्परविरुद्धस्वभावत्वेनशी
तोष्णयोरिवद्वयोरेककार्यकारित्वस्यरथाश्वन्यायेनासंभवा
दित्यत्रविस्तरः मादृशानांज्ञानिनोप्युत्थानकालेअविद्याले
शात्तद्वन्न्यायानयित्वादेःप्रसक्तावपिविद्ययातस्यबाधि

तत्वादागामिकर्मणामश्लेषाच्च नदोषः तथाचवक्ष्यते हत्वा
पिसइमांल्लोकान्नहंतिननिबध्यतेइति २१ ॥

आनंदी टीका

एवंप्रतिज्ञार्थमध्युपसंहरति यःपुरुषएनमुक्तलक्षणमा
त्मानमविनाशिनमन्त्यविकाररहीतं अजमाद्यविकारशून्यम
व्ययमपक्षयवृद्धिपरिणामास्तित्वशून्यंवेदजानाति सपुरु
षःकेनप्रकारेणकंघातयति परेणहन्यमाणंप्रयुक्ते स्वयम
पिचकंहन्ति एवंनिर्विकारस्यात्मनःकेनचिदपिप्रकारेण
नाशोनसंभवतीत्यर्थः अथचभीष्मादीनांशिरश्छेदादिभिः
घातनेवक्ष्यमाणेनदोषइत्यभिप्रायोहूचितम् २१ ॥

१५८

रामकेदी टीका

एवंप्रतिपादितस्वरूपमविनाशिनमात्मानंयःपुरुषःअमा
तानित्यंसदैवजानाति सतदभिन्नमात्मानंप्रतिपद्यमानःक
थंकेनप्रकारेणहन्यतेविनश्यतेहन्तिवापरंविनाशयति
हननक्रियाकर्तृकर्मभावोयंशरीरमात्रप्रतिबद्धात्माभिमा
नेषुप्रतिबद्धेषुतेनक्लेशेषुववास्थितः [illegible] ३
[illegible]
[illegible]
[illegible] २१ ॥

लाक्षिकी टीका

अविनाशिनमव्ययमजं नित्यं वेद [illegible] हन्ति घातय
तिकंकथंवा [illegible] २१ ॥

४ अतएवहन्तृताभावो
पूर्वोक्तः सिद्ध इत्याह
नित्यं वृद्धिशून्यमव्ययमप
क्षयशून्यं अजमविनाशि
नमेनं योवेद प्रबुद्धत्वा
जानाति सपुरुषः कं हन्ति
कथं वा हन्ति एवंभूतस्य
वधे साधनाभावात्तथा
स्वयंप्रयोजकोभूत्वा अन्ये
न कं घातयति कथं वा घा
तयति न कथंचिदपीत्यर्थः
अनेन मय्यपिप्रयोजक
त्वाद्दोषदृष्टिं माकार्षीरि
त्युक्तं भवति

पंचोलेटीका

यएनंवेत्तिहंतारमित्यनेनआत्मनोहननक्रियांप्रतिकर्मत्वकर्तृत्वाभा
वेप्रतिज्ञायतइतिअनेनअविक्रियत्वेहेतुंसाधयित्वातदर्थमुपसंहर
ति वेदाविनाशिनंइति यःपुमानेनंआत्मानमविनाशिनंनित्यंअजम
व्ययंवेदजानातिहेपार्थसपुरुषःकथंकेनप्रकारेणकंपुरुषंघातयति
कंपुरुषंहंतिहिनास्तिआत्मनःषड्भावविकाररहितत्वात् हंतुंनशक्यते २१
आत्मा इत्यर्थः

भाषा अनुवाद

पूर्व श्लोकमे आत्माको षड्विकार रहित कहा इससे आ
त्मा हनन किया जो मारना इसका कर्ता कहे करने वा
ला नही यह बात अच्छी प्रकार सिद्ध भई सोई कहतेहै
कि जो कोई इस आत्माको घटने बढने से रहित तथा
जन्म हीन और अविनाशी जानतेहै हे अर्जुन वे किस ॥
वास्ते किसीको मारेंगे कारण यह कि आत्मा अविनाशी
के वधकी उपाय नहीहै और आप प्रेरणा करि और कि॥
सीसे किसीको भी किस लिये घात करवेंगा इससे श्री
कृष्णजी की यह अभिप्राय जानीगई कि भीष्म आदिके
वधमे प्रयोजक रूप दोष हमे कभी दीजो नही अर्थात्
तुमरे कहनेसे यह काम हमने किया है कहियो नही २१

दोहा

जो अविनाशी नित्यको इहू जाने अज अव्यय पार्थ कैसें
पुरुष सो किं हमारे मरावें सहृय २१

157

रणवीरसमिद्बोधिनी॥

अथ न हंतीति विशेषेण द्रढयति वेदेति यएनं प्रतिपादितस्व
रूपमात्मानमविनाशिनं नित्यं सदैव जानाति तत्र हेतुः अव्य
यमिति अवयवापचयहीनमिति अवयवापचयेनैव हि वि
नाशः संभवति अविनाशित्वे हेतुमाह अजमिति अजं प्रागभावा
प्रतियोगिनं योहि पूर्वमविद्यमानः सञ्जायते यश्च जायते स
एव विनश्यतीति न चायं तथेत्येवं विद्वज्ज्ञानन्यः पुरुषः पौरुष
लक्षणयुक्तः सकथं केन प्रकारेण कं घातयति हन्यमानं संपा
दयति हंतं वा प्रयुंक्ते कं च हंति हननक्रियाकर्मतां प्रापयति
कथमपि कमपि न हंति न वा घातयति परप्रेरको भवतीति हं
तृत्वतत्प्रेरकत्वनिबंधनं पापं नास्मानाश्रयेदिति भावः एते
न च धनंजयाशंकापरास्ता २१॥

मधुभाष्य

अतो यएवं वेद स कथं कं घातयति हंति वा अविनाशिनं ने
मिति कनाश रहितं नित्यं स्वाभाविकविनाशरहितं अथ
वा अविनाशिनं दोषयोगरहितं नित्यं सदाभाविनमिति स
र्वत्र विवेकः दोषयुक्तपुरुषादिषु नष्टत्वप्रयोगदर्शना
त् देहात्मविवेकानुभवार्थं दृष्टांतमाह २१॥

156

वासांसिजीर्णानियथाविहाय नवानिगृह्णा
तिनरोपराणि तथाशरीराणिविहायजीर्णा
न्यन्यानिसंयातिनवानिदेही २२ ॥

शांकरभाष्यटी॰

प्रकृतंतुवक्ष्यामः तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं तत्कि
मिवेत्युच्यते वासांसीति वासांसिवस्त्राणिजीर्णानि दुर्बलतां
गतानि यथालोकेविहाय परित्यज्य नवान्यभिनवानिगृह्णा
त्युपादत्तेनरः पुरुषोऽपराण्यन्यानि तथा तद्वदेव शरीरा॰
णिविहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देह्यात्मा
पुरुषवदविक्रिय एवेत्यर्थः २२ ॥

आनंदगिरिकृतटीका ॥

आत्मनोऽविक्रियत्वेन कर्मासंभवे प्रतिपाद्याविक्रियत्वेहेतुं॰
समर्थनार्थमेवोत्तरग्रन्थमवतारयति प्रकृतंत्विति किं तत्प्रकृ
तमितिशंकमानंप्रत्याह तत्रेति अविनाशित्वमित्युपलक्षण
मविक्रियत्वमित्यर्थः तदेवदृष्टान्तेनस्पष्टयितुमुत्तरश्लोक
मुत्थापयति तदित्यादिना आत्मनःस्वतोविक्रियाभावेपिपु
रातनदेहत्यागे नूतनदेहोपादानेचविक्रियावत्त्वध्रौव्यादवि॰
क्रियत्वमसिद्धमिति चेत्तत्राह वासांसीति शरीराणिजीर्णानि
वयोहानिंगतानि त्वग्वलीपलितादिसंगतानीत्यर्थः वाससां॰
पुरातनानां परित्यागेनवानांचोपादाने त्यागोपादानकर्तृभूत
लौकिकपुरुषस्यापि अविकारित्वैनैकरूपत्ववदात्मनोदेह
त्यागोपादानयोरविरुद्धमविक्रियत्वमितिवाक्यार्थमाह पु
रुषवदिति २२ ॥

स्वामिकृतटीका ॥

नन्वात्मनोविनाशेपितदीयशरीरनाशंपर्यालोच्यशोचामी
तिचेत् तत्राह वासांसीति कर्मनिबंधनानांनूतनानांदेहाना
मवश्यंभावित्वात्तज्जीर्णदेहनाशेशोकावकाशइत्यर्थः २२ ॥

पिशाचभाष्यं टी॰

आत्मनोनित्यत्वंप्रतिज्ञातंतत्कथंशरीरेषुनश्यत्स्वित्यत्राह वासां॰
सीति यथानरोजीर्णानिवासांसिविहायनवानिवस्त्राणिगृह्णा॰
तिस्वयंविद्यमानएवतथाजीर्णानिशरीराणिसंयातिदेहीस्वयंध्रु
वेदेहविनाशेप्यविक्रियोविनाशरहितः २२ ॥

रामानुजभाष्यं टी॰

यद्यपिनित्यानामात्मनांशरीरविच्छेदमात्रंक्रियतेतथापिरमणी
यभोगसाधनेषुनश्यत्सुतद्वियोगरूपंशोकनिमित्तमस्त्येवेत्यत
आह वासांसीति धर्मयुद्धेशरीरादधिकतमकल्याणशरीरग्रह
णंशास्त्रादवगम्यतइति जीर्णानिवासांसिविहायनवानिक
ल्याणानिवासांसिगृह्णतामिवहर्षनिमित्तमेवात्रोलभ्यते २२

अभिनवगुप्तकृतटी॰ ॥

यथावस्त्राच्छादितस्तद्वस्त्रनाशेसम्भवितवद्देहांतरावृतोनविन
श्यति एवमात्मादेहांतरावृतः २२ ॥

नचदेहान्तरगमनमस्या
पूर्वं, संयाति देहान्तरं गच्छ
ति तेन सम्बध्यते इत्यर्थः

परमार्थप्रपा टी॰ ॥

नन्वात्मनः अविनाशित्वंनिरूढमेवपरंतुतदधिष्ठितदेहव॰
धतोभयेनशोकइतिचेत्तत्राह वासांसीति उत्पत्स्यमानूत
नदेहानांकर्मनिबन्धनत्वेनावश्यंभावात्तथैवजीर्णदेहनाशो
पीतिनदोषावकाशः २२ ॥

वनमाली॰टी॰

ननुजीवोनित्यस्तस्यदेहयोगवियोगौदेहेकौमारादिवदित्यु
क्तं तत्रकौमारादेर्देहादनतिभिन्नत्वात्तत्रदेहात्मनोर्विवेकः
स्फुटनभवतीत्यतोदेहात्मनोर्विवेकंवस्त्रदृष्टांतेनोपपाद॰
यति वासांसीति यथानरो॰नायासेनविक्रियारहितएवजी
र्णानिवासांसिविहायापराणिनवानिगृह्णातिजीर्णानीत्युप
लक्षणंनिकृष्टंनूतनमपिविहायोत्कृष्टं नूतनंगृह्णाति त
थाजीर्णानिवयसाचकृशानिउत्कृष्टभोगा॰क्षमाणिभीष्मादि
शरीराणिविहाय॰न्यानिदेवादिशरीराणिसर्वोत्कृष्टानिचि॰

मधुभाष

वासंभसीति स्वतः प्रयोनिमित्तेश्चाविनाशिनोपिकेनचि।
न्निमित्तविशेषेणस्यात् ककच्छेदवदिन्द्रियतो विशेषनि
मित्तानिषेधयति २२॥

रणवीरसमिद्बोधिनी॥

अथ न हंतीति विशेषेण दृढयति वेदेति य एनं प्रतिपादितस्व
रूपमात्मानमविनाशिनं नित्यं सदैव जानाति तत्र हेतुः अव्य
यमिति अवयवापचयहीनमिति अवयवापचयेनैव हि वि
नाशः संभवति अविनाशित्वे हेतुमाह अजमिति अजं प्रागभावा
प्रतियोगिनं यो हि पूर्वमविद्यमानः स जायते यश्च जायते स
एव विनश्यतीति न चायं तथेत्येवं विद्वज्ज्ञानन्यः पुरुषः पौरुष
लक्षणयुक्तः स कथं केन प्रकारेण कं घातयति हन्यमानं संपा
दयति घ्नंतं वा प्रयुंक्ते कं च हंति हननक्रियाकर्मतां प्रापयति
कथमपि कमपि न हंति न वा घातयति परप्रेरको भवतीति हं
तृत्व तत्प्रेरकत्व निबंधनं पापं नास्मानाश्रयेदिति भावः एते
न च धनंजयाशंकापरास्ता २१॥

मधुभाष्य

अतो य एवं वेद स कथं कं घातयति हंति वा अविनाशिनं ने
मिति कनाश रहितं नित्यं स्वाभाविकविनाशरहितं अथ
वा अविनाशिनं दोषयोगरहितं नित्यं सदाभाविनमिति स
र्वत्र विवेकः दोषयुक्तपुरुषादिषु नष्टस्य हि प्रयोगदर्शना
त् देहात्मविवेकानुभवार्थं दृष्टांतमाह २१॥

[library stamp]

वासांसिजीर्णानियथाविहाय नवानिगृह्णा
तिनरोपराणि तथाशरीराणिविहायजीर्णा
न्यन्यानिसंयातिनवानिदेही २२ ॥

शांकरभाष्यं टी.

प्रकृतंतु वक्ष्यामः तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं तत्कि
मिवेत्युच्यते वासांसीति वासांसिवस्त्राणिजीर्णानि दुर्बलतां
गतानि यथालोकेविहाय परित्यज्य नवान्यभिनवानिगृह्णा
त्युपादत्तेनरः पुरुषोऽपराण्यन्यानि तथा तद्वदेव शरीरा
णिविहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देह्यात्मा
पुरुषवदविक्रिय एवेत्यर्थः २२ ॥

आनंदगिरिकृतटीका ॥

आत्मनोऽविक्रियत्वेन कर्मासंभवं प्रतिपाद्याविक्रियत्वेहेतुः
समर्थनार्थमेवोत्तरग्रन्थमवतारयति प्रकृतंत्विति किं तत्प्रकृ
तमितिशंकमानंप्रत्याह तत्रेति अविनाशित्वमित्युपलक्षण
मविक्रियत्वमित्यर्थः तदेवदृष्टान्तेनस्पष्टयितुमुत्तरश्लोक
मुत्थापयति तदित्यादिना आत्मनःस्वतोविक्रियाभावेपिपु
रातनदेहत्यागे नूतनदेहोपादानेचविक्रियावत्त्वध्रौव्यादवि
क्रियत्वमसिद्धमिति चेत्तत्राह वासांसीति शरीराणिजीर्णानि
वयोहानिंगतानि त्वग्वलीपलितादिसंगतानीत्यर्थः वाससां
पुरातनानां परित्यागेनवानांचोपादाने त्यागोपादानकर्तृभूत
लौकिकपुरुषस्यापि अविकारित्वेनैकरूपत्ववदात्मनोदेह
त्यागोपादानयोरविरुद्धमविक्रियत्वमितिवाक्यार्थमाह पु
रुषवदिति २२ ॥

स्वामिकृतटीका ॥

नन्वात्मनोविनाशेपितदीयशरीरनाशंपर्यालोच्यशोचामी
तिचेत् तत्राह वासांसीति कर्मनिबंधनानांनूतनानांदेहाना
मवश्यंभावित्वाज्जीर्णदेहनाशेशोकावकाशइत्यर्थः २२ ॥

गी॰
टी॰
द्वि॰

159

पिशाचभाष्यं टी॰

आत्मनो नित्यत्वं प्रतिज्ञातं तत्कथं शरीरेषु नश्यत्स्वित्यत आह वासां-
सीति यथा नरो जीर्णानि वासांसि विहाय नवानि वस्त्राणि गृह्णा-
ति स्वयं विद्यमान एव तथा जीर्णानि शरीराणि संयाति देही स्वयं पू-
र्वदेहविनाशेऽप्यविक्रियो विनाशरहितः २२ ॥

रामानुजभाष्यं टी॰

यद्यपि नित्यानामात्मनां शरीरविच्छेदमात्रं क्रियते तथापि रमणी-
यभोगसाधनेषु नश्यत्सु तद्वियोगरूपशोकनिमित्तमस्त्येवेत्यत
आह वासांसीति धर्मयुद्धे शरीरादधिकतमकल्याणशरीरग्रह-
णं शास्त्रादवगम्यत इति जीर्णानि वासांसि विहाय नवानि क-
ल्याणानि वासांसि गृह्णतामिव हर्षनिमित्तमेवात्रोलभ्यते २२

अभिनवगुप्तकृतटी॰ ॥

यथा वस्त्राच्छादितस्य देहस्य नाशो न संभवति तद्वद्देहान्तराहृतो न विन-
श्यति एवमात्मा देहान्तराहृतः २२ ॥

न च देहान्तरगमनमस्या
पूर्वं संयाति देहान्तरं गच्छ
ति तेन सम्बध्यते इत्यर्थः

परमार्थप्रपा टी॰ ॥

नन्वात्मनः अविनाशित्वं निरूढमेव परं तु तदधिष्ठितदेहव-
धलाभयोः न शोक इति चेत्तत्राह वासांसीति उत्पत्स्यमानसूत-
न देहानां कर्मनिबन्धनत्वेनावश्यभावात्तदर्थं व जीर्णदेहनाशे-
पीति न दोषावकाशः २२ ॥

वनमाली॰ टी॰

ननु जीवो नित्यस्तस्य देहयोगवियोगौ देहे कौमारादिवदित्यु-
क्ते तत्र कौमारादेर्देहादनतिभिन्नत्वात्तत्र देहात्मनोर्विवेकः
स्फुटतरं भवतीत्यतो देहात्मनोर्विवेकं वस्त्रदृष्टान्तेनोपपाद-
यति वासांसीति यथा नरो [illegible]नायासेन विक्रियारहित एव जी-
र्णानि वासांसि विहायापराणि नवानि गृह्णाति जीर्णानीत्युप-
लक्षणं निकृष्टं नूतनमपि विहायोत्कृष्टं नूतनं गृह्णाति त-
था जीर्णानि वयसा च कृशानि उत्कृष्टभोगा[illegible]र्हाणि भीष्मादि-
शरीराणि विहाय[illegible]न्यानि देवादिशरीराणि सर्वोत्कृष्टानि वि-

मधुभाष्य
वामंमीति स्वतः प्रयोनिमित्तैश्च्याविनाशिनोपिकेनचि।
न्निमित्तविशेषेणस्यात् ककच्छेदवद्वियतोविशेषनि
मित्तानिषेधति २२॥

भाषा अनुवाद

जो कहो कि आत्मा अविनाशी भीहै पर तो भी इसकी स्थू
ल इस देहका नाश देख कर हम शोच करतेहै तो देखो
जैसे मनुष्य जीर्ण कहे पुराने वस्त्र परित्याग कहे उतार ।
कर और नये कपडे धारण करते अर्थात् पहिरतेहै तैसेही
आत्मा पूर्व प्राचीन शरीर कहे देह छोड कर और नूतन कहे
नई देह ग्रहण करताहै इससे कर्म्मके अनुसार देहका अ
वश्य होन हार जो जन्म और नाश तिसमे शोच करना तु
म ऐसोंको उचित नही है २२ ॥

चौपई

जैसे वस्त्र जीर्णको कोईत्यागे ओर ओढे नरसोइ जीर्णदेह
त्यागत्योंदेही नूतन औरदेह धरलेही २२॥

161

नैनंछिन्दन्तिशस्त्राणि नैनंदहतिपावकः
नचैनंक्लेदयंत्यापो नशोषयतिमारुतः २३

शांकरभाष्यटी॰

कस्मादविक्रियएवेत्याह नैनंछिन्दन्तीति एनंप्रकृतंदेहिनं
नछिन्दन्ति शस्त्राणि निरवयवत्वान्नावयवविभागं कुर्वन्ति
शस्त्राण्यस्यादीनि तथा नैनं दहति पावकोऽग्निरपिन भस्मी
करोति तथा नचैनंक्लेदयन्त्यापोऽपांहि सावयवस्यवस्तुनः
आर्द्रीभावकरणेन अवयवविश्लेषापादने सामर्थ्यं तन्न निरव
यवआत्मनि संभवति तथास्नेहवत् द्रव्यंस्नेहशोषणेननाः
शयति वायुरेनंत्वात्मानंनशोषयति मारुतोपि २३ ॥

आनंदगिरिकृतटीका ॥

पृथिव्यादिभूतचतुष्टयप्रयुक्तं विक्रियाभावकादात्मनोऽसिद्ध
मविक्रियत्वमिति शंकते कस्मादिति यतोनभूतान्यात्मानं गो
चरयितुमर्हन्त्यतोऽयुक्तमाकाशवत्तस्याविक्रियत्वमित्याह
आहेत्यादिना २३ ॥

स्वामिकृतटीका ॥

कथंहंतीत्यनेनोक्तंवधसाधनाभावंदर्शयन् अविनाशित्वमा
त्मनःस्फुटीकरोति नैनमिति आपोनैनंक्लेदयंति मृदुकरणे
नशिथिलंनकुर्वन्ति २३ ॥

पिशाचभाष्यटी॰

कथंपूर्वंनाविक्रियतेइत्युक्तमतआह नैनंछिंदंतीति एवंप्र
कृतंदेहिनंनछिंदतिनिरवयवत्वान्नावयवविभागंकुर्वन्ति
शस्त्राणिवास्यादीनि तथानैनंदहतिपावकः अग्निरपिनभस्मी
करोति तथाचैनंक्लेदयंत्यापः आपोहिसावयववस्तुनि
आर्द्रभावकरणेनावयवविश्लेषणापादनेसामर्थ्येननिरव॰
यवआत्मनिसंभवति तथास्नेहद्रव्यंस्नेहशोषणेनशोषयति

गी॰ वायुः एवं चात्मानमस्त्रेह्वं तं न शोषयति मारुतोपि २३ ॥

टी॰ रामानुजभाष्यम् टी॰ ॥

द्वि॰ पुनरप्यविनाशित्वं तद्द्विद्वियेन सर्वमिदं ततमिति पूर्वोक्तमविनाशित्वं स्वरूपग्रहणाय व्यञ्जयन् दृढयति शस्त्राग्न्यम्बुवायवः छेदन दहन क्लेदन शोषणान्यात्मनः एते प्रति कर्तुं न शक्नुवंति सर्वगतत्वादात्मनः सर्वतत्वव्यापकस्वभावतया सर्वेभ्यः सूक्ष्मत्वादस्य तैर्व्याप्यनर्हत्वात् व्याप्यकर्तव्यत्वाच्च छेदन दहन क्लेदन शोषणानां ॥ २३ ॥

दह (margin) · वन॰ (margin) · भ्यसूक्ष्मत्वे॰ (margin)

अभिनवगुप्तकृत टी॰ ॥

नास्य नाशकारणं शस्त्रादि किंचित्करं विदेकस्वभावस्यास्य नाश्रितस्य निरंशस्य स्वतंत्रस्य स्वभावांतरापत्त्याश्रयविनाशावयवविभागविरोधिप्रादुर्भावादिप्रक्रमेण नाशयितुमशक्यत्वात् ॥ २३ ॥

परमार्थप्रपा टी॰ ॥

नैनमिति क्लेदनेनामस्तुत्वहेतोः शिथिलीकरणं तथाविधो न भवति २३ ॥

वनमाली टी॰

ननु शरीरनाशे सत्यात्मनो नाशः स्यादित्याशंक्यात्मनः कर्तुं नाशसामग्र्यभावमाह नैनमिति २३ ॥

उत्तमवैजयन्ती टी॰ ॥

एवं शरीराणां संयोगे वाप्यात्मनो नित्यत्वं दर्शितमिदानीं येऽपायाः शरीरवियोगं कुर्वन्ति तेप्येनं विनष्टुं न शक्नुवन्तीति दर्शयन्नात्मनः पुनरप्यस्यानित्यत्वं दृढयति नैनमित्यादि त्रिभिः नैनमिति शस्त्राणि खड्गादीन्यतितीक्ष्णान्यपि एनमात्मानं न छिन्दंति तद्द्विभागं कर्तुं न शक्नुवन्ति पावकोनलोऽत्युग्रतापोपि एनं न दहति भस्मीकर्तुं न शक्नोति + मारुतः सं... शतिवेगवत्तरोपि एनं न शोषयति शुष्कं कर्तुं न शक्नोति यतः एते हेतवो उक्ता इति

चिना पुष्पितं (margin) · द्रुमा॰ (margin) · मी (margin)

च पुनः आपो त्यागाधवेन वन्त्योपि एनं न क्लेदयन्ति आर्द्रीकरणेन शिथिलीकर्तुं न शक्नुवन्ति +

167

रोपार्जितधर्मफलभोगाय संयाति सम्यक् गर्भवासक्लेशं विनै
व प्राप्नोति देही प्रकृष्टधर्मानुष्ठानाद्भीष्मादिरित्यर्थः अन्यत्तु व
तरेकल्याणतरं रूपं कुरुते पित्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं
वा ब्राह्मं वेत्यादिश्रुतेः २२ ॥

अथ मे वैजयन्ती टी:

नन्वात्मनो नित्यत्वादजत्वादव्ययत्वाच्चाविनाशित्वं स्यात्तदस्तु
परं तु पूर्वजन्मार्जितपुण्यपुंजैर्लब्धातिकमनीयरूपस्य नाना
भोगप्रदस्यापि प्रियतरस्यैवंभूतभीष्मादिदेहस्य विनाशं क
थं करिष्यामीत्याशंकायामुत्तरमाह वासांसीति यथा जीर्णा
नि पुरातनानि वासांसि वस्त्राणि विहाय परित्यज्य अविक्रियप
व नरो मनुष्यः अपराणि त्यक्तवस्त्रादधिकतराण्यन्यानि नवा
नि नूतनानि गृह्णाति धृतं करोति तथा जीर्णानि वयस्तपोभ्या
मति कृशानि निकृष्टानि वा शरीराणि गात्राणि विहाय त्यक्त्वा
देही स्वधर्मानुष्ठानाय देहवान् जीवः अन्यानि त्यक्तदेहादन्यत्
कृष्टतराणि नवानि निर्जराणि नित्यप्रायाणि यौवनानीत्यर्थः सं
याति सम्यक् प्राप्नोति अयं भावः आजन्म स्वधर्मानुष्ठानपरा
भीष्मादयः पापाचरणतत्परा दुर्योधनादयश्चोभयेपि पुण्य
पुण्यकर्तारो यदि धर्मयुद्धे स्वस्वकलेवरं त्यक्ष्यन्ति तर्हि सर्वे ह
कृतिनो भूत्वा त्यक्तदेहादधिकतमं दिव्यमंगलरूपं देहं दिव्य
भोगं च प्राप्य देवगणैः सह दिवि मोदिष्यन्ते यदि तु युद्धव्यतिरि
केण यत्र कुत्रचित् कदेशादौ देहान् हास्यन्ति तर्हि भीष्मादयः पु
ण्यवन्तोपि आलापाद्गात्रसंस्पर्शान्निःश्वासात्सहभोजनात् सं
क्रमन्ति च पापानि तैलबिन्दुरिवाम्भसीति वचनात् दुर्योधना
दिसंसर्गदोषवशात् पतिष्यन्ति दुर्योधनादयस्तु निश्चयेन नि
रयमेव गमिष्यन्ति अतस्त्वं युद्धकृते तदनुसंधायैतेषां युद्धं वि
नान्यः पापनिस्तरणोपायो नास्तीति निश्चित्य अहो वत महत्पाप
कर्तुं व्यवसिता वयमिति स्वामिन्याघप्राप्तिभयरूपबुद्धिभ्रमं
त्यक्त्वा दुर्गतिनिहन्तये पुण्यफलभोगप्राप्तये च त्वमेतेषां कु

गी॰ त्मितशरीरवियोगं कारयित्वाऽतिरमणीयदिव्यमंगलशरीरसं
टी॰ योगं कारयतैवैतेन महदुपकारकत्वं भविष्यति यद्यपकारक
द्वि॰ त्वभ्रान्त्या युद्धं न करिष्यसि तर्हि तेषां सुकृतभोगस्य विघ्नकर्तात्व
मेव भविष्यसि महोत्सवस्थाने शोककारणं महदनुचितमिति २२

+ नन्वेवमात्मनोविनाशित्वेपिदेहानांविनाशि त्वाद्युद्धस्य च तन्नाशकत्वात् कथं भीष्मादिदेहानामनेकसुकृतसाधनानां मया युद्धेन विनाशः कार्य इत्याशंक्याह उक्तं रां॥ +

मधुसूदनी टीका ॥

जीर्णानि विहाय वस्त्राणि नवानि गृह्णाति विक्रियाशून्य एव न
रो यथेत्येतावतैव निर्वाहे अपराणीति विशेषणमुत्कर्षातिश
यख्यापनार्थं तेन यथा निकृष्टानि वस्त्राणि विहायोत्कृष्टानि
जनो गृह्णातीत्यौचित्यापातं तथा जीर्णानि वयसा तपसा च कृ
शानि भीष्मादिशरीराणि विहाय अन्यानि देवादिशरीराणि स
र्वोत्कृष्टानि चिरोपार्जितधर्मफलभोगाय संयाति सम्यक् गर्भवासा गा
दिक्लेशव्यतिरेकेण प्राप्नोति देही प्रकृष्टधर्मानुष्ठानाद्देहवान्
भीष्मादिरित्यर्थः अन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं
वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेत्यादिश्रुतेः एतदुक्तं
भवति भीष्मादयो हि यावज्जीवं धर्मानुष्ठानक्लेशेनैव जर्जर
शरीरा वर्तमानशरीरपातमंतरेण तत्फलभोगायासमर्था
यदि धर्मयुद्धेन स्वर्गप्रतिबंधकानि जर्जराणि शरीराणि पात
यित्वा दिव्यदेहसंपादनेन स्वर्गभोगयोग्याः क्रियंते त्वया तदा
त्वतैवोपकृतमेव ते दुर्योधनादीनामपि स्वर्गभोगयोग्यदे
हसंपादनान्महानुपकार एव तथा चात्यंतमुपकारके यु
द्धेऽपकारकत्वभ्रमं माकार्षीरिति अपराण्यन्यानि संयाती
तिपदत्रयवशाद्भगवदभिप्राय एवमभ्यूहितः अनेन दृष्टां
तेनाविकृतत्वप्रतिपादनमात्मनः क्रियत इति तु प्राचां व्या
ख्यानमतिस्पष्टं [illegible] २२

सदानंदी टी॰ ॥

ननु मा त्वात्मनो नाशस्तथापि तेषां महात्मनां कथं भीष्मादि
देहानां नाशः कार्यो मयेति चेत् १ त्यक्त्वा जीर्णानि वस्त्राणि

163

गृह्णात्यविक्रियःजनो नवानिश्रेष्ठानिजीर्णानिवयसातथा
भीष्मादिकशरीराणित्यक्त्वाभीष्मादिदेहिकः सर्वोत्कृष्टानिदे
वादिशरीराणिप्रयात्यसौ ३ यावज्जीवंहिभीष्माद्याधर्मानुष्ठेन
विदतः जर्जरीभूतदेहास्तेसर्वेस्वर्गाभिलाषिणः ४ जर्जराणि
शरीराणिपातयित्वारणेभवान् दिव्यदेहप्रदानेनतेषामुप
कृतिपरो ५ करोत्येवंहियुद्धेऽस्मिन्धर्मेसर्वोपकारिणि माका
र्षीर्दोषबुद्धित्वमित्यभिप्रायईशितुः ६ ॥ २२ ॥

नीलकंठी टी॰ ॥

ननुब्राह्मणेयजेतजातपुत्रः कृष्णकेशोऽग्नीनादधीतेतिश्रात्मा
नेवर्णावर्णादिविशेषणवंतमेवाधिकृत्यकर्मविधयः प्रवर्तंते
तेननीलाद्युत्पलमिवदेहादन्यआत्मावधारयितुंनशक्यतइ
त्याशंक्याह वासांसीति दंडीप्रैषानन्वाहेतिदंडस्यविशेषण
त्वेपिनप्रैषानुवचनस्वरूपांतर्गतत्वं एवंब्राह्मणत्वादेरपिनस्व
र्गकामस्वरूपांतर्गतत्वमितिवस्त्रदेवदत्तयोरिवजडाजडयोर्दे
हात्मनोरत्यंतविलक्षणमस्तीतिवस्त्रनाशेनदेवदत्तनाशंम
न्वानस्येवनवदेहनाशादात्मनाशंमन्वानस्यात्यंतमौढ्यंस्पष्ट
मितिभावः स्पष्टार्थश्लोकः ॥ २२ ॥

ज्ञानेदी टीका

नायंभूत्वाभवितेत्यादिव्याख्यानार्थप्रसंगादात्मनोनित्यस्यशाकु
तकर्मभोगार्थं पूर्वपूर्वदेहत्यागेनरोनवदेहग्रहणेसोपपत्तिक
माह स्पष्टार्थमिदंपद्यम् २२ ॥

रामकंठी टीका

यथाकश्चित्पुरुषोजीर्णान्युपभुक्तानिवस्त्राणित्यक्त्वापरवस
त्रन्यानिनवानि उपभोगक्षमाणिगृह्णात्युपलक्षणत्वेनजन्मा
दिविविधविकाराक्रांतनानाशरीरसंयोगवियोगवशान्नास्य
तत्संवेदित्वमात्रैकलक्षणवियोगइतिनित्यएवायमनित्यैः
शरीरधर्मैर्मनागप्यसंस्पृष्टोयतः २२ ॥

लासिकी टीका

ननुदेहनाशेआत्मनस्तनधर्मोपलंभात्कथमविनाशित्वमि

यथा कश्चिज्जीर्णान्युपभोगाक्षमाणि वस्त्राणि त्यक्त्वा स एव स्वन्यानि नवानि उपभोगक्षमाणि गृह्णाति

गी. टी. हि. तिदृष्टांतेनद्रढयति वासांसीति । तथा देही अयमात्मा करण भूतप्रारब्धकर्मक्षयेण जीर्णान्युपभोगाक्षमाणि विहायान्यानि नवानि उपभोगक्षमाणि संयाति प्राप्नोति कर्मनिबन्धनानां नूतनानां देहानां प्रवेशप्रभावित्वान्न जीर्णनाशे शोकावकाश इत्यर्थः २२ ॥

पंगोलीटीका

आत्मनःप्रतिपादितमविनाशित्वं दृष्टांतेन द्रढयति वासांसीति नरः पुरुषः यथा येन प्रकारेण लोके जीर्णानि दुर्बलगतानि वासांसि वस्त्राणि विहाय परित्यज्य अपराणि अन्यानि नवानि नूतनानि गृह्णाति उपादत्ते देही आत्मा तथा तेन प्रकारेण जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति देही आत्मा पुरुषवत् अविक्रिय एवेत्यर्थः २२

भगवीरसमिद्वेथिनी ॥

नन्वस्तु देहस्यैव विनाशस्तथापि तत्संबंधे चेतनत्वादुपलंभात्क थमात्मनो न विनाशित्वमिति व्यामोहं निवर्तनाय सदृष्टांतं पुन रपि नित्यत्वमस्य द्रढयति वासांसीति यथा चिरकालाच्छादन वपुषो जीर्णस्य वस्त्रस्य त्यागे सत्युचितस्य नूतनस्य तस्यावरणे च न कश्चिद्धिनश्यति एवमात्मापि वयस्तपआदिना कृशानि देहानि त्यक्त्वा चिरोपार्जितसुकृतफलभोगक्षमानि तानि नूतनानि देवा दिशरीराणि गृह्णन्न विनश्यतीति भीष्मादि देहानां सुकृतसाधना नां युद्धेन कथमहं विनाशं कुर्यामित्यर्जुनशोको न विधेय इति भ गवदभिप्रायः युद्धेन भीष्मादीनां शरीरविनाशनेनोपार्जितसुकृ तभोगाभावेन नापकारः स्यात्परंतु यावज्जीवं धर्मानुष्ठानक्लेशेन कृ शीभूतदेहानामेतेषामुपार्जितसुकृतफलभोगाशक्तेस्तु यातनया तपवक्षयाणि तियुद्धेन तानि पातयित्वा कल्याणफलभोगक्षम सम्बन्धि देहान्तरसंपादनेन महानुपकार एव कृतः स्यादिति युद्ध स्य महोपकारकत्वेन पुण्यत्वे पकारभ्रमेण पापशंका मा कार्षी रि ति २२

शारीरायचेतनद्रव्यनाशकरणायसमर्थान्यपिचेतनात्मस्व
विशिष्टं रूपग्रहणादिविनाशकरणायप्रभवोनभवंति तस्मादेनमवि
नाशिनंविद्धीतिभावः २३ ॥

नन्वदेहनाशेनतदभ्यंतरवर्तिनआत्मनःकुतो **मधुसूदनी टी॰॥** नविनाशोगृहदाहेतदंतर्वर्तिवत्स्यादित्यतआह

शस्त्राण्यस्यादीन्यतितीक्ष्णान्यपि एनंप्रकृतमात्मानंनछिन्द
न्तिअवयवविभागेनद्विधाकर्तुंनशक्नुवंति तथापावकोग्नि
रतिप्रज्वलितोपिनैनंभस्मीकर्तुंशक्नोति नचैनमापोत्यंतवे
गवत्योपिआर्द्रीकरणेनविश्लिष्टावयवंकर्तुंशक्नुवंति मारु
तोवायुरतिप्रबलोपिनैनंनीरसंकर्तुंशक्नोति सर्वनाशकाना
पिप्रकृतेयुद्धसमयेशस्त्रादीनांप्रकृतत्वादवयुत्यानुवादेनोप
न्यासः पृथिव्यप्तेजोवायूनामेवनाशकत्वप्रसिद्धेस्तेषामेवो
पन्यासोनाकाशस्य [illegible]
[illegible] २३ ॥

सदानंदी टी॰॥

ननुदेहविनाशेनकुतोनाशोनचात्मनः गृहदाहेयथादाहस्त
दभ्यंतरवर्तिनः १ तत्रेत्याशंक्याभगवानाहसर्वज्ञईश्वरः शा॰
स्त्राण्यंगविभागेनद्विधाकर्तुंचिदात्मकं २ नशक्नुवंतिवह्निर्नो
भस्मीकर्तुंतमोविभुं नचार्द्रीकरणेनापःशक्नुवंत्येनमांतरं
विश्लिष्टांगकमात्मानंकर्तुंतद्वन्नमारुतः आत्मानंनीरसंक
र्तुंशक्नोतिबलवत्तरः ४ प्रसिद्धानाशकाएतेप्रभवंतिनचात्म
नि च पृथिव्यप्ग्निवायूनांनाशकत्वप्रसिद्धितः ५ तेषामध्या
त्मरोह्यात्मातेविनातेमरुदात्मकः ६ २३ ॥

नीलकंठी टी॰॥

कीदृशोसौदेहीत्यतआह नैनमिति एनंशस्त्राणिनछिन्दं॰
तिनद्वेधाकुर्वन्ति अस्थूलत्वात् तर्हिपार्थिवपरमाणुवत्पा
कजरूपाद्याश्रयोभविष्यतीत्याशंक्याह नैनंदहतिपावक
इतिअवर्णत्वात् आपश्चैनंनक्लेदयंति अस्पर्शत्वात् स्पर्शव
द्धिरवयवमद्भिरार्द्रीकर्तव्यंनतस्पर्शो नशोषयतिमारुतः अस्ने

गी॰ ह्यत्वात् एतेनअदीर्घमस्थूलमनण्वशब्दमस्पर्शमरूपमव्य
टी॰ यं तथाऽरसं नित्यमगंधवच्चयदितिश्रुतिप्रसिद्धानामदीर्घ
द्वि॰ त्वाशब्दत्वादीनामपिसंग्रहोज्ञेयः २३ ॥

165

आनंदी टीका

उक्तरूपस्यात्मनश्चावाप्यमित्यादिनायदपिशस्त्रास्त्रादिकमेतेनाहन
नोपकरणंत्वयासंभावितं तेनापिदेहस्यैवछेदादिनतुजीवस्ये
त्याह पावकेत्यादिनाग्नेयवारुणवायव्यास्त्राणांदाहादेःकार्य
स्योक्तिः २३ ॥

रामकंठी टीका

एनमात्मानंशस्त्राणिखड्गादीनिशरीरमिवनछिंदंति नद्विधा
कुर्वंति नैवचाग्निरेनंनदहति नापःक्लेदयंति नचमारुतःशोष
मुपनयति छेदादिभिर्विक्रियमाणेशरीरे नतस्यनिसर्गनिर्वि
कारस्यविकारसंस्पर्शः [illegible] २३ ॥

लालि की टीका

ननुदेहनाशेतदंतर्वर्तिनआत्मनोपिनाशप्रसंगोगृहदाहेतद
न्तर्वर्तिपुरुषवदित्यतआह नैनमिति २३ ॥

पंचोलीटीका

विनाशहेत्वभावादविनाशीत्याह नैनमिति शस्त्राणिअस्यादीनिएनं
आत्मानंनछिंदंतिनिरवयवत्वात् अवयवविभागंनकुर्वंति तथापाव
कोग्निरपिएनंनदहतिनभस्मीकरोतितथाच आपएनंआत्मानंनक्ले
दयंतिआर्द्रीभावेनतुशीर्णंयंतिअपांहिसावयवस्यवस्तुनआर्द्रीभाव
करणेनावयवविश्लेषायाईनेसामर्थ्यंनतुनिरवयवात्मनितेभवति
मारुतःवायुरपिएनमात्मानंनशोषयतिशुष्कंनकरोति २३

शस्त्राणि एनमात्मानं शरीरवत्नछिन्दन्ति एनं पावको न दहति एनमापो न क्लेदयन्ति विश्लिष्टावयवं न कुर्वन्ति एनं मारुतो न शोषयति निरवयवत्वात् पृथिव्यप्तेजोवायूनामेव नाशकत्वप्रसिद्धेस्तेषामेवोपन्यासो नाशकस्य

रसावीरसमिद्धोधिनी॥

ननुदग्धेवेश्मनितदभ्यंतरवर्तिनांपुरुषाणांदोहयथाभवति एवंदे
हविनाशेतदंतर्वर्तिनोदेहिनोपिविनाशः कुतोनेत्याशंक्यपृथिव्य
प्तेजोवायूनांविनाशकत्वेनप्रसिद्धानामशापकेरितिदेतत्पदर्शनेनो

नरयति नैनमिति शस्त्राणिखड्गादीनि पार्थिवान्यवयवविभाजका
नि एनमात्मानंनच्छिंदंति अवयवविभागेनद्विधाकर्त्तुंनप्रभवंति
तथा पावकोवह्निरेनंनदहति भस्मीकर्त्तुंनभवति तथैनमापो
जलानिनक्लेदयंत्यार्द्रीकरणेननविश्लिष्टावयवंकर्त्तुंप्रकल्पंते
तथातिप्रचंडोपिमारुतोवायुरेनंनशोषयतिनीरसंकर्त्तुंनक्षमते
२३ ॥

मधुभाष्य

नैनमिति वर्त्तमाननिषेधात्स्यादनरवेत्यतआह २३॥

भाषा अनुवाद

२१ श्लोकमें कहा जो आत्माके वधका साधना भाव कौहै निरुपाय अर्थात् किसी प्रकारसे आत्माका वध नही होसकताहै यह देखाय करि अब अविनाशीहै इसको दृढ करते है कि सकल अस्त्र शास्त्र इस आत्माको छेदन नही करि सकते और अग्नि भी इसको दग्ध करनेको समर्थ नही जल इसको आर्द्र कहे गीला नही करि सकता और वायुभी इसको सुखाय नही सकती है क्यो कि यह अवयव रहितहै और इन सबको सामर्थ्य अवयव सहितमें है अर्थात् भौतिक वस्तुमे कहे पंचभूत निर्मित वस्तुमे इनकी सामर्थ्यहै २३

दोहा

यह अछेद अदाहहै अरु अक्लेद अशोष नित्यसर्वगत
स्थाणुहै अचल सनातन तोष २३॥

अछेद्योयमदाह्योय मक्लेद्योशोष्यएवच
नित्यःसर्वगतःस्थाणु रचलोयंसनातनः २४

शांकरभाष्यं टी॰ ॥

यतएवं तस्मात् अछेद्योयमिति यस्मादन्योन्यनाशहेतु
भूतानि एनंआत्मानं नाशयितुंनोत्सहन्ते तस्मात् नित्यो
नित्यत्वात्सर्वगतः सर्वगतत्वात् स्थाणुरित्येतत् स्थिरत्वाद
चलोयमात्माऽतः सनातनश्चिरन्तनो न कारणात् कुत
श्चिन्निष्पन्नोऽभिनव इत्यर्थः न तेषांश्लोकानांपौनरुक्त्यं
चोदनीयं यतःएकेनैव श्लोकेनात्मनोनित्यत्वमविक्रिय
त्वंचोक्तंनजायतेम्रियतेवाइत्यादिना तत्र यदेवात्मविषयंकिं
चिदुच्यते तदेतस्मात् श्लोकार्थान्नातिरिच्यते किंचिच्छब्दतः
पुनरुक्तं किंचिदर्थतइति दुर्बोधत्वादात्मवस्तुनःपुनःपु
नःप्रसंगमापाद्यशब्दान्तरेण तदेववस्तुनिरूपयतिभगवा
न्वासुदेवःकथंनुनामसंसारिणां असंसारित्वबुद्धिगोच
रतामापन्नं सदव्यक्तंतत्त्वं संसारनिवृत्तये स्यादिति किंच
अव्यक्तोयमिति अव्यक्तःसर्वकारणाविषयत्वान्नव्यज्यतेइ
ति अव्यक्तोयमात्मा अतएवाचिन्त्योयं बुद्धीन्द्रियगोचरंवस्तु
तच्चिन्ताविषयत्वमापद्यते अयंत्वात्माऽनिन्द्रियगोचरत्वा
दचिन्त्यःअतएवाविकार्यो यथाक्षीरंदध्यादिनाविकारि न त
था अयमात्मा निरवयवत्वाच्चाविक्रियोनहिनिरवयवंकिं
चिद्विक्रियात्मकं दृष्टमविक्रियत्वादविकार्योयमात्मोच्य
ते २४ ॥

आनंदगिरिकृतटी॰॥

पृथिव्यादिभूतप्रयुक्तच्छेदनाद्यविक्रियाभावेयोग्यताभा
वंकारणमाह यतइति पूर्वार्द्धमुत्तरार्द्धे हेतुत्वेनयोजयति

गी.
टी.
द्वि.

२४
१

188

यस्मादिति नित्यत्वादीनामन्योन्यं हेतुहेतुमद्भावं सूचयति
नित्यत्वादिना नचनित्यत्वं परमाणुष्वव्यभिचारादसाधकं
सर्वगतत्वस्येति वाच्यं तेषामेवाप्रामाणिकत्वेनव्यभिचारा
नवतारान्नचसर्वगतत्वेपिविक्रियाशक्तिमत्वमात्मनोऽस्ती
त्युक्तं विभुत्वेनाभिमतेनभसि तदनुपलंभान्नविक्रियाश
क्तिमत्वेस्थैर्यमास्थातुंशक्यं तथाविधस्य मृदादेरस्थिरत्वद
र्शनादित्याशयेनाह स्थिरत्वादिति स्वतोनित्यत्वेपिकारण
न्नाशसंभवादुत्पत्तिरपि संभवितेति कुतश्चिरंतनत्वमित्या
शंक्याह नकारणादिति आत्मनोऽविक्रियत्वस्यनजायते
म्रियतेवेत्यादिनासाधितत्वात्तस्यैवपुनरभिधानेपुनरुक्ति
रित्याशंक्याह नतेषामिति अनाशंकनीयस्यचोद्यस्यप्रसंगं
दर्शयतियतइति अतोवेदाविनाशिनमित्यादौनशंक्यतेपौ
नरुक्त्यमितिशेषः कथंतत्रपौनरुक्त्याशंकासञ्ज्ञान्मिषति
तत्राह तत्रेति वेदाविनाशिनमित्यादिश्लोकःसमस्यापरा
मृश्यतेश्लोकशब्देन नजायतेम्रियतेवेत्यादिरुच्यते नान्वि
हश्लोके जन्ममरणाद्यभावोभिलप्यते वेदेत्यादौ पुनरप
क्षयाद्यभावोविवक्षते तत्र कथमर्थातिरेकाभावमादाय
पौनरुक्त्यंचोद्यते तत्राह+दुर्बोधत्वादिति पुनःपुनर्विधान
भेदेनवस्तुनिरूपयतोभगवतोभिप्रायमित्याह कथंचि
ति त्वंपदार्थपरिशोधनस्य प्रकृतत्वात्तत्रैवहेत्वन्तरमा
ह किंचेति आत्मनोनित्यत्वादिलक्षणस्य तथैवप्रथाकि
मितिनभवति तत्राह अव्यक्तइति मातर्हिप्रत्यक्षत्वंभूद
नुमेयत्वं तस्यकिंनस्यादित्याशंक्याह अतएवेति तदेवप्र
पंचयति यद्धीति अतींद्रियत्वेपिसामान्यतोदृष्टविषय
त्वं भविष्यतीत्याशंक्य कूटस्थेनात्मना व्याप्तिलिंगाभावान्मै
वमित्याह अविकार्यइति अविकार्यत्वेव्यतिरेकदृष्टान्त।
माह यथेति किंचात्मानविक्रियते निरवयवद्रव्यत्वात् च

किंचिदिति कथंतर्हि पौनरुक्त्यं न चोदनीयमिति मन्यसे तत्राह+

निरवयवत्वाच्चेति

दवदितिव्यतिरेकानुमानमाह निरवयवत्वेपि विक्रियावत्वेका
स्तीति चेन्नाशंक्याह नहीति सावयवस्यैव विक्रियावत्वदर्शनात्
विक्रियावत्वे निरवयवत्वानुपपत्तिरित्यर्थः यद्धि सावयवं स
क्रियं क्षीरादि तद्दध्यादिना विकारमापद्यते नचात्मनः श्रुति
प्रमितनिरवयवत्वस्य सावयवत्वमतोऽविक्रियत्वान्नायं वि
कार्यो भवितुमलमिति फलितमाह अविक्रियत्वादिति २४ ॥

स्वामिकृतटीका ॥

तत्र हेतूनाह अच्छेद्य इत्यादि सार्धेन निरवयत्वात् अच्छेद्योयं
अक्लेद्यश्चामूर्तत्वात् अदाह्यः द्रवत्वाभावाद् शोष्य इति इतश्च
छेदादियोग्यो न भवति यतो नित्यः अविनाशी सर्वत्रगतः स्था
णुः स्थिरस्वभावः रूपांतरापत्तिशून्यः अचलः पूर्वरूपापरित्या
गी सनातनः अनादिः २४ ॥

पिशाचभाष्यं टी० ॥

नि
यत एवं तस्मादमूर्त्तो नाशहेतुभूतान्यात्मानं नाशयितुं नोत्सहं
ते तस्मान्नित्योयं नित्यत्वात्सर्वगतः सर्वगतत्वात्स्थाणुरिव स्था
लत्वात् णुत्वादचलोयं सनातनः चिरंतनः नकारणात्कुतश्चिन्निष्पन्नोऽभि
नव इत्यर्थः कथं तु नाम संसारिणां बुद्धिगोचरतामापन्नं संसा
रनिमित्ताभावादिति पुनः पुनरुच्यते २४ ॥

रामानुजभाष्यं टी० ॥

अतआत्मनित्यं स्थाणुरचलोयं सनातनः स्थिरस्वभावोऽप्रकंप्यः
पुरातनश्च छेदनादियोग्यानि वस्तूनि यैः प्रमाणैस्तैरात्मान व्यन्यं
वाप्यत इत्यव्यक्तः अतश्छेद्यादिविसजातीयः २४ ॥

अभिनवगुप्तकृतटी० ॥

नच देहांतरगमनमस्य पूर्वदेहांतरे गच्छति तेन समवस्थ
[illegible] २५ ॥ पूर्वश्लोकटीकया गतार्थत्वात्पृथङ्नास्ति टीका

परमार्थप्रपा टी० ॥

अच्छेद्य इति निरवयवत्वादमूर्तत्वाद्द्रवत्वात्तथाविधो न भव

इत्या

गी. निच्छेद्यत्वादि देहगतमात्मन्यारोप्यते ह तदुक्तं अयःपिंडग
टी. तेवह्नौ लोहाकारस्ताडनं आरोप्यते तथा लोहे दाहकत्वादि
टि. वह्निजमिति आरोपितमेवास्तीत्याह नित्य इत्यादि नित्योऽवि
नाशी सर्वगतोऽपरिच्छिन्नः स्थाणुः स्थिरस्वभावः रूपांतरशून्यः
अचलः पूर्वरूपापरित्यागी सनातनः अनादिः ॥ २४ ॥

वनमाली टीका ॥

शस्त्राद्यनाश्यत्वमुपपादयति अच्छेद्य इति निरवयवत्वादच्छेद्यः अत एवादाह्यः अमूर्तत्वान्निरवयवत्वाच्चाक्लेद्यः अद्रवत्वादशोष्यः सर्वेषु देशेषु कालेषु जातत्वमस्तु अस्य वस्थाह नित्यं निरंतरं गच्छतीति नित्यः सर्वगतः नित्यत्वसर्वगतत्वयोः पृथगविशेषणत्वे तयोः पूर्वमुक्तत्वात्पुनरुक्तिः स्यात् स्थाणुः कूटस्थो निर्विकारः अचलो बाल्याद्यवस्थाशून्यः सनातनः सर्वविकारात्प्रागेवैकाकारेण विद्यमानः २४ ॥

अहमवैजयन्ती टी. ॥

ननु तितीव्रशस्त्रानलादयः कुतो नैनं विनाशयंतीत्यपेक्षायां हेतुमाह अच्छेद्योऽयमिति एवकारोऽवधारणार्थकस्तेनान्ययोगो व्यवच्छिद्यते च शब्दः समुच्चयार्थकः यस्मादयमात्माऽच्छेद्य एव छेदनानर्ह एव भवति तस्माच्छस्त्राण्येनं न छिन्दंति यस्माच्चायमदाह्य एव दहनानर्ह एव तस्मादेनं पावको न दहति यस्माच्चायमक्लेद्य एव क्लेदनानर्ह एव तस्मादेनमापो न क्लेदयन्ति यस्माच्चायमशोष्य एव शोषणानर्ह एव तस्मादेनं मारुतो न शोषयति नन्वस्याच्छेद्यत्वादय एव कुत इत्यपेक्षायां क्रमेण चत्वारि हेतुगर्भितविशेषणान्याह यतो नित्यः सर्वकालैकरूपः अतोऽच्छेद्यः सर्वगतः सर्वेषु गन्धादिपदार्थेषु गतः प्राप्तः यतस्तेभ्योऽधिकतरोऽतिसूक्ष्मरूपोऽयमतस्तदंतर्वर्त्यपि तैर्न विक्रियते अतोऽदाह्यः ननु सर्वत्र स्थितिः किंविधरूपकोऽयमित्याशंकायामाह स्थाणुरिति तिष्ठतीति स्थः

यँ

ग०

१६९

(८)

स्यश्चासावणुः स्थाणुः स्थिरस्वभावोऽणुपरिमाणक इत्यर्थः
स्थाणुत्वादयमक्लेद्यः यः पदार्थोऽणुकायवदवयवान्स एव जल
संयोगेन शिथिलीभावं प्राप्नोति अयं त्वस्थिराणुरूपकत्वेन नि
रवयवस्तस्मादक्लेद्यः इत्यनेनात्मा विभुरिति शंकादूरतो नि
रस्ता आत्मनः उपाधिकृतमणुत्वं वारयन्नशोष्यत्वे हेतुमाह
अचल इति स्वस्वरूपगुणादिभ्यो न चलतीत्यचलः यः पदा
र्थो निजस्वरूपादिकं त्यक्त्वा रूपान्तरं गच्छति स एव वातेन शो
ष्यो भवति अयं त्वबंधमोक्षावस्थास्वपि कदाचिदपि स्वा
भाविकाणुरूपं त्यक्त्वा नित्यत्वादीन्गुणांश्चोत्पजन्नेवास्थितस्त
स्मादचलत्वान्मारुतेन न शोष्यः औपाधिकाणुत्वादेतद्बुद्धे
र्गुणेनात्मगुणेन चैव ह्याराग्रमात्रः ह्यवरोऽपि दृष्टः अणुरेष
आत्मा चेतसा वेदितव्यः बालाग्रशतभागस्य शतधा कल्पित
स्य च भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते इत्यादीना
मात्मनः स्वाभाविकाणुरूपकत्वप्रतिपादनपराणां श्रुती
नां विरोधस्तस्मादयं पक्षो दूरतोऽनादरणीयः यस्मादेवं तस्मा
त्सनातनः पुरातनः २४ ॥

+ शस्त्रादीनां तन्नाशकत्वाऽसमर्थत्वे तस्य तत्र मधुसूदनी टीका ॥ नित नाशन हेत्वे हेतुमाह +

+ यतोऽच्छेद्योऽयं अतो नैनं छिन्दन्ति शस्त्राणि यदादाह्योऽयं यतोऽतो
नैनं दहति पावकः यतोऽक्लेद्योऽयं अतो नैनं क्लेदयन्त्यापः यतोऽ
शोष्योऽयमतो नैनं शोषयति मारुत इति क्रमेण योजनीयं एव
कारः प्रत्येकं संबध्यमानोऽच्छेद्यत्वाद्यवधारणार्थः वः समुच्चये
हेतौ वाऽच्छेदाद्यनर्हत्वे हेतुमाहोत्तरार्धेन नित्योऽयं पूर्वापरको
टिरहितोऽतोऽनुत्पाद्यः असर्वगतत्वे ह्यनित्यत्वं स्याद्घटादिका
लोके र्येत्वविभागैरिति न्यायात् पराभ्युपगतपरमाणुवादीनामनभ्यु
पगमात् अयं सर्वगतो विभुरतो नित्य एव एतेन प्राप्यत्वं परा
कृतं यदि वायं विकारी स्यात्तदा सर्वगतो न स्यादयं तु स्थाणु
रविकारी अतः सर्वगत एव एतेन विकार्यत्वमपाकृतं यदि

गी॰
टी॰
द्वि॰
देवंतस्मा

चायंचलः क्रियावान्स्यात्तदा विकारी स्यात् घटादिवत् अयंत
चलोऽतो न विकारी एतेन संस्कार्यत्वं निराकृतं पूर्वावस्थापरि
त्यागेनावस्थांतरापत्तिर्विक्रिया अवस्थैकोऽपि चलनमात्रं
क्रियेति विशेषः यस्मात्सनातनोऽयं सर्वदैकरूपः नकस्या
अपि क्रियायाः कर्मेत्यर्थः उत्पत्तिविकृतिसंस्कृत्याप्तनरूक्रि
याफलयोगो हि कर्मत्वं स्यात् अयं तु नित्यत्वान्नोत्पाद्यः अ
नित्यस्यैव घटादेरुत्पाद्यत्वात् सर्वगतत्वान्न प्राप्यः परिच्छि
न्नस्यैव पयआदेः प्राप्यत्वात् स्थाणुत्वादविकार्यः विक्रियाव
तो घटादेरेव विकार्यत्वात् अचलत्वादसंस्कार्यः सक्रियस्यै
व दर्पणादेः संस्कार्यत्वात् तथाच श्रुतयः आकाशवत्सर्व
गतश्च नित्यः वृक्षइव स्तब्धो दिवि तिष्ठत्येकः निष्कलं नि
ष्क्रियं शांतमित्यादयः यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यो
ऽप्सु तिष्ठन्नद्भ्योंतरो यस्तेजसि तिष्ठंस्तेजसोंतरो यो वायौ तिष्ठ
न्वायोरंतर इत्याद्याः श्रुतयः सर्वगतस्य सर्वांतर्यामितया त
दविषयत्वं दर्शयंति यो हि शस्त्रादौ न तिष्ठति तं शस्त्रादयः
छिंदंति अयं तु शस्त्रादीनां सत्तास्फूर्तिप्रदत्वेन तत्रापि व
र्तमानोंतर्यामी अतः कथमेनं शस्त्रादीनि स्वव्यापारविषयी
कुर्युरित्यभिप्रायः अत्र येन सूर्यस्तपति तेजसेद्ध इत्यादि श्रु
तयोऽत्रानुसंधेयाः सप्तमाध्याये च प्रकटीकरिष्यति श्रीभगवा
निति दिक् । [illegible]
[illegible] २४ ॥

सदानंदी टीका ॥

शस्त्रादेरात्मनो नाशसामर्थ्ये हेतवोऽप्यमी अच्छेद्यत्वादयस्ते
न नित्यश्चात्मांतरोऽव्ययः १ अन्योन्यनाशकान्येवंभूतान्यात्मा
नमंतरे नोत्सहंते यतोहं तन्नाशशंकामतस्त्यज २ नित्यत्वा
त्सर्वगो व्यापी व्यापित्वात्स्थाणुवत्स्थिरः स्थिरत्वाच्चाक्रियासू
न्पलस्मादात्मा चिरंतनः ३ नित्यत्वाच्चायमनुत्पाद्यो न प्राप्यः।

१७०

सर्वगोयतः स्थाणुत्वादविकार्योयमसंस्कार्योचलत्वतः ४
संस्कारस्तुगुणाधानेदोषापनयनेनवा निर्गुणेनगुणाधा
नेस्वतःशुद्धेनचापरः ५ सत्तास्फूर्तिप्रदानात्तिशस्त्रादीना
मयंयतः येनतयामितयाशास्ताकथमेनमिमानिच ६ श
स्त्रादीनिप्रकुर्युस्तत्सत्वाप्यपरैकगोचरं १ २४ ॥

नीलकंठी टी० ॥ ९

कुतोहेतोरस्यशस्त्रादीनिच्छेदादीनकुर्वंतीत्याशंक्यतस्य
च्छेदाद्ययोग्यत्वादित्याह अच्छेद्योयमिति अच्छेद्यत्वादे
पूर्वोक्तान्येवअस्थूलत्वादीनिकारणानिज्ञेयानि एवमच्छे
द्यत्वादिनास्थूलादीनभावरूपान्गुणानुक्त्वाभावरूपान
पिगुणानाह नित्यइति सर्वैर्विशेषणैरखंडैकरसस्यैवव
स्तुनोलक्ष्यत्वात् नित्यत्वादिभिरुत्पाद्यत्वादिकंनिराक्रि
यते यतोनित्यःअतोघटवदनुत्पाद्यः यतःसर्वगतःअतो
ग्रामवदप्राप्यः यतःस्थाणुःपूर्वरूपापरित्यागेनास्थिरस्व
भावःअतःक्षीरादिवदविकार्यःअचलःयथादर्पणःस्वतः
स्वाच्छ्योप्यच्छोपिमलरूपेणावरणेनस्वाच्छ्यात्प्रच्याव्य
ते एवंस्वयंस्थाणुरप्यन्यसंयोगात्स्वाच्छ्यमश्नुवीतसच
दोषापकर्षणलक्षणंसंस्कारमपेक्षेत अयंत्वचलत्वान्न
तथा एवंचउत्पत्त्याप्तिविकृतिसंस्कृतिरूपंचतुर्विधंक्रिया
फलमात्मनिनसंभवतीत्युक्तं तत्रहेतुः सनातनइतिसना
तनत्वायैनेरंतर्यं तच्चदेशतःकालतोवस्तुतश्चपरिच्छेदरा
हित्ये परमेतेपरमात्मनोकालतःपरिच्छेदाभावेपिदेश
तःपरिच्छेदोस्ति आकाशस्यतदुभयाभावेपिवस्तुतःपरि
च्छेदोस्ति सोपित्रिविधःसजातीयविजातीयस्वगतभेदरू
पः यथा वृक्षस्यस्वगतोभेदःपत्रपुष्पफलादितः वृक्षा
न्तरात्सजातीयोविजातीयःशिलादितः ततश्चसनातनेनै
रंतर्येणत्रिविधपरिच्छेदराहित्यंनभवति अतोतिसनातनो
खंडैकरसोयस्मात्तस्मात्त्रोत्पाद्याश्रयइत्यर्थः २४ ॥

त्व

गी॰
टी॰
हि॰

171

आनंदी टीका

एतदेवविगमयति यस्मादछेद्योयंनिरवयवस्यावयवविभागेनसंभवत्यतोनैनंछिन्दन्तीत्यादिपूर्वश्लोकेनास्यार्थस्य संबन्धः नित्यःपूर्वापरकोटिरहितोनएवसर्वगतःस्थाणुः स्थाणुरिवनिर्विकारः अचलःस्वभावादप्रच्युतःसनातनश्चिरकालीनःकारणहीनः २४ ॥

रामकंदी टीका

तथाहि— अयमात्माछेदादिक्रियाविकार्योनभवति पूर्वोक्तस्यैवनिर्वचनमेतत् तथानित्यइत्यादीनि विशेषणान्यविनाशित्वार्थानिपरस्परसहायभूतानिप्रतिपत्तिदार्ढ्यायबहूनिप्रयुक्तानिवेदितव्यानि [illegible] २४ ॥

लासिकी टीका

१ अछेद्योयमछेद्यस्मामूर्तत्वाददाह्यश्च इवताभावादशोष्य इतिभावः कुतश्छिद्रादि योग्यो न भवति यतो नित्योविनाशी सर्वत्र गतः स्थिरस्वभावाद्रूपान्तरपतितमूर्त्यः अचलः पूर्वरूपापरित्यागी सनातनोनादिः

तत्रहेतुमाह निरवयवत्वात् छेदादियोग्योऽतस्तामाह नासमवतामाकाशवत्सिद्धत्वेनामेवोपपन्नासौनाकाशस्य नित्यइत्यादीनिपकार्थान्यपिबहूनिविशेषणानिप्रतिपत्तिदार्ढ्याय भगवतासहोक्तानि २४ ॥

पंचोलीटीका

अविनाशिहेतुत्वाभावेसाधितेसिद्धमविनाशित्वमत्रवदति अछेद्योयमिति अयमात्माअछेद्यःछेत्तुमशक्यः अयमात्माऽदाह्यःदग्धुमशक्यः अक्लेद्यःआर्द्रभावेनशीर्णयितुमशक्यः चपुनः अशोष्यःशोषयितुमशक्यः नित्यःअविनाशीसर्वगःसर्वव्यापी स्थाणुःस्थिरःचलनरहितःचिरंतनः २४

रणवीरसमिद्धोधिनी॥

ननुकथंनघटादीनामेतत्कर्मकछेदादेःप्राप्तिरित्यत्रहेतुमाहछेद्यइति चपुनःहेतोयस्मादयमात्माछेदयनहेएवतस्माछस्त्रादीनिमैनंछेदादिप्रतियोगिनंसंपादयितुंप्रभवंतीतियोज

ना तत्रापि हेतुमाह नित्य इत्याद्यर्धेन उत्पत्तिप्राप्तिविकृतिसंस्कृत्य
न्यतमक्रियाफलयोगप्रतियोगि कर्मेति सिद्धान्तः न चायं तादृशा॰
क्रियाफलभागिति नास्य छेदादिक्रियायाः कर्मतोचितेति तथाहि
यतोऽयं नित्यः पूर्वापरकोटिरहितः अतो घटादिवन्नोत्पाद्यः यतः
सर्वगतो विभुरिति नित्यत्वे हेतुकथनं ततश्च न प्राप्यः अवछि
न्नस्येव जलादेः प्राप्तिविषयत्वात् यतश्चायं स्थाणुरविकारीति स
र्वगतत्वे हेतुः न तत्पयवद्दुग्धादिवन्न विकार्यः यतश्चायमचलो घटा
दिवत्क्रियावान् नित्य स्थाणुत्वे हेतुः न तस्य दर्पणादिवन्न संस्कार्यः
यस्मादेवं तस्मात् सनातनोऽयं सर्वदैकस्वरूप इति भावः २४ ॥

मधुभाष्य

अच्छेद्य इति वर्तमानदर्शनाद्युक्तमयोग्यत्वमिति सूचयति
वर्तमानापदेशेन कृतो योग्यता नित्यसर्वगतादिविशेषणे
स्वरस्वरूपत्वात् शाश्वत इति एकरूपत्वमात्रमुक्तं स्थाणुश
ब्देन नैमित्तिकमन्यथात्वं निवारयति नित्यत्वसर्वगतत्ववि
शेषणे अन्यथा पुनरुक्तेः एकोक्तावप्युक्तविशेषणोपा
दानान्नेश्वरैकेऽपुनरुक्तिः युक्ताश्चाविरुद्धधर्माः प्रतिबिंबेऽ
विरोधे तत्र च रूपं रूपे प्रतिरूपो बभूव आभास एव चेत्यादि
श्रुतिस्मृतिसिद्धा न चांशत्वविरोधः तस्यैवांशत्वात् न चैक
रूपत्वाशता प्रमाणं चोभयविधवचनमेव न चांशस्य प्र॰
तिबिम्बत्वं कल्प्यम् गाथ्यादिष्वंशावतारूप्यादृष्टेरितरथा
दृष्टेः स्थाणुत्वेप्येवं तेत्याद्यविरुद्धमीश्वरस्य उभयविध॰
वाक्याद चिंत्यशक्तेश्च न च मायैकं तथीश्वरे ब्रह्मणि नो
विरुध्यते नयोगित्वादीश्वरत्वात् चिंतनचैतत्त्वायिकार्य॰
कारण इत्याद्येश्वर्येणैव विरुद्धधर्माविरोधोक्तेः महाना

सर्वाच्च मोक्षोहिमहापुरुषार्थः तत्रापिमोक्षएवार्थः अंतेषुरेमि
रेधीरानतेमध्येषुरेमिरे अंतप्राप्तिंसुखंप्राहुर्दुःखमंतरमंतयोः
पुण्यचितोलोकक्षीयतइत्यादिश्रुतिस्मृतिभ्यः सचविष्णुप्रसा
दादेवसिध्यति वासुदेवमनाराध्यकोमोक्षंसमवाप्नुयात् तु
ष्टेत्वयिकिमलभ्यमनंतआद्ये त्वत्प्रसादादवाप्नोतिपरांसिद्धिंन
संशयः एषांसएवभगवान्दययेदनंतः सर्वात्मनाश्रितप
दोयदिनिर्व्यलीकं तेवैविदंत्यतितरंतिचदेवमायांनैषांममा
हमितिधीःश्वशृगालभक्ष्ये तस्मिन्प्रसन्नेकिमिहास्त्यलभ्यंध
र्मार्थकाममलमल्पकाले ऋतेयदस्मिन्भवईशजीवास्तापत्र
येणोपहतामशर्म आत्मंल्लभंते ऋतेभवत्प्रसादाद्धिकस्य
मोक्षोभवेदिह तमेवविदित्वेत्यादिश्रुतिस्मृतिभ्यः सर्वोत्कर्ष
ज्ञानादेवभवति लोकप्रसिद्धेः लोकसिद्धमविरुद्धमंगी
कार्यं अदत्वानारदायापिदोषहृतोपितेनबहुतरोलेप
आसीदित्युत्कर्षमेवव्यक्ति बहुनरकफलोप्यसौ तस्यनलो
मवद्दीयतइतिश्रुत्यंतराच्च योमामेवमसंमूढोजानातिपु
रुषोत्तममितितदुक्तेश्च सत्यंसत्यंपुनःसत्यंप्रोक्तंतत्रापिको
टिभिः विष्णुमाहात्म्यलेशस्याविभक्तस्यचकोटिधा पुनस्ता
नंतथातस्यपुनस्तस्यापिसन्नतथा नैकांशसममाहात्म्याःश्री
शेषब्रह्मपिनाकिनः इतिनारदीये अन्योत्कर्षयेकंच तथैवसर्वशा
स्त्रेषुमहाभारतमुत्तमं कोह्यन्यःपुंडरीकाक्षान्महाभारतकृ
द्भवेदित्यादि ग्रंथांतरप्रसिद्धोत्कर्षमहाभारतविरुद्धं नचहि
नास्तिनारायणसमंनभूतंनभविष्यति एतेनसत्यवाक्येन
सर्वार्थान्साधयाम्यहं यस्यप्रसादजोब्रह्मारुद्रश्चक्रोधसंभ
वः २४॥

भाषा अनुवाद

इसका कारण यह कि आत्मा अस्त्र सस्त्रसे छिन्न भिन्न किं
वा आगसे दग्ध और जलसे आर्द्र और वायुसे सूखभी नहीं
सकताहै इसीसे आत्मा नित्य और अविनाशी तथा सर्वत्र
विद्यमानहै और स्थिर स्वभाव अचल अनादिहै २४ ॥

दोहा

पाहन छेदत जादिकी अग्नि नदहको दाह जलनदिर
सको भिज सकें वायुनशोषें जाह २४॥

अव्यक्तोयमचिंत्योय मः विकार्योयमुच्यते
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५

शांकरभाष्यं टी॰ ॥

तस्मादेवं यथोक्तप्रकारेणैनमात्मानं विदित्वा त्वं नानुशो
चितुमर्हसि हन्ताहमेषां मयैते हन्यन्तेइति २५ ॥

आनंदगिरिकृत टी॰ ॥

आत्मयाथात्म्योपदेशमशोच्यानन्वशोचस्त्वमित्युपक्रम्य व्या
ख्यातमुपसंहरति तस्मादिति अव्यक्तत्वाचिन्त्यत्वाविकार्य
त्वनित्यत्वसर्वगतत्वादिरूपो यस्मादात्मा निर्द्धारितस्तस्मात
थैव ज्ञातुमुचितस्तत्ज्ञानस्य फलवत्वादित्यर्थः प्रतिषि
द्धमनुशोकमेवाभिनयति हन्ताहमिति २५ ॥

स्वामिकृत टीका ॥

किंच अव्यक्तइति अव्यक्तश्चक्षुराद्यविषयः अचिंत्यो मनसोप्य
विषयः अविकार्यः कर्मेंद्रियाणामप्यगोचरइत्यर्थः उच्यतइ
ति नित्यत्वादावभियुक्तोक्तिं प्रमाणयति उपसंहरति तस्मादि
ति २५ ॥

पिशाचभाष्य टी॰ ।

किंच अव्यक्तोयमिति सर्वेंद्रियाणा विषयत्वान्नव्यज्यतइत्यव्य
क्तः अव्यक्तोयमात्मा अतएवाचिंत्योयं यइंद्रियगोचरः स विष
यत्वमापद्यते अयंत्वात्मा निरिंद्रियगोचरत्वादचिंत्यो ऽविका
दि॰ र्योयं यथा दध्यातुंचनादिना न तथात्मा निरवयवत्वादविक्रि
यः न हि निरवयवत्वे विक्रियात्मकत्वं च दृष्टमविक्रियत्वा
दविकार्योयमात्मोच्यते तस्मादेवं यथोक्तप्रकारमेनमात्मा
नं विदित्वा नानुशोचितुमर्हसि हंताहमेषां मयैमे हन्यंत
इति २५ ॥ रामानुजभाष्यं टी॰

अचिन्त्यश्च सर्ववस्तुसजातीयत्वेनेतरस्वभावयुक्ततयाचिं

नचिंतयितुमपिनार्हः अतस्त्वाविकार्यःविकारानर्हः तस्मादुक्त
लक्षणमेनमात्मानंविदित्वा तत्कृतेनानुशोचितुमर्हसि २५

अभिनवगुप्तकृत टी॰ ॥

देहस्यलक्षणमात्रमप्यनवस्थायित्वात् एवंभूतंविदित्वैनमा
त्मानंशोचितुंनार्हसि २५ ॥

परमार्थप्रपा टी॰ ॥

अथदेहात्मनोःसाहचर्यदर्शनादेहेनसहजन्ममरणसंभा
वनापिशोकोनकार्यइत्याह) एवंभूतस्यत्वकथंनानुभूयत
इत्याह अव्यक्तइति चक्षुराद्यविषयः मनसाज्ञातव्यइतिचेद
चिंत्यः अतएवदेहादिभिरविकार्यः विकारंनप्राप्यते अथो
पसंहरति तस्मादिति तस्मात्कारणादेवमनुनाप्रकारेण
निरूपितमेनमात्मानंविदित्वा अनुशोचितुंनार्हसि २५

वनमाली टी॰ ॥

अच्छेद्यत्वादौहेतुमाह अव्यक्तोयमिति छेद्यानिवस्तूनियैः
प्रमाणैर्व्यज्यंतेतैरात्मानव्यज्यतइत्यव्यक्तः अतःछेद्यादिवि
लक्षणःअचिंत्यःसर्ववस्तुविलक्षणस्वभावत्वेनतत्स्वभाव
प्रकारतयाचिंतयितुमपिनार्हः अतएवाविकार्यःविकारा
नर्हः तस्मादुक्तलक्षणमेतमात्मानंविदित्वाशोचितुं
नार्हसि २५ ॥

उत्तमवैजयन्ती टी॰ ॥

किंच अव्यक्तोयमिति अव्यक्तः चक्षुरादीन्द्रिये
र्नव्यज्यतइत्यव्यक्तः पंचज्ञानेंद्रियागोचरोऽयम् अथच अ
चिंत्यः चिंतनाविषयोऽयंसर्ववस्तुविलक्षणत्वादितरव
स्तुवच्चिंतयितुमयोग्यइत्यर्थः अतोयमविकार्यःकर्मेंद्रि
यैर्विकारायोग्यः पदत्रयेनास्यबाह्यान्तःकरणाविषयत्वाद
पिच्छेदनादेरभावत्वंसूचितम् उपसंहरति यस्माच्छ्रुतिभि
रच्छेद्यत्वादिगुणविशिष्टोयमात्मेत्युच्यते तस्मादेवमुक्तल

त्वेनैनमात्मानंविदित्वाचेतनाचेतनवस्तुमात्रेणाप्यव
ध्यमितिज्ञात्वातदर्थंशोचितुंस्वजनंहिकथंहत्वासुखिनः
स्यामसाधवेत्यादिरूपंशोकंकर्तुंत्वंनार्हसियोग्योनभ
वसि २५ ॥

+छेद्यत्वादिग्राहकप्रमाणाभावा मधुसूदनी टी० ॥ इतितदभावमुत्वाह अव्यक्तोयमित्यर्धेन+

+योहींद्रियगोचरोभवतिसप्रत्यक्षत्वाद्व्यक्तइत्युच्यते अयंतुरू टू
पादिहीनत्वान्नतथातोनप्रत्यक्षेणछेद्यत्वादिग्राहकमित्य
र्थः प्रत्यक्षाभावेप्यनुमानंस्यादित्यतआह अचिंत्योयंचिंत्यो
नुमेयस्तल्लिंगलक्षणेयं क्वचिद्व्याप्तोहिवह्न्यादिर्गृहीतव्या
प्तिकस्यधूमादेर्दर्शनात् क्वचिदनुमेयोभवति अप्रत्यक्षेत्व
व्याप्तिग्रहणासंभवान्नानुमेयत्वमितिभावः अप्रत्यक्षस्या
पींद्रियादेःसामान्यतोदृष्टानुमानविषयत्वंदृष्टमतआह
अविकार्योयंयथाहिक्रियावदिंद्रियादिकंनतथास्वकार्यान्यथा
नुपपत्त्याकल्प्यमानमर्थापत्तेःसामान्यतोदृष्टानुमानस्य
चविषयोभवति अयंतुनविकार्योनविक्रियावानतोनार्था
पत्तेःसामान्यतोदृष्टस्यवाविषयइत्यर्थः लौकिकशब्दस्या
पिप्रत्यक्षादिपूर्वकत्वात्तन्निषेधेनैवनिषेधः नतुवेदेनैवत
त्रछेद्यत्वादिग्रहीष्यतइत्यतआहउच्यते वेदेनसोपकर
णेनअच्छेद्याव्यक्तादिरूपएवायमुच्यतेतात्पर्येणप्रति
पाद्यते अतोनवेदस्यतत्प्रतिपादकस्यापिछेद्यत्वादिप्रति
पादकमित्यर्थः अत्रैनंछिंदंतीत्यत्रशस्त्रादीनांतन्नाश
कसामर्थ्याभावउक्तः अच्छेद्योयमित्यादौतस्यछेदादिक
र्मत्वायोग्यत्वमुक्तं अव्यक्तोयमित्यत्रतच्छेदादिग्राहकमा
नाभावउक्तइत्यपौनरुक्त्यंद्रष्टव्यं वेदाविनाशिनमित्या
दीनांश्लोकानामर्थतःशब्दतश्चपौनरुक्त्यंभाष्यकृद्भिः
परिहृतंदुर्बोधत्वादात्मवस्तुनःपुनःपुनःप्रसंगमापाद्या
पाद्यशब्दांतरेणतदेववस्तुनिरूपयतिभगवान्वासुदेवः
कथंतुनामसंसारिणांबुद्धिगोचरमापन्नंतत्त्वंसंसारनि

गी. हन्तव्ये स्यादिति वदद्भिः एवं पूर्वोक्तयुक्तिभिरात्मनो नित्यत्वे
टी. निर्विकारत्वे च सिद्धे न त्वं शोकेनोपपन्न इत्युपसंहरति तस्मा
द्वि. दित्यर्धेन एतादृशात्मस्वरूपावेदनस्य शोककारणनिवर्त
कत्वात्तस्मिन्सति शोकानौचितः कारणाभावे कार्याभावस्या स्या
वश्यकत्वात् तेनात्मानमविदित्वा यदन्वशोचस्तद्युक्तमेव
आत्मानं विदित्वा तु नानुशोचितुमर्हसीत्यभिप्रायः एवमा
त्मनो निर्विकारत्वेनाऽशोच्यत्वमुक्तमिदानीं तु विकारवत्त्व
पे मभ्युपेत्यापि शोकद्वयेनाशोच्यत्वं प्रतिपादयति भगवान् तत्रा
त्मा तावत्स्वरूपः प्रतिक्षणविनाशीति सौगताः देह एवात्मा
स चास्थिरोऽपि तु क्षणपरिणामी जायते नश्यति चेति प्रत्यक्ष
सिद्धमेवैतदिति लोकायतिकाः देहातिरिक्तोऽपि देहेन सहै
व जायते नश्यति चेत्यन्ये सर्गाद्यकाल एवाकाशवज्जायते
देहभेदेऽपि तु वर्तमान एवाकल्पस्थायी नश्यति प्रलय इत्य
परे नित्य एवात्मा जायते म्रियते चेति तार्किकाः तथा हि प्रे
त्यभावो जन्म स चापूर्वदेहेन्द्रियादिसंबंधः एवं मरणमपि
पूर्वदेहेन्द्रियादिसंबंधः एवं मरणमपि पूर्वदेहेन्द्रियादिवि
च्छेदः इयं चोभयं धर्माधर्मनिमित्तत्वात्तदाधारस्य नित्यस्यैव
युक्तं अनित्यस्य तु कृतहान्यकृताभ्यागमप्रसंगेन धर्माध
र्माधारत्वानुपपत्तेर्न जन्ममरणे श्रुत्येइतिवदंति नित्यस्या
पृ प्यात्मनः कर्णशष्कुलीजन्मनाशाकाशस्येव देहजन्मना ज
न्मतन्नाशात्तु मरणं तदुभयमौपाधिकमशुद्धमेवेत्यन्ये
तत्राऽनित्यत्वपक्षेऽपि शोच्यत्वमात्मनो निषेधयति २५ ॥ नि

सदानंदी टी. ॥

मानातीतं यतो ब्रह्म वस्तु द्वैतं धमद्वयं तस्मात्प्रसंगमापा
द्यत देवाह पुनः पुनः १ कथं नु नाम जीवानां मग्नानां शो
कसागरे बुद्धिगोचरतापन्नं तत्त्वं बंधाद्विमुक्तये २ स्पष्टे
वे भगवान्सोयं कृपालुर्बत नन्दजः पौनःपुन्यमतोनेषा
स्मोकानां शाहताथेतः ३ इंद्रियैर्व्यज्यते स्थूलदेहादिर्व्यक्त

उच्यते आत्मारूपादिहीनत्वान्नायंप्रत्यक्षगोचरः ४ प्रत्य
क्षेणगृहीतोर्थोनुमेयःस्यात्सैवक्वचित् नाप्रत्यक्षेनुमेय
त्वमचिंत्यतींद्रियभेवत् ५ रूपादिमानकार्येणचिंताहों
लिंगदेहकः चक्षुरादिसमूहात्मातद्भिन्नोयमिहाथवा ६
नवासामान्यतोदृष्टानुमानविषयोप्ययं निर्धर्मकतयावा
चामगोचरतयातथा ७ यद्विक्रियावदन्यादितदर्थापत्ति
गोचरः अयंतुविक्रियाशून्योनार्थापत्यादिगोचरः ८ वे
देनापिसह्यात्मायमव्यक्तादिस्वरूपतः प्रतिपादितश्चाबो
धेतात्पर्येणनशक्तितः ९ विकारंस्थूलसूक्ष्माख्यंकार्य
भावादवस्थितं अर्हतीतिविकार्यंवात्वज्ञानेत्रिगुणात्मके १०
कारणाख्यशरीरेयत्तत्रोसाक्षिकगोचरः तदन्यःप्रत्यगा
त्मायमविकार्यउदाहृतः ११ एवंदेहत्रयादन्यमात्मानंस
र्वसाक्षिणं ज्ञात्वानैवंमहाबाशोकंकर्तुमर्हसिबोधवान् १२ । २५

नीलकंठी टीका ॥

एवंज्ञेयंवस्तूक्तंतच्चतत्राध्यस्तदेहत्रयनिरासेनैवपरोक्षीक
र्तव्यमित्याह अव्यक्तोयमिति व्यक्तंस्थूलशरीरंप्रत्यक्षगम्यंत
तोन्यो यंप्रत्यगात्मा तथाअचिंत्योयंचिंत्यंचिंतायोग्यंरूपा
दिप्रकाशकार्येणानुमेयंचक्षुरादिसमुदायात्मकंलिंगश
रीरमप्रत्यक्षंततोप्यन्योयं तथाअविकार्योयंविकारंस्थूल
सूक्ष्मकार्यभावेनावस्थानमर्हतीतिविकार्यंत्रिगुणात्मकं
मूलाज्ञानंकारणशरीरंसुषुप्तौस्थितस्यनकिंचिदवेदिषमि
तिपरामर्शदर्शनादहंनजानामीत्यनुभवाच्चसाक्षिकग
म्यंततोप्यन्योयं उच्यतेअव्यक्तादिनिषेधमुखेननतुशृंगग्रा
हिकयाऽयमेवंविधइतिविधिमुखेनोच्यते यस्मादेवमयमु
च्यते तस्मादेनंविदित्वानानुशोचितुमर्हसि तरतिशोक
मात्मविदितिश्रुतेरात्मविद्भूत्वाबंधुवियोगजंशोकंमाका
र्षीरित्यर्थः उक्तंचात्मनोवस्थात्रयातीतत्वं स्वप्ननिद्रायुता

गी॰
टी॰
हिं॰

२५
२

176

वायोश्चात्तस्य समनिद्रया ननिद्रानैव चस्य मेन्तर्ये पश्यंपति निश्चिताइति २५ ॥

आनंदी टीका

अव्यक्तः कस्यापीन्द्रियस्यागोचरः अतएवाचिंत्यो बुद्धेरप्यगोचरः अविकार्यः केनापिप्रकारेणविकारेनेतुमशक्यः २५

रामकंटी टीका

शब्दादिव्यक्तार्थविषयाणांश्रोत्रादीनामिंद्रियाणामविषयभूतत्वादयमव्यक्तइत्युच्यते तथावेदकैकस्वभावत्वादंतःकरणेनापीदंतया विषयीकर्तुमशक्यइत्यचिंत्यश्चिंतनक्रियाया अगोचरः तथासर्वदाचैतन्यमात्रातिरिक्तधर्मांतरासंस्पर्शादविकार्योविक्रियांनेतुमशक्यः तस्मादेवमुक्तेनप्रकारेण सर्वतः सर्वेन्द्रियगोचरादर्थादत्यंतव्यतिरिक्तंवेदकत्वेन सर्वार्थव्यापकमेनमात्मानंबुद्ध्वाशरीरविनाशेनैतद्विनाशभ्रमेणैनमनुशोचितुमर्हसि [illegible] णेत्यादिनाग्रंथेनवितत्यप्रतिपादि [illegible] २५ ॥

लालिकी टीका

तदेवमात्मनोजन्मविनाशाभावात्शोकोनकार्य इत्युक्तम् सर्वेन्द्रियाणामप्यगोचरः उच्यते इति नित्यत्वादावभियुक्तोक्तिंप्रमाणयति २५ ॥

पंचोलीटीका

यस्मादयमात्माअव्यक्तः इंद्रियैः नअभिव्यज्यतेअचिंत्यः बुद्धीद्रियैरगोचरः निरवयवत्वात् अविकार्यः विक्रियारहितः अविनाशित्वेनआमशोकाभावंउपसंहरति तस्मादेवमितितस्मात्एनंआत्मानंअच्छेद्यंअदाह्यंअक्लेद्यंअशोष्यंनित्यंसर्वव्यापिनंस्थिरंअचलंसनातनंअव्यक्तमचिंत्यमविकार्यएवंविदित्वानशोचितुमर्हसि २५

किंच अव्यक्तः अत्वगाद्य विषयः अचिन्त्यो मनसोप्य विषयः अविकार्यः कर्मेन्द्रियाणामप्यगोचरः उच्यते इति नित्यत्वादावभियुक्तोक्तिं प्रमाणयति उपसंहरति तस्मादिति

असंगत्वात्

तथाचाव्ययम्

अव्यावै तस्मात् तस्य शरीरं शरीरं नियन्तीति तेऽकौ प्रवृत्ति प्रतिपादनतः प्रथमं भूमिका शास्त्रस्य निर्मितं अनन्तवचन विशेषणत्वेन एतावता प्रत्यवप्रतिपाद्य

181 180

रणवीरसमसिद्धाथिनी॥

अथप्रत्यक्षादिप्रमाणविरुद्धरूपेणच्छेदाद्यर्हइतिप्रतिपादितमाश्री
याह अव्यक्तोयमिति अयमात्माव्यक्तोरूपादिहीनतयाचक्षुरादी
न्द्रियागोचरइतिनप्रत्यक्षेणतच्छेद्यत्वादिकमुपलभ्यते तथायम
चिंत्योमनोविषयोनानुमेयः प्रत्यक्षस्यैवव्याप्तिग्रहणसंभवादिति
तथायमविकार्यः विक्रियाहीनइतिनार्थापत्तिविषयोविक्रिया
वत्वचक्षुरादिकंहिस्वकार्यान्यथानुपपत्त्याकल्प्यमानमर्थापत्तेः सा
मान्यतोदृष्टानुमानस्यचविषयोभवति एतादृशश्चायमुच्यते श्रु
त्यातात्पर्येणप्रतिपाद्यतेइतिनवेदस्यापितच्छेद्यत्वापादकत्वमि
तिभावः उपसंहरति तस्मादेवमिति तस्मादेवमुक्तेनप्रकारेणैन
मात्मानमविनाशिनंबुद्ध्वाशरीरविनाशेन तद्विनाशभ्रमेणना
नुशोचितुमर्हसि अयंभावः एवमविदितात्मविषयनित्यताकस्य
तवानुशोचनंयुक्तमेव संप्रतितुतद्विदुषस्तवतन्नार्हतीति २५॥

मधुभाष्य॥

नत्वत्समोस्त्यादिषुसाधारप्रश्नावसरएवमहांतमुत्कर्षविलो
क्ति अन्यत्रयत्किंचिदुक्तावप्यसाधारणेवावसरे तद्विस्या
देशपिवेदादावस्ति त्वमग्नइन्द्रोवृषभः सतामसित्वंविष्णुरुरु
गायोनमस्यः विष्णुस्मादिइउतर इत्यादिषु तद्वृत्तविरोधात्
तथाहिस्कांदेप्रोक्ते यदंतरंव्याघ्रहरीन्द्रयोर्वनेयदंतरंमेरुगि
रीइविंध्ययोः यदंतरंसूर्यसुमेरुबिंबयोस्तदंतरंरुद्रमहेंद्रयो
रपि यदंतरंसिंहगजेंद्रयोर्वनेयदंतरंसूर्यखद्योतकयोर्दिवि यदं
तरंजाह्नविसूर्यकन्ययोस्तदंतरंब्रह्मगिरीशयोरपि यदंतरंम
लयजवारिधिविष्णुपोर्यदंतरंस्तंभहिरण्यगर्भयोः स्फुलिंगसंव
र्तकयोर्यदंतरंस्तदंतरंविष्णुहिरण्यगर्भयोः अनंततात्मताभावि
लोकस्तदंतरमनंतक माहात्म्यसूचनार्थायमुदाहरणमिति ने

तत्समो ह्यधिकोवापिनास्तिकश्चित्कदाचन एतेन सत्यवाक्येन
तमेव प्रविशाम्यहमित्याद्याह तत्रैव शिवप्रतिमार्कंडेयवचन
संसारार्णवनिर्मग्नस्तदानीं मुक्तिमेष्यसीत्यादिपाद्मे योवैमार्कं
डेयकथाप्रबंधेशिवाभिषिच्यविलासैवमुक्तिमाह अहमोगाप्र
दोवत्समोहृदयश्चजनार्दन इत्यादिसमत्वस्यविरोधाच्च वेदश्रुति
स्मृत्याद्यनुरोधेनयोज्यः यदिविष्ण्वादित्यादिवचनात् अनिर्णी
याबेद्दादिशंकयान्यथा तत्रापीष्टसिद्धिर्नामवेशोष्यात् अतो
भगवदुत्कर्षएवसर्वागमानांमहातात्पर्यं तथापिस्वतःप्रामा
ण्यात्सेन्नवोच्यते अविरोधात् नचप्रमाणसिद्धस्यान्यत्राहष्ट^
स्यापह्नवोयुक्तः यमवैविद्यादर्थानांस्वतःप्रामाण्यानंगीकारे
चमानोक्तावदोषतंचसाध्यधेदित्यतिप्रसंगः अनन्यापेक्षया
वतत्परत्वंसिद्धमागमानां नारायणपरावेदाः सर्वेवेदायत्प
दमामनंति वासुदेवपरावेदाइति नचैतद्विरुद्धं ईश्वरनियम
नात् अनाद्यौचतत्सिद्धं द्रव्यकर्मचकालश्चेत्यादौ प्रयोजकत्व
प्रयोजकत्वस्वीकृतन्यायेन अतःसिद्धमेवतत् तत्त्वानन्यापे
क्षाचिंत्यशक्तित्वएवयुक्तं अतोनमायामयमेकं अचलत्वप्र
दर्शमनानंदमदुःखमसुखंनप्रतं असदा इत्यादिवत् कियाह
हेः तपोमेहृदयंसाक्षाज्ज्ञानंविद्याक्रियाकृतिरित्याद्युक्तेः अतश्च
नमायामयसर्वं येश्वर्यादिवाचिभगशब्देनैवसंबोधादिनाच
तेत्वाभगोत्यादौ स्वरूपत्वान्नमायामयत्वंयुक्तं विज्ञानशक्ति
रहमासमनंतशक्तेः मध्यनंतगुणेनंतेगुणतोनंतविग्रहे
परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचे
त्यादिवचनात् अतएवाव्यक्तादिरूपः अस्त्वेवमात्मनोनित्य
त्वे तथापिदेहसंयोगवियोगात्मकजनिमृतीनवेत्याह
२५॥

भाषा अनुवाद

यह आत्मा अव्यक्त अर्थात् चक्षुरादिकर्म्म इंद्रियोंका विषय
नहीं यह कहचुकेहैं और अचिन्त्य अर्थात् मनका भी अ-
गम्य ध्यानसे बाहरहै और अविकारी अर्थात् जन्मनाश
अथवा छोटा वड़ा नया पुराना किसी रूपमे वदलता नहीं
ऐसेही तत्वज्ञानी लोग कहतेहैं इससे जान बूझकर तुम
जन्मनाश शून्य कहे रहित आत्माके स्वरूपको अच्छी तर
ह जान बूझकर तुम इस झूठे शोकको परित्यागकरो २५

दोहा

व्यक्ति हीन चिंतन रहित अविकारी कहीं सोय तातें ऐ
सें जानि इह शोचहि योग्य न तोय ॥२५॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं तथा
पि त्वं महाबाहो नैवं शोचितुमर्हसि २६ ॥

शांकरभाष्यं टी॰ ॥

आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते अथ चैनमिति अथ चेत्यभ्युपगमार्थः एनं प्रकृतमात्मानं नित्यजातं लोकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्ति जातो जात इति वा मन्यसे तथा प्रति तत्तद्विनाशं नित्यं वा मन्यसे मृतं मृतो मृत इति तथापि भाविन्यपि आत्मनि त्वं महाबाहो नैवं शोचितुमर्हसि जन्मवतो नाशो नाशवतो जन्म चेत्येतावावश्यंभाविनाविति २६ ॥

आनंदगिरिकृत टी॰ ॥

आत्मनो नित्यत्वस्य प्रागेव सिद्धत्वादुत्तरश्लोकानुपपत्तिरित्याशंक्याह आत्मन इति अनित्यत्वमिति च्छेदः शाक्यानां लोकायतानां वा मतमिदमापरामृश्यते श्रोतुरर्जुनस्य पूर्वोक्तमात्मयाथात्म्यं श्रुत्वापि तस्मिन्निर्द्धारणासिद्धेर्द्वयोर्मतयोरन्यतरमताभ्युपगमः शंकितस्तदर्थो निपातद्वयप्रयोग इत्याह अथ चेति प्रकृतस्यात्मनो नित्यत्वादिलक्षणस्य पुनःपुनर्जातत्वाभिमानो मानाभावादसंभावीत्याह लोकेति नित्यजातत्वाभिनिवेशं पौनःपुन्येन मृतत्वाभिनिवेशो व्याहतः स्यादित्याशंक्याह तथेति परकीयमतमनुभाषितमभ्युपेत्याहो बत महत्पापं कर्तुं व्यवसिता वयमित्यादेस्त्वदीयशोकस्य निरवकाशत्वमित्याह तथापीति एवमर्जुनस्य दृश्यमानमनुशोकप्रकारं दर्शयित्वा तस्य कर्तव्यमयोग्यत्वे हेतुमाह जन्मवत इति जन्मवतो नाशो नाशवतश्च जन्मेत्येतावावश्यंभाविनौ मिथो व्याप्ताविति योजना २६ ॥

स्वामिकृतटीका ॥

गी॰ तदेवमात्मनोजन्मविनाशाभावात्नशोकःकार्यइत्युक्तम्
टी॰ इदानींदेहेनसहात्मनोजन्मतद्विनाशेनचविनाशमंगीकृ
द्वि॰ त्यापिनशोकःकार्यइत्याह अथचेति अथयद्यप्येनमात्मा
नंनित्यंसर्वदातत्तद्देहजातंजातंमन्यसे तथातद्देहमृतेमृ
तंमन्यसेपुण्यपापयोस्तत्फलभूतयोश्चजन्ममरणयोरात्म
गामित्वात्तथापित्वंशोचितुंनार्हसि २६ ॥

पिशाचभाष्यं टी॰ ॥

आत्मनस्तुहननमभ्युपगम्यैतदुच्यते अथचैनमिति अथ
चेत्यभ्युपगमार्थेप्रकृतमेनंनित्यजातंलोकप्रसिद्ध्यानित्य
जातंनित्यंजातंनित्यंवामृतंमन्यसेतथाप्येवमपित्वंमहा
बाहोएवमात्मानंशोचितुंनार्हसि जन्ममरणयोरस्यस्वा॰
भाविकत्वात् २६ ॥

रामानुजभाष्यं टी॰

अथनित्यजातंनित्यमृतंदेहमेवैनमात्मानंमन्यसे नदेहा
तिरिक्तमुक्तलक्षणंतथापिएवमतिमात्रंशोचितुंनार्हसि
परिणामस्वभावस्यदेहस्योत्पत्तिविनाशयोरवर्जनीय
त्वात् २६ ॥

अभिनवगुप्तकृत टी॰ ॥

अथाप्येनंदेहंमन्यसेनित्यजातंप्रवाहस्याविनाशात् तथा
पिनशोच्यता क्षणिकप्रक्रियया वानित्यविनाशिनंतथा
पिकाशोच्यता एवंयद्यात्मनस्तद्देहयोगवियोगाभ्यांनित्य
जातत्वंनित्यमृतत्वंवामन्यसे तथापिसर्वथाशोचनंप्रा॰
माणिकानामयुक्तम् २६ ॥

परमार्थप्रपा टी॰

अथदेहात्मनोःसाहचर्यदर्शनाद्देहेनसहजन्ममरणमंगी
कृत्यापिशोकोनकार्यइत्याह अथचैनमिति अथयद्यपि
नित्यंसर्वदाएनमात्मानंतद्देहेनसहजातंमृतंवा मन्यसे

यतः पुण्यपापयोस्तत्फलभूतयोर्जन्ममरणयोरात्मगामि-
त्वात्तथापि न त्वं शोचितुमर्हसि २६ ॥

वनमाली टी॰ ॥

आत्मनो नित्यत्वेनाशोच्यत्वमुक्त्वेदानीं विकारवत्त्वपक्षेऽप्या-
पि श्लोकद्वयेनाशोच्यत्वं प्रतिपादयति अथेति तत्रात्मज्ञान-
स्वरूपः प्रतिक्षणं विनाशीति सौगताः देह एवात्मा स च स्थिरो-
ऽप्यनुक्षणपरिणामी जायते नश्यति चेति लोकायतिकाः इ-
ति पक्षांतरे अथ चेत् हे महाबाहो पुरुषधौरेयेति सोप-
हासं एतादृशी बुद्धिस्तव न युक्ता तथाहि क्षणिकत्वपक्षे
देहात्मपक्षे च अहो बत महत्पापं कर्तुं व्यवसिता वयमि-
त्येवं शोचितुं नार्हसि एतन्मते जन्मांतराभावेन पापा संभ-
वात्पापभयेनैव हि त्वं शोचसि तच्चैतादृशादर्शनेन न संभ-
वतीत्यर्थः क्षणिकत्वपक्षे च दृष्टमपि दुःखादिकं न संभव-
ति बंधुविनाशदर्शित्वाभावादित्यर्थः २६ ॥

उत्तमवैजयन्ती टी॰ ॥

एवमात्मनो नित्यत्वेन जन्ममरणाभाववत्त्वात्त्वया शोको न क-
र्तव्य इत्युक्तमिदानीमस्य देहजन्माधीनं जन्म देहमरणाधीनं
मरणं च मत्वापि यदि शोकं करोषि तथापि शोककरणमनु-
चितमित्याह अथ चैनमिति अथ शब्दो यद्यर्थे चेत्यप्यर्थे
यद्यपि देवदत्तस्य पुत्रो जातो देवदत्तो मृत इत्युक्ते लोके देहस्यो-
त्पत्तिविनाशं च दृष्ट्वा देह एवात्मा इति बुद्ध्या एनं देहातिरि-
क्तलक्षणमात्मानं नित्यजातं नियत एवायमुत्पन्नो भवतीति
वा शब्दस्यार्थे नित्यं मृतं च नियत एवायं मृतो भवतीति च म-
न्यसे लोकदृष्ट्यात्मनि जन्ममरणे कल्पयसि तथापि हे म-
हाबाहो पुरुषाग्रगण्य एवं शोचितुं अहो बत महत्पापं कर्तुं
व्यवसिता वयमित्यादिरूपकं शोकं कर्तुं त्वं नार्हसि योग्यो
न भवसि परिणामात्मकस्य देहस्य जन्ममरणयोरनिवा-

गी॰ येत्वादवश्यंतद्भवत्येवतदर्थेशोककरणंव्यर्थंआत्मनोपितद्धि
टी॰ लक्षणत्वेनजन्मनाशाभावच्छोकाभावइत्याशयः २६ ॥
हि॰ मधुसूदनी टी॰ ॥

२६
२

अथेतिपक्षांतरेचेदर्थेयदिदेहोत्पत्त्यादात्मवस्तुनोऽसकृच्छ्र
वणेप्यवधारणसामर्थ्यान्महत्पक्षानंगीकारेणपक्षांत
रमभ्युपेत्यनित्यत्वपक्षमेवाश्रित्ययद्येनमात्मानंनि
त्यजातंनित्यंमृतंवामन्यसेवाशब्दःचार्थेक्षणिकत्वपक्षेनि
त्यप्रतिक्षणंपक्षांतरेआवश्यकत्वान्नित्यनियतंजातोयंमृतो
यमितिलौकिकप्रत्ययवशेनयदिकल्पयसि तथापि महा
ह्या बाहोपुरुषधौरेयेतिसोपहासमतामभ्युपगमात्त्वथेतादृशी
जहाष्टिर्नसंभवतीतिसातुकंपंवा एवं अहोबतमहत्पाप
कर्तुंव्यवसितावयमित्यादियथाशोचसि एवंप्रकारंअनु
शोकंकर्तुंत्वमपित्वंतादृशापवसन्नार्हसियोग्योनभव
सि क्षणिकत्वपक्षेदेहात्मवादपक्षेदेहेनसहजन्मविना
शपक्षेच जन्मांतराभावेनपापभयासंभवात् पापभयेने
वखलुत्वमनुशोचसि तच्चतादृशेदर्शनेनसंभवतीत्यर्थः
क्षणिकत्वपक्षेचदृष्टमपिदुःखंनसंभवतिबंधुविनाशाद
र्शित्वाभावादित्यधिकं पक्षांतरेदृष्टदुःखनिमित्तंशोकम
भ्यनुज्ञातमेवंकारः दृष्टदुःखनिमित्तशोकसंभवेप्यदृ
ष्टदुःखनिमित्तःशोकःसर्वथानोचितइत्यर्थःप्रथमश्लोक
स्य । [illegible]
[illegible]
[illegible] ॥ २६ ॥

सदानंदी टी॰ ॥

इत्यात्मनोविकारित्वादशोच्यत्वमुदाहृतं स्वीकृत्यापिविका
रित्वमुच्यतेशोच्यताधुना १ यदिदुर्बोधमात्मानंश्रुत्वात्वमन्त
त्वादपि नाववोद्धुंसमर्थोसिस्वीकरोषिमतांतरं २ जातेप्रा॰

तिक्षणेनष्टंमन्यसे सौगतानुगः जातोयंवाविनष्टोयंम
न्यसेलौकिकानुगः ३ तथापिनोचितःशोकःकिंतुनवै
दिकेमते त्वयीदृशीकदृष्टिर्नसंभवेत्कुरुषर्षभ ४ सौ
गतेवाथचार्वाकेमतेजन्मांतरंनहि अतस्तेपापभीतिः
स्यात्कृष्णडुःखंनसौगते ५ यदीदृशेमतेडष्टेनैवशोकस्त
वोचितः किंपुनःश्रौतसिद्धांतविदस्तेशोकितानहि ६ २६

नीलकंठी टीका ॥

एवंतत्वदृष्ट्याशोकोनोचितइत्युक्त्वा इदानींप्राकृतजनदृ
ष्ट्यापिशोकोनोचितइत्याह अथचेदिति नित्यंनियमेन
जातंनित्यजातमितिचार्वाकपक्षः नित्यंसर्वदाजातमि
तिक्षणिकविज्ञानवादिपक्षः नित्यश्चासौअपूर्वदेहेंद्रिय
संबंधाज्जातश्चेतितार्किकादिपक्षः एवंनित्यंवामन्यसे
मृतमित्यपियोज्यं पक्षत्रयेपिशोकोनयुक्तः महाबाहो
इतिशुद्धार्थस्तुत्साहयति २६ ॥

श्रीधरी टीका

एवंजीवात्मनोनिर्विकारत्वादशोच्यत्वमाह स्पष्टोर्थः २६

+ एवंत्वमाशुघेणेत्यादिनाग्रंथेनवितत्यप्रति **रामकंठी टीका** पादितामपिसकलप्रकरणप्रतिपाद्यस्यब्रह्माद्वैतज्ञानस्य शरीरशरीरिव्यतिरेकोपपत्तिप्रतिपादनरूपां प्रथमांभूमिकांसहसानिर्मलप्रज्ञावधानविशेषावसेयत्वात्सम्यक्प्रतिपद्यमानमर्जुनंमत्वानोभगवान्स्वपक्षांतरोत्क्षेपेणबोधयितुमाह +

+ अथवामडपदिष्टोपपत्तिक्रमेणयथोक्तमर्थमप्रतिपद्यमा
नस्त्वमेनमात्मानंनित्यजातंनित्यंवामन्यसेमृतं तथापितेना
पिप्रकारेणानेनैवविनाशित्वेनशोचितुमर्हसि इदमत्रतात्प
र्यम् आत्मविषयाद्वयीप्रतिपत्तिःसंभाव्यते नित्योवास्यादनि
त्योवान्तृतीयःपक्षोनसंभवति तत्रनित्यत्वप्रतिपत्त्याया
द्येनंनित्यजातमेवसदैवोत्पत्तिविनाशरहितंमन्यसे तथा
प्यस्याविनाशित्वाच्छोकस्यकोवसरः अथविनाशप्रतिपत्त्या
नित्यमेवमृतंसत्तारहितमेनंमन्यसे तथापिनित्यविनष्ट
त्वादस्याशोचनीयत्वाभावः अनेनैवैवमाचष्टेत ययेनमा
त्मानंनित्यंसदैवजन्ममरणाभ्यामनुपक्रमनित्यत्वान्मन्य
से तथाप्येनंशोचितुंनार्हसि [illegible]
[illegible]

गी. टी. हि. ~~[white-out]~~ २६ ॥

अथ यद्यप्येनमात्मानं नित्यं सर्वदा

मन्यसे आपाततोऽङ्गीकृत्येदं न तु तात्पर्येण

स्वामिकी टीका

जन्मविनाशौ देहसंबंधादङ्गीकृत्यापि शोको न कार्य इत्याह अथ चेति। तत्तद्देहे जाते जातं तथा तत्तद्देहे मृते मृतं मन्यसे पुण्यपापयोस्तत्फलभूतयोश्च जन्ममरणयोरात्मगामित्वात् तथापि त्वं शोचितुं नार्हसि २६ ॥

पंचोलीटीका

देहादीनां विनाशेऽप्यात्मनोऽविनाशित्वात् शोकमोहौ न कार्यौ इति उक्तं इदानीं देहविनाशेन आत्मनोऽपि विनाशमङ्गीकृत्याह अथ चैनमिति एवं तदङ्गीकारे एनमात्मानं नित्यजातं शरीरेण सह सर्वदा जायमानं अथवा नित्यमृतं मन्यसे तथापि हे महाबाहो त्वमेवं आत्मानं शोचितुं न अर्हसि २६

रणवीरसंसिद्धोधिनी ॥

एवमशोच्यानन्वशोचस्त्वमित्यादिग्रन्थेन प्रतिपादितां शरीरशरीरिव्यतिरेकोपपत्तिदर्शनपुरःसरं शोकानार्हतां युक्तिमप्रतिपद्यमानमर्जुनं मत्वा नो भगवान् देहेनैव सहात्मनो जन्मदर्शनात् तद्विनाशे चात्मविनाशमभ्युपगम्य किं तावद्यथाङ्गीकार्यं तावकमभ्युपेत्यापि शोकानार्हतामेव श्लोकद्वयेनोपपादयति अथ चैनमिति अथ चेति पक्षान्तरे अथ च यद्यपि मदुपदिष्टोपपत्तिक्रमेण यथोक्तमर्थमनुपपद्यमानस्त्वमेनं देहिनं नित्यजातं नित्यं सर्वदा जाते देहे न विनाशमप्यस्थिते तत्तद्देहजन्मसमकालीनजन्मानं मन्यसे अभ्युपैषि वा शब्दः समुच्चये नित्यं मृतं च तत्तद्देहविनाशकालीनविनाशविशिष्टं च मन्यसे देहानां जन्ममरणधर्माणां संबंधेनात्मनोऽपि तद्धर्मत्वं प्रवाहवदविच्छिन्नमिति मोहविजृम्भितं यद्यपि भवद्बुद्धौ याथार्थ्यभ्रमेण रूढं भवति तथापि हे महाबाहो पुरुषधौरेय त्वं मोहावेशयोग्य एवमतः तापकर्तव्यवत्तितावद्यमित्याद्युक्तप्रकारेण शोचितुं नार्हसि इति २६ ॥

मधुभाष्य

अथेतिकुतोशोकः नियतत्वादित्याह २८॥

182

भाषा अनुवाद

विचारि करि देखो जबकि आत्माके जन्म तथा नाशका अ
भावहै तौ फेरि आत्माके अर्थ शोक करना उचित नहीहै
यह बात निर्धार कर ठहराई गई अब जो देहके जन्म और
नाशसे आत्माका जन्म नाशहै ऐसा अंगीकार करि मानो
तौभी शोच करना अनुचितहै यह कहतेहै कि पुण्य औ
र पाप तथा तत्फल सुख दुख और जन्म नाश इन सबका
आत्माके साथ सम्बन्ध रहनेसे यद्यपि देहके जन्म होनेसे
आत्माका जन्म और देहके नाशसे आत्मा का नाश इस री
तिसे जन्मनाश को नित्य मानो तौ भी सो जन्मनाश अव
श्यभावी अर्थात् निश्चय होने वालाहै फेरिभी उसके अ
र्थ तुमको शोचना योग्य नहीहै २६ ॥

दोहा

नित्यजन्मैं अथवा मरैं नित्यहि मानत जोहि तोभी ऐसें
महाभुज तोहि न शोचत सोहि २६ ॥

153

जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच त॰
स्मादपरिहार्येऽर्थे नत्वंशोचितुमर्हसि २७ ।

शांकरभाष्य टी॰ ॥

तथाचसति जातस्येति जातस्यहि लब्धजन्मनोध्रुवोऽव्य
भिचारी मृत्युर्मरणंध्रुवंजन्ममृतस्यच तस्मादपरिहार्यो
यं जन्ममरणलक्षणोर्थस्तस्मिन्नपरिहार्येऽर्थे नत्वंशोचि
तुमर्हसि २७ ॥

आनंदगिरिकृत टी॰

तयोरवश्यंभावित्वे सत्यनुशोकस्याकर्तव्यत्वे हेत्वन्त
रमाह तथाचेति २७ ॥

स्वामिकृत टीका ॥

ऊतश्चैतदाह जातस्येति हियस्माज्जातस्यसारंभकक
र्मक्षयेमृत्युः ध्रुवोनिश्चितः मृतस्यतत्देहकृतेनकर्म
णाजन्मापिध्रुवमेव तस्मादेवमपरिहार्येऽर्थेप्रवश्यंभावि
निजन्ममरणलक्षणेऽर्थेत्वंविद्वान्शोचितुंनार्हसियोग्योना
भवसि २७ ॥

पिशाचभाष्य टी॰ ॥

तदेवदर्शयति जातस्येति जन्मवतोनाशः नाशवतोज
न्मस्वाभाविकस्तेदपरिहार्यौ तस्मादपरिहार्येऽर्थेनत्वं
शोचितुमर्हसि २७ ॥

रामानुजभाष्य टी॰

उत्पन्नस्यविनाशोध्रुवः अवर्जनीयउपलभ्यते तथावि
नष्टस्यापि जन्मावर्जनीयंकथमिदमुपलभ्यतेनष्टस्योत्प
त्तिरिति सतएवोत्पत्तिरुपलब्धाअसतश्चानुपलब्धेः स
तउच्यते उत्पत्तिविनाशादयः सतोद्रव्यस्यावस्थाविशेषाः
तंतुप्रभृतिद्रव्याणिसंत्येवरचनाविशेषयुक्तानिपटाटी

न्युच्यंते असत्कार्यवादिनां चैतदेवोपलभ्यते नहि तत्र तंतवसं
स्थानविशेषातिरेकेणान्यत्पदार्थांतरं प्रतीयते कारकव्यापा
रेणाभिव्यंजनव्यवहारविशेषाणामेतावतैवोपपत्तेः न
च द्रव्यांतरकल्पनायुक्ता अत उत्पत्तिविनाशादयः सतो द्रव्य
स्यावस्थाविशेषाः उत्पन्नत्वाख्यामवस्थामापन्नस्य द्रव्यस्य त
द्विरोध्यवस्थांतरप्राप्तिर्विनाश इत्युच्यते मृद्द्रव्यस्य पिंडत्व
घटत्वकपालत्वचूर्णत्वादिवत्परिणामपरंपरावर्जनीया
तत्र पूर्वावस्थस्य द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाशः सैव तदव
स्थस्योत्पत्तिः एवमुत्पत्तिविनाशाख्यपरिणामपरंपराप
रिणामिनो द्रव्यस्यापरिहार्येति न तत्र शोचितुमर्हसि २७

अभिनवगुप्तकृत टी॰

नैवैतदन्यथानित्यत्वानित्यत्वमुपपत्तिमत् यतः जन्मैव
वानंतरं नाशेन नाशादनंतरं जन्मेति चक्रवदयं जन्मम
रणसंतान इति किं परिमाणं शोचनामिति २७ ॥

परमार्थप्रपा टी॰ ॥

ऊत इत्याह जातस्येति हि यस्माज्जातस्य स्वारंभककर्मक्षये
मृत्युर्ध्रुवो निश्चितः मृतस्य च तद्देहकृतेन कर्मणा जन्मापि
ध्रुवमेव तस्मादेवमपरिहार्येऽर्थे अवश्यंभाविनि जन्मम
रणलक्षणेऽर्थे त्वं विद्वान् शोचितुं नार्हसि २७ ॥

वनमाली टी॰ ॥

नन्वात्मनः स्थायित्वपक्षेऽपि दुःखसंभवात् कथं न शो
चामीत्यत आह जातस्येति यतः जातस्य स्वकृतकर्मवशा
ल्लब्धदेहेंद्रियादिसंबंधस्य स्थिरस्यात्मनोऽध्रुवश्चावश्यंको
मृत्युस्तच्छरीरादिविच्छेदः तथा मृतस्य विगतदेहेंद्रियसं
बंधकस्य ध्रुवं जन्म प्राक्देहकृतकर्मफलभोगार्थं सानु
शयस्यैव संसारिणः प्रत्यक्षत्वान्न तत्र कोऽपि व्यभिचारः तस्मा
देवमपरिहार्येऽर्थे परिहर्तुमशक्ये जन्ममरणादिरूपेऽर्थे त्वं

दिविच्छेदलक्षणोनाशः कर्मणःक्षये तथाम्रतस्यप्रारब्धहतकर्मफलस्यच ३ भोगार्थस्याध्रुवंजन्मदेहिनोऽज्ञस्यसंस्टतौपरिहर्तुमशक्योस्मिन्नर्थेजन्मादिगोचरे ४ तस्मादेवंविजानंस्त्वंकथंशोचितुमर्हसि जीवेयुर्भ्रातरोदेवैतेहन्यमानास्त्वयारणे ५ तदायुद्धायशोकस्तेयोग्यःस्यात्तन्निवृत्तये एतेत्वयेमरिष्यंतियदाकर्मक्षयेतदा ६ अवश्यंभाविनिह्यर्थेनैवशोकस्तवोचितः ७ २७ ॥

नीलकंठी टी॰ ॥

शोचितुंनार्हसीत्युक्तंतत्रहेतुमाह जातस्येति ध्रुवोऽपरिहार्यःमृत्युर्मरणं अपरिहार्ये अर्थेमरणाख्ये त्वद्व्योगंविनापि अवश्यंभाविनिविषयेनत्वंशोचितुमर्हसि वक्ष्यतिच मयैवैतेनिहताःपूर्वमेवेति २७ ॥

आनंदी टीका

अत्रोपपत्तिमाह स्पष्टम् २७ ॥

+ एतमेवजन्ममरणप्रवाहाविच्छेदंकेचित् रामकंठी टीका नित्यत्वेनावगम्यमानस्यास्यात्मनःप्रतिपादयितुमाह +

+ हिशब्दोहेतौयस्माज्जातस्यजन्मलक्षणविकारभाजोदेहस्यवात्मत्वेनप्रतिपन्नस्यध्रुवोवश्यंभावीमृत्युर्विनाशाख्योविकारएवमेवमृतस्यविनष्टस्यजन्मावश्यंभावीति कस्यचिज्जन्ममरणविकारलक्षणेयोगइति तत्वमविचारयतोपिलोकस्यायंप्रवादःस्थितएवजातोम्रियतेमृतोजायत इत्येवंविधस्तस्माल्लोकप्रवाददृष्ट्यापिशोकस्यानुपपत्तेरेव(...)
(...)शोकापरिहार्यमाह २७ ॥

लासिकी टीका

ज्ञातस्यस्वारंभकर्मक्षये मृत्युः ध्रुवो

ज्ञानइत्यतआह् यस्मान्निश्चितः[illegible] नेहे हेहतेनकर्मणाजन्मापिध्रुवमेव अपरिहार्येअवश्यंभावि अर्थे तस्मात् निश्चितेजन्ममरणलक्षणेर्थे त्वंप्रबुद्धःशोचितुंनार्हसियोग्योनभवसि २७ ॥

मृतस्यत

पंचोली टीका

गी॰ तत्रापिहेतुमाह जातस्येति हियस्माज्जातस्यतस्यलब्धजन्मनः
टी॰ ध्रुवःअव्यभिचारीमृत्युःचपुनर्मृतस्यध्रुवमव्यभिचारिजन्मतस्मा
द्वि॰ त्त्वमपरिहार्येर्थेअनिराकरणीयेअर्थेपनमात्मानंशोचितुंनअर्ह
सि २७

रणवीरसमिद्धोधिनी॥

ऊतोन ममशोचनानार्हतीत्यपेक्षायांहेतुमाह जातस्येति हिय
स्मात् जातस्यादृष्टवशाल्लब्धदेहसंबंधस्यदेहिनोमृत्युस्तत्तद्दे
हवियोगस्तदारंभककर्मक्षयनिमित्तोध्रुवोनिश्चितःसंयोगस्य
वियोगपर्यवसायित्वात्संयोगाविप्रयोगांताइतिन्यायात् तथा
मृतस्यपूर्वदेहवियुक्तस्यदेहिनोदृष्टवशादेवतत्तद्देहारब्धकर्म
फलभोगार्थंजन्मदेहांतरसंबंधोध्रुवंनिश्चितं यस्मादेवंतस्माद
परिहार्येवश्यंभावित्वात्परिहर्तुमशक्येस्मिन्नर्थेजन्ममरणरूपे
विषयेत्वमेवंवस्तुयाथात्म्यवेत्तापिशोचितुंनार्हसि प्रथममभिप्रा
यः देहिनःपूर्वदेहवियोगदेहांतरसंयोगयोरवश्यंभावादेते॰
पिभीष्मादयोदेहिनोभवतासानुकंपेनस्वकर्तृकवधकर्मत्व
मनापाद्यमानाअपिकर्मक्षयात्स्वयमेवदेहवियोगप्रतियो॰
गिनोभवंतीतितत्परिहाराशक्यस्यतवशोकोनोचितइति २७॥

मधुभाष्य

जातस्येति तदेवस्पष्टयति २७ ॥

भाषा अनुवाद

काहेसे शोचना योग्य नहींहै इसका हेतु कहतेहैं कि
जिसलिये जो वस्तु जन्म ग्रहण करतीहै उसके प्रारब्ध
कर्मके क्षय होनेसे निश्चय उसकी मृत्यु अर्थात् नाश
होताहै ऐसेही मरेकाभी पूर्वदेहकृत कर्मवशात फेर
अवश्यही जन्म होताहै इसीसे एवंभूत अनिर्वार्य्य अवश्य
भावी कहे होने वाले जन्म और मरणके विषयमें तुमको
शोच करना योग्य होता नही क्यों कि तुम विद्वान कहे
पंडितहो पंडितका अर्थ यहहै कि सत असत की विवे
किनी कहे विचार करने वाली बुद्धिको पंडा कहतेहै
सो जिसको होय सो पंडितहै आत्मासे भिन्न जो कुछ
सो असत् सत एक आत्माही है २७ ॥

दोहा

जोजन्मैं सो निश्चय मरैं मरैं सो निश्चय जात ताते जतन
न अर्थको तें तिह शोचन तात २७॥

187

अव्यक्तादीनिभूतानि व्यक्तमध्यानिभारत अ
व्यक्तनिधनान्येव तत्रकापरिदेवना २८ ॥

शांकरभाष्य टी॰

कार्यकारणसंघातात्मकान्यपि भूतान्युद्दिश्य शोकोनयुक्तः कर्तुं यतः अव्यक्तादीनीति अव्यक्तादीन्यव्यक्तमदर्शनमनुपलब्धिरादिर्येषांभूतानां पुत्रमित्रादिकार्यकारणसंघातात्मकानां तानि अव्यक्तादीनि भूतानि प्रागुत्पत्तेः उत्पन्नानिचप्राङ्मरणाद्व्यक्तमध्यान्यव्यक्तनिधनान्येव पुनरव्यक्तमदर्शनं निधनं मरणं येषां तानि अव्यक्तनिधनानि मरणादूर्ध्वमव्यक्ततामेव प्रतिपद्यन्ते इत्यर्थः तथाचोक्तं अदर्शनादापतितः पुनश्चादर्शनंगतः नासौ तवन तस्यत्वं वृथाकापरिदेवनेति तत्रकापरिदेवना कोवाप्रलापः अदृष्टदृष्टप्रनष्टभ्रान्तिभूतेष्वित्यर्थः २८ ॥

आनंदगिरिकृत टी॰ ॥

आत्मानमुपदिश्यानुशोकस्य कर्तुमयोग्यत्वेपि भूतसंघातात्मकानि भूतान्युद्दिश्य तस्यकर्तव्यत्वमाशंक्याह कार्येति समनन्तरश्लोकस्तत्रहेतुरित्याह यतइति चात्तमदर्शनमाहृत्ति व्यावर्तयति अनुपलब्धिरिति नहि यथोक्तिसंघातरूपाणि भूतानि पूर्वमुत्पत्तेरुपलभ्यन्ते तेन तानि तथाव्यपदेशभांजि भवन्तीत्यर्थः किं तन्मध्यं यदेषां व्यक्तमिष्यते तदाह उत्पन्नानीति उत्पत्तेरूर्द्ध्वंमरणाच्च पूर्वंव्यावहारिकं सत्वंमध्यमेषां व्यक्तमिति तथोच्यते जन्मानुसारित्वविलयस्ययुक्तमितिमत्वा तात्पर्यार्थमाह मरणादिति उक्तेऽर्थे पौराणि॰कसम्मतिमाह तथाचेति तत्रेत्यस्यार्थमाह अदृष्टेति पूर्वमदृष्टानिसन्ति पुनर्दृष्टानितान्येव पुनर्नष्टानि तदेवंभ्रान्तिविषयतया यदिकार्यत्रयवच्चकीभूतेषु भूतेषु शोकनिमि॰त्तस्यप्रलापस्य नावकाशोस्तीत्यर्थः २८ ॥

गी॰
टी॰
द्वि॰

स्वामिकृत टी॰ ॥

किंच देहानां च स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्ममरणे
शोको न कार्य इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं तदेवादिः
उत्पत्तेः पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि शरीराणि कार॰
णात्मना स्थितानामेवोत्पत्तेः तथा व्यक्तमभिव्यक्तं मध्यं जन्ममर
णांतरालस्थितिलक्षणं येषां अव्यक्ते निधनं लयो येषां तानीद
मान्येवंभूतान्येव तत्र तेषु का परिदेवना कः शोकनिमित्तो वि
लापः प्रतिबुद्धस्य स्वप्नदृष्टवस्तुष्विव शोको न युज्यत इत्यर्थः २८

पिशाचभाष्य टी॰ ॥

कार्यकारणधर्मवतोपि पतानुद्दिश्य शोको न युक्तः कर्त्तुं यतः
अव्यक्तादीनीति अव्यक्तमदर्शनमनुपलब्धिर्येषां भूतानां ता
न्यव्यक्तादीनि प्रागुत्पत्तेः उत्पन्नानि च प्राक् विनाशात् व्यक्त
मध्यानि व्यक्तांतरालानि अव्यक्तनिधनान्येव पुनः पुनरप्य॰
दर्शनं मरणं येषां तानि अव्यक्तनिधनानि मरणादूर्ध्वमव्यक्त
मेव प्रतिपद्यंत इत्यर्थः तथा चोक्तं अदर्शनादिहायातः पुन
श्चादर्शनं गत इति तत्र का परिदेवना को वा विप्रलापः दृष्ट
नष्टभ्रांतिभूतेषु भूतेष्विवेत्यर्थः २८ ॥

व॰ रामानुजभाष्य टी॰

सतो द्रव्यस्य पूर्वास्या विरोध्यवस्थांतरप्राप्तिदर्शने योल्पीयान्
शोकः सोपि मनुष्यादिभूतेषु न संभवतीत्याह मनुष्यादिभू॰
तानि संत्येव द्रव्याण्युपलब्धपूर्वावस्थान्यनुपलब्धांतरावस्था
नि तेषु तेषु स्वभावेषु वर्तंत इति न तत्र परिदेवनानिमित्तमस्ति २८

अभिनवगुप्तकृत टी॰ ॥

अपि च नित्याः संत्वनित्या वा यत्तावदस्य शोचकत्वं प्रत्येव आ
दावव्यक्तः अंते चाव्यक्तः मध्ये तस्य व्यक्तता विकार इति अस्त
तविकारे शोचनीयं न स्वभावे किंच यत्तन्मूलकारणं किंचि
दभिमतं तदेव यथाक्रमविचित्रस्वभावतया स्वात्ममध्यदर्शित
तत्तदनंतसृष्टिस्थितिसंहृतिवैचित्र्यं नित्यमेव तथा स्वभावेति
से॰

कस्यशोचना २८ ॥

परमार्थप्रपा टी॰ ॥

अथदेहस्यगतिरज्ञानमूलिकेतिपर्यालोचयतउपाधिकःशो
कोप्यज्ञानकृतइत्याह अव्यक्तादीनीति अव्यक्तंप्रधानंतदेवा
दिरुत्पत्तेःपूर्वरूपंयेषांतानि अव्यक्तादीनिभूतानिशरीराणि
कारणरूपाश्रितानामेवोत्पत्तेः तथाव्यक्तमभिव्यक्तंमध्यं
जन्ममरणांतरालस्थितिरूपंयेषां अव्यक्तेनिधनेलयोयेषा
मेवंविधानामज्ञानरूपादिमध्यावसानानांनाशेकापरिदे
वनाकिंदुःखंस्वप्नेविनष्टभ्रातृवदित्यर्थः एवंस्वप्नशोको
पगमेजागरणमेवप्रतीकारः तद्वत्स्वाज्ञानोत्पन्नेशोकेतावदा
त्मज्ञानमेवप्रतीकारः २८ ॥

वनमाली टी॰ ॥

नन्वात्मनामशोच्यत्वेपिभूतसंघातशरीराणांदृश्यशोच्यामीत्य
तआह अव्यक्तादीनीति अव्यक्तंप्रधानमादिरुत्पत्तेःपूर्वरूपं
येषांतानिप्राणीदृशानितेषुकापरिदेवना कःशोकनिमित्तक
प्रलापः शरीराणिप्रकृतेरवस्थानरूपाणिकारणवशात्तत्रै
भि^ वाभिव्यज्यंते कदाचित्तदनभिव्यक्तीभवंति यथादंडादिनामृत्पिं
डत्वाद्यवस्थाभिभूयतेघटत्वाद्यवस्थाभिव्यज्यते सत्कार्यवा
देद्रव्यनाशाभावात्तथेमेदेहा अतःपरमानंदस्वरूपाविर्भा
वलक्षणमोक्षहेतुभगवदाराधनस्वधर्मात्प्रच्या
व्यशोकंकर्तुंत्वंनार्हसीतिभावः २८ ॥

तथाव्यक्तमभिव्यक्तं मध्यंजन्ममरणान्त रालस्थितिरूपंयेषां तानिव्यक्तमध्यानि अव्यक्तेनिधनंलयोये षांतानि^

उत्तमवैजयन्ती टी॰ ॥

एवमुत्पत्तिविनाशानर्हस्यात्मनस्तद्दर्हस्यदेहस्यचसर्वथा
शोककरणमयोग्यमित्युक्तमिदानीदेहस्यादिमध्यांताव
स्थादर्शयंस्तस्याशोच्यत्वमाह अव्यक्तादीनि एवंकारस्त्रि
भिर्विशेषणैस्सहसंबध्यते हेभारतभूतानिशरीराणि अव्य
क्तादीन्येव अव्यक्तःप्रधानं आदिःकारणंयेषांतानिउत्पत्तेः
प्राक्कार्याणिस्वकारणरूपेणैवतिष्ठंतीत्यर्थः पुनःव्यक्त
मध्यान्येव ^क्तंस्फुटंमध्यंजन्मारभ्यमरणांतस्थितिरूपं
व्य^

गी॰ येषां तानि पुनरपि अव्यक्तनिधनान्येव अव्यक्ते स्वकारणे
टी॰ ऽप्रध्याने निधनं लयो येषां तानि एवमवस्थात्रयभवनस्व
द्वि॰ भावकानि यानि सन्ति तत्र मनुष्यादिभूतेषु परिदेवना का
शोकनिमित्तको विलापः कः न कोपीत्यर्थः अस्यैवंभूतदे
हविवेको नास्ति स एव तदज्ञानकृतमोहेन शोचति तेन
२८ २ त्वया शोककरणमनुचितमिति भावः २८ ॥

+ तदेवं सर्वप्रकारेणात्मनोऽशोच्यत्वमुपपादितं कालि शरीराणि ऽहि दुप+ शोचामीत्यर्जुनाशंकामपनुदति भगवान्+

मधुसूदनी टी॰ ॥ अथेदानीमात्मनोऽशोच्यत्वेपि भूतसंघातात्म

आदौ जन्मनः प्राक् अव्यक्तान्यनुपलब्धानि भूतानि पृथिव्या
दिभूतमयानि शरीराणि मध्ये जन्मानंतरं मरणात्प्राक्
व्यक्तान्युपलब्धानि संति निधने पुनरव्यक्तान्येव भवंति
यथा स्वप्नेंद्रजालादौ प्रतिभासमात्रजीवनानि शुक्तिरूप्या
दिवत् कल्पितानात्मा पूर्वं वा स्थितानि दृष्टिसृष्ट्यभ्युपगमात्
तथा चादावंते च यन्नास्ति वर्तमानेपि तत्तथेति न्यायेन म
ध्येपि न सन्त्येवैतानि नासतो विद्यते भाव इति प्रागुक्तेश्च ए
वं सति तत्र तेषु मिथ्याभूतेषु स्वप्नतत्त्वहेषु भूतेषु का परिदे
वना को वा दुःखप्रलापः न कोपि उचित इत्यर्थः न हि स्वप्न
बहुविधान्बंधूनुपलभ्य प्रतिबुद्धस्तद्विच्छेदेन शोचति पृथ
ग्जनोपि एतदेवोक्तं पुराणे अदर्शनादापतितः पुनश्चाद
र्शनं गतः भूतसंघ इति शोकः तथा च शरीराण्युद्दिश्य शो॰ पु
कोनोचित इति भावः आकाशादिमहाभूताभिप्रायेण वा
श्लोको योज्यः अव्यक्तमव्याकृतमविद्योपहितं चैतन्यमा॰
दिः प्रागवस्था येषां तानि तथा व्यक्तेन नामरूपाभ्यामेवा॰
विद्यकाभ्यां प्रकटीभूतं न तु स्वेन परमार्थसदात्मना मध्यं
स्थित्यवस्था येषां तानि दृश्यानि भूतान्याकाशादीनि अव्यक्त
निधनान्येव अव्यक्ते स्वकारणे मृदीव घटादीनां निधनं प्र
लयो येषां तेषु भूतेषु का परिदेवनेति पूर्ववत् तथा च श्रु
तिः तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रिय
तेत्यादिरव्यक्तोपादानतां सर्वस्य प्रपंचस्य दर्शयति लय
स्थानत्वं तु तस्यार्थसिद्धं कारणे एव कार्यस्य दर्शनात् ग्रं॰

वा

थ्यंतेरेचविस्तरः तथाऽज्ञानकल्पितत्वेनतुच्छान्याकाशादीनि
भूतान्यपहिस्वप्नशोकानोचितस्तत्कार्याण्यपिस्वप्नेनोचितइ
तिकिमुवक्तव्यमितिभावः अथवासर्वदातेषामव्यक्तरूपेण
विद्यमानत्वादविच्छेदाभावेनतन्निमित्तः प्रलापोनोचितइ
त्यर्थः भारतेत्यनेनसंबोधयन् शुद्धवंशोद्भवत्वेनशास्त्रीय
मर्थंप्रतिपत्तुमर्हसि किमितिनप्रतिपद्यसेइतिसूचयति २८ व
[illegible] ऋत
[illegible] त्वद
[illegible]
[illegible]
[illegible]
[illegible] २८ ॥

सदानंदी टी० ॥

तदेवमात्मनोयुक्त्याऽशोच्यत्वंप्रतिपादितं अथेदानीमशो
च्यत्वमनात्मनोभौतिकानिमान् १ देहादिसप्नशोचामीत्या
शंक्याह्यव्यक्तेतिजन्मनः प्राक्शरीराणिभूतकार्याणिस
र्वथा १ अदृष्टानितथामध्येजनेनहृष्टेस्तेःपुरा उपलब्धानिसं
त्यतेप्यदृष्टानिभवंतिच २ यथास्वप्नेंद्रजालादौप्रतिभासस
मानिवै भूतानीहतथाज्ञानात्यागृह्वेनास्थितानिच ४ आदावं
तेचयन्नास्तिवर्तमानेपितत्तथा इतिन्यायेनमध्येपिनसंत्यता
निसर्वशः ५ तथाचात्पततुच्छेषुतेषुतत्वविदस्तव कोवाद्भः
त्वप्रलापोयंनकोपीहोचितस्तव ६ नहिस्वप्नेस्वपुत्रादीनुप
लभ्यप्रबुद्धजनः प्रबुद्धस्तद्वियोगेनशोचतित्वंकिमप्यहो ७
अदर्शनादापतितः पुनश्चादर्शनंगतः नासौतववनतस्यत्वं
वृथाकिंपरिदेवना ८ शुद्धवंशोद्भवत्वेनशास्त्रीयंज्ञानम०
र्हसि प्राप्तुंत्वमत्रभगवानाहभारतशाहतः ९ ॥ २८

नीलकंठी टी० ॥

अथात्मनः शोच्यत्वंतथापिदेहादिविनाशाजः शोकोभवत्ये

गी॰ वेत्याशंक्यसकारणस्यदेहादेर्मिथ्यात्वंसाधयति अव्यक्तादीनी
टी॰ ति भूतानिवियदादीनितद्विकारभूतानिजरायुजादीनिच न
द्वि॰ व्यक्तमव्यक्तमज्ञानंआदिर्येषांतथाविधानि व्यक्तःस्पष्टःमध्यः
उत्पत्तिमारभ्यमरणात्प्रागवस्थायेषां अव्यक्तेएवनिधनंल
योयेषामिति अयमर्थः रज्जूरगादिकारणमज्ञानंनरज्जव
त्तदुरगवद्वाव्यक्तमस्ति परीक्ष्यमाणंचनदृष्टिपथमवतर॰
ति अतस्तदव्यक्तं ततउत्पन्नःसर्पस्तत्रैवलीयतेनरज्ज्वां एवं
आत्मनिकल्पितानांभूतानांआदिरंतश्चाव्यक्तमेव तेनआ॰
दावंतेचयन्नास्तिवर्तमानेपितत्तथेतिन्यायेनमध्येभासमा
नान्यपितानिरज्जूरगवत्असंत्येव एवंविधेतत्रतस्मिन्वि॰
२६ षयेकापरिदेवनाकोवाविलापः नहिमरुमरीचिकोदकेदा
नष्टइतिकश्चित्तत्त्वविद्विलपति अतएवभूतानांरज्जूरगादी
नामिवप्रतीतिसमकालिकींसृष्टिमभिप्रेत्यकौषीतकिब्राह्म
णेस्वापप्रबोधयोर्जगल्लयोदयौपठ्येते सयदास्वपितितदैनं
वाक्सर्वैर्नामभिःसहाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिश्रोत्रंस
र्वैःशब्दैःसहाप्येतिमनःसर्वैर्ध्यानैःसहाप्येतिसयदाप्रबुध्य
तेऽथैतस्मादात्मनःसर्वेप्राणायथायतनंविप्रतिष्ठंतेप्राणेभ्यो
देवादेवेभ्योलोकाइति प्राणाश्चक्षुरादीन्द्रियाणि देवास्त
दनुग्राहकाःसूर्यादयःलोकाःरूपादयः नन्विहान्यत्रच॰
आत्मैवसर्वभूतानांलयोदयस्थानमिष्यतेनान्यत् तत्क
थमेषामव्यक्तेलयोदयस्थानमिष्यते सत्यं अज्ञानाश्रय
त्वाद्ब्रह्मणस्तथात्वव्यपदेशोनवस्तुगत्या नहिअपरिणामि
नःकूटस्थस्यस्वतःकार्यप्रविलयोदयस्थानत्वंसंभवति य
थोक्तं अस्पृष्टैंद्रजालस्ययदुपादानकारणं अज्ञानंतदुपा
श्रित्यब्रह्मकारणमुच्यतेइति २८ ॥

आनंदी टीका

अपिच अव्यक्तःसर्वमहदाद्यादिर्येषांतानिभूतानिप्राणिनःअ
दर्शनादपतितःअनुपादर्शनंगतः नैषाद्देवास्तिनत्वनेकस्मि

त्किमनुशोचसि इतिस्मृतिवाक्यार्थानुसारेणस्पष्टोयमर्थः अ
पिच अव्यक्तेपंचानांभूतानांसूक्ष्मावस्थाप्रकृतिस्तदादिर्ये
षामितिवक्ष्यमाणःप्राकृतसर्गोपिसूचितः २८ ॥

+अन्यमपिप्रकारंशोकपरिहारायाह+ रामकंठी टीका

+ पृथिव्यादिभूतसन्निवेशविशेषशरीरात्मकत्वात्सर्वप्राणभृ
तोभूतशब्देनात्रोच्यंते तान्येतानिभूतानि अव्यक्तादीनि अव्य
क्तस्वरूपाणि तथैवाव्यक्तनिधनानिपरोक्षपर्यन्तानि न
ष्टानिपूर्वमेवंविधान्यासन्पुनश्चैवंविधानिभविष्यन्तीतिज्ञा
यते ततोद्वयोरप्येतयोःकाष्ठयोःतान्यशोच्यानि यदपिव्य
क्तमध्यानिव्यक्तानितेनरूपेणवेद्यमानामध्यावस्थाजन्मवि
नाशान्तरालवर्तिनीदशायेषांतथाविधान्यप्यशोच्यान्येवव्य
क्तावस्थायामेषांहिभ्रममात्रमेवस्थैर्यप्रतिपत्तिः एतानिहि
येनयेनप्रकारेणकल्प्यन्ते तेनतेनविनश्वराण्येवेतानिका
नि वाभवन्तु परिणामित्वादाविर्भावतिरोभावधर्माक्रान्ता
नि वाभवन्तु सर्वथाविकल्प्यमानान्येकस्यास्थिरस्वरूपस्याप्र
भवाद्दशोच्यान्येवेतिदेहात्मकभूतसन्निवेशमात्रत्वेनप्रति
पन्नेषुकः परिदेवनावसरइति [illegible]
[illegible]
[illegible]
मस्या [illegible] २८ ॥

लासिकी टीका

प्राणिनोनित्याःसन्तुनित्यावायतस्तावद्देहाःशोचकं तेषाप्यन्येषा
मशोच्यत्वेइत्याह अव्यक्तादीनीति अव्यक्तमदर्शनमनुपल
ब्धिरादिर्येषांतानिभूतानिपृथिव्यादिभूतसंघातात्मकाःप्रा
णिनःप्राग्जन्मनोरप्रत्यक्षस्वरूपाणि तथाव्यक्तमध्यानिप्रा
दुर्भावणाद्व्यक्तानितेनरूपेणवेद्यमानामध्यावस्थाजन्मम
रणान्तरालमध्यवर्तिनी येषांतानि अव्यक्तनिधनान्येवप
रोक्षपर्यन्तानिमरणादूर्ध्वमव्यक्ततामेवप्रतिपद्यन्ते तथा
चोक्तं अदर्शनादापतितःपुनश्चादर्शनंगतः नत्वासोवेद

तत्र का परिदेवना कः शोकनिमित्तो विलापः प्रतिबुद्धस्य स्वप्नदृष्टबन्धुष्विव शोको न युज्यते इत्यर्थः आदावन्ते च यन्नास्ति वर्तमानोऽपि तत्तथेति न्यायात्

गी॰ टी॰ द्वि॰

नत्वेनेकः सन्कमत्र शोचसीति २८ ॥

पंवोलीटीका

यद्यपि आत्मनि शोको न युक्तस्तथापि देहेन्द्रियादिभूतसंघातरू- पे शोको युक्त इत्याशंक्याह अव्यक्तेति हे भारत भूतानि अव्य- क्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि मरणादनन्तरं अदृश्यानि तत्र का परिदेवना को वाक्प्रलापः २८

रणवीरसमिद्बोधिनी॥

पुनरपि शोकपरिहारप्रकारमेवाह अव्यक्तादीनीति हे भारतेति पुरुवंशोत्पन्नत्वेन शास्त्रीयार्थप्रतिपत्त्यर्हो ऽपि त्वं किमिति न प्रति पद्यसे इति स्मारयितुं संबोधनं भूतानि पृथिव्यादिभूतमयानि शरीराणि अव्यक्तादीनि नव्यक्तः अप्रत्यक्ष आदिः पूर्वरूपं येषां तानि तादृशानि भवन्ति तथा व्यक्तं तेन तेन रूपेणाविर्भावेन मध्यं जन्मानन्तरं प्राक् मरणात् वर्तमानं कौमाराद्यवस्थास्वरूपं येषां तानि तादृशानि भ वन्ति तथाऽव्यक्तं निधनं पर्यन्तो येषां तानि तादृशान्येव भवन्ति एवमे वं विधान्येतान्यासन् एवं प्रकाराणि भविष्यन्तीति न केनापि स्था पितं इत्यादि तयोः परोक्षता मध्ये तु स्वप्नेन्द्रजालवद् दृष्टनाशमेतेषां का स्थिरतेति भावः एवं च निर्णये जाते तत्र तेष्वनित्येषु देहेषु का परिदेवना अपि तु न कोऽपि दुःखप्रलापः अन्यथा स्वप्ने दृष्टानां व स्तूनां संयोगस्य सति प्रबोधे विच्छेदादपि शोच्यता स्यात् न च तत्र प्रबुद्धोऽपि शोचन् दृष्टः का कथा भवादृशस्येति देहान्यथादिप्रपञ्चो वितस्तत्र वृथा शोक इत्यभिप्रायः २८ ॥

मधुभाष्य

अव्यक्तादीनीति देहयोगवियोगस्य नियतत्वादात्मनश्चैक स्वरूपत्वात्सर्वथा नाशान्न शोकः कार्य इत्युपसंहृतेऽमेष्वरं सामर्थ्यं पुनर्दर्शयति २९ ॥

१९१

भाषा अनुवाद

और जो कहो कि देहादिका स्वभाव जो जन्म मरण आदि तउपाधिक आत्माका जन्म मरण विचारि करि शोचतेहै तौ भी शोच करना न चाहिये इसपर कहतेहै कि अव्यक्ता दि अर्थात् अव्यक्त कहे प्राणियोंकी उत्पत्ति का मूल कार ण जो प्रकृति माया सो प्राणियोंकी उत्पत्तिके पूर्व कारण रूप सब जीवों को अपने भीतर लीन करके अव्यक्त । कहे अप्रकट रहती है और व्यक्त मध्य अर्थात् जन्म मरण के मध्यमे सकल प्राणी वर्तमान अवस्थामे विराजमान रहतेहै और अव्यक्त निधन अर्थात् अन्तमे स्वकारण जो माया तिसमे सब प्राणी लीन होके रहते इससे हे अर्जु न ऐसे रहने वाले प्राणियोंकी मृत्युमे किसी तरह शोच करना न चहिये जैसे जगे हुये मनुष्यको स्वप्नमे देखी भई वस्तुके अर्थ शोचकरना अयोग्यहै तैसे यह भी जा नो २८ ॥

दोहा॥

भारत आदि अव्यक्त यह भूत मध्य मे व्यक्त अव्यक्त अंत
में होत पुनका प्रलाप तहां सक्त २८॥

192

आश्चर्यवत्पश्यति कश्चिदेन माश्चर्यवद्वद-
ति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणो-
ति श्रुत्वाप्येनं वेद न चैव कश्चित् २९ ॥

शांकरभाष्यटी॰

दुर्विज्ञेयोयं प्रकृत आत्मा किं त्वामेवैकं उपालभेत् साधा
रणे भ्रांतिनिमित्ते कथं दुर्विज्ञेयोयमात्मेत्यत आह आश्च
र्यवदिति आश्चर्यवदाश्चर्यं अदृष्टपूर्वमद्भुतमकस्माद्द
श्यमानं तेन तुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानं पश्य
ति कश्चिदाश्चर्यवदेनं वदति तथैव चान्यः आश्चर्यवच्चैन
मन्यः शृणोति श्रुत्वा दृष्ट्वोक्त्वाप्यात्मानं वेद न चैव कश्चि
दथवा योयमात्मानं पश्यति स आश्चर्यतुल्यो यो वद
ति यश्च शृणोति सोनेकसहस्रेषु कश्चिदेव भवत्यतो दु
र्बोध आत्मेत्यभिप्रायः २९ ॥

आनंदगिरिकृतटी॰ ॥

अर्जुनेन प्रत्युपालम्भं दर्शयित्वा प्रकृतस्यात्मनो दुर्विज्ञेय
त्वात् प्रत्युपालम्भो न संभवतीति मन्वानः सन्नाह दुर्विज्ञे
य इति तथा चात्माज्ञाननिमित्तविप्रलम्भस्य साधारणत्वा
दसाधारणोपालम्भस्य निरवकाशतेत्याह किं त्वामेवेति
अहंप्रत्ययवेद्यत्वादात्मनो दुर्विज्ञेयत्वमसिद्धमिति शंकते
कथमिति विशिष्टस्यात्मनोहंप्रत्ययस्य दृष्टत्वेपि केवल
स्य तदभावादस्ति दुर्विज्ञेयतेति श्लोकमवतारयति आ
हेति आश्चर्यवदिति आद्येन पादेनात्मविषयदर्शनस्य
दुर्लभत्वं दर्शयता द्रष्टुर्दौर्लभ्यमुच्यते द्वितीयेन च तद्वि
षयवदनस्य दुर्लभत्वोक्तेर्वक्तुर्दुर्लभत्वं कथ्यते तृ
तीयेन तदीयश्रवणस्य दुर्लभत्वद्वारा श्रोतुर्विरलता वि
वक्षिता श्रवणदर्शनोक्तीनां भावेपि तद्विषयसाक्षात्का

गी॰ टी॰ द्वि॰

रस्यात्मन्नायासलभ्यत्वं वक्तर्थेनाभिमतमिति विभागः आत्म
गोचरदर्शनादिदुर्लभत्वद्वारा दुर्बोधत्वमात्मनः साधयति ।
आश्चर्यवदिति संप्रत्यात्मनि द्रष्टृवक्तृश्रोतॄः साक्षात्कर्तृश्च
दुर्लभत्वाभिधानेन तदीयं दुर्बोधत्वं कथयति अथवेति
व्याख्यानद्वयेपि फलितमाह अतइति २९ ॥

स्वामिकृत टी॰ ॥

किंच देहानां स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्म
मरणे शोको न कार्य इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं
तदेवादिः उत्पत्तेः पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि शा
रीराणि कारणात्मनामेवोत्पत्तेः तथा व्यक्तमभिव्यक्तं मध्यं
जन्ममरणान्तरालावस्थितिलक्षणं येषां अव्यक्तेनिधनं ल
येषां तानि इत्थमान्येवभूतान्येव तेषु कुतस्तर्हि विद्वांसो
पि लोके शोचंति आत्माज्ञानादेवत्याशयेनात्मनो दुर्विज्ञे
यतामाह आश्चर्यवदिति कश्चिदेनमात्मानं शास्त्राचार्यो
पदेशाभ्यां पश्यन् आश्चर्यवत्पश्यति सर्वगस्य नित्यज्ञाना
नंदस्वभावस्यात्मनो लौकिकत्वादैन्द्रजालिकवद्घटमा
नं पश्यन्निव विस्मयेन पश्यति असंभावनाभिभूतत्वात् त
था आश्चर्यवदेवान्यो वदति शृणोति चान्यः कश्चित्पुनः विपरी
तभावनाभिभूतः श्रुत्वापि नैव वेद चशब्दादुक्त्वापि दृष्ट्वापि न स
म्यक् वेदेति द्रष्टव्यम् २९

पिशाचभाष्यम्

दुर्बोधोयं प्रकृत आत्मा ना किं नामैवैकस्तुपालंभसाधारणो भ्रां
तिनिमित्ते कथं दुर्विज्ञेय आत्मेति तत्राह आश्चर्यवदिति आश्चर्य
वदाश्चर्यमद्भुतं तस्यार्थे वतिप्रत्ययः आश्चर्यमेव आश्चर्यवत् अदृष्टम
मा॰ नन्वभूतमकस्मात् दृश्यमानं आश्चर्यमेनं साश्चर्यमेन मात्मानं कश्चित्प
श्यति साश्चर्यं तथैव पर मात्मानमन्यः कश्चिद्वदति तेन तदाश्चर्यं श्रुत्वा द
ष्ट्वा उक्त्वाप्येनं न वेदेत्याश्चर्यमतो दुर्बोध आत्मेत्यभिप्रायः २९

193

रामानुजभाष्यं टी॰

एवंशरीरात्मवादेपिनास्तिशोकनिमित्तमित्युक्त्वाशरीराति
रिक्तआश्चर्यस्वरूपआत्मनिद्रष्टावक्ताश्रोताश्रवणायत्तात्म
निश्चयश्चदुर्लभइत्याह एवमुक्तस्वभावंस्वेतरसमस्तवस्तु
विसजातीयतयाश्चर्यवदवस्थितमनंतेषुजंतुषुमहता॰
तपसाक्षीणपापउपचितपुण्यस्तथाविधःकश्चित्पश्यति
तथाविधःकश्चित्परस्मैवदति एवंकश्चिदेवशृणोति श्रुत्वा
४ प्येनंयथावदवस्थिततत्त्वतोनकश्चिद्वेदचकाराद्द्रष्टृवक्तृ
श्रोतृष्वपितत्त्वतोदर्शनंतत्त्वतोवदनंतत्त्वतः श्रवणंदुर्ल
भमित्युक्तंभवति २९ ॥

अभिनवगुप्तकृतटी॰ ॥

एवंविधंच आश्चर्यवत्पश्यतिनतुयथैवमयमात्माविनाशी
किमिति सर्वेणतथैवनोपलभ्यते यतोद्भुतवत्कश्चिदेव
पश्यति श्रुत्वापिनकश्चिदेवजानाति नवेत्ति २९ ॥

परमार्थप्रपा टी॰ ॥

तत्त्वातिदुर्गममित्याह आश्चर्यवदिति अनादिजन्मकोटिषु
दृश्यजातदर्शनसंनिविष्टदृष्टिः प्रमाताकस्माच्चाचार्यो
पदेशान्निराकाराद्वैतचिदेकरसमात्मानमाश्चर्यवत्पश्य
ति यतःप्रागननुभूतवस्तुदर्शनंश्रवणंवाश्चर्यजन
कंभवति दृष्टांताभावान्नुद्यमानइत्यर्थः तथान्योयः क
श्चिदनभिज्ञातात्मतत्त्वः शास्त्रश्रुतेनशब्दमात्रेणवदति
सोप्याश्चर्यवत् ततःश्रोतापितथैवाएवमुक्तेषुत्रिष्वपिक
श्चिदप्येनमात्मानंनवेद तथात्वमपिसंनिरूपितमात्मानं
आश्चर्यवन्मत्वादृश्यदृष्टाभित्तिविशेनयाकिंचिद्वदसिनिरूप तस्मादस्मि॰
णेसावधानेतथाभवितव्यमित्यर्थः अथैतदर्थं सर्वेशास्त्रा
याश्रुतिरपि श्रवणायापिबहुभिर्योनलभ्यःशृ॰शृण्वंतोपिब

२९ २ 194

गी. ह्रवोयंनविदुः आचार्यैर्वक्तृकुशलैरुपलब्धावाआश्चर्योज्ञाता कु
टी. शलानुशिष्टइति भाष्यं यःपरमात्मासदाचार्यादपिश्रवणाय
टि. श्रवणार्थंबहुभिर्नलभ्यः बहूनांतुलभोनभवति किंतुदेव
वशात्कस्यापीत्यर्थः तथापरमात्मानंशृएवंतोपिबहवःनवि
दुःनाविदन् किंतुकश्चिदेव तथास्यात्मनोलब्धोअकुशलआचा
र्यआश्चर्योभवतिशृस्रति तथा अकुशलानुशिष्टउपदिष्टोज्ञा
ताशिष्याप्याश्चर्योभवति २९ ॥

वनमाली टीका ॥

नन्वविद्वांसोपिबहुतएवंशोचंति ततुकुतोवकुजाज्ञानश्रो
तृमीयाद्विषयस्यात्मनोदुर्ज्ञेयत्वादित्याशंकायामात्मनोदु
र्ज्ञेयत्वमाह आश्चर्यवदिति एनंदेहिनंदेहेंद्रियादावनाद्यवि
वशाद्देहे ममेत्यभिमानिनंकश्चिदाचार्योपदेशलब्धविवेकः
आश्चर्यवतआश्चर्यंपश्यति विधिवत्कृतमितिवत्स्वार्थेव
तिः तादृशएवकश्चिदन्योन्यस्मैवदतिसोप्याश्चर्यवत् आ
श्चर्यःदुर्लभइत्यर्थः अन्यःकश्चिदयदेनंशृणोतिसोप्याश्चर्यवदा
श्चर्यःदुर्लभःश्रुत्वापिशमदमादिसाधनसंपत्तिहीनःश्रुत्वाप्येनं
वेद अत्रवक्तुरुद्दृश्यपेक्षयानन्यत्वमपिद्रष्टव्यंकुजनापेक्षया
यद्वाश्चर्यवत्सर्वत्रदर्शनादिक्रियाविशेषणं कर्तृकर्मणोः
श्चविशेषणं आत्मातज्ज्ञानंतज्ज्ञानाचेत्येतत्त्रितयमाश्चर्यं अ
नाद्यविद्यावशाद्देहआत्मनोहंतव्ययइतिदेहादिसंवलितज
पाटस्यमागामत्प्रसादलब्धविवेकंपितांकथंत्वंसम्यक्जानी
याः इतिभावः २९ ॥

जगन्मवैजयन्ती टी. ॥

नन्वेवंचेत्तर्ह्यात्मानंज्ञात्वासर्वेपिशोकंकुतोनत्यजंतीत्याशं
कायामात्मज्ञानस्यदुर्लभत्वमाह आश्चर्यवदितिदेहेंद्रिया
द्यचेतनवस्तुविजातीयचेतनस्वभावकमेनमात्मानंसर्वेश्रा

णिमात्रेणमपेऽनेकजन्मार्जितपुण्यपुंजेरेवासमस्तदृंशा
सनसमस्तदायसच्छास्त्रसहितकः सदाचार्थवान्यःकश्चि
दनिर्दिष्टःपुरुषःआश्चर्यवत्पश्यतिविस्मयेनैवदर्शनाय
स्मादात्मनोनित्यज्ञानानंदस्वरूपत्वेनजन्मादिविकारशू
न्यत्वेनचसर्वघटपटाद्यचेतनपदार्थेभ्योविलक्षणत्वम
स्ति अथचतद्दृष्टःपुरुषस्यानाविद्यावृतज्ञानत्वेनविप
रीतबुद्धित्वमप्यस्ति तस्मात्किमिदंरूपमितिविस्मयेनैवे
त्यतइत्यर्थः तथैवचतथाविधमेनमात्मानंतथाविधोयः
कश्चिदन्योपि आश्चर्यवद्वदति एवमन्योपिकश्चित्शृणो
ति शास्त्राचार्यादिभ्योयथावदेनंश्रुत्वापियथार्थनःक ९
श्चित् नवेदनजानाति चशब्दात्मस्वरूपश्रवणादिनिश्चये
दृष्टवत्तत्त्वश्रोतृणामतिदुर्लभत्वंदर्शितम् २९ ॥

+ नत्रविद्वांसोपिबहवःशोचंतितत्किंमामेवमुमधुसूदनी टीका॥ नःइत्येवमुपालभसे अन्याश्चवत्कर्मेरेवहितज्ञाश्चो तारनबुध्यतइतिन्यायात्

+ एवंप्रकृतंदेहिनमाश्चर्येणाहु तेनतदल्पतयावर्तमानमाविद्यकनानावि यविरुद्धधर्मतया संतमप्यसंतमिवस्वप्रकाशचैतन्यरूप मपिजडमिवानंदघनमपिदुःखिनमिवनिर्विकारमपिस विकारमिवनित्यमप्यनित्यमिवप्रकाशमानमप्यप्रकाश मानमिवब्रह्माऽभिन्नमतद्भिन्नमिवमुक्तमपिबद्धमिवाद्वि तीयमपिसद्वितीयमिवसंभावितविचित्रानेकाकारप्रती तिविषयंपश्यति शास्त्राचार्योपदेशाभ्यामाविद्यकसर्वद्वै तनिषेधेनपरमात्मस्वरूपमात्राकारायांवेदांतमहावाक्य जन्यायांसर्वसुकृतफलभूतायामंतःकरणवृत्तौप्रतिफ लितंसमाधिपरिपाकेनसाक्षात्करोतिकश्चित् शमदमा दिसाधनसंपन्नचरमशरीरःकश्चिदेवनतुसर्वः तथापि कश्चिदेनंयत्पश्यतितदाश्चर्यवदितिक्रियाविशेषणं आ त्मदर्शनमप्याश्चर्यवदेवयत्स्वरूपतोमिथ्याभूतमपिसत्य स्यव्यंजकमाविद्यकमप्यविद्याविघातकं अविद्यामुपघ्नन्

(margin, left: वत् — ष — घ — या)

(margin, right: नाथप्रति पत्तिरपिममनदोषः तत्रा न्येषामपितवेवात्मापरि ज्ञानादेवशोकः आत्मप्रति पत्तिश्चतवान्येषामिवस्वा शयदोषादितिनोभयदोष द्वयमित्यभिप्रेत्यात्मनो दुर्विज्ञेयतामाह +)

गी॰
टी॰
हि॰

तत्कार्यंतयास्वात्मानमप्यपहृतेतीति तथायःकश्चिदेनं
पश्यतिसआश्चर्यवदितिकर्तृविशेषणं यतोसौनिहत्ता
विद्यातत्कार्योपिप्रारब्धकर्मप्राबल्यात्तद्धानिर्व्यवहरति व
सर्वदासमाधिनिष्ठोपिव्युत्तिष्ठतिव्युत्थितोपिपुनःसमाधि
२९ २ ^विद्यादि मनुभवतीतिप्रारब्धकर्मवैचित्र्यचरितःआत्मतत्त्वापज्ञान
त्वात्सकललोकस्पृहणीयोऽतआश्चर्यवदेवभवति तदेः
तत्वयमप्याश्चर्यमात्मानंतत्ज्ञानेनतत्ज्ञानाचेतिपरमदुर्वि
ज्ञेयमात्मानंत्वंकथमनायासेनजानीयाइत्यभिप्रायः
एवमुपदेष्टुरभावादप्यात्मादुर्विज्ञेयः योह्यात्मानंजानाति
^ब्रूयात् सएवतमन्यस्मैब्रुवन्त् श्रोतुस्तूपदेष्टुत्वासंभवाज्ज्ञानंतु
समाहितचित्तः प्रायेणकथंब्रवीतु व्युत्थितचित्तोपिपरे
णज्ञातुमशक्यः यथाकथंचित्तज्ज्ञातोपिलाभपूजाख्या
त्यादिप्रयोजनानपेक्षित्वान्नब्रवीत्येव कथंचित्कारुण्ये
मात्रेणब्रुवंस्तुपरमेश्वरवदत्यंतदुर्लभएवेत्याह आश्चर्य
वद्वदतितथैवचान्यइतियथाजानातितथैववदति एतमि
त्यनुकर्षणार्थःचकारःसचान्यःसर्वाज्ञजनविलक्षणः न
तुयःपश्यति ततोन्यइतिव्याख्यातान् तत्रापिकर्मणिक्रिया
यांकर्त्तरिचाश्चर्यवदितियोज्यंतत्रकर्मणःकर्तृत्वप्रागाश्च
र्यत्वंव्याख्याते क्रियायास्तुव्याख्यायते सर्वशब्दावाच्यस्य
शुद्धस्यात्मनोयद्वदनंतदाश्चर्यवत् तथाचश्रुतिः यतोवा
चोनिवर्त्ततेअप्राप्यमनसासहेति केनापिशब्देनावाच्यस्य
शुद्धस्यात्मनो~~यद्वदनंतदाश्चर्यवत् तथाचश्रुतिः यतोवा~~
~~चोनिवर्त्तंते~~ विशिष्टशक्तेनपदेनजहदजहत्स्वार्थलक्ष
णयाकल्पितसंबंधेनलक्ष्यतावच्छेदकंनतेरूपेणवप्रतिपाद के
नंतदपिनिर्विकल्पकसाक्षात्काररूपमत्याश्चर्यमित्यर्थः
अथवाविनाशक्तिंविनालक्षणांविनासंबंधांतरंस्वप्रभा
त्यापकवाक्यवत्तत्वमस्यादिवाक्येनयदात्मतत्त्वप्रतिपा

नैतदाश्चर्यवच्छब्दशक्तेरचिंत्यत्वात् नचविनासंबंधबोधने
तिप्रसंगः लक्षणापक्षेपितुल्यत्वात् शक्यसंबंधस्यानेकसा
धारणत्वात् तात्पर्यविशेषान्नियमइतिचेत् तस्यापिसर्वान्
प्रत्यविशेषात्कश्चिदेवतात्पर्यविशेषमवधारयतिनसर्वइ
तिचेत् हंततर्हिपुरुषगतएवकश्चिद्विशेषोनिर्दोषत्वरूपो
नियामकः सचास्मिन्पक्षेपिनदंडवारितः तथाचयादृश
स्यशुद्धांतःकरणस्यतात्पर्यानुसंधानपुरःसरंलक्षणयावा
क्यार्थोभ्यंभवद्भिरंगीक्रियते तादृशस्यैवकेवलःशब्द
विशेषोखंडसाक्षात्कारंविनापिसंबंधेनजनयतीतिकिम
नुपपन्नं एतस्मिन्पक्षेशब्दस्याविषयत्वाद्यतोवाचोनिवर्त
न्तइतिश्रुतेरनुपपन्नं अयंचभगवदभिप्रायोवार्तिककारैःप्र
पंचितः दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः शब्दश
क्तेरचिंत्यत्वाद्विद्मस्तंमोहहारिणः अगृहीत्वैवसंबंधमभि
भि धानाभिधेययोः हित्वानिद्रांप्रबुध्यंतेसुप्तेबोधिताःपरैः जा
ग्रद्वन्नयतः शब्दंसुप्तमेवेतिकश्चन ध्वस्तेतोज्ञाननेनाज्ञाने
ब्रह्मास्मीतिभवेत्फलं अविद्यायातिनःशब्दाद्याहंब्रह्मेतिधी
र्भवेत् नश्यत्यविद्ययासार्धंहत्वारोगमिवौषधमित्यादिना
वचनविष ग्रंथेन तदेवं [illegible] कर्मणः वचनक्रियायाश्चात्माश्चर्यरू वक्तु
यस्य पत्वादात्मनोदुर्विज्ञानत्वमुक्त्वा श्रोतुर्दुर्लभत्वादपितदाह
आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदेति अन्योद्रष्टुर्वक्त
श्रुत्वाद्विलक्षणोमुमुक्षुर्वेदान्तब्रह्मविदंविधिवदुपसत्य
एनंशृणोतिश्रवणाख्यविचारविषयीकरोति वेदांतवाक्य
तात्पर्यनिश्चयेनावधारयतीतियावत् श्रुत्वापिचैनंमननिनि
दिध्यासनपरिपाकाद्वेदापिसाक्षात्करोत्यपिआश्चर्यवत् ता
वा द्धाश्चर्यवत्पश्यतिकश्चिदेनमितिव्याख्यातं अत्रापिकर्तुरा
श्चर्यरूपत्वमनेकजन्मानुष्ठितसुकृतक्षालितमनोमलत
ति याऽतिदुर्लभत्वात् तथाचवक्ष्यतेमनुष्याणांसहस्रेषुकश्चिद्यत
तिसिद्धये यततामपिसिद्धानांकश्चिन्मांवेत्तितत्वतःइति अ

वर्ण्ययापिवहुभिर्योनलभ्यः शृएवंतोपिवहवोयंनविद्युः आ
श्चर्योवक्ताकुशलोस्यलब्धा आश्चर्योज्ञाताकुशलानुशिष्टइ
तिश्रुतेश्च एवंश्रवणश्रोतव्ययोराश्चर्यत्वंप्रागव्याख्येयं नत
यःश्रवणमननादिकंकरोतिसआत्मानंवेदेति किमाश्चर्य
मतमाह नचैवकश्चिदिति चकारःक्रियाकर्मपदयोरनु
षंगार्थः कश्चिदेनंनैववेदश्रवणादिकंकुर्वन्नपि नदकुर्व
न्नुवेदेतिकिंवक्तव्यं ऐहिकमप्रस्तुतंप्रतिबंधेनदृष्टेना
दितिन्यायात् उक्तंचवार्तिककारैः कुतस्तत्ज्ञानमितिचे
त्तद्धिबंधपरिक्षयात् असावपिचभूतोवाभावीवावर्ततेथ
वेति श्रवणादिकुर्वतामपिप्रतिबंधपरिक्षयादेवज्ञानंजा
यते अन्यथातुनसचप्रतिबंधपरिक्षयः कस्यचिद्भूतएव
यथाहिरण्यगर्भस्य [illegible] यथाश्वेत
केतोः तथाचप्रतिबंधक्षयस्यातिदुर्लभत्वात् यात्पापस्य
कर्मणइतिस्मृतेश्च दुर्विज्ञेयोयमात्मेतिनिर्गलितार्थः य
दितश्रुत्वाप्येनंवेदनचैवकश्चिदित्येवंव्याख्यायेत तदाआ
श्चर्योज्ञाताकुशलानुशिष्टइतिश्रुत्यैकवाक्यतानस्यात् य
ततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतइतिभगवद्वचनवि
२ रोधश्चेतिविद्वद्भिर्विनयः संतव्यः अथवानचैवकश्चिदित्य
स्यसर्वत्रसंबंधः कश्चिदेनंनपश्यतिनवदतिनशृणोतिश्रु
त्वापिनवेदेतिपंचप्रकाराउक्ताः कश्चित्पश्यत्येवनवदति
कश्चित्पश्यतिचवदतिचकश्चित्तद्वचनंशृणोतिनतद्दृष्टे
जानातिचकश्चितश्रुत्वापिनजानातिकश्चित्तुसर्वबहिर्मु
तइति अविदुष्यत्वेपि असंभावनाविपरीतभावनाभिभूत
त्वादाश्चर्यतुल्यत्वं दर्शनवदनश्रवणेष्वितिनिगदव्याख्या
तःश्लोकः चतुर्थपादेतुदृष्ट्वोक्त्वाश्रुत्वापीतियोजना ।

२९ ॥

कस्यचिद्भावी यथावामदेवस्य कस्यचिद्वर्तते

ज्ञानमुत्प द्यतेपुंसां

दुर्विज्ञेयोयमात्मा किंत्वामेवैकमुपालभे साधारणेहि विश्रांतिनि
मित्ते सुखदुःखदे शृणु त्वमात्मतत्त्वस्य दुर्ज्ञेयत्वमिहोच्यते एनं
प्रकृतमात्मानमाश्चर्येणाद्भुतेनहि २ तल्पमायाविपर्यासक
ल्पनाधारमततं शास्त्राचार्योपदेशाभ्यां सर्वद्वैतनिषेधतः ३
वेदांतवाक्यजन्यायाथार्थीहृत्तौ प्रतिबिंबितं समाधिपरिपाकेन
कश्चिच्छांत्यादिसंयुतः ४ पश्यत्येनेनसर्वोपिदौर्लभ्यं तत्त्वदर्शि
नः यत्पश्यति तदाश्चर्यवदित्येवं क्रियान्वयि ५ तथात्मदर्शने
यच्च तद्वाश्चर्यवद्यतः यत्स्वरूपास्त्वाभूतं सत्यस्यकं जकं वि
भोः ६ यः पश्यति सआश्चर्यवन्निरीक्ष्यो गुणज्ञैर्भिः यतोसौ तत्त्व
विज्ञानी भूतोप्यन्तर्वदेवच ७ सदाचारप्रवृत्तः सन्देहवानिवल
क्ष्यते आत्मानं हि त्वन्तज्ज्ञानमेतदाश्चर्यवत्स्वयं ८ दुर्विज्ञेयमतो
ह्येनं जानीयाः कथमंजसा तथोपदेष्टृदौर्लभ्यात् दुर्विज्ञेयइतो
प्यसौ ९ यश्चात्मानं विजानाति स्वबुद्ध्या वै न तरो जनः यतोऽन्ता
स्योपदेष्टृत्वासंभवो भ्रांतिशालिनः १० ज्ञानीयस्तु समाधिस्थः
सकथं श्राययेश्रोवदेत् व्युत्थितोपि परिणसौ ज्ञातुं शक्यः कथ
सुधीः ११ यथाकथंचिज्ज्ञातोपिसूज्ञाख्यात्मादिके फले निःस्पृ
हत्वाच्च न ब्रूयात्कथंचित्करुणावशात् १२ ब्रुवन्नीशावदेद्वाः
सौदेशिकोत्यन्तदुर्लभः यथावेत्ति तथावक्तियपन्नंसमाहितेणपरे १२
सर्वात्मज्ञ नभिज्ञोसौ सआश्चर्यवदेवहि अनिर्देश्यस्य शुद्धस्य
निर्विकल्पस्य साक्षिणः १४ आत्मनोवचनं यत्स्यात्तदाश्चर्यवदे
वच विनाशाक्त्यादिना तत्त्वमादिवाक्यैः प्रबोधनं १५ यदद्वैता
त्मतत्त्वस्य तदाश्चर्यवदित्यहो शाहशाकैरचिन्त्यत्वाद्दुष्कब्रह्म
विदुत्तमैः १६ दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः शा
हशक्तेरचिन्त्यत्वाद्धिस्तमोहहानतः १७ अगृहीत्वैवसंबंध
मभिधानाभिधेययोः हित्वानिद्रांप्रबुध्यन्ते सुषुप्तेर्बोधिताः प
रैः जाग्रद्वत्रयतः प्राहुः सुषुप्तमेवे लिकश्चन धलेनोवचसाज्ञा
नेब्रह्मास्मीतिभवेत्फलं १८ अविद्याघातिनः शाहशाकैब्रह्म

गी॰ टी॰ हि॰

197

तिधीर्भवेत् नश्यत्यविद्यया साईं हत्वा रोगमिवौषधं २० एवं
वक्तव्यश्चात्मा यवक्ता च वचनक्रिया त्रयमाश्चर्यवद्यस्मात्तुर्वि
ज्ञेयइ लोपि सः २१ अन्योन्त्य तत्ववक्तारं यथा शास्त्रमुपेत्य यः
वेदांतवाक्यतात्पर्यं निश्चिनोति विचारतः २२ श्रुत्वा चैनं तथा
मत्वा निदिध्यास्य निरंतरं साक्षात्करोति तुर्यं स तदाश्चर्यव
दित्यपि २३ श्रोतव्यं श्रवणं श्रोता चैतदाश्चर्यवत्त्रयं गुरोः शृणो
ति यश्चैनं मन्यते ध्यायतीह यः २४ नवेदात्मानमित्यत्र किमा
श्चर्यमिवेति चेत् कश्चिदेनं श्रुत्वा हि श्रवणादिपरोपि सन्
प्रतिबंधवशाच्चैनं वेद स्वात्मानमंजसा नन्वतर्हि न कोप्येनं जा
नीयादिति चेन्नहि २५ जायते तत्त्वविज्ञानं श्रवणादिप्रकुर्व
तो प्रतिबंधक्षयादेव तदुक्तं वार्तिके स्फुटं २६ कुतस्तज्ज्ञान
मिति चेन्न हि बंधपरिक्षयात् असावपि च भूतो वा भावी वा वर्त
ते थवा २७ अतो हि हिरण्यगर्भस्य वामदेवस्य भाव्ययं वर्तते सं
तके तो श्च तत्त्वयोग्यतिदुर्लभः नचैव काश्चिदित्यस्य सर्वत्रैवा
न्वयोस्तु वा कश्चित्पश्यति नो वक्ति कश्चित्पश्यति वक्ति च २८
कश्चिच्छृणोति तद्वाक्यं न तदर्थं वेत्ति तत्त्वतः कश्चिच्छ्रुत्वापि नो
वेत्ति कश्चित्सर्वबहिष्कृतः ३० एवं पंचप्रकाराश्च श्रोक्ता भ
गवता स्फुटं ३१ २९ ॥

नीलकंठी टी॰ ॥

ननु वज्रपंजरतुल्यस्य सर्वप्रमाणसिद्धस्य वियदादिप्रपंचस्य
कथं रज्जुउरगादिवद् ज्ञानप्रभवत्वेनात्मनि तत्कल्पत्वमुच्यते कथं
वा कर्मज्ञानकांडापेक्षितमात्मनो यज्ञादिकर्तृत्वं श्रवणादिक
र्तृत्वं चापन्हूयत इत्याशंक्याह आश्चर्यवदिति कश्चिदज्ञातात्म
तत्त्वः पन्नेन प्रतीतानंतरं लोकोत्कंभूतग्रामं आश्चर्यवत् आश्चर्यम
द्भुतं स्वप्नमायेन्द्रजालादि किं तेन तुल्यं आश्चर्यवत् तथाभूतं प
श्यति तथा कश्चिदेनमाश्चर्यवद्वदति सत्त्वेनासत्त्वेन वा निर्व
क्तुमशक्यमपि अनिर्वचनीयेनैव लोकाप्रसिद्धेन रूपेणोप
पादयति तथाहि रज्जुरगवत्प्रपंचः संश्चेन्नेह नानास्ति किंच

नेतिश्रुत्यानबाध्येत प्रसंगश्चन्नप्रतीयेत तस्मादनिर्वचनीयो
यमिति तदिदंसर्वव्यवहारादस्यापिप्रपंचस्यमिथ्यात्वाप
पादनमत्याश्चर्यमित्यर्थः तथापिनेप्रपंचंशून्यमाश्चर्यव॰
त्शृणोति इमेलोकाइमेदेवाइमेवेदाइदंसर्वंयदयमात्मे
तिप्रत्यक्षेणश्रुनात्मतयाउपलभ्यमानस्यापिप्रपंचस्ययत्
प्रत्यगभिन्नत्वेनश्रवणंतदत्यंतमाश्चर्यं नहीयंश्रुतिर्यज
मानःप्रस्तरइत्यादिवदुपचरितार्था प्रपंचस्यात्मनःपृथ
क्त्वेआत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंस
र्वंविदितंभवतीत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञोपरोधा
पत्तेः नचप्रतिज्ञायाऔपचारिकी प्रदेशांतरेश्रुतस्ययथासो
म्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यादितिदृष्टांतस्या॰
परोधापत्तेः तस्मात्प्रतिज्ञादृष्टांतनिगमनानामेकवाक्य
त्वात् नप्रपंचस्यात्मान्यत्वं तत्रभेदग्राहिप्रत्यक्षविरोधादा
श्चर्यमिवशृणोति तथाकश्चिदेनंप्रपंचंप्रत्यगनन्यत्वेनश्रुत्वा
अपिशास्त्रात्उक्तात्समादिदृष्टांतैरुपपाद्यदृष्ट्वाध्यानेनचसाक्षा
त्कृत्वापितत्त्वतोनवेदनजानाति तथाहि आसाहिप्रज्ञातीव
विक्षिप्तःपरिहीयतइतिवक्ष्यति तस्मादात्मैक्यात्संभवत्येव
प्रपंचस्यरज्जूरगादितुल्यत्वेनतच्छ्रवं यद्वापनमात्मानंक
र्तृत्वभोक्तृत्वदुःखित्वानित्यत्वजडत्वसंगित्वपरिछिन्नत्वादि
धर्मवत्तयाप्रसिद्धमपितत्त्वमसीत्यागमोन्यथाब्रह्माकारांतः
करणवृत्त्याब्रह्मविद्याख्ययाप्रकर्तारमभोक्तारमानंदघनं॰
सत्यचिद्रूपमसंगमनंतमपरोक्षीकरोतीतिमहदाश्चर्यं य
त्पश्यतितदाश्चर्यवदितिक्रियाविशेषणंवा आविषयकम
पिदर्शनमविद्यांस्वात्मानंचकतकरजोवन्निवर्तयतीति
यद्वायःपश्यतिसआश्चर्यवदितिकर्तृविशेषणं यतएक
एवविद्वान्समाधिव्युत्थानयोःपरस्परविरुद्धमात्मनोब्रह्म
भावंजीवभावंचयावदारब्धकर्मक्षयमनुभवतीति तथा
वाङ्मनसातीतमप्यात्मानंयद्वाचावदतितदप्याश्चर्यं अट

गी.
टी.
द्वि.

198

हीनसंगतिकेनापिशब्देनयथास्वमःप्रबोध्यतेतद्वत् यथो
क्तवार्तिके प्रगृहीत्वैवसंबंधमभिधानाभिधेययोः हित्वा
निद्रांप्रबुध्यतेस्वप्नेबोधितःपरैः जाग्रद्वन्नयतःशब्दंस्व
प्नमेवेतिकस्त्वन ध्वलेताज्ञानतोज्ञानेब्रह्मास्मीतिभवेत्फ
लं अविद्याद्यातिनःशाब्दाद्यहंब्रह्मेतिधीर्भवेत् नश्यत्यः
विद्ययासार्द्धंहत्वारोगमिवौषधमिति तथायःशृणोतिसो
प्याश्चर्यवत् प्रतिपद्लभेदित्यर्थः श्रवणायापिबहुभिर्यो
नलभ्यइतिश्रुतेः शृण्वंतोपिबहवोयन्नविद्युरितिश्रुति
द्वितीयपादार्थंसंगृह्णाति श्रुत्वाप्येनमिति आश्चर्योवक्ता
कुशलोस्यलब्धाश्चर्योज्ञाताकुशलेनानुशिष्टइतिउत्त
रार्द्धस्तुश्लोकपूर्वार्द्धेनसंगृहीतइतिज्ञेयं दुर्विज्ञेयोयमा
त्मातस्त्वंतज्ज्ञानार्थंयतस्वेतिभावः २९ ॥

आनंदी टीका

अर्जुनेनैवंदेहिदेहयोर्नित्यानित्यत्वविचारेप्रश्नप्रतिप्रश्ना
भावादनवधानेमत्वाकुपितइवसोपालंभमाह एवंतदु
त्पत्तेहन्यमानेशरीरेइत्यादियुक्तिदर्शितस्वरूपमपिभीष्मा
दिजीववर्गं कश्चिद्दिह्वाह्रभावनावाननात्मज्ञोजनः आश्च
र्यवदसंभाव्यमिवपश्यति मतिर्देहेउपलभ्यते देहनाश
त्वेनोपलभ्यते इतिरूपस्यदेहस्यभ्रांत्यानत्वेनविस्मृष्यती
त्यर्थः अन्योवक्तामद्विधःसर्वज्ञःपरमेश्वरः एनमुक्तरूपं
आत्मजीववर्गमाश्चर्यवदसंभाव्यंवक्तिकिंकाकाश्चुक्ति
संभाव्यमेववक्तीत्यर्थः चपुनःएनमन्यःअर्जुनादपरःकिं
माश्चर्यवच्छृणोति अशोकेःसत्यतयासंभाव्यमेवशृणो
ति यथायमर्जुनःएनमविनाशिनंश्रुत्वापिनैवावधार
यति तथाश्रुत्वाप्येनंकिंनवेद अपितु सर्वएवाभ्यासेन
यतमानोवेदेति प्रश्नतोपयोगात्सहृदयंगमोयमर्थोर्जु
नावधानार्थम् यत्त्वश्रीपादैरर्थोव्याख्यातस्तस्यटानी
मत्रत्यत्रहफबोधोजनोपदेशाविषयइतिसहृदयाःप्रमा
नौ

+ इदानीं बहुप्रकारोऽप्ययमर्थोऽतिगंभीरत्वान्न यास्यावधारयितुमनुष्ठातुं चाशक्य इत्यर्जुनस्यैतद
र्थविषयमनुव्यवसायं परिहर्तुं प्रकृष्टप्रयत्नप्रतिपत्त्यनामस्यार्थस्य दर्शयितुमाह +

एनम् २९ ॥

रामकंठी टीका

+एनमात्मानं यथाप्रतिपादितस्वरूपं कश्चिन्मनुष्यसहस्रेषु प्रथमकृष्टपुण्यपरिपाकवशाद्बहूनां जन्मनामन्ते पश्यति न त्वतः प्रत्यभिज्ञानेन साक्षात्करोति योऽपि पश्यति स आश्चर्यवद्यथाश्चर्यं कश्चिददृष्टपूर्वमद्भुतं कदाचित्कथंचित्क्षणमात्रं पश्यति तद्वदेनं कश्चित्कृतपुण्यः क्षणमात्रं पश्यति तथैवाद्भुतरूपमिव प्रतिभासमानं कश्चिदेव तथाविधमेनं वदति परप्रबोधनायाचष्टे तथैव कश्चिन्नादृशमेव परेण प्रतिपाद्यमानं शृणोत्यवधारयति कश्चित्तु प्रतिभगवदनुग्रहेणानधिष्ठितत्वादविद्यापहतान्तःकरणमेनं यथाप्रतिपादितस्वरूपमात्मानं श्रुत्वापि जनश्चित्प्रतिपादनकुशलादाकर्ण्यापि न वेद तत्त्वतो न जानाति स च तथाविधोऽनुपदेशपात्रत्वेन भक्तिश्रद्धादिगुणसूचितभगवदनुग्रहत्वात्पात्रमेवैतत्तत्त्वोपदेशस्य तस्योद्युक्तो भवेदित्यर्थः किमत्र तात्पर्यम् अस्यात्मनो गुरुशिष्यक्रमेण स्वयमनुभवेन वा संततज्ञातके चित्पुण्यभाजः प्रतिपत्तारः किंतु निरन्तराभ्यासपरिशीलनविशीर्णकल्पसकलविकल्पावरणानां विनैव वैमल्येन सर्वकालमाश्रितया वास्य प्रतिपत्तिपात्रमिति विरलविरलो लक्षैकः कश्चिदेव चरमजन्मा भवेदिति यथोक्तेन क्रमेण सम्यगवधारणीयं ये

२९ ॥

लालि की टीका

ननु तर्हि विद्वांसोऽपि लोके शोचन्ति आत्मज्ञानादेवेत्याशयेनात्मनो दुर्विज्ञेयत्वमाह आश्चर्यवदिति [1]आश्चर्यमदृष्टमद्भुतमस्माकं दृश्यमानं तेन तुल्यं शास्त्राचार्योपदेशाभ्यां पश्यति साक्षात्करोति नित्यज्ञानानन्दस्वभावस्यात्मनो लौकिकत्वादिन्द्रजालमिवाघटमानं पश्यन्निव विस्मयेन पश्यति असंभावनाभिभूतत्वात् अन्योऽप्येनं ईश्वरानुग्रहभाजनः कश्चिदेव

[1] अनेकसहस्रेषु कश्चिदुत्कृष्टपुण्यः एनमात्मानमाश्चर्यवत्

तदुक्तं श्रीकुलयुक्तौ आत्मा चैवात्मना ज्ञातो यदा भवति साधकैः तदा विस्मयमात्मा वै आत्मन्येव प्रपश्यति तथैव मन्यः पर प्रबोधनाय आश्चर्यवद्वदति तथान्यः परेण प्रबोध्यमान एनमाश्चर्यवच्छृणोति तथा चोक्तं शिवसूत्रेषु विस्मयो योगभूमिकेति

१ तथाच श्रुतिः यमेवैष वृणुते तेन लभ्य इति

+श्रुत

गी॰ १ कश्चिद्विपरीतभावनाभिभूतः श्रुत्वाऽप्येनं वेद न चैव कश्चित् २९

टी॰ पंचोलीटीका

हि॰ नकेवलं तवैव विदुषामपि आत्मापरिज्ञानात् शोकमोहौ भवतः आत्मपरिज्ञाने च दुर्विज्ञेयत्वादात्मन इत्यभिप्रेत्योक्तं येन दुर्विज्ञेयत्वमात्मन आह आश्चर्यवदिति कश्चित् एनं आत्मानं आश्चर्यवत् अश्रुतपूर्वमद्भुतमुच्यमानं यथा तद्वदिति वक्तुः पुनः आत्मानमन्यः आश्चर्यवत् अश्रुतपूर्वं अद्भुतं श्रूयमाणं यथा तद्वत् शृणोति दृष्ट्वा उक्त्वा श्रुत्वापि पुनः आत्मानं कश्चिन्न वेद २९

२९ ४ 199

रणवीरसमिद्बोधिनी॥

ननु यदि शरीरे देहे नाशेऽपि न शोकोचितो तर्हि किमिति विदुषामपि तदभिभूतत्वं दृश्यत इत्यर्जुनाभिप्रायमपाकर्तुमात्मनस्तु दुर्बोध्यत्वं दर्शयत्वेन प्रतिपादयति आश्चर्यवदिति कश्चिद्वेदं प्रतिपादितं स्वरूपमात्मानमाश्चर्यवदहष्टचरत्वादद्भुतेन तत्त्वं पश्यति शास्त्राचार्योपदेशाभ्यामवलम्बमानमिव विस्मयेन साक्षात्करोति तथान्यः सर्वविल्लक्षणमेवं तथैव वदति परावोधयितुं कथयति तथैवान्योऽशिष्यः कश्चिदुपदेश्यतत्प्रतिपादितमेनमात्मानमाश्चर्यवदसंभाव्यमानमिव शृणोति श्रुत्वापि वेति च कारो दर्शनवचनेसमुचिनोति श्रुत्वा दृष्ट्वोदित्वापि कश्चिदपि एनमात्मानं सम्यक् न वेदेत्यात्मनो ल्पप्रयत्नेन दुर्ज्ञेयत्वादिदानीं तज्ज्ञाने प्रयत्नबाहुल्यस्यानुपयोगित्वमेवेति मान्यं देहविनाशेनात्मविनाशं संभाव्य शोकाविष्टो भूरितितात्पर्यम् २९

मधुभाष्य

आश्चर्यवदिति दुर्लभत्वेनेत्यर्थः तथाश्चर्यं लोके दुर्लभा पीवरस्वरूपत्वात् सूक्ष्मत्वाच्चात्मनस्तु दृष्टा सांख्यज्ञानं शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयत इति भगवद्वचनाद्व्यासस्मृतौ

योगउपायः हठयोगाः प्रयुक्ताश्चतुंसांख्यः प्रसिद्ध्य
इतिवचनाद्भगवते नेतरौ सांख्ययोगौ उपादेयत्वेन विव
क्षितोऽत्र चित्तामतत्वेन कर्मयोगइत्यादिप्रयोगाच्च
निंदितत्वाच्चेतरयोर्मोक्षधर्मेषु भिन्नमतत्वमुक्तं पंचरा
त्रस्तत्या वेदानां वेकार्थत्वाविरोधः पार्थकं त्वसांख्याय
पेक्षयायुक्तं तत्रैव चित्रशिखंडीप्रणीते पंचरात्र मूले वेदे
कोकेश्च एवमेव सर्वत्र सांख्ययोगपाह्वउपादेयवाच
कोवर्णनीयः युक्तेश्च ज्ञानंदिष्ट्वजैवमुक्तं उपायस्थव
द्यते बुध्यते अनयेति बुद्धिः सांख्ययोगशास्त्रउपादेयवा
चकोवर्णनीयः युक्तेश्च विषयोययावाबुध्यते साग
भिहितेत्यर्थः योगइमां बुद्धिं शृण्वित्युक्तम् बह्वाद्वि
द्वयोर्मतभेदात् तत्कथमेकत्र निष्ठाकरोमीत्यत आह
२९ ॥

भाषा अनुवाद

तो फेरि बड़े विद्वान लोग जो शोक करते चले आतेहैं सो केवल आत्मा विषयक अज्ञानता ही से होता इस अभिप्रायमे आत्मा की दुर्ज्ञेयता कहे ज्ञान कठिनता का निरूपण करतेहैं कि कोई तो शास्त्र आलोचना करिके इस आत्माको जानिके भी आश्चर्य ऐसा जानते अर्थात् सर्वगत नित्य ज्ञान और आनंद स्वरूप आत्माके अलौ॰ किकत्वसे असंभव जो इंद्रजालिक कौतुक तिसके स॰ मान देखि आश्चर्यसे घबड़ायकर विस्मययुक्त होतेहैं ॰ और कोई आश्चर्यकेनाई कहते कोई आश्चर्यके तुल्य सुनते और कोई आत्मज्ञानरूप विपरीत कहे उलटी भावनासे अभिभूतहोके इस आत्माका तत्व सुनिकेभी जानि सकते नही अर्थात् बहुत देखि सुनिके भी ॰ अच्छी तरहसे आत्मा का जानना अति कठिन है २९ ॥

दोहा

कोइ अचरजवत देखें यह कहे अचरजवत आन और अचरज वत यह सुने अवणकरे भी न जान॥ २९॥

90

देहीनित्यमवध्योयं देहेसर्वस्यभारत तस्मा
त्सर्वाणिभूतानि नत्वंशोचितुमर्हसि ३० ॥

शांकरभाष्यं टी॰ ॥

अथेदानीं प्रकरणार्थमुपसंहरन् ब्रूते देहीति यस्माद्देही
शरीरेनित्यं सर्वावस्थास्ववध्यो निरवयवत्वान्नित्यत्वाच्च त
त्रावध्योयं देहेशरीरेसर्वस्य सर्वगतत्वात् स्थावरादिषुस्थि
तोपिसर्वस्यप्राणिजातस्यदेहे वध्यमानेपि अयंदेही न व
ध्यो यस्मात्तस्माद्भीष्मादीनि सर्वाणि भूतान्युद्दिश्य नत्वंशो॰
चितुमर्हसि ३० ॥

आनंदगिरिकृतटीका ॥

श्लोकान्तरमुत्थापयति अथेति आत्मनो दुर्ज्ञानत्वप्रदर्शना
नन्तरमितियावत् वस्तुवृत्तापेक्षया शोकमोहयोरकर्तव्य
त्वे प्रकरणार्थः देहे वध्यमानेपि देहिनोवध्यत्वाभावेफलि
तमाह यस्मादिति हेतुभागं विभजते सर्वस्येति फलितप्र
दर्शनपरंश्लोकार्द्धं व्याचष्टे तस्माद्भीष्मादीनीति ३० ॥

स्वामिकृत टीका ॥

तदेवंदुर्बोधमात्मतत्वंसंक्षेपेणोपदिशन्नशोच्यत्वमुपसंह
रति देहीति ३० ॥

पिशाचभाष्यं टीका ॥

अथेदानींप्रकरणाडुपसंह्रियते देहीति तस्माद्भीष्मादीनि
सर्वाणिभूतानिउद्दिश्यनत्वंशोचितुमर्हसि ३० ॥

रामानुजभाष्यं टी॰ ॥

सर्वस्यदेवादिदेहिनोदेहेवध्यमानेप्ययंदेहीनित्यमवध्यइ
तिमंतव्यः तस्मात्सर्वाणिदेवादिस्थावरांतानिभूतानिविष
माकारेणस्थितान्यपि स्वभावेनस्वरूपतः समानानिनित्यानि
चदेहगतंत्वैषम्यंततोदेवादिसर्वाणिभूतानिउद्दिश्यनशो
चितुमर्हसि नकेवलंभीष्मादीन्प्रति ३० ॥

अभिनवगुप्तकृत टी॰॥

अतोनित्यमात्मनोविनाशित्वम् ॥ ३॰ ॥

परमार्थप्रपा टी॰

अथप्रकृतमनुसरति देहीनित्यमिति देहीशरीरचालकआ
त्मनित्यंनिरंतरमवध्यःवध्योहिनभवतीतिनित्यत्वेशोके प
कएवंसर्वस्यभूतजातस्यदेहेवर्ततइतिव्यापकत्वेशोके तस्मा
त्कारणात्सर्वाणिभूतानिआत्मब्रह्मादीनिशोचितुंनार्ह
सितंनिमित्तंशोकोव्यर्थः अथदेहनिमित्तंचेत्तर्हितस्मादधि
करणीभूतात्तस्मादात्मनः सकाशात्सर्वाणिभूतान्याविर्भ
वंतीतिदेहानामध्यासएवरूपत्वंनिरूपितं एतदेवबृहदार
ण्यकेप्याम्नातं सयथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेःक्षुद्रावि-
स्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेलोकाःसर्वेदेवाः
सर्वाणिभूतानिसर्वएतआत्मनोव्युच्चरंति तस्योपनिषत्स-
त्यस्यसत्यमितिप्राणावैसत्यंतेषामेवसत्यं भाष्ये पूर्वश्लो
केअथयदासुषुप्तोभवति नकस्यचनवेदेत्यादिश्रुत्यासु
षुप्तोमनसिपरमात्मनिलीनेसतितत्कालिनःस्थूलसूक्ष्म
प्रपंचोपिलीनोभवेदितिप्रतिपादितं अथपुनर्जागरावस्था
यांमनसिबहिर्विजातेसतिप्राक्तनसंस्कारैर्यथापूर्वंमनःप्रपंच
स्याविर्भवति धातायथापूर्वमकल्पयदितिश्रुतेः एवंसुषुप्तौ
प्रपंचलयेजागरेपुनराविर्भावेचदृष्टांतमाह सयथेति ऊर्णा
सूत्रविशेषोनाभौयस्यासावूर्णनाभिःकीटविशेषःसयथापू
र्वंस्वोत्पादितेनतंतुनाग्रस्यमानेनतंतुनाउच्चरेत् ऊर्ध्वंचरेत्
यावत्सर्वतंतुग्रसोभवति तद्वन्मनःसर्वसंस्काररूपंतंतुग्रसि
त्वा स्वयमपिलीनंभवति अथपुनःप्रपंचोदयेदृष्टांतमाह
यथेति यथाहन्यमानादुल्मुकाग्नेःसकाशाद्युगपदेवक्षुद्रा
लघीयांसःसहस्रशोविस्फुलिंगाअग्निकणाव्युच्चरंतिउद्ग-
द्वा॰ च्छंति एवमेवास्मात्सुषुप्तात्मनोमनसःसकाशात्सर्वसूक्ष्म
प्रपंचरूपाःप्राणास्तथास्थूलप्रपंचरूपाःसर्वेभूर्भुवःस्वराद्याः

प्र॰

लोकाः सर्वे देवा इन्द्रादयः सर्वाणि भूतानि स्थावरजंगमात्म
कानि सर्व एते आत्मनो देहाद्व्युच्चरंति निर्गच्छन्ति तस्य परमात्म
न उपनिषत् ज्ञानं सत्यस्य सत्यमिति वदंति एतदेव प्रकटी
करोति वैइति ज्ञानव्यवहारे प्राणा श्रुत्ये प्राणादयो हिरण्य
गर्भाद्याः सत्यं तेषामपि एष आत्मा सत्यमेव सत्यत्वमर्यादेत्य
र्थः एवंभूतभयस्यापि शोकाद्युदय इत्यर्थः तदुक्तमध्यात्म
मीमांसायां इंद्रे ह्यणीरतो नेत्र विशति मनसी रेतसा साक
मेतद्धृदं तद्धि प्रज्ञातं सकलकरणे नगर्भे दथा नासाव
केलीयमाना पुनरुदयमिता जागरादौ प्रसूते कीटे वाणुं
मिवासावुत्तरतुत्वदह्नतो निःसरंति स्फुलिंगा इति ३० ॥

वनमाली टीका ॥

उपसंहरति देहीति सर्वस्य प्राणिजातस्य देहे वध्यमानेप्ययं
देही जीवो वध्यो न भवतीति नित्यं नियतं यस्मात्तस्मात्सर्वाणि
भूतानि स्थूलानि सूक्ष्माणि नभ आदिभावापन्नानि शोचितुं
नार्हसि स्थूलदेहस्याशोच्यत्वमपरिहार्यत्वात् लिंगदेह॰
स्याशोच्यत्वमात्मवदेवावध्यत्वादिति न स्थूलदेहस्य लिंगदे
हस्य वा शोच्यत्वं युक्तमिति भावः ३० ॥

ऊहमवैजयन्ती टी॰ ॥

एवमात्मज्ञानस्य दुर्लभत्वमुक्त्वेदानीमात्मनोऽवध्यतयाऽ
शोच्यतां वदन्नुपसंहरति देहीति हे भारत सर्वस्य ब्रह्मादि॰
स्थावरांतस्य देहिनः केनाप्युपायेन वध्यमानेपि देहे देही जी
वः यतो नित्यः सर्वकालैकरसस्वरूपस्वभावस्ततोऽवध्यः
वध्यो नहि भवति यस्मादेवं तस्मात्सर्वाणि ब्रह्मादिपिपीलि
कांतानि न केवलं भीष्मादीनि देहस्वभावेन स्थूलसूक्ष्मादि
विषमाकाररूपाण्यपि स्वस्वरूपेण समानानि भूतानि समु
द्दिश्य त्वं शोचितुं शोकं कर्तुं त्वं नार्हसि न योग्यो भवसि ३० ॥

+ इदानीं सर्वप्राणिसाधारणभ्रमनिहृति मधुसूदनी टी॰ ॥ साधनमुक्तं उपसंहरति +

+ सर्वस्य प्राणिजातस्य देहे वध्यमानेप्ययं देही लिंगदेहोपाधिरा

नियतं^

गी. टी. द्वि.

त्मावध्यो न भवतीति नित्यं यस्मात्तस्मात्सर्वाणि भूतानि स्थूला
नि सूक्ष्माणि च भीष्मादिभावापन्नान्युद्दिश्य त्वं न शोचितुमर्ह
सि स्थूलदेहस्याशोच्यत्वमपरिहार्यत्वाल्लिंगदेहस्याशोच्यत
मात्मवदेवावध्यत्वादिति न स्थूलदेहस्य लिंगदेहस्यात्मनो वा
३· २ 203 शोच्यत्वं युक्तमिति भावः हि[illegible] स्थूल सूक्ष्म शरीरद्वय तत्का
र[illegible] विवेकेन मिथ्या[illegible]स्यापि संसारस्य
सत्यत्वा[illegible] धर्माधर्मादि[illegible] सर्वप्राणिसाधारणम
[illegible] विवेकेन [illegible] स्वरूप[illegible]
हिनत्वात् संगति[illegible] मे हिंसादिबाध[illegible] नाभवि
[illegible] नैव [illegible] दोषनिवं[illegible]
[illegible] निराकर्तुं हिंसादि[illegible] समाधर्मे नेवा[illegible]
त्मानं बोधयति भगवान् ३०॥

सदानंदी टी.॥

इदानीं सकलप्राणिसमानस्य भ्रमस्य च निवृत्तिसाधनं श्लो
कमुपसंहरतीश्वरः १ सर्वस्य प्राणिजातस्य वध्यमानेपि दे
हके देही न वध्यते यस्मान्नियते जुद्ववेशज २ तस्मात्सर्वाणि
भूतानि भीष्मादीनि ममत्वतः उद्दिश्य त्वं न योग्योसि शोचितुं
मूढबुद्धिवत् ३ नाशस्यापरिहार्यत्वात्स्थूलस्याशोच्यतेति
ता लिंगस्याशोच्यता चात्मवदवध्यत्वहेतुना ४ आमोक्षं तु
विनाशोस्य लिंगदेहस्य संभवेत् महाप्रलये चास्य सूक्ष्म
रूपेण संस्थितिः ५ न स्थूलस्य न सूक्ष्मस्य नात्मनो वास्ति शो
च्यता अतो निरास्पदः शोको न कार्यः सुविवेकिभिः ६ तदे
वं स्थूलसूक्ष्माभ्यां तादात्म्याध्यासतोन्तरं मिथ्याभूतोपि सं
सारः सत्यवद्भासते भ्रमात् ७ अविकारं विनत्रसर्वानर्थै
कबीजभूः सर्वसाधारणभ्रांतिरज्ञेनस्यापि बोधतः ८ निरा
कार्यानतेनायं वै देहद्वयविवेकतः आत्मनं विहि भगवानुक्त
वान्स्वकृपावशात् ९ ३०॥ ते^

नीलकंठी टीका

प्रकृतमर्थमुपसंहरति देहीति सर्वाणिभूतानिकथमे
तेदीनाअल्पबलाबलवत्तरेणमयाहंतव्याः कथमेभांश्च
भ्रादयएतैर्विनाजीविष्यंति कथंवाहंभीष्मादिभिर्गुरुभि
र्विनाजीविष्यामीतिशोचितुंनार्हसीत्यर्थः ३० ॥

ज्ञानेरी टीका

एवमुपालंभपूर्वमुपदेशमस्यहृदयेसन्निवेश्ययोक्तापिप्रकृ
तमेवोपसंहारार्थमाह यतएवंतस्माद्भीष्मादीनतुचिंत्यना
शोचितुमर्हसि ३० ॥

नतुमन्दोत्साहेनात्रयोग्येनापिभवताभ वितव्यम् यदयमत्रनिश्चयइत्याह +

रामकंठी टीका

\+ ग्रंथेसमनेनतरप्रतिपादितेदेहादिसमस्तवेद्यपदार्थात्मनव्य
तिरिक्तवेदकत्वमात्रैकलक्षणोदेहीदेहस्यवेद्यत्वमात्रेण
स्वस्यवेदकत्वमात्रेणस्वामीपरःप्रमाता सर्वस्यदेहमात्रमे
वात्मत्वेनाभिमन्यमानस्यमायीयस्यप्रमातृजन्तुजातस्यत
त्रतत्रनानारूपे[illegible]देहशरीरएकएवव्यापकतयानित्यंत्रि
त्यसततमेवावध्योहंतोविनाशयितुमशक्यः नह्यागमापा
यधर्मकाणांनानाविधानांसर्वदावेद्यत्वमात्रस्वभावानांश
रीराणांविनाशे तद्व्यापकस्यैकस्यानवछिन्नमहिम्नोवेदक
त्वमात्राव्यभिचारैकलक्षणस्यसत्यस्यात्मनोविनाशःसंभ
वति यतएवमतस्तस्याविनाशित्वेननित्यस्यात्रशोचितुंता
वन्नास्त्येवतस्माद्विनाशैकस्वभावानिभूतानि पृथिव्यादिस भूतः
न्निवेशविशेषात्मकानिशरीराण्येवशरीरत्वेनप्रतिपन्नानि
विनश्यन्ति एवमत्रशोचितुंपरिदेवितुंनार्हसि नष्टस्यना
शाविवेकिनःकःशोकस्यावसरइत्यर्थः [illegible]
[illegible]
[illegible] ३० ॥

लासिकी टीका ।

तदयमत्रनिश्चयइत्याह देहीति देहेवध्यमानेपि[illegible]

सर्वस्यमायीयस्यप्रमातृःप्राणिजातस्य

^ यतः एवं तस्मात्सर्वाणीति

^देही ^ नित्यं

गी॰ यस्मात् हे भारत प्राणिजातस्य हनने परः आत्मा नित्यो अ॰
टी॰ वध्यो हन्तुमशक्यः विवेकित्वादिति भावः ३० ॥
द्वि॰

पंचोलीटीका

यस्मादात्मनो दुर्विज्ञेयत्वात् आत्माज्ञानकृतो सर्वस्य शोक॰
मोहो निर्मूलो विवेकिना न कर्तव्य इत्यभिप्रायेण अशोच्यानि
त्यादिप्रकरणप्रतिपादितमर्थमुपसंहरति देहीति हे भारत॰
अयं देही सर्वस्य देहे हन्यमानेऽपि नित्यमवध्यस्तस्मात्सर्वाणि॰
भीष्मद्रोणादीनि भूतानि उद्दिश्य शोचितुं नार्हसि ३० ९

रणवीरसमिद्धोधिनी॥

आत्मा शरीर शरीरि विवृतिर्विवेकोपपत्तिप्रदर्शनादि पुरस्कारेण
तन्नित्यत्वानित्यत्वप्रतिपादनं तदुर्ज्ञेयतादियुक्तिप्रदर्शनं
इदं तावदत्र वस्तुतत्त्वमिति संक्षिप्य वदन्नुक्तमेवार्थमुपसंहरति
उपसंहरति देहीति देहे शरीरे वध्यमानेऽपि अयं प्रतिपादित
स्वरूपो देही नित्यं नियतं सर्वदा वध्यो न हन्यत इति तस्मात्स
र्वाणि भूतानि भीष्मादिशरीराणि त्वं शोचितुं नार्हसि योग्यो
न भवसीत्यर्थः ३०॥

मधुभाष्य

३० ॥ ॥

भाषा अनुवाद

इस प्रकार आत्माका दुर्विज्ञेय स्वभाव अर्थात् बड़े क ष्टसे भी इसका जानना कठिन यह संक्षेपसे उपदेश करिके अब शोक न करना इस विषयमे कहतेहै कि जैसे सब प्राणियों की नश्वर कहे नाश होने वाली देह मे वर्तमान यह देही कहे आत्मा देह नाश होनेसे भी इसका नाश नही क्यों कि सो आत्मा नित्य और अवध्य है इसीसे भूत जो प्राणी तिनकी देह नाशके अर्थ तुम को शोक करना उचित होता नही ३० ॥

दोहा

भारत जीव अवध्य नित सर्व देह मे यह तातें भूतसमस्त को तुं नहि योग्य संदेह ३० ॥

205

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि
युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ३१ ॥

शांकरभाष्यं

इह परमार्थतत्त्वापेक्षायां शोको वा मोहो वा न संभवतीत्युक्तं न के
वलं परमार्थतत्त्वापेक्षायामेव किंतु स्वधर्ममिति स्वधर्ममपि स्वध
र्मः क्षत्रियस्य धर्मः युद्धं तमप्यवेक्ष्य त्वं न विकंपितुं प्रचलितुमर्हसि
क्षत्रियस्य स्वाभाविकाद्धर्मादात्मस्वाभाव्यादित्यभिप्रायः तच्च युद्धं
पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति धर्मादनपेतं परं ध
र्म्यं तस्मात् धर्म्यात् युद्धात् श्रेयोन्यत् क्षत्रियस्य न विद्यते हि यस्मात् ३१

आनंदगिरिकृतटीका

श्लोकांतरमवतारयन् वृत्तं कीर्तयति इहेति पूर्वश्लोकः सप्तम्यर्थः
पारमार्थिकं तत्त्वं तदपेक्षायामेव केवलं शोकमोहयोरसंभवो
न भवति किंतु स्वधर्ममपि चावेक्ष्येति संबंधः स्वकीयं क्षात्रधर्ममनु
संधाय ततः स्खलनं परिहर्तव्यमित्यर्थः यो हि क्षत्रियस्य धर्मादनपेतं
श्रेयःसाधनं तदेव मयानुवर्तितव्यमित्याशंक्याह धर्म्याद्धीति जा
तिप्रयुक्तं स्वाभाविकं स्वधर्ममेव विशिनष्टि क्षत्रियस्येति पुनरेका
रोपादानमन्वयार्थं प्रचलितुमयोग्यत्वे प्रतियोगिनं दर्शयति स्वा
भाविकादिति स्वाभाविकत्वमशास्त्रीयत्वमिति शंकां वारयितुं
तात्पर्यमाह आत्मेति आत्मनः स्वस्यात्मनस्य स्वाभाव्यं क्षत्रियस्वभा
वप्रयुक्तं वर्णाश्रमोचितकर्मानुष्ठानादित्यर्थः धर्मार्थं प्रजापरिपाल
नार्थं च प्रयतमानस्य युद्धादुपरिरंसा अज्ञानत्वेत्याशंक्याह तच्चे
ति ततोपि श्रेयस्करं किंचिद्भविष्यतीति युद्धादुपरतिरुचितेत्याशं
क्याह तस्मादिति तस्मात् युद्धात् प्रचलनमनुचितमिति शेषः ३१

स्वामिकृतटीका

यच्चोक्तमर्जुनेन वेपथुश्च शरीरे मे रोमहर्षश्च जायते इति तदप्ययु
क्तमित्याह स्वधर्ममिति आत्मनो नाशाभावादेव तेषां हननेपि वि
कंपितुं नार्हसि किंच स्वधर्ममपि अवेक्ष्य विकंपितुं नार्हसीति संबं
धः यच्चोक्तं न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे इत्यादि तत्रा

द्धर्म्यादिति धर्मादनपेतान्न्यायात् युद्धादन्यत् श्रेयः क्षत्रियस्य न
विद्यते ३१ ॥

पिशाचभाष्यं ॥

परमार्थतत्त्वापेक्षया शोकमोहौ न संभवत इत्युक्तं न केवलं परमा
र्थतत्त्वापेक्षया शोकमोहयोरकर्तव्यता साध्यते तत्राह स्वधर्ममपि
ति स्वधर्ममपि स्वधर्मः क्षत्रियस्य युद्धं तदप्यवेक्ष्य त्वं विकंपितुं ना
र्हसि प्रचलितुं नार्हसि स्वाभाविकाद्युद्धात्स्वधर्मात् क्षत्रियस्य न विद्य
ते हि यस्मात् ३१ ॥

रामानुजभाष्यं ॥

अपि चेदमारब्धयुद्धं प्राणिमारणमपि अग्नीषोमीयवत्स्वधर्ममेवे
क्ष्य न विकंपितुमर्हसि धर्म्यान्न्यायतः प्रवृत्तात् युद्धादन्यन्न हि क्षत्रि
यस्य श्रेयो विद्यते शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमी
श्वरभावश्च क्षात्रं कर्म स्वभावजमिति वक्ष्यते अग्नीषोमीयादिषु
च न हिंसा पशोर्निहीनतरशरीरत्यागपूर्वककल्याणतरदेह
स्वर्गप्रापकत्वेन संज्ञपनस्य न वा उ एतन्म्रियसे न रिष्यसि देवा
उपेषि पथिभिः सुगेभिः यत्र यंति सुकृतो नापि दुष्कृतस्तत्र त्वा
देवः सविता दधात्विति श्रूयते इह च युद्धे मृतानां कल्याणतरदेहा
दिप्राप्तिरुक्ता वासांसि जीर्णानीत्यादिना अतश्चिकित्सकशल्या
दिकरणमातुरस्येवास्य रक्षणमेवाग्नीषोमीयादिकर्मसु संज्ञप
ने ३१ ॥

अभिनवगुप्तकृतटी॰ ॥

स्वधर्मस्य चानपहार्यत्वाद्युद्धविषयः कम्पो न युक्तः ३१ ॥

परमार्थप्रपाटी॰ ॥

अथात्मतत्त्वमतत्त्वाभिमतादृश्यपदार्थैस्त्वयापि शोको न युज्यत इत्या
ह स्वधर्ममपीति स्वधर्मं क्षात्रं स्मृतिसिद्धं तं च धर्ममेवावेक्ष्य सम्यग्वि
चार्य विकंपितुं भयं प्राप्तुं नार्हसि अथ तमेव धर्मं कथयन्नाह धर्म्या
दिति क्षत्रियस्य धर्म्यान्न्यायागताद्युद्धादन्यदहिंसायज्ञदानं श्रे
योजनकं न विद्यते अथ प्रागर्जुनोपक्रान्तश्रुतेस्तात्पर्यप्रतिपा
दिका श्रुतिः तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रियस्य क्षात्रं य
द्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयांसमाशंसते धर्मेण
यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदती

तिधर्मेवावदन्तंसत्यंवदतीति एतद्ध्येवैतदुभयंभवतीतिभाष्यं ततस्मा
दनंतरंश्रेयोरूपंधर्ममत्यसृजतातिसृष्टे स्थानीयमसृजत तदेतद्ब
ह्यमाणं तत्किं तत्रसत्ताविषयजाते तत्रैवावलक्षणंधर्मं तस्मादिदंधर्मा
त्परंउत्कृष्टंनास्ति यतः धर्मेणहत्वा अबलीयान्दुर्बलोपिबलीयां
संसमर्थमपिसमाशंसते सम्पत्प्रकारेणाभिपतति यथाराज्ञासर्वश्रे
नकृत्वा दुर्बलोपिसमर्थमर्थमाहिंसयति तथेत्यर्थः एवंवैइतिनि
श्चयेनसर्वैर्लोकैर्योधर्मस्सत्यंसत्यस्यव्यापकः ततस्मात्कारणात्स
त्यंवदन्तंपुरुषंधर्मंवदंतीत्याहुः वा इत्यथवाधर्मंवदंतंपुरुषंस
त्यंवदंतीत्याहुरेवंसत्यधर्मयोरेकार्थवाचकत्वमस्तीत्युक्तंहीति
निश्चयेनैतद्धर्मसत्याभिधानमुभयंतोभवतिब्रह्मरूपंभवतीति
त्वमसितत्त्वमसीतिश्रुतेः ॥ ३१ ॥ इतिपरमार्थप्रपाटीका ॥

पापमेवाश्रयेदित्युक्तवतोऽर्जुनस्य युद्धे स्वधर्मे धर्मभ्रांतिं निवारयति स्व
धर्ममपीति इदं युद्धं प्राणिहिंसारूपमपि स्वीयधर्म्यमहिंसावद्विहित
त्वेन स्वधर्मत्वादवश्यमनुष्ठेयमित्यवेक्ष्य विकंपितुं चलितुं युद्धस्यकु
नार्हसि यदुक्तं न च श्रेयोनुपश्यामीति तत्राह धर्म्यादिति धर्मादन
पेतं धर्म्यं तस्मात् श्रेयःसाधनं क्षत्रियस्य न विद्यते ३१ ॥

ऊत्तमवैजयंतीटीका

आत्मनो जन्ममरणाभावाच्छोकाभाव उक्तस्त्वधुनैहिकामुष्मिकसु
खप्रदं स्वधर्ममपि दृष्ट्वा तस्य शोककरणं न वमहदेवायोग्यमित्याह
ष्टिभिः स्वधर्ममिति स्वधर्मं स्वस्य क्षत्रियस्य युद्धरूपमसाधारणंध
र्ममवेक्ष्य निरीक्ष्य चापिशब्दाभ्यां देहात्मनोर्वध्यत्वे वेक्ष्य विकंपि
तुं विशेषेण कंपितुं वेपितुं नार्हसि त्वं योग्यो न भवसि हि यस्मात्
धर्मात्त्वसाधारणधर्मरूपात् युद्धात् अन्यत् श्रेयःसुखकरं क्षत्रियस्य
क्षत्रधर्माश्रितस्य न विद्यते न भवति ३१ ॥

मधुसूदनीटीका

न देवस्य स्थूलसूक्ष्मशरीरद्वयतत्कारणविद्याख्योपाधित्रयाविवेकेन मि
थ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूपं सर्वप्राणि
साधारणमर्जुनस्य भ्रमं निराकर्तुमुपाधित्रयविवेकेनात्मस्वरूपमभि
हितवान् संप्रति युद्धाख्ये स्वधर्मे हिंसादिबाहुल्येनाधर्मत्वप्रतिभासरू
पमर्जुनस्यैव करुणादिदोषनिबंधनमसाधारणं भ्रमं निराकर्तुं हिंसा
दिमत्त्वेपि युद्धस्य स्वधर्मत्वेनाधर्मत्वाभावं बोधयति भगवान् न केवलं
परमार्थतत्त्वमेवावेक्ष्य किंतु स्वधर्ममपि क्षत्रियधर्ममपि युद्धाऽपरांमु
खत्वरूपमवेक्ष्य शास्त्रतः पर्यालोच्य विकंपितुं विचलितुं धर्मादधर्म
त्वभ्रांत्या निवर्तितुं नार्हसि तच्चैवं सति यद्यप्येते न पश्यंतीत्यादिना
नरके नियतं वासो भवतीत्यंतेन युद्धस्य पापहेतुत्वं त्वया यदुक्तं कथं
भीष्ममहं संख्ये इत्यादिना च गुरुवधब्रह्मवधादिपापकारणं यदभिहितं त
त्सर्वं धर्मशास्त्रापर्यालोचनादेवोक्तं कस्मात् हि यस्माद्धर्म्यात् अपरां
मुखत्वधर्मादनपेताद्युद्धादन्यत्क्षत्रियस्य श्रेयः श्रेयःसाधनं न विद्य
ते युद्धमेव हि दृष्टपृथिवीजयद्वारेण प्रजारक्षणब्राह्मणशुश्रूषादिद्वारा

धर्मनिर्वाहकमिति तद्देवक्षत्रियस्य प्रशस्ततममित्यभिप्रायः तथा चोक्तं प
राशरेण क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदंडवान् निर्जित्य परसैन्या
नि क्षितिं धर्मेण पालयेत् मनुनापि समोत्तमाधमै राजा चाहूतः पाल
यन्प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन् संग्रामेष्वनिवर्ति
त्वं प्रजानां चैव पालनं शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परमित्या
दि राजशब्दश्च क्षत्रियजातिमात्रवाचीति स्थितमेवेष्ट्यधिकरणे ते
न भूमिपालस्यैवायं धर्म इति न भ्रमितव्यं उदाहृतवचनेपि क्षत्रि
यो हीति क्षात्रं धर्ममिति च स्पष्टं लिंगं तस्मात्क्षत्रियस्य युद्धं प्रशस्तं ध
र्म इति साधु भगवताभिहितं अपशवो वा अन्ये गोअश्वेभ्यः पशवो गो
अश्वा इतिवत्प्रशंसा [illegible] भगवताभिहितं अपशवो अन्ये गो
अश्वेभ्यः पशवो गोअश्वा इतिवत्प्रशंसालक्षणया फलदानस्यान्यत्
श्रेयःसाधनं न विद्यते इत्युक्तमिति न दोषः एतेन फलदानाप्रशंसनं
किंचिदनिष्टं तेन ततो निहत्य वित्तेनेति निरस्तं न च श्रेयोऽनुपश्यामि
हत्वा स्वजनमाहवे इत्येतदपि ३१

सदानंदटीका

देहद्वयविवेकेन सर्वसाधारणो भ्रमः निराकृतोथ युद्धाख्ये स्वधर्मेऽध
र्मताभ्रमे १ अर्जुनस्य निराकर्तुमसाधारणमीश्वरः स्वधर्मत्वेन यु
द्धस्याधर्मत्वाभावमाहवे २ वक्तुं न त्वमवेक्ष्यैव कार्यं युद्धं न केवलं
किंतु युद्धादवैमुख्यं क्षात्रं धर्मं हि शास्त्रतः ३ पर्यालोच्य स्वधर्मत्वं नानि
वर्तितुमर्हसि यस्माद्रणादवैमुख्यं धर्मयुक्तात्परस्य च ४ न श्रेयः
साधनं सम्यग्विद्यतेऽन्यद्धि शास्त्रतः जयदं रणसंग्रामः प्रजारक्षणतस्त
था ५ विप्रभक्त्यापतः क्षात्रधर्मनिर्वाहको भवेत् तथोक्तो मनुना
धर्मो राज्ञो युद्धादिलक्षणः ६ समोत्तमाधमै राजा चाहूतः पालयन्प्र
जाः न निवर्तेत संग्रामात्क्षात्रधर्ममनुस्मरन् ७ न च श्रेयोऽनुपश्यामी
त्येतेनैव निराकृतं ८ ३१ ॥

नीलकंठटीका

अर्जुनस्य अनात्मनि देहे आत्मधीरूपो मोहो निवारितः इदानीं स्वध
र्मे युद्धे अधर्मधीरूपं मोहं निवारयति स्वधर्ममपीत्यादिना युद्धं क्षत्रि

पश्यस्व धर्मः तमवेक्ष्यापि विकंपितं चलितं नार्हसि हियस्मात् धर्म्यात् धर्मा
दनपेतात् युद्धादन्यत् क्षत्रियस्य श्रेयः प्रशस्ततरं नास्ति ३१ ॥

आनंदी टीका

एवं देहिदेहयोर्भेदज्ञापनेनाशोच्यत्वं प्रतिपाद्येदानीं स्वधर्मेयु
द्धेयद्धर्मत्वमारोपितं तन्निरसितं यत्क्षत्रियः स्यान्निश्चितं स्वहितं
मेदं इति मार्थितेतानरं सवक्ष्यते तोति धर्म्याद्धमेशास्त्रोपदिष्टात्
अन्यश्चोपेतं विनाचरणादि श्रेयोनिःश्रेयसकरं नज्ञानेकर्म
वसशुद्धिं तेश्रेयस्करमित्यपाह त्रितमम् ३१ ॥

+ अथप्रतिपादितोपपत्त्यातात्त्विकमात्मस्व रामकंठी टीका रूपंसप्रेतिपत्तमशक्तमर्जुनंमन्यमानोभगवान् क्षत्रि
यजात्यविताभिमानार्हं पनत्राव यणात्र श्रेयसकर्मणिप्रवर्तयितुमाह +

+ स्वधर्ममपि चावेक्ष्येत्यादि श्लोकसप्तकमेतन्निगदव्याख्यातम् ३१

केवलंपरत / हत्वैवंया + क्षत्रियस्यस्वधर्मंयुद्धमवेक्ष्य न लासिकी टीका विकंपितुमर्हसि धर्मस्यानपरिहार्यत्वात् यतोधर्म्याद्धर्मा दानपेताद्युद्धादन्यच्छ्रेयस्करं क्षत्रियस्यान्यन्नास्ति +

+ तदुक्तं मनुना समोत्तमाधमैराजा चाहूतः पालयन्प्रजाः ननिव
र्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन् संग्रामेष्वनिवर्तित्वं प्रजानां चै
व पालनम् शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परं राजा क्ष
त्रियः + ३१ + ॥ एवंसकामेरपिक्षत्रियैर्युद्धं स्वर्गहेतुत्वात्त्याज्यं किंतमोपदिष्टविवेकस्येत्याह +

पंचोलीटीका

नकेवलं परमार्थदृष्ट्या शोको युक्तः स्वधर्मदृष्ट्यापि शोको नयुक्तः
इत्याशयः स्वधर्ममपीति चपुनः स्वधर्ममपि क्षत्रियस्य स्वकीयं
युद्धलक्षणं धर्मं अवेक्ष्य विचार्य विकंपितं प्रचालितं न अर्हसि हि यः
स्मात् क्षत्रियस्य धर्म्यात् युद्धात् धर्मादनपेतात् संग्रामात् अन्यत् श्रेयः
नविद्यते ३१

भाषीरसमिद्धोधिनी॥

एवं देहिनो वध्यत्वाशोकानर्हतां प्रतिपाद्य हिंसाप्रायत्वाद्युद्धस्या
धर्मत्वाभिमान निबंधनं वेपथुस्वधारीरेमेरोमहर्षश्चजायते इत्या
दिना प्रकाशितं देहकंपादिकं निराकर्तुं युद्धस्य स्वधर्मत्वेनाधर्म
त्वाभिमानं बोधयति स्वधर्ममपीति न केवलं देहिनो वध्यत्ववि
वेकेनैव नवकंपानर्हता किंतु स्वधर्ममपि युद्धरूपं मुख्यतालक्ष
णं क्षत्रियजात्युचितधर्ममपि चावेक्ष्य प्रान्वतः पर्यालोच्य विकं
पितं धर्मे धर्मत्वभ्रांत्या तस्माद्विचलितं नार्हसीत्यर्थः एतेन वयध

ध्येतेन पश्यंतीत्यारभ्य नरके नियतं वासो भवतीत्यनुशुश्रुमेत्यंते
नग्रंथेन सामान्यतउक्तं कथं भीष्ममहं संख्ये इत्यादिना विशि-
ष्योक्तं च गुरुवधादिनिबंधनं गुरुहत्यापापहेतुत्वमाशंकितमपा
स्तं नन्वधर्मोनतारणामपि श्रेयःसाधनत्वेन प्रसिद्धानां सर्वेऽतो
युद्धप्रवनिपोजयसीत्यत आह धर्म्यादिति हि यस्मात्क्षत्रियस्य ध
र्म्यादपरांमुखत्वलक्षणात्धर्मादनपेताद्धिंसाप्रायादपियुद्धादन्य
दहिंसामयमपिभैक्षचर्यादिकं न श्रेयः श्रेयःसाधनं न विद्यते हि
घावपराधः क्षत्रियो हि प्रजा रक्षन्शस्त्रपाणिः प्रदंडयन् निर्जि
त्यपरसैन्यानि क्षितिं धर्मेण पालयेदिति मनुरपि समोत्तमाध
मै राजा चाहूतः पालयन्प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्ममनु-
स्मरन्निति तथा संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनं शुश्रूषा
ब्राह्मणानां च राज्ञः श्रेयस्करं परमिति राजा चात्र क्षत्रियजातिकः
सामान्यत उच्यते एतेन च न च श्रेयोनुपश्यामि हत्वा स्वजनमा
हवे इत्यर्जुनाशंका निरस्ता ३१॥

मधुभाष्य

३१॥

इदानीं यद्येते न पश्यन्तीत्यादिना नरके नियतं वासो भवतीत्यनेन पत्याय हेतुत्वं युद्धस्योक्तं तेनोक्तं यच्च
कथं भीष्ममहं संख्ये इत्यत्र गुरुवध ब्रह्मवधाद्युकरणमभिसंधितं तत्सर्वमेकप्रहारेणेव परिहरति भगवान्

रामचंद्रसरस्वतीकृतटीका

स्वधर्ममपि चावेक्ष्येति अपि च स्वधर्मं युद्धलक्षणमवेक्ष्य तत्त्वरूपेण
त्वतो ज्ञात्वा विकंपितुं युद्धाच्चलितुं नार्हसि अनवेक्षितयुद्धस्वरूपस्यैव
युद्धान्नरकपातो युद्धाद्बिभेषीत्यर्थः अयं भावः युद्धशब्दस्य संप्रहारार्णि
ष्ठातो निष्पन्नत्वात् संप्रहारशब्देन च सम्यग्वैरिप्राणवियोगानुकूलः प्रहा
रः संप्रहार इति व्युत्पत्त्या वैरिप्राणवियोगानुकूलप्रहारप्रक्रियाप्रतीतेरेव
कृत्यत्वाद्यंगीकारेऽपि वा युद्धशब्दस्यास्मिन्नेवार्थे रूढेः ये त्वाहवेषु युध्यं
ते भूम्यर्थमपराङ्मुखाः अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथेति
याज्ञवल्क्यवचने संग्रामे प्रहृतानां विजयिनां भूम्यादिकलं हतानां तु
योगिवत्स्वर्ग एव फलमित्युक्ते विजये मरणे वा वैरिमरणादधिकस्य प्र
हारकरणकवैरिमारणात्मकस्य युद्धाख्यस्य कर्मणो ऐहिकामुष्मिकाभि
मतफलत्वदर्शनाद्वैरिहिंसाफलकसंप्रहारमात्रस्य युद्धत्वाभावात्तस्याथ
र्नाशपातित्वात् हिंसायाश्च विधिस्पृष्टतया परिहृत्य च विशेषविषये सा
मान्यमवर्तत इति न्यायेन न हिंस्यात्सर्वा भूतानि न ब्राह्मणो हंतव्य इत्यादि
निषेधाविषयत्वात् फलांशे या हिंसा वैदिकी सा निषिध्यत इति मतेऽपि
अस्याथर्वांशार्पितत्वा हिंसाया निषेधाविषयत्वप्रतीतेर्न कर्मस्वरूपेणतः
पातित्वं हिंसा नरकादिहेतुः अन्यथाग्निष्टोमीयं पशुमालभेत ब
लेर्ब्राह्मणमालभेतेत्यादिहिंसानामपि नरकादिफलहेतुत्वेगतेः
र्वतं त्रेण श्येनादीनां तु फले हिंसाफलांशे च विधेरनुष्ठापकत्वाभावान्नि
षेधप्रवृत्तिरिति भवतु सा नरकादिसाधनमिति युक्तमेतन्मवचनं न
दोषो हिंसाया माहवे न्यत्रास्ति असारथ्यनायुधकृतांजलिप्रकीर्णकेशप
राङ्मुखोपविष्टस्थलवृक्षारूढगोब्राह्मणगवादिभ्य इति यच्च
शंखवचनं न पानीयं पिबंतं न भुंजानं नोपानहौ मेचयंतं नावर्माणं न स
वर्माणं न स्त्रियं न करेणुं न वाजिनं न सारथिं न सूतं न दूतं न ब्राह्मणं
न राजानमाजौ हन्यादिति तत्र दूतगवादिप्राप्यपाठाद्दात्रहननिब्रा
ह्मणविषयः किंच क्षात्रेण कर्मणा जीवेद्धिशां वाप्यापदि द्विजः इत्या
पद्धर्मतया ब्राह्मणस्य युद्धं प्राप्तं तत्र यदि क्षात्रधर्मेण प्रवर्तमानो ब्रा
ह्मणो वध्यः स्यात्तर्हि तत्रैव ब्राह्मणस्यैवमेव संपाद्य परिजयः कर्तव्य

गी॰
टी॰
३॰

210

इतिचतुरंगसेनासंपाद नेमर्थमेवस्यादित्यादिबहुवक्तव्ये किम
त्राभिनिवेशेन स्वधर्ममपि वावेशेनावदतो भगवतोयमभिसंधिर्म
मप्रतिभाति यदत्रदुर्विनीतत्वेन त्वं तः श्रेयान्मदर्तीत्यलं नन्वकि
मस्माकमनेनैवधर्मेण राजसूयादीन् स्वधर्मान्तत्परिहारेणक
रिष्याम इत्याशंक्याह धर्म्यादीति श्रेयः शब्देन श्रेयः साधनं ल
क्ष्यते हि शब्दः प्रसिद्धौ न विद्यते प्रशस्ततरमिति शेषः कुतोन्य
द्धेयो न विद्यत इत्याशंक्योक्तं धर्म्यादिति धर्म्यं वर्णाश्रमधर्मा
न्तेभ्यो नपेतमिति वर्णाश्रमधर्मे रक्षणमपि यस्य फलमित्यर्थः
तत्र शब्दाद्वर्णाश्रमधर्मभ्रंशात्यक्ततात्त्रायत इत्यर्थे निरुक्ता
त्तत्र शब्दनिष्पत्तेरयमर्थोवसीयते राजसूयाद्यनुष्ठानान्नैतत्फ
लंलभ्यत इति भावः ननु किं प्रातः स्वाध्यायके विद्वेरिणे यथाकथं
चित्संध्यावंदनाग्निहोत्रादिवद्युद्धं कर्तव्यमित्याशंक्याह तेदंति
यत्तनिमित्तं किंत्वनियतनिमित्तं सदैहिकामुष्मिकफलदा
यीति सर्वकर्मवैलक्षण्यमाह ३१ ॥

भाषा अनुवाद

प्रथम अध्यायके २९ श्लोकमे अर्जुनने कहाहै कि हमारी शरीरको पतीऔ रोम खडेहोते हाथसे धनुषबाण गिरेपडतेहै सो यहभी अयोग्य असंभवहै जिसहेत स्वधर्म्म जोतिस संग्राममे प्रवृत्त हो के भीष्म पितामह आदिके हनन करनेसे अविनाशी आत्माका विनाश मानि तुमारा डरना औ कांपना यह युक्तिसे सिद्धहोता नही और ३१ श्लोकमे कहाहैं किये अपने जनोंको नाशकरि हम श्रेयकहे कल्यान नही देखते उसपर कहतेहै कि धर्म्मयुक्तजो न्या य युद्ध तिसकी अपेक्षा अर्थात उससे बढिकर क्षत्रियोंको औ कौन कल्याण करनेवाला कर्म्महै अर्थात् कोईभी नहीं ३१॥

दोहा

धर्मादि अपणो देखके नहित वेपथुयोग युद्धधर्मसें श्रेयद य और न क्षत्रिकोलोग ३१॥

यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनः
क्षत्रियाःपार्थलभन्तेयुद्धमीदृशम् ३२ ॥

शांकरभाष्यं

कुतश्च तद्युद्धं कर्तव्यं इत्युच्यते यदृच्छयेति यदृच्छया चाप्रा
र्थितमागतमुपपन्नं स्वर्गद्वारमपावृतमुद्घाटितं ये एतदीदृशं
युद्धं लभन्ते क्षत्रियाः हेपार्थ किन्न सुखिनस्ते ३२ ॥

आनन्दगिरिकृतटीका

युद्धस्य गुर्वाद्यनेकप्राणिहिंसात्मकस्याहिंसा शास्त्रविरोधान्ना
स्ति कर्तव्यतेति शङ्कते कुतश्चेति अग्नीषोमीयहिंसावद्युद्धमपि
क्षत्रियस्य विहितत्वादनुष्ठेयं सामान्यशास्त्रतो विशेषशास्त्रस्य
बलीयस्त्वादित्याह उच्यतइति तथापियुद्धे प्रवृत्तानामैहिका
मुष्मिकस्यापि सुखाभावादुपरतिरेव ततोयुक्ता प्रतिभातीत्या
शंक्याह यदृच्छयेतिचिरेण चिरतरेण कालेनच यागाद्यनुष्ठा
यिना स्वर्गादिभाजो भवन्ति युद्धमानास्तुक्षत्रिया बहिर्मुख
ताविहीनाः सहसैव स्वर्गादिसुखभोक्तारस्तेन तव कर्तव्यमेव
युद्धमिति व्याख्यानेन स्फुटयति यदृच्छयेत्यादिना इहामुत्रच भवि
सुखवतामेव क्षत्रियाणां स्वधर्मभूतयुद्धसिद्धेस्तादर्थ्येनोपात्ते
शोकमोहौ हित्वा कर्तव्यमित्यर्थः ३२ ॥

स्वामिकृतटीका

किंचमहतिश्रेयसिस्वयमेवोपागतेसति कुतोविकंपसेइत्याह यदृच्छ
येति यदृच्छयाअप्रार्थितमेवोपपन्नंप्राप्तमीदृशंयुद्धंसुखिनःसभाग्या
एवलभंते यतोनिरावरणंस्वर्गद्वारमेवैतत् युद्धायप्रवृत्तिविषययुद्धं
लभंतेतएवसुखिनइत्यर्थः एतेनस्वजनंहिकथंहत्वासुखिनःस्याम
माधवेतियदुक्तंतन्निरस्तंभवति ३२ ॥

पैशाचभाष्यं

इतश्चयुद्धंकर्तव्यमित्युच्यते यदृच्छयाचोपपन्नमागतं३२ ॥

रामानुजभाष्य

यदृच्छयाचोपपन्नमितिअप्रयत्नोपनीतमिदंनिरतिशयसुखोपायभू
तंनिर्विघ्नमीदृशंयुद्धंसुखिनःपुण्यवंतः क्षत्रियालभंते ३२ ॥

अथ कृत्स्नमेव दृढीकुर्वन्नाह यदृच्छयेति भोगार्थं ईदृशं जयाजयाद्यभिनिवेशरहितयुद्धं
सुखिनः सुकृतिनः क्षत्रिया लभन्ते अन्यस्य दुर्लभत्वमाह स्वर्गेति पुनः कीदृशं स्वर्गद्वार
मपावृतं निरावरणं यदृच्छया अप्रार्थनया उपपन्नं सिद्धं भवतीति ३२

गी·
टी·
डि·

अभिनवगुप्तटीका

अन्योपि ये काममयाः क्षत्रियास्तेपीदृशं युद्धं स्वर्गहेतुमात्रत्याज्यं
किं पुनर्यस्येदृशं ज्ञानमुपदिष्टमिति तात्पर्यम् न पुनः स्वर्गपर्यवसायी
श्लोकः ३२ ॥

परमार्थप्रपाटीका

~~अथ विपदे दोषमाह अथ चेदित्यादिना श्लोकचतुष्टयेन यदेवं~~
~~त्वं दुष्कमनाकर्णयन्नेव धर्मसाधकं संग्रामं त्वं न करिष्यसि तर्हि~~
~~स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि लोकस्थायिनीं कीर्तिं च हित्वा पापं~~
~~परलोकप्रतिबंधकं अवाप्स्यसि अनेन दोषद्वयेन इहलौकिक~~
~~नामपरिहारः सूचितः ३२~~ ॥

वनमालीटीका

किंच महति श्रेयसि स्वयमेव लब्धे विलंबो न कार्य इत्याह यदृच्छयेति
यदृच्छया केनापि भाग्येनाप्रार्थित प्राप्ते सकामानामयाहृते निरावर
णे स्वर्गस्य द्वारे निःकामस्य मोक्षोपयुक्ते सुखिनो भाग्यवन्तः क्षत्रिया
ईदृशं युद्धं लभन्ते ३२ ॥

उत्तमवैजयंतीटीका

किं च ईदृशाः स्वयमेवागतो युद्धस्तु निरतिशयपुण्यवद्भिरेव क्षत्रियैर्ल
भ्यते न तु सर्वैरल्पपुण्यकृद्भिरित्याह यदृच्छयेति यदृच्छया अय
त्नेन उपपन्नं प्राप्तं स्वर्गद्वारं स्वर्गप्राप्तिरूपापवृतं अपावृतं विघ्नरू
पकपाटाद्यावरणरहितं ईदृशं एवं प्रकारकं युद्धं च शब्दो ऽवधा
रणार्थकः सुखिनः पुण्यवन्तः सुखस्य पुण्यफलरूपत्वात्फ
लसाधनयोरैक्यभावेन सुखग्रहणेन पुण्यग्रहणं तात्पर्यार्थमि
त्यभिप्रायः क्षत्रियाः लभन्ते प्राप्नुवंति न तु अपुण्यवंत इत्यर्थः ३२ ॥

मधुसूदनीटीका

न च एवंभूतस्य कर्तव्यत्वेऽपि भीष्मद्रोणादिभिर्गुरुभिः सह हननकर्म प्रवृत्ति
न मति गर्हितत्वादित्याशंक्याह यदृच्छयेति अप्रयत्नव्यतिरेकेण चोप
पातेन अप्रार्थनयैवोपस्थितं ईदृशं भीष्मद्रोणादिवीरपुरुषप्रति
योगिकं सुकीर्तिराज्यलाभदृष्टफलसाधनं युद्धं ये क्षत्रियाः प्रतियो
गित्वेन लभन्ते ते सुखिनः सुखभाजन एव जये सत्यनायासेनैव यश
सो राज्यस्य च लाभात् पराजये चातिशीघ्रमेव स्वर्गस्य लाभादित्या
ह स्वर्गद्वारमपावृतमिति अप्रतिबद्धं स्वर्गसाधनं युद्धं अथव

यागेनैव स्वर्गजनकं ज्योतिष्टोमादिना चिरन्तरेण देहपातस्य प्रतिबंधाभा
वस्य चापेक्षणादित्यर्थः स्वर्गद्वारमित्यनेन श्येनादिवत्प्रत्यवायशंका
परिहृता श्येनादयो विहिता अपि फलदोषेण दुष्टाः तत्फलस्य शत्रुवध
स्य न हिंस्यात्सर्वभूतानि ब्राह्मणं न हन्यादिशास्त्रनिषिद्धस्य प्रत्यवायज न्यादि
नकत्वात् फले विधभावाच्च न विधिस्पृष्टे निषेधानवकाश इति न्या
यावतारः फलस्यैके हिंस्ले स्वर्गः स च न निषिद्धः तथा च मनुः आह
वेषु मिथोऽन्योन्यं जिघांसंतो महीक्षितः युध्यमानाः परं शक्त्या स्वर्गं
यान्त्यपराङ्मुखा इति फलं त्वग्नीषोमीयालंभवद्विहितत्वान्न निषेधेन
स्प्रष्टुं शक्यते षोडशिग्रहणादिवत् ग्रहणाग्रहणयोस्तुल्यबलत्व
लतया विकल्पवत्सामान्यशास्त्रस्य विशेषशास्त्रेण संकोचसंभवात्
तथा च विधिस्पृष्टे निषेधानवकाश इति न्यायाद्युद्धं न प्रत्यवायजनकं
नापि भीष्मद्रोणादिगुरुब्राह्मणादिवधनिमित्तो दोषः तेषामाततता षा
यित्वात् तदुक्तं मनुना गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आत
तायिनमायान्तं हन्यादेवाविचारयन् आततायिनमायान्तमपि वेदान्त
गं रणे जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् जिघांसीयादिति जि
घांसीत इत्यादित्यर्थः नाततायिवधे दोषो हंतुर्भवति कश्चनेत्यादि
ननु स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः अर्थशास्त्रात्तु बलव
द्धर्मशास्त्रमिति स्थितिरिति याज्ञवल्क्यवचनात् आततायिब्राह्म
णवधेपि प्रत्यवायोस्त्येव ब्राह्मणं न हन्यादिति निषिद्धं दृष्टप्रयोजना
नपेक्षत्वाद्धर्मशास्त्रं जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदिति
च स्वजीवनार्थत्वादर्थशास्त्रं अत्रोच्यते ब्राह्मणे ब्राह्मणमालभेतेर
इ तिवं युद्धविधायकमपि धर्मशास्त्रमेव स्वर्गदुःखसमेकृत्स्नेत्यत्र दृष्ट
प्रयोजनानपेक्षत्वस्य वक्ष्यमाणत्वात् याज्ञवल्क्यवचनेन दृष्टप्रयोज
नोद्देशेन कृतराज्यादिकृतवधविषयमित्यदोषः मिताक्षराकारस्तु
मोर्थसन्निपाते धर्मग्राहिणमपतन्देवेति द्वादशवार्षिकप्रायश्चित्तस्यैतद्वह
परामृष्टस्यापक्षेवेन विधानात्मिच लब्धार्थशास्त्रानुसारेण च तच्छा
द्व्यवहारे शत्रोरपि जये धर्मशास्त्रातिक्रमो न कर्तव्य इत्येतन्मरवचनमे
नदित्याह भवत्वेवं न नो हानिः वक्तव्याद्व्यवहारेयथामतिर्थिनो

213

प्रतो लेख्यं यथावेदितमर्थिना समामासनदर्शाहोनामजात्यादिचिह्नि
ते कृत्वा सोत्तरे लेख्यं पूर्ववेदकसन्निधौ ततोर्थी लेखयेत्सद्यः प्रतिज्ञा
तार्थसाधनं तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोन्यथा: चतुष्पाद्व्य
वहारोयं विवादेषूपदर्शितः प्रतिवादिनोग्रे वादिना निवेदितस्यार्थस्य
संवत्सरादिचिह्नेन लेखनं भाषा प्रतिज्ञापत्त्रमित्येकः पादः यथा स्ववर्ण
शतमयं मे धारयति इति प्रतिज्ञायां नाहं धारयामीत्युलेखनं द्वितीयः
नं० पादः ततः प्रतिज्ञायां साध्यं प्रथमवादी लेखयेत् लिखितं साक्षी च म
मवर्त्तते इति तृतीयः पादः ततो वा युक्तस्य लिखितादिप्रमाणस्य सि
द्धिश्चतुर्थः पाद इति विवादेषु चतुष्पाद्व्यवहारोयं धर्मशास्त्रे प्रदर्शितः
तदेवं युद्धकरणे स्वोक्तेः त्यजने हि कथं हन्तासाक्षिणः स्याम माधवे
त्यर्जुनोक्तमपाकृतं ३२ ॥

सयानंदीटीका

ननु भीष्मादिभिः सार्द्धं गुरुभिर्नोचितो रणः स्वधर्मोप्यतिनिंद्यत्वादि
त्याशंक्याह केशवः १ स्वप्रयत्नं विनैव त्वं भीष्मादिप्रतियोगिकं की
र्त्यादिसाधनं युद्धं प्रतियोगितया चये २ लभंते क्षत्रियास्तेवै भवंति
सुखभागिनः प्रतिबंधं विना स्वर्गे हेतुर्युद्धमिदं यतः ३ आततायिनत्वा
त्तेषां भीष्मादीनां वधे तव न दोषोस्ति तदेवोक्तं मनुनायमंभास्वता ४
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायांतं हन्या
देवाविचारयन् ५ आततायिनमायांतमपि वेदांतपारगं जिघांसंतं
जिघांसीयान्न तेन ब्रह्महा भवेत् ६ नाततायिवधे दोषो हंतुर्भवति क
श्चन गुरुणा ब्राह्मणेनापि वृद्धेन महर्षिणा ७ भीष्मस्याप्यभवद्यु
द्धं जामदग्न्येन तेन गुरोः अतस्त्वयापि शास्त्रेण युद्धं कार्यं नयेघाते ८ ३२॥

नीलकंठीटीका

किंच यदृच्छया अप्रार्थितमप्युपपन्नमुपस्थितं स्वर्गद्वारं अपा
वृतमुद्घाटितं ये हि क्षत्रिया लभंते ते सुखिनो यस्माद्भवंतीति संबंधः ३२॥

ग्यानेदी टीका

यदृच्छया यत्नं विनोपपन्नम् स्वर्गद्वारमपावृतमुद्घाटितम् सुखिनः भाग्यवन्तः ३२ ॥

रामकेठी टीका

एवं स्वर्गादि अनित्यफलप्राप्तिहेतुः प्रवृत्तिलक्षणधर्मसमाश्रयणेनापि ३२ ॥

लालि की टीका

~~एवं स्वधर्मेपि निमित्ते एवं कर्णे दीनमनुग्रहं ... किं वस्तमनुष्य~~ ~~... विधेयेमे ... नासि~~ यदृच्छयेति + यद्वाय एवं विधेयुद्धं लभन्ते तएव सुखिनः भविष्यत्स्वर्गसुखभाजः इत्यर्थः ३२ ॥

(margin: वरणं स्वर्गकामे वैतत् ॥ ; किं तवोपदिष्टं विवेकस्येत्याह ; दिव्यते ... आह ; + यदृच्छया प्रार्थितमेवोपनतं प्रार्थमीदृशं युद्धं सुखिनः सभाग्या एव क्षत्रिया लभन्ते यतो निरावरणं स्वर्गद्वारमेवैतत्)

पंचोलीटीका

स्वधर्मलक्षणे युद्धकरणे कारणांतरमाह यदृच्छेति हे पार्थ ईदृशं युद्धं सुखिनः पुण्यवंतः क्षत्रिया लभंते कीदृशं अपावृतं स्वर्गद्वारं उद्घाटितकपाटं स्वर्गद्वारमित्यर्थः च पुनः यदृच्छया उपपन्नं अप्रार्थितमागतं ३२

श्रणवीरसमिद्बोधिनी ॥

ननु न मया युद्धं सर्वथा प्रत्याख्यायते न्यथा साद्भवे वा योगस्यानारंभणीयत्वे वस्यात् किंतु भीष्मद्रोणादिगुरुप्रतियोगिकं तदकीर्ति निरयगति निमित्तत्वादैहिकामुष्मिको भय प्रत्यवायजननादति गर्हितं कथमेवं विध्येन कर्तव्यता विषयः स्यादित्याशंक्यानेकप्रयत्नप्राप्यापि महाश्रेयसि तद्यतिरेके नैवोपगतं कथं उभोग्यः वान्यथाव भासोथ मतवुद्धात उपेत्त सइति प्रतिपादयन्नाह यदृच्छयेति चोवधारणे यदृच्छाव विनैव प्रार्थनादेवव शेनेति यावत् उपपन्नमुपस्थितमीदृशं भीष्मद्रोणादिमहावीरगुरुप्रतियोगिकं युद्धं समरकर्म सुखिनः सुखं विद्यते भावित्वेन येषां ते तादृशाः स्वर्गसुखमनुभवयति विशिष्टाश्चक्रन देवान्प्रहीता

भाष्यवत्तयवनस्तुनर्विधिवंचिताः क्षत्रियाःप्राद्रुष्टनेनप्रजापा॰
लनधर्मारणः श्रुरूपवीतत्वमंतेप्रतियोगितयाप्राप्नुवंति यत्तप
तदपाहृत्तमप्रतिबद्धमविलंबेनप्रवेशाद्दायिनंस्वर्गद्वारं स्वर्गस्य
द्वारमिवप्रवेशसाधनीभूतनतुनःप्रत्यवायजनकं फलस्यस्वर्ग
स्यप्रादुर्वेश्मिथोन्योन्यंजिघांसंतोमहीक्षितः युध्यमानाःपरंश
क्त्यास्वर्गंयांत्यपराङ्मुखा इत्यादिनामन्वादिभिर्विहितत्वात्
निषिद्धफलजनकमेवदृकिमंतजनकं नवभीष्मद्रोणादिगु
रुब्राह्मणादिवधनिमित्तदोषजनकतयातत्त्वमस्त्येवेतिवाच्यं॥
गुरुंवाबालवृद्धौवाब्राह्मणंवाबहुश्रुतं आततायिनमायांतंहन्या
देवाविचारयन् आततायिनमायांतमपिवेदांतगंरणे जिघां॰
संतंजिघांसीयान्नतेनब्रह्महाभवेत् नाततायिवधेदोषोहंत्र
भवतिकश्चनेत्यादिनातैरेवतदभावस्यप्रतिपादनात् नापिस्म
त्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः अर्थशास्त्रात्तुबलवद्धर्म
शास्त्रमितिस्थितिरितियाज्ञवल्क्यस्मृतेर्ब्राह्मणंनहन्यादितिधर्म
शास्त्रानमेव विधेयंनतुनजिघांसंतमित्यर्थशास्त्रं दृष्टप्रयोज
नार्थत्वात्तस्येति प्रत्यवायजनकत्वस्यतादवस्थ्यमिति सर्वदुःखे
समेकृतेप्यनुपदेवव्यमाणोपकारेणदृष्टप्रयोजनमात्रदर्शनेनैव॰
विहितस्ययुद्धस्यविधिविषयतयाजिघांसंतमित्यस्यधर्मशास्त्र
सनत्वाद्व्यभिचारात् अत्यंतेदमस्ययुद्धस्यसतिजयेराज्यकीर्त्या
देर्दृकिस्यपराजयेवास्वर्गादेरामुष्मिकस्यफलस्यसद्भावादर्थिनः
मत्वेकथंदृष्टादृष्टोभयफलत्वंनेदवते नवेघते इतिमापापाप
कीर्तिश्रमेणनहिस्वर्गोभूदितितात्पर्यं एतेनचस्वजनंहत्कथं
हत्वासुखिनःस्याममाधवेत्यस्यानोक्तिनिरस्ता ३२

मधुभाष्य

३२॥

यदृच्छयेति यदृच्छयाऽप्रार्थितमेवकेनचिन्निमित्तेनोपपन्नं व
कारपर्यवसायियत्रपापिनः प्रत्यर्थिनोवधेभूयानचारः एवंविधं मर
णं अपावृतं उद्घाटितं स्वर्गद्वारं स्वर्गफलकमित्यर्थः एवंविधमेतद्युद्धं
नः क्षत्रिया अस्मदर्पितकायवाङ्मनसो ये क्षत्रियास्ते हे पार्थ लभंते
नान्ये तस्मान्नवेदृशं युद्धं स्वल्पफलमितिभावः नन्विदं फलसा
धनं युद्धं चैहिकमामुष्मिकं फलं नेच्छामि नकांक्षे विजयं कृष्णेत्यपि
त्रैलोक्यराज्यस्येच्छन्तत्वात् कथं मम कर्तव्यतयोपदिश्यत इत्या
शंक्याकरणेदोषमाह ॥ ३३ ॥

विजयेऽहमिति ह्युक्तं साम्राज्य भोगादिफलत्वेनास्येति ह्य पि ऐहिकफलसाधनमित्यर्थः

युद्धं

215

भाषाअनुवाद

औरजोकहोकि गुरुआदि अनेक प्राणियोंकी हिंसायुद्धमे हो
यगी औ शास्त्रमे अहिंसा परम धर्म्म कहाहै इससेयुद्ध कर
नाअति अनुचितहै इसपर कहते कि जैसे वेद विहितजो यज्ञ
मे हिंसासो हिंसा नहीहैं तैसेशास्त्र संमतजो क्षत्रीका परमध
र्म्म युद्ध तिसमे हिंसा औ पापकी कल्पना वृथा करतेहो औ
र परमश्रेय रूपमहाफल आपसे आय तुमको उपस्थित क
है प्राप्तभयाहै इससे अब तुमकिस कारणकम्पमानहोतेहो
यहकहतेहै कि हेअर्ज्जुन वेमांगे वेयत्तन किये आपसेप्राप्त
परम श्रेयकेहेतु कल्यानका साधन युद्ध जिससे परम कल्याण
सिद्धहोय ऐसायुद्धअति भाग्यवानक्षत्रीलोग पावतेहैं क्योंकि
इससे स्वर्गका द्वारवेरोक टोंक खुला रहताहैं अथवा जोइस
प्रकारकायुद्धपावें सोईसुखीहैं इसश्लोकसे प्रथमअध्यायका
बत्तीसवां श्लोककहागया कि किसतरह आत्मीयजनोंको ना
श करि सुखीहोंयगे इसीबातका भगवानने उत्तरदियाहै ३२॥

दोहा॥

खुले पाट आपत भयो स्वर्गद्वार अनेयास पारथ पैसेयुद्ध
को लहैं क्षत्री सुखी हास॥ ३२॥

216

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ततः
स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ३३ ॥

शांकरभाष्यं

एवं कर्तव्यताप्राप्तमपि अथेति अथ त्वमिमं धर्म्यं धर्मादनपे
तं विहितं संग्रामं युद्धं न करिष्यसि चेत् ततस्तदकरणात् स्वध
र्मं कीर्तिं च महादेवादिसमागमनिमित्तां हित्वा केवलं पाप
मवाप्स्यसि ३३ ॥

आनंदगिरिकृतटीका

स्वधर्मस्य युद्धस्य अद्ययाकरणे स्वर्गादिमहाफलप्राप्तिं प्रद
र्श्य तदकरणे प्रत्यवायप्राप्तिं प्रदर्शयन्ननन्तरश्लोकगतार्थं शब्दार्थं
कथयति एवमिति विहितत्वं फलवत्त्वमित्यनेन प्रकारेण
त्वर्थः अनुष्ठेदित्यनूद्यते महादेवादीत्यादिशब्देन महेन्द्रादयो
गृह्यन्ते ३३ ॥

स्वामिकृतटीका

विपक्षे दोषमाह अथ चेत्त्वमिति ३३ ॥

पैशाचभाष्य

कर्तव्यतया प्राप्तमपि अथेति धर्म्यं धर्मादनपेतं ३३ ॥

रामानुजभाष्य

अथ क्षत्रियस्य स्वधर्मभूतमपि समारब्धं संग्रामं मोहान्न करिष्यसि चे
त्ततः प्रारब्धस्य स्वधर्मस्याकरणात्स्वधर्मफलं निरतिशयसुखं वि
जयेन निरतिशयां कीर्तिं च हित्वा पापं निरतिशयमवाप्स्यसि ३३ ॥

अभिनवगुप्तटीका

भयाच्च भवान् युद्धान्निवर्त्तेत तदेवं शास्त्रमुपनिपतिष्यति भ
वत इत्याह ३३ ॥

परमार्थप्रपाटीका

अथ विपक्षे दोषमाह अथ चेदित्यादितः श्लोकचतुष्टयेन अथेत्यनंतरम् उ
क्तमनाकर्ण्य धर्म्यं धर्मसाधकं संग्रामं त्वं न करिष्यसि तर्हि स्वधर्मबहि
र्मुखो भूत्वा तथा इहलोकश्लाघनीयां कीर्तिं च हित्वा पापं परलोकप्रति
बंधकमवाप्स्यसि अनेन पापमेवाश्रयेदस्मानित्युक्तस्य परिहारः
सूचितः ३३ ॥ ॥ ॥

यं प्राप्नोति जीवतो मरणसमय एव दुःखं भवति अकीर्तिस्तु

गी॰ मरणानंतरमपि भवतीत्यर्थः ३४ ॥

टी॰ वनमालीटीका

३. युद्धाकरणे दोषमाह अथेति प्रारब्धस्य नित्यत्वात्तत्त्यागे पापमवा
प्स्यसीत्यर्थः ३३ ॥

कुसुमवैजयंतीटीका

यस्त्वगोत्रवधरूपपापस्य भयात्त्वं युद्धं न करोषि तत्पापं त्वयुद्धा
करणादेव भविष्यतीत्याह अथचेदिति अथच त्वमिमं स्वविषयं त्य
धर्म्यं क्षत्रियस्य धर्मरूपं संग्रामं युद्धं चेत् यदि पापभयात्त्वं क
रिष्यसि ततस्तर्हि स्वधर्मं स्वकीयधर्मं स्वर्गप्रापिणीं कीर्तिं
च हित्वा परित्यज्य पापं अवाप्स्यसि स्वकीयस्य तातनयुद्धरूप
धर्माकरणाद्धर्मोल्लंघनेनिरतिशयं पापं प्राप्स्यसीत्यर्थः ३३ ॥

मधुसूदनीटीका

ननु नाहं युद्धफलकामः न कांक्षे विजयं कृष्ण अपि त्रैलोक्यरा
ज्यस्य हेतोः तत्कथं मया कर्तव्यमित्याशंक्याऽकरणे दोषमाह
अथेति यस्त्वमेते भीष्मद्रोणादिवीरपुरुषप्रतियोगिकं धर्म्यं
हिंसादिदोषेणादुष्टं स्वधर्मानुगतं वा स च मनुनादर्शि
तः न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् न कर्णिभिर्नापिदि
ग्धैर्नाग्निज्वलिततेजनैः न च हन्यात्स्थलारूढं न क्लीवं न कृतां
जलिं न मुक्तकेशं नासीनं न तवास्मीतिवादिनं न सुप्तं न विस
न्नाहं न नग्नं न निरायुधं नायुध्यमानं पश्यंतं न परेण समागतं स
नायुधव्यसनाप्राप्तं नार्तं नातिपरिक्षितं न भीतं न परावृत्तं सतां
धर्ममनुस्मरन्निति सतां धर्ममलंघयन्नम्यमानो हि पापीयान्
स्यात् त्वं तु परैराहूतोपि सद्धर्मोपेतमपि संग्रामं युद्धं न करिष्य
सि धर्मतो लोकतो वा भीतः पराहतो भविष्यसि चेत् ततः इति
निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् इत्यादिशास्त्रतो वि
हितस्य युद्धस्याकरणात् स्वधर्मं हित्वाऽननुष्ठाय कीर्तिं च महादे
वादिसमागमनिमित्तां हित्वा न निवर्तेत संग्रामादिशास्त्रविनि त्यादि
षिद्धसंग्रामनिवृत्त्या [illegible]वरणजन्यं पापमेव केवलमवाप्स्य

दे

सि ततः स्वधर्मं कीर्तिं चेत्यभिप्रायः अथवानेकजन्मार्जितं धर्मं त्यक्त्वा
दा ज्ञ हतेपापमेवाप्स्यसीत्यर्थः यस्मात्त्वां पराहतमेते दुष्टा अपवक्ष्यन्ति संद्भुति
अतः पराहतत्वहेतः सर्वचिरेणार्जितनिजसुकृतपरित्यागे न परो
पार्जितदुष्कृतमात्रभाग्माभूरित्यभिप्रायः तथा च मनुः यस्तु भी
तः पराहतः संग्रामे हन्यते परैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रति
पद्यते यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भर्ता तत्सर्वमाद ते
त्ते पराहतहतस्यैवेति याज्ञवल्क्योऽपि राजा सुकृतमादत्ते हतानां
पार्जितं भर्तानत्सर्वमादत्ते पराहतहतस्येति याज्ञवल्क्योऽपि
राजा सुकृतमादत्ते हतानां विपलायिनामिति तेन परदुष्कृतं पाप
मेवाप्नुयेदस्मात्वहत्वेनातातताचिनः एतान्हत्वा मित्राभिद्रुह्यतो
पि मधुसूदनेनेति निराकृतं भवति ३३ ॥

सदानंदीटीका

ननु युद्धफलं नाहमाकांक्षे तेन मया कथं युद्धं कार्यं हुथ्येत्येवमाशं
कयाहात्रहूचएं १ यदि धर्म्यमिमं भीष्मद्रोणादिप्रतियोगिकं आ
हतोपि परैरेव संग्रामं न करिष्यसि २ भविष्यसि पराहतो भीतो धर्मा
त्स्वयं तदा वहुजन्मार्जितं धर्मं त्यक्त्वा कीर्तिं च प्राप्स्यसि ३ नति
वर्तेन संग्रामादिनिशास्त्रनिषेधतः विहिताचरणत्यागात्त्वं हि पाप
मवाप्स्यसि ४ यस्मात्त्वं पराहतं हनिष्यंत्येव शत्रवः स्वधर्मत्याग
तस्तस्मात्मा त्वं दुष्कृतभाग्भव ५ ३३ ॥

नीलकंठीटीका

युद्धत्यागे इष्टनाशो निष्टप्राप्तिश्च भवतीत्याह अथचेदिति ३३॥

आनंदी टीका

युद्धस्याकरणे प्रत्यवायं दर्शयति उभयोरेव लोकयोः प्रत्यवाय
इत्यर्थः ३३ ॥

रामकंठी टीका

स्पष्टार्थः ३३ ॥ ॥ ॥

युद्धेदोषमाह

लालि की टीका

कीर्तिं महादेवादिसमागमनिमित्तां+तथा च मनुः यस्तु भीतः हित्वापापमवाप्स्यसि+
परावृत्तः संग्रामाद्धन्यते परैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्र
तिपद्यते यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भर्ता तत्स
र्वमादत्ते परावृत्तहतस्य त्विति ३३ ॥ नयंस्वधर्मपरित्यागप[illegible]+

पंचोलीटीका

स्वधर्मे अकरणे दोषमाह अथ चेदिति हे अर्जुन अथ चेत्त्वं इमं ध
र्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि ततः स्वधर्मं क्षत्रियस्य धर्मं
च पुनः कीर्तिं महादेवादिसमागमनिमित्तां ख्यातिं हित्वा पापमकी
र्तिं च प्राप्स्यसि ३३

श्रीवीरसमिद्धबोधिनी॥

ननु पूर्वमेव न कांक्षे विजयं कृष्ण अपि त्रैलोक्यराज्यस्येत्यादिना
युद्धफलं मया प्रत्याख्यातं तत्किमिति तदेवोद्दिश्य भूयोपि मां प्रव
र्तयसीत्याशंक्य तदननुष्ठाने दोषमाह अथ चेदिति अथेति प
क्षांतरे इममिति भीष्मादिमहावीरपुरुषप्रतियोगिकं धर्म्य
मिति न कूटेनायुध्येन्न्याद्युध्यमानो रणो विपन्न नकर्णिभिर्ना
पि दिग्धेनाग्निज्वलिततेजनैः न चदन्याकुलात्फेन क्लीबेन
कृतांजलिं न मुक्तकेशं नासीनं न तवास्मीतिवादिनं न सुप्तं न
विसन्नाहं न नग्नं न निरायुधं नायुध्यमानं पश्यंतं न परेण स
मागतं नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतं न भीतं न परा
वृत्तं सतां धर्ममनुस्मरन् अभिनन्दोक्तात्मधर्मादनपेतं संग्रामं

युद्धं त्वं परैराहूतोपि मत्तां प्रयोपि न करिष्यसि तात्त्वं हास्यसि लो
कापधर्माभ्यां भीतः सन्पराहूतो भविष्यसि चेत् ततः निर्मित्यपर
मन्यानिवृत्तिं धर्ममपालयेत् इत्यादिना पराशरादिभिः प्राप्त
विहितस्य संग्रामस्याकरणात्स्वधर्मं हित्वा कीर्तिं च महादेवादि
भिः सह संग्रामकरणेनार्जितां समग्रां च हित्वा केवलं पापं मनि
वर्तेन संग्रामादित्यादिना मन्वादिभिर्निषिद्धं संग्रामनिवृत्त्याच
रणान्नत्वं किल्विषमेवावाप्स्यसीति भावः अथवा पापमिति
यस्त्वभीतः पराहूतः संग्रामे हन्यते परैः भर्तुर्यद्दुष्कृतं किंचि
त्तत्सर्वं प्रतिपद्यते यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भ
र्तातत्सर्वमादत्ते पराहृत्यहतस्य तु राजा सुकृतमादत्ते हताना
विपलायिनामित्यादिना मनुयाज्ञवल्क्यादिभिः प्रतिपादितं स्वी
य सुकृतत्यागपूर्वं पराजितदुष्कृतरूपमित्यर्थः एतदुक्तं भवति
यदि त्वं युद्धात्परावर्तसे तदेव मद्यमेते त्वां हनिष्यति ततस्त्व बहु
जन्मार्जितस्वकीयसुकृतिपरित्यागेन परोपार्जितदुष्कृतभा
ग्भूरिति एतेन च पापमेवाश्रयेदस्मान् एतान्न हन्तुमिच्छा
मीत्यादिनिराकृतं भवति ३३ ॥

मधुभाष्य

३४ ॥

अप्यचेदिति इममितिगुणानुवादः यन्मेमितिचपापमवाप्स्यसीति
राजासत्कृतमा॰ दत्त इतिगर्हास्पदेनेत्यर्थः एवमिष्टभ्रंशो निष्टप्रा
१० प्तिश्चदर्शिता श्रुतिर्हिंसाण्यपि प्रहृतव्यं दर्शयति भगवान् अकी
र्तिंचापीतित्रिभिः किंतस्मात्मिलतव्यचैत्याचामीतिक्लान्ते
स्वमुभयविषयकलविरले आगत्तव्यमासन्तान दुर्गेजीवितानि
स्यानात्मात्देहमात्रेनिश्चित्त अयोगिनात्मलत्वविशेषतम्रा
त्मानात्मविवेकयागिष्ठा देवादिनाशितनित्यादिनामनताल
नामोहतद्भृशोकनिरसलाता अत्रत्वमात्मनश्चेतिनि
श्चित्त अवेत्याचानानउक्तविशेषणस्वत्स्यानः एवंमत्वास्नात
मांजानाभेवमेवेस्पष्टीभायत्वात् भगवानाभेदकात्मेयमनादेशा
ति ६३ ॥

भाषाअनुवाद

और जोयह स्वधर्म्मरूप संग्राम नकरोगे तोकेवल फलप्राप्ति नहोगी यही नहींहै और उलटा प्रत्यवायकहे अधर्म्मभी होगा सोईदोष कहतेहैं किजो तुमइस धर्म्म जनक उपस्थित कहे प्राप्तभये युद्धकरनेमे प्रवृत्त न होउगे तोतुम अपना धर्म्म औ कीर्त्तिकेत्याग करनेसे अवश्य पापके भागी होउगे इसमे सन्देह नहींहै ३३ ॥

दोहा

और जुतं यह धर्मको युद्धको नाहिंकरेग तोनिज धर्म कीर्तिको तजके पाप लभेग ३३॥

221

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययां ।
सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ३४

शाङ्करभाष्य

न केवलं स्वधर्म्मकीर्त्तिपरित्यागः अकीर्त्तिमिति अकीर्त्तिं चापि युद्धे भूतानि कथयिष्यन्ति ते तवाव्ययां दीर्घकालां धर्म्मात्मा शूर इत्येवमादिभिर्गुणैः सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते सम्भावितस्य चाकीर्त्तेर्वरं मरणमित्यर्थः ३४ ॥

आनन्दगिरिकृतटीका

युद्धाकरणे क्षत्रियस्य प्रत्यवायमामुष्मिकमापाद्य शिष्टगर्हालक्षणं दीर्घकालभाविनमैहिकमपि प्रत्यवायं प्रतिलम्भयति न केवलमिति युद्धे स्वमरणसन्देहात्तत्परिहारार्थमकीर्त्तिरपि सोढव्या स्यात्मरणस्य श्रेयस्करत्वादित्याशङ्क्याह धर्म्मात्मेति मान्यानामकीर्त्तिर्भवति मरणादपि दुःसहेति तात्पर्यार्थमाह सम्भावितस्येति ३४ ॥

स्वामिकृतटीका

किं चाकीर्त्तिमिति अव्ययां शाश्वतीं संभावितस्य बहुमानितस्याकीर्त्तिर्मरणादतिरिच्यते अधिका भवति ३४ ॥

पैशाचभाष्य

न केवलं स्वधर्मकीर्त्तिपरित्यागः संभावितस्य धर्म्मात्मा शूर इत्यादिगुणैः संभावितस्याकीर्त्तेर्वरं मरणमित्यर्थः ३४ ॥

रामानुजभाष्य

न केवलं निरतिशयसुखकीर्त्तिहानिमात्रं पार्थो युद्धे आरब्धे पलायन इत्यव्ययां सर्वदेशकालव्यापिनीमकीर्त्तिं च समर्थासमर्थानि सर्वाणि भूतानि कथयिष्यन्ति ततः किमिति चेत् शौर्यवीर्यपराक्रमादिभिः सर्वसंभावितस्य तद्विपर्ययानुष्ठानजाकीर्त्तिर्मरणादतिरिच्यते एवं विधायाअकीर्त्तेर्मरणमेव श्रेय इत्यर्थः ३४ ॥

गी॰ अभिनवगुप्तटीका नास्ति ३४॥

टी॰ परमार्थप्रपाटीका

द्वि किंच अकीर्तिमिति भूतानि लोकास्ते अव्ययामाकल्पस्थायिनीमकी
र्तिमपयशः कथयिष्यन्ति यतो यादृशात्तादृशस्य अकीर्तेर्यत्र नास्ति संभा
वितस्य ख्यातस्य पुरुषस्य अकीर्तिर्मरणादपि अतिरिच्यते अतिशयेनाधि
कीभवति जीवतो मरणसमयं एव दुःखं भवति अकीर्तेस्तु मरणानन्तरमपि भवती
त्यर्थः॥ ३४

वनमालीटीका

एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च पापस्य प्राप्तिर्युद्धपरित्या
गे दर्शिता तत्र पापाख्यमनिष्टं परलोके फलदमामुष्मिकत्वात् शिष्ट
निन्दारूपमनिष्टमासन्नफलमस्तु सह्यमित्याह अकीर्तिमिति भूता
नि देवर्षिमनुष्यादीनि तेऽव्ययां दीर्घकालीनां धर्मात्मायं नृपरो त
यमित्येवं रूपां कथयिष्यन्ति कथाप्रसंगे न तु युद्धे स्वमरणसंदेहात् याध्यः
त्यवि[illegible]हारार्थमकीर्तिः सोढव्या आत्मरक्षणस्यापेक्षितत्वात् उक्तं च
शान्तिपर्वणि संग्रामादानेन भेदेन समस्तैरुत वा पृथक् विजेतुं प्रयते
तारीन्न युद्धेन कदाचन अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् त्रयाणामप्युपायानां पूर्वोक्ता
नामसंभवे तथा युध्येत संपन्नो विजयेत रिपून्यथेति तत्राह संभावित भा
स्येति अनन्यलभ्यगुणस्य पुरुषस्याकीर्तिर्मरणादधिका भवति ३४॥

उत्तमवैजयंतीटीका

किंच न केवलं स्वधर्मकीर्त्योः परित्यागात्पापमेव भवेदत्र संसारेऽकी
र्तिरपि भविष्यति सा तु श्रेष्ठस्य मरणादप्यधिकतरा भवतीत्याह अकी
र्तिमिति ते तवाव्ययां चिरकालस्थायिनीमकीर्तिमर्जुनेन महान्तमारंभं
कृत्वा किंचिदपि पुरुषार्थो न कृतो न धर्मवान्ययं नेत्येन तद्विजयधर्म
स्याकरत्वेवं भूतामकीर्तिमपशोभूतानि सुरासुरनरादीनि कथयिष्य य
न्ति एवं वदिष्यन्ति न तु मरणभयाद्धर्मकीर्त्यादिकं सर्वं त्यजामीति चेत्त
त्राह संभावितस्य शत्रुमित्रोदासीनानां सर्वेषां मध्ये प्रतिष्ठितस्य लो
कत्रयविजयसामग्रीसंपन्नस्य तवाकीर्तिः निंदात्मिका जनवाणी म
रणप्राणत्यागात् अतिरिच्यतेऽधिकतरा भवति शारीरयातनादनन्तर

मपिव्यासादिकृतप्रबंधद्वारापरिमितयुगपर्यंतं स्थास्यतीतिभावः ३३॥

मधुसूदनीटीका

एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च पापस्य प्राप्तिर्युद्धपरित्यागे
दर्शिता तत्र पापाख्यमनिष्टं व्यवधानेन दुःखफलदमामुष्मिकत्वात्
शिष्टगर्हालक्षणं त्वनिष्टमासन्नफलदमत्यसह्यमित्याह भूतानि दे
वर्षिमनुष्यादीनि ते तवाव्ययां दीर्घकालामकीर्तिं धर्मात्मायं शू
रोयमित्येवंरूपां कथयिष्यंत्यन्योन्यं कथाप्रसंगे अत्र तु पापीति यातो की
र्तिधर्मनाशमनुत्वयार्थौ न केवलं कीर्तिधर्मौ हित्वा पापं प्राप्स्यसि अ
पित्वकीर्तिं च प्राप्स्यसि न केवलं त्वमेव तां प्राप्स्यसि अपि तु भूतान्यपि
कथयिष्यंतीति वा नियानयोरर्थः ननु युद्धे स्वमरणसंदेहात्तत्परि
हारार्थमकीर्तिरपि सोढव्या आत्मरक्षणस्यात्यंतापेक्षितत्वात् त
थाचोक्तं शांतिपर्वणि साम्नादानेन भेदेन समस्तैरुत वा पृथक् विजेतुं
प्रयतेतारीन्न युद्धेन कदाचन अनित्यो विजयो यस्माद्दृश्यते युध्यमा
नयोः पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् त्रयाणामप्युपायानां
पूर्वोक्तानामसंभवे तथा युद्धेत संपन्नो विजयेत रिपून्यथेति एवमे
वमनुनाप्युक्तं तथा च मरणभीतस्य किमकीर्तिदुःखमिति शंका
मपनुदति संभावितस्य धर्मात्मा शूर इत्येवमादिभिरनन्यलभ्यैर्गुणैर्ब
हुमतस्य जनस्याकीर्तिर्मरणादप्यतिरिच्यते अधिका भवति चार्हतो
एवं यस्मादतोऽकीर्तेर्मरणमेव वरं सूतत्वात् त्वमप्यति संभावितो
सि महादेवादिसमागमेन अतो नाकीर्तिदुःखं सोढुं शक्तोसीतिभि
प्रायः उदाहृतवचनं त्वर्थशास्त्रत्वान्न निवर्तते संग्रामादित्यादि धर्मशा
स्त्रदुर्बलमिति भावः ३४॥

सदानंदीटीका

एवं युद्धपरित्यागाद्धर्मत्यागतत्तिपरा उक्त्वेदानीमतो निंदाफलं दुः
सहमुच्यते १ देवर्ष्यादीनि भूतानि दीर्घकालामनर्थदां नय धर्मात्मा
न सूरोयमित्येवंहि परस्परं २ अकीर्तिं कथयिष्यंति गुणैः संभावि
तस्य ते तत्समस्तुसंदेहाद्दुर्णोतद्वर्जनीयत्व ३ अकीर्तिरपि सोढव्या
प्रियप्राणरक्षितेहिनः तथा च मृत्युभीतस्य किमकीर्त्येति चेन्नुण ४
धर्मात्मा शूर इत्येवमादिभिः प्रवरैर्गुणैः लोकबहुतस्यास्याधिकाकी

गी॰ टी॰ हि॰

र्ग्निश्रितैरपि ५ महादेवादिसंग्रामेत्वंवसंभावितोयतः अतोप्यकीर्त्तिजंदुःखंत्वंजानत्तमोढुंनशक्ष्यसि ८ ३४ ॥

नीलकंठीटीका

अव्ययांदीर्घकालां ३४ ॥

आनंदी टीका

१ अव्ययामनवच्छिन्नांदीर्घकालाम् संभावितस्यशौर्यादिगु-
णवत्वेनाभिमतस्याकीर्तेर्मरणंवरमित्यर्थः ३४

रामकंठी टी०

स्पष्टार्थः ३४ ॥

लासिकी टीका

नपरंस्वधर्मपरित्यागएवयावत् अव्ययांशाश्वतोकल्पांतस्थायिनींभूतानिप्राणिनोदेवादयः

ननुमरणादकीर्तिरेववरेनेत्याह संभावितस्येति धर्मात्मा
शूरइत्यादिगुणैः संभावितस्यबहुमानितस्या अकीर्तिर्मरणा
दतिरिच्यते अधिका भवति ३४

पंचोलीटीका

नकेवलंप्रत्यवायएवभवेत् अकीर्तिरपिस्यादित्याह अकीर्तिंचा
पीतिचअपरंभूतान्यपितेतवअव्ययांदीर्घकालांअकीर्तिंकथयि ९
ष्यंतिचपुनः संभावितस्यधर्मात्मा शूरस्यमरणात्अतिरिच्यते अ
धिकाभवति ३४

रणवीरसमिद्बोधिनी॥

अथंचकीर्तिंधर्मयोरिष्टयोर्निवृत्तिरनिष्टस्यचपापस्यापत्तिर्दु-
ष्करणफलंदर्शितं पुनरप्यनिष्टांतरमत्यसह्यं दर्शयति अकी
र्तिमिति नकेवलंकीर्तिधर्मौपरिहृत्यपापमेवावाप्स्यसि किंत्व
कीर्तिनाशंधर्मात्मानाशंपूर्वंइत्यादिरूपांगर्हणांचापिप्राप्स्यसि
किंपुनर्भूतानि देवासुरमनुष्यादीनिचापि तेतव नामव्यया
मकल्पस्थायिनींकथयिष्यंतिवदिष्यंति ननुसान्वादानेनभे
देनसमस्तेरथवाहृष्यक विजेतेप्रयतेनारीन्नयुद्धेनकदाचन
अनित्यौविजयोयस्माद्दृश्यतेयुद्ध्यमानयोः पराजयश्चसंग्रामे
तस्माद्युद्धंविवर्जयेत् त्रयाणामप्युपायानांपूर्वोक्तानामसंभ
वे तथायुद्धेनसंपन्नोविजयेतरिपून्युधेत्यादिशास्त्राद्युद्धेख
मरणस्य संदिग्धत्वात्तस्मात्मनश्चात्यंतरक्षणीयत्वादकीर्तिरपि

सोढव्येति मरणभीतस्य किंयदकीर्तिर्दुःखमित्यत आह संभा
वितस्येत्यादि संभावितस्य धर्मात्मा शूरोयमित्येवं बहुमानितस्य
जनस्याकीर्तिर्मरणादप्यतिरिच्यतेऽधिकीभवति अकीर्तेः स
काशात्तन्मरणमेव वरमिति धर्मानुपालनमात्रेणनिवर्तितसं-
ग्रामादिक्लादिरूपादर्थपणत्वा '' मात्वादनेनेत्यादिरूपस्यदौर्ब
ल्यप्रर्थपणत्वात्तवलवहुमर्षणत्वमिति स्थितिरितियावत्बल्का-
स्मतेरितिभावः ३४॥

मधुभाष्य

३४॥

भाषाअनुवाद

ओर जो कहोकिस्वधर्म्म ओ कीर्त्तिजाय हम हिंसावकरैंगे तो
युद्धनकरने सेकेवल स्वधर्म्म औ कीर्त्तिहीका त्याग नहीहै ओर
भीहै सोकहतेहैंकि युद्ध छोडनेसेलोग तुमारा अयश कहैंगे
ओ निन्दा करैंगे ओर वह अयश चिरकाल कहे बहुतदिनों
तक संसारमे रहैगा ओरतुम क्षत्रियोंके बीच युद्धकरनेमे प्र
सिद्ध वीरहो देखोजो जिस बातमे ख्यातकहे नामीहैं ओलो
क उसको प्रतिष्ठित बडाकरि जानतेहैं तोफेरिउसका उसी
बातमे अयशयह मरनेसेभी अधिकहै ओरसबपाप ओदोषों
कादादाहै इसको अछी तरह विचारकार देखो ३४ ॥

दोहा

निंदातेरी अखंडजन करहेनाहि संदेह अपयशमानी पु
रुषको मृत्यु अधिक कसोपह ३७ ॥

भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः येषांच
त्वंबहुमतोभूत्वायास्यसिलाघवं ३५ ॥

शांकरभाष्य

किंच भयादिति भयात् कर्णादिभ्यो रणात् युद्धादुपरतं निवृत्तं
मंस्यंते चिंतयिष्यंति न कृपयेति त्वां महारथा दुर्योधनप्रभृतयः
के मंस्यन्ते इत्याह येषांचत्वं दुर्योधनादीनां बहुमतो बहुभिर्गुणै
र्युक्त इत्येवं बहुमतो भूत्वा पुनस्त्वं यास्यसि लाघवं लघुभावं ३५॥

आनंदगिरिकृतटीका

इतश्चत्वयायुद्धं कर्तव्यमित्याह किंचेति प्राणिषु कृपयानाहंयुद्धं
करिष्यामीत्याशंक्याह भयादिति महारथानेव विशिनष्टि येषां
चेति दुर्योधनादिभिस्त्वंवोपहास्यतानिरसनार्थं संग्रामे प्रवृत्तिर
वश्यम्भाविनीत्यर्थः ३५ ॥

स्वामिकृतटीका

किंचभयादिति येषांबहुगुणत्वेनत्वंपूर्वंसंमतोभूः तएवभयेनसंग्रा
मात्त्वांनिवृत्तंमन्येरन् ततश्चपूर्वंबहुमतोभूत्वालाघवंयास्यसि ३५ ॥

पिशाचभाष्य

भयात्कर्णादिभिःरणाद्युद्धादुपरतंनिवृत्तंकेमंस्यंतेचिंतयिष्यंति नकृ
पयेतित्वांमहारथाःदुर्योधनप्रभृतयःकेमंस्यंतइत्यत्राह येषांचदुर्योधना
दीनांत्वंबहुमतःभूत्वापुनर्यास्यसिलाघवंलघुभावंतेमंस्यंते ३५ ॥

रामानुजभाष्य

वंधुस्नेहात्कारुण्याच्चनिवृत्तस्ययुद्धस्यममाकीर्त्तिःकथमागमिष्यतीत्य
त्राहयेषांकलहः कर्तुंदुर्योधनादीनांमहारथानामितःपूर्वंत्वंसरोवैरी
तिबहुमतोभूत्वाइदानींयुद्धेसमुपस्थितेनिवृत्तव्यापारतयालाघवंसंप्र
हृतंयास्यसितेतेमहारथास्त्वांभयाद्युद्धादुपरतंमंस्यंतेस्वराणांहिवैरि
णांशत्रुभयादन्यद्वंधुस्नेहादिनायुद्धादुपरतिर्नोपपद्यते ३५ ॥

अभिनवगुप्तटीका नास्ति उपक्रम ३५ ॥

परमार्थप्रपाटीका

अथसंभावितत्वमेवाह भयादिति तेमहारथास्त्वांभयान्निमित्तभूताद्रणात्सं
ग्रामादुपरतंपराङ्मुखंमंस्यंतेमन्येतरन् नतुस्वत्कृपयेति तेकेयेषांवीरा

णांत्वंबहुर्यथाभवति तथामतः संमतोभूत्वालाघवंलघुत्वंयास्य
सिप्राप्तुमिच्छसि ३५ ॥

वनमालीटीका

ननुमन्युभावमजानंतो मांनिंदंतु भीष्मादयोज्ञातमन्युभावाकरुणया
निवृत्तोयुद्धादर्जुनोयमितिस्तोष्यंतीत्यतआह भयादिति कर्णादिभ्योभ
यान्निवृत्तोनकृपयेतित्वांमंस्यंते भीष्मदुर्योधनादयोमहारथाः कथमत
आह येषामेवभीष्मादीनांत्वंबहुमतोबहुभिर्गुणैर्युक्तोयमित्येवंमतः
तएवत्वांभयाद्रणादुपरतंमंस्यंते अतोभूत्वायुद्धादुपरतइतिशेषः ला
घवंमनादरविषयत्वंयास्यसिसर्वेषामितिशेषः यद्वायेषामेवत्वंप्राग्बहु
मतोभूस्तेषामेवतादृशोभूत्वालाघवंयास्यसीतिवा ३५ ॥

ऊसमवैजयंतीटीका

ननुवंधुवधरूपायमभयाद्युद्धादुपरतस्यममाकीर्तिमधार्मिकाःक
र्णदुर्योधनादयः कथयिष्यंतिचेत्कथयंतुयमेतुभीष्मादयस्तुममश्ला
घामेवकरिष्यंतिनत्वकीर्तिमितिचेत्तत्राह भयाद्रणादितिमहारथश
ब्दोऽतिरथादीनामुपलक्षणं महारथाःभीष्माचार्यादयोपिभयात् युद्ध
मर्जुनमेववधिष्यामिनतुयुधिष्ठिरादीनित्येवंरूपांकर्णप्रतिज्ञांश्रुत्वा
मरणभयात् नतुपापभयात्स्नेहकारुण्याद्वारणात् संग्रामात् उपरतं
निवृत्तंत्वांमंस्यंतेतर्हिमंस्यंतितेषांमध्येजयविजयकरोद्वंद्वमस्याग्रेकोपिन
स्थास्यतीतिवदंतोविग्रहाग्रहवतांसुराणांभीष्मादीनांमध्येबहुमतःब
हुभिःशौर्यवीर्यधैर्यादिगुणगणैर्मतःमाननीयोभूत्वाभूयस्तुपुन
रपित्वंलाघवंतुच्छत्वंयास्यसिप्राप्स्यसि ३५ ॥

मधुसूदनीटीका

ननूदासीनाजनामोनिंदंतुनामभीष्मद्रोणादयस्तुमहारथाः कारुणि
कत्वेनस्तोष्यंतिमामित्यतआह कर्णादिभ्योभयात्युद्धान्निवृत्तंनकृ
पयेतित्वांमंस्यंतेभीष्मद्रोणदुर्योधनादयोमहारथाः ननुतेमांबहुम
न्यमानाःकथंभीतंमंस्यंतइत्यतआह येषामेवभीष्मादीनांत्वंबहुमतो
बहुभिर्गुणैर्युक्तोयमर्जुनः इत्येवमतः तएवत्वांमहारथाभयादुपरतंमं
स्यंतइत्यन्वयः अतोभूत्वायुद्धादुपरतइतिशेषः लाघवमनादरविष
यत्वंयास्यंप्राप्स्यसिसर्वेषामितिशेषः यद्वायेषामेवत्वंप्राग्बहुमतोभूःतेषामे

वत्वाटघोभूत्वालाघवंयास्यसीतिवा ३५ ॥

सदानंदटीका

ननुनिंदंतुमांलोकाउदासीनाःपृथग्जनाः भीष्मद्रोणादयस्तुमांस्तोष्यं
त्येवेतिचेन्नत्र १ शल्यकर्णादिसर्वेभ्योभयाद्युद्धात्पराङ्मुखं मंस्यंतेत्वां
नतुकृपयाभीष्मद्रोणादयोपिते २ बहुमन्यंतपनेमांजिष्णुभीष्मादयोर
णे कथंभीतंहिमंस्यंतेइत्याशंक्याहकेशवः ३ येषांत्वंभीष्ममुख्यानां
गुणैराप्तनैर्मतः प्रभूस्तेषांपराङ्मुखोलघुतामेवयास्यसि ४ ३५ ॥

नीलकंठटीका

अकीर्तिमेवाह भयादिति त्वंबहुमतोभूत्वास्वतएवश्लाघ्यहृ
नःसन्लाघवंलघुभावं [illegible] कातर्यात्त्वंयेषांपुरतोयास्यसितेमहार
थास्त्वांभयाद्रणादुपरतंमंस्यंतइतियोजना ३५ ॥

227

आनंदी टीका

स्पष्टम् ३५ ॥

रामकंठी टीका

स्पष्टोर्थः ३५ ॥

लासिकी टीका

नन्वन्येजनामोनिंदन्तुमहारथास्तुकर्मणिकतामालव्यलो छन्तिमामित्यतआह भयादिति भूत्वा एव भयेन संग्रामान्वो निहन्तुमन्येरन् नतुकृपयातत्पूर्वं बहुमतो भूत्वा लाघवं या स्यसि ३५

येषांभीष्मादीनां बहुगुणत्वेन पूर्वं संभूतो

पंचोलीटीका

तदेवविवृणोतिभयादितिएतेमहारथाःदुर्योधनकर्णादयः त्वांरणात् उपरतंनिवृत्तंमंस्यतेचिंतयिष्यंति वपुनःयेषांदुर्योध नादीनांबहुमतोभूत्वाबहुभिर्गुणैर्युक्तइत्येवंमतोभूत्वालाघवं यास्यसिप्राप्स्यसि ३५

रणवीरसमिद्बोधिनी॥

ननुनिंदंतुनामप्राकृताजनामहारथास्तुस्तुवंत्येवेत्यतआह भयादिति महारथाभीष्मद्रोणादयस्त्वांकर्णादिभ्योभयाद्वेतो रणादुपरतंपराङ्मुखंमंस्यंते किंद्वेषाद्वेमहारथाःपराङ्मुखंमंस्यं ते किंद्वेषाद्वेमहारथाःपराङ्मुखंमंस्यंतेनेत्याह येषामितिये षांचमहारथानांभीष्मादीनांत्वंबहुमतोसितेपिनपुनरद्विता पवेत्यर्थः एवंचाहृत्यापूर्वंत्वंबहुमतोभूत्वालाघवंतिरस्कार पात्रतांयास्यसि ३५

मधुभाष्य

३५ ॥

भाषाअनुवाद

भगवान कहतेहैंकि अर्जुन तुमको अवश्युद्धकरना ही उचितहैं क्यो
कि तुमतोयहजानतेहो किप्राणियोंके उपर कृपाकरि हम संग्राम
छोड़तेपरमहारथी वीरतुमकोभयसे युद्ध विमुख जानैगें जोतुमको
पूर्वकहि पहिले सकलगुणसंपन्न करहेथे जानतेथेवेलोग अ
बतुमको करण आदिक योद्धोकें भयसे युद्ध विमुख मानैगे देखो
जिन दुर्योधन आदिकों कीतुम बहुत मान करहे मान्य रहे उनके निकट
अब तुमकेसे लघुकहेहलके होउगे तोइस हंसीके डरसे युद्ध कर
ना अवश्यहैं ३५ ॥

दोहा॥

रण विमुख भयो त्रासतें महारथी मानहिं तोहि जिनमहिं
तें बहु मानीयं तिनमे लघुता होहि ३५॥

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किं ३६ ॥

शांकरभाष्य

किंच अवाच्यवादानिति अवाच्यवादान् अवक्तव्यवादान् च बहून् अनेकप्रकारान् वदिष्यन्ति तवाहिताः शत्रवः निन्दन्तः कुत्सयंतस्तव त्वदीयं सामर्थ्यं निवातकवचादियुद्धनिमित्तं तस्मात्ततो निन्दाप्राप्तेर्दुःखात् दुःखतरं नु किं ततः कष्टतरं दुःखं नास्तीत्यर्थः ३६ ॥

आनन्दगिरिकृतटीका

इतश्च त्वं युद्धादुपरमं माकार्षीरित्याह किंचेति ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः स्वसामर्थ्यनिन्दादि शत्रुकृतं सोढुं शक्ष्यामीत्याशंक्याह तत इति ३६ ॥

स्वामिकृतटीका

किंच अवाच्येति अवाच्यावादान् वचनानर्हान् शब्दान् तवाहितास्त्वच्छत्रवो वदिष्यंति ३६ ॥

पिशाचभाष्य

किंच अवाच्यवादान् अवक्तव्यवादांश्च बहून् अनेकप्रकारान् वदिष्यंति तवाहिताः शत्रवः निंदंतः कुत्सयंतः तव सामर्थ्यं निवातकवचादिजयसामर्थ्यनिमित्तं ततः तस्मान्निंदाप्राप्तात् दुःखतरं नु किं ततः कष्टतरं नास्तीत्यर्थः ३६ ॥

रामानुजभाष्य

किंच शूराणामस्माकं सन्निधौ कथमयं पार्थः स्थातुं शक्नुयात् अस्मत्सन्निधानादन्यत्र यस्य सामर्थ्यमिति तव सामर्थ्यं निंदंतः शूराणामग्रे अवाच्यवादांश्च बहून्वदिष्यंति तव शत्रवो धार्तराष्ट्राः ततोऽधिकतरं दुःखं किं तव एवं त्वदावाच्यश्रवणान्मरणमेव श्रेय इति त्वमेव मन्यसे ३६ ॥

अभिनवगुप्तटीका नास्ति उपक्रमे ३६ ॥

परमार्थप्रपाटीका

किंच अवाच्यवादानिति तवाहिताः सिद्धवैरिणो दायादाः अवाच्यान्वचनानर्हान्वादानपवादान्वदिष्यंति किंभूताः तव सामर्थ्यं निंदंतस्ततोऽपि दुःखतरं किं नु ३६ ॥

वनमालीटीका

ननु दुर्योधनादयो मां लोके निंदेयुस्तत्र किं दुःखमित्यत आह अवाच्ये
ति अहिताः शत्रवो दुर्योधनादयस्तव सामर्थ्यं निंदंतः बहून् वाच्यावाच्य
यिवक्तुमयोग्यान् शब्दान् वदिष्यंति ततः शत्रुनिंदाजन्यात् दुःखादधिकं दुः
खं किं न किमपीत्यर्थः ३६ ॥

हनुमवैजयंतीटीका

न केवलं युद्धाकरणात् त्वल्लाघवं यावत् स्वस्थितैः शत्रुभिर्गीयमानं निजा
६ सामर्थ्यं श्रुत्वा महद्दुःखमपि प्राप्स्यसीत्याह अवाच्येति न वक्तिवा नक
थ्यादिविषये त्वत्सहायरूपैः खांडववारण्यदाहेनाखिललोकाभिमानमे
गकरं चैवमादिसुरासुरादिलोकत्रयप्रसिद्धं सामर्थ्यं निंदंतः विरा
टनगरे उत्तरगोग्रहणे ताजनाग्रे गीतवाद्यनृत्यादिष्वेवायं शूरः युद्धे शा
स्त्रास्त्रविद्यावेत्तॄणां वीराणामस्माकमग्रे स्थातुमपि नाशक्नोदित्येवं नि
दां कुर्वंतस्त्वत्तोऽहितास्तव शत्रवो दुर्योधनकर्णशकुन्यादयो बहू
ननेकान् अवाच्यवादान् क्लीबकातरादिरूपान् वदिष्यन्ति परस्परं सु
राणां मध्ये कथयिष्यंति ततस्तस्मात् दुःखात् दुःखातिशयेन इति वि ६
तर्कैः किमस्ति न किमप्यस्तीत्यर्थः ३६ ॥

मधुसूदनीटीका

ननु भीष्मादयो महारथा न बहु मन्यंतां दुर्योधनादयस्तु शत्रवो बहु
मंस्यंते मां युद्धनिवृत्तं तु [illegible] प्रकारेणादि
त्यत आह न वा साधारणं यत्सामर्थ्यं लोकप्रसिद्धं तन्निंदंतस्तव शत्रवो दु न
र्योधनादयो वाच्यान् वादान् वचनानर्हान् षंढतिलादिरूपानेव श नू
ब्दान् बहूननेकप्रकारान् वदिष्यन्ति ननु बहु मंस्यन्त इत्यभिप्रायः अ
थवा तव सामर्थ्यस्य नियोगपदं तत्र निंदंतो ऽहिता अवाच्यवादान्वदिष्य
न्तीत्यन्वयः ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धा
न्निवृत्तः शत्रुकृतं सामर्थ्यनिंदनादि दुःखं सोढुं शक्नोमीत्यत आह ततः
तस्मान्निंदाप्राप्तदुःखात् किं नु दुःखतरं ततोऽधिकं किमपि दुःखं नास्तीत्य
र्थः ३६ ॥

सदानंदीटीका

ननु भीष्मादयः शूराः मामन्यतां गुणेषु नेन शत्रवो बहु मंस्यंते मां तद

यौंधनादयः १ यतोयुद्धनिहन्येषांप्राणांस्तेतिवेच्छया नवलोकप्र
सिद्धयन्सामार्थ्यंशत्रवस्तव २ निंदंतस्तेवदिष्यंतिवहूनशद्वांश्चनिंदि
तान् पतेवंदतिलायवमादीन्वक्तुमयोग्यकान् ३ किंनेततोधिकंदुः
खमिहलोकेपरत्रवा ४ ३६ ॥

नीलकंठीटीका

किंचअवाच्यवादानवक्तुमयोग्यान्शद्वान्षंढतिलोर्जनइत्यादीन् सा
मर्थ्यंनिंदंतःधिगस्यशौर्यंयो भीष्मादिभयात्पलायितइति इदं
वचनंमरणादप्यधिकंदुःखं इतोऽन्यदुःखतरमधिकंदुःखंकिं
नकिमपीत्यर्थः ३६ ॥

231

आनंदी टीका

त्वाकिमितिवितर्के अतोनान्यदुःखमित्यर्थः ३६ ॥

रामकंठी टीका

ह्यगमोर्थः ३६

लास्तिकी बखरमी टीका *वध

नन्नभीष्मादयोनबहुमन्यन्तो दुर्योधनादयः शत्रवोपुहूति
हत्या तदुपकारित्वाद्बहुमन्येतेइत्यतआह अवाच्येति निंद
या दुःखतरंदुःखंनास्त्येवेत्यर्थः "नन्नभीष्मादिदुःखान्निदा
दुःखंसोढुंशक्यमित्यतआह ततो दुःखतरमितिततो" ॥३६॥

*शात्रवो दुर्योधनादय
स्तवसामर्थ्यंनिन्दन्तो
बहुवचनानर्हान्व
हूनपशुहान्वदिष्यन्ति

पंचोलीटीका

चअपरंतवअहिताः तवअरयः बहून् अनेकप्रकारान् अवाच्यवा
वा॰ दान् अवाक्य विवादान्वदिष्यतिकिंकुर्वंतः तवसामर्थ्यंनिंदंतःकु
त्सयंतः ततोनिंदाद्रूपाद्दुःखात् दुइतिप्रश्नेकिंअन्यत्दुःखतरं नु द

रसावीरसमिद्धोधिनी॥

किंच अवाच्येति तवासाधारणंसामर्थ्यंस्तुतियोग्यंनिन्दंत
स्तवाहिता दुर्योधनादयोबहूननेकविधानवाच्यवादान्व
चनानर्हान् षंढतिलादिरूपानपवादान्वदिष्यंति ततस्त
स्मादपरंकिंनुदुःखतरंततोधिकंकिमपिदुःखंनास्तीतिभा
वः ३६॥

मधुभाष्य

३६॥

भाषाअनुवाद

इससेअबतुम युद्धसेनिवृत्तनहोउ जोकहोकिभीष्मतथा द्रोण
आदिकावधबड़ा कष्टहै तोदेखो तुमारे शत्रुगण तुमारीसामर्थ
कोनिन्दा करतेहुये तुमारे प्रतिअनेकअनेक अयोग्यदुर्वचन क
हैंगे तोइससे औरदुःखकौनहै यहकष्टसेभीमहाकष्टहै ३६ ॥

दोहा

कहिनयोग्यनबातबहुकथहिंगे तवबैरि तातेको दुःख
अधिकहै पौरुषनिंदततेरि ३६॥

हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं तस्मा
दुत्तिष्ठकौन्तेययुद्धायकृतनिश्चयः ३७ ॥

शांकरभाष्य

युद्धेपुनः क्रियमाणे कर्णादिभिः किं हतोवेति हतोवाप्राप्स्यसिस्व
र्गं हतःसन् स्वर्गंप्राप्स्यसि जित्वा कर्णादीन् शूरान् भोक्ष्यसेम
हीं उभयथापि तवलाभ एवेत्यभिप्रायः यतएवं तस्मादुत्ति
ष्ठ कौन्तेय युद्धायकृतनिश्चयः जेष्यामि शत्रून् मरिष्यामिवे
ति निश्चयं कृत्वेत्यर्थः ३७ ॥

आनन्दगिरिकृतटीका

ननुयुद्धेगुर्वादिवधवशान्मध्यख्याति निन्दा ततोनिहन्तौ शत्रूनिद
मुभयतः पाशरज्जुरित्याशंक्याह युद्धे पुनरिति जये पराजयेच
लाभध्रौव्याद्युद्धार्थमुत्थानमावश्यकमित्याह तस्मादिति नहिप
रिशुद्धकुलस्य युद्धायोद्युक्तस्य तस्मादुपरमःसाधीयानित्याह कौ
न्तेयेति जये पराजये चेत्येतदुभयथेत्युच्यते जयादिनियमाभावेपि
लाभनियमे फलितमाह यतइति कृतनिश्चयत्वमेव विशदयति जेष्यामीति ३७ ॥

स्वामिकृतटीका

यच्चोक्तंनचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुरिति
तत्राह हतोवेति पक्षद्वयेपितवलाभएवेत्यर्थः ३७ ॥

पिशाचभाष्य

युद्धेपुनःकर्णादिभिःक्रियमाणे हतोवेति जित्वा जयंप्राप्यवाभोक्ष्यसे
महींपृथ्वींउभयथापितेलाभइत्यभिप्रायः यतएवंतस्मादुत्तिष्ठकौन्तेय वेति
कृतनिश्चयः जेष्यामिपरान्मरिष्यामिनिश्चयंकृत्वेत्यर्थः ३७ ॥

रामानुजभाष्य

अतःशूरेणात्मनापरेषांहननमात्मनोवापरैर्हननमुभयमपिश्रेयोभव
तीत्याह धर्मयुद्धेपरैर्हतश्चेत्ततएवपरमनिःश्रेयसंप्राप्स्यसिपरान्वाहत्वा
सं पैद्दिकंराज्यंभोक्ष्यसे अनभिसंहितफलस्ययुद्धाख्यस्यधर्मस्यपरमनिःश्रेय
सोपायत्वात्तंचपरमनिःश्रेयसंप्राप्स्यासितस्माद्युद्धायोद्योगःपरपुरुषा
र्थलक्षणमोक्षसाधनमितिनिश्चित्यतदर्थमुत्तिष्ठकुन्तीपुत्रस्यतवैवंयु

क्रमित्यभिप्रायः ३७ ॥

गी॰

अभिनवगुप्तटीका

टी॰ श्लोकपंचकमिदमभ्युपगम्यवादत्वेनउच्यते यदिलौकिकेनव्यवहारेण

द्वि॰ तेभवांस्तथाप्यवश्यानुष्ठेयमेतत् ३७ ॥

परमार्थप्रपाटीका

ननुमरणेमरणावतएवस्वर्गप्राप्तिस्तदेवाणन्तुजयत्वेनोजीवत
तइत्याह हतइति रणेहतस्यस्वाराज्यंजीवतःसाम्राज्यमित्यर्थः
३७ ॥ ३७ ॥ ३७

वनमालीटीका

पक्षद्वयेनवैतद्विरुद्धइत्यादितत्रपक्षद्वयेपिमहालाभइत्याह हतइति
शत्रून्नजेष्यामिमरिष्यामिवेतिकृतनिश्चयःयुद्धायोत्तिष्ठ ३७ ॥

ॐश्रमवैजयंतीटीका

ननुहेयदियुद्धंकरिष्यामितर्हिममगोत्रादिवधजन्यंपापंभविष्यतिन
करिष्यामिचेत्तथापिमहानिर्लोकेनिन्दाचभविष्यतीत्येवंकृतेपिदोषो
कृतेपिदोषस्तत्रद्वयोर्मध्येममश्रेयस्करःकोभवेदित्याशंक्याकरणात्क
रणमेवेहामुत्रलोकेचकल्याणकरमित्याह हतोवेतिद्वाभ्यांवेत्यथवा
रणेशत्रुभिरेतैर्दुर्योधनादिभिस्त्वंहतश्चेत्तर्हिस्वर्गमेवस्वर्गंगंतासीति
स्वर्गेदेवेंद्रत्वमेवप्राप्स्यसितदेवंशतेनोपक्ष्वत्वात्पुनरपीन्द्रभावमेव
गमिष्यसि नतत्त्वमिवयावत्पुण्यंतावत्स्वर्लोकंभुक्त्वापुनःपतिष्य
तीतिभावः यद्वास्वर्गमेवस्वर्लोकमेवप्राप्स्यसिनतुगोत्रवधजन्य
पापान्निरयादिकमित्यर्थः वाऽथवाजित्वायतानुशत्रून्विजित्यदे
हारोग्येणस्थास्यसिचेत्तर्हिमहीसमृद्धमेवखलायशांत्वंभोक्ष्यसेभो
गंकरिष्यसि यस्मात्स्वधर्मभूतसंग्रामकरणेनेहामुत्रचतवपरम
सुखलाभोभविष्यतितस्मात्कृतनिश्चयस्सन् ममापमेवपरमनिष्ठ्र
यसोमार्गोनान्यइति दृढविश्वासस्सन्नेमनेस्वरस्यपितन्त्रयत्वेनन
वैतत्करणेनातिप्रयासइतिमध्यमपुरुषैकवचनप्रयोगेणतवैवयो सम्बोधनाभि
त्रादयोपराराज्यंकरिष्यंतियुधिष्ठिरादीनामपितदुर्योधनादीनांतन भोद्यसे
सतरीनेतिसूचितम् ३७ ॥

युद्धाय संग्रामंकर्तुमुत्तिष्ठ कवचादिकंपरिधाय सज्जीकृतंचापमाधायशत्रूनभिमुखो
भव यतस्त्वंकुन्तीपुत्रोसि ४

मधुसूदनीटीका

ननु तर्हि युद्धे गुर्वादिवधवशान्मध्यस्थकृतानिंदा ततोनिवृत्तौतु श त्रुकृतानिंदेत्युभयतः पाशारज्जुरित्याशंक्य जयेपराजयेचलाभध्रौव्याद् युद्धार्थमेवोत्थानमावश्यकमित्याह स्पष्टःपूर्वार्धं यस्मादुभयथापिते लाभः तस्माज्जेष्यामिशत्रून्मरिष्यामिवेतिकृतनिश्चयः सन्युद्धायोत्ति ष्ठअन्यतरफलसंदेहेपियुद्धकर्तव्यतायानिश्चितत्वात् अनेनचैतद्वि द्मःकतरन्नोगरीयइत्यादिपरिहृतम् ३७ ॥

सदानंदीटीका

ननुतर्हिकृतेयुद्धेनिंदाशत्रुकृताभवेत् कृतेमध्यस्थ[illegible]निंदास्या द्भीष्मादीनांवधादपि १ इत्येवंस्यादुभयतःपाशरज्जुर्ममेतिचेत् स्वधर्म करणान्निंदानमध्यस्थकृताभवेत् २ नहिस्वधर्मनिष्ठानांनिकुत्रापिका न्दा चन जयेपराजयेवातेलाभध्रौव्याद्गुणायमे। ३ उत्थानमुचितंतस्मा त्विष्टंतवतेनतः जेष्यामिवामरिष्यामीत्येवंकृत्वाविनिश्चयं ४ ३७॥

नीलकंठीटीका

यद्वाजयेमयदिवानोजयेयुरित्युक्तेतत्राह हतोवेति रणोस्थितस्यस्वर्गो वाराज्यंवास्तिहमस्तीतिपक्षद्वयमपिहितावहमित्यर्थः ३७ ॥

935

श्रानंदी टीका

युद्धे त्वक्रियमाणे गणप्रवो भयं इत्याह ३७ ॥

रामकंठी टीका

~~एवं प्रकारं स्वकर्मत्यागे अवाप्ति ते निरतिशय नित्य फलप्राप्ति~~
~~र्नास्तिहनिर्लक्षणार्थ समग्रे एनैनदपरित्यागे कोदोषइ~~
~~ति व्रतानिवक्षणो यदे पुनरपि विज्ञानी अर्थ ना ह ३७~~ ॥

लासिकी [illegible] टीका

अतो यथाकथंचिद् युद्धमनुष्ठेयमेवेत्याह हतइति जेष्यामि शत्रून्मरिष्यामि वेति निश्चयं कृत्वा पक्षद्वयेपि तव लाभ एवेत्यर्थः ३७ ॥

पंचोलीटीका

युद्धे क्रियमाणे जये अजयेपि संदिहानस्य प्रवृत्तिसिद्ध्यर्थं उभयत्रा लाभमाह हतो वेति हे अर्जुन अथवा त्वं हतः सन् स्वर्गं प्राप्स्यसि वा अरीन् शत्रून् जित्वा महीं भोक्ष्यसे हे कौंतेय तव एवं तस्मात् कृतनिश्चयो जेष्यामि शत्रून् मरिष्यामि वेति निश्चयं कृत्वा युद्धाय उत्तिष्ठ ३७

रणवीरसमिद्बोधिनी ॥

एवं च युद्धानुष्ठाने सर्वथा लाभ एवेत्याह हतो वेति निगदव्याख्यातमिदं किंतु यस्मात्पक्षद्वयेपि तव लाभस्तस्मात् कृतनिश्चयो व एवं युद्धं कर्तव्यं सर्वथा फलवत्वादिति टीकाकृत चित्तो युद्धायोत्तिष्ठ कौंतेय भवेति ३७॥

मधुभाष्य

३७॥

236

भाषाअनुवाद

तोयुद्धकरि गुरूआदिके वधसे निन्दाओ संग्राम छोडनेसे शत्रुनिन्दा करैंगे इसदुविधा चिन्ताके ऊपर कहतेहैं और दूसरे अध्यायके छठ यें श्लोकमे जोअर्जुनने कहाकिइनको हममारैंयायेई हमै जय करि लेंय इसकाभी उत्तर श्रीकृष्ण करतेहैं किजय करैंगेया पराजय पावैंगे इसकीनिश्चय करिके उठोजो कहाकिइसदैव आधीनजय पराजय कावा निश्चयहै तोइस युद्धमे जो तुमारीमृत्यु होयगीतोस्व र्गवासपावोगे और जोशत्रुवोंको जीतोगेतो पृथ्वीका राज्य औ भो ग करोगे तिससे हेकौंतेय अर्जुन युद्ध करनेकीनिश्चय करिके उ ठो तुमारे दोनो हाथलड्डुआहैं ३७ ॥

दोहा

मरैं तुपावैं स्वर्गको जीतैं भोगहुंगो महीभोग तातें उठ कौं
ति तनय कर निश्चय युद्धयोग ३७॥

237

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो
युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८ ॥

शांकरभाष्य

तत्र युद्धं स्वधर्म इत्येवं युध्यमानस्य उपदेशमिमं शृणु सुखदुः
खे इति सुखदुःखे समे तुल्ये कृत्वा रागद्वेषावप्यकृत्वेत्येतत् त
था च लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व
घटस्व नैवं युद्धं कुर्वन् पापफलमवाप्स्यसि इत्येष उपदेशः प्रासं
गिकः ३८ ॥

आनन्दगिरिकृतटीका

पापभीरुतया युद्धाय निश्चयं कृत्वा नोत्थातुं शक्नोमीत्याशंक्याह
तत्रेति युद्धस्य स्वधर्मतया कर्तव्यत्वे सतीति यावत् सुहृज्जीवन
मरणादिनिमित्तयोः सुखदुःखयोः समताकरणं कथमिति तत्राह
रागद्वेषाविति लाभः तत्र क्रोधादिप्राप्तिः अलाभस्तद्विपर्ययः न्याये
न युद्धेनापरिभूतेन परस्य परिभवो जयस्तद्विपर्ययस्त्वजयः त
योः लाभालाभयोर्जयाजययोश्च समताकरणं समानमेव रागद्वेषा
वकृत्वेत्येतद्दर्शयितुं तथेत्युक्तं यथोक्तोपदेशवशात् परमार्थदर्श
नप्रकरणे युद्धकर्तव्यतोक्तेः समन्वयपरत्वं शास्त्रस्यासाममित्याशं
क्याह एष इति क्षत्रियस्य स्वधर्मभूतयुद्धकर्तव्यतानुवादप्रसङ्गाग
तत्वादस्योपदेशस्य नानेन मिषेण समन्वयः सिध्यतीत्यर्थः ३८ ॥

स्वामिकृतटीका

यदप्युक्तं पापमेवाश्रयेदस्मानिति तत्राह सुखदुःखे इति सुखदुःखे समे
कृत्वा तथा तयोः कारणभूतौ लाभालाभावपि तयोरपि कारणभूतौ ज
याजयावपि समौ कृत्वा एतेषां समत्वे कारणं हर्षविषादराहित्यं युज्यस्व
सन्नद्धो भव सुखाभिलाषं हित्वा स्वधर्मबुद्ध्या युध्यमानः पापं न प्राप्स्यसीत्यर्थः ३८ ॥

पिशाचभाष्य

ततः स्वधर्म इत्येवं युद्ध्यतस्त उपदेशमिमं शृणु सुखदुःखे समे कृत्वा ला
भालाभौ जयाजयौ च समे कृत्वेत्येष उपदेशः प्ररोचनार्थः प्रासंगिकश्च

गी॰
टी॰
द्वि

कंपनुदे लौकिकन्यायः स्वधर्ममपि चावेक्ष्येत्यादिश्लोकैरुक्तः न तात्प
र्येण परमार्थदर्शनमिदं प्रोक्तं ३८ ॥

रामानुजभाष्य

मुमुक्षोर्युद्धानुष्ठानप्रकारमाह एवं देहातिरिक्तमस्पृष्टसमस्तदेहस्व
भावं नित्यमात्मानं ज्ञात्वा युद्धे चावर्जनीये शस्त्रपातादिनिमित्ते सुखदुःखे
अर्थलाभालाभजयपराजयेष्वविकृतबुद्धिः स्वर्गादिफलाभिसंधिरहि
तः केवलकार्यबुद्ध्या युद्धमारभस्व एवं कुर्वाणो न पापमवाप्स्यसि पापं सु
खदुःखरूपं संसारं नावाप्स्यसीत्यर्थः ३८ ॥

नावाप्स्यसे संसारं

अभिनवगुप्तटीका

न चानेन स्वधर्मेणैव कर्माणि कुर्वतो न कदाचित्पापसंबंधः ३८ ॥

परमार्थप्रपाटीका

अथ धर्मयुद्धस्वरूपमाह सुखदुःखे इति सुखदुःखे समे कृत्वा
तथा तयोः कारणीभूतौ लाभालाभौ जयाजयौ च समौ कृत्वा
हर्षविषादरहितो भूत्वा युध्यस्वेत्यर्थः एवमनेन प्रकारेण यु
द्धं कृत्वा पापं न प्राप्स्यसि ३८ ॥ ॥

वनमालीटीका

अनन्तरं क्षत्रियस्य युद्धानुष्ठानप्रकारमाह सुखेति सुखं वैषयिकं सुख
दुःखे लाभालाभौ जयाजयौ सममेव मया लक्ष्म्या सहिते हरौ कृत्वा तदर्पि
तेनात्मना[illegible]यद्वा वैषयिके सुखदुःखे च समे अस्वाभाविक
त्वात् मोक्षोपायविरुद्धत्वाद्धेयत्वेन समे तुल्ये कृत्वा ज्ञानानन्दत्वात्तेन ज
याद्यौ हर्षविषादादिरहितः सन् युद्धाय युज्यस्व संनद्धो भव देहादि
व्यतिरिक्तो ज्ञानानन्दस्वरूपः श्रीहरिप्रेरितोऽहं तत्प्रीत्यर्थं स्वविहितं क
र्म करिष्यामीति संचिंतयन् अविनाशरहितेन स्वामित्वमेवं येन युद्धानुकू
मं लं कृतिमानपि पापं तत्कं फलार्थं देहादिसंसारं नावाप्स्यसि किंतु मत्कृप
व भविष्यतीत्यर्थः ३८ ॥

ऊसमवैजयंतीटीका

किंच सुखदुःखे इति । सुखदुःखे रिपूणां वधे सुखं मित्राणां वधे दुःखं च ते
हे समे कृत्वा तयोः पुण्यापुण्यकर्मजनितत्वेनावश्यंभावित्वादागमापायि
त्वाच्चेत्येवं विचारेण तुल्ये कृत्वा अथैवं लाभालाभौ स्वराज्यादेर्लाभस्तदला
भस्तयोरपि द्रव्यार्जनादौ विपरीतदर्शनेन स्वाधीनत्वाभावात्तावपि समौ
कृत्वा तथैव जयाजयौ स्वबलैः शत्रूणां जयः परबलैः स्वबलस्याजयस्तयो
रपि दैवाधीनत्वात्तावपि समौ कृत्वा एवमेतदन्यच्च सर्वमीश्वरकृपयैव सिध्य
तीति न तु पराधीनस्य मम बलपौरुषादिनेति निश्चित्य ततो नन्तरं स्वाश्रा
धारणधर्मभूताय युद्धाय युज्यस्व संगरस्तकवचादीन्धारयित्वा बद्धक
तं सन्नद्धो युद्धमारभस्व एवं मोक्षपर्यन्तफललाभिकां इतो हित्वा स्वधर्मेयु
द्धाय उद्युक्तः सिध्यसि चेत्तर्हि स्वपरगोत्रादिवधजन्यपापेनावाप्स्यसि न प्राप्स्य
सि ३८ ॥

मधुसूदनीटीका

नन्वेवं स्वर्गमुद्दिश्य युद्धकरणे नस्यनित्यत्वव्याघातः राज्यमुद्दिश्य
युद्धकरणे त्वर्थशास्त्रत्वाद्धर्मशास्त्रापेक्षया दौर्बल्यं स्यात् ततश्च काम्य
स्याकरणेऽतः पापं श्रूयते स्म गुरुब्राह्मणादिवधस्य कृतोऽप्येवम् न
थाचाद्यं चेति श्लोकार्थो व्याहत इति चेन्नत्राह समता कारणं रागद्वेषराहि
त्यं सुखे तत्कारणे लाभे तत्कारणे जये च रागमकृत्वा एवं दुःखे तद्धेतोः अ
वेद्दे लाभे तद्धेतोः अजये च द्वेषमकृत्वा ततो युद्धाय युज्यस्व सन्नद्धो भव एवं सुख
कामनां दुःखनिवृत्तिकामनां वा विहाय स्वधर्मबुद्ध्या युध्यमानो गुरुब्रा
ह्मणादिवधनिमित्तं नित्यकर्माकरणनिमित्तं च पापं न प्राप्स्यसि यस्तु फ
स लकामनया करोति स गुरुब्राह्मणादिवधनिमित्तं पापं प्राप्नोति यो वा न क
रोति स नित्यकर्माऽकरणनिमित्तं अतः फलकामनामन्तरेण कुर्वन्
उभयविधमपि पापं न प्राप्नोति प्रागेव व्याख्यातोऽभिप्रायः हतो वा प्रा
प्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीमिति त्वानुषंगिकफलकथनमिति न
दोषः तथा चापस्तंबः स्मरति तद्यथाम्रे फलार्थे निमित्ते छायागंध इत्य
नूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते नो चेदनूत्पद्यन्ते न
धर्महानिर्भवतीति अतो युद्धशास्त्रे त्वाभावात्पापमेवाश्रयेदस्मानिति स्यार्थशास्त्रत्वं
निराकृतं भवति ३८ ॥

मुरानंदीटीका

गी. तत्रस्वधर्मइत्येवंयुध्यमानस्यतेपरं उपदेशंशृणुत्वंमेसुखदुःखेसमे
टी. इति १ सुखेतत्कारणेलाभेतन्निमित्तेजयेपिच अहंकृत्वारागमेवंचदुःखे
हि. तत्कारणेहतौ २ तन्निमित्तेजयेचाप्यकृत्वाद्वेषंततःपरं युद्धायभव
सन्नद्धोनैवंपापमवाप्स्यसि ३ फलाभिलाषयाकुर्वन्गुरुविप्रवधा
दिकंप्राप्नोतिकिल्बिषंघोरंतन्निमित्तमयंपुमान् ४ विनाफलाभिलाषं
तुधर्मइत्येवमाचरन् नैवंपापमवाप्नोतिमहेशाज्ञानुपालनात् ५
हतोवेत्यादिनाप्रोक्तंफलंतत्त्वानुषंगिकं नकाम्यकर्मसंग्रामःकिंतुनि
त्यःस्वधर्मतः ६ ॥ ३८ ॥

नीलकंठीटीका

स्वधर्मस्ययुद्धस्याकरणेधर्मकीर्त्योर्नाशःपापावाप्तिश्चेत्यभिहितंश्लो
केनभगवतायद्यप्युक्तंतथापियुद्धस्यअर्जुनाभिमतेकाम्यत्वपक्षेअदोष
त्वमहत्त्वापेक्षतेअवसिताव्यये यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः
इतितत्करणेपापसंकीर्तनान्निवारयितुंसिद्ध्योःसमत्वलक्षणयोगमा ड्यसि^
ह सुखदुःखेइति समेकृत्वासुखदुःखेतयोस्तद्धेत्वोःराज्यलाभालाभ
त्वो^ योस्तद्धेत्वोर्जयाजययोःरागद्वेषावकृत्वेत्यर्थःकेवलंस्वधर्मोयमितिमत्वा
युद्धाययुज्यस्वयतस्व एवंकुर्वंस्त्वंपापंनावाप्स्यसि यस्तुराज्यलोभेन
सुहृद्वधंकरोतितस्मात्त्वेवपापमितिभावः कथंतर्हिस्वधर्मत्वेनानु
ष्ठितेपियुद्धेहतोवाप्राप्स्यसिस्वर्गमित्यादिफलस्मरणं आनुषंगिक
मितिब्रूमः तथाचापस्तंबः तद्यथाम्रेफलार्थेनिर्मितेछायागंधइत्य
नूत्पद्येते एवंधर्मंचर्यमाणमर्थाअनूत्पद्यंतेनचधर्महानिर्भवतीतिआ
म्रनिदर्शनेनप्रतिपादयति ३८ ॥

आनंदी टीका

एवंलोकदृष्टेनस्वकर्मणाभिप्रवीकृतस्यश्रेयःकारणंज्ञानस्य
कर्मणासशुद्धयश्चहिशुनि रागद्वेषाभ्यांविनाप्रवृत्तस्यतत्त्वि
यमेवस्वधर्मोविशुणात्श्रेष्ठ इतिसुद्धार्थश्रुयुक्तोभवएवमने
नप्रकारेणस्वधर्मानुष्ठानाद्दन्युहननेशाकितृपापंनाप्स्यसि
सर्वदास्वकर्मानुष्ठानाद्भोगापवर्गावेवप्राप्स्यसीत्यर्थः ३८

रामकंठी टीका

एवमनेनप्रकारेणवर्तमानःपापंज्ञातिवधादितःसंभाव्यमा
नंकिल्बिषंनावाप्स्यसि लप्स्यसेकथंवर्तमानःअथमंतावद्यथो
पदिष्टार्थनिःसंशयप्रतिपत्तिप्ररूढनिष्कम्पप्रज्ञाप्रतिभिज्ञा
नसमस्तप्राणभृत्सर्वावस्थाव्यापकसामान्यसंविन्मात्रस्व
भावेनित्यनिरुत्तरानंदनिर्भरतयास्वरूपव्यतिरिक्तप्राप्य
दार्थान्तरप्राप्तिविरहितेसत्येवात्मन्यकृत्रिमआत्माभिमान
मास्थाय मायाव्यामोहजनितेदेहाद्यनात्मभूतभावात्मप्रत्य
यलक्षणविपर्ययज्ञानैः सर्वप्राणिभिरुपादेयतयाहेयतया
चपरिकल्पितभेदप्रतिलक्षणविनश्वरेसुखदुःखेहर्षविषा
दौसमेदृष्ट्यात्मनिदृश्यतामात्रेणसंबद्धत्वेत्वादवपज
नितविशेषात्मकविकारतयानिर्विशेषतया समकृतिप्र
त्यासंपाद्य एवमेवतद्धेतुभूतौ राज्यादिलाभितार्थलाभालाभौ
तयोरपिहेतुभूतौजयपराजयौ तथैवसमौनिर्विशेषौसंपाद्य
तत्त्वतोयथावस्थितेनरूपेणनिश्चित्येत्यर्थः एतेहिसुखदुःखाद
योवेद्यत्वमात्रेणसंबद्धाः वेदकस्यात्मनोनकिंचिद्विकारलेश
संपादयितुंक्षमाः यथानीलपीतादयःप्रकाशत्वमात्रेणसंब
द्धाःप्रकाशस्यार्कालोकस्यनकांचिद्विशेषंनीलपीतादिकमुन्मे
षयितुंशक्ताः केवलंप्रकाशत्वमात्रेणैकेनरूपेणतत्रसंबद्धाः
तदेतत्सुखादीनांसमीकृत्य ततएतत्समाधिप्रतिपत्तेरनन्तर
मेतत्समाधि[illegible]स्वप्रतिष्ठितमतिर्युद्धशब्दोपलक्षितायस्वकर्म
णेयुज्यस्वसमन्वयस्व यथोक्तज्ञाननिष्ठतयास्वकर्मा[illegible]चरितेष्
त्यर्थः [illegible]
[illegible]

४ ^ वेद्यत्वमात्ररूपंसाम्यं एवंसुखादीनि

[illegible]
३८ ॥

लासिकी [illegible] टीका

ननुगुरुब्राह्मणवधात्पापमेवाश्रयेदित्यत्रोपदेशंशृणुइत्याह सुखदुःखेइति सुखाभिलाषंहित्वा स्वधर्मंयुध्यमानः पापंनप्राप्स्यसीत्यर्थः ३८ ॥

पंचोलीटीका

गुर्वादीनांवधेपियथापापसंबंधोनभवतितंप्रकारमाह सुखदुःखेइति सुखदुःखेतथालाभालाभौजयाजयौसमेतुल्यौकृत्वातत्र रागद्वेषावकृत्वाततोयुद्धाययुज्यस्वसन्नद्धस्वएवंपापंनअवाप्स्यसि सुखविरागःदुःखेद्वेषरहितः तथाहर्षद्विष्टौजयाजयौसमौकृत्वाएवंयुद्धंकुर्वन्पापफलंनप्राप्स्यसिइत्यर्थः ३८

रणवीरसमिद्धोधिनी ॥

ननुस्वर्गोद्देशेनक्रियमाणत्वाद्युद्धस्यकाम्यत्वेनाद्धर्मशास्त्रान्तर्गतत्वं गुरुब्राह्मणादिवधादिरूपस्यतस्याननुष्ठानेवधर्मशास्त्रान्तर्गतं तथाचार्थशास्त्राद्बलवद्धर्मशास्त्रमितिस्थितिरितियाज्ञवल्क्यस्मृतेः संग्रामाकरणंधर्म्यमेवनपुनःपापापादकमिति कथमयंवेत्वमिमंधर्म्यमितिश्लोकार्थसंगतिरित्याशंक्याह सुखदुःखेइति एतेषांसुखदुःखादीनांसमत्वेकारणंनिरंतरस्वधर्मपरमर्मावष्टंभेनहर्षविषादराहित्यं ततश्चवीरचर्यानिष्ठतया स्वकर्मानुतिष्ठेदिति तवततस्वधर्मतथैवकर्माणिकुर्वतोनपापसंबंधइतिभावः ३८॥

मधुभाष्य

३८॥

[illegible]तीतिचेन्न। किंवास्माभिरत्र हृदयेनैतत्तां ग्रामनिंद्यादि संशोक
[illegible]मुभयविधफलविरहे आपातत आत्मज्ञानयुतं प्रतिज्ञातं भिन्नामा
त्रकृतदेहयात्रे निश्चितं श्रेयो जिज्ञासमाला द्रूपविशेषत आत्मानात्म
विवेक उपदिष्टः वेदाविनाशिनमित्यादिना ममतालक्षणमोहतदुत्थ
शोकनिरासः कृतः अमृतत्वाय कल्पते [illegible] इतिनिश्चितं
श्रेयोप्यापातं तदुक्तं विशेषतस्तु वक्ष्यामः एवं समतित्वज्ञानमार्गेणा
लंबसे वेत्यभिप्रायत्वात् भगवानाघेकर्तव्यमुपदिशति [illegible] =
सुखदुःखे इति यदि ज्ञा[illegible]नमार्गमवलंबसे तर्हि वेकृत्वा युद्धाय युद्ध्य
कर्तव्यमन्यस्य वदस्व किं कृत्वेत्यत आह सुखदुःखे समे कृत्वेति यथा
दुःखे द्वेषं एवं सुखमपि हेयं कृत्वेत्यर्थः एवं लाभालाभजयाजययोर
पि समत्वं निष्काम एवं स्वधर्ममनुतिष्ठेतिभावः ननु ज्ञानमार्गोत्त
रत्वेन कर्म कस्मात्कर्तव्यमत आह नैवमिति एवमनेन प्रका
रेण कर्माणि कृते पापं पापाकारमंतःकरणपरिणामसंभावा
वनादिना वाप्स्यसि शुद्धांतःकरण एव भविष्यसीत्यर्थः ३८ ॥

भाषाअनुवाद

जोकदाचित् वधरेतुकपापहीकौ निश्चयकरि उसके डरसे यु
द्धमेनिश्चयकरकेनहीउठिसकते यहकहोतो सुहृद मित्रोंकेजी
वन औ मरणनिमित्तक सुख औ दुखकीसमानकहतेहै किमय
म सुख औदुख तथालाभ औहानि जय पराजय इनकोसमान
करि औ प्रीति विरोधकोभीत्यागकरिके नवयुद्धमे प्रवृत्तहोउ
इसप्रकारसे युद्धकरनेमे पापनप्राप्त होयगा अर्थात् नलगेगा ३८॥

दोहा

लाभ अलाभ सुखदुःखसमकरजीतअजीतहिं दोय तिस
तें युद्धको युगतहो पापनपैसें दोय ३८॥

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु बुद्ध्या
युक्तो यया पार्थ कर्म्मबन्धं प्रहास्यसि ३९ ॥

शांकरभाष्य

शोकमोहापनयनाय लौकिको न्यायः स्वधर्म्ममपि चावेक्ष्येत्याद्यैः
श्लोकैरुक्तो न तु तात्पर्येण परमार्थदर्शनं त्विह प्रकृतं तच्चोक्तमुपसं
ह्रियते एषा तेऽभिहितेति शास्त्रविषयविभागप्रदर्शनाय इह हि दर्शिते
पुनः शास्त्रविषयविभागे उपरिष्टात् ज्ञानयोगेन सांख्यानां कर्म्मयोगेन
योगिनामिति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्त्तिष्यति श्रोतारश्च विष
यविभागेन सुखं ग्रहीष्यन्तीत्यत आह एषा त इति एषा ते तुभ्यमभिहितोक्ता
सांख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षात् शोकमोहादिसंसा
रहेतुदोषनिवृत्तिकारणं योगे तु तत्प्राप्त्युपाये निःसंगतया द्वन्द्वप्रहाण
पूर्वकमीश्वराराधनार्थे कर्म्मयोगे कर्म्मानुष्ठाने समाधियोगे च इमा
मनन्तरमेवोच्यमानां बुद्धिं शृणु तां च बुद्धिं स्तौति प्ररोचनार्थं बुद्ध्या यया
योगविषयया युक्तो हे पार्थ कर्म्मबन्धं कर्म्मैव धर्म्माधर्म्माख्यो बन्धः क
र्म्मबन्धः तं प्रहास्यसीश्वरप्रसादनिमित्तज्ञानप्राप्तेरित्यभिप्रायः ३९ ॥

आनन्दगिरिकृतटीका

तत्र स्वधर्म्ममपि चावेक्ष्येत्यादिश्लोकैर्न्यायावष्टम्भेन शोकमोहापनय
स्य तात्पर्येणोक्तत्वात्तस्मिन्नुपसंहर्त्तव्ये किमिति परमार्थदर्शनमुप
संह्रियते तत्राह शोकेति स्वधर्म्ममपीत्यादिभिरतीतश्लोकैः शोकमो
हयोः स्वजनमरणगुर्वादिवधशंकानिमित्तयोः सम्यग्ज्ञानप्रतिब
न्धकयोरपनयार्थं वर्णाश्रमवर्त्तं धर्म्ममनुतिष्ठतः स्वर्गादि सिध्यति
तावन्मात्रेत्यन्वयव्यतिरेकात्मको लोकप्रसिद्धो न्यायो यद्यपि दर्शितस्तथा
पि नासौ तात्पर्येणोक्त इत्यर्थः किं तर्हि तात्पर्येणोक्तं तत्राह परमार्थेति
न त्वेवाहं जातु नासमित्यादि समनन्तरमुपपते उक्तं न जायते म्रियते वा
कदाचिदित्यादिनोपपादितमित्यर्थः उपसंहारप्रयोजनमाह शास्त्रेति
तस्य वस्तुद्वारा विषयो निष्ठाद्वये तस्य विभक्तस्य तेनैव विभागेन प्रद
र्शनार्थं परमार्थदर्शनोपसंहार इत्यर्थः ननु किमित्यत्र शास्त्रस्य विष
यविभागः प्रदर्श्यते उत्तरत्रैव तद्विभागप्रवृत्तिप्रतिपत्त्योः सम्भवादि
ति तत्राह इहेति शास्त्रप्रवृत्तेः श्रोतृप्रतिपत्तेश्च सौकर्यार्थमादौ

गी॰
टी॰
द्वि॰

विषयविभागसूचनमित्यर्थः। उपसंहारस्य फलवत्त्वमेवमुक्त्वा तमे
वोपसंहारमवतारयति एषा तेऽभिहितेति परमार्थात्मतत्त्वविषया ज्ञान
निष्ठामुक्तामुपसंहृत्य वक्ष्यमाणां संगृह्णाति योगे त्विमामिति तामेव बु
द्धिं विशिष्टफलवत्त्वेनाभिष्टौति बुद्ध्येति ततोपसंहारभागं विभ
जते एषेत्यादिना बुद्धिशब्दस्यान्तःकरणविषयत्वं व्यावर्तयति ज्ञा
नमिति तस्य सहकारिनिरपेक्षस्य विशिष्टफलवत्त्वमाचष्टे साक्षादि
ति शोकमोहौ रागद्वेषौ कर्तृत्वं भोक्तृत्वमित्यादिरनर्थः संसारस्तस्य
हेतुर्दोषः साक्षात्तेन तस्य निवृत्तौ निरपेक्षं कारणं ज्ञानमज्ञाननिवृत्तौ
ज्ञानस्यान्वयव्यतिरेकसमधिगतसाधनत्वादित्यर्थः। योगे त्विमामित्या
दिव्याकुर्वन् योगशास्त्रस्य प्रकृते चित्तवृत्तिनिरोधविषयत्वं व्यवच्छि
नत्ति तत्प्राप्तीति प्रकृतमुक्तमुपयुक्तं ज्ञानं तत्पदेन परामृश्यते ज्ञा
नोदयोपायमेव प्रकटयति निःसंगतयेति फलाभिसन्धिवैधुर्यं
निःसंगत्वं बुद्ध्येत्यस्य प्रयोजनमाह परोक्षतार्थमित्यभिहिता हि बु
द्धिःश्रद्धानत्वा सत्यनुष्ठातारमधिकरोति तेन ज्ञप्तिरर्थवतीत्यर्थः
कर्म्मानुष्ठानविषयबुद्ध्या कर्म्मबन्धस्य कुतो निवृत्तिर्न हि तत्त्वज्ञान
मन्तरेण समूले कर्म्महानं शक्यमित्याशंक्याह ईश्वरेति ३९॥

स्वामिकृतटीका

उपदिष्टं ज्ञानयोगमुपसंहरन् तत्साधनं कर्मयोगं प्रस्तौति एषेति
सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यक्ज्ञानं तस्मिन्
प्रकाशमानमात्मतत्त्वं सांख्यं तस्मिन् करणीया बुद्धिरेषा तवाभिहि
ता एवमभिहितायामपि सांख्यबुद्धौ तव चेदात्मतत्त्वमपरोक्षं न सं
भवति तर्ह्यन्तःकरणशुद्धिद्वारा आत्मतत्त्वापरोक्षार्थं कर्मयोगे त्विमां बुद्धिं
शृणु यया बुद्ध्या युक्तः परमेश्वरार्पितकर्मयोगेन शुद्धान्तःकरणः सन्
तत्प्रसादलब्धापरोक्षज्ञानेन कर्मात्मकं बन्धं प्रकर्षेण हास्यसि त्यक्ष्यसि ३९॥

पिशाचभाष्य

तच्चोक्तमुपसंहरति एषेति एषा तेऽभ्यभिहिता उक्ता सांख्ये परमा
त्मवस्तुविवेकविषये बुद्धिः ज्ञानं साक्षाच्छोकमोहादिसंसारनिवृत्ति
कारणं योगे तत्प्राप्त्युपाये निःसंगतया द्वंद्वप्रहाणपूर्वकमीश्वराराध
नार्थे कर्मानुष्ठाने समाधियोगे च इमामनन्तरमेवोच्यमानां बुद्धिं शृणु

२४२

नो बुद्धिं स्तौति श्रोतृणां प्ररोचनार्थं बुद्ध्या यया योगविषयया युक्तः हे
पार्थ कर्मबंधं कर्मैव धर्माधर्माख्यो बंधः तं प्रहास्यसि ईश्वरप्रसादनिमित्त
ज्ञानप्राप्तेरित्यभिप्रायः ३९ ॥

रामानुजभाष्य

एवमात्मयाथात्म्यज्ञानमुपदिश्य तत्पूर्वकं मोक्षसाधनभूतं कर्मयो
गं वक्तुमारभते एषा तेऽभिहिता सांख्ये बुद्धिः आवयोरीश्वरमात्मनां च सांख्यं ज्ञानं सांख्ये
आत्मतत्त्वे ज्ञानाय या बुद्धिरभिधेया न त्वेवाहमित्यारभ्य तस्मात्सर्वाणि
भूतानीत्यंते तेन सा तवाभिहिता आत्मज्ञानपूर्वकमोक्षसाधनभूतकर्मानु
ष्ठाने या बुद्धिर्योगे वक्तव्यः स इह योगशब्देनोच्यते दूरेण ह्यवरं कर्म बुद्धि
योगादिति वक्ष्यते अत्र योगे या बुद्धिर्वक्तव्या तामिमामभिधीयमानां शृणु यया
या बुद्ध्या युक्तः कर्मबंधं प्रहास्यसि कर्मणा बंधः कर्मबंधः संसार इत्यर्थः ३९॥

अभिनवगुप्तटीका

एषा च तव सांख्ये सम्यग्ज्ञाने बुद्धिर्निश्चयात्मिका उक्ता एषैव च यथा योगे
कर्मकौशले युज्यते तथैव शृणु यया बुद्ध्या कर्मणां बंधकत्वं त्यक्ष्यसि न हि
कर्माणि स्वयं बंधने जडत्वात् अतः स्वयमात्मा कर्मभिरात्मानमात्मकैरात्मा
नं बध्नाति ३९ ॥

परमार्थप्रपाटीका

अथोपदिष्टज्ञानयोगमुपसंहरन् स्वधर्ममयोऽस्य कृत्वा त्वात्कर्मयो
गं प्रशंसन्नाह एषेति सम्यक् ख्यायते प्रकाश्यते आत्मतत्त्वमन
येति संख्या सम्यक् ज्ञानं तस्मिन्प्रकाश्यमानमात्मतत्त्वं सांख्ये तत्र
साधनीभूता या बुद्धिः एषा ते इति तुभ्यमभिहिता कथिता एवं क
थितायामपि सांख्यबुद्धौ तव चेदात्मतत्त्वमपरोक्षं न भवति तर्हि
तः करणशुद्धिद्वारात्मतत्त्वमपरोक्षं कर्तुं कर्मयोगे त्विमां वक्ष्य
माणां बुद्धिं शृणु यया बुद्ध्या कर्मात्मकं बंधं प्रकर्षेण प्रहास्यसि त्य
क्ष्यसि ३९ ॥ ३९ ॥ ३९ ॥

॥

वनमालीटीका

उपदिष्टज्ञानोपसंहारपूर्वकं ज्ञानोपायं विहितसत्कर्मसमाधिरूपं व
क्तुं प्रतिजानीते एषेति सम्यक् ख्यायते ज्ञायते येन सा संख्या बुद्धिः तया

वधारणीयमात्मतत्वं सांख्यं तस्मिन्सांख्ये तत्ज्ञानाय याऽभिधेयं सा न त्वेवा
हमित्यारभ्य तस्मात्सर्वाणि भूतानीत्यंतेनाभिहिता आत्मयाथात्म्यानुसं
धानपूर्वकनिःकामकर्माचरणे चित्तैकाग्र्यत्वहेतुना उपायेन चित्तमेकाग्रं क्रियते
नेनेति योगस्तस्मिन्योगे देनोच्यते एषा योगे या वक्ष्यमाणा बुद्धिस्तामिमामभिधी
यमानां शृणु यया बुद्ध्या युक्तः कर्मबंधं कर्मरूपो प्रवाहतो नाद्यमविद्योपहा
स्यसि मदीयमिदं कर्माहं कर्तेत्याद्यभिमानात्मकः अंतःकरणस्तद्ववित् सत्क
र्मानुष्ठानेन ततो मय्यचला भक्तिस्ततो मदापरोक्ष्यं ततो मन्महाप्रसाद
स्ततो विद्यानिवृत्तिपूर्वकानंदाविर्भावरूपो मोक्षस्तदिति भावः ३९ ॥

ऊमृमवैजयंतीटीका

एवं देहादिव्यतिरिक्तमात्मतत्त्वमुपदिश्येदानीमुपसंहरन्मोक्षोपायभू
तं कर्मयोगमुपदेष्टुकामो भगवांस्तमेव प्रस्तौति एषा त इति सांख्ये स
म्यक्ख्यायते निश्चीयते तत्त्व त्रयं पयासा सांख्या बुद्धिः उपनिषद्दा तया देहें
द्रियाद्यवेदनवैलक्षण्येन निश्चीयमाने यदात्म तत्त्वं तत्सांख्यं तस्मिन्सांख्ये
आत्मतत्त्वे तत्स्वरूपादिविज्ञानाय या बुद्धिः कर्तव्याभवेत्साएषा बुद्धिस्ते त्वां
प्रतिमयाऽभिहिता कथितां केः न त्वेवाहमित्यादिभिर्देही नित्यमवध्यो
यमदेहमित्यंतैरेकोनविंशतिश्लोकैः यदि मदुक्तस्वभावेऽस्मिन्नात्मस्व
रूपके आत्मतत्त्वे तव बुद्धिः स्थिरा न भवेत्तर्हि तत्पुनः योगे कर्मयोगे या
बुद्धिः करणीया भवेत्तामिमां मया वक्ष्यमाणां बुद्धिं त्वं शृणु सावधाने
न मनसा त्वं स्ववर्णोक्तकर्मयोगविषयिणा बुद्धेः फलदातृत्वेन प्र
स्तौति हे पार्थ कर्मयोगे निश्चयात्मकया अनया बुद्ध्या युक्तस्त्वं कर्मबंधं जीवा
नां कर्मणां बंधो यस्मिन्सः कर्मबंधः संसारं तं प्रहास्यसि प्रकर्षेणात्य
क्ष्यसि स्नानादिकर्मनिमित्तको यः संसारस्तस्य यमभूतेन युद्धादिकर्मणा
शिथिलं करिष्यसि चेत्तर्हि एवं मोक्षं प्राप्स्यसीत्यर्थः ३९ ॥

मधुसूदनीटीका

ननु भवतस्स्वधर्मबुद्ध्या युध्यमानस्य पापाभावः तथापि मोनप्रतिपुद्ध
कर्तव्यतोपदेशस्तवोचितः य एनं वेत्ति हंतारमित्यादिना कथं स पु
रुषः पार्थ कं घातयति हंति कमित्यंतेन विदुषः सर्वकर्मप्रतिषेधात्
तद्यः कर्तृभोक्तृसुहृत्स्वरूपोऽहमस्मीति युद्धे कृतानंतफलभोक्ष्य इति चेत्ता
ते संभवति विरोधात् ज्ञानकर्मणोः समुच्चयासंभवात्प्रकाशतमसोरिव
अयं चार्जुनाभिप्रायो ज्यायसी चेदित्यत्र व्यक्तो भविष्यति तस्मादेकमेवमा

प्रतिज्ञानस्य कर्मणश्चोपदेशो नोपपद्यत इति चेत् विद्वदविद्वदवस्था
भेदेन ज्ञानकर्मोपदेशोपपत्तेरित्याह भगवान् प्रधानत्वेनाहमित्या
अंशतिस्त्राद्वैः त्यपिपाठम् द्येकोनविंशतिश्लोकैः तत्र श्रममभिहिता सांख्यसम्यक्ख्यापनेन सर्वा
पाधिस्वरूपतया प्रतिपाद्यते परमात्मतत्त्वमनयेति सांख्योपनिषत्
तयैव तात्पर्यपरिसमाप्त्या प्रतिपाद्यते यः स सांख्यः औपनिषदः पुरुष
इत्यर्थः तस्मिन् बुद्धिस्तन्मात्रविषयं ज्ञानं सर्वानर्थनिवृत्तिकारणं प्र
क्तिमयोक्तं तेनात्र शास्त्रानन्वतः क्वचिदपि कर्मोच्यते तस्य कार्यं न विद्यते
इति वक्ष्यमाणत्वात् यदि पुनरेवं मयोक्तेऽपि न वेषा बुद्धिर्नोदेति वि
त्तदोषात् तदा तदपनयेनात्मतत्त्वसाक्षात्कारायकर्मयोगः एव त्वया
नुष्ठेयः तस्मिन्योगे कर्मयोगे तु करणीयामिमां सरवड्ः खेसमेकृत्वे
त्वं त्वोक्तां फलाभिसंधित्यागलक्षणां बुद्धिं विस्तरेण मया वक्ष्यमाणां शृ
णु तु शब्दः पूर्वं बुद्धेर्योगविषयत्वव्यतिरेकसूचनार्थः तथा च शुद्धान्तः
करणे प्रति ज्ञानोपदेशः अशुद्धान्तःकरणे प्रति कर्मोपदेश इति अतः सम्
च्चयशंकयाविरोधावकाश इत्यभिप्रायः योगविषयां बुद्धिं फलकथनेन
स्तौति यया व्यवसायात्मिकया बुद्ध्या कर्मसु युक्तस्त्वं कर्मनिमित्तं बं
धमाशयाशुद्धिलक्षणं ज्ञानप्रतिबंधं प्रकर्षेण पुनः प्रतिबंधानुत्पत्तिरूपे
ति णहास्यसि त्यक्ष्यसि अयं भावः कर्मनिमित्तो ज्ञानप्रतिबंधः कर्मणैव धर्मा
ख्येनापनेतुं शक्यते धर्मेण पापमपनुदतीति श्रुतेः श्रवणादिलक्षणो
विचारस्तु कर्मात्मकप्रतिबंधरहितस्याः संभावनादिप्रतिबंधं दृष्टद्वारे
णापनयतीति न कर्मप्रतिबंधनिराकरणायोपदेष्टुं शक्यते अतोऽस्यंत
मलिनांतःकरणत्वाद् बहिरंगसाधनं कर्मैव त्वयानुष्ठेयं नाधुना श्रवणा
दियोग्यतापि न तवजाता दूरे तु ज्ञानयोग्यतेति तथा च वक्ष्यति कर्मण्येवा
धिकारस्ते इति एतेन सांख्यबुद्धेरंतरंगसाधनं श्रवणादि विहाय बहिरंग
साधनं कर्मैव भगवता किमित्यर्जुनायोपदिश्यत इति निरस्तं कर्मबंधं
संसारमीश्वरप्रसादनिमित्तज्ञानप्राप्त्या प्रहास्यसीति प्राचां व्याख्याने तु
प्रहाररोषः कर्मपदवैयर्थ्यं च परिहर्तव्ये ३९ ॥

ननु धर्मधिया मास्तु बुध्यमानस्य मे शुभं तथापि पुंकार्यतोपदेशस्ते नमो

गी॰
टी॰
द्वि

प्रति १ योग्योयस्मात्पुराज्ञस्यकर्मादेप्रस्योदितः तस्यकर्तृत्वरूपोहमिति
ज्ञानेपुनर्भवेत् २ पुद्देहकृताफलंभोक्ष्येइतिज्ञानेविरोधतः तस्मात्रैयोगप
थेनमाप्रतिज्ञानकर्मणाः ३ उपदेशःकथंयोग्यःस्यादित्यत्राहमाधवः ज्ञा
नकर्मोपदेशःस्याद्वस्थाभेदतोयतः ४ एकेऽप्यपिशास्त्रीयोऽव्यवस्थाप्र
णतेर्जुन तत्त्वेवेत्यनन्यारभ्यतन्वमेषापुरोदिता ५ तत्त्वंसंख्यायतेसर्वो
पाधिम्त्यक्तयातया संख्योपनिषदेतस्याप्रतिपाद्यःपरःपुमान् ६ सांख्य
ज्ञत्वात्रविषयेज्ञानमज्ञाननाशकं मयोक्तंत्वांप्रतीत्येवंज्ञातेतःकर्मनोचि
तं ७ यद्येवंतेमतुक्तेर्थेचित्तदोषात्रधीर्भवेत् तदातद्दोषनाशार्थंतत्त्व
ज्ञानोदयायच ८ कर्मयोगोस्यनुष्ठेयस्त्वयाशुद्धिकारकः तस्मिन्यो
गेत्वकर्तव्याभिमानोनैष्कार्म्यशालिनी ९ सर्वत्रसमतारूपाबुद्धिर्व
विस्तराद्गुण तनाबुद्धेःपुरोक्तायाभेदैस्याःसूक्ष्मतेधियः १० तेन
शुद्धधियोज्ञानेकर्मोशुद्धधियःस्मृते यथानिस्वयरूपिएणाबुद्ध्या
युक्तःस्वकर्मसु ११ वेयंकर्मनिमित्तंत्वमाशयाशुद्धिलक्षणं प्रतिबंधं
निजज्ञानेप्रकर्षेणैवहास्यसि १२ धर्माधर्माख्यकर्मैवंबंधंतत्त्वप्रहा
स्यसि ईशप्रसादतस्तत्त्वज्ञानलाभसुखेनवा १३ ।। ३५ ।।

नीलकंठीटीका

एवमर्जुनस्यसर्वोक्तोज्ञावपिमोहावपनीतौ तत्रकेवलानयतिहंति
कर्मितिकर्तृत्वकारयितृत्वयोरात्मन्यसंभवउक्तः ततोयुद्धायपुन्यु
क्तेतिनियोगस्यात्रतः तस्यकर्तृत्वाकाशवत्सर्वगतस्यनियोज्यत्वंसंभव
तीतिपरस्पर व्याहतमेतदितीमामाशंकामुपिकारिभेदेनउभयव्य
वस्थापयन्परिहरति एषातेइति एषातेतभ्यमभिहिताप्रशोच्यान
न्वशोचस्त्वमित्यादिनास्वधर्ममपिचावेक्ष्यतःआक्रतेतमेदर्भेणउक्ता
सांख्येसम्यक्ख्यायतेप्रकाश्यतेवस्तुतत्त्वमनयेतिसंख्योपनिषत्
तत्रविदितेसांख्येऔपनिषदेब्रह्मणिविषयेबुद्धिर्ज्ञानंसंसारनिवर्तके
एषातेसांख्येबुद्धिरभिहितेतिसंबंधः योगेत्विमांशृणुयोःसमोभूत्वा
समत्वंयोगउच्यतइतिवक्ष्यमाणलक्षणेविषये तथाचसर्वैवलक्ष
णभेदेननार्थः वक्ष्यतिचज्ञानकर्मनिष्ठयोर्विभिन्नाधिकारित्वंलोकेस्मि
न्द्विविधानिष्ठापुराप्रोक्तामयानघ ज्ञानयोगेनसांख्यानांकर्मयोगेन

ति
श्र

योगिनामिति एतेनैतान्कर्मणः सन्न्यस्य शोकाद्यपास्त इमां स्वध
र्ममपि चावेक्ष्येत्यादिनाऽनेन ग्रन्थेनोक्तामपि विस्तरेणाभिधीयमानां
शृणु इमामेव बुद्धिं सांख्येति सांख्येन तु ज्ञेत्यादिना नान्यकर्मबंधप्रहा
णमात्मज्ञानेनैव श्रूयते तपसैवात्मपदं विदित्वा न लिप्यते कर्मणा पा
पकेनेति श्रुतेः कर्मयोगस्तु कर्मबंधं दृढीकरिष्यत्येवेति कथमुच्यते
कर्मबंधं प्रहास्यसीति येन श्रुतिबलादिति ब्रूमः तथाहि ईशावास्यमिदं
सर्वं यत्किंचिज्जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्यचिद्धनं
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोऽस्ति न क
र्म लिप्यते नरे इति श्रुतिरीश्वरीश्वरेणेदं सर्वं लोभितमस्तीति न कश्चित्किं
चित्स्वेच्छया कर्तुं प्रभवति अतः सर्वत्र ममताहीनः सन् भोक्तृत्वकर्तृत्वा
व२ भिमानत्यागेन भोगान् भुंक्ष्व कर्माणि च कुरु एवं कुर्वति त्वयि कर्मलेपो ना
स्तीतोऽन्यदुपायांतरं च नास्तीति वदति नर्मतत्कनककार्यं यसादिवन्
केनचिद्विशेषरूपेणापेतेन कर्मैव सजातीयोच्छेदति मित्रं भविष्यतीति
युक्तमुक्तं कर्मयोगेनापि कर्मबंधं प्रहास्यसीति ३९ ॥ ॥

आनंदी टीका

यदिनिष्कामतयानुष्ठेयस्यास्यफलंकिमपिनस्यात्तर्हिव्यर्थमेत
दनुष्ठानमितिशंकापनोदायज्ञानसमुच्चितकर्मानुष्ठानस्यश्रे॰
यः प्राप्तिरेवफलमित्युपदेशादेहदेहिनोर्नित्यानित्यविचार
णयाज्ञानविषयांमतिमुक्त्वाकर्मविषयांलक्षयितुमुपक्र
मते सांख्यसंप्रदेहदेहिनोर्नित्यानित्यविचारणइदेन ज्ञाप
नेज्ञानेएषाबुद्धिस्तवोक्तात्पुनःयोगेयुक्तोकर्मणःकरणप्र
कारेफलाकांक्षाविनानुष्ठानेयथायोगबुद्ध्यायुक्तस्सन्॰
तःकर्मणांबंधंबंधकत्वंप्रहास्यसि फलाकांक्षांविनावर्तमानके
कर्मकृतेनबन्धकेनभवतीत्यर्थः ३९ ॥

रामकंठी टीका

+ एवंज्ञानक्रियासमुच्चयमेवोपदेश्यतयावि निश्चित्यज्ञानविषयांमतिमुक्त्वाकल्पांमत्वा तांक्रियाविष यांवक्तुमुपक्रममाणस्त एवज्ञानकर्मणीसांख्ययो गशब्दाभ्यांव्यवहरन्नाह +

इदमात्मादिसत् इदंदेहादिप्रसत् इतिहेयोपादेयपदार्थपरि
गणनासंख्यातामधिकृत्यकृतशास्त्रमन्वर्थंतयासांख्यंसांख्य
मित्युच्यते तदेकंज्ञानमपिसांख्यंनतुकपिलादिप्रणीतं॰
तस्यनानात्मवादपरमार्थत्वात् तस्मिन्सांख्येविषयेएषाप्रबुध्ये
नप्रतिपादिताबुद्धिः प्रज्ञातवोपदिष्टायथायथाज्ञातया तत्सांख्यं॰
सम्यगुत्पन्नेनवाउक्तज्ञानसमधिगम्योनपरमार्थतत्त्वेन
नार्थसंबंधोयोगः तद्धेतुत्वात्कर्मैवयोगशब्देनेहोक्तम् नहि
केवलस्यज्ञानस्ययोगार्थसंबंधहेतुत्वंसंभवति किंतुतदनुग
तस्यकर्मणएवतेनप्रबन्धेनवक्ष्यते इत्येवंविधेयोगेकर्मणीमा
वक्ष्यमाणांबुद्धिंशृणु अवधारय यथाकर्मैवतत्त्वेनात्मकारण
तयाविज्ञायतेतथाह यथावक्ष्यमाणयाबुद्ध्यायुक्तःसन्कर्मबन्धं
कर्मकृतंज्ञानसमुत्पादजननविषयंबन्धमस्वातंत्र्यंप्रहास्यसित्यहस्य
सि [illegible]
[illegible]
[illegible]
[illegible] ३९ ॥

लौसिकी [illegible] टीका

शोकापनयनायस्वधर्ममपिचावेक्ष्यादिभिःश्लोकैःप्रासंगि॰
कोलौकिकोन्यायउक्तो नतत्तात्पर्येणेति प्रकृतेपरमार्थद॰

गी· श्रीनेउपसंहरन्कर्मयोगंप्रस्तौति एषेति कर्मक्षतेबोधसूं
टी· न्यजनविषयंबंधमस्वातेअप्रहास्यसित्यस्यसि नाहंशोकमो
हि· नुष्ठानमिहोपदेक्ष्यते येनसकलमूलजननबन्धहेतोरपिक
मेणमोक्षहेतुत्वमेवपर्यवस्येत् यतइहबोधक्रियासमु
च्चयस्यैवोपदेशपत्वात् योगेपरमात्म समाधानेइमांबु
द्धिंवक्ष्यमाणंबोधंशृणु ३९ ॥

पंचोलीटीका

सांख्ययोगमुपदिश्यउपसंहरन् तत्साधनकर्मयोगंअधिकरोति
एषातइति हेअर्जुनएषातेतुभ्यंबुद्धिर्ज्ञानंसांख्येपरमार्थवस्तुविवे
कविषयेअभिहितंतत्पुनः योगेईश्वराराधनार्थकर्मानुष्ठानेइमांव
क्ष्यमाणांबुद्धिंशृणुहेपार्थययायोगविषययाबुद्ध्याकर्मबंधंधर्मा
धर्मलक्षणंप्रहास्यसित्यक्ष्यसि ३९

रामावीरसमिहोयिनी ॥

एषेति संख्यातिसंकलयति योर्थमितिसंख्यंशुद्धं आतश्चोपस
र्गेइतिसूत्रेणकः तत्रचदीयतेकार्यभववदित्यधिकारे ऋहलोर्ण्य
दिति सूत्रेणण्यत्प्रत्ययोततयासांख्यस्तामात्मोपायवनर्धक्षम
हादिस्थापनाया नतुहिनिश्चयात्मिकोक्ता एषैवचययायोगेक
र्मकौशलेक्षमादिस्थापनारूपेयुज्यते तथैवसावधानचित्तोभ
वययाबुद्ध्याकर्मणांबंधबन्धकभावाभिमानेनक्रियमाण
नांबंधं गुरूनहत्वादिमदाम्भभावानित्यादिरूपंविरतिसंपादकं
जडत्वमिवतंत्यक्ष्यसीत्यर्थः ३९ ॥

मधुभाष्य

३९ ॥

पधानइति सम्यक्ख्यायतेप्रकाश्यतेऽस्मिन्नात्मतत्त्वमनयेतिसंख्याज्ञान
न्तत्तानेनतस्मिन्वैधीसांख्यः प्रत्यगात्मानादिविषयाबुद्धिरेषा वेदाविना
शिनंनित्यंयएनमजमव्ययं मित्यादिभिरभिहिता इदानींयोगेत्वक
र्मयोगेत्वपेक्षितेयस्मंभावनाविपरीतभावनोपलक्षितान्तःकरणशुद्ध
" र्थमिमांनिष्कामतयाकर्मणांकृतेऽन्तःशयस्यशुद्धिस्ततोज्ञानेनमुक्तिरिती
मांबुद्धिंसेवेयितयाइदानीशृणुबुद्धिंशृणुअवधारयेत्याख्येयतामे
वप्रधानफलसंबंधेनस्तौति बुध्येति यथानयाबुध्यायुक्तःसकलकर्म
रूपंबंधंप्रहास्यसि अनयाबुध्याकर्मणांकृतेज्ञानपायमाणायस्यहेतोप्र
न्तुत्वत्वादात्मतत्वज्ञानान्मोक्षोभविष्यतीत्यर्थः सर्वेषांकर्मणांविज्ञा
नोत्पत्त्यैविविदिषोत्पत्तौवासंयोगपृथक्त्वेनविनियुक्तत्वान्नत्वाशय
शुद्धेरेवहारत्वादितिभावः नेहकर्मजन्माशयशुद्धिः त्वयवतीभवेत
नतत्वनत्ययेत त्रिमितेज्ञानमपिनभवेत् कर्त्रादिवैगुण्येपिवाप्रत्यवा
हे यंत्वेःकर्मस्यात् नचसाकल्येनाहंकर्माण्यनुष्ठातुंसमर्थइत्याशंक्याह

भाषाअनुवाद

इहवैकथितजोज्ञानयोग उसकोकहिकरि अबउसका साधनजो कर्मयो
गसोकहतेहैंकि वस्तुओ तत्वको प्रकाशकरनेवाला सांख्यनामक तत्व
ज्ञान तुमसेकहागया अर्थात तत्वज्ञानके विषयमेजोबुद्धि सोमैने तु
मकोकहाहै इससेजोतुमारेतत्वज्ञानकाबोधनहोय तोफिरिचित्तशुद्धि
केद्वारा तत्वज्ञान उत्पन्नहोनेकेअर्थअबयह कर्मयोग अर्थात् कर्मयो
ग के विषय कीबुद्धिहमकहतेहैं सोसावधानहोसुनोकिहे अर्जुनजिस
से ईश्वरार्पित कर्मकेद्वाराचित्तकी शुद्धिहोकर ईश्वरकेप्रसादसे प्राप्त
त ज्ञानकोप्राप्तकरि अर्थात्पापकरिइस बन्धसे अनायास अर्थात्सह
जमेछूटि जाउगे ३९ ॥

दोहा

यह कहीतो मति सांख्यमे योगविषैं सुनयाहि पार्थ जिह
बुद्धियुक्तहेकर्मबंधनतजगाहि ३९॥

247

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते स्वल्पम
प्यस्य धर्मस्य त्रायते महतो भयात् ४० ॥

शांकरभाष्य

किं चान्यत् नेहाभीति नेह मोक्षमार्गे कर्मयोगे अभिक्रमनाशोऽभिक्र
मणमभिक्रमः प्रारम्भः तस्य नाशो नास्ति यथा कृष्यादेर्योगविषये
प्रारम्भस्य नानैकान्तिकफलत्वमित्यर्थः किं च नापि चिकित्सावत्
प्रत्यवायो विद्यते किं तु भवति स्वल्पस्य योगधर्मस्यानुष्ठितं त्राय
ते रक्षतीति महतः संसारभयात् जन्ममरणादिलक्षणात् ४० ॥

आनन्दगिरिकृतटीका

ननु कर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिञ्चित्करत्वादनेकानर्थ
कलुषितत्वेन दोषवत्त्वाच्च योगबुद्धिरपि न श्रद्धेयेति तत्राह किं चेति
अन्यच्च किंचिदुच्यते कर्मानुष्ठानस्यावश्यकत्वे तत्कारणमिति
यावत् कर्मणा सह समाधेरनुष्ठातुमशक्यत्वादनेकान्तरायस
म्भवात्तत्फलस्य च साक्षात्कारस्य दीर्घकालाभ्याससाध्यस्यैकस्मिन्
जन्मन्यसम्भवादर्थायोगी भ्रंशेनानर्थे च निपतेदित्याशंक्याह ने
हेति प्रतीकत्वेनोपात्तस्य नकारस्य १ नरन्वयान् गुणत्वेन नास्तीत्यनु
वादः यत्तु कर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिञ्चित्करत्वमुक्तं
तत् दूषयति यथेति कृषिवाणिज्यादेरारम्भस्यानियतफले स
म्भावनामात्रोपनीतत्वात् तथा कर्मणि वैदिके प्रारम्भस्य फलम
नियतं युज्यते शास्त्रविरोधादित्यर्थः यत्तु कर्मानेकानर्थकलुषितत्वे
न दोषवदनुष्ठानमिति तत्राह किं चेति इतोऽपि कर्मानुष्ठानमावश्य
कमिति प्रतिज्ञाय हेत्वन्तरमेव स्फुटयति नापीति चिकित्सायामि
क्रियमाणायां व्यतिरेको वा मरणे वा प्रत्यवायोऽपि सम्भाव्यते
कर्मपरिपाकस्य दुर्विवेकत्वात् न तथा कर्मानुष्ठाने दोषोऽस्ति वि
हितत्वादित्यर्थः संप्रति कर्मानुष्ठानस्य फले दर्शयति किं त्विति उ
त्तरार्द्धं व्याकुर्वन्विवक्षितं फलं कथयति स्वल्पमपीति सम्यग्
ज्ञानोत्पादनद्वारेण रक्षणं विवक्षितं सर्वपापप्रसक्तोऽपि ध्याय
न्निमिषमुते भूयस्तपस्वी भवति पंक्तिपावन इति स्मृतेरित्यर्थः ४०॥

पावन

ननु कृष्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येन फलव्यभिचारात् मं
त्राद्यंगवैगुण्येन च प्रत्यवायसंभवात्कुतः कर्मयोगेन कर्मबंधप्रहाणमि
त्याह नेहेति इह निष्कामकर्मयोगे अभिक्रमस्य प्रारंभस्य नाशो निष्फ
लत्वं नास्ति प्रत्यवायश्च न विद्यते ईश्वरोद्देशेनैव विघ्नवैगुण्यादिसंभ
वात् किंचास्य धर्मस्य स्वल्पमपि उपक्रममात्रमपि कृतं महतो भयात्
संसारात्त्रायते रक्षति न तु काम्यकर्मवत् किंचिद्वैगुण्यादिना नैष्फ
ल्यमस्येत्यर्थः ४० ॥

पिशाचभाष्य

किंच नेहेति इह मोक्षमार्गे अभिक्रमनाशः अभिक्रमणमभिक्रमः प्रा
रंभस्तन्नाशो नास्ति यथा कृष्यादेः मोक्षविषये प्रारंभस्य नानैकांतिकफ
लत्वमित्यर्थः किंच चिकित्सावत्प्रत्यवायो न विद्यते किं तु भवति स्व
ल्पमप्यस्य धर्मस्य मोक्षसाधनानुष्ठितं त्रायते रक्षति संसारभयाज्जन्ममर
णादिलक्षणात् ४० ॥

रामानुजभाष्य

वक्ष्यमाणबुद्धियुक्तस्य कर्मणो माहात्म्यमाह इह कर्मयोगे नाभिक्रमना
शोस्ति अभिक्रमः आरंभः नाशः फलसाधनभावनाशः आरब्धस्यसमाप्त
स्य विच्छिन्नस्यापि न निःफलत्वं आरब्धस्य विच्छेदे प्रत्यवायो न विद्यते अ
स्य कर्मयोगाख्यस्य धर्मस्य स्वल्पांशोपि महतो भयात्संसारात्त्रायते
अयमर्थः पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते इत्युत्तरत्र प्रपंचयिष्य
ते अन्यानि हि लौकिकानि वैदिकानि च साधनानि विच्छिन्नानि न
हि फलप्रसवाय भवंति प्रत्यवायाय च भवंति ४० ॥

अभिनवगुप्तटीका

अस्यां बुद्धावनिक्रमेण परायेन प्रमादेन नाशो न भवति प्रमादस्याभा
वात् यथा च परिमितेन श्रीखंडकणेन ज्वाल्यमानोपि तैलकटाहः
सद्यः शीतो भवति एवमनया स्वल्पयापि योगबुद्ध्या महाभये संसार
रूपे विनश्यति ४० ॥

परमार्थप्रपाटीका

अथ परमेश्वरार्पणतया कर्माणि क्रियमाणे इत्यादिभ्यो विघ्नो नास्तीत्याह ने
हाभिक्रमेति इह निष्कामकर्मणि अभिक्रमस्य कर्मारंभस्य विघ्नादिभिर्नाशो
नास्ति यतस्तत्रेश्वर एव विघ्नहर्ता तदुक्तं त्वां सेवतां सुरकृता बहवोंतरा

याः श्लोको विलंबः अव्रजंतां परमपदं ते नान्यस्य बर्हिषि बलिं ददतः स्वमा
यया यत्ते पदत्वमविनाया देविघ्नम् ऋषि इत्युक्तत्वात् यथा हि सा प्रथानेक
मणिकथमीश्वरादर इत्याह प्रत्यवाय इति प्रत्यवायः पापं नास्ति अग्नावो
मीयपश्रमालभेतेत्यादिवाक्यैर्वैधबोधितत्वात् किंच अस्य परमेश्व
र. व त्वन याहतस्य स्वधर्मस्य स्वल्पमपि कृतं महतो भयात् संसारात् त्रायते रक्षति

वनमालीटीका

ननु कर्मकरणे विघ्नबाहुल्येन फलाभावप्रत्यवाययोः प्रसंगस्तत्राह ननु काम्यकर्मादियतः पुण्य
नेहेति इह निःकामकर्मणि अभिक्रमस्योपक्रमस्य नाशो निष्फलत्वरू न त्वेषु नः संसारप्रवर्त्तनात् ४०॥
पो नास्ति प्रारब्धस्यांगवैकल्यादिना विघ्नेऽपि प्रत्यवायश्च न विद्यते स्वल्प दे
मप्यस्य धर्मस्यानुष्ठानं महतो भयात् संसारात् त्रायते अयं भावः अस्मा
परणपूर्वकनिःकामस्य कर्मणा अभिक्रम्यते कर्मणा आरभ्यते यत्फलं तस्य
नाशः न यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षी
यत इत्युक्तो न भवति निःकामकर्मफलस्यान्तःकरणशुद्धेः पापक्षय
स्य नाशासंभावात् अंगवैगुण्यहेतुक वैगुण्यनिहेतुक प्रत्यवायश्च न
विद्यते तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा दि
नाशकेनेति श्रुत्या नित्यानामेव विविदिषार्थत्वेनोदिश्य हरितत्त्वयद्वारा दि
विहितत्वेन तत्र च सर्वांगोपसंहारनियमाभावात् काम्यानामपि संयो
गपृथक्त्वन्यायेन विनियोग इति पक्षेऽपि फलाभिसंधिरहितत्वेन नित्यतु
ल्यत्वात् दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादौ संयोगस्य दर्शनात् अविहित
त्वकामस्य तयोर्विधायकस्य शास्त्रस्य पृथक्त्वेनाभिन्नत्वेन दर्शितत्वा
त्काम्यत्वं च यथा न दृष्टं तथाह नह्याशयार्थः न हि काम्यनित्याग्निहोत्रयो
स्तत्र कश्चिद्विशेषोऽस्ति फलाभिसंधितदभावाभ्यामेव तु काम्यत्वनि
त्यत्वव्यपदेश इति ४० ॥

कृष्णमवैजयंतीटीका

ननु गर्भगायत्रेकदोषवाप्राप्ता नो ह राधारादिरूपानंतविघ्नयुक्तानां कर्म
णां समाप्तभावत्वेन फलाभावत्वात्कथं कर्मयोगेन संसारनिवृत्तिः प्र
त्युतारब्धस्यासमाप्तिस्त्वे प्रत्यवायदोषएव भवेदित्याशंकायां का
म्यनिषिद्धाभ्यां विरहितस्य निष्कामस्य कर्मणः श्रेष्ठत्वमाह नेहाभि
क्रमनाश इति इह भगवदाराधनरूपे फलानुसंधानरहिते कर्मयो
गे अभिक्रमनाशः अभिक्रम्यते क्रियया प्रारभ्यते यत्फलं सोऽभिक्रमः त

स्यनाशः फलाभावो नास्ति यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र
पुण्यजितो लोकः क्षीयत इत्यादिश्रुतिवाक्यैः क्षीणे पुण्ये मर्त्यलोके वि
शन्तीत्यत्रैववक्ष्यमाणत्वाद्यथा काम्यकर्मणः फलक्षयः श्रूयते तथानि
ष्कामस्य फलनाशो नास्तीत्यर्थः अथ च कदाचित्केनापि विघ्नादिनाऽ
स्य कर्मयोगस्य विच्छिन्नत्वेपि इह प्रत्यवायः मंत्राद्यंगभंगनिमित्तको
दोषविशेषो न विद्यते यतोस्य निष्कामत्वेन भगवदाराधनविषयत्वे
न च सर्वदोषोपशमनकत्वम् यस्मादेवं तस्मादस्य भगवत्परिच
र्यात्मकस्य धर्मस्य स्वल्पमप्यतिलेशतरमपि महतो भयात्
गर्भजन्मजरावस्थाद्यनेकविधाधिव्याधिजन्यदुःखपुंजरू
पसंसारात् त्रायते रक्षति यथा ब्रह्मरुद्रेन्द्रादिदेवोपासकास्तत्तल्लो
कावाप्तये महता कष्टरूपेण यज्ञाद्यनुष्ठानेन तांस्तानाराध्य यदि
तत्तदनुष्ठानस्य देशकालमंत्रद्रव्याद्यङ्गानां निर्विघ्नेन परिपूर्णत्वं स्यात्त
र्हि तर्हि तर्हि तत्तल्लोकं प्राप्य पुनः पुण्यफलक्षये सति ततस्ततो नि
पतन्ति यदि च तस्य देशाद्यङ्गपूर्तिर्न स्यात्तर्हि ते प्रत्यवायदोषभागिनो
भवन्ति तथास्य भगवद्धर्मस्यानुष्ठानारोपे न भवति तेषामारब्धस्यास
मासस्यापि कर्मणः फलं भवत्येव अथ च कदाचित् देशाद्यङ्गाभावेपि
महद्धर्माश्रितत्वेन तेषां प्रत्यवायदोषोपि न भवेदिति भावः ॥ ४० ॥

मधुसूदनीटीका

ननु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा
नाशकेनेति श्रुत्या विविदिषायां ज्ञाने चोद्दिश्य संयोगपृथक्त्वन्यायेन स
र्वकर्मणां विनियोगात् तत्र चान्तःकरणशुद्धिद्वारत्वात्प्रतिकर्मानु
ष्ठाने विधीयते तत्र तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पु
ण्यचितो लोकः क्षीयत इति श्रुतिबोधितस्य फलनाशस्य संभवान्
ज्ञाने विविदिषायां चोद्दिश्य क्रियमाणस्य यज्ञादेः काम्यत्वात्सर्वांगोपसं
हारेणानुष्ठेयस्य यत्किंचिदङ्गासंपत्तावपि वैगुण्यापत्तेर्यज्ञेनेत्या
दिवाक्यविहितानां च सर्वेषां कर्मणामेकेन पुरुषायुषपर्यवसानेपि
कर्तुमशक्यत्वात् कुतः कर्मबन्धं प्रहास्यसीति फलप्रत्याशेत्यत आ
ह भगवान् अभिक्रम्यते कर्मणा प्रारभ्यते यत्फलं सोभिक्रमः तस्य
नाशस्तद्यथेहेत्यादिना प्रतिपादितः इह निःकामकर्मयोगे नास्ति

पतत्फलस्य शुद्धेःपापक्षयरूपत्वेनलोकशास्त्रवाच्यभोग्यत्वाभावेनचतद्द
याःसंभवात् वेदनपर्य्यन्तायाएवविविदिषायाःकर्म्मफलत्वादेतस्य
चाक्षयत्वेनानाशात्ननिष्फलत्वंनकस्यफलंमज्ञनयित्वानाशसं
भवादिस्यफलनाशोनास्तीतिसाधूक्तं नेहेत्यत्र नप्रत्यवायोहेतियानिंदास
फलेनतत्कर्म्मणि फलेकोत्रपरित्यज्यकृतेकर्म्मविच्छेदिकृदिति न
याप्रत्यवायःअंगवैगुण्यनिबंधनवैगुण्यमिहनविद्यते तमिति
वाक्येननित्यानामेवोपात्तत्वादितितत्परिहारेणविविदिषायांविनियोगा
त् तत्रचसर्वांगोपसंहारनियमाभावात् काम्यानामपिसंयोगपृथ
क्त्वन्यायेनविनियोगश्चनिषेत्तेपिफलाभिसंधिरहितत्वेननैत्तानित्यत
ल्यत्वात् नहिकाम्यनित्याग्निहोत्रयोःस्वतःकश्चिद्विशेषोस्तिफ
लाभिसंधितदभावाभ्यामेवतुकाम्यत्वनित्यत्वव्यपदेशः इदंच
नादी॰ पक्षद्वयमुक्तंवार्त्तिके वेदानुवचनामैकात्म्यज्ञातेतमेतमिंवाक्ये त्तिं नजन्म॰
ननित्यानांवक्ष्यतेविधिः यद्वाविविदिषार्थत्वंकाम्यानामपिकर्म्मणां
तमेतमितिवाक्येनसंयोगस्यपृथक्त्वतइति तथाचफलाभिसं
धिनाक्रियमाणेपवकर्म्मणिसर्वांगोपसंहारनियमात्तद्विलक्षणेशु
द्ध्यर्थकर्म्मणिप्रतिनिध्यादिनासमाप्तिसंभवान्नांगवैगुण्यनिमित्तः
प्रत्यवायोस्तीत्यर्थः तथास्यशुद्ध्यर्थस्यधर्म्मस्यतमेतमित्यादिवाक्य
विहितस्यमध्येस्वल्पमपिसेव्यपेतिकर्त्तव्यतया वा यथाशक्तिभ
गवदाराधनार्थंकिंचिदप्यनुष्ठितंसत्महतः संसारभयात्त्रायतेभ
गवत्प्रसादसंपादनानुष्ठातारंरक्षति सर्वपापप्रसक्तोपिध्यायन्नि
मिषमच्युतं भूयस्तपस्वीभवतिपंक्तिपावनपावनइत्यादिस्मृतेः
तमेतमितिवाक्येसमच्चयविधायकाभावाच्चश्रद्धाहितारतस्मा
देवानुष्ठानतारतम्योपपत्तेर्युक्तमुक्तं कर्म्मैवयंमहतास्यसीति ४०॥

सपानंदीटीका

स्वल्पानमेतमित्यादिगिराविविदिषार्थयो उभेउदिश्यसंयोगपृथ
क्त्वात्सर्वकर्म्मणां १ विनियोगःकृतस्तत्रधीशुद्धेर्हारभावतः तथा
सौप्रत्यनुष्ठानेकर्म्मणांचविधीयते २ नष्टेरितिवाक्येनफलना
शस्यसंभवात् शुभत्वादिफलेकर्म्मकाम्येसर्वांगसंयुते ३ अनुष्ठेय
त्वयत्किंचिदंगासंपत्तिहेतुके स्याघनस्तत्रवैगुण्यंकिंचैकेननरेणच ४
यत्तेनेत्यादिवाक्येनविहितानांहिकर्म्मणां सर्वेषामाप्तुचोंतेपशक्या

१८

गी॰
टी॰
हि॰

त्वात्कर्त्तव्यमेवच ५ वेयंप्रद्दास्यसीत्येवंफलस्याशाकृतेमम ३
त्याशंक्याहभगवान्नारायणउदारधी: ६ इहनिष्कामकर्मयोगेश्रे
योमार्गेसुनिश्चिते अभिक्रम:कर्मफलेकर्मणोनश्यतेयत: ७ नप
श्येदितिवाक्येनतस्यनाशोनहीरित: यतत्फलस्यपीड्यहेमोगप
त्वाभावतोपिच ८ नप्रत्यवेतियानिंदासापलेनतुकर्मणि फलेत्
ज्ञातपरित्यज्यकृतेकर्मविशुद्धिकृत ९ प्रत्यवायोगवैगुण्येहेतु
वैगुण्यमत्रतु नमेतमितिवाक्येननिस्मातोविनियोगत: १० श्रुभ्
न्तोप्रतिहेतुत्वेकाम्यानामपिकर्मणां संयोगस्यपृथक्त्वाच्चफलसंग
विवर्जनात् ११ एकस्यतूभयार्थत्वेस्यात्संयोगपृथक्त्वत: क्रत्वर्थ
स्यचपुरुषस्यप्रमर्थत्वंयथेष्यते १२ नहिकश्चिद्विशेषोस्तिकाम्यनित्या
ग्निहोत्रयो: स्वत:किंतुफलेछायाभावाभवकृताभिदा १३ इदंपत
द्वयंस्पष्टंवार्तिकेश्लोकरेखरै: वेदान्तवचनादीनामेकान्त्यज्ञानजन्म
ने १४ नमेतमितिवाक्येननिस्मातोवस्यतेविधि: यद्वाविविदिषार्थ
त्वेकाम्यानामपिकर्मणां १५ नमेतमितिवाक्येनसंयोगस्यपृथक्त्वत:
तथाचकाम्यकर्मापिसर्वांगैसंयुतेयत: १६ फलाभिसंधिनाकार्यंनतु
निष्कामबुद्धिना एवंसत्यंगवैगुण्येहेतुक:प्रत्यवायक: १७ नास्येवा
स्येश्वरार्थ्यस्यकर्मण:शुद्धिकारिण: शुद्ध्यर्थस्यास्यधर्मस्यस्वल्पमप्य
पुकर्मस्य १८ नमेतमितिवाक्येनविहितेष्वप्यनुष्ठितं यथाशक्त्योश्व
रार्थंसत्त्वायनेसंस्कृतेर्भयात् १९ हरिप्रसादमंमिद्धाकर्त्तारंपरिरक्ष
ति सर्वपापप्रसक्तोपिध्यायन्निमिषमच्युतं २० भूयस्तपस्वीभवति
पंक्तिपावनपावन: इत्युक्तत्वादतोहेतो:कर्मवंधंप्रहास्यसि २१ ॥ ४०॥

नीलकंठीटीका

एतदेवोपपादयति नेहेति इहकर्मबंधप्रहाणार्थेकर्मयोगेनुष्ठीयमाने
अभिक्रम्यतेआरभ्यत इत्यभिक्रम:कर्मारंभ:कर्मैववातस्यनाशोनास्ति
अन्यत्तुफलंदत्वानश्यतितनत्विदमिष्टफलस्याजननात् नचेतस्या
पिकाम्यांत:पातितयानित्याकरणजनित:प्रत्यवायउत्पद्येतेत्यमतस्त १८
दनुष्ठितस्यबंधप्रहाणप्रत्यवायपरिहारार्थफलद्वयहेतुत्वायो
गादित्याशंक्याह प्रत्यवायोनविद्यतइति नमेतंवेदानुवचनेनब्रा
ह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेति श्रुत्यासंयोगपृथ
क्त्वन्यायेनदर्शेष्टियकामस्यजुहुयादित्यनेननित्यस्यदर्शोवीर्यार्थत्व

त्व॰

आनंदी टीका ।

इहावश्यके कर्मणि फलाकांक्षां विना क्रियमाणे अभिक्रमस्या
नुष्ठानस्य नाशो निष्फलत्वं नास्ति अननुष्ठानाद्धि प्रत्यवायः
विहिताकरणाद्भवो मा तस्मात्प्रतिबंधको विघ्नो न विद्यते न
जायते यतः अस्य स्वकर्मानुष्ठानस्य स्वल्पमपि लेशोपि मह
तो भयात् अनवरतजन्ममरणादिसंसरणभयात् त्रायते अत्रोप
देशः सर्वेषु ज्ञानकर्मसमुच्चयेवाचकश्रुतिस्मृतीनां मालि
खितानां सर्वासामर्थोनुसन्धेयः ४० ॥

+ तादृशं हि कर्मानुष्ठानमिहोपदेश्यते येनसक रामकंठी टीका लसंसृष्टजन्मबंधहेतोरपि कर्मणो मोक्षहेतुत्वमेव पर्यवसत्यन्त एवास्य कर्मयोगस्य चित्तवृत्तिनिरोधलक्षणयोगान्तिकशक्तिं प्रतिपादयितुमाह +

+ इहोक्ते अस्मिन् कर्मयोगे चित्तवृत्तिनिरोधलक्षणयोगवद
भिक्रमनाशो नास्ति सहियथोपदिष्टक्रमस्वाभ्यस्तसमस्तभू
मिकाभिर्निर्वर्त्यस्वरूपत्वात् पूर्वपूर्वभूमिकानामनवाप्तावु
त्तरोत्तरभूमिकारोहणरूपक्रमोल्लंघनलक्षणेतिक्रमेसति
विनश्यति स्वरूपमेव न लभते सतोहेशाविनाशाद्द्ययोगस
मनन्तरवक्ष्यमाणो प्रत्यवायो न विद्यते तथा तत्र तत्तद्योगवैक
ल्यात् सम्यगनुष्ठितोत्थाथ्यादिर्वर्तमानशरीरानुभवनीयः पु
नर्गर्भवासस्वदुःखादिर्भविष्यच्छरीरानुभवनीयः प्रत्यवा
यो नष्टयोगः संभवति इत्तरस्य पूर्ववत्सोपि न विद्यते यतोस्य
धर्मस्य यथोक्तज्ञानपूर्वकतया शास्त्रचोदितस्वकर्मानुष्ठा
नसमाधिरूपस्य सदाचारविशेषस्य संबन्धि स्वल्पमपि परिमि
तकाललवानुष्ठितस्वरूपं महतः समस्तभयहेतोः रन्तात्मना
त्मप्रत्ययलक्षणाद्भयात्साध्यसादनुष्ठातारं योगिनं त्रायते परि
रक्षति पुनस्तत्र संबन्धेतिरस्कारोनीनार्थः अत्र हि धर्मस्य त
त्त्वमनस्तमितसमस्तवस्तुपृथक्हेतुसामान्यसंविद्रूपपर
प्रकाशैकलक्षणस्वात्मप्रत्यवमर्शो निरन्तरः समाधिः सद्भ
द्विभानत्वेन वृत्तिनिर्वर्त्यसंहर्णस्वरूपो विधीयते सचविभातमा
त्रः संपूर्णफलं संपादयति तथा च वदति स्थित्वास्यामन्तका
लेपि ब्रह्मनिर्वाणमृच्छतीति ततोस्मिन् पूर्वापरक्रमाभ्यस्तभू
मिकाः संपाद्य चित्तवृत्तिनिरोधलक्षणयोगवद्विनाशप्रत्यवा

गी॰ योनसंभवतः नचास्यप्रक्रान्तस्यकर्मयोगलक्षणस्यधर्मस्य
टी॰ प्रकर्षप्रतिपादनान्निरोधो योगस्यसर्वात्मनापरिहारोवगं ३८
हि॰ तव्यः सम्प्रयत्तत्त्वज्ञानादिक्रियाविशेषवत्सर्वोपरमादि
नियतकालादुष्टेयतयानियतेतिकर्तव्यताकोनभवत्ये॰
व [illegible]
[illegible] ध॰ ॥

लासिकी [illegible] टीका

अस्यकर्मयोगस्यचित्तवृत्तिनिरोधलक्षणयोगातिरिक्तशक्ति
त्वप्रतिपादयति नेति चित्तवृत्तिनिरोधलक्षणयोगवदभि
क्रमेणातिक्रमेणप्रमादेननाशश्चात्मनोदर्शनेपरामर्शाभा
वोनास्ति अन्यत्रयोगेचित्तवृत्तिनिरोधएवमन्तःस्वात्मपराम॰
र्शेनान्यस्याहतो ध॰ ॥

पंचोलीटीका

अत्रफलव्यभिचारप्रत्यवायादिकमपिविशेषेणकृतंनसंभावितंकृषि॰
यागादिवदित्याह नेहाभिक्रमेतिइहमोक्षमार्गेकर्मयोगेअभिक्रमः
प्रारंभः तस्यकृष्यादिवन्नाशोनास्तितथापिविकित्सावत्इहमोक्षमा
र्गेकर्मयोगेप्रत्यवायोनविद्यतेनास्तिअस्ययोगधर्मस्यस्वल्पमपिअ
नुष्ठितंमहतोभयात्संसारभयात्रक्षति ध॰

रसवीरसमिश्रबोधिनी ॥

नेहेति अस्यांसर्वनिवृत्तिजायांबुद्धावपिक्रमेणासंबंधिबांधव
हननरूपापराधेनप्रमादेन नाशोनास्ति प्रमादस्याभावात्
तथाप्रत्यवायः पातुबलोकयोपिनास्ति मदनुग्रहादितिशेषः
एवमनयाक्रमान्वयासदसद्विवेकयाब्दिराणाबुद्ध्यामहाभयं एवंहि
तस्यदेवप्रविश्यकर्णभेत्स्यामीतिचिंताकुलत्वं विनश्यति बुद्धिश्चके
नातिउर्मैधानामपिखद्धानांभेदस्यसकरत्वात् ध॰ ॥

मधुभाष्य

ध॰ ॥

नेहेति अभिक्रमनेप्रारभ्यते यत्कर्मणा तस्य नाशो यस्मिन्निह नास्त्यनेनो
क्तः सहस्रनाखिललोकशाहवाच्ययोग्यताभावाद्विनश्यदेश्रुतोक्तानोद्देशेनक
र्मविधानान्यथानुपपत्यावान्तरव्यापाररूपकल्प्यमानान्तःकरणशुद्धिः
कथं सकार्याबालसंपगच्छेदितिभावः नन्वन्येन शेषरागाद्यैः नयथेह
तियानिदानायफलेनतुकर्मणिफलेच्छानपरित्यज्यकृतेनकर्मविशुद्धि
कृदिति प्रत्यवायइति काम्यपवकर्मणि सकलांगोपसंहारउक्तः न
त्वत्रेतिभावः नचसाकल्येनकर्मण्याशयशुद्ध्यैकर्तव्यानीतिनियमो
स्तीत्याह स्वल्पमपीति अस्यकर्मात्मकस्यापिधर्मस्य यत्स्वल्पमपिकर्म
रूपेसंख्ययेतिकर्तव्यतयावा तन्महतोभयात् संसारसर्पसमन्तात्त्राय
एव तेऽतोनसर्वा कर्माण्येवप्रयेकर्तव्यानीतिभावः ननुयथाकर्मजडैः
नानाकर्माणिक्रियंते तथाज्ञानार्थिभिरपिक्रियंतां तथाचयत्नेनदाने
नेत्याशदर्शयति यस्येतेष्टात्तर्यासुक्तात्मक्राणस्याभिक्रयतेइत्याशंक्या
ह ॥ ४० ॥

भाषाअनुवाद

औरजोकहोकि जैसे खेती औ वनिज वेपार आदिकर्म्मोमे कदाचित्‌कहे
कभूंकभूं विघ्नोकी वाहुल्यकरके बहुतायतसेफलकेहानिकीभी सम्भा
वनाहै अर्थात् निष्फलपरिश्रम भीहोताहै औरमंत्र अनुष्टानकहे जप
यज्ञ आदिकमे भीविघ्न अथवा अङ्ग विकल होनेसे प्रत्यवायकहे दोष
औ कर्म्मनिष्फलहोताहै तैसेजोयहकर्म्मजोविघ्नोकेमारे पूरानहोउठे
तो कैसे कर्मवन्धकीहानीकहे नाशहोगा औरउलटादोष लगनेका
डरहै इसवास्तेभगवानकहतेहै कियहनिष्काम कर्म्मयोगकाआरम्भ
करनेसे जोपूरा नभीहोउठे तोभीनिष्कामकर्म्म निष्फलहोताना
ही औरइसमे दोष पापभी नहीलगताहै जिसहेतु ईश्वरको उद्देश्य
करि अर्थात ईश्वरके अर्थ किये कर्ममे विघ्नहोतेहतनही और ईश्वरारा
धनके अर्थ इसधर्मकि थोड़े आचरनसे भीवड़ेभयानक संसारसेरक्षा
होतीहै अर्थात् ईश्वरार्पित कर्मरक्षाकरताहै इससेवहकाम्य कर्मकी
तरह कुछअङ्ग विकल होनेसेभी निष्फलनही होताहै तात्पर्य्य यह
कि ईश्वरार्थकर्मकरनेसे जोदोष नलगे और महत फलहै तोसाक्षा
त ईश्वरकी आज्ञाकरनेमे क्याकहनाहै ४० ॥

दोहा

नाहियादिकमनाफलै विघ्नव्यापेकोय लेशभीयाहिय
मेकारक्षत बहुभयसोय ४० ॥

252

व्यवसायात्मिकाबुद्धिरेकेहकुरुनन्दन बहुशा
खाह्यनन्ताश्चबुद्धयोव्यवसायिनां ४१ ॥

शाङ्करभाष्य

येयंसांख्येबुद्धिरुक्तायोगेचवक्ष्यमाणलक्षणासा व्यवसायेति व्यवसाया
त्मिकानिश्चयस्वभावा एकैव बुद्धिरितरविपरीतबुद्धिशाखाभेदस्य सम्य [illegible]
क् प्रमाणजनितत्वादिह श्रेयोमार्गेहेकुरुनन्दन याःपुनरितराबुद्धयो या
सां शाखाभेदप्रचारवशादनन्तोऽपारोऽनुपरतः संसारोपि नित्यप्रततो वि
स्तीर्णोभवति प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरतास्वनन्त
भेदबुद्धिषु संसारोप्युपरमते ताबुद्धयो बहुशाखा बह्व्यःशाखायासां
ताबहुशाखा बहुभेदा इत्येतत्प्रतिशाखाभेदेन ह्यनन्ताश्च बुद्धयः केषामव्य
वसायिनां प्रमाणजनितविवेकबुद्धिरहितानां इत्यर्थः ४१ ॥

आनन्दगिरिकृतटीका

ननुबुद्धिद्वयातिरिक्तानि बुद्ध्यन्तराण्यपि काणादादिशास्त्रप्रसिद्धानि वि
द्यन्ते तथाचकथं बुद्धिद्वयमेव भगवतोपदिष्टमिति तत्राह येयमिति नै
वैका प्रमाणभूता बुद्धिरित्याह व्यवसायात्मिकेति बुद्ध्यन्तराण्यविवे
कमूलान्यप्रमाणानीत्याह बहुशाखाहीतिव्यवसायात्मिकायाबुद्धेः श्रे
योमार्गे प्रवृत्ताया विवक्षितं फलमाहकुरुनन्दनेति प्रकृतबुद्धिद्वयापेक्षया
इतरा विपरीतास्त्वप्रमाणजनिताः स्वकपोलकल्पिता या बुद्धयस्तासां
शाखाभेदः संसारहेतुस्तस्य बाधिकेति यावत् तत्त्वरेतः सम्यगिति
त्वा निर्दोषवेदवाक्यसमुत्थं तत्समुपायोपेयभूतं बुद्धिद्वयं साक्षात् पारम्पर्या
भ्यां संसारहेतुबाधकमित्यर्थः उत्तरार्द्धं व्याचष्टे याःपुनरिति प्रकृतबुद्धिद्व
याद्यान्तरत्वमितरत्वं तासामनर्थहेतुत्वं दर्शयति यासामिति अप्रामाणि
कबुद्धीनां प्रसक्तानुप्रसक्त्या जायमानानामतीव बुद्धिपरिणामविशेषाः
शाखाभेदास्तेषां प्रचारःप्रवृत्तिः तद्वशादित्येतत् अनन्तत्वं सम्यग्ज्ञानम
न्तरेण निवृत्तिविरहितत्वं अपारत्वं कार्यस्येव सतो वस्तुभूतकारण
विरहितत्वं अनुपरतत्वं स्फोरयति नित्येति कथंतर्हि तन्निवृत्त्या पुरुषा
र्थपरिसमाप्तिस्तत्राह प्रमाणेति प्रत्यक्षातिरेकाख्येनानुमानेनागमेन
च पदार्थपरिशोधनद्वारेण परिनिष्पन्ना विवेकात्मिका याबुद्धिस्तां निमि
त्तीकृत्य तत्प्रत्यक्समग्रोपायानुष्ठानं प्रकृताविपरीतबुद्धयोरावर्त्तते

गी॰ नान्त्वसंख्यातास्तु व्यावृत्तांशु निरालम्बनतया संसारोपि स्यात्मशान्त
टी॰ वत्त्वपरतो भवतीत्यर्थः याः ऽत्तरित्युपक्रान्ता तत्वज्ञानापनोद्या संसा
हि॰ रास्पदीभूता विपरीतबुद्धिरनुक्रामति तावुद्वयश्ति बुद्धीनां हन्तत्स्यैवक
तो बहुशाखित्वं तत्राह बहुभेदा इत्येतदिति एकैका बुद्धिप्रति शाखा
ष भेदोवान्तरविशेषेण बुद्धीनामसंख्यत्वं प्रख्यातमित्याह प्रतिशाखेति
बुद्धीनामानन्त्यप्रसिद्धि प्रयोजनार्थो हि शब्दः सम्यग्ज्ञानवतां यथोक्त
बुद्धिभेदभाक्त्वमप्रसिद्धमित्याशंक्याप्रत्याह केषामित्यादिना ४१ ॥

स्वामिकृतटीका

कृतस्त्यपेक्षायामुभयोर्वैषम्यमाह व्यवसायेति इह ईश्वराराधनलक्षणे
कर्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव तरिष्यामीति निश्चयात्मिका ति
कैवैकनिष्ठैव बुद्धिर्भवति अव्यवसायिनां तु वहिर्मुखानां कामिनां कामा
नामानन्त्यादनन्तास्तथापि हि कर्मफलगुणफलादिभेदात् बहुशाखा
श्च बुद्धयो भवन्ति ईश्वराराधनार्थे हि नित्यनैमित्तिककर्मणि किंचिदङ्गवैगु
ण्येनापि न नश्यति यथाशक्तिकुर्यात् तथाऽकुर्यादिति विहितहियीयतेन
वै च वैगुण्ये ईश्वरोद्देशेनैव गुण्यापरमात् न तु तथा काम्यकर्मस्वतो मह
द्वैषम्यमिति भावः ४१ ॥

पिशाचभाष्य

अव्यवसायात्मिका निश्चयात्मिका बुद्धिः सोरव्ययोगे अवसायिनां पुरुषा
र्थसाधिका अव्यवसायिनो बुद्धयो बहुशाखा अनन्ताश्च भवन्ति खा
न ताः पुरुषार्थप्रतिसाधनमित्यभिप्रायः ४१ ॥

रामानुजभाष्य

काम्यकर्मविषयाया बुद्धेर्मोक्षसाधनभूतकर्मविषया बुद्धिर्विशिष्टेति इ
ह शास्त्रीये सर्वस्मिन् कर्मणि व्यवसायात्मिका बुद्धिरेका मुमुक्षुणा ऽनु
ष्ठेये कर्मणि बुद्धिर्व्यवसायात्मिका बुद्धिः व्यवसायो निश्चयः सा हि बु
द्धिरात्मयाथात्म्यनिश्चयपूर्विका काम्यकर्मविषया बुद्धिरव्यवसायात्मि
का तत्र हि कामनाधिकारे देहातिरिक्तात्मतत्त्वज्ञानमात्रमपेक्षितं ना
त्मस्वरूपयाथात्म्यनिश्चयं स्वरूपयाथात्म्यनिश्चये सति स्वर्गादिफला
र्थित्वतत्साधनानुष्ठानतत्फलानुभवानामसंभवात् विरोधाच्च सेयं
अव्यवसायात्मिका बुद्धिरेकफलसाधनविषयतयैका एकस्मै मोक्षफला
य मुमुक्षोः सर्वाणि कर्माणि विधीयन्ते अतः शास्त्रार्थस्यैकत्वात् सर्वकर्म

विषयाबुद्धिरेकैव यथैकफलसाधनतया प्रयादीनां षण्णां मेलिकत्वेऽपि व्य
ताकानामेकशास्त्रार्थं तथा नित्यविषयाबुद्धिरेकान्तद्दिन्यर्थः अव्यवसा
यिनां तु स्वर्गपुत्रपश्वन्नाद्यादिफलसाधनकर्माधिकृतानां बुद्धयः फला
नेत्वादनेताः तत्रापि बहुशाखाः एकस्मै फलाय चोदितेऽपि दर्शपूर्णमा
सादौ कल्पेद्याङ्गराशासे स्त्प्रजात्कमाशास्ते इत्याद्यवगतावोत्तरफलभेदे
न बहुशाखात्वं च विद्यते अतः व्यवसायिनां बुद्धयोऽनेना बहुशाखाश्चाप्न
न्त्क्रं भवति नित्यषु नैमित्तिकेषु कर्मसु प्रधानफलान्यवोत्तरफलानि चयानि नि
श्रूयमाणानि तानि सर्वाणि परित्यज्य मोक्षैकफलतया सर्वाणि कर्माण्ये
काम्यानि कशास्त्रार्थतया नुष्ठेयानि च स्ववर्णाश्रमोचितानि तत्र काम्यानि परित्यज्य
मोक्षसाधनतया नित्यनैमित्तिकेरेकीकृत्य यथाबलमनुष्ठेयानि ४१॥

अभिनवगुप्तटीका

नचैषा बुद्धिरपर्वीनीयते किं तर्हि व्यवसायात्मिका सर्वस्यैकैव समस्तार्थाः
निश्चेतव्यवशात्तु बहुत्वं गच्छति ४१ ॥

परमार्थप्रपाटीका

अथ तदेव प्रकटयति व्यवसायेति इह परमेश्वराराधनरूपे कर्मयोगे व्य
वसायात्मिका परमेश्वरभजनात्तु हत्यैव ध्रुवं तरिष्यामीति निश्चयात्मि
काया बुद्धिः सा तदेकैव एकनिष्ठैव भवति अथ व्यवसायिनां कामा
त्मानां या बुद्धयस्ता बहुशाखाः कामात्कामान्तरजनका भवन्ति
कामानामनन्तत्वात् जाया मे स्यादथ प्रजायेय पापवित्तं मे स्यादित्या
दिश्रुतेश्च ४१ ॥

वनमालीटीका

न मेतामिति वाक्यविहितानां साधनानामेकार्थकत्वमाह व्यवसायेति
हे कुरुनन्दन इह श्रेयोमार्गे व्यवसायात्मिका सांख्यविषया योगविषया आत्मतत्त्वनिश्चयात्मिका
च बुद्धिरेकैव फलस्य मोक्षस्यैकत्वात् अव्यवसायिनां सकामानां बुद्ध

योनंताः नन्त्राश्चापि बहुशाखाः पशुपुत्रस्वर्गादिफलानां भेदात् ॥ ४१ ॥

ॐ हनुमद्वेनयेतीटीका

गी. टी. हि. एवं सकामकर्मिणः सकामान्निष्कामस्य माहात्म्यमधिकमस्केदानीं सकामकर्मविषयिण्या बुद्धेर्निष्कामकर्मविषयिण्या मोक्षोपायिकत्वेन श्रेष्ठतामाह व्यवसायात्मिकेति हे कुरुनन्दन कुरुकुलोद्भव इह त्वत्प्रणीतो भगवदर्चनादिरूपे कर्मयोगे व्यवसायात्मिका श्रीकृष्णो मां सर्वविघ्नान्निरस्यति उत्तमभक्त्या च्यात् पापिष्ठस्येव कृष्णानुग्रहेणैव मम सर्वकर्मसंस्थिति मोक्षोपायो येयः सर्वं कृष्णयवेश्येव विश्वासपूर्वक सर्वकर्मफलदातरि भगवति मयि व्यवसायो निश्चयः आत्मास्वरूपं यस्यास्तथाभूताः निश्चयात्मिका या बुद्धिः सा एकैव मुख्यैव यतोऽस्याः

ना४ नानादेवोपासनानां साधननानाफलविषयादि राहित्ये न साधनसाध्यनयैकदेवनिष्ठतास्ति तस्मात्सेव मम तत्र भिन्नया श्रयणीया तयैव सर्वेषां संसारनिवृत्तिर्भवति नान्ययेत्यर्थः इयं तेऽव्यवसायिनामनिश्चितबुद्धीनां नानादेवोपासकानां कृष्णविमुखानां नराणां बुद्धयः बहुशाखाः बहुधा धनपुत्रकलत्रपशुस्वर्गाद्यनेकाभिलाषरूपाः शाखा इव शाखा यासां तास्तथा अनन्ताः अनन्तपतिमाराधनेनेन्द्रोऽहं भविष्यामि ततः स्वरेन्द्रो भविष्यामीत्येवं मनुष्याधिपत्य प्रभृति ब्रह्माधिपत्यपर्यन्तं मनुष्योत्तराधिपत्याधिकं लब्धापि तस्या याः अपरिपूर्णत्वेन नन्तत्वं तेन तेरप्यनन्तत्वादनन्ताः असंख्याता भवन्ति अयं भावः निषिद्धवत्काम्यकर्मणां स्वरूपाण्येव बहूरनः परित्यज्य नित्यनैमित्तिकानां नु भगवत्समर्पणात्मकेन त्यागेन फलमात्राण्येव त्यक्त्वा सर्वात्मा पालनेरूपेण नत्रत्कर्मा च रन्मुहमोक्षमेव प्राप्नोति ननु तस्य काम्यकर्माचारिण इव पुनः संसारपतने भवतीति ४१ ॥

मधुसूदनीटीका

के जगन्नन्दन

एतदुपपादनाय तमेतमिति वाक्यविहितानामेकार्थत्वमाह इहेश्वेयो मार्गेतमेतमिति वाक्ये व्यवसायात्मिका आत्मतत्त्वनिश्चयात्मिका

बुद्धिरेकैव चतुर्णामाश्रमाणां साध्याविवक्षिता वेदावचनेनेत्यादौ तृ
तीयाविभक्त्या प्रत्येकं निरपेक्षसाधनत्वबोधनात् भिन्नार्थत्वे समुच्च
यः स्यात् एकार्थत्वेपि दर्शपूर्णमासाभ्यामितिवत् द्वंद्वसमासेन यद
ग्नये च प्रजापतये चेतिवच्च शब्देन न तथात्र किंचिन्मानमस्तीत्यर्थः सा
च विषया योगविषया च बुद्धिरेकफलत्वादेकाव्यवसायात्मिका सर्व
विपरीतबुद्धीनां बाधिका निर्दोषवेदवाक्यसमुत्पन्नत्वादितरास्त्वव्यवसा
यिनां बुद्धयो बाध्या इत्यर्थ इति भाष्यकृतः अन्ये तु परमेश्वराराधनेनैव सं
सारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयोगे भव
तीत्यर्थमाहुः सर्वथापि तत्त्वज्ञानकाण्डानुसारेण स्वल्पमप्यस्य धर्मस्य
त्रायते महतो भयादित्युपपन्नं कर्मकाण्डे पुनः बहुशाखा अनेकभेदाः
कामानामनेकभेदत्वात् अनंताश्च कर्मफलगुणफलादिप्रकारोप
शाखाभेदात् बुद्धयो भवंत्यव्यवसायिनां तत्तत्फलकामानां बुद्धीनाम
नंत्यप्रसिद्धिद्योतनार्थो हिशब्दः अतः काम्यकर्मापेक्षया महद्वैलक्ष
ण्यं शुद्ध्यर्थकर्मणामित्यभिप्रायः ४१ ॥

सदानंदीटीका

एतत्सिद्ध्यर्थमाह शस्त्रमेतमितिवाक्यतः विहितानां फलैकत्वं कर्मणां
शुद्धिकारिणां १ श्रेयोमार्गेष्ववाक्योक्तमेतमितिवैदिके बुद्धिरेके
वसायात्मित्वतत्त्वनिश्चयरूपिणी २ चतुर्णामाश्रमाणां च सैव साध्या
[illegible] विवक्षिता एकैव सांख्ये योगे च फलैक्यान्निश्चयात्मिका ३
सा विपरीतबुद्धीनां बाधिका वेदवाक्यजा ईश्वराराधनेनैव तरिष्या
मीह संसृतिं ४ इत्येकैवास्ति वा बुद्धिर्भक्तानां निश्चयात्मिका इतरा
स्त्वयिनो बाध्या मिथ्याज्ञानवतां तु ते ५ कामभेदात्तथा शाखाभेदा
त्त्वानाभिदा युताः संसारानंत्यहेतुत्वादनंता मूढचेतसां ६ ४१ ॥

नीलकंठीटीका

गी॰
टी॰
द्वि॰

नन्वेवं सांख्ययोगयोर्महाभयात्त्राणहेतुत्वं तुल्यं चेत्कोऽनयोर्विशेषः स्या
शंकय सांख्यानां पातशंका नास्ति योगिनां तु यावद्विदेहकैवल्यंपा
तशंकास्तीत्याह व्यवसायात्मिकेति व्यवसायस्तत्त्वनिश्चयस्तदा
त्मिका नराकारा बुद्धिरंतःकरणवृत्तिः अहंब्रह्मास्मीति वाक्यज
न्या ब्रह्माकारांतःकरणवृत्तिर्ब्रह्मविद्याभिधाना समस्तवृत्त्यंतर
बाधेन सम्यगभ्युदितापकापकैव सकृद्विभातो ह्येष ब्रह्मलोक
इतिश्रुतेः ब्रह्मैवलोको ब्रह्मलोकः सद्यस्तैव नहि सकृज्ज्ञाते आ
त्मनि ज्ञातव्यं कर्तव्यं वा किंचिदवशिष्यते कृतकृत्यत्वाद्ब्रह्मविदो
ऽतोऽस्य पातशंका नास्ति अव्यवसायिनामसत्तानितांतबुद्धयोऽनंताः
नात्यंतमेकैकबहुशाखाः इति इदमेव मम श्रेय इति निश्चयस्यालाभ
नानाकारा विदश्रेयस्य विश्रयो बुद्धौ सत्यां पातशंकास्तीति महांस्तयो
र्विशेष इति भावः ४१ ॥

आनंदी टीका

तस्मात्समुच्चितयोः ज्ञानकर्मणोरेकस्यैव फलस्य निःश्रेयस
स्यारंभकत्वात् बुद्धिरपि समुच्चयात्मिकाश्येकेवेत्याह हे कुरु
नंदन उक्तप्रकारेण समुच्चिताभ्यां ज्ञानकर्मभ्यां निश्रेयसं प्रा
प्यमिति निश्चयात्मिका बुद्धिरेकेव अव्यवसायिनां निश्चया
भावाज्ज्ञानेन विना कर्मैकान्तरतानाम् तथा कर्मसंन्यस्य केव
लं ज्ञानमेवाभ्यस्यतां बुद्धयः बहुशाखा संशयविपर्यादिभि
र्बहुप्रकारैर्भिन्ना अनवच्छिन्ना भवंति ४१ ॥

+ अमिश्रविशुद्धभक्तिश्रद्धादिगुणव्यक्तिहृचित रामकंठी टीका विवेकजज्ञानाविर्भावो भवादृशो धिकृतः न सर्वः कश्चिदिति प्रतिपादयितुमाह +

+ व्यवसायो निश्चयः स आत्मा स्वरूपं यस्याः सा तथा स्वभाव
तो बुद्धिरेकलक्षणैव निश्चय आत्मादि सदर्थ विषयोपि संभ
वति देहाद्यसदर्थविषयोपि संभवति अत्र यो सदर्थविषयः
स निश्चयाभासो निश्चय एव न भवति अतः सदर्थविषयत्वे
व्यवसायरहितानामव्यवसायिनां बुद्धयो बहुशाखा एकात्मि

ॐ त्वपक्षे नानाविकल्पजालालापर्यवसिताश्च [illegible]
[illegible]
[illegible]
[illegible]
तां [illegible]
[illegible] ४१ ॥

लासिकी [illegible] टीका

शुद्धसदर्थात्मनिश्चयस्वभावा अस्मिन्योगे भवादृशोलब्धात्मबो
धाधिकृतो न सर्वः कश्चिदित्याह व्यवसायेति बहुशाखाश्च
न्यदेहप्राणादिषु अभिमानानां नानात्वात् ब्रह्मादिकीटपर्यंतप
केव विपरीतभावनाया बाधितत्वात् ४१ ॥

पंचोलीटीका

सांख्ययोगबुद्धेः इतरस्याः काम्यकर्मबुद्धेश्च वैलक्षण्यमाह व्यवसा
यात्मिकेति हे कुरुनंदन इह श्रेयोमार्गे व्यवसायात्मिका निश्चय

गी॰ स्वभावाद्बुद्धिः एकैवहियस्मात् अव्यवसायात्मिकानांअनिश्चित
टी॰ बुद्धीनांबुद्धयःबहुशाखाःबहुभेदभिन्नाःचपुनःबहुशाखाभेदेन
हि॰ अनंताःअनंतस्वरूपाः ४१

रामवीरसमिद्धोधिनी

तामेवबुद्धिंविशिनष्टिव्यवसायेति कुरुनंदनेति संबोधनपद
द्योत्योयमर्थःफलितः कोहंकाक्रियाममोचितेति विवेकशालि
नीमतिरेकैव अथवा उत्साहोव्यवसायःस्यादिति कोपान्वकुलो
चितोयमतत्त्वाणबुद्धिरेकैवसहजा फलानंत्यमदेत्यर्थः अव्य
वसायिनांमदसहिवेकनिश्चयहीनानामनिश्चितमतीनांदैवः
पराणांचबुद्धयःस्वनिश्चितानितनत्वश्रुत्यावदकामिकीवपन
गादिजनिप्रदानि अतएवस्वजात्युचितोयमवान्मवेतितात्पर्या
र्थः ४१॥

मधुभाष्य॥

व्यवसायात्मिकाबुद्धिरिति सम्यग्युक्तिनिर्णितानांमतानामे
कमेवेत्यर्थः अवैदिकानिमतान्यव्यवसायात्मिकानि न
तुवैदिकानि तेपिहिकेचित्कर्माणिस्वर्गादिफलान्याहुरित्य
तआह॥ ४१॥

व्यवसायात्मिकेति हे कुरुनंदन अर्जुन इह ज्ञानमार्गे व्यवसायात्मिकात्म
तत्त्वनिश्चयात्मिका एकाचनतुर्गीमात्रमाणीसाध्यानांतत्त्वस्याथेनाधीय
मपिविविच्यसाध्यानन्त्रैकस्याभ्यासस्यानभ्यासस्यवाद्वित्राणीवाउपयो
गेसमानेकिंसर्वानुष्टानेनअत्याध्यायदिवेन यथाब्रह्मचर्यादेवप्रव
जेदिति ब्रह्मचारिणोपिप्रव्रज्याश्रुतेस्तस्याहिताग्निसाध्यकर्माभावेनावि
॰लिदि विदिषासन्यासोनस्यादिक. कर्मकांडनेवैषम्यमाह बहुशाखाइति
अव्यवसायिनांबुद्धयः अनंताफलानांबहु शोखत्वात्तथानंतामपि
नत्रुद्धा खोक्रानाबहुत्वादितिमरुदैषम्यमितिभावः नेनुयदि
कर्मसमुच्चयद्वाराज्ञानात्मिकांबुद्धिंजनयतिकुतस्तर्हिसका
मैरपिक्रियमाणंस्वसामर्थ्यात्संस्कारसत्त्वशुद्धिद्वारातादृशींबुद्धिंते
न षामपिजनयतिनहिरागद्वेषकामेनतिमोष्णिर्गेहंदहन्नप्रपिसप्रका
शकतोजनहानीत्याशंकाह ॥

भाषाअनुवाद

जोकहाकि कणाद आदि आचार्योंके मतमेज्ञानकर्म उपासनारूप
अनेकप्रकारकीबुद्धिकहीहै औरआपयहांज्ञानयोग रूप औ कर्म
रूपदोहीप्रकारबुद्धिके कहासोकैसेसंभवहोय इसअभिप्रायपरउ
क्तरदेनदोनोकेभी विपरीतकहे उलटाभिन्नप्रकार कहतेहैं किहे
कुरुनन्दन अर्जुनयहईश्वर आराधनरूप कर्मयोगमे व्यवसायात्मि
का अर्थात् भगवद्भक्तिकेद्वारा अवश्यही उद्धारहोगा ऐसीनिश्च
यात्मिका कहेनिश्चयरूप बुद्धिकीनिष्ठा एकहीहै और अव्यवसा
यी अर्थात् आराधनके बहिर्मुखकामी कहे सकामकर्म करनेवा
लोकी अनन्त वासनासे अनेकप्रकारकी बुद्धिहोतीहै और उसमे
भीकर्मकाफल और अश्वमेध राजसूय आदि यज्ञका अङ्ग दिग्वि
जयकी भांति गुण कला आदिनानाप्रकार बहुतशाखा प्रशाखा
विशिष्ट बुद्धि उत्पन्न होतीहै परन्तुभगवत् आराधनके अर्थनित्य
कर्मयानैमित्तिक कर्मकुछअङ्ग विकलकहे अधूरा भीहोनेसेनष्ट
नहींजाताहै यथासाध्यकहेजितनाया जैसा अपनेसे होसके उतना
ही और वैसाहीकरो यही उसधर्मकीविधिहै ईश्वरार्पित कर्म वि
घ्न और दोषको शान्तकरिदेता इससे उसके करनेमे कदाचित् वै
गुण्य नहीहोती अर्थात् उसकोविगुणनही कहसकतेहै और
काम्यकर्म तैसानही इससेदोनोकेबीच बडा अन्तरहैसोएक
बुद्धिहोकेरहो ४१ ॥

दोहा

बुद्धिजो उत्साहनी कुरु नंद एककहंत अनउद्यमीकी
बुद्धियां शाखाबहुत अनंत ४१॥

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेद
वादरताःपार्थनान्यदस्तीतिवादिनः ४२ ॥

शांकरभाष्य

येषांव्यवसायात्मिकाबुद्धिर्नास्ति तेषांयामिमामिति यामिमां व
क्ष्यमाणांपुष्पितांपुष्पित इववृक्षःशोभमानां श्रूयमाणरमणीयां
वाचं वाक्यलक्षणांप्रवदंति केऽविपश्चितः अल्पमेधसोऽविवे
किन इत्यर्थः वेदवादरता इतिवेदवादरताः बह्वर्थवादफलसा
धनप्रकाशकेषु वेदवाक्येषुरता हेपार्थनान्यत् स्वर्गपश्वादिफ
लसाधनेभ्यः कर्मभ्योऽस्तीत्येवंवादिनो वदनशीलाः ४२ ॥

आनन्दगिरिकृतटीका

यदिसांख्ययोगरूपैकैव प्रमाणभूताबुद्धिस्तर्हि सैवसर्वेषांचित्तेकि
मितिस्थिरानभवति तत्राहयेषामिति तेषामिमांपुष्पितांवाचं प्र
वदंति तयापहृतचेतसांकामिनां कामवशान्निश्चयात्मिका बु
द्धिर्नप्रायः स्थिरा भवतीत्याह यामितिइमामित्यध्ययनविधुपा
त्तत्वेन प्रसिद्धत्वं कर्मकाण्डरूपया वाचोविवक्ष्यते वक्ष्यमाणत्वं
क्रियाविशेषबहुलामित्यादौ द्रष्टव्यं किंशुकोहि पुष्पशाली
शोभमानोऽनुभूयतेनपुनःरूपभोग्यफलभागी लक्ष्यतेतथेयम
पि कर्मकाण्डात्मिका श्रूयमाणदशायां रमणीयावागुपलभ्य
ते साध्यसाधनसम्बन्धप्रतिभानात्न तेषांनिरतिशयफलभागि
नीभवति कर्मानुष्ठानफलस्यानित्यत्वादिति मत्वाहपुष्पितामि
ति वाक्यत्वेनलक्ष्यते अर्थवत्वप्रतिभा नान्नतत्त्वतवाक्यमर्था
भासत्वादित्याह वाक्यलक्षणामिति प्रवक्तृणांवेदवाक्यतात्पर्य
परिज्ञानाभावं सूचयतिअविपश्चितइति वेदवादावेदवाक्यानि
तानिचबहूनामर्थवादानां फलानांसाधनानांच विधिशेषाणां
प्रकाशकानि तेषुरतिरासक्तिस्तन्निष्ठत्वं तद्वत्त्वमपि तेषां विशेषण
मित्याह वेदवादेति कर्मकाण्डनिष्ठत्वेफलंकथयति नान्यदिति ई
श्वरोवामोक्षोवानास्तीत्येवं वदन्तो नास्तिकाःसम्यग्ज्ञानवन्तोनभवन्तीत्यर्थः ४२॥

गी॰ ननुकामिनोपिकष्टात्कामार्थोनविहायव्यवसायात्मिकामेवबुद्धिं
टी॰ किंनकुर्वंति तत्राह यामिमामिति पुष्पितोविषलतावदापातर
हि॰ मणीयांप्रकृष्टांपरमार्थफलपरामेववदंतिवाचंस्वर्गादिफलश्रुति
येतेषांतयावाचापहृतचेतसांव्यवसायात्मिकाबुद्धिर्नविधीयते समाधौ
इतितृतीयेनान्वयः किमितितथावदंतियतस्तेअविपश्चितोमूढा
स्तत्रहेतुर्वेदेयेवादाअर्थवादाः अतएवंहिवैचातुर्मास्ययाजि
नःसुकृतंभवति अपामसोमममृताअभूमेत्यायास्तेष्वेवर
ताःप्रीताः अतएवातःपरमन्यदीश्वरतत्त्वंनास्तीतिवदनशी
लाः ४२ ॥

पिशाचभाष्य

यामिमांवैदिकींवेदभवांनंद्यगुणकर्मणांस्वर्गादिफलेनापाद
नसमर्थानांफलपूर्वभावित्वात् पुष्पमिवपुष्पंतानिवपुष्पिता
नियषांपुष्पितानांप्रतिपादिकावाणीपिपुष्पितातांवाचंवदंतिअवि
पश्चितअपंडिताः वेदस्यवादोवदनंवेदवादाः तत्ररतास्सक्ताः
वेदवादरताः वेदवाक्यप्रतिपादितस्वर्गादिफलाशापाशवद्धाइ
त्यर्थः स्वर्गादिफलादपवर्गाख्यंसर्वंनास्तीतिवादिनः वेदवदनशी
लाः ४२ ॥

रामानुजभाष्य

अथकाम्यकर्माधिकृतान्निंदतियामिमांपुष्पितांपुष्पमात्रफलामापा
तरमणीयांवाचमविपश्चितोल्पज्ञाभोगैश्वर्यगतिंप्रतिवदमाना
प्रवदंतिवेदवादरताः वेदेषुस्वर्गादिफलवादास्तेषुसक्ताः नान्य
दस्तीतिवादिनः तत्स्वर्गादिरेकेणस्वर्गादेरधिकंफलंनान्यद
स्तीतिवदंतः ४२ ॥

अभिनवगुप्तटीका येकामा

परमार्थप्रपाटीका

अथैकामिनोप्येतांव्यवसायबुद्धिंकथंनानुतिष्ठंतइत्याह यामि
ति यथालोकेपुष्पंहिफलोद्गमंसूचयति एवंपुष्पितांफलाभि
संधिंसूचयंतीवेदवाचंअविपश्चितस्तत्तात्पर्यमजानंतोवदंति

मिलाभिलाषेणयमेतांवाचंवेदात्मिकां पुष्पितांभविष्यत्
स्वर्गफलेनव्याप्तांवदंति अतएवजन्मनःकर्मैवफलमिच्छन्ति
ते अविपश्चितःतेचतयैवसर्वंकल्पितयावेदवाचाअपहृतचित्ता
व्यवसायबुद्धियुक्ताअपिनसमाधिंयोग्याःतत्रफलनिश्चयत्वादि
ति श्लोकत्रयस्यतात्पर्यम् ॥४२

समर्थयंति कथं नान्यदस्तीतिवादिनः एतद्व्यतिरेकेणान्यत्क्वचितात्प
र्येनास्तीत्यभिनिवेशवंतः अतएव वेदार्थवादेरतास्तत्रैव तात्पर्यमव
धारयंतः यद्वा अधेन्वाचरति माययैष वाचं शुश्रुवां अफलामपुष्पामि
ति श्रुतौ पुष्पफले हि देवयात्मे इति निरुक्तोक्तेः पुष्पस्थानीयदेवतोपा
सनाविषयां वा अत्र वेदवाणीं प्रवदंतीति ४२ ॥

वनमालीटी॰

अव्यवसायिनामपि व्यवसायात्मिका बुद्धिः कुतो न भवति प्रमाणस्य स
र्वसाधारणत्वादित्याशंक्य प्रतिबंधकसद्भावान्न भवतीत्याह यामिति त्रि
भिः यामिमां वाचं वदंति तयापहृतचेतसां व्यवसायात्मिका बुद्धिर्न भवतीत्य
न्तरेणान्वयः इमामध्ययनविध्युपात्तत्वेन प्रसिद्धां पुष्पितां पुष्पितपला
शवदापातरमणीयां निरतिशयफलाभावात् अतः यतो जन्मकर्मफ
लप्रदां जन्म पूर्वशरीरसंबंधः तदधीनं च कर्म तत्तद्वर्णाश्रमाभिमान
निमित्तं तद्धेतुकफलं पुत्रपशुस्वर्गादिकं न स्वरूपं तां सुप्तनीवानिकृ
पाजलाहारकघटीयंत्रवदविच्छेदेन ददातीति तथा तां अतएव मत
आह भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां अन्नपानादिवशीवि
हारपारिजातपरिमलादिनिबंधनो यो भोगस्तत्कारणं च यदैश्वर्यं दे
वादिस्वामित्वं तयोर्गतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषा दर्शपू
र्णमासादयस्तैर्बहुलां अतिबाहुल्येन भोगादिफलाय क्रियाकला
पप्रतिपादिकां वाचं वदंति अविपश्चितविचारजन्यतात्पर्यवीतशू
न्याः अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिवेदवादासु
रताः अयमेव वेदार्थ इति मिथ्याविश्वासेन संतुष्टाः स्वर्गादेरन्यत्
ज्ञानमोक्षादिकं फलं नास्तीतिवादिनः ४२ ॥

अथ वैजयंती टी॰ ॥

ननु अव्यवसायिनो बुद्धयः कुतो हेतोरनंता बहुशाखाश्च भवंति तेषां
व्यवसायात्मिका बुद्धिः कस्माद्वा न भवतीत्याशंकायां त्रिभिः श्लोकैराह
यामिमामिति इमामक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अ
पाम सोमममृता अभूमेत्येवरूपां पुष्पितां शिंशपापुष्पवदापातर
मणीयां वाचं ये वदंति तया वाचा अपहृतचेतसां तेषामव्यवसायि
नो व्यवसायात्मिका बुद्धिः समाधौ न विधीयत इति तृतीयेनान्वयः

एवं ये वदंति ते के इत्यपेक्षायामाह अविपश्चितः चेतनाचेतनेतरवस्तु
स्वरूपादिज्ञानहीना मूर्खा इत्यर्थः अत एव वेदवादरताः वेदेषु वेदांतेत
रेषु स्वर्गादिफलप्रतिपादकेषु वाक्येषु ये वादाः स्तुतिरूपार्थवादास्ते
ष्वेव रताः प्रीतियुक्ताः एवमेव वेदस्यार्थः इत्येवं दुराग्रहेण श्रद्धापश्र
वणेष्वतिशयसक्ता इत्यर्थः अत एवमपि ये तान्नान्यदस्तीति वादि
नः पारिजातादिकुसुमामोदेन नन्दनाद्यमरवने उर्वश्यादिस्वर्वेश्या
भिः सह विहारोऽमृतपानमित्येवमादिस्वर्गभोगादिसुखादन्यत्किं
अपि मोक्षादिफलं नास्तीति वदनस्वभावाः ४२ ॥

मधुसूदनी टीका ॥

अव्यवसायिनामपि व्यवसायात्मिका बुद्धिः कुतो न भवति प्रमाणस्य
तुल्यत्वादित्याशंक्य प्रतिबंधकसद्भावान्न भवतीत्याह त्रिभिः यामि
मां वाचं प्रवदंति तया वाचाऽपहृतचेतसामविपश्चितां व्यवसायात्मि
का बुद्धिर्न भवतीत्यर्थः इमामध्ययनविध्युपात्तत्वेन प्रसिद्धां पुष्पि
तां पुष्पितपलाशवदापातरमणीयां साध्यसाधनसंबंधप्रतिभाना
न्निरतिशयफलाभावाच्च कुतो निरतिशयफलत्वाभावस्तत्राह जन्म
कर्मफलप्रदां जन्म चापूर्वशरीरेंद्रियादिसंबंधलक्षणं तदधीनं च
कर्म तद्वर्णाश्रमाभिमाननिमित्तं तदधीनं च कर्मफलं पुत्रपशुस्वर्गादि
लक्षणं वित्तेस्तरं जातिप्रकर्षेण प्रदीयत्रवदविच्छेदेन ददातीति त
थोक्ता अत एवमत्राह भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुला
यामृतपानोर्वशीविहारपारिजातपरिमलादिनिबन्धनो यो भोग
स्तत्कारणं च तद्देश्वर्यं देवादिस्वामित्वं तयोर्गतिं प्राप्तिं प्रति साधनभू
ता ये क्रियाविशेषा अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादयस्तैर्बहु
लां विस्तृतां अतिबाहुल्येन भोगैश्वर्यसाधनक्रियाकलापप्रतिपा
दकामिति यावत् कर्मकांडस्य ज्ञानकांडापेक्षया सर्वत्राति विस्त
तत्वप्रसिद्धं एतादृशी कर्मकांडलक्षणां वाचं प्रवदंति प्रकृष्टां परमा
र्थां स्वर्गादिफलामभ्युपगच्छंति के ये अविपश्चितः विचारजन्यतात्प
र्यपरिज्ञानशून्याः अत एव वेदवादरता वेदे ये संति वादा अर्थवादाः
अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्येवमादयस्तेष्वेव र
ता वेदार्थसत्यत्वेन एवमेवैतदिति मिथ्याविश्वासेन संतुष्टाः हेपा

र्थे अत एव नान्यदस्तीति वादिनः कर्मकांडापेक्षया नान्यत्
ज्ञानकांडं सर्वस्यापि वेदस्य कार्यपरत्वात्कर्मफलापेक्षया च
नान्यन्नित्यं निरतिशयं ज्ञानफलमिति वदनशीलाः म
हता प्रबंधेन ज्ञानकांडविरुद्धार्थभाषिण इत्यर्थः कुतोमातेह
षणत्वे यतः कामात्मनः काम्यमानविषयशताकुलचित्तत्वे
न काममयाः एवं सति मोक्षमपि कुतो न कामयन्ते यतः स्व
र्गपराः स्वर्ग एवोर्वश्याद्युपेतत्वेन परउत्कर्षो येषां ते तथा स्व
र्गातिरिक्तः पुरुषार्थो नास्तीति भ्रान्ता अविवेकवैराग्याभा
वान्मोक्षकथामपि सोढुमक्षमा इति यावत् तेषां च एवंका
यो भोगैश्वर्ययोः प्रसक्तानां क्षयित्वादिदोषादर्शनेन निविष्टा
न्तःकरणानां तया क्रियाविशेषबहुलया वाचापहृतमा
क्षादितं चेतो विवेकविज्ञानं येषां तथाभूतानां अर्थवादः
स्त्वर्थः तात्पर्यविषये प्रमाणान्तराबाधिते वेदस्य प्रामा
ण्यमिति सुप्रसिद्धमपि ज्ञातुमशक्तानां समाधावन्तःकरणे
व्यवसायात्मिका बुद्धिर्न विधीयते न भवतीत्यर्थः समाधिवि
षया व्यवसायात्मिका बुद्धिस्तेषां न भवतीति वा अधिकरणे
विषये वा सप्तम्यास्तुल्यत्वात् विधीयत इति कर्मकर्तरि लकारः
समाधीयते अस्मिन्सर्वमिति व्युत्पत्त्या समाधिरन्तःकरणं वा पर
मात्मा वेति नाप्रसिद्धार्थकल्पनं अहं ब्रह्मेत्यवस्थानं समाधिस्त
न्निमित्तं व्यवसायात्मिका बुद्धिर्नोत्पद्यत इति व्याख्यानेन तु रुचि
रेवाहृता अयं भावः यद्यपि काम्यान्यग्निहोत्रादीनि शुद्ध्यर्थेभ्यो
न विशिष्यन्ते तथापि फलाभिसंधिदोषात् आशयशुद्धिं संपाद
यन्ति भोगानुरागेण तु शुद्धिं न ज्ञानोपयोगिनीं एतदेव दर्शयि
तं भोगैश्वर्यप्रसक्तानां इति पुनरुपात्तं फलाभिसंधिमंतरेण
तु कृतानि ज्ञानोपयोगिनीं शुद्धिमादधतीति सिद्धं विपश्चि
दविपश्चितोः फलवैलक्षण्यं विस्तरेणैतदग्रे प्रतिपाद
यिष्यते ४४ ॥

यानिश्चयवतांनानाप्रतिबंधवशात्समा व्यवसायात्मिका
बुद्धिर्भवतीत्याहमापतिः १ यामिमांवक्ष्यमाणांहिवाचं
श्रवणशोभनां आपातरमणीयांचसुपुष्पितपलाशवत्
देहेंद्रियादिसंबंधरूपंजन्मददातियां तदधीनंचयत्कर्म
तदधीनंफलंतथा ३ ददातीतिप्रदीयंत्रवदाविच्छेदतस्तु
नां सुधापानोर्वशीक्रीडासुगंधादिनिबंधनः ४ भोगस्तद्वै
तदैश्वर्यंदेवादिस्वामितातयोः प्राप्तिप्रतिक्रियाभेदाःसाधन
त्वेनयेमता ५ तेविस्तरेणकर्मभेदाःप्रवदंत्यविपश्चितः विवा
रजन्यतात्पर्यज्ञानशून्याःस्वरागिणः ६ येर्थवादाःश्रुतेःसं
तिरोचनार्थाहिकर्मणां प्रसक्तयेहवैचातुर्मास्ययाजिनइ
त्यपि ७ तेष्वेववेदतात्पर्यमितिविश्वासतत्पराः पशुपुत्रादि
हेतुभ्यःकर्मभ्योनान्यदस्तितत् ८ ज्ञानंनतत्फलंदानक्ष
तेःकर्मपरत्वतः प्रतिबंधात्तएवंविरुद्धार्थकभाषिणः ९
विषयाकुलचित्तत्वात्सदाकाममयाःशठाः स्वर्गापवर्गायेषां
पुरुषार्थतयामतः १० वैराग्यादिबहिर्भूतत्वात्तृष्णामोदकथाम
पि नदत्तमेतेततस्तेषांभोगादौलग्नचेतसां ११ तयापूर्वोक्तया
वाचायेषामाच्छादितंमनः समाधिविषयाबुद्धिर्नोतेषांनि
श्चयात्मिका १२ ग्रहेष्वसैन्यवस्थानेसमाधिस्तन्निबन्धना
व्यवसायात्मिकाबुद्धिस्तेषांनोत्पद्यतेयथा १३ ४२ ॥

उत्तरार्धमेवविवृणोतियामिमामित्यादिनायांपुष्पितांपुष्पित
द्रुमवद्दूरतोरमणीयांवाचं अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृ
तंभवतिअपामसोमममृताअभूमेत्येवंरूपांप्रवदंतिअविपश्चि
तः अव्यवसायिनोमूढाः यतोवेदवादरताः वेदांतर्गतेष्व
र्थवादेषुयस्यपर्णमयीजुहूर्भवतिनपापश्लोकंशृणोतीत्येव
मादिषुरताः बद्धश्रद्धाः अतएवकर्मणोऽन्यत् आत्मज्ञानंतत्फ
लंमोक्षंनास्तीतिवादिनोवदनशीलाः ४२ ॥

+ यतःसर्वाभिकांक्षापरित्यक्तयैकहेतौ परमार्थसत्यात्मनि अचलबुद्धिप्रतिष्ठा इदंप्राप्यमिदंप्राप्यमित्यनित्यमर्थंप्राप्यतयालेबमानानांनकदाचिद्धिशांतिर्लभ्यतइत्येवंविधानांपुरुषाणांस्वर्गादिभोगमात्रपरत्वेनप्रतिपन्नानांयाबुद्धिःसाव्यक्तंप्रसक्तातेपरस्मिन्धर्मेननियुज्यतेइत्याह +

ज्ञानेश्वरी टीका

तत्रकर्मणाकेवलंदर्शयति वेदानांवादेषुपाठमात्रेषुरताः परमार्थतात्पर्यानभिज्ञाः अतएवनान्यदस्तीतिवादिनः याव ज्जीवमग्निहोत्रंजुहुयात् स्वर्गकामइत्यादिश्रुतेः ४२ ।

रामकंठी टी॰

सैषाव्यवसायात्मिकानिश्चयस्वभावाबुद्धिर्भोगैश्वर्यप्रसक्तानां पुंसांसमाधौ आत्मलक्षणपरमार्थतत्त्वविषयेप्रणिधानेनावि धीयतेनानुशिष्यते तस्मात्तदर्थप्रतिपत्तियोग्यत्वाभावात् ये हि भोगानामिष्टानांविषयाणामैश्वर्यस्वाम्यप्रकर्षेणैवस्वान्तर परिहाररूपेणातिशयेनासक्तास्तेषामपरापरएवतेषांभोगा सक्तानांभोगात्मकानित्यवस्तुव्यवसायात्मिकाबुद्धिःसमाधि विषयेव्यवसायेनालम्बितैवकीदृशानांतेषांभोगैश्वर्यप्रसक्ता नांसमाधौबुद्धिर्नविधीयते तयावाचापहृतचेतसांस्वीकृत मानसानांकयावाचा यामिमांपुष्पितांपरमार्थबोधलक्षणफ लरहितत्वात् भोगरूपपुष्पमात्रसंयुक्तांप्रसिद्धांवाचंवेदवा दरताअविपश्चितो वदंतिव्याचक्षते वेदशाखायज्ञानुष्ठानक्रि यामात्रविधायकवेदैकदेशवचनोवेदशब्दः तस्यतथाविध स्यवेदस्यवादोभिधानंपरंप्रकृष्टंतदेवतत्त्वमेषांतेतथोक्ताः अतएवनान्यदस्तीतिवादिनः स्वर्गादिफलप्राप्तिहेतुभूतानां क्रियाविशेषाणांविधायकाद्वेदाद्धेतन्यत्किंचनास्त्येवेतिवद नशीलाः अतएवाविपश्चितः यज्ञादिक्रियाफलभूतानित्या शुचिसातिशयभोगमात्ररूपमर्थंपुरुषार्थफलत्वेनप्रतिपन्नाः सन्तोनविद्वांसो येअविनाशिविशुद्धनिरतिशयमात्मतत्त्वल क्षणमतद्विपरीतमर्थंफलत्वेनप्रतिपाद्यन्ते तेविपश्चित्त्वेनम जन्ते [illegible] ४२

लासिकी [illegible] टीका

स्वर्गादिभोगमात्रपरत्वेनप्रतिपन्नानांअव्यवसायिनांबुद्धिःप्र सक्तातेपरस्मिन्धर्मेननियुज्यतइत्याह यामिति यामिमांवेदवा क्यकर्मकाण्डलक्षणांअविपश्चितोअविवेकिनःप्रबोधशून्यावेद ९ वादरतावेदेऽर्थवादाः अन्तयदवेवादमीमांसायाजिनःसुकृत

गी॰ भवति अपामसोमममृताअभूमेत्याद्यास्तेषुरताः प्रीताः नान्य
टी॰ त्स्मात्पामीस्वरतत्वमितिवदनशीलाः ४२ ॥
हि॰ पंचोलीटीका

संख्ययोगबुद्धोप्रवृत्तिसिद्ध्यर्थमितरसकामकर्मबुद्धोप्रवर्तमाना
नांसांख्ययोगबुद्धिप्राप्त्यभावलक्षणंदोषमाह यामिमामिति हेपा
र्थवेदवादरताअर्थवादफलसाधनप्रकाशकेषुवेदवाक्येषुरताः
अविपश्चितःअविवेकिनःयामिमांपुष्पितांपुष्पितवृक्षइवशोभनां
वाचंप्रवदंतिस्वर्गपश्वादिफलसाधनेभ्यःकर्मभ्योअन्यत्नास्तीति
वादिनः ४२

रत्नवीरसमिद्बोधिनी॥

अनिश्चितमतीनांभ्रंशमाह यामिमामितित्रिभिः यांवाचंवेदल
क्षणांपुष्पितांपुष्पोत्थितपुष्पलतावत्पुष्पितामापातमात्ररमणी
यांवेदवादरताः वेदानांवादेअर्थवादेरताः अर्थवादश्चत्रेधाप्राप्यम
निदान्यतरवाक्यमर्थवादः सचविधिशेषोनिषेधशेषश्चेति पुन
रपित्रेधागुणवादानुवादभूतार्थवादभेदात् प्रमाणांतरविरोधेस
त्यर्थवादोगुणवादः प्रमाणांतरावगतार्थबोधकोनुवादः प्र
माणांतरविरोधतत्प्राप्तिरहितार्थबोधकोभूतार्थवादः तथाच
प्राभाकराः विरोधेगुणवादःस्यादनुवादोवधारिते भूतार्थवाद
स्तद्धानादर्थवादस्त्रिधामतइति तथाच वायव्यंश्वेतमजमाल
भेतेतिविधिवाक्यं वायुर्वैक्षेपिष्ठादेवतेतिनिषेधवाक्यमित्याद्य
र्थवादात्मकेवेदेवनान्यत्किंचित्प्रयोजनमस्तीत्येवंवादिनस्तेमू
र्खाएवेत्यर्थः ४२॥

मधुभाष्य॥

यामिमामिति यामाहुस्तयेत्यन्वयः मोक्षफलपेक्ष्यस्वर्गादि
पुष्पपुष्पांवाचंप्रवदंति वेदवादरताः कर्मादिवाचकवेद
वादरताः वेदैर्यन्नुष्ठानउच्यते तत्रैवरताः नान्यदस्तीतिवादि

नः परोक्षविषया वेदाः परोक्षप्रिया इव हि देवाः मां वि
यते भियते मामित्यादिभिः पारोक्ष्येण प्रायो भगवंतेव
दंति भोगैश्वर्यप्राप्तिं प्रति तन्मात्रफलापववेदाइ
ति वदंतीत्यर्थः तेषां सम्यग्युक्तिनिर्णयात्मिका बुद्धिः
समाधौ समाध्यर्थेन विधीयते सम्यग्निर्णीतार्थानामीश्व
रे मनः समाधानं सम्यग्भवति तद्धि मोक्षसाधनं उँचेन
दन्यत्र न तस्यात्तत्प्रदर्शनायसा तादरीयसीरपि वाचः स
समासन्न स्वर्गेनिकृत्ताट्टदमेथि सोप्यं नयस्य देयानुमि
तेस्वर्यं स्यात् इति ततो योगबुद्धिमाह त्रैगुण्यविषया वेदा इ
त्यादिना ञतवदपोय वेदानापरोक्षार्थत्वात्त्रिगुणसंबंधि
स्वर्गादिप्रतीतोऽर्थ इव भाति परोक्षवादी वेदोयमिति मुक्तम
नतः प्रातीतिकोऽर्थो भातिमा भूदित्यर्थः वादो विषयकत्वेव
मुख्यतो वचनं स्मृतमित्यभिधानात् ननु वेदपक्षोनिषि
ध्यते वेदेरामायणे चैव पुराणे भारते तथा आदावंते च म
ध्ये च विष्णुः सर्वत्र गीयते सर्वे वेदा यत्पदमामनंति वेदोखि
लो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामा
त्मनस्तुष्टिरेव च वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्यय
इति वेदानां सर्वात्मना विस्तुपरत्वोक्तेः तद्धि दिनस्य तद्धि
रुद्धस्य धर्माधर्मत्वोक्तेश्च तथापि काम्यकर्मणां फलं
ज्ञानिनां न भवतीति साम्यमेवेत्यत आह ४५॥

यामिमामितित्रिभिः अत्र यामित्यत्र लिंगविभक्तिविपरिणामेन येइत्य
भिलेयं तयेत्यत्रापितेनैव प्रकारेण तेषामितिनेयं कर्मणां प्रकृतत्वा
त्कर्मभिरिति शेषात्तेयः ततश्चायमन्वयः तया उक्तया अपहृतचेतसा
तेषां सक्तानां कर्मभिः व्यवसायात्मिका बुद्धिर्न विधीयत इति अपहृत
चेतसामिति वशीकृतचेतसामित्यर्थः तयाकयातेषांकेषामित्यपेक्षा
यामेवंयोज्यं यामिमां वाचं पुष्पितां भोगैश्वर्यगतिं प्रतिये प्रवदंति इ
मामिति पुरोवस्थितवद्व्यपदेशेन तस्या वाचः अध्याहृतप्रसरत्वं द्यो
तयति पुष्पितामिति पुष्पवन्नयानातादात्मिकरमणीयां वदन्फलो
त्पत्तेः रपूर्वरूपायाऽनुष्टानसव्यपेक्षतया व्यवहितत्वं तानुपयोग
स्य च देशांतरकालांतरभावितया व्यवहितत्तरतामाह यथा पुष्पो
द्गमात्कालांतरे फलं तदुपभोगस्तु व्यवहितस्तद्वद्भोगैश्वर्यं क
र्माधिकारलक्षणेन स्वर्गादितानं यथावाचामित्यर्थः प्रतिर्लक्षणा
र्थेकर्मप्रवचनीयः ततश्च वाग्लक्षणप्रवदतो विपश्चितो लक्ष्यस्वरूपा
धिकारमात्र[illegible]बोधिकां वाचं प्राप्य वदंतीति प्राप्तिक्रि
याजनितो लक्षणभावः प्रवदंतीति प्रामाः स इदानीं स्वर्गमित्या
दिप्रकर्षेण वदंतीत्यर्थः अग्निमपव स्वर्गप्रामे स्वर्वमन्यत इति अ
विपश्चितस्तदेव अविपश्चित्वे को हेतुस्तत्राह वेदवादरता इति वा
दशाहेन अर्थवादाः भामाशेह तस्य भामायाश्वार्थवादानां ग्रहणे त
स्याश्चैवेदसंबंधिनोर्थवादास्तेरताः प्राप्तिप्रामावेदग्रहणमिथ्यात्वप
रिहारार्थं अपवयताद्भुर्धेयजमानो जस्यास्वर्गे लोकमेतीत्यादयो
वर्तमानत्वेन स्वर्गप्राप्तिबोधकावैदिका अर्थवादाः कथं मिथ्यास्युस्त
स्मात्प्रामाण्यवशात्स्वर्गमितिमन्यमानाअविपश्चितो भवंतीत्यर्थः त
त्वर्थवादांतस्यार्थाः स्तितु वेदाचोदितं किं तत्फलं तीत्याशंकाविशिन
ष्टि नान्यदस्तीति एषामर्थवादानामभिधेयांतरप्रयोजनांतरं
नान्यत्तास्तीति वेदप्रशावणात्वदनशीलाः ॥४२॥

भाषाअनुवाद

जोकहोकि सांख्ययोगरूप बुद्धिपकहीप्रमाण भूतहै तोफेरि
वही सबकेचित्तमेक्योंनहीस्थिरहोती अर्थात जोसकाममनु
ष्यहै वेभीये कष्टरूप सकलकामनात्यागकरि भगवभक्ति ६
हीसेमुक्तहोयगे ऐसीनिश्चयरूपबुद्धिकाहेसे नहीकरते
हैं तिसपर कहतेहैंकि विषलता इन्द्रायनकीतरह अति
सुंदररमणीय उत्तम स्वर्गआदि फलसुनावने वाली स्तुति कहे
वेदवाक्य जिसको कामीकहै सकाममनुष्यसबकहतेहैं
सोईस्वर्गआदि फलस्तुतिरूपवेदवाक्यसे विचारशून्य मनुष्यों
को अर्थात विश्वास करनेवालोंको भगवद्भक्तिसे निश्चय
मुक्तहोयगे ऐसीबुद्धिउत्पन्ननहीहोतीहै इसश्लोकके आगि
वाले तीनश्लोकोंकेसाथ इसश्लोककी अन्वयहै जोकहोकि वे
मनुष्यऐसे काहेलियेकरतेहै तोउनका सिद्धान्तकरतेहैं
किजिसलियेवेसबलोग अतिमूढ अज्ञानीहै उनकेअज्ञान
मे हेतु करतेहै किवेदके बीचमेजोसबवाक्यहै सोकेवल प्रशं
सा परकहै अर्थात चतुर्मासयाजीयोंको अक्षय स्वर्गहोता औ
यज्ञ शेषसे सोमलता पीकरिअमरहोतेहैं इत्यादिजोपलास
पुष्पके समानपुष्पित वेदवाक्यहै निर्गन्धफूलके तुल्यइन्ही
वेदवाक्योंसे काम्यकर्ममेवेलोग निरतहै इससेकहतेकियह
वेदोक्तस्वर्गआदि फलकोछोडकर औरईश्वरतत्वप्राप्तकरनेयो
ग्यवस्तुकुछ नहीहै इसी मतकोवेकरतेहै ४२ ॥

दोहा॥

जो इह पुष्पित वाणीको कहित अपंडित वीर वेदवादमें
पार्थरतकहैं याते सारन और ४२॥

266

कामात्मानः स्वर्गपरा जन्मकर्म्मफलप्रदां क्रियावि-
शेषबहुलां भोगैश्वर्यगतिं प्रति ४३

शांकरभाष्य

तेच कामात्मेति कामात्मानः कामस्वभावाः कामपरा इत्यर्थः स्व
र्गेति स्वर्गपराः स्वर्गः परः पुरुषार्थो येषां ते स्वर्गपराः स्वर्गप्रधा
नाः जन्मकर्म्मफलप्रदां कर्म्मणः फलं कर्म्मफलं जन्मैव कर्म्मणः
फलं जन्मकर्म्मफलं तत्प्रददातीति जन्मकर्म्मफलप्रदा तां वा
चं प्रवदन्तीत्यनुषज्यते क्रियाविशेषबहुलां क्रियाणां विशेषाः
क्रियाविशेषाः ते बहुला यस्यां वाचि तां स्वर्गपशुपुत्राद्यर्थाः
यया वाचा बाहुल्येन प्रकाश्यन्ते भोगैश्वर्यगतिं प्रति भोगश्च
ऐश्वर्य्यं च भोगैश्वर्ये तयोर्गतिः प्राप्तिः भोगैश्वर्यगतिः तां प्रति
साधनभूतास्ते क्रियाविशेषाः तद्बहुलां तां वाचं प्रवदन्तो मूढाः
संसारे परिवर्त्तन्त इत्यभिप्रायः ४३ ॥

आनन्दगिरिकृतटीका

प्रकृतान् प्रवक्तृनविवेकिनोऽव्यवसायात्मिकाबुद्धिभाक्त्वासम्भ
वितद्युपर्थे विधान्तरेण विशिनष्टि तेचेति तेषां संसारपरिवर्त्त
मानपरिदर्शनार्थं प्रकृतां वाचमेव विशिनष्टि जन्मेति ननु पुं
सां कामस्वभावत्वमयुक्तं चेतनस्येच्छावतस्तदात्मत्वानुपपत्ते
रिति तत्राह कामपरा इति तत्परत्वं तदर्थफलार्थित्वेन तदुपा
येषु कर्म्मस्वेव प्रवृत्ततया कर्म्मसंन्यासपूर्वकात् ज्ञानादविमु
खत्वं तर्हि कर्म्मनिष्ठानामपि परमपुरुषार्थोपेततया मोक्षोपाये
ज्ञाने भवत्याभिमुख्यमिति तत्राह स्वर्गेति तत्परत्वं तस्मिन्नेवात्य
न्ततया तदतिरिक्तपुरुषार्थराहित्यनिश्चयवत्त्वं उच्चावचमध्यमरे

हुप्रभेदग्रहणं जन्मवाचोपयोक्तफलप्रदत्वमप्रामाणिकमित्याशंक्या
नुष्ठानद्वारा तदुपपत्तिरित्याह क्रियेति क्रियाणामनुष्ठानानां या
गदानादीनां विशेषा देशकालाधिकारिप्रयुक्ताः समाहारेणैकाह
लक्षणास्तैर्बहुलां वाचि प्राचुर्येण प्रतिभान्तीत्यर्थः कथंयथो
क्तायां वाचि क्रियाविशेषाणां बाहुल्येनावस्थानमित्याशंक्य प्रका
श्यत्वेनैतद्दिशदयति स्वर्गेति तथापि तेषां मोक्षोपायत्वोपपत्ते
स्तन्निष्ठानां मोक्षाभिमुख्यं भविष्यति नेत्याह भोगेति यथोक्तां
वाचमभिवदतां पर्यवसाने दर्शयति तद्बहुलामिति ४३ ॥

स्वामिकृतटीका

यत एवं कामात्मान इति कामात्मानः कामाकुलचित्ताः अतः स्वर्ग
एव परः पुरुषार्थो येषां ते जन्म च तत्र कर्माणि च तत्फलानि च प्रददाती
ति तथा तां भोगैश्वर्ययोर्गतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषा
स्तैर्बहुलां यस्तां प्रवदन्तीत्यन्वयः ४३ ॥

पिशाचभाष्य

कथंभूतास्ते अविपश्चित इत्यत्राह कामात्मनः कामिनः स्वर्गपराः स्वर्ग
प्रधानाः जन्मकर्मफलानि च जन्मकर्मफलानि प्रददतीति जन्मक
र्मफलप्रदां तां वाचं क्रियाविशेषबहुलां क्रियाणां विशेषाः क्रियावि
शेषाः पाकयज्ञादयः बहून् अर्थान् लान्तीति प्रतिपादयन्तीति बहुलाः
क्रियाविशेषबहुला तां भोगैश्वर्यगतिं भोगः शब्दादिविषयलाभः
ऐश्वर्यमणिमादि भोगैश्वर्ययोर्गतिः तां प्रति तल्लक्षणां भोगैश्वर्य
गतिं शब्दादिविषयलाभगतिमनुभूतामित्यर्थः तां वाचं त्यज
तदर्थं पुरुषार्थबुद्धिं माकार्षीरित्यर्थः तथा च श्रुतिः स्वकाम्येनेप्र
दर्शापसन्नूपास्रणादर्शीकमवर्षेयेभकर्मण्यादि कस्मात्तां वाचमुक्ता

न्येत्यत्राहुर्यदिमावाक्यप्रमाणत्वेनोपादीयतेतदनुष्ठानेनत
त्फलप्राप्तौचप्रसक्तिःस्यात् ४३ ॥

रामानुजभाष्य

कामात्मनः कामप्रवणमनसः स्वर्गपराः स्वर्गपरायणाः स्वर्गा
दिफलावसानेषुतेषुजन्मकर्माख्यफलप्रदांक्रियाविशेषबहुलां
ननुतत्त्वानरहितनयाक्रियाविशेषप्रचुरांभोगैश्वर्यप्रसक्ता
नांनरोचयन्त्याख्यानुरूपेण ४३ ॥

अभिनवगुप्तटीका

अतएवजन्मनःकर्मैवफलंनिबध्नन्तीतिवेदपक्षिणः तेचनैव
स्वर्गकालेनयावत्स्यावापर्यचिंताप्रवलावपुतदितुतत्रप्रतिवस
मानियोगा नत्रफलनिषुप्रवादिभिर्भोजनयत्नतान्त्ययम् ४३॥

परमार्थप्रपाटीका

अथैतत्प्रकटयन्नाह कामात्मानइति कामात्मानोऽभिलाषाकु
लचित्ताअतएवस्वर्गपराःस्वर्गएवपरंउत्कृष्टंयेषांतेजन्मकर्म
फलप्रदां जन्मचतत्रकर्मचफलंचप्रददातितांभोगैश्वर्यगतिंप्र
वदंति भोगोरंभादिऐश्वर्यंदेवाधिपतितयोर्गतिःप्राप्तिस्तांकिंभूतां
क्रियाविशेषबहुलांभोगैश्वर्यप्राप्तिंप्रतिसाधनभूतायेक्रियावि
शेषास्तैर्बहुलांसुर्वीप्रतिप्रयासमसाध्याम् ४३ ॥

वनमालीटीका

कामात्मानःकामाकुलितचित्ताःस्वर्गएवपरःपुरुषार्थइतित्वाने
येषांते ४३ ॥ स्वर्गपराःस्वर्ग

उत्तमवैजयंतीटीका

किंचएवमपिकुतःयतःकामात्मानइति कामात्मानःपुत्रकल
त्ररूपराज्यारोग्याद्यनेकविधरूपेषुकामेष्वात्मानःमनोयेषां
तेनतथानानाविषयविलिप्तमतयस्त्वर्थः ननुतेयथेनतान्वि
षयान्कामयन्तेतथासर्वैश्वर्यंत्वामपिकुतोनकामयन्तइतिचेत्त्वा
ह स्वर्गपराइति स्वर्गएवपरःपरमः सर्वोत्कृष्टोयेषांतेतथाका
माक्रांतचित्तत्वेनस्वर्गैश्वर्यादिविशिष्टात्स्वर्गादिसरवादन्यमवेपरं

गी० स्वर्गैश्वर्यपरमप्राप्येसर्वातिशयमस्वरूपंमोक्षजानंतीत्यर्थः
टी० वाचंविशिनष्टि जन्मकर्मफलप्रदां जन्मस्वर्गादिभोगान्यवि
टि० शिष्टकर्मजन्यमनुष्यादिदेहेंद्रियाद्याविर्भावरूपंकर्मतत्तत्कुलो द्वैं
चितमिंद्रियक्रियात्मकंफलंधामधनधान्यपशुपुत्रकलत्राद्यु
नित्यवस्तुरूपंजन्मचकर्मचफलंचतानिप्रकर्षेणददाति १ नयानां
नःकिंविशिष्टांभोगैश्वर्यगतिंप्रतिक्रियाविशेषबहुलां
भोगःस्वर्वेश्यापराम्रतपानादिःऐश्वर्यंस्वर्गाधिपत्यंतयो
र्गतिःप्राप्तिस्तांप्रतितदर्थमेवयेक्रियाणांमध्येविशेषाःश्रे
ष्ठाःअग्निष्टोमाग्निहोत्रदर्शपूर्णमासामावास्यादयस्तेषांबहु
लेकलापंयस्यांतथातांप्रवदंतीतिसंबंधः। ४३ ॥

मधुसूदनीटीका द्विचत्वारिंशे उक्तार्थं

जन्मकर्मफलप्रदां जन्मवासर्वेगतीर्वद्धिवादिनंदेनफलत्वेन
तद्दर्शनेऽवकर्मणेरत्वाद्यादिकामनिमित्ते तद्दर्शनेचफ
लंचवंचस्वर्गादिलक्षणं विनश्वरंतानिप्रकर्षेणवदनीयत्र
वदतिवेदेनददातीतितथातां अतएवमनेकाराः भोगैश्व
र्यगतिंप्रति क्रियाविशेषबहुलां अन्नपानोर्वशीविहार
पारिजातपरिमलादिनिबंधनोभोगः तत्कारणंचयदैश्व
र्यं देवादिस्वामित्वंतयोर्गतिंप्राप्तिंप्रतिसाधनभूतायेक्रिया
विशेषाअग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादयः तैर्बहुलांवि
स्तृतां ब्राह्मणभूतेनभोगैश्वर्यसाधनक्रियाकलापप्रतिपा
दिकामितियावत् कर्मकांडस्यहिज्ञानकांडापेक्षयासर्वथा
तिविस्तृतत्वंप्रसिद्धं येनादृशींकर्मकांडरूपांवाचंप्रवदंति
मूढाःस्वर्गादिफलान्यनुपगच्छंति तेषामविपश्चितःवि
वाचेनमानस्येवतीनात्सत्नाः अतएववेदवादरताःवेदेयोक्ते
निवाराः येश्रुतयेवैवानमोक्षपर्यवसानाःसकृते अवनीतिपव
वदनशीलाः तेषेषरलोकेवादेतानवेनयवर्गैरेवनास्तीति मिथ्याभि
प्रायेणतेनस्थाः देवार्थंप्रतनटवनानायतेतिवादिनः तथा

कोऽप्येतयानास्त्यन्यत्ज्ञानकांडं सर्वस्यापि वेदस्य कार्यपरत्वात्
कर्मफलापेक्षयानास्त्यन्यदीश्वरतत्त्वंज्ञानमयात्मीति वदनशीलाः
अतएवतेषां ... ...मोक्षोलठेवि
णालेयतः कामात्मानः काम्यमानविषयशताकुलचित्तत्वेन कामम
याः एवं सति मोक्षमपिकृतो न कामयंते यतः स्वर्गपराः स्वर्गएव
वैश्यपुपेनत्वेनपरउत्कृष्टोयेषांतेनतु स्वर्गातिरिक्तः पुरुषार्थोना
स्तीत्यवभाषंतीविवेकवैराग्याभावात् मोक्षकथामपिसोढुमक्ष
माइतियावत् ४३ ॥

महानंदीटीका

ग्रावत्तारिंशोऽत्कोर्थ

ज्ञानेननन्वफलेवानश्चेतःकर्मपरत्वतः अनिवेधात्ररत्येवेविक
हार्थकभाषिणः ४ विषयाकुलचित्तत्वात्सदाकाममयाः प्रा
ताः स्वर्गएवपरोयेषांपुरुषार्थस्तथाततः ... ...
... ...कथामपि नहमेनेनतेषांभोगादौलग्नचे
तसो ११॥४३ ॥

नीलकंठीटीका

तथाभोगस्यैश्वर्यस्य च तयोर्गतिःप्राप्तिस्तांप्रतितदर्थमित्यर्थः
कामात्मानःकामपरस्तचित्ताः अतएवस्वर्गपराःकीदृशींभोगै
श्वर्यगतिं जन्मकर्मफलप्रदांप्राप्यभोगैश्वर्येहिपुरुषस्यतृष्णा
नावाप्तितःपुनर्भोगैश्वर्यप्राप्तयेजन्मलभते तदर्थंकर्माणिच
कुरुतेफलंचततोभोगादिकंप्राप्नोतीतिचक्रमनिशमावर्तते
तेननिष्ठानस्युर्तोभवतीत्यर्थः किंचक्रियाविशेषेणबहुलांय
थायथावित्तव्ययायासाद्याधिक्यंतथातथाभोगैश्वर्यप्राप्तेराधि
क्यमित्यर्थः एतेनात्मनतापासमास्थेष्वपिकर्मस्तफललोभात्स
प्रवृत्तिरुक्ता भाष्येभोगैश्वर्यगतिंप्रतिसाधनभूताःयेक्रियाविशे
षाअग्निहोत्रादयः तद्बहुलांजन्मरूपंयत्कर्मफलंतत्प्रदांवा
चमेवेतिव्याख्यातं ४३ ॥

ज्ञानेदी टीका

केवलेन कर्मणा स्वर्गशब्दवाच्यं निरतिशयं सुखमेव प्राप्यं
ततो ज्ञानप्राप्यमपवर्गाख्यं फलं नास्तीति विवादशीलास्त
त एव कामात्मानः अशनपानैश्वर्यकामाः तस्मिन्नात्मा मनो येषां
अत एव जन्मना देवलोकादावुत्पत्त्या कर्मणां फलप्रदा तथा
क्रियाणां काम्ययज्ञविधीनां विशेषभेदैः बहुला नानाविधा
भोगैश्वर्याणां विषयाणामास्वादे ऐश्वर्ये सामर्थ्ये तस्य गतिं प्र
तिदेवादिजन्मना विषयास्वादसामर्थ्यं स्वर्गपर एव परमुत्क
र्षाभिलषणीयो येषाम् ४३ ॥

+ अत एवाविपश्चित्त्वप्रतिपादकानि तेषां विशेषणा रामकंटी टीका ण्याह +

+ तथा च कामात्मनः कामाः प्रियाः शब्दादयः स्वर्गस्वभूतत्वादा
त्मा येषामत एव कामात्मत्वात्स्वर्गपराः उत्तमभोगाधिकरणं
स्वर्गः प्राप्यत्वेन परः प्रकृष्टो येषां ते तथाविधाः तथा जन्मक
र्मफलप्रदाः भोगप्रत्ययवशं प्राप्य जन्म क्वचिदपि योन्यन्त
रे संभवति यस्मिन्सति धर्माधर्मात्मके कर्मणि तस्मिन्सति तत्
त्वादिलक्षणं फलमित्येतान्याहमिच्छवः अत एव भोगैश्वर्य
योरिष्टविषयाधिपत्ययोर्गतीर्विविधमार्गान्फलभूतान्प्रति त
त्साधनभूताः क्रियाविशेषाः नानाविधयज्ञदानतपःप्रभृत
यः कर्मभेदाः बहुलाः प्रचुरा येषां न केवलं नित्यनैमित्तिक
क्रियामात्रसक्ताः यावत्काम्यानपि क्रियाविशेषान्विस्तार
यन्तः इत्येवंविधाः प्रवक्तारो यां वाचं वदन्ति ४३ ॥

लासिकी [illegible] टीका

कामा विषयास्तत्र आत्मवत्परप्रेमास्पदत्वादात्मा येषां ते अत एव
स्वर्गपराः स्वर्ग एव परः पुरुषार्थो येषां ते अप्सिताभविष्यत्स्वर्ग
फलेन त्वां मां वदन्ति कीदृशीं तां जन्मकर्मफलप्रदां जन्म यो
न्यन्तरे संचारः कर्मधर्माधर्मात्मकं फलं सुखदुःखे ताः प्रददा नि
तीति तथाविधाम् ४३ ॥

पंदोलीटीका

ते च कामात्मानः कामपराः स्वर्गपरः पुरुषार्थो येषां ते स्वर्गपराः

गी॰ किंलक्षणां वाचं जन्मकर्मफलप्रदां जन्मैव कर्मफलं प्रददाति
टी॰ इति जन्मकर्मफलप्रदां स्वर्गपशुपुत्रादिलक्षणार्थोपाया वाचा
हि॰ बाहुल्येन प्रकाशिता येषां ते भोगैश्वर्यप्राप्तिं प्रति साधनभूताः ते क्रि
याविशेषबहुलां तां वाचं प्रवदंति मूढाः संसारे प्रवर्तंत इत्यभि
प्रायः ४३

रमावीरसमिद्धोधिनी

तन्मोक्षमेव प्रकटयति कामात्मान इति ऐहिकमेव विष
यसुखं श्रेय इति तत्स्वरूपाः स्वर्गपराः स्वर्गः परो हि येषां भ
र्गस्यायासमसाध्यत्वात् अत एव जन्मनो हेतुकर्मणः क्रिया
मात्रस्य फलं विषयसुखं प्रकर्षेण ददातीति क्रियाविशे
षा ऐहिकविषयव्यवहाराः सन्ते बहुला यस्यां तामित्यर्थः ४३

मधुभाष्य

४३॥

ननुज्ञात्वैवकर्मकुर्वतोशास्त्रज्ञानोकथमीदृशीबुद्धिरत
उक्तंकामात्मानइति काम्यमानमात्रासक्तान्तःकरणाःशास्त्र
ज्ञानादपिनार्थवादादिविवेकंसहन्तइत्यर्थः तथाचतादृशीयं
बुद्धिर्हिवाकोचनरत्तरेदेवपुण्यस्यपापस्यनिदानभूते उच्चारण
देवनरकयोश्चनीदृशानामाचरणमितितथार्थवादाः ननुकाम्यमानेमो
तफलमपिफलत्वनीत्यतआह स्वर्गपराइति स्वर्गःपरउत्कृष्टोये
षांतथाभूताविवेकविरक्त्याभावात्रमोक्षकथामपिसहन्तइति
भावः ननुतर्हिस्वर्गस्यात्तयफलत्वादस्तुसएवकिमन्तःजात
वाचेविशिनष्टि जन्मेति जन्मनैवयत्कर्मफलेनतत्प्रदामिति न
पायात्तयत्वेनस्वर्गादिनोयतेःतेः वश्यभाविपुनर्जन्मेतिभावः
ननुतर्हिस्वर्गभोगकालस्यकोवधिरित्यतस्तामेवविशिनष्टि
क्रियाविशेषेति क्रियाविशेषाअग्निहोत्रदर्शपूर्णमासज्यो
तिष्टोमादयस्तैर्बहुलात्मकटनाहिस्तनेत्यर्थः एवंचफलस्य
कर्मनिष्ठत्वेरितितायेनफलकालावधिःसंकल्पइतिभावः ४२
भवत्वेतत्कृतेनतेषांसत्वशुद्धिस्वर्गादेश्चेवकिमितिनक
रोतीत्यतआह ॥

भाषाअनुवाद

अनपवकामात्मा कहे कर्म्म वृद्धीस्वर्गादि फल प्राप्तिरूप कामना हीहै परमपुरुषार्थ जिनकेमतमे ऐसेजोमूढहैं तेईजन्मकर्म्मतथा स्वर्गआदि फलदेनिवाली जो वेदवाक्य सवहै औरभोग ऐश्वर्य्य प्राप्तहोनेके अर्थसाधन भूत जोवेदोक्त कहे वेदविहित अनेक अनेक क्रियोंकी प्राप्तिका कहे वहुतायतहै जिनमेमूढजन ऐसे वचनवोलनेहै अर्थात् जन्महीहै कर्म्मकाफल तिसकेदोनेवाली वाक्योंको कहतेहै ४३ ॥

दोहा

जोअभिलाखीस्वर्गपर जन्मकर्म फलदेत क्रियाकर्मसो
वहुकरें भोगऐश्वर्यगतिदेत ४३॥

272

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसा
यात्मिका बुद्धिः समाधौ न विधीयते ४४ ॥

शांकरभाष्यं

तेषां च भोगेति भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यमैश्वर्यं चेति
भोगैश्वर्ययोरेव प्रवणवतां तदात्मभूतानां तया क्रियाविशेषब
हुलया वाचापहृतचेतसामाच्छादितविवेकप्रज्ञानां व्यव
सायात्मिका सांख्ये योगे वा या बुद्धिः समाधौ समाधीयतेऽस्मि
न् पुरुषोपभोगाय सर्वमिति समाधिरन्तःकरणं बुद्धिः तस्मि
न्समाधौ न विधीयते नास्थितिर्भवतीत्यर्थः ४४ ॥

आनंदगिरिकृतटी० ॥

ननु कर्मकांडनिष्ठानां कर्मानुष्ठायिनामपि बुद्धिशुद्धिद्वारेणा
न्तःकरणे साध्यसाधनभूतबुद्धिद्वयसमुदायसंभवात्ततो मो
क्षो भविष्यतीति नेत्याह तेषां चेति तदात्मभूतानां तयोरेव भोगै
श्वर्ययोरात्मकर्तव्यत्वेनारोपितयोरभिनिविष्टचेतसि तादात्म्य
ध्यासवतां बहिर्मुखाणामित्यर्थः तथापि शास्त्रानुसारिणा
विवेकप्रज्ञया व्यवसायात्मिका बुद्धिस्तेषामुदेष्यतीत्याशंक्या
ह तयेति ननु समाधिः संप्रज्ञातादिभेदेन द्विधोच्यते तत्र बुद्धिद्व
यविधिरप्रसक्तः सन् कथं निषिध्यते तत्राह समाधीयत (
इति ४४ ॥

स्वामिकृतटीका ॥

ततश्च भोगैश्वर्येति भोगैश्वर्ययोः प्रसक्तानामभिनिविष्टानां
तयापुष्पितया वाचापहृतमाकृष्टं चेतो येषां तेषां समाधिश्चि
त्तैकाग्र्यं परमेश्वरैकाग्र्याभिमुखत्वं तस्मिन्निश्चयात्मिका बु
द्धिर्न विधीयते कर्मकर्तरि प्रयोगः नोत्पद्यत इत्यर्थः ४४ ॥

पैशाचभाष्यं ॥

ततश्च भोगैश्वर्यप्रसक्तानां भोगैश्वर्ययोरेव प्रणयवतां तया वाचा
अपहृतचेतसां आच्छादितविवेकप्रज्ञानां व्यवसायात्मिका सांख्ये
योगे वा बुद्धिः समाधौ परमात्मावबोधहृदयमेव बुद्धिः परमपुरु
षार्थतया कर्तव्येत्येवं निश्चिता सा बुद्धिस्त्यागलक्षणत्वादयितुं
शक्यते तस्मादियं वाक् परमपुरुषार्थविरोधित्वात्त्याज्येत्यभिप्रा
यः ४४ ॥

रामानुजभाष्यटी॰

तेषां भोगैश्वर्यप्रसक्तानां तस्यामव्यानुरूपया भोगैश्वर्यविषय
यातया वाचापहृतात्मज्ञानानां यथोदितात्व्यवसायात्मिका बुद्धिः
समाधीयतेऽस्मिन्नात्मज्ञानमिति समाधिर्मनः तेषां मनस्यात्मनि
श्चयपूर्वकमोक्षसाधनभूतकर्मविषया बुद्धिः कदाचिदपि नो
त्पद्यत इत्यर्थः अतः काम्येषु कर्मसु मुमुक्षुणा न संगः कर्तव्यः
४४ ॥

अभिनवगुप्तकृतटी॰

स्पष्टोऽर्थः ४४ ॥

परमार्थप्रपाटीका

भोगैश्वर्यप्रसक्तानामिति भोगैश्वर्ययोः प्रसक्तानां तया पुष्पित
वद्वाण्या अपहृतं चेतो येषां तेषां पुरुषाणां तथैव वाण्या समा
धौ परमेश्वराराधने काम्येऽव्यवसायात्मिका बुद्धिर्न विधीयते नोत्प
द्यते तदुक्तं सोऽहं चिन्मात्रमेवेति चिंतनं ध्यानमुच्यते ध्यानस्या
विस्मृतिः सम्यक् समाधिरभिधीयत इति ४४ ॥

वनमाली टी॰

तया वेदवाचा अपहृतचेतसां आकृष्टमनसां भोगैश्वर्ययोः प्रस
क्तानां तेषां बुद्धिः व्यवसायात्मिका सती समाधौ एकाग्रतायां
न विधीयते ४४ ॥

उत्तमवैजयन्ती टी॰ ॥

अतोहेतोस्तेषांभोगैश्वर्यप्रसक्तानांभोगैश्वर्ययोःस्वर्गोन्तपा॰
नत्वस्वामित्वयोरेवप्रकर्षेणसक्तानिविष्टास्तेषांययेहकर्मचि
तोलोकःक्षीयतेएवमेवामुत्रपुण्यजितोलोकःक्षीयतेइत्यादिवा
क्यानवलोकनेनतयोर्निर्वेदाद्यभावत्वात्तेषांभगवत्याप्यभाव
इतिभावः अतएवतयावाचाअपहृतचेतसां अपहृतमाकृष्टं॰
चेतोयेषांतेषामव्यवसायिनांकामिनांव्यवसायिनांकामिनां
व्यवसायात्मिकाबुद्धिःसमाधौसम्यगाधीयतेआत्मस्वरूपंय
स्मिन्नितिसमाधिर्मनस्तस्मिन्मनसिनविधीयतेनोत्पद्यतेतेषां
निरतिशयप्रबलप्रचंडप्रज्वलितकामानिलमिश्रितमायसक
दाहसमानमानसेपीयूषवल्लीत्वल्पान्तैकोपायभूतात्मतत्व
निश्चयपूर्वकभगवत्परिचर्यात्मिकानिष्फलकामिकाबुद्धिर्न
प्ररोहतीत्यभिप्रायः ४४ ॥

मधुसूदनीटी॰ ॥

द्वाचत्वारिंशोऽङ्कार्थं ४४

सदानंदी टीका द्वाचत्वारिंशोऽङ्कार्थं ४४

274

भोगेति तयापुष्पितयावाचाऽपहृतचेतसांबुद्धिः समाधौसमाध्य पुंसां
नुष्ठानकालेव्यवसायात्मिकाव्यवसायोज्ञानंतदात्मिकाशुद्धचिन्मात्रा
कारानविधीयतेनभवति कर्मकर्तरिलकारः विरक्तस्यहिबुद्धिःसमा
धौचिन्मात्राकाराभवतिननभोगासक्तस्येतिस्पष्टमेव भाष्येतुसमा
धौअन्तःकरणेव्यवसायात्मिकाबुद्धिर्नभवतीतिव्याख्याते यद्वासमा
ध्यनुष्ठानार्थमेवनिश्चयात्मिकानैवाबुद्धिर्नभवतीतिव्याख्येयं ४४॥

ज्ञानेदी टीका

ईदृशाः अविपश्चितः विशेषेण पश्यन्तीति विपश्चः परमार्थद
र्शिनः तद्वदाचरन्तइतिणिचिक्विपिचविपशस्तेनैवेतयन्ती
तिवितस्तेविपश्चितइतिव्युत्पत्त्यनुगमात् परमार्थविशेषम
पश्यन्तःविचारहीनाः यामिमांप्रसिद्धांवाचं वेदात्मिकांप
रेमस्वरवाणींश्रुतिंतांपरमार्थफलानवेत्तयाहृष्टश्रुतमात्रे
णेवमनोहरैस्त्वन्नपानाद्यैः विषयैरेवपुष्पैर्विकसितांप्रवदंति
स्वर्गादियज्ञफलतात्पर्येवश्रुतिरितिप्रलपन्तितयावाचाऽ
पहृतचेतसांविचारहीनानाम् अतएवहि भोगैश्वर्यप्रसक्ताः
नांनिश्चयात्मिकाबुद्धिःसमाधौनविधीयते उक्तवत्पमाणप्र
कारज्ञानकर्मसमुच्चयान्मुक्तिरित्यस्मिन्समाधानेविषयेस्थि
तिंनकरोतिविधीयतेइतिकर्मकर्तरियक् ४४ ॥

रामकंदी टीका

तयावर्जितचित्तानांभोगासक्तानांबुद्धिःसमाधौनविधीयतेइति
संबन्धः इदमत्रतात्पर्यम् येस्वयमेवप्रबोधशून्यास्त्वाङ्गागमात्र
तमेवा परालेन्यस्तयाविधेरेवार्थप्रशंसद्भिःपरिपाद्यमाणेनाहंक
कल्पाः परमार्थप्राप्तिव्यवसायाद्दूरमपकृष्यन्तइति तथावि
धानांबुद्धिःकथंसमाधौविधीयतामर्हति [illegible]
[illegible] ४ ४

लासिकी [illegible] टीका

भोगैश्वर्येचप्रकर्षेणनिश्चिततयासहत्वन्तरपरिहारेणसक्तानां १ समाधौकर्मण्यपिमध्ये
अपहृतचेतसां+
तया लीनचित्तानां वेदवाचाआवर्जितमनसामविपश्चितां अन्यगा व्यवसायात्मिकाबुद्धिः+
त्मसमाधानविषया [illegible] समकाशेनेतदृढस्थप्र नविधीयतेननियुज्यते मयानत्+
त्वं ह्यातम् ४४ ॥

पंचोलीटीका

तेषांचभोगैश्वर्ययोःप्रीतिंप्रतितयावाचाच्छादितविवेकबुद्धीनां
मांश्रेयोगेवाबुद्धिर्व्यवसायात्मिकासमाधौचित्तेनविधीयतेनजा
यतेकर्मकर्तृप्रयोगःनोत्पद्यतइत्यर्थः ४४

976

रतवीरमसिद्धोधिनी॥

तयाविषयदुष्ट्याविगलितचित्तानांव्यवसायात्मिकाः उद्योग
लक्षणा मतिः समाधौ सम्यगासमंताद्धीयतेऽभीक्रियते
स्त्रादिव्यवस्थायचेति समाधिस्ताहेनधनुर्वेदविद्याचोच्यते
नचनविधीयते नोत्पद्यते कर्मकर्तरिप्रयोगः ४४॥

मधुभाष्य॥

४४॥

भोगैश्वर्यप्रसक्तानामिति भोगोरंभातिलोत्तमालिंगनादिजः ऐश्वर्यं
देवादिस्वाम्यं तत्र प्रकर्षेण सक्तानां करणाइत्यर्थः अयंभावः यद्यप्य
नेक फलकं कर्म तथापि यस्मिन्प्रयोगे यदर्थं तथा संकल्पः क्रियते त
देव फलं ददाति नहि सर्वेभ्यो ज्योतिष्टोम इति विनियोगे पृथक्त्वं न
न हि सर्वफलसाधनत्वात्प्रयोगसिद्धितोप्रसक्तार्पण बुध्या कामिभिःक ध्यैः
र्मणामकृततात्पर्यसत्वशुद्धिद्वाराव्यवसायात्मिका बुद्धिर्नैजायते इति न४४
ततु मा स्ततेषांव्यवसायात्मिकाबुद्धिः ममपुनस्तादृग्बुध्यर्थं कर्मकु द्
र्वतः कर्मस्वाभाव्याद्देवस्वर्गादिप्राप्तिर्भविष्यतीत्याशंक्याह ४५ ॥

277

भाष्यानुवाद

भोग औ ऐश्वर्य्यमे आसक्त तथा ऊपर लिखी विष लताके तु ल्य सुन्दर वेदवाक्यमे आकृष्टकेहे हरि गयाहे चित्त जिनका उनकी समाधि अर्थात् चित्तकी एकाग्रता रुप परमेश्वरमे जो एक निष्टा तिसमे निश्चयात्मिका बुद्धि होती नही इससे कर्मरु पजोबुद्धि उसमे कर्तृत्व रुप अहंकार अर्थात् हमकर्ताहे इस वासनाकेमारे उनविचारोंकी ऐसी एकनिष्टा निश्चयात्मिका बुद्धि आपसे उत्पन्नकैसेहोयएहकहा ४५ ॥

दोहा

भोगऐश्वर्य लंपटसदा तेहिं बुद्धि हरेचित तिनकिमतिव्य वसायनी होत समाधिन स्थित ४४ ॥

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जु
न निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्म
वान ४५ ॥

शांकरभाष्यं

येएवंविवेकबुद्धिरहिताः तेषांकामात्मनांयत्फलंतदाह
त्रैगुण्येति त्रैगुण्यविषयाःत्रैगुण्यं संसारो विषयः प्रका
शयितव्यो येषांतेवेदास्त्रैगुण्यविषयास्त्वंतु निस्त्रैगुण्योभ
वार्जुन निष्कामोभवेत्यर्थः निर्द्वन्द्वःसुखदुःखहेतू सप्रतिप
क्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ ततोनिर्गतोनिर्द्वंद्वोभवत्वंनित्य
सत्वस्थः सत्वगुणाश्रितो भवतथा निर्योगक्षेमोनुपात्तस्योपादा
नं योगउपात्तस्य रक्षणंक्षेमः योगक्षेमप्रधानस्य श्रेयसिप्रवृत्ति
र्दुष्करा इत्यतो निर्योगक्षेमोभवात्मवानप्रमत्तश्चभव एषतवोप
देशः स्वधर्ममनुतिष्ठतः ४५ ॥

आनंदगिरिकृतटीका

अविवेकिनामपि वेदाभ्यासवतो विवेकबुद्धिरुदेष्यतीत्याशंक्याह
येएवमिति तर्हिवेदार्थतयाकामात्मता प्रशस्तेत्याशंक्याह निस्त्रै
गुण्यइति भवेतिपदंनिर्द्वन्द्वादिविशेषणेष्वपि प्रत्येकंसंबध्यते
त्रयाणां सत्वादीनांगुणानां पुण्यपापव्यामिश्रकर्मतत्फलसंबं
धलक्षणः समाहारस्त्रैगुण्यमित्यंगीकृत्य व्याचष्टेसंसारइति वेदश
ब्देनात्र कर्मकांडमेव गृह्यते तदभ्यासवतो तदर्थानुष्ठानद्वारा
संसारध्रौव्यान्न विवेकावसरोस्तीत्यर्थः तर्हिसंसारपरिवर्जनार्थंविवे
कसिद्धये किंकर्तव्यमित्याशंक्याहत्वंत्विति कथंनिस्त्रैगुण्योभवेति
गुणत्रयस्यराहित्यंविधीयते नित्यसत्वस्थोभवेति वाक्यशेषवि
रोधादित्याशंक्याह निष्कामइति सप्रतिपक्षत्वं परस्परविरोधि
त्वं पदार्थौशीतोष्णादिलक्षणौ निष्कामत्वे द्वंद्वान्निर्गतत्वं शी
तोष्णादिसहिष्णुत्वे हेतुमुक्त्वानत्रापि हेत्वपेक्षायां सदासत्वगुण

श्रितत्वे हेतुमाह नित्येति योगक्षेमव्यापृतत्वेन सो रजस्तमोभ्याम
गी॰ भिभूते सत्त्वमात्रे समाश्रितत्वमशक्यमित्याशंक्याह नयेति योग
टी॰ क्षेमयोर्जीवनहेतुतया पुरुषार्थसाधनत्वान्निर्योगक्षेमो भवेति कु
टि॰ तो विधिरित्याशंक्याह योगेति योगक्षेमप्रधानत्वं सर्वस्य स्वाभाविक
नम॑ मिति ततो निर्गमशक्यमित्याशंक्याह आत्मवानिति अप्रमा
दोमनसो विषयपारवश्यशून्यत्वे श्रयपयोक्तोपदेशस्य ह्यमत्त
विषयत्वादर्जुनस्य मनुष्यत्वमिह विवक्षितमिति नेत्याहपवरति ४५॥

स्वामिकृतटीका

ननु यदि स्वर्गादिकं परमं फलं न भवति तर्हि किमिति वेदैस्तत्साधनत
या कर्माणि विधीयन्ते तत्राह त्रैगुण्येति त्रिगुणात्मकाः सकामा ये अधि
कारिणस्तद्विषयास्ते कर्मफलसंबंधप्रतिपादका वेदाः त्वं तु निस्त्रैगु
ण्यो निष्कामो भव तत्रोपायमाह निर्द्वंद्वः सुखदुःखशीतोष्णादियुग
लानि द्वंद्वानि तद्रहितो भव तानि सहस्वेत्यर्थः कथमित्यत आह नित्य
सत्त्वस्थः सन् धैर्यमवलंब्येत्यर्थः तथा निर्योगक्षेमः अप्राप्तस्वीका
रो योगः प्राप्तपरिपालनं क्षेमः तद्रहितः आत्मवान् [illegible] अप्रमत्तः न त॑
हि द्वंद्वाकुलस्य योगक्षेमव्यापृतचित्तस्य प्रमादिनस्त्रैगुण्यातिक्रमः सं
भवतीति ४५ ॥

पिशाचभाष्य

केनोपायेन सा वाक्त्याज्येत्यत आह त्रैगुण्येति त्रैगुण्यं गुणत्रयं त्रैगुण्यं स
त्त्वरजस्तमांसि तत्कार्यत्वाद्रागद्वेषौ त्रैगुण्यं तौ विषयौ येषां ते वेदा
स्त्रैगुण्यविषया निस्त्रैगुण्यविषयो निस्त्रैगुण्यो भव उपायैः॑ लिनराग प्रव॑
द्वेषो भवेत्यर्थः निर्गत शीतोष्णादिः नित्यसत्त्वस्थः सदा सत्त्वगुणप्र
धानस्तथा निर्योगक्षेमो अनुपात्तस्योपादानं योग उपात्तस्य रक्षणं क्षेमः
योगक्षेमप्रसक्तस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव एव
तव तस्या वाचस्त्यागोपदेशः ४५ ॥

रामानुजभाष्य

एवमत्यंताल्पफलानि पुनर्जन्मप्रसवानि कर्माणि मातापितृसहस्रे

भ्योपिवत्सलतरतयात्मोपजीवनेप्रवृत्तावेदाः किमर्थंवदंतीतिकथं
वावेदादितोनित्यत्याज्यतयोच्यतेइत्यत्राह त्रयोगुणास्त्रैगुण्यंसत्व
रजस्तमांसिसत्वरजस्तमःप्रचुराः पुरुषास्त्रैगुण्यशब्देनोच्यंतेत
द्विषयावेदाः तमःप्रचुराणांरजःप्रचुराणांसत्वप्रचुराणांचय
त्फलंतदेवहितमवबोधयंतिवेदाः यत्तेषांस्वगुणानुगुण्येन
स्वर्गादिसाधनमेवहितंनाबबोधयंतितदेवंतेरजस्तमःप्रचुर
यासात्विकफलमोक्षाविशुद्धाः स्वापेक्षितफलमजानंतः का
मशावर्णेपिविवशाअनुपायेऽपायभ्रांत्याप्रणष्टाभवेयुः अतस्त्रै
गुण्यविषयावेदास्त्वंतुनिस्त्रैगुण्योभवइदानींसत्वप्रचुरस्त्वंतदे
ववर्द्धयत अन्योन्यसंकीर्णगुणत्रयप्रचुरोभवन तस्माच्छुद्धंवर्द्ध
येत्यर्थः निर्द्वंद्वः निर्गतसकलसांसारिकस्वभावः नित्यसत्व
स्थः गुणद्वयरहितनित्यप्रवृद्धसत्वस्थोभवकथमितिचेत् नि
र्योगक्षेमः आत्मस्वरूपतत्प्राप्त्युपायबहिर्भूतानामर्थानांयो
गंप्राप्तानांचक्षेमंपरित्यज्यात्मवान्भवआत्मस्वरूपान्वेषणपरो
भव एवंवर्तमानस्यरजस्तमःप्रचुरत्वंनश्यतिसत्वंचवर्द्धते ४५

अभिनवगुप्तकृतटी॰ ॥

अतएवच वेदास्त्रैगुण्येनकरणेनविशेषणमित्यंतंनिबध्नंति न
तुबंधकाः यस्मात्सुखदुःखमोहबुद्ध्याकर्माणिवैदिकानिक्रि
यमाणानिबंधकानि अतस्त्रैगुण्यंकामरूपत्वात्त्यज यदितुवेद
दूषणपरमेतदभविष्यत्प्रकृतेऽनुद्ध्करणंव्याचष्टेन वेदाद
न्यस्यस्वधर्मनिश्चायकत्वभावात् येषांतुफलाभिलाषोविग
लितस्तेषांनवेदाबंधकाः ४५ ॥

परमार्थप्रपाटी॰

ननुयदिस्वर्गादिकंफलंतस्मान्नहिवेदेतत्साधनभूतानिकर्मा
णिकथंविधीयंतइत्याशंक्यतद्विधायकश्रुतिवाक्यानामन्यपरा
त्पर्यमस्तीत्याह त्रैगुण्येति अथकेवलंवेदानांत्रैगुण्यविषयत्वे
सिद्धेप्रस्तुतेभगवदुपदिश्यमानस्यनिस्त्रैगुण्यस्यवेदान्तलक्षे
नोपदेशानर्हत्वात् तस्मात्क्वापिप्रमाणेन तथावेदेष्वमतैर्वहमेव

गी॰ वेद्योऽस्त्यतो भगवतैव प्रतिपादनादतोऽन्यथा व्याख्यायते यथाऽ
टी॰ धिकारं सत्वादित्रिगुणसंबंधि यत्फलं तत्त्रैगुण्यं तदेव विषयो
द्वि॰ निरूपणीयत्वेन प्रामाण्ये येषु तथाविधा वेदाः संति त्वं तु सात्विक
फले नित्यसत्वस्थः सन्निस्त्रैगुण्यो भव नित्वं शुद्धं चतस्थश्च तत्रस्थ
स्तन्निष्ठः सन् तेन तत्वज्ञानोत्पत्तौ गुणत्रयातीतो भव अथवा सामा
न्यतः सत्वस्वरूपं तु उपासनायां पदं वंचकत्वं वा कार्यं वितनुत
देवसत्वमित्युक्तासु देवोपासनायां शवलब्रह्मत्वभेदेनाद्वितीयास
त्वं निरूपकमास्ति तेष्वेकं स्वर्गस्थत्वज्ञापकमन्यत्तत्वज्ञानं प्रतेद्वं भ
गवतापि प्रनिरूपयिष्यते तत्र सत्वं निर्मलत्वात्प्रकाशकमनाम
यं सुखसंगेन बध्नाति ज्ञानसंगेन चानघेति श्रुतिरपि तैत्तिरीयो
पनिषत्सु वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शु
द्धसत्वाः ते ब्रह्मलोकेषु परांतकाले परामृतात्परिमुच्यंति सर्वे
इति ब्रह्मैव लोकः ब्रह्मलोकः श्रोत्रियेषु तथा च शुद्धसत्वेन सत्व
मत्त्वाभिभूय तथा तत्वज्ञानोत्पत्त्युपायफलं न्यायेन सत्वापरमपि त
तो निस्त्रैगुण्यत्वमेव पर्यवसन्नमित्यर्थः यद्वा त्रैगुण्यमेव विषयं
त्रैगुण्यविषयं तद्यापयंतीति विरक्तवंतीति त्रैगुण्यविषयाः एवंवि
धाये वेदाः प्रथमे निरूपितमपि त्रिगुणसंबंधिस्वर्गादिफलं त्रैगु
ण्यं तद्विषययातके जन्ममरणाय संसारस्थायित्वेन बंधहेतुत्वात्
प्रनरूपनिषद्विभागो त्वयापवेतिरूषयंतितेन तथा श्रुतिरपि शा
तपथी पुत्रैषणायाश्च लोकैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भि
क्षाचर्यं चरंतीति नन्वेवं श्रुत्यापि कथं तेषां विधानमिति चेत्त्रैगु
ण्यनिरूपिकान्यायेन कर्मस्वरूपतोऽप्रलोभनपरत्वात् अयमर्थः शा
रीरोपतप्त्यन्यथैरतिक्लेशसाध्येषु कर्मसु स्वरूपतः प्रवृत्तिर्न भ
वति अतो रोचनार्था फलश्रुतिरिति यथा रोगार्तः शिशुर्बाल
कटुभेषजं न गृह्णाति तत्र शर्करामिति मात्रोपलोभि
तः शर्करामात्रं लब्धुमिच्छया गृह्णाति मा तत्स्नात्मयं मात्रोपनदद
प्रतस्त्वं निस्त्रैगुण्यो भव त्रैगुण्यतिरस्कारके वेदार्थे भज अथवाति
रेकप्रत्यवेन त्रैगुण्यस्य विषयरूपत्वमाह निर्द्वंद्व इत्यादि द्वंद्वानि॰

शीतोष्णादीनि तदसहिष्णुत्वं तथाऽप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य
संरक्षणं क्षेमः तथा सावधानत्वं एतानि द्वंद्वः खेदत्वं निस्त्रैगुण्यवि
षये संभवंतीति विषयरूपत्वं निस्त्रैगुण्येन तदभाव इति नित्यस
त्वस्थो धैर्यवान् आत्मवान् सावधानः ४५ ॥

वनमाली टी॰

प्रतिज्ञातां योगबुद्धिमाह यावत्समाप्तेः नतु परमाप्नोति कारण
कोवेदः स्वभावादेव विषयभोगजलंपटं जीवं सकामेत्यंतदुःखप्र
चुरसंसृतिदेहकर्मणि कथं प्रवर्तयति कथं वा वैदिको वेदोक्तंक
र्म परित्यजेदित्यत आह त्रैगुण्येति त्रयोगुणाः सत्वादयः तेषां सं
बंधि स्वर्गादि तदेव विषयप्रायाततः प्रतिपाद्यं फलं येषां ते त्रैगुण्य
विषया वेदाः सत्वादिकार्थ स्वर्गादिप्रतिपादकाः त्वंतु निस्त्रैगुण्य
त्रैगुण्यविषयात्स्वर्गादेर्निर्गतो भव मुख्यतात्पर्येण स्वर्गादिपर
त्वं वेदस्य माविज्ञीत्यर्थः सर्वे वेदा यत्पदमामनंतीति श्रुतेः वेदैश्च
सर्वैरहमेव वेद्य इतीहापि वक्ष्यमाणत्वेन मुख्यवेदार्थं हि त्रिगुणर
हितो मोक्ष एव तत्परो भव वेदा बहिर्मुखानां फलश्रुत्या कर्मणि
विश्वासाय पश्चादनित्यत्वादिबोधनेन तांस्त्याजयित्वा पूर्णसच्चिदा
नंदघनश्रीहरिप्रीतिसाधननिष्कामकर्मप्रतिपादनद्वारा मोक्षं
प्रापयति यतो तत्वमप्याप्तार्थत्यक्ता मुख्यार्थपरो भव यथा॰
बालानां तिक्तवारणयौषधं पापयितुं गुडादिकं प्रदर्शयति विश्वा
साय ददाति च नतु गुडभक्षणे तात्पर्यं तथा बहिर्मुखान्स्वधर्मे नि
ष्कामकर्मणि प्रवर्तयितुमनूद्य ततो मोक्षमार्गे प्रवर्तयितुं क
र्मणाह वेदस्य तात्पर्यं तु मोक्षे तत्र नित्यसत्वस्थः नित्यविशुद्धस
त्वे श्रीहरौ स्थितो भव मनसा तन्निष्ठो भवेत्यर्थः अप्राप्तलाभो यो
गः प्राप्तरक्षणं क्षेमः ताभ्यां रहितः इति निर्वाहार्थं चिंतास्यत्वं
माकार्षीरित्यर्थः आत्मवान् स्वामी परमात्मा यस्यास्तीति ज्ञानं॰
वान् ४५ ॥

कुसुमवैजयन्ती टी॰

नन्वेवंचेत्सकललोकहिताय प्रवृत्ता वेदा निष्कामान्प्येवकर्म
णि कथं न वदंति कथंवा स्वभावतो विषयप्रवणान् जीवान् अ
नेक स्वर्गादिफलबहुलानि काम्यकर्माणि प्रदर्शयित्वा तान
नेकदुःखरूपे संसारे पातयंति यतस्ते ऽहिता इव वदन्त
तस्तेषां वैषम्यनैर्घृण्याद्यो ऽनेकदोषा भवे
त्येवमाशंक्याह यथाधिकारमेवोप
दिशंति न तु सर्वान्प्रति सर्वकर्माणि
वेदा इत्याह त्रैगुण्यविषया इति त्र
याणां गुणानां सत्व ॥

रजस्तमस्सामान्यावस्थायां ये श्रुतेस्तकामाः पुरुषास्ते गुणत्रयात्मकेनकृत्यं नेनयवदि
षयाये वालैत्रैगुण्यविषया वेदाः सर्वति सात्त्विका रुद्रादीन् राजसा यक्षरा
क्षसादीन् तामसा भूतप्रेतपिशाचादीन् तन्त्रान्यतो रुद्रादीन् यजेयु रि
त्येवं सात्त्विकराजसतामसा पुरुषान् उद्दिश्य तत्तदधिकारानुसारेणैव तन्त्र
प्रवृत्तं कर्तव्योपदिशन्ति न तु सर्वान् प्रति सर्वं कर्म यत्तत्र सात्त्विका देवान्
यक्षरक्षांसि राजसा भूतप्रेतपिशाचादीन् यजन्ते तामसा जना इत्यादिना
सात्त्विकादिश्रद्धावतो देवादियजनप्रकारं वक्ष्यति स्वयमेव यतो वेदा यस्य
यस्य पुरुषस्य यस्मिन् यस्मिन् कर्मण्यधिकारस्तेन पुरुषेण तत्तदेव कर्मो
पदिश्यते तो वेदानां वैषम्यादिदोषो न भवतीति भावः ननु यद्येवं तर्हि गु
णत्रयाणां मध्ये कस्मिन् गुणे ममाधिकार इत्यपेक्षायामाह निस्त्रैगुण्य
इति हे अर्जुन त्वं तु निस्त्रैगुण्यो भव त्रैगुण्याणां रजस्तमस्संकीर्णरूपाणां गु
णानां भावस्त्रैगुण्यं निर्गतं त्रैगुण्यं यस्मात् स तथा त्वं भव राजसतामस
संकीर्णपुरुषविषयकानि वाक्यानि परित्यज्य केवलानि सात्त्विकवा
क्यान्येव गृहाणेत्यर्थः ननु निस्त्रैगुण्यस्येति पदस्य तु सत्त्वादिगुणत्र
याभावरूपत्वार्थो लोके प्रसिद्धस्तान्न रजस्तमस्संकीर्णरूपगुणत्रया
भावरूपोऽर्थस्तत्र या कस्माल्लभ्यते यच्च केवलसत्त्वगुणस्यैव ग्रहण
मपि कस्मात् क्रियते इति शंकानिवारणाय विशेषणमाह निर्द्वन्द्व इति
निर्गते द्वन्द्वे उभे राजसतामसपुरुषविषयके वाक्ये यस्मात् स तथा तदा त्व
तो विषयसंभावो भवेत् इत्यर्थः इतरेतरसंकीर्णवाक्यमपि निरस्तं पदि स्वय
राजसतामसे न स्तस्तर्हि संकीर्णस्य का वार्तेत्यर्थः ननु सत्त्वे स्थितस्यैव मम
किं फलं भविष्यतीत्यपेक्षायामाह नित्यसत्त्वस्थ इति यदि त्वं नित्यमेवेष्टा
निष्टफलप्रदेषु सर्वेषु कालेष्वपीन्द्रियविषयसंसर्गनिमित्तकामक्रोधादीन्
विहाय सत्त्वे सत्त्वगुणे स्थितो भविष्यसि तर्हि आत्मवानपि भविष्यसि आत्मा
नेत्रत्तत्तस्य स्वरूपगुणादिविचारवानपि भविष्यसि यद्वा आत्मा मनस्त
द्धितेय स्य सत्त्वं विषयकामादित्यागेन वशीभूतमना भविष्यसि ननु
नित्यप्रबलैरिन्द्रियावर्जनीयविषयविह्वलितचित्तस्य मम कथमात्मस्वरूपा
दे विचारः कथं वा मनसः स्वाधीनता भवेदिति चेत्तत्राह निर्योगक्षेम इ
ति अप्राप्तानामात्मस्वरूपादिप्राप्त्युपायविरोधिनाशहादिविषयाणां
स्वीकारो योगस्तेषां प्राप्तानां पालनं च क्षेमः निर्गतौ योगक्षेमौ यस्मात् स

गी॰ थाभूतस्य मम व्यवस्थैर्यलभ्याः एवं तेऽर्थीममेवं संनिपतेषांपालकस्या
टी॰ हमेव नान्यः स्मेवममाभिनिवेशेन भ्रमस्य स्य सिवेन ऽस्य व निर्विषयकाम
हि॰ मनात्मत्वात्मस्वरूपादिविचारयोग्यो भविष्यसि नामधेयमभिप्रायः ४५॥

मधुसूदनीटीका

ननु सकामानां माभूदाशयदोषाद्व्यवसायात्मिका बुद्धिः निःकामानां
तु व्यवसायात्मिकया [illegible] बुद्ध्या कर्म कुर्वतां कर्मभाव्यस्वर्गादि
फलप्राप्तौ ज्ञानप्रतिबंधः समान इत्याशंक्याह त्रैगुण्येति त्रैगुण्यं ना क
मैत्रैगुण्यं काममूलः संसारस्य एव प्रकाश्यत्वेन विषयो येषां ते तादृशाः
कर्मकांडात्मकाः यो यत्फलकामस्तस्यैव तत्फलं वार्पयंतीत्यर्थः नहि
दिति सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति नियोगेपि सकृदनुष्ठानात् सर्वफ
लप्राप्तिर्भवति तत्तत्कामनाविरहात् यत्फलकामनयानुतिष्ठति तदे
व फलं तत्प्रयोग इति स्थितं योगसिद्ध्यधिकरणे यस्मादेवं कामनावि
रहे फलविरहः तस्मात्त्वं निस्त्रैगुण्यो निष्कामो भवेत्यर्जुन एतेन क
र्मस्वाभाव्यात्संसारो निरस्तः ननु शीतोष्णादिद्वंद्वप्रतीकाराय वस्त्राद्य
पेक्षणात्कुतो निष्कामत्वमत आह निर्द्वंद्वः सर्वत्र भवेति तं व ध्यते
मात्रास्पर्शास्त्वित्युक्तन्यायेन शीतोष्णादिद्वंद्वसहिष्णुर्भवात्मनः ऽयं द्वं
द्वं कथं वा सोढुं शक्यमित्यपेक्षायामाह नित्यसत्वस्थः नित्यमचंचलं
यत्सत्वं धैर्यापरपर्यायं तस्मिंस्तिष्ठतीति तथा रजस्तमोभ्यामभिभूत
सत्वो हि शीतोष्णादिपीडया मरिष्यामीति मन्वानो धर्माद्विमुखो भवति त्वा
ज त्वं तु रजस्तमसी अभिभूय सत्वमात्रावलंबनो भव ननु शीतोष्णादिस
हनेपि क्षुत्पिपासादिप्रतीकारार्थं किंचिदनुपात्तमुपात्तं च रक्षणीय मुपादेय
मिति तदर्थं यत्ने क्रियमाणे कुतः सत्वस्थत्वमित्यत आह निर्योगक्षे
मः अलब्धलाभो योगः लब्धपरिरक्षणं क्षेमः तद्रहितो भव चित्तविक्षेप तो
कारिपरिग्रहरहितो भवेत्यर्थः न चैवं चिंता कर्तव्या कथमेवं सति जी
विष्यामीति यतः सर्वांतर्यामी परमेश्वर एव योगक्षेमादि निर्वाहयि नव
ष्यतीत्याहात्मवान् आत्मा परमात्मा ध्येयत्वेन योगक्षेमादिनिर्वाह
कत्वेन च वर्तते यस्य स आत्मवान् सर्वकामनापरित्यागेन परमेश्वराराध मा
मात्र यतो मम स एव देहयात्रामपि संपादयिष्यतीति निश्चित्य निश्चिंतो
भवेत्यर्थः आत्मवानप्रमत्तो भवेति वा ४५ ॥

९९२

सदानंदीटीका

ननु माभूत्सकामानां व्यवसायात्मिका मतिः निष्कामानां तया बुद्ध्या
नित्यकर्मादि कुर्वतां १ स्वर्गादौ कर्मसामर्थ्यात्तु निर्वृत्यः समो भवेत् तेषा
मप्यात्मविज्ञाने इत्याशंक्याह सर्वभूः २ गुणानां कर्मसंसारस्त्रयाणां का
ममूलकः सम्प्रकाश्यतया येषां विषयस्तादृशास्त्रयः ३ कर्मकांडात्म
का वेदास्तत्तत्कामानुसारतः बोधयंति फले कामाभावे निष्कामताप
नः ४ एवं वदात्ततयात्वं तु निष्कामो भव सर्वदा यतेन कर्मसामर्थ्यात्से
सारो लीनत्वयाकृतेः ५ ननु देहप्रतीकारसिद्धये पेत्यनेखिलं वस्त्राश
नादिवेतर्हि कथं निष्काम नेति चेत् ६ मात्रास्पर्शास्तुहेत्युक्तन्यायेनै
व विवेकतः भव द्वंद्वसहिष्णुस्त्वमालंब्यासंगमात्तिणा ७ सोढव्यं वा
कथं दुःखमसह्यमिति चेच्छृणु यत्नत्वमचलं धैर्यं तदालंब्य संभव दा ८
अलब्धलाभो योगः स्यात्तत्क्षेमो लब्धरक्षणं तद्युक्तो भव धीहृन्निर्वि
हेयकमलं त्यज ९ जीविकामिकथं नैव चिंता कार्या यतो हरिः सर्वा
तर्यामिरूपेण योगक्षेमकरस्तव १० आत्माध्येयतया यस्य परमेश्व
रस्तेतकः वर्तते पालकत्वेन सदा सत्वे भवात्मवान् ११ सदा कृत्स्नप
दार्थे विषयश्चेतः समाहिते स निर्द्वंद्वः समसत्त्वस्थो निःसंकल्पः स
दा सुखी १२ ॥ ४५ ॥

नीलकंठीटीका

कस्तर्हि समाधौ बुद्धिर्भवतीत्यत आह त्रैगुण्येति त्रैगुण्यं गुणत्रय
कार्यं ऊर्ध्वमध्याधो लोकरूपं संसरणं तदेव प्रकाश्यत्वेन विषयो
येषां ते तादृशाः कर्मकांडपरा वेदाः त्वं तु निस्त्रैगुण्यो भव ऊर्ध्वगता
वपि विरक्तो भवेत्यर्थः वस्तुतश्च ननु त्रिगुणप्रधानं गतित्रयं ऊर्ध्वग
च्छंति सत्वस्था इति दिव्येभ्योपि विषयेभ्यो विरक्तः समाधावधिक्रिय
तइतिभावः किलत्रगुणोसौ निस्त्रैगुण्य इत्यत आह निर्द्वंद्व इति स
खदुःखे मानापमानौ शत्रुमित्रे शीतोष्णे इत्यादीनि द्वंद्वानि सप्रतिप
क्षपदार्थरूपाणि तेभ्यो निर्गतो निर्द्वंद्वः सर्वत्र समबुद्धिरित्यर्थः त
नु बाध्यमानस्य क्षुधादिकं कथं शीतादिवत्सहनं शक्यमत आह नि
त्यसत्वस्थ इति नित्यं सर्वदा सत्वं धैर्यं सत्वगुणो वा तदाश्रितो भूत्वा

गी॰ योगे हि सर्वं सोढुं शक्तः सात्त्विको वा प्रारब्धकर्मोपस्थापितमिदं
टी॰ दुःखमपरिहार्यं किमनेन मनयेति जानन् सर्वं सोढुं शक्नोत्येव
हि॰ न तु ग्रस्यते दुःसहेत्यादि दुःखं कथं निस्त्रैगुण्येन सर्वथा प्रकृति
स्थेन सोढुं शक्यमत आह निर्योगक्षेम इति अप्राप्तस्य प्राप्तिर्यो
गः प्राप्तस्य रक्षणं क्षेमः एतद्द्वयमपि प्रारब्धकर्माधीनमिति
न तत्रापि निर्गत इत्यर्थः तत्र हेतुः आत्मवान् जितचित्तः स
हि सर्वोत्सवापत्स्वनाकुलो नित्यसत्त्वमनयानिरुध्यमस्त्वं भव
नीति त्वमप्येतादृशो निस्त्रैगुण्यो भवेत्यर्थः ४५ ॥

ज्ञानेदी टीका

एतदेव प्रपंचयति वेदास्स्वर्गकामो यजेतेत्यादयः श्रुतयः पर
मार्थानभिसंधानात् त्रयाणां गुणानां भावेन सुखदुःखमोह
जनकत्वेन कारणेन विषयाविषयवन्ति बध्नन्तीति त्रैगुण्या
विषयाबन्धकास्सन्ति सुखदुःखमोहरूपा आसुखबोदिकामन(
याक्रियमाणानि वैदिकानि कर्माणि बन्धकानि भवन्तीत्यः
र्थः निस्त्रैगुण्यो भव सुखबोदिबुद्धेर्निवर्तस्वेत्यर्थः कथमित्या
ह निर्द्वन्द्वः सुखदुःखे रागद्वेषौ शीतोष्णे कामक्रोधौ सहमा
नः सत्वैर्धैर्यमवलम्ब्य स्थितः अनपवयोगादलब्धलाभात् ते
मा लब्धस्य पालनाच्च निर्हतः आत्मवान् निष्कामतया नित्यनै
मित्तिकानि कर्माणि कुर्वाणः ज्ञानेकनिष्ठ इत्यर्थः ४५ ॥

+ अतस्त्वस्वभावतः प्रत्यनविज्ञानोपदेशपात्रभूत रामकंठी टीका त्वमपि पश्चिमरोचना वचनवेद्यमानचित्ततां विहाय यथोपदिष्टविज्ञाननिष्ठो भवेत्याह +

+ सत्वरजस्तमांसि त्रयो गुणा एव त्रैगुण्यम् सुखदुःखमोहमय
बुद्धिमयत्वात्त्रैगुण्यं विषयश्चाश्रयो यस्य स त्रैगुण्यविषयः संसा
रिरूपवर्गः उपचारैस्त्रैगुण्यशब्देनाभिधीयते तदेवं विधत्रैगुण्य
विषया गोचरा येषां ते तथाभूता वेदाः यदि सुखबोधस्थितः तत
स्त्वमपि हेतुक्रियाविशेषेषु वेदैर्निरूप्यन्ते यतस्त्वं सर्वतो व्य
४ख तिरिक्तरूपः सर्वगत एको यथोक्तविशेषणः सत्यः आत्मा आ
त्मत्वेन न प्रतिपद्यते ततस्तेषां मध्ये वात्मानास्थितं तनु निस्त्रैगु
ण्यः गुणत्रयातीतो वेद्यत्वमात्रेण सुखबोधात्मभिर्गुणैर्वेदैकैक
स्वभावः संबन्धी ननु तदुभयको गुणेभ्योत्यन्तविविक्तस्वभावः
परमार्थतो यमात्मा तमीदृशमात्मत्वेन प्रत्यवमृषत्रात्मवान्
वपरमार्थसन्तमेवात्मानमुक्तोपदेशप्रतिपत्तिशैथिल्यादस
त्वमिव माकार्षीरित्यर्थः यदा वा गुणत्रयातीतस्वभावमात्मा
नमात्मतया प्रतिपद्यसे तदा निर्द्वन्द्वो द्वन्द्वेभ्यः सुखदुःखेभ्यस्त्वा
जरामरणादिभ्यः क्लेशेभ्यो निष्क्रान्तो भव एतानि निर्द्वन्द्वानि (
अनात्मनि त्रिगुणे देहादावात्मप्रत्ययनिबन्धनानि यतस्त्वं निर्द्व
न्द्वस्ततो नित्यसत्वस्थोपि भव नित्यमविनाशि यत्सत्वं सद्भावो
स्तत्रस्थित एव उपलब्धप्रतिष्ठा दृशः सन्निर्योगक्षेमाभिभ

गी.
टी.
द्वि.

२९४

व अप्राप्तस्य प्राप्यस्य वस्तुनः प्राप्तिर्योगः प्राप्तस्य परिरक्षणं क्षे
मः निष्क्रान्तस्ताभ्यां निर्योगक्षेमः तथाविधो भव नहि निस्त्रै
गुण्यत्वात्सर्वतो निरभिलाषात्मनः प्राप्यं किंचिदस्ति भवति नचा
प्तं वै तया प्राप्तस्य कश्चिदर्थस्य विनाशाशंकया परिरक्षणं मनो
विपर्ययप्रत्ययगृहीतात्माभासदेहादिनिबन्धनएव योगक्षेम
इति ततो व्याहृतात्मप्रत्ययतया सत्यात्मप्रत्यवमर्षादात्मवान्
भव ननु भोगैश्वर्यप्रसक्तत्वात्स्वनिधर्मो ज्ञानैकनिष्ठोप
देशपुरुषविषयत्वेन विधीयमानक्रियाविशेषेतिकर्तव्यतो
पदेशाशान्तसंकुलेषु वेदशास्त्रे सर्वमनुष्ठेयं तयावगन्तव्यम्
[illegible] ४५

लासिकी [illegible] टीका

अतस्त्वं विज्ञानपात्रत्वमत्वं कामनिष्ठविज्ञानं विहाय क्रियमा
णेपि कर्माणि यथोपदिष्टविज्ञाननिष्ठो भवेत्याह त्रैगुण्येति
त्रयो गुणाः सत्वरजस्तमांसि त्रयो गुणा एव त्रैगुण्यं संसारविड्रूप
घवर्गः स्वपरविषये सुखदुःखबोधपत्री [illegible] गुणपचारात् त
द्विषया वेदाः कर्मकाण्डात्मकाः वेदानां च शंनत्वोरस्रूपात्मक
कर्म [illegible] प्रतिपादकत्वात् अथवा त्रैगुण्येन सकामत्वेन विषया
बन्धका वेदा विशेषणमिदं नीतिविषयाः + [illegible] तथानि
योगक्षेमः अप्राप्तस्य परिरक्षणं क्षेमस्तद्रहितो भव स्वभावुः
खादिद्वन्द्वसहनशीलः ईदृशः सन्नात्मवान्भव आत्मप्रत्यवम
र्शसाधकं हृदाणबाधकं परिहरेत्यर्थः ४५ ॥

पंचोलीटीका

यदि काम्यकर्मकाण्डैः स्वर्गादिकं परमं फलं न भवति नहि वेदैः किमि
ति तत्साधनतया कर्माणि विधीयंते तत्राह त्रैगुण्येति हे अर्जुन वे
दाः त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते
संसारविषयाः त्वं तु पुनः निस्त्रैगुण्यो निष्कामो भव सुखदुःखहेतु सं
प्रतिपत्तौ पदार्थौ द्वंद्वशब्दवाच्यौ ततो निर्गतो निर्द्वन्द्वो भव सुखदुः
खयोः शीतोष्णादिकयोः प्राप्तयोः विक्रियारहितः उभयोरपि सम
इत्यर्थः नित्यसत्वस्थः सदा सत्वगुणाश्रितो भव अप्राप्तस्योपार्जने

षिसोत्रूपं, त्वं त्वनीदृशो
निस्त्रैगुण्यः त्रैगुण्याद्वि
क्रान्तः सत् निरभिलाष
इति यावत् आत्मज्ञानप्र
मत्तो भवात्मानं प्रत्यवमृ
शन्भव अन्येनात्मनः प्र
त्यवमर्षाभावात् न तु केम
जडप्रमातृ सिद्धे संविद
प्यपरामर्षरूपा चेत्तदा
पि अभावेन जडेनाप
तुल्यैव प्राप्तदात्मनीति+

स्वीकारो योग:
प्राप्तस्य^

नित्यसत्वस्थो धैर्याव
लम्बी निर्द्वन्द्वः+

योगः उपात्तस्य रक्षणं क्षेमः योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दु
ष्करेत्यतो निर्योगक्षेमो योगक्षेमाभिलाषरहितो भव आत्मवान्
अप्रमत्तश्च भव एष तवोपदेशः ४५

शलवीरसमिद्बोधिनी॥

त्रैगुण्येति अत्र वेदस्य वाक्यच्छेदः त्रैगुण्यविषया वेदा इति निस्त्रै
गुण्य इति भवार्जुनेति निर्द्वंद्व इत्यादि वेद इति बहुवचनेन प्रवृत्ति
लक्षणा वेदत्रयी कथ्यते सा च सत्वरजस्तमः प्रधाना क्रमेण
बोध्या तत्र सत्वप्रधाना प्रभातस्थानीया ऋक् रजःप्रधानं च म
ध्याह्नस्थानीयं तमःप्रधानं साम यत्तत्सर्वं साम्यपंचाग्निका
यां निरूपितमिति तावदास्तां तत्र च यस्य वर्णस्य यस्य चाश्रमस्य
येन येनाचारेण सर्वथा चित्यं तस्य तन्निष्ठत्वं परमो धर्म इति
निस्त्रैगुण्य इति अत्रापि वेदत्रयं यमात्र एकवचनात् संबध्यते
प्रवृत्तिलक्षणा या वेदत्रयी अस्मात्तर्थं वेदो गुणातीतविषयो ब्रह्म
प्रतिपादकः तेनाधुनातनप्रयोजनेनास्ति अन्याश्रमविषय
त्वात् भवार्जुनेति निर्द्वंद्वो भव द्वंद्वरागादिषु प्रमातिपाय व्यति
रिक्तो भवेत्यर्थः तथा नित्यं सत्त्वसंस्था भाविकं ज्ञानं तेन सत्त्व
तिष्ठतीति अलब्धस्य लाभो योगः लब्धस्य परिपालनं क्षेमः
तद्रहितो यस्मन्नात्मवान् महाद्रष्टा ४५॥

मधुभाष्य

४५॥

285

त्रैगुण्येति त्रैगुण्यं गुणत्रयसमाहारात्मा संसारस्तद्विषयास्तत्साधन
समर्पकतया तद्विषया वेदाः कर्मकाण्डात्मकाः सन्ति त्वमथाहारः त्वं त्वा
त्मवान्भवेति संबंधः आत्मा विद्यते जिज्ञास्यत्वेनास्य स आत्मवान्
आत्मज्ञानैकपरो भवेत्यर्थः ननु केकर्मत्याभावात्संसारो भविष्यतीतित
त्राह निस्त्रैगुण्य इति त्रैगुण्यशब्देनात्र त्रैगुण्यात्मकसंसारमूलभूताः
कामा गृह्यंते तेभ्यो निष्क्रांतो निष्कामो भवेत्यर्थः एवं च ब्रह्मार्पणबुद्ध्या
कृतं कर्म संकल्पितत्वात्फलं दास्यतीति भावः ननु परलोकफलेच्छा
स्वैता भावेपि सुखार्थं कर्माचरतः दिवायाः प्रतिकारार्थं ऐहिकवस्त्रादिफले
च्छाउर्वीराततः किमपराधुमामभिकेणेत्यत आह निर्द्वंद्व इति शीतोष्णा
दिसहिष्णुर्भवेत्यर्थः कथं वा शीतोष्णादीनि सोढुं शक्नोत इत्याशंक्या
ह नित्येति नित्यमचलं यत्सत्वं सत्वगुणस्तत्स्थस्तत्संबद्धः सत्वाधिक्या
त्सर्वं सोढुं शक्ष्यसीति भावः ननु कलत्राद्यर्थं किंचिदनुपात्तमुपादेयं उ
पात्तं च रक्षणीयं स्यात्तत्र च प्रयत्ने सत्वं भज्येतेत्यत आह निर्योगक्षेम इति ४
अपरिग्रहो भवेति भावः नन्वेवं वैदिकतत्तत्कर्मजन्यफलभोगजनिते
रागे दैवे चित्र्यवा स्याहमगवान्या ४५ ॥
स्मी

भाषाअनुवाद

स्वर्ग आदिफलजो परमफलनहींहै तौफेरिवेदोंने किसलिये स्वर्ग
आदिफलके साधन नानाप्रकारके कर्मोंका विधानकियाहै तोकह
तेहै किसकामअधिकारी जनोंके अर्थवेदकर्म फलका प्रतिपादन
अर्थात् करतेहैं परन्तुतुमनिष्कामहोउ निष्कामहोनेकी उपाय
यहहै कि निर्द्वंद्व अर्थात् सुखदुःखशीतउष्णहानिलाभ जन्मम
रण आदिसे रहितहोउ अर्थात् येसबसहो जोकहोकि कैसेइन
कहते कोसहैं तो कि धैर्य करिके सहो और अप्राप्तवस्तुकोप्राप्ति करनेकी अवलम्बन
इच्छाजोयोगहै औप्राप्तभई वस्तुकीरक्षाकरनाजोक्षेमहै इनदूनोंकी
परित्याग करिके सावधानहोउ कौंकि सुखदुखमे आसक्त औ अप्राप्त
वस्तुकी इच्छाप्राप्तका रक्षण इसमेव्याकुलचित्त असावधानजोहै
वहनिष्काम कैसेहोसकेगा त्रैगुण्यजो त्रिगुणात्मक संसारसोहै वि
षयकहे कथनीय जिनकोअसेजोभेदहैं परन्तुमनिस्त्रैगुण्यकहे सं
सारिकभावसुखदुःखादिसेरहितहोउ ४५ ॥

दोहा

त्रयगुण विषयवेदहैं त्रिगुणविना होपार्थ द्वंद्वरहित स्थि
त सत्वमे योग क्षेम सामर्थ्य ४५॥

297

यावानर्थ उदपाने सर्वतःसंप्लुतोदके तावा
न्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ ॥

शांकरभाष्य

सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि तानि
नापेक्ष्यन्ते चेत् किमर्थं तानीश्वरायेत्यनुष्ठीयन्त इत्युच्यते शृणु या
वानिति यथा लोके कूपतडागाद्यनेकस्मिन् उदपाने परिच्छिन्नो
दके यावान् यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनं
स सर्वोऽर्थः सर्वतःसंप्लुतोदकेऽपि योऽर्थः तावानेव संपद्यते त
त्रान्तर्भवतीत्यर्थः एवं तावांस्तावत्परिमाण एव संपद्यते सर्वे
षु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत् कर्मफलं सोऽर्थो ब्राह्मण
स्य संन्यासिनः परमार्थतत्त्वं विजानतो योऽर्थो यत् विज्ञानफलं
सर्वतःसंप्लुतोदकस्थानीयं तस्मिंस्तावानेव संपद्यते तत्रैवान्त
र्भवतीत्यर्थः यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं त
दभिसमेति यत्किंचित् प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति
श्रुतेः सर्वं कर्माखिलमिति च वक्ष्यति तस्मात्प्राक् ज्ञाननिष्ठाधि
कारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्त
व्यं ४६ ॥ ४६ ॥

आनंदगिरिकृतटीका

ईश्वरार्पणधिया स्वधर्मानुष्ठानेऽपि फलकामनाभावाद्धि फलं योग
मार्गस्येति मत्वा नाशंकते सर्वेष्विति कर्ममार्गस्य फलवत्त्वं प्रति
जानीते उच्यत इति किं तत्फलमित्युक्ते तद्विषयं श्लोकमवतारय
ति शृण्विति यथोदपाने कूपादौ परिच्छिन्नोदके स्नानाचमनादिर्योऽर्थो
यावानुत्पद्यते स तावानपरिच्छिन्ने सर्वतःसंप्लुतोदके समुद्रेऽन्तर्भव
ति परिच्छिन्नोदकानामपरिच्छिन्नोदकांशत्वात्तथा सर्वेषु वेदोक्ते
षु कर्मसु यावानर्थो विषयविशेषोपरक्तः सुखविशेषो जायते स
तावानात्मविदः स्वरूपभूते सुखेऽन्तर्भवति परिच्छिन्नानंदानामपरि
च्छिन्नानंदांशत्वाभ्युपगमादेतस्यैवानंदस्यान्यानि भूतानि मात्रा

मुपजीवन्तीति श्रुतेः तस्याचापरिच्छिन्नानन्दप्राप्तिपर्यवसायितो
योगमार्गस्य नास्ति वैफल्यमित्याह यावानिति उक्तमर्थमन्वययोज
नया प्रकटयति यथेति उदके पीयतेऽस्मिन्निति व्युत्पत्त्या कूपादि
परिच्छिन्नोदकविषयत्वमुदपानशब्दस्य दर्शयति कूपेति कूपादि
गतस्याभिधेयस्य समुद्रेऽन्तर्भावासम्भवात् कथमिदमित्यमिता
थोवार्थशब्दस्य प्रयोजनविषयत्वं व्युत्पादयति फलमिति यत्फ
लत्वेनलीयते तत्फलमित्युच्यते ननु कथं तडागादिकृतं स्नान
पानादि नश्येत्याशङ्क्य तस्याल्पीयसो नाशोपपत्तेरित्याह प्रयो
जनमिति तडागादिप्रयुक्तप्रयोजनस्य समुद्रनिमित्तप्रयोजन
मात्रत्वमयुक्तमन्यस्यान्यात्मत्वानुपपत्तेरित्याशङ्क्याह तत्रेति घटा
काशादेरिव महाकाशे परिच्छिन्नोदककार्यस्यापरिच्छिन्नोदकका
र्येऽन्तर्भावः सम्भवति तन्मात्राविनाशापेक्षाभावादित्यर्थः पूर्वार्द्धं
दृष्टान्तभूतमेवं व्याख्याय दार्ष्टान्तिकमुत्तरार्द्धं व्याकरोति एवमि
त्यादिना कर्मणयोऽर्थस्युक्तं व्यनक्ति यत्तु कर्मफलमिति सोऽर्थो वि
जानतो ब्राह्मणस्य योऽर्थस्तावानेव संपद्यत इति सम्बन्धः तदेव
स्पष्टयति विजानतेति तस्मिन्नन्तर्भवतीति शेषः कथं कर्मफले ज्ञा
नफलेऽन्तर्भवतीत्यत्र प्रमाणमाह सर्वमिति यत्किमपि प्रजाः
साधु कर्म कुर्वन्ति तत्सर्वं सत्पुरुषोऽभिसमेति प्राप्नोति यः पुरुषस्त
द्वेद विजानाति यद्वस्तु स [illegible] वेद तद्वेद्यमिति श्रुतेरर्थः कर्म
फलस्य सगुणज्ञानफलेऽन्तर्भावः संवर्गविद्यायां श्रूयते कथमेता
वता निर्गुणज्ञानफले कर्मफलान्तर्भावः सम्भवतीत्याशङ्क्याह
सर्वमिति तर्हि ज्ञाननिष्ठैव कर्तव्या तावतैव कर्मफलस्य ल
ब्धतया कर्मानुष्ठानानपेक्षणादित्याशङ्क्याह तस्मादिति योगमा
र्गस्य निष्फलत्वाभावस्तद्धेत्वर्थः ४६ ॥

स्वामिकृतटीका

ननु वेदोक्तनानाफलपरित्यागेन निष्कामतया परमेश्वराराधनविषयाव्यव
सायात्मिका बुद्धिः कुबुद्धिरेवेत्याशङ्क्याह यावानर्थ इति उदकं पीयते
स्मिन्निति उदपाने वापीकूपादौ तस्मिन्स्वल्पोदके एकत्र कृत्स्नस्यार्थस्यासं

भवात् तत्रतत्रपरिभ्रमणेन विभागशो यावान् स्नानपानादिरर्थः प्र
योजनं भवति तावान्सर्वोप्यर्थः सर्वतः संप्लुतोदके महाह्रदे एकत्रैव य
था भवति एवं यावान्सर्वेषु वेदेषु तत्तत्कर्मफलरूपोऽर्थः तावान्सर्वोपि वि
जानतो व्यवसायात्मिकबुद्धियुक्तस्य ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव
ब्रह्मानंदे क्षुद्रानंदानामंतर्भूतत्वात् एतस्यैवानंदस्यान्यानि भूतानि
मात्रामुपजीवंतीति श्रुतेः तस्मादियमेव सुबुद्धिरित्यर्थः ४६ ॥

पिशाचभाष्यं

ज्ञाननिष्ठैः कार्यभूतबुद्धेर्व्यवसायिनो योगनिष्ठस्य श्रौतस्मार्तफला
नवाप्तिलक्षणो दोष इति चेन्नैवं यतः यावानिति यथा लोके कूपत
डागाद्यनेकस्मिन्नुदपाने उदकं पीयते तस्मिन्नुदपाने जलाशयस्त
स्मिन् जलाशये यावान् यावत्प्रमाणः स्नानपानादिरर्थः फलं स तावा
र्थः सर्वतः संप्लुतोदके कूपतडागादिविभागेन स्थिते जलपूरे भवत्येव य
थैवं तथा वेदविहितयागदानादिसाधनसाध्यो यावानर्थस्तावान्विजा
नतो कामहतस्य ब्राह्मणस्य भवति सर्वं तदभिसमेति यत्किंच प्रजाः साधु कु
र्वंति यस्तद्वेद यत्स वेदेति श्रुतेः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत
इति च वचनादिति ४६ ॥

रामानुजभाष्य

न च वेदोदिते सर्वे सर्वस्योपादेये यथा सर्वार्थपरिकल्पिते सर्वतः संप्लु
तोदके उदपाने पिपासोर्यावानर्थः यावदेव प्रयोजनं तावदेव तेनोपादीय
ते न सर्वं एवं सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ब्रह्मसंबधि ब्रह्मणः वे
दार्थविजानत मुमुक्षोः वैदिकस्य मुमुक्षोर्यदेव मोक्षसाधनं तदेवोपादेयं
नान्यत् ४६ ॥ ४६ ॥

अभिनवगुप्तटीका

यतो वेदाः परं तेषां समग्रतानोपयोगिनः अत एवाह यस्य स्वधर्ममात्रे
ज्ञाने च प्राधान्ये परिमितादपि वेदभाषितात् कार्यम् ४६ ॥

परमार्थप्रपादीका

अतएव ज्ञाने वेदतात्पर्यमुपसंहरति यावानिति उदउदकयोः पर्यंतय
स्मिन्निस्तुदयानंतस्मिन्पानपर्याप्तोदके नित्यहीरपल्वलादौ भ्रमणं कृत
वतः पुरुषस्य यावानर्थः सिध्यति तावान्सर्वतः सर्वोऽप्यर्थः एकत्र संप्लु

गी॰ नोदके महाह्रदो सिध्यति एवं यावानर्थः सर्वेषु पूर्वोत्तरमीमांसादिद्वं
टी॰ शानिष्ठकर्मनैष्कर्म्याद्यर्थो निरूपितो नोक्ति तावानेवाज्ञानतो वि
हि॰ शेषेण वेदतात्पर्यं जीवतो ब्राह्मणस्य ब्रह्मज्ञस्य पुरुषस्य संस्नातो
दकस्थानीयेषु वेदेषु सिध्यति ४६ ॥

वनमालीटीका

ननु श्रुत्वानेकस्वर्गादिफलं विहाय कथं कर्म कार्यं न हि प्रयो
जनं विना मन्दोऽपि प्रवर्तते नत्वमराराधनादेव तत्सर्वफलं स्या
दिति वाच्यं तदाराधनात् भक्तिरेव स्यान्न तु पुत्रादिप्राप्तिरित्याशं
क्य सर्वफलानामराराधनतुल्यफलेन भूतत्वादित्याह यावानि
ति यथोदपाने कूपादौ यावानर्थः प्रयोजनं जलपानादिकं तावाने
व सर्वतः सर्वस्मिन् पूर्णे संप्लुतोदके ह्रदादौ भवति त
था सर्वेषु वेदेषु काम्यकर्मणो यावत्फलं स्वर्गादिकं तत्केनावत्फलं
विजानतः परोक्षज्ञानिनो ब्राह्मणस्य परोक्षज्ञानद्वारा ब्रह्मापरो
क्षज्ञानिनो भवति तस्मिन्प्रसक्ते किमिहासुलभ्यं पुमार्थकामे त्वं लका   लम ४
लेन माश्रितात् ब्रह्मलतरोरनेनाश्रियसे सत्फलं प्रयातेति श्रीवल्ल
भोक्तेः अयं भावः पुत्रादीनां न स्वतः पुरुषार्थत्वं किं तु तज्जन्यसुखमेव
पुरुषार्थः तच्च वेदविहितकर्मसातिशयं नश्वरं च सुखं भक्तिं च भगवदाराधने
इत्यभिप्रायः ४   नाविर्भूतं स्वरूपानंदं ... तिशायीति न्यायः सर्वासु भक्तिसुखे यावदंशे विष
यिकानंदेभ्यः समूहीकृतेभ्योऽपि कोटिगुणितमनंतसुखत्वात्तद्दका
मो विहायानेदार्थी कथं न प्रवर्ततेति ४८ ॥

उत्तमवैजयंतीटीका

ननु निष्कामसकामकर्मप्रतिपादकानि सात्विकराजसतामसादीनि
सर्वाण्येव वाक्यानि सर्वैरपि कुतो न गृह्यन्ते यतस्सर्वेषामेव वेदत्वा
विशेषेण जीवाभयप्रदत्वसामर्थ्ययोगः स्यादित्याशंकायां पुरुषः
स्वाधिकारानुसारेण यावत्प्रयोजनं तावदेव वाक्यं गृह्णाति न तु
सर्वमिति सदृष्टान्तेनाह यावानिति सर्वतः सर्वोपरोत्तरदति

लोकेहीयस्तसंप्लुतोदकेसम्यक्प्लुतेव्याप्तेमहोदकेयस्मिंस्तस्मिन्नेवंभूते
यस्मिन्कस्मिन्नुदपानेउदकेजलेपीयतेऽस्मिन्नुदपानंसरित्समुद्रसरःकू
पादितस्मिन्जलाभिलाषिनःपिपासोःपुरुषस्यग्रर्थःमज्जनपाना
स्वरप्रक्षालनादिरूपकंप्रयोजनंयावान् यावत्तिष्ठतितस्मिंस्तस्मि
न्नुदपानेतावदेवोदकेजलाभिलाषिनापुरुषेणागृह्यतेनतुसमग्र
मुदकंएवंसर्वेषुवेदेषुवेदेष्विति बहुवचनप्रयोगेणैवचतुर्णामपि
ग्रहणेसिद्धेसतिपुनःसर्वेष्विति पदंतुस्मृतिसूत्रपुराणादिसंग्रहा
र्थंज्ञेयम् सर्वेषुस्मृतिसूत्रपुराणादिषुवेदेषुऋग्यजुस्सामाथर्वसु
चतुर्षुब्राह्मणस्यशास्त्रतत्त्वविजानतोःऽनुभूतज्ञानवतःसंसारानि
र्विण्णविरक्तस्यमुमुक्षोःयावत्स्वधर्मानुष्ठानेप्रयोजनंतावान् तावदेव
वाक्यंतेनगृह्यतेनतुसमस्तम् अयंभावः यथावायसाःस्वहाश्रुहव
न्तविचारहीनाः सर्वमेवभक्षन्तीतियन्नुतेषामयमेवाधिकारः हंसास्त
पयसोमध्येजलंहित्वादुग्धमेवपिबन्तीतियन्नतेषामप्ययमेवस्वभा
वःतथाराजसतामसाःसकामिनोऽनेकदेवोपासकाजनाःनानादेवा
नेकसाधनानेकफलप्रतिपादकान्येववाक्यानिगृह्णन्तियन्नतेषां
महिमत्वत्वेननित्यसंसाराधिकारित्वंसात्त्विकामुमुक्षवस्तुसाधनसा
ध्यत्वेनमन्त्रतिपादकान्येवगृह्णन्तियन्नतेषामदेकनिष्ठत्वेनमुख्या
धिकारित्वमिति ४६ ॥

मधुसूदनीटीका

नचैवंशंकनीयंसर्वकामनापरित्यागेनकर्मकुर्वन्त्रहंतेभ्यःकर्मजनितै
रानंदैर्वंचितःस्यामितियस्मात् उदपानेक्षुद्रजलाशयेजानानेकव
चनेयावानर्थः यावत्स्नानपानादिप्रयोजनंभवति सर्वतःसंप्लुतोद
केमहति जलाशयेतावानर्थोभवत्येव यथाहिपर्वतनिर्झराःसर्वतः
स्रवंतःक्वचिदुपत्यकायामेकत्रमिलंति तत्रप्रत्येकंजायमानमुदक
प्रयोजनं समुदितेसत्तरांभवति सर्वेषांनिर्झराणामेकत्रैवकासारे
न्तर्भावात् एवंसर्वेषुवेदेषुदोक्तेषुकाम्यकर्मसुयावानर्थोहिरण्यगर्भा
नंदपर्यंतः तावानविजानतोब्रह्मतत्त्वंसाक्षात्कृतवतोब्राह्मणस्यब्रह्म
णभूतोभवत्येवक्षुद्रानंदानांब्रह्मानंदांशत्वात्ब्रह्मानंदेनानामंतर्भावा

गी॰ त् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः एकस्या
टी॰ प्यानंदस्याविद्याकल्पितनानोपाधिपरिच्छेदमादायांशांशिवद्व्यप
द्वि॰ देशो आकाशस्येव घटाद्यवच्छेदकल्पनया तथा च निःकामकर्मभिः
शुद्धांतःकरणस्य तत्वात्मज्ञानोदये परब्रह्मानंदप्राप्तिः स्यात् यैवचस
र्वानंदप्राप्तौ न क्षुद्रानंदाप्राप्तिरिति वैयर्थ्यावकाशः अतःपरमा
नंदप्रापकाय तत्वज्ञानाय निष्कामकर्माणि विध्यभिप्रायः अत्रय ३
थानथा भवतीति पदत्रयाध्याहारः यावांस्तावानिति पदद्वयानुषं
गश्च दार्ष्टांतिके द्रष्टव्यः ४६ ॥

सदानंदीटीका

सर्वकामपरित्यागाद्धवि चेतो हे सर्वांशतः कर्मजातं कर्म कुर्वेश्चस्येवमा
मानं संस्कुरु १ यावत्स्नानपानादिफलं तद्वज्जलाशये ताव
त्फलं भवत्येव महत्यपि जलाशये २ यथाद्विनिर्झराः सर्वे स्रवंतस्ते
क्वचिद्भुवि मिलंत्येकत्र तत्रापि प्रत्येकं यत्प्रयोजनं ३ तत्सर्वं तत्रस
तरामेकत्रातिजलाशये एवमेवागमोक्तेषु सर्वेषु काम्यकर्मसु ४
यावानर्थोऽस्ति हैरण्यगर्भानंदावसानकः तावान्ब्रह्माद्वयानंदसाक्षा
त्कृतवतो विदः ५ ब्राह्मणस्य भवत्येव ब्रह्मीभूतस्य सर्वथा यथा
२ त्विता या विलयोऽस्ति यस्मिन्नुरेपि संयंति तमेव वायाः तथात्मवित्
सकलैकराशिं संयांति सर्वाणि सुखानि तं सा ७ क्षुद्रानंदाः समस्ता
स्ते ब्रह्मानंदलवायतः अविद्याकल्पितोपाधितारतम्याद्दनेकधा ब्र
ह्मानंदस्तु सर्वत्र व्यापकः सत्य आंतरः ८ जडदुःखात्मकाकारेऽप्य
वेकत्रवासुखे सच्चिदानंदमद्वैते सुखे ब्रह्मैव सर्वगं ९ तथा च
शुद्धचित्तस्य तत्व निष्कामकर्मभिः आत्मज्ञानोदये ब्रह्मानंदप्राप्तिः
स्वतो भवेत् १० सर्वानंदपंप्राप्तक्षुद्रानंदलवेषु ते मास्तु कामो १
ऽस्त्वतस्तत्त्वज्ञानलाभाय सर्वथा ११ ईश्वरार्पणया बुद्ध्या कुरु कर्मा
नहंकृतिः १२ ॥ ४६ ॥

नीलकंठीटीका

ननु आत्मवत्त्वं चित्तशुद्धौ सत्यामेव भवति सा च सकलवेदोक्तकर्मा
नुष्ठानसाध्या अतो निःसंगत्वेन दुर्लभमित्याशयवान् यावानिति

सर्वतःसंप्लुतोदकेमहतिउदपानेजलाशयेपुरुषस्ययावानर्थो
यावत्स्नानपानादिकंप्रयोजनंस्वल्पमात्रजलनिर्वर्त्यंभवतिनह
तत्रजलाशयमयनिर्वर्त्यं तावानेवार्थोविजानतोमुमुक्षत्त्रचित्तस्य
स॰ ब्राह्मणब्रह्मबुभुक्षोः सर्वेषुवेदेषुवेदैकदेशोपनिषच्छ्रवणमात्र
निर्वर्त्योभवति नकृत्स्नवेदार्थानुष्ठानेसमस्तिस्यार्थमपेक्षते एके
नजन्मनाकृत्स्नवेदार्थानुष्ठानासंभवात् ऐहिकेनजन्मान्तरीयेण
वाजपादिनाचित्तशुद्धौसत्यामुपनिषच्छ्रवणान्निःश्रेयसंभवती
तिभावः दृष्टान्तस्तुसर्वतःसंप्लुतोदकस्थानीयेब्रह्मज्ञानेपुरुषस्य
तावानर्थःकृत्स्नोपिभवतियावदनेककूपस्तूपोदपानस्थानीये
षुसकलवेदोक्तकर्मस्वनुष्ठितेषुभवति ब्रह्मानंदेतदानंदाना
मंतर्भावात् तथाचश्रुतिर्ज्ञानेसर्वकर्मफलांतर्भावंदर्शयति
यथा कृतायाविजितायाधरेयाःसंयंत्येवमेवैनंसर्वंतदभिसमे
तियत्किंचप्रजाःसाधुकुर्वंतियस्तद्वेदयत्सवेदेति वक्ष्यतिच सर्वं
कर्माखिलंपार्थज्ञानेपरिसमाप्यतइति गंगातुल्यज्ञानोदयान्या
गेवकूपोपमानिकर्माणिकर्तव्यानीतिभावइत्याचख्युः अस्मि
न्पक्षेपूर्वार्धेअनेकस्मिन्यथातथाभवतीतिपदचतुष्टयाध्याहा
रः यावान्तावान्पदयोरसंगस्त्रदार्थौतिकेद्रष्टव्याः ४६ ॥

आनंदी टीका

त्रैगुण्यविषयेषु वेदेष्वस्तु ज्ञानपरेण न भवितव्यमित्याह सर्व
तःसंप्लुतोदके उदकपूर्णे उदपाने तडागादौ यावान
र्थः स्नानपानादिप्रयोजनं भवति यावता स्वल्पमात्रेणैव प्रयो
जनं निर्वहति तावन्मात्रमेवोपादेयम् न सर्वं तोवगाहनीय
तथैव तावानेव विजानतः ब्राह्मणस्य ब्रह्मणि भक्तिमतो ज्ञानि
नः ब्रह्मार्थ वाक्यार्थः यथा सुसंपूर्णादपि ह्रदादेः स्नानादि स्वा
र्थसंपादनमात्रार्थं स्तोकमेव जलमुपादीयते न तु परितो वगा
ह्यते तथा नानाविध काम्य नित्य नैमित्तिक कर्म प्रतिपादकेभ्यः
सर्वेभ्यो वेदेभ्यः काम्याभियोगं त्यक्त्वा ज्ञानसंपन्नः स्वधर्मप्रति
पादके वेदैकदेशे तात्पर्यं लभ्यमिति ४६ ॥

किं तु यावता परमार्थबोधलक्षणाभिमतार्थक्रिया वे^ सिद्धिर्भवति तावदेव ततउपादेयं तथा ग्रन्थेन प्रतिपत्तव्यमित्याह+

रामकंठी टीका

\+ सर्वतः सर्वासु दिक्षु समृद्ध सलिले उदपाने ह्रद प्रस्रवणादौ वा
\+ र्थिनो यावानर्थः यावन्मात्रमेकदेशात् तृष्णाप्रशमनार्थक्रि
यासमर्थ सलिललवोपयोगमात्रप्रयोजनं तावदेव ततो विधि
सहस्र संकुलादप्युपादातव्यम् किं तु कं भवति यथा तृषितेन ना
र्थिना सुसंपूर्णान्समुद्रकल्पादपि जलाशयात् स्वार्थक्रिया [illegible]
[illegible]
[illegible] समाप्तिमात्रलमस्तु
द्वके स्तोकमुपादीयते न सर्वो जलाशयः एवं स्नानक्रियाविषय
विविधार्थ सार्थसंपूर्णादपि वेदशास्त्रात् तत्त्वजिज्ञासुना तदवग
ममात्रोपयोग्येवार्थ उपादातव्यो न तु सर्वमेव शास्त्रमिति (प्रथ
[illegible]
४६ ॥

^तावानेव विजानतो विज्ञानवतो ब्राह्मणस्य ब्रह्मवेदिनः सर्वेषु निखिलेषु सरहस्येषु वेदेष्वर्थः प्रयोजनम् यावता प्रात्रैकदेशेन परमार्थोपलब्धिलक्षणार्थक्रिया निष्पत्तिर्भवति

लासिकी [illegible] टीका

ननु नानाकर्मकलापप्रतिपादकाद्वेदात्सर्वकर्मानुष्ठेयमतस्ता
दृशोऽर्थमात्रोपयोगि उपादेयमित्याशंक्याह यावानिति यथा
[illegible] उपादेयः
तावान्परमार्थोपलब्धिमात्रोपयोगी ग्रंथः प्रयोजनं भवति न स
र्वः कर्मकलाप उपादेय इत्यर्थः ४६ ॥

यावान्स्नानपानादिरर्थः सर्वतः संप्लुतोदके समृद्ध जले ह्रदादौ यथा भवति न सर्वो ह्रद उपादेयः तथा सर्वेषु सरहस्येषु वेदेषु विजानतो विज्ञानवतो ब्राह्मणस्य ब्रह्मवेदिनः ४

पैचोलीटीका

स्वधर्ममनुतिष्ठतः सर्वेषुवेदोक्तेषुकर्मसुयान्यनन्तानि फला॰
नितानिनापेक्षितेचेत ईश्वरार्थमपिनिरर्थकमकिमर्थमनुतिष्ठ
तेइत्यत्राह यावानिति यावानर्थउदपानेवापीकूपतडागादौया
वानर्थःयावत्प्रयोजनंस्नानपानादि सर्वतःसंप्लुतोदकेमहतिज
लाशयेतावानर्थोभवत्येव तावत्स्वर्गादिप्रयोजनंस्वर्गादिसर्वंब्रह्म
विदःफलेविद्यतेतत्रांतर्भवतीत्यर्थः तथासर्ववेदोदितकर्मप्र
योजनंस्वर्गादिसर्वंब्रह्मविदःफलेविद्यतेतत्रांतर्भवतीत्यर्थः त
स्मादीश्वरार्थकर्मक्रियमाणंस्वर्गादिफलेभ्यःनिरतिशयफल॰
जनकंभवतीत्यर्थः ४६

रमावीभसमिद्धायिनी॥

यावानिति उदपानेकूपादौयावनर्थः स्नानाचमनादिप्रयो
जनं तावानेव सर्वतःसंप्लुतोदके परिपूर्णजलेसमुद्रेऽन्तर्भ
वतीत्यर्थः एवं सर्वेषुवेदेषुस्वर्गादिषुयावानर्थःकर्मफल
सर्वंतावानर्थःब्राह्मणस्यब्रह्मवेदः वेदस्तत्त्वंतपोब्रह्मेतिको
षाः सचासावस्मात्तत्त्वाद्वैवेदोविज्ञेयः तज्जानातीतिब्राह्मणः
तस्यविजानतः विशेषेणनारदकर्तारमीश्वरएवसर्वंनियंतेत्य
वंजानातियस्तस्येत्यर्थः एताहशस्यविदितधर्मविद्यालक्ष
णस्यातिविरक्तस्यपीडुकामस्यत्रिविधस्यकर्मफलेस
मुत्थानिमर्यादानिप्रायेणांतर्भवतीत्यर्थः ४६॥

मधुभाष्य

यावानर्थइति यथायावानर्थप्रयोजनमुदपानेकूपेभवति ता
वान्सर्वतःसंप्लुतोदकेनभवत्येव एवंसर्वेषुवेदेषुयत्फलंत
द्विजानतोज्ञानिनोब्राह्मस्यफलेनभवति ब्रह्माणातीतिब्राह्म
णःऽपरोक्षज्ञानी सहिब्रह्मगच्छति विजानतइति ज्ञानफलं
तस्यदर्शयति कामात्मनानिंदाकृता कथमेषांस्वर्गकामोयज
तेत्यादौकामस्यापिविहितत्वादित्यतआह ४६॥

वानर्थइति अत्रोदपानइत्येकवचनेजात्यभिप्रायं उदपानशब्देन
जलाशयमात्रंवाविनाजलाशयविशेषाः पर्वतनिस्सृतनिर्झराख्य
लत्स्वेनेनतत्रउदपानेषुपर्वतनिस्सृतनिर्झरेषुप्रत्येकमुदकमेवाया
यावानर्थस्तत्रनिर्झरोदकपानजन्यतृप्तिलक्षणस्तावानर्थः सर्वतः
सर्वेभ्यएतेभ्यपर्वतनिर्झरेभ्यः संप्लुतमागतमुदकंयस्मिन्पर्वताध
स्थितकासारेषुयथाभवतितथासर्वेषुवेदेषुयावानर्थः तत्तत्कर्मज
न्यफलभोगजनितानंदलक्षणः तावान्विजानतोनिरतिशयानं
दप्राप्तिसाधनतत्त्वलक्षणवैशिष्ट्यवदैकात्म्यज्ञानवतोब्राह्मणस्यब्रह्म
बुभूषोर्भवतीतियथातथाभवतिशब्दाध्याहारेणयोजना सर्वेषामा
नंदानामत्रैवानंदेऽ तर्भूतत्वादितिभावः एतस्यैवानंदस्यातिश्र
स्वष्ठोत्रनिगूढः तदेवंमहताप्रबंधेनप्रपंचितमाशयस्थैर्यैक दू
मेकतेव्यंत्वसत्त्वप्रतिपत्तिसंशेषं दर्शयतिवासुदेवः ४६ ॥

303

भाषाअनुवाद

जोकहोकि वेदोक्त कर्म औ तत्तत्कामनाके फलसकलत्यागक
रि निष्कामईश्वराराधनके अर्थजोव्यवसायात्मिका बुद्धिसोकुबु
द्धिहै इसशङ्काकी निवारनकरते हुये कहतेहैंकि जिससे जलपा
नकियाजायसो उदपान अर्थात् बावडीकुआँ तालतिनमेजो अ
ल्प जलहोतो सबकामसाधनेके अर्थ अर्थात् स्नानपानआदि
करनेके अर्थ तहांतहांभ्रमण करिके सबकामसिद्धहोयँगे प
रन्तु संप्लुतोदक कहेएकमहाकूप जिसमे आगाधजलभराहै उ
सएकहीसेसबनिर्वाहहोसकतेहैं तैसेही वेदोक्तजोकर्मके फल
सो सबभगवंभक्तियुक्त ब्रह्मपरायण पुरुषको भक्तिही सेमि
लतेहैं देखोये स्वर्गआदि सम्पूर्णतुच्छसुख ब्रह्मानन्दके भीतर
हीअन्तरभूतहैं इसब्रह्मानन्दके कणमात्र आनन्दकोप्राप्तहोके
सर्वप्राणीजीतेरहतेहैं यहश्रुतिमेकहाहै इससे निश्चयात्मिका
जोबुद्धि सोईसद्बुद्धिहै ४६ ॥

दोहा

कूपादिकमेंकार्यहोय सोसमसागरमांहि एसे जो सम
वेदमे सोब्रह्मज्ञानी इक पाहि ४६॥

304

कर्मण्येवाधिकारस्तेमाफलेषुकदाचनमा
कर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि ४७॥

शांकरभाष्य

कर्मणीति तवच कर्मण्येवाधिकारोनज्ञाननिष्ठायां तेतत्रचकर्म कु तत्र
र्वतोमाफलेष्वधिकारोऽस्तु कर्मफलतृष्णामाभूत् कदाचन क
स्यांचिदप्यवस्थायामित्यर्थः यदाकर्मफलेतृष्णातेस्यात् तदाक तृ
र्मफलप्राप्तेर्हेतुः स्याःएवंमाकर्मफलहेतुर्भूः यदाहिकर्मफल
तृष्णाप्रयुक्तः कर्मणिप्रवर्तते तदाकर्मफलस्यैव जन्मनोहेतु
र्भवेत् यदिकर्मफलंनेष्यते किंकर्मणादुःखरूपेणेति माते
तवसंगोस्त्वकर्मण्यकरणे प्रीतिर्माभूत् ४७ ॥

आनंदगिरिकृतटीका

नहिपरम्परयापुरुषार्थसाधनं योगमार्गंपरित्यज्य साक्षादेवपुरु
षार्थकारणमात्मज्ञानं तदर्थमुपदेष्टव्यं तस्मैहिस्पृहयति म
नोमदीयमित्याशंक्याह तवचेति नहितत्फलाभिलाषोपि
स्यादिति नेत्याहमाफलेष्विति पूर्वोक्तमेवार्थं प्रपंचयति माकर्मे
ति फलाभिसन्धिसम्भवे कर्माकरणमेव श्रेयस्करमित्याशंक्याह
मातइति ज्ञानानधिकारिणोपि कर्मत्यागप्रसक्तिं निवारयति क
र्मण्येवेति कर्मण्येवेत्येवकारार्थमाहनज्ञानेति नहितत्राज्ञान
स्यापरिपक्वकषायस्य तवास्त्यधिकारः सिद्ध्यतीत्यर्थः फलेष्वपिहि
सम्बन्धोदुर्वारःस्यादित्याह तत्रेति कर्मण्येवाधिकारस्तवेति मत्व
त्यर्थःफलेष्वधिकाराभावं स्फोरयतिकर्मेति कर्मानुष्ठानात् प्रागू
र्ध्वंतत्कालेचेत्येतत् कदाचनेति विवक्षितमित्याह कस्यांचिदिति
फलाभिसन्धाने दोषमाहयदेति एवंकर्मफलतृष्णाद्वारेणेत्यर्थः क
र्मफलहेतुत्वं विवृणोति यदाहीति तर्हिविफलंक्लेशात्मकं क
र्मनकर्तव्यमिति प्राप्तामनुभाष्य दूषयति यदीत्यादिना अकर्मणि
तेसंगोमाभूदित्युक्तमेव स्पष्टयति अकरणइति ४७ ॥

स्वामिकृतटीका

नहिसर्वकर्मफलानिपरमेश्वराराधनादेवभविष्यन्तीत्यभिसं
गी॰ धायप्रवर्तेतेत्याशंक्याह कर्मण्येवेति तवतत्वज्ञा
टी॰ नार्थिनःकर्मण्येवाधिकारःनतुफलेषुबंधहेतुष्वधिकारःका
हि॰ मोमास्तु ननुकर्मणिकृतेतत्फलंस्यादेवभोजनेकृतेतृप्तिव
दित्याशंक्याह माकर्मफलहेतुर्भूः कर्मफलंप्रवृत्तिहेतुर्यस्य
तथाभूतोमाभूःकामितस्यैवस्वर्गादेर्नियोज्यविशेषणत्वेनफ
लत्वादकामितेफलंनस्यादितिभावः अतएवकर्मफलंबंधकं
भविष्यतीतिभयात् अकर्मणिकर्माकरणेतवसंगोनिष्ठामास्तु ४७॥

पिशाचभाष्य

कर्मण्येवाधिकारःनज्ञाननिष्ठायांतेनत्वंतत्रकर्मकुर्वंतोमाफले
ष्वधिकारोस्तुकर्मफलंतस्मात्माभूत्कदाचनकस्यांचिदवस्थायामि
त्यर्थःयदाकर्मफलंतस्मात्स्यात्तस्मात्माकर्मफलहेतुर्भूःयदाहिक
र्मफलंतस्मात्प्रवृत्ताकर्मणिप्रवर्त्तेतेतदाकर्मफलस्यैवजन्मनो
हेतुर्भवेत् यदिकर्मफलंनेष्यतेकिंकर्मणावहुक्रमेणानुष्ठितेने
तिमातेनतवसंयोगोस्त्वकर्मण्यकरणेप्रीतिर्माभूत् ४७ ॥

रामानुजभाष्य

अन्तःसत्वस्यमुमुक्षोर्ज्ञातव्यादेवोपादेयमित्याहनित्येनैमित्तिके
काम्येचकेनचित्फलविशेषेणसंबद्धतयाश्रूयमाणेकर्मणि
नित्यसत्वस्थस्यमुमुक्षोस्तेकर्ममात्राधिकारः अधिकारेनुबं
धितयावगतेषुफलेषुनकदाचिदप्यधिकारःसफलस्यबंध
रूपत्वात्फलरहितस्यकेवलस्यमदाराधनरूपस्यमोक्षहेतुत्वा
त्माकर्मफलयोर्हेतुर्भूः त्वयानुष्ठेयेकर्मणितवाकर्तृत्वमप्य
नुसंधेयंफलस्यापिक्षुन्निवृत्त्यादेर्नत्वेहत्वमनुसंधेयंतदुभयं
गुणेषुवासर्वेश्वरेमयिवानुसंधेयमित्युत्तरत्रवक्ष्यतेएवमनुसंधाया
कर्मकुरुअकर्मण्यननुष्ठानेनयोत्स्यामीतियत्त्वयाभिहितंतत्रतवे
संगोमास्तु उक्तेनप्रकारेणयुद्धादिकर्मण्येवसंगोस्त्वित्यर्थः ४७ ॥

अभिनवगुप्तटीका

अतस्त्वं कर्ममात्रे त्वयाहृतो भवन तु कर्मफलेषु तत्र कर्मणि कृतेनो
५इति नरीयकनयैव फलमापनति मैव तत्र हि यदि त्वं फलकामनाका
लुष्यमाणो भवसि तदा कर्मणां फलं प्रति हेतुत्वे यदा प्राप्ते मातेफलं ध्य
ज्ञानेनानिच्छोत्तादिति कर्माभावेन यः संगः स एव गाढग्रहरूपो मिथ्या
ज्ञानस्वरूप इति त्याज्य एव ४७ ॥

परमार्थप्रपाटीका

अथोक्तमप्रमेयपर्यवसितमर्थमहि कर्माणीति तत्त्वज्ञानार्थिनास्ते
तवेश्वरकृपया कर्मण्येवाधिकारोस्तु न फलेष्वधिकारो मास्तु स्वर्गा
दिफलभोगाधिकारो मास्त्वित्याशी तथा त्वमपि कर्मफलहेतुर्मा
भूः कर्मफलभोगहेतुर्निमित्तमाभवं तव चित्तं कर्मफलसंकल्पाभि
निस्पृशत अथ संगात्कर्मणः फलावश्यभावनियम इति प्रसिद्धेः फ
लं भविष्यत्येव तस्मात्कर्मैव न कार्यमित्याशंक्याह मेति न अकर्मणि क
र्माकरणे संगो निष्ठामास्तु स्वल्पमिम त्र हि शपईश्वराणत्वनभाजनसाम
ग्रीसंपादनवत्कर्म कार्यमित्यर्थः ४७

वनमालीटीका

ननु निष्कामकर्मणात्मज्ञानं संपाद्य परमानंदप्राप्तिः क्रियते चेत्तर्ह्यथम
नेआत्मज्ञानमेव संपाद्यतां किं बह्वायासैः कर्मभिर्बहिरंगसाधनैः अत
चित्र ८ नवित्तेपकैरित्यतआह कर्मणीति तत्त्वज्ञानिमात्रोपलक्षणं ज्ञाति
नो पितवकर्मण्येवाधिकारो न फलेषु फलकामेषु मोक्षप्रतिबंध
कत्वात् अज्ञानिनः कामेष्वधिकारो नास्तीति किमु वाच्यं अज्ञापरो
तत्त्वानेकामानां प्रतिबंधकत्वात् ननु मयेदं भोक्तव्यमिति बुद्ध्यभावे
पि कर्मस्वसामर्थ्यादेव फलं जनयिष्यतीति चेत्तत्राह मा कर्मफलहेतु
र्भूः फलकामनया हि कर्मकर्तृत्वेन फलस्य हेतुत्वं तस्मादकामवन्नित्यं नि
ष्कामसन् कर्मफलहेतुर्मा भूः न हि निःकामेन भगवदर्पणबुद्ध्या कृतं
मदाराधनरूपं कर्म मन्त्रीत्यतिरिक्तफलाय कल्पते ननु यदि फलं न
स्यात्तर्हि किं कर्मणा दुःखरूपेणेति तत्राह मा ते संगोस्त्वकर्मणि
कर्मणो मत्प्रसादरूपमहाफलहेतुत्वेन निःफलत्वाभावात् ४७ ॥

ऊम्रमवैजयंतीटीका

नन्वेवं चेन्महो मपि वेदेषु यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र ४८
हे १

गी॰ षुएषजितोलोकःस्वीयनइत्यादीनांकर्मफलतत्त्वप्रतिपादकानां
टी॰ वाक्यानामेवार्थमङ्गीकृत्यसर्वाणिनित्यनैमित्तिकादीन्यपिकर्माणि
हि॰ त्यक्त्वावनमेवगमिष्यामिकिमितियोरूपेणपुष्टकर्मणोनिवृत्तस्तै
वेवत्यंतत्तथैवेभवितुमधिकारोनास्त्येवकिंतुकर्मकर्त्तुमेवास्तीत्याह
कर्मण्येवेति एवकारोऽन्ययोगव्यवच्छेदार्थकस्तेनसहेतुकंविवेकादि
रहितेराजसतामसादिरूपवैराग्यादिकंव्यावर्त्तते एवकवचनेनरा
जसतामसादिककर्मव्याहृत्यर्थम् संसारात्त्रिवेदवतोमोक्षार्थिन
स्तेतवकर्मण्येवराजसतामसंकर्मविहायसात्त्विकेमदाराधनादि
रूपेधर्म्येतेजोदृष्टिदात्यादिनिजवर्णस्वभावजनितेयुद्धादावेवा
धिकारः ननुराजसतामसादिषुवैराग्यादिषुनत्वहंकर्मकरिष्या
मिचेत्कर्मणावध्यतेजन्तुरित्यादिवचनान्ममापिवंधनेभविष्य
तीतिचेत्तत्राहमाफलेषुइहामुत्रवानेकविषयसुखभोगादिरूपेषु
कदाचनकस्मिंश्चित्कालेपितवाधिकारोमास्तुयतःफलस्पृक्त्वे
वकर्मणःसंसारहेतुत्वं मदर्पितफलरूपस्यनिष्फलस्यतुमत्प्रा
प्तिरूपमोक्षहेतुत्वात् ननुतवाधिकारोस्त्येवतन्नुफलरहितेना
पिकर्मणामोक्षःकथंस्याद्यतोनास्त्यकृतःकृतेनेत्यकर्मणैवमो
क्षंप्रतिपादयतीतिचेत्तत्राह माकर्मफलहेतुरिति कर्माणिच
फलानिचतथातेषुहेतुःस्वतंत्रकर्त्तात्वंमाभूःकर्मस्वक्रियमाणेष्व
हमेवेदंकार्यमकरवंकरोमिकरिष्यामिचेतिफलेषुतत्फलेष्वा
हमेवैतस्यसुखभोगादिरूपस्यफलस्यकर्त्तेत्येवंकर्मणांतत्फ
लानांचप्रयोजककर्त्तात्वंमाभूःकिंतुभगवताकृष्णेनैवकारिते
कर्ममयाकृतमहंकरोमिकरिष्यामीत्येवंतयात्मनःप्रयोजक
कर्त्तृत्वादिकंत्यक्त्वास्वस्यप्रयोज्यत्वंमत्वाचकर्मकरिष्यामिचेत्तत्क
र्मोकर्मैवभविष्यतितेनैवमोक्षंप्राप्स्यसीत्यर्थःकर्मण्यधिकारिण
स्तुकर्माकरणेप्रत्यवायएवतिष्ठतेकिंतुनवयःकर्मत्यागी
नस्मिन्पुरुषेसंगोऽपिमाभवत्वित्याह मातेसंगोऽस्त्वकर्मणी
ति अकर्मणिकर्मरहितेपुरुषेतेतवसंगःसमत्वमास्तुनभ
वतु यद्यपितकर्मफलकोऽनेककामनाक्रान्तचित्तकोऽनेकदेवो

यासकेमदाराधनकर्मरहितेपुरुषेनवमवेधोपिमेसारदुःखंददातिनहि
सात्तात्स्वयमेवाकर्मस्पास्पतिवनदुःखंभविष्यतीतिकिमवक्तव्यमित्य
भिप्रायः ४७ ॥

मधुसूदनीटीका

ननुनिष्कामकर्मभिरात्मज्ञानेसंपाद्यपरमानंदप्राप्तिःक्रियतेचेदात्म
ज्ञानमेवतर्हिसंपाद्यंकिंबहायासैःकर्मभिर्बहिरंगसाधनभूतैरित्याशं
क्याह तेनवाभ्युद्यंतःकरणस्यज्ञानोत्पत्त्ययोग्यस्यकर्मण्येवा
तःकरणशोधकेधिकारोमयेदंकर्तव्यमितिबोधोस्तनज्ञाननिष्ठारूपे
वेदांतवाक्यविचारादौ कर्मचकुर्वतस्तवफलेषुस्वर्गादिषुकदाचन
कस्मिंश्चिदप्यवस्थायांकर्मानुष्ठानात्प्रागूर्ध्वंतत्कालेवाषाधिकारोमयेदंभो
क्तव्यमितिबोधोमास्तु ननुमयेदंभोक्तव्यमितिबुद्ध्यभावेपिकर्मस्व
सामर्थ्यादेवफलंजनयिष्यतीतिचेत्तत्राह माकर्मफलहेतुर्भूःफलका
मनयाहिकर्मकुर्वन्कर्मफलहेतुरुत्पादकोभवति त्वंतुनिष्कामःसन्कर्म
फलहेतुर्माभूः नहिनिःकामेनभगवदर्पणबुद्ध्याकृतंकर्मफलाय
कल्पतइत्युक्तं फलाभावेपिकर्मणांमातेसंगोस्त्वकर्मणियदिफलं
नेष्यतेकिंकर्मणादुःखरूपेणेत्यकरणेतवप्रीतिर्माभूत् ४७ ॥

सदानंदीटीका

ननुआत्मबोधःसंपाद्योयदिनिष्कामकर्मभिः स्यानेदायनदानत्र यतित
व्यंमुमुक्षुभिः १ आत्मबोधेकिमायासशतैः कर्मभिरेवचेत् मैवंस्या
चुद्धबुद्धेस्तुचित्तशोधककर्मणि २ मयेदंकार्यमित्येवास्तुबोधःकर्म
कुर्वतः नत्वावेदांतवाक्यानांविचारेत्वधिकारिता ३ कर्माणिकुर्व
तःसम्यक्फलेषुस्वर्गादिषु कर्मानुष्ठानकालेवाप्रागूर्ध्वंवाकदाच
न ४ मयेदमिहभोक्तव्यमितिबोधोपिमास्तुते मयेदमिहभोक्त
व्यमितिबुद्धिविनापितत् ५ स्वसामर्थ्यात्फलंकर्मजनयिष्यतिचे
त्क्षण फलकामनयाकर्मकुर्वन्नुत्पादकोभवेत् ६ माकर्मफलहेतु
र्भूस्त्वंतुनिष्कामएवसन् निष्कामेनकृतंकर्मकृष्णार्पणधियास्व
यं ७ फलायकल्पतेनैवतथैवत्वंसदाकुरु फलंचेत्रेष्यतेनहिकिं

गी॰ स्याद्दुःखात्मकर्मणा ८ इति बुद्ध्या नत्वप्रीतिर्माभूदकरणे कदाच ॥४७

टी॰ नीलकंठीटीका

हि॰ ननु ममापि श्रौपनिषदात्मज्ञानार्थिनः शमप्रवेशस्तत्कथं मां युध्येति प्रेरयसीत्याशंक्याह कर्मण्येवेति कर्मण्येवाधिकारो न ज्ञाननिष्ठायां मा फलेषु संगोस्त्वित्यपकृष्यते कर्मफलं स्वर्गपश्वादि हेतुः कर्मसु प्रवर्तकं यस्य तादृशो मा भूः अकर्मणि अकरणेपि न ते संगोमास्तु ॥ ४७ ॥

आनंदी टीका

अत्र योगयुक्तिमाह कर्मणि रागद्वेषाभ्यां विना स्वजातिविहितेष्व
द्वेषु व ते तवाधिकारः कर्तृत्वम् मा निषिद्धे कदाचन फलेषु नाधिका
रः यागजन्यहिंसायामिव ब्राह्मणस्य युद्धजन्ये शत्रुवधादिना पा
पेषु न कर्तृत्वम् उक्तं वक्ष्यमाणया युक्त्या नहि लोपो नास्तीत्यर्थः अ
त एव कर्मणो युद्धस्य फले हिंसायां हेतुः प्रातकः [illegible] हेतवा
देयस्य सहेतु वादपरो मा भूः तथा हेतुवादाभ्यामेनयोस्य इति कं
स्यमकर्मणि कर्माकरणे न ते संगस्याग्रहो मास्तु ॥ ४७ ॥

+ अथ विज्ञाननात्मा सर्वशास्त्रेभ्यो यदुपादेयं तदर्जनं रामकंठी टीका प्रश्नत्तस्य आदेषु माह +

+ तत्त्वसंप्रत्येवोपदिष्टतत्त्वज्ञानोपपत्तिश्लुहृद्धुसतिपतिवर्णा
+ निर्देहादिभ्यो व्यावृत्तमानात्मप्रत्ययत्वेनमत्वेन चिन्मयज्ञानीरु
पपरं तत्त्वमहमित्यात्मत्वेन प्रतिपद्यमानस्य सतः कर्मण्येवाधिकारो
स्तु यत् कर्म कायवाङ्मनोभिर्निर्वर्त्यव्यापारविशेषात्मकं वर्णाश्रम
विभागेन देशकालावस्थापत्तुरयोगेण विविधं नियतं यत्ताकला
पेन नित्यादिभेदेनावश्यकर्तव्यतया शास्त्रेषु विहितं तस्मिन्नधिका
रः कर्तृत्वं भवतु तदधिकृतस्वार्थसिद्धये प्रवर्तितव्यमित्यर्थः यतः क
र्मतावच्छरीरत्वाव्यभिचारि न कदाचित्केनचित्यक्तं शक्यमत्र
यत्नाद्यवस्थायां कश्चिन्नियमविशेषोलंबनीय एव ततश्च स एव
कर्मविशेषतो याप्नोति आश्रमान्तरकर्मनियमवदित्यमशक्यः स
र्वात्मना कर्मत्यागः किंच प्रसक्तो नामात्यागोपि त्यागाभिधानः स तु
तत्त्वज्ञानबाधतामेवाविष्करोति तथाविधस्य यतो द्वेषतो विना
कस्यचिदर्थस्य हानं न संभवति न चोपादित्सितं प्रियमर्थं विना ^रागद्वेषप्रसंगो दुर्निवारः
द्वेष्यता संभवतीति कर्मत्यागाभिधाने [illegible]
[illegible]
[illegible]
[illegible] यदि च तत्त्वमेकत्वा
त्कर्मणां यथेष्टमनियमेनानुष्ठानमेव त्यागत्वेनाभिमतम् तथा
पि पूर्ववद्रागद्वेषवशान्यथानुपपत्त्या सोयं तत्त्व[illegible]ज्ञतामेवानु
ष्ठातुरभिव्यनक्तीत्यकर्मता वा विरुद्धकर्मता वा निरूपमाननन्त
निजानंदनिर्भरं तत्त्वमात्मत्वेन प्रतिपद्यमानस्य सर्वसाम्यलक्ष
णं परमं समाधिमधिरूढवतः तत्त्वज्ञानाभिनिवेशिनो योगिनो

गी॰
टी॰
द्वि॰

द्वयमप्यनुपपन्नमिति तथाविधस्य तव कर्मण्येवाधिकारोस्तु किं
तु तेषां कर्मणां मनात्मसुजनसमुचितनानाभिसंधानप्रार्थितेषु
इहामुत्र स्वर्गिकविविधभोगात्मकेषु बन्धहेतुषु फलेषु अधिकारो
माभूत् [illegible] तत्त्वज्ञानेन या फलान्यधिकान्यतेषु तेषु कर्मसु प्रवर्तितेन
तेषां तानि क्रियमाणान्येव कर्माणि वासनारूपतया तानि कारणभू
तान्येवानिष्टेन [illegible] नित्यक्रियाफलोपभोगप्रवृत्तये विविध
वासनारूपस्य तेषु तेषु योन्यन्तरेषु तस्य तस्य जन्मनः पुनः पुनः
कारणतां प्रतिपद्यन्ते जन्मवतस्तस्य कर्मणः कर्मवृत्तस्य तस्य फ
लस्य हेतुत्वं भजन्ते इति वासनाजन्मकर्मफलचक्रमेतदनिशमा
वर्तमानमज्ञानां बन्धाय कल्पते इति त्वमपि सामान्यपुरुषवत्
कर्मफलहेतुर्माभूः उक्तया प्रक्रियया कर्मणां शुभाशुभानां
फलानि सुखदुःखात्मकानि हेतुर्जन्मनो निमित्तं यस्य स तथाविधो
यथा न भवसि तथा तत्त्वज्ञाननिष्ठः सन् सर्वेष्वेव कर्मसु तेन ज्ञा
नाग्निना दग्धबीजतामापादयन्परमेश्वरस्वभावसमापत्तिल
क्षणं मोक्षमवाप्नुहीत्यर्थः अन्यस्तु कस्यचिदवस्थायां प्रसक्तस्य
कर्मपरिहारस्य विधीयमानत्वात् घटकर्मेति मन्यसे तन्मतोद्देशे
न कर्मणि संगस्ते तव माभूत् तथापि हि संगः कर्मान्तरवत् बन्ध
हेतुरेवेत्युक्तमेव प्राक् ४७ ॥

लासिकी [illegible] टीका

अथ विजानतः सर्वशास्त्रेभ्यो यदुपादेयं तदर्जुनमुद्दिश्योपदेश
माह कर्मणीति कायवाङ्मनोभिर्निर्वर्त्ये वैदिके स्वाभाविके वा
कर्मण्येवाधिकारः कर्तृत्वं तवास्तु यतः फलाभिसंधिं विना क्रिय
माणानि कर्माणि विनष्टभोगवासनारूपेण बीजभावेनोत्पन्नत्वसं
चारं प्रापयन्ते अतः कर्मफलहेतुः कर्मणां शुभाशुभानां फलानि
सुखदुःखात्मकानि हेतुर्जन्मनो निमित्तं [illegible] तथाविधो माभूस्त्वं
वन् यथोक्तबोधनिष्ठस्य हि कर्माणि ज्ञानाग्निना दग्धबीजतामा
पद्यन्ते तथा कर्मणि अकर्मकरणेपि संगोस्तु निषेध्यमास्त्विति ४७

पंचोलीटीका

सर्वकर्मफले ज्ञानफलेऽन्तर्भवति चेत्तर्हि सर्वैर्ज्ञानमेव संपादनीयं
किं कर्मणा इत्याशंकायां [illegible] अधिकारिभेदकर्मचेति कर्मण्येवेति हे आह
अर्जुन ते तव कर्मण्येवाधिकारः न ज्ञाननिष्ठायां कदाचन कस्यांचि

फलेषु इहामुत्रस्वर्गिकफलेषु कदाचनाधिकारो माभूत्

तदुक्तं न कर्माणि त्यजेद्योगी कर्मभिस्त्यज्यते ह्यसौ कर्मणां मूलभूतस्य संकल्पस्यैव नाशतः इति कर्मणो चेत्तु यत्नैः परित्यक्तं कर्मकारणम् परित्यक्तैः पापैः परित्यक्तमन्यास्तेषां न्निनरकं प्रियेह हि+

दवष्यायां फलेषु कर्मफलतृष्णा माभूत् कर्मफलहेतुः कर्मफ
लप्रापको माभूः तेन तव अकर्मणि कर्माकरणे संगः प्रीतिः मास्तु

रणवीरसमिद्बोधिनी॥

कर्मस्विहं तस्मिन् स्वधर्म एवाधिकारोस्तु तव फलेषु सिद्धेष्व
दौ अधिकारः कदापि मास्त्विति नाहं कर्तेत्यहंकारपरित्या
गात् ईश्वरस्यैव सर्वनियंतृत्वात् एवं हि कर्मफलस्य हिंसा
त्मकस्य हेतुः अहमेव कर्तेति कारणं माभूः ईश्वरस्यैव सर्व
कर्तृत्वात् एवं चेत् किं कर्मणा दुःखरूपेणेत्याशंकायाह मा ते
प्रति अकर्मणि स्वधर्मपरित्यागरूपे संगो मास्तु प्रत्यवायद
र्शनात् ४७॥

मधुभाष्य॥

कर्मण्येवेति तदन्तुपलक्षणार्थं तवज्ञानिनापि न फलकर्त
व्यता किंत्वन्येषामिति न त्वास्ति केषांचिन्मतेस्तीति सद्विज्ञानी
नां पराइस्य मोक्षादिस्त्वभिमवादेः यदि तेषां शुद्धसत्वानां न
स्यात् ज्ञानं कान्येषां उपदेशादेश्च सिद्धज्ञानं तेषां पार्थाष्टिषे
णइत्यातिज्ञानिगणनाच्च कामनिषेधपूर्वात्र फलानि सु
स्वांतश्चेणभवति नहि कर्मफलानि कर्माभावे यतोपि भवति॥
भवंति च काम्यकर्मिणो विपर्ययप्रयत्नेप्यविरोधे अतः कर्मा
करणएव प्रत्यवायः न तु ज्ञानादिना वा कर्मनया फलाप्राप्तो
अतकर्मण्येवाधिकारः अतस्तु देवकार्यं न तु कामेन ज्ञानादि
निषेधेन वा फलप्राप्तिः कामवचनानां तु तात्पर्यं भगवतैवो
क्तं रोचनार्थं फलश्रुतिः यथा भैषज्यरोचनमित्यादि भागवते।
अतः कामी यजेतेत्यर्थः निष्कामत्वान एवं चेति वचनात् वक्ष्य
माणेभ्यश्च वसंते वसंते ज्योतिषा यजेतेत्यादिश्रुतिश्च अतमा
कर्मफलहेतुर्भूः कर्मफलं तत्तु तो हेतुर्यस्य स कर्मफलहेतुः

ममाभूः नहिं न करोमीत्यत आह मातइति कर्मकरणेद्वेषो
माभूदित्यर्थः अन्यफलाभावेपिमत्प्रसादरूपफलभावात्
मच्छावृतस्य उक्ता ह्णीमहे तेपरितोषणायेत्यादिमद्वचना
त् अनिदनाहुपेषत इतरनिंदनाद्वसामान्यविशेषोबाधत
इतिचप्रसिद्धं सर्वानानयनैकमेवमित्यादौ अतानेकान्मत्तो
मेस्पृहयंतिकवित् भक्तिमन्निच्छंतोब्रह्मजिज्ञासांविज्ञायप्र
तां इष्टव्य इत्यादिवचनेभ्यः स्वार्थमेवकंप्रतिनतथास्त्वेहः
किंदत्रसीत्युक्तेसेवादियाचकंप्रतिवक्तुंतरत्तिष्ठइतिलोकप्र
सिद्धन्यायाच भक्तिज्ञानादिप्रार्थनाकार्येतिसिद्ध एवंश्लोकोक्तं
स्पष्टयति ४७॥

कर्मण्येवाधिकारस्त इति तत्त्वज्ञानकामस्य तव कर्मण्येवाधिकार
स्तेनादर्थं ज्ञानमस्तु एवकारस्यावर्त्यमाह माफलेष्विति फलेष्वधि
कारः स्यादेवमास्तु स्वयमेव फलं दास्यतीति चेत्तत्राह मा कर्मफलहे
तुर्भूरिति फलकामः सन्कर्म करिष्यंस्त्वमेव फलहेतुर्भविष्यसि न
हि निष्कामेन ब्रह्मार्पणबुद्ध्या कृतं कर्म फलाय कल्पत इति भावः
तर्हि ज्ञानार्थमेव प्रयतेतेति किं कर्मणेत्याशंक्याह मा ते संगोस्त्विति
अकर्मणि अकर्माकरणे श्रवणभावनाद्युपस्कृतचेतसो जिज्ञासोस्तव मा
संगस्या [illegible] स्त्वित्यर्थः ननु मा फलेष्वधिकारस्ते त्वित्युक्तं तत्र मो
क्षोऽपि सकलानर्थनिवृत्त्यविनाभूतानतिशयानंदात्मकत्वात् परम
फलं पुरुषार्थरूपं तत्र त्वत्राप्यधिकारवर्जनात्तत्साधने ज्ञानसाधने
प्रयोजनाभावात् किंच ब्रह्मार्पणबुद्ध्या कर्मकरणमेव पुरुषार्थस्तत्रापि
पु [illegible] ह्यारब्धकर्मणः प्रकृतत्वात् कर्मण्येवाधिकारस्त इत्येकवचनेन
तस्यैव प्रकरणात् किं तन्मात्रमेव कर्तव्यं किमंतःकरणशुद्धिद्वा
राध्यवसायात्मिकाया बुद्धेः सिद्धये यदेतत्कर्तव्यं तदा कः कामा
दस्य विशेष इत्याशंकापरिहरन्नाह ॥

310

भाषाअनुवाद

जोऐसा कहतेहोकि समस्त कर्मकाफल परमेश्वर की आरा
धनाकरने[illegible]हीसे होगातोहमभगवतका आराधनहीसब छो
ड़करकरै और कर्मकरनेसेक्याप्रयोजनहै इसशङ्काकी निवारन
करनेसिद्धान्त कहतेहै तत्त्वज्ञानके अर्थीजोतुमसो तुमकोकर्म
मात्रकरनेका अधिकारहै औरबन्धनकाहेतुभूत कर्मकेफलकी
अभिलाषकरिये अनेकप्रकारकी कामनाकरनेमेकभी तुमारा
अधिकारनहीहै सोकहोकि कर्मकरनेसे उसका फलअवैहो श्य
होगा जैसेकिआहार करनेसे तृप्ति होतीहीहै कहतेहैकिसोहो
यपरउसका पुन्यपापनही लगता जैसेअज्ञानबालक जोनी
चकाअन्नखाय तउसकाधर्मनजाय क्योंकिधर्मनाशके अर्थन
हीखायासोतुमफलके अर्थकर्ममे प्रवृत्तनहोउ निष्कामकर्मक
रो जोकर्मफलकीतृष्णासेकर्मकरोगेतोकर्मफल प्राप्ति केहेतु
हो[illegible]उगे जबफलकोइच्छासे कर्ममे प्रवृत्तहोगाहै तबफल
औ जन्मदोनोकाहेतुहो आताहै नीच ऊंचयोनिमे जनमि फल
भोगताहै औरजोकर्मफलकोनचाहे तोदुखरूपकर्म करनेसेक्या
प्रयोजनहै ऐसीमतिभीतुमकोमतिहोय अर्थात् नकरनेमेभीरु
चिनहोयतात्पर्य यहकि सकाम कर्मनकरो निष्कामतोअवश्यक
रो ॥ ४७ ॥

दोहा

कर्महिमे अधिकार तव कहुन फलके माहि तुमनफ
लमें हेतुहो तो कर्महिमे संगनाहि ४७॥

311

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सि
द्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८ ॥

शांकरभाष्यं

यदि कर्मफलप्रयुक्तेन न कर्तव्यं कर्म कथं तर्हि कर्तव्यमित्यु
च्यते योगस्थेति योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थं त
त्रापीश्वरो मे तुष्यत्विति संगं त्यक्त्वा धनंजय फलतृष्णाशून्येन
क्रियमाणे कर्मणि सत्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः
तद्विपर्ययजा असिद्धिस्तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा
कुरु कर्माणि कोऽसौ योगो यत्रस्थः कुर्वित्युक्तमिदमेव तत् सि
द्ध्यसिद्ध्योः समत्वं योग उच्यते ४८ ॥

आनन्दगिरिकृतटीका

आसक्तिकरणेन प्रकाचेत्तर्हि क्लेशात्मकं कर्म किमुद्दिश्य कर्त
व्यमित्याशंकामनूद्य श्लोकान्तरमवतारयति यदीत्यादिना वक्ष्य
मानयोगमुद्दिश्य तन्निष्ठो भूत्वा कर्माणि क्लेशात्मकान्यपि विहि
तत्वादनुष्ठेयानीत्याह योगस्थः सन्निति कर्मानुष्ठानस्योद्देश्यं
दर्शयति केवलमिति फलान्तरापेक्षामन्तरेणेश्वरार्थं तत्प्रसाद
नार्थमनुष्ठानमित्यर्थः तर्हि ईश्वरसन्तोषाभिलाषगोचरीभूतो
भविष्यति नेत्याह तत्रापीति ईश्वरप्रसादनार्थे कर्मानुष्ठाने स्थि
तेऽपीत्यर्थः संगं त्यक्त्वा कुर्विति पूर्वेण सम्बन्धः आकाङ्क्षितं पूर .
यित्वा सिद्धिशब्दार्थमाह फलेति तद्विपर्ययजा सत्वाशुद्धिजन्या
ज्ञानाप्राप्तिलक्षणेति यावत्कर्मानुतिष्ठतो योगमुद्दिश्य शेषत
याप्रकृतमाकांक्षापूर्वकं प्रकटयति कोऽसावित्यादिना ४८ ॥

स्वामिकृतटीका

किं तर्हि योगस्थ इति योगः परमेश्वरपरता तत्र स्थित्वा कर्माणि कुरु
तथा संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु तत्फ
लस्यापि ज्ञानस्य सिद्ध्यसिद्ध्योः समो भूत्वा केवलमीश्वरार्पणेनैव कुरु
यत एवंभूतं समत्वमेव योग उच्यते सद्भिश्चित्तसमाधानरूपत्वात् ४८॥

गी॰ टी॰ टि॰

पिशाचभाष्ये

यदि कर्मफलयुक्तेन न कर्तव्यं कर्म कथं तर्हि कर्तव्यमित्यत्रोच्यते योग
स्थः सन्कुरु अत्र हे धनंजय कर्माणि केवलमीश्वरार्थमीश्वरो मे तुष्यत्विति संगं त्य
क्त्वा धनंजय फलतृष्णां त्यक्त्वा क्रियमाणे सत्त्वशुद्धिज्ञानप्राप्तिलक्षणा
सिद्धिस्तद्विपर्ययोऽसिद्धिस्तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा कु
रु कर्माणि कोऽसौ योगः इदमेव सिद्ध्यसिद्ध्योः समत्वं योग उच्यते ४८॥

रामानुजभाष्ये

एतदेव स्पष्टीकरोति राज्यबन्धुप्रभृतिषु संगं त्यक्त्वा युद्धादीनि कर्मा
णि योगस्थः कुरु तदन्तर्भूतविजयादिसिद्ध्यसिद्ध्योः समो भूत्वा कुरु तदिदं
सिद्ध्यसिद्ध्योः समत्वं योगस्थ इत्यत्र योगशब्देनोच्यते योगः सिद्ध्यसि
द्ध्योः समत्वरूपं चित्तसमाधानं ४८ ॥

अभिनवगुप्तटीका

॰ योगस्थित्वा कर्माणि कुरु सामं च योगः

किं तर्हि योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजयः यस्य सर्वे समारंभा
निराशीर्बन्धनास्त्विह त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान्
योगे स्थित्वा कर्माणि कुरु साम्यं च योगः यस्य सर्वे इति यस्य सर्वे
व्यापारा आशीरूपेण बन्धनेन न युक्ता अभिलाषो हि बन्धकः ४८॥

परमार्थप्रपाटीका

तर्हि कथमित्याह योगस्थ इति योगः परमेश्वरस्तत्रैव तत्र
कृतनिश्चयो योगस्थः एवंविधो भूत्वा कर्माणि कुरु अत एव धन
ंजय धनस्वर्गादिषु त्वं जयति तत्त्वेन त्यजति तथाविधस्त्व
मसीत्यर्थः किं कृत्वा संगं त्यक्त्वा कर्तृत्वाभिनिवेशं परित्यज्य
पुनः किं कृत्वा सिद्ध्यसिद्ध्योः समो भूत्वा सिद्धावसिद्धौ वा हर्षवि
षादरहितो भूत्वा यतः समत्वं निर्विकारत्वमेव योग इत्युच्य
ते ४८ ॥

[illegible]
[illegible]
[illegible] ४८॥

वनमालीटीका

पूर्वोक्तमेवविवृणोति योगस्थइति हे धनंजय त्वं योगस्थः सन्संग
फलाभिलाषकर्तृत्वाभिमानं त्यक्त्वा कर्माणि कुरु संगत्यागोपाय
माह सिद्ध्यसिद्ध्योः समोभूत्वा फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्य
क्त्वा केवलमदाराधनबुद्ध्या कर्माणि कुर्वित्यर्थः ननु योगशब्देन प्रा
क् कर्मोक्तं तत्र तद्योगस्थः कर्माणि कुर्विति उच्यते नः कथमेतद्धेतु शंका
मनद्याह समत्वं योग उच्यते यदेतत् सिद्ध्यसिद्ध्योः समत्वं इदमेव यो
गस्य इत्यत्र योगशब्देनोच्यते न तु कर्मेति न कोपि विरोध इत्यर्थः सु
खदुःखे समे कृत्वेत्यत्र जयापजयौ साम्येन पूर्वमात्रकर्तव्यतया प्रकृतत्वादु
क्ता इह तु दृष्टादृष्टसर्वफलकर्तव्यतेति विशेषः ४८ ॥

श्रीमद्वैजयंतीटीका

यस्मादेवं तस्मात् योगस्थइति हे धनंजय योगस्थः योगोऽत्रात्मज्ञान
पूर्वकम् पुरुषोत्तमाराधनरूपं कर्मोच्यते तस्मिंस्तिष्ठतीति तथा
सत्वं मदेकनिष्ठः सन् कर्माणि यानि स्ववर्णोचितानि त्वन्नैमित्ति नि॰
कधुह्यादीनि तानि सर्वाणि कुरु परंतु संगं त्यक्त्वा पूर्वोक्त्वा कर्मधुरुष
स्य [illegible] फलस्वाम्यसंबंधं परित्यज्य पुनः सिद्ध्यसिद्ध्योः जयपराजयादिरू
पयोः समः जयादौ गर्वशून्यः पराजयादौ अविक्लिन्नमनाः भूत्वाप
श्रीकृष्णः करोतीति दैवभवतीत्यात्मा नमात्मीये चेष्टाधीनं मत्वात
योः समो भूत्वेत्यर्थः तस्मादीदृशः समत्वं चित्तस्थैर्यं यत्स एव यो
गशब्देनोच्यतेऽभिधीयते सेवोपतेनयादिहरेंद्रनरेंद्रादिपतानि वि
जित्य तान्य[illegible]नलादिभ्योऽभ्यसनं दत्तवानसि तर्हि कर्मफलत्यागे
जयपराजयादिसमत्वेन तवकोऽतिप्रयासः इति सूचितम् ४८ ॥

मधुसूदनीटीका

पूर्वोक्तमेवविवृणोति हे धनंजय त्वं योगस्थः सन् संगं फलाभिला
षकर्तृत्वाभिनिवेशं च त्यक्त्वा कर्माणि कुरु अत्र बहुवचनात्कर्मण्ये
वाधिकारस्त इत्यत्र जातावेकवचनं संगत्यागोपायमाह सिद्ध्य
सिद्ध्योः समो भूत्वा फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा के

गी॰ वलमीश्वराराधनबुद्ध्या कर्माणि कुर्वित्यर्थः ननु योगशब्देनात्र कर्मो
टी॰ क्तं अत्र तु योगस्थः कर्माणि कुर्विन्त्युच्यते अतः कथमेतदित्याशंक्याभि
६६ मतमाह समत्वं योग उच्यते यदेतत्सिद्ध्यसिद्ध्योः समत्वं इदमेव योगस्थ ग्रसि॰
इत्यत्र योगशब्देनोच्यते न तु कर्मेति न कोऽपि विरोध इत्यर्थः अत्र पू
र्वार्धस्यात्तरार्धेन व्याख्याने क्रियत इत्यपौनरुक्त्यमिति भाष्यकारीयः
पंथाः सुखदुःखे समे कृत्वेत्यत्र जयाजयसामान्येन युद्धमात्रकर्त
सर्वफलपरित्यागेन॰ व्यताप्रकृतत्वादुक्ता अत्र दृष्टादृष्टसर्वकर्मकर्तव्यतेति विशेषः ४८॥

सदानंदीटीका

कथं कर्तव्यमिति चेच्छृणु भूत्वा समाहितः योगस्थः सन्फले कामेक
र्तृत्वाभिमतिं तथा १ त्यक्त्वा त्वं कुरु कर्माणि कृत्स्नान्यपि यदा सदा
त्यक्त्वा हर्षं फलप्राप्तौ विषादं न हि पर्यये कोऽसौ योगस्थ यस्त्वस्याः क
र्म कुर्वीत उच्यते सिद्ध्यसिद्ध्योः समत्वं यत्स योग इह कथ्यते २ ॥४८॥

नीलकंठीटीका

एतदेव विवृणोति योगस्थ इति योगस्थः सन् संगं फलतृष्णां कर्तृ
त्वाभिमानं च त्यक्त्वा कर्माणि तानि नाशं कुरु हे धनंजय सिद्ध्यसिद्ध्योः
कर्मफलस्य विविदिषादेः सिद्धौ असिद्धौ वा समो हर्षविषादशून्यो
भूत्वा कर्माणि कुर्विति संबंधः इदमेव सिद्ध्यसिद्ध्योः समत्वं योग
इत्युच्यते ४८ ॥ ४८ ॥

ज्ञानेश्वरी टी॰ ^स्पष्टोऽर्थः ४८

तर्हि कथमिदं कार्यमित्याह यस्य सर्वे समारंभाः निराशीर्बंधना
स्त्विह त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् समारभ्यन्त इति
ता समारंभाः कर्माणि निर्गता आशीः फलस्पृहैव बंधनं येषां ते यस्य
पुंसः त्यागे सर्वकर्मफलत्यागमित्यादिनाष्टादशे सिद्धान्ते यस्य
सर्वं कर्म हुतं क्रियमाणमेव दग्धबीजवत्प्रसवशक्तिहीनं
कृतं स त्यागी स च बुद्धिमान् स्वार्थसंपादनपटुः न कर्मसंन्या-
सीत्यर्थः ४८ ॥

रामकंठी टीका

^ यतएवमतः ^

^इह शास्त्रविहितानां कर्मणामनुष्ठानेन यथोक्तात्माद्वैतज्ञान
निष्ठत्वलक्षणः समाधिर्योग उच्यते यथा कपिलादिप्रणीत
स्य सांख्यसंज्ञकस्य ज्ञानस्य पातंजलादिप्रणीते चित्तवृत्तिनिरो
धलक्षणे योगे निष्ठा तथेहोपदिष्टस्यात्माद्वयज्ञानस्य कर्मा
नुष्ठानसमाधौ निष्ठेति योगशब्देन सोऽभ्युक्तः तथा तादृशे यो
गे स्थितः आश्रमान्तरपरिग्रहेण कृतप्रतिष्ठः सन् यथोक्तानि क
र्माण्यनुतिष्ठन् कथं संग तत्तदभिसंहितफलप्राप्तिहेतुत्वप्रति
पत्त्या तावन्मात्रोपायलीनचित्तत्वं त्यक्त्वा परिहृत्य एतएव सि
द्धौ फलसंपत्तौ असिद्धौ च तद्विघाते द्वयोरपि निर्विकारत्वात्स
मो निर्विशेषो भूत्वा यथोक्तज्ञाननिष्ठत्वान्नित्यपरिहार्यं यथो
क्तात्मतत्वप्रत्यवमर्षजनितानंदत्वमस्य कर्मणः फलेनानि
त्येन सिद्धेनासिद्धेन वा कश्चित्सुखदुःखात्मको विशेष इति स
र्वे साम्यदशाधिरूढो यथोक्तयोगनिष्ठो भव यतः समत्वं सर्वा
स्ववस्थासु विकारलेशासंस्पृष्टत्वमेव योग उच्यते साम्यप्रा
प्तिरेवास्य निष्ठेत्यर्थः एतएवैतद्योगनिष्ठस्य योगिनो लक्षण
माह ४८ यस्य सर्वे समारंभाः निराशीर्बंधनास्त्विह त्यागे यस्य हुतं
सर्वं स त्यागी स च बुद्धिमान् यस्य यथोक्तयोगाधिकारिणः पु
रुषस्य सर्वे समारंभाः सर्वास्तु क्रियास्तु स्वप्रवृत्ता यावत्पूर्णभाविनो
पि निराशीर्बन्धना भवन्ति स त्यागीति संबन्धः आशीरनित्यभो
गविषयाकांक्षा तदेव बन्धनं संसारहेतुत्वादस्मात्तत्र माशीर्बं

धनेनिष्क्रांताआशीर्यस्मान्निराशीर्यतनाःभोगात्मबंधरहिताइ
त्यर्थः अतएवावश्यानुष्टेयकर्मरूपंसर्वंशुभमशुभंचत्यागोफ
लाद्यासंन्यासेकृतमग्राविवबीजजातेफलप्रसवसामर्थ्यंविना
शायनितिमेमतएवंविधोनित्यकर्मानुष्टेतेवत्यागीत्यागवान्
नपुनःक्लेशभीरुत्वादिनाकर्मणएववर्जस्त्यागीभवतीतियुक्ति
रत्रप्रागेवोक्तासएवंचैवंविधःशमान्प्रशान्पत्रानयुक्तोनत्वयः
कर्मत्यागादिमात्रेज्ञानेमन्यते अतएवंविधोत्कृष्टबुद्धियुक्तं
कर्मसमाचरेत् नकेवलमित्याह ४८ ॥

लासिकी [illegible] टीका

पूर्वोक्तमेवविवृणोति योगस्थइति संगंफलाभिसंधिनाकर्म
णिलीनचित्तत्वंत्यक्त्वा तथाफलस्यासिद्ध्यसिद्ध्योःसमोहर्षवि
षादरहितोभूत्वा योगस्थःसन्कर्मानुष्टीयमानेपि आत्मन्यव
स्थितत्वमप्रमत्ततायोगस्तत्रास्थितःसन् कर्माणिकुरुयतःस
मत्वंसर्वास्ववस्थासुनिर्विकारत्वंयोगःयोगलक्षणमुच्यते अ
नेनश्लोकेनअर्जुनमुपदिश्यबुद्धियोगकर्मयोगयोर्लक्षणंयु
गपदुपदिष्टम् ४८ ॥

पंचोली टीका

यदिफलयुक्तंकर्मनकर्तव्यंकथंतर्हिकर्तव्यंतत्राह योगस्थ
इति हेधनंजयसंगंत्यक्त्वाईश्वरतुष्टिमप्यप्रार्थयन् इश्वरोमेतु
ष्यत्विदमप्यप्रार्थयन्योगस्थःकेवलमीश्वरार्थंकर्माणिकुरुराज
भृत्यवत् किंकृत्वासिद्ध्यसिद्ध्योःसमोभूत्वामनःशुद्धिःज्ञान
प्राप्तिःसिद्धिः तद्विपरीतात्वसिद्धिःतयोःसमःतुल्योभूत्वाक
र्माणिकुरुसिद्ध्यसिद्धिसमत्वंयोगउच्यते ४८ ॥

रणवीरमसिद्धोधिनी ॥

योगेसाम्येस्थित्वाकर्माणिस्वधर्मोविहितानि फलाभिसंधिवादि
त्यत्काकुरु किंच सिद्ध्यसिद्ध्योःसमइति यस्माकर्मसिद्धिःपरेषांत
द्विपरेषामसिद्धिरस्माकं सिद्धिरित्यत्रापिनिर्विशेषोभवेतिता
त्पर्यार्थः ४८ ॥

मधुभाष्य॥

योगस्थइति योगस्थः उपायस्थः संगंफलस्नेहं त्यक्त्वात्तु एवसिद्ध्यसिद्ध्योःसमोभूत्वा सएवचमयोक्तोयोगः इन्द्रस्ययोगाययुज्यस्वेत्याह ४८॥

115

योगस्थः कुरु कर्माणीति योगः संबंधः परमात्मना तादात्म्यलक्षणस्तस्मि
स्तत्रो निवृत्तस्वभावस्सन्हे धनंजय कर्माणि कुर्विति संबंधः अयं भावः
फलं नाम लोके तदुच्यते यत्कर्मणा साध्यते न च मोक्षस्तथा तस्य नित्य
त्वात् पुरुषार्थत्वोक्तिस्त्वौपचारात्परमात्मस्वरूपस्यैव तेन भेदभ्रमो
पाधिनिरसनमेव तत्त्वज्ञानप्रयोजनमिति न केवलं कर्मकरणमेव
प्रयोजनमिति कर्माणीति च वदता द्वितीयाशंकापरिहृता नित्या
दीनि कुर्वित्यर्थः तृतीयशंकापरिहृता सिद्ध्यसिद्ध्योरिति अत्र तु
करणशुद्धिद्वारा ज्ञानस्य सिद्धिर्मेस्तु यद्वा तत्सिद्धिर्मेस्त्विति संकल्प
कर्म माकार्षीरित्यर्थः संगं त्यक्त्वेत्येकांतद्वयार्थः यद्वा संगः क्रि
याकर्तृकर्मरूपा संबंधस्तं त्यक्त्वा सर्वत्र ब्रह्मदृष्टिं विधायेत्यर्थः
नन्वत्र योगो जीवपरैक्यमुच्यते पूर्वं तु योगे त्विमां शृण्वित्यत्र कर्म
योगशब्देनोक्तं तत्किं केन संगतमित्यत आह समत्वं योग उच्यत
इति कर्मनिष्ठसिद्ध्यसिद्ध्योः समत्वं यदिदमपि योगप्राप्तिसाधनत्वा
द्योगत्वं जीवनमिति च योगशब्देनोच्यत इत्यर्थः तत्राशयस्थैवेति
त्यादीनि कर्माणि तावदनुष्ठेयानि न च तत्रायं शास्त्रनिषेधो यत्सूत्रो
गात्येव तानि संपादनीयानीति किं तु लाभे यथामिलितैरेवैः समा
पनीयानि न तु शिवरात्र्यादौ हि कलानि काम्यानि कृत्वा गवादि यत्नं सं
पादयथोक्तांगैरेव संपादितैस्तैः सत्वशुद्धिः साधनीयेत्याशयः ॥

316

भाषाअनुवाद

तो फिरि क्या करना चहिये सो कहते हैं कि हे धनंजय अर्जुन योग करि ईश्वर मे जो एक निष्ठा उसी मे स्थित होय कर्म करो और हंमी इसके कर्ता हैं ऐसा अभिमान त्याग करि केवल ईश्वरार्पण बुद्धि से कर्म करो अर्थात् निष्काम कर्म का फल रूप तत्वज्ञान की प्राप्ति अप्राप्ति मे समता पूर्वक कहे समचित्त होके केवल ईश्वरार्पण जानि कर्म अनुष्ठान करो जिस हेतु ऐसी ही समता को साधु लोग योग कहते हैं क्योंकि इसी मे चित्त स्थिर होता है यह सुबोधिनी का अर्थ है ईश्वरार्पण शब्द का भाव अर्थ यह है कि हम अपने हृदय मे टिके अन्तर्यामी [सब परमेश्वर वि आधीन हैं यही अन्तर्यामी] हमारी वासना के अनुसार शुभ अशुभ जिस कर्म मे हमको लगावते उसी को हम उनकी प्रेरणा से करते हैं ऐसे विचारते [हुये] किये सब कर्मों को भगवत अर्पण करते हैं सोई पंचदशी मे कहा है जानामि धर्मं न च मे प्रवृत्ति र्जानाम्यधर्मं न च मे निवृत्तिः त्वया हृषीकेश हृदिस्थितेन यथा नियुक्तोस्मि तथा करोमि ४८॥

दोहा

स्थित ह्वै अर्जुन योग मैं करहु कर्म संग त्याग ह्वै सम सि
द्धि असिद्धि मैं कहत समयोग विभाग ४८

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शर
णमन्विच्छ कृपणाः फलहेतवः ४९ ॥

शांकरभाष्यं

यत पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मोक्तमेतस्मा
त्कर्मणः दूरेणेति दूरेण अतिविप्रकर्षेण अत्यन्तमेव ह्यवर
मधमं निकृष्टं कर्मफलार्थिना क्रियमाणं बुद्धियोगात् सम
त्वबुद्धियुक्तात् कर्मणो जन्ममरणादिहेतुत्वात् हे धनंजय यत
एवं ततः योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शर
णमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञानशर
णो भवेत्यर्थः यतोवरं कर्म कुर्वाणाः कृपणाः दीनाः फलहेतवः
फलतृष्णाप्रयुक्ताः सन्तः यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लो
कात् प्रैति स कृपण इति श्रुतेः ४९ ॥

आनंदगिरिकृतटीका

किमिति योगस्थेन तत्त्वज्ञानमुद्दिश्य कर्म कर्तव्यं फलाभिलाषे
पि तदनुष्ठानस्य सुलभत्वादित्याशंक्य यथोक्तयोगयुक्ते कर्मस्तु
ववनं तत्र श्लोकमुत्थापयति यत्पुनरिति अवरं कर्म बुद्धिसमत्वविरु
द्धमिति शेषः बुद्धियुक्तस्य बुद्धियोगाधीनं प्रकर्षं सूचयति बुद्धीति
बुद्धिसमत्वासमत्वाभ्यां कर्मणि प्रकर्षनिकर्षयोर्भावे कारणीये
नियच्छति बुद्धाविति यत्तु फलेच्छयापि कर्मानुष्ठाने सकामिनि न
त्राह कृपणेति निकृष्टं कर्मैव विशिनष्टि फलार्थिनेति कस्मात्
प्रतियोगिनः सकाशादिदं निकृष्टमित्याशंक्य प्रतीकमुपादा
य व्याचष्टे बुद्धीत्यादिना फलाभिलाषेण क्रियमाणस्य कर्मणो
निकृष्टत्वे हेतुमाह जन्मेति समत्वबुद्धियुक्तात् कर्मणः तद्धीनस्य
कर्मणो जन्मादिहेतुत्वेन निकृष्टत्वे फलितमाह यत इति योगवि
षया बुद्धिः समत्वबुद्धिः बुद्धिशब्दस्यार्थान्तरमाह तत्परिपाकेति
तज्जुहेन समत्वबुद्धिसमन्वितं कर्म गृह्णाते तस्य परिपाकस्तत्फल

गी॰ टी॰ द्वि॰

भूतावुद्धिस्तुद्धिः शरणशब्दस्य पर्यायं गृहीत्वा विवक्षितमर्थमा
ह अभयेति समग्रमविवक्षित्वा द्वितीयं पक्षं गृहीत्वा वाक्यार्थमाह
परमार्थे तथाविधयथार्थज्ञानशरणत्वे हेतुमाह यत इति फलहेतवे
विहरणेनेति फलेति तेन परमार्थज्ञानशरणं तेनैव युक्तेनिशेषः
परमार्थज्ञानवहिर्मुखानां कृपणत्वे श्रुतिं प्रमाणयति यो वा इति
अस्थूलादिविशेषणमेतदित्युच्यते ४९ ॥

स्वामिकृतटीका

काम्यंतु कर्मातिनिकृष्टमित्याह दूरेणेति बुद्ध्या व्यवसायात्मिकया
कृतः कर्मयोगो बुद्धियोगः बुद्धिसाधनभूतो वा तस्मात्सकाशाद
त्कलकाम्यं कर्म दूरेणावरमत्यन्तमपकृष्टं हि यस्मादेवं तस्माद्बुद्धौ
ज्ञाने शरणमाश्रयं कर्मयोगमन्विच्छानुतिष्ठ यद्वा बुद्धौ शरणं
त्रातारमीश्वरमाश्रयेत्यर्थः फलहेतवस्तु सकामा नराः कृपणा
न॰ दीना यो वा एतदक्षरमविदित्वास्माल्लोकात्प्रैति स कृपण
इति श्रुतेः ४९ ॥ ४९ ॥

पिशाचभाष्यं

यस्मात्समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्म तस्मात्कर्मणः दू
रेणात्यन्तदूरमेवावरं अधमं निकृष्टं कर्मफलार्थिना क्रियमाणं
बुद्धियोगं तत्समत्वबुद्धियुक्तात्कर्मणः जन्ममरणादिहेतुत्वादित्य
र्थः अतएव योगविषयायां बुद्धौ तत्पाकजायां सांख्यबुद्धौ शरण
माश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थय परमार्थज्ञानशरणो भवे
त्यर्थः यतोऽवरं कर्म कुर्वाणाः फलतृष्णाप्रयुक्तास्ते ते यो वा एत
दक्षरमविदित्वा प्रयाति स कृपण इति श्रुतेः ४९ ॥

रामानुजभाष्यं

रा॰ किमर्थमिदमसकृदुच्यत इत्यत आह योयं प्रयाणफलगम्यविषयो वा त
रफलसिद्ध्यसिद्ध्योः समत्वविषयश्च बुद्धियोगस्तद्युक्तात्कर्मणः इतर
त्कर्म दूरेणावरं महदेतद्धि योः कर्मणोरुत्कर्षापकर्षरूपं वैरूप्यं उक्तं बुद्धियोगयु
क्तं कर्म निखिलसांसारिकदुःखं निवर्तकं परमपुरुषार्थलक्ष

णं मोक्षं प्रापयति इतरस्तु परिमितदुःखरूपं संसारमिति अतः कर्मणि
क्रियमाणे उक्तया बुद्ध्या शरणमन्विच्छ शरणं वा सम्यग्ज्ञानं तस्यामेव
बुद्धौ वर्तस्वेत्यर्थः कृपणा हेतवः फलसंगादिना कर्मकुर्वाणाः कृप-
णाः संसारिणो भवेयुः ४९ ॥

अभिनवगुप्तकृतटी॰

बुद्धियोगात्किल हेतोरवरं दुष्फलं विकं कर्म दूरीभवति अतस्तादृ-
शूपा बुद्धौ शरणमन्विच्छ शार्यं यस्त्वयेन सा बुद्धिर्लभ्यते ४९ ॥

परमार्थप्रपा टी॰

अतएव ज्ञानयोगं प्रशंसन्नाह दूरेणेति भो धनंजय बुद्धियोगाज्ज्ञान-
योगात्मकाश्चात्फलोद्देशेन कृतं कर्म दूरेणात्यंतमेवावरमपकृष्टं तथा
चवित्तशुद्धिद्वारा ज्ञानयोगहेतुत्वेनैव कर्म कर्तव्यं तस्मात्त्वं बु-
द्धौ ज्ञाने शरण्यं कर्मयोगमन्विच्छ आश्रयेत्यर्थः हि यस्मात्कारणात्फ-
लहेतवः कर्मकरणे फलमेव हेतुः कारणमिति मन्वानाः पुरुषाः कृ-
पणा विषयस्त्वलंपटाः यद्वा फलव्यतिरेकेण निरर्थकं कर्मेत्येवं मन-
वाः कथं कर्तव्यमिति तेषां कार्पण्यं श्रुतिरपि यो वा एतदक्षरमविदि-
त्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणो अथ य एतदक्षरं गार्गि विदित्वा प्रैति
स ब्राह्मण इति भाष्ये भो गार्गि वचक्नवि यः पुरुषः एतदक्षरं परंब्रह्म
अविदित्वा अज्ञात्वा फलोद्देशेन कर्मकर्ता त्वस्माल्लोकाल्लोका-
न्तरं प्रैति मृत्वा गच्छति स कृपणः स्वविषयभोगेषु तथा एतदक्षरं वि-
दित्वा प्रैति स ब्राह्मणः ब्रह्मरूपो भवति ४९ ॥

वनमाली टीका ॥

यावानर्थ इत्यत्र कर्मफलस्य ज्ञानफलापेक्षया अल्पता योगं कुर्वित्यु-
क्तं तत्र हेत्वंतरमाह दूरेणेति परमात्मविषयबुद्धियोगात्कर्मावरं हे
धनंजय हि यतस्ततो बुद्धौ परमात्मबुद्धौ शरणं प्राप्त्युपायं ज्ञानतदु-
त्पादकसत्त्वशुद्ध्या यावत्तत्कर्मदाराधनरूपं परमात्मविषयबुद्धियोगा-
त्कर्मावरं सकामकर्मयोगमिच्छ कर्तुमिच्छ्येत फलहेतवः फल-
कामावरं कर्मकुर्वंति ते कृपणाः अत्यंतदीनाः सर्वदा जन्ममरणा-
दिघटीयंत्रभ्रमणेन परवशाः यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लो-
कात्प्रैति स कृपण इति श्रुतेः यथा हि कृपणा अतिदुःखेन धनम-

र्जयंतीयत्किंचित्तुच्छसुखमात्रलोभेनदानादिजनितंमहत्सुखमनु
भवितुंनशक्नुवंतीत्यात्मानमेववंचयंति तथामहतादुःखेनकर्माणि
कुर्वाणाःस्वल्पफलमात्रलोभेनपरमानंदानुभवेनवंचिताइत्यहो
मोघ्येतेषामितिकृपणापदेनध्वनितं ४९ ॥

उत्तमवैजयंतीटीका

एवंभूतान्निष्कामकर्मणःसकाशात्सकामंकर्मनिरतिशयेनापकृ
ष्टमित्याह दूरेणेति हेधनंजय हियस्माद्बुद्धियोगात्फलरहितेनक
र्तृत्वाद्यभिमानशून्येनेश्वराराधनरूपेणवकर्मणेहामुत्रचसुखंभव
तिनान्यात्प्येवंनिश्चयवतीयाबुद्धिस्तयानिश्चयात्मिकायाबुद्ध्याचरि
तोयःकर्मयोगःसबुद्धियोगस्तस्माद्बुद्धियोगान्निष्कामकर्मणःस
काशादितरत्काम्यंकर्मदूरेणातिशयेनावरंनिकृष्टंभवतितस्मात्व
बुद्धौव्यवसायात्मिकायांशरणंनिवासंरक्षकंवान्विच्छानुतिष्ठएतद्बु
द्धिमाश्रयस्वेदेवेच्छाकुरुष्वेत्यर्थः ननुबुद्धियोगात्काम्यकर्मणःकुतो
वरत्वमित्याशंक्याहतस्तत्कर्तॄणांफलनिमित्तत्वेनकृपणत्वंभवती
त्याहकृपणाःफलहेतवइतिफलान्येवपशुपुत्रादीन्येवहेतवःप्रयो
जनानियेषांतेतथासकामिनःपुरुषाःकृपणाःप्रतिदीनानित्यसं
सारिणोभवंतीत्यर्थः धनंजयेतिसंबोधनेनयथात्वंशौर्यवीर्या
दार्याद्यात्मगुणेनशत्रून्परिभूयतेषांधनमजयस्तथाकाम्यकर्मात्म
कंशत्रुंतिरस्कृत्यनिष्कामकर्मरूपंधनंजयनोचेत्त्वंकृपणोभविष्य
सीतिसूचितं ४९ ॥

मधुसूदनीटीका

ननुकिंकर्मानुष्ठानेनेवपुरुषार्थोयेननिष्फलमेवसदाकर्तव्यमि
त्युच्यते प्रयोजनमनुद्दिश्यनमंदोपिप्रवर्ततइतिन्यायात्तद्वरंफल
कामनयैवकर्मानुष्ठानमितिचेत्तत्राह बुद्धियोगादात्मबुद्धिसाध
नभूतान्निष्कामकर्मयोगात् दूरेणातिविप्रकर्षेणावरमधमंकर्म
फलाभिसंधानाक्रियमाणंजन्ममरणहेतुभूतं यद्वापरमात्मबु
द्धियोगात् दूरेणावरंसर्वमपिकर्महियस्मात् हेधनंजय तस्माद्बु
द्धौपरमात्मबुद्धौसर्वानर्थनिवर्तिकायांशरणंप्रतिबंधकपापक्ष
येणरक्षकंनिष्कामकर्मयोगंप्रान्विच्छकर्तुमिच्छयेत्तुफलहेतवः

फलकामाप्रवर्तकंकर्मकुर्वन्तितेकृपणाः सर्वदाजन्ममरणादिघटीयं
त्रभ्रमणेनपरवशाः अत्यंतदीनाइत्यर्थः योवाएतदक्षरंगार्ग्यविदित्वा
स्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः तथात्वमपिकृपणोमाभूः किं
तुसर्वानर्थनिवर्तकात्मज्ञानोत्पादकंनिष्कामकर्मयोगमेवानुतिष्ठेत्य
भिप्रायः यथाहिकृपणाजनाअतिदुःखेनधनमर्जयंतोयत्किंचित्
दृष्टसुखमात्रलोभेनदानादिजनितमहत्सुखमनुभवितुंनशक्नु
वंतीत्यात्मानमेववंचयंति तथामहतादुःखेनकर्माणिकुर्वाणाःतु
च्छफलमात्रलोभेनपरमानंदानुभवेनवंचिताइत्यहोदौर्भाग्यंमोघं
चतेषामितिकृपणपदेनध्वनितं ४९ ॥

सदानंदी टीका

ननुनिष्कामकर्माणिकर्तव्यानिकुतोमम प्रयोजनमनुद्दिश्यनमं
दोपिप्रवर्तते १ इतिन्यायाद्वरंकर्मानुष्ठानेफलवांछया किमर्थं
निष्फलंकर्मकर्तव्यमितिचेत्कृपणाः २ फलकामनयाकर्मकृतंजन्मा
दिहेतुकं निकृष्टंतत्त्वविज्ञानहेतोर्निष्कामकर्मणः ३ यद्वात्मबु
द्धियोगात्तत्कर्महेयंयतोखिलं निकृष्टंकिंपुनर्वाच्यंनिकृष्टकाम्य
कर्मणः ४ सर्वानर्थनिवर्तिन्यांबुद्धौतस्माद्धनंजय प्रतिबंधकपा
पस्यक्षयेणपरिरक्षकं ५ निष्कामकर्मयोगंत्वंकर्तुमिच्छाश्रितोभ
व फलकामनयाकर्मयेकुर्वंत्यविचक्षणाः ६ कृपणास्तेसदाज
न्ममृत्युचक्राभ्रमंतिते यथातिकृपणालोकेदुःखेनोपार्जितंधनं ७
दानादिजनितंभोगंकर्तुंशक्ताभवंतिन तथात्यंतप्रयत्नेनकुर्वा
णाःकर्मवैदिकं ८ तुच्छानंदाभिलाषेणवंचिताःकृपणाःस्तुवान्
अहोदौर्भाग्यमेतेषांमोक्षंचेत्याशयोहरेः ९ ४९ ॥

नीलकंठी टी॰

इममेवबुद्धियोगंस्तौति दूरेणेति कर्मफलकामेनक्रियमाणंबुद्धि
योगात्सर्वकामात्निष्कामात्कर्मणः दूरेणहिप्रसिद्धं अवरमत्यंतनिकृ
ष्टं अतोबुद्धौयोगरूपायांतत्फलभूतायांसांख्यरूपायांवातन्निमि
त्तशरणंरक्षितारंआश्रयंवाईश्वरंप्रान्विच्छप्रार्थयस्वतत्प्रीत्यर्थंकर्मा
णिकुर्वित्यर्थः यतःफलहेतवःफलमेवहेतुःप्रवर्तकंयेषांताहृशाः
फलतृष्णावंतःकृपणादीनाःभवंति योवाएतदक्षरंगार्ग्यविदित्वा
स्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः ४९ ॥

आनंदी टीका

अतएवंविधेज्ञानपूर्वंकर्मकार्यंनकेवलमित्याह हियस्मात्
अवरंज्ञानहीनंकर्मबुद्धिःज्ञानेनयुज्यतेइतियोगःकर्मबुद्धियो
गाज्ज्ञानसहितात्कर्मणःसकाशाद्दूरेणास्तिनेतःश्रेयःसा
धयितुमक्षममित्यर्थः अतोयस्मात्सर्वंसमारंभेरत्नकेज्ञानेशरण
मन्विच्छ अत्रैवतत्परोभवकृपणाज्ञानहीनाःफलहेतवःफला
र्थंकर्माणिप्रवर्तन्तेइत्यर्थः ४९ ॥

रामकंठी टीका

यस्माद्बुद्धियोगाद्यथोक्तज्ञानसमाधानाद्दूरेणातिशयेनकेव
लेनहिविरहितंकर्मावरंनिकृष्टंज्ञानशून्यंकर्मसंसारहेतुत्वात्त
तोऽत्यन्ताधममित्यर्थः अतस्त्वंबुद्धौयथोक्तेसम्यक् ज्ञानेशरण
माश्रयमन्विच्छ अभिकांक्षितामेवोपायतयावलंबस्वेत्यर्थः
येतोयेफलहेतवः अनित्यभोगलक्षणफलमेवहेतुस्तत्साध
नभूताशक्रियासुप्रयोजनकंकारणंयेषांतेज्ञानशून्यकर्ममात्रा
नुष्ठायिनःकृपणास्तुच्छफलार्थित्वाद्दीनास्तज्जातिशरीरा
द्यभिमानावच्छिन्नमतएवानित्यभोगात्मकफलंदृष्ट्वातत्रमात्मा
नंमन्यमानाःसंतोदुराचाराः [illegible] ४९ ॥

अतएवंवि धेत्कृष्टबुद्धि युक्तंकर्मसमा चरेत् नकेवल मित्याह दूरेणेति

लासिकी [illegible] टीका

एवंविधोत्कृष्टबुद्धियुक्तंकर्मसमाचरेन्नकेवलमित्याह दूरेणे
ति यथोक्तबोधसमाधानात् हियस्मात् विकर्मदूरेणावरंअ
त्यन्ताधमम् बोधशून्यस्यकर्मणः [illegible] संसारहेतुत्वा
त् अतोबुद्धौसम्यग्बोधनिमित्तेशरणमाश्रयमन्विच्छोपायतया
कर्मावलम्बस्वेत्यर्थः अज्ञानदशायांहिकर्मानुष्ठानेपरात्मः
र्यावलंबनेनात्मनःप्रमात्त्वेनासदाभासमानतया यथास
म्यग्बोधबुद्धिर्नतथासमाधिदशायांतस्याःकदाचित्कत्वात् एत
त्सर्वदासमाधानधनाएवसंचेतयन्ते नान्येप्रमादिनः यतःफल
हेतवःफलमेवतत्साधन[illegible]कर्मसुहेतुःप्रयोजकोयेषांतेफ
लाभिसन्धिनाबोधशून्यकर्मानुष्ठायिनःकृपणामहाफलस्यप
रित्यागात्तुच्छफलार्थित्वाद्दीनाः + ४९ ॥

+ तथाचश्रुतिः योवाएतदक्षरमविदित्वा
गार्ग्यस्माल्लोकात्प्रैति सकृपणइति

गी॰ टी॰ हि॰

यत्पुनःसमत्वबुद्धियुक्तमीश्वराराधनार्थंकर्मप्रवर्तनंतस्मात्कर्त।
व्यं दूरेणेति हियस्मात् हेधनंजयबुद्धियोगात्समत्वबुद्धियुक्तात्
कर्मणःसकाशात्फलार्थिकर्म दूरेणअतिविप्रकर्षेणअवरंनिकृ
ष्टंबुद्धौपरमेश्वरार्पणेकर्मबुद्धौवाशरणमाश्रयमन्विच्छप्रार्थय
स्वपरमार्थज्ञानशरणोभव फलहेतवःफलतृष्णाप्रयुक्ताःकृ
पणाःदीनाः ४९

रत्नचीरसमिद्धोधिनी॥

दूरेणेति हिशब्दोवधारणे बुद्धियोगादिति हेत्वर्थेपंचमीबुद्धिःस
दसद्विवेकरूपातस्यायोयोगःसंगतिस्तस्माद्धेतोः अवरमनुत्कृष्टंस्व
धर्मपरित्यागाज्जुगुप्स्यफलमितियावत् यत्कर्मस्वस्ववर्णाश्रमाचारा
नुचितंतत् दूरेणभवति तेननकिंचित्प्रयोजनमस्तीतिभावः अत
स्तस्यांबुद्धौशरणमन्विच्छप्रार्थयस्वयेनसाबुद्धिर्लभ्यतेशरणं
चात्रउपदेष्टृत्वेनाहमेवातोमामेवप्रार्थयस्वेतियोन्याशयः फलितः
येचफलहेतवोहननादिरूपक्रियाफलस्यनरकादिप्राप्तिलक्षण
स्यहेतवःकारणभूताः एतद्धत्वाहंनरकंगंतास्मीत्यभिमानिनस्ते
कृपणाअतितुच्छाबुद्धिलेशस्याप्यभावादितिभावः ४९

मधुभाष्य॥

दूरेणेति बुद्धियोगात् ज्ञानलक्षणाउपायात् दूरेणातीव
अतोबुद्धौशरणंज्ञानेस्थितिं फलंकर्मह्यतोहेतुर्येषांतेफ
लहेतवः ज्ञानफलमाह ४९॥

म

रामवेदकृष्णसरस्वतीटीका

दूरेणेति अवरं श्रेष्ठमोक्षाख्यफलं स्वर्गन्यवरं चित्तशुद्ध्यादिपदान्निकृष्टफल
त्वादेवावरत्वं फलगतं तस्यावरत्वं साधनेउपचारादेवं विषयकर्मबुद्धि
२ न योगात्तत्साधनभूतात्तु योगात्कर्मयोगाद्धि यतो दूरेण निकृष्ट
४ द् मित्यर्थः तस्माद्बुद्धौ निमित्तभूतायां यच्छरणमवश्यमादेयमित्यादिन
दन्विच्छांगीकुरु तस्य दूरत्वमेवोपपादयति कृपणाः यथाहृ कृपणास्त्वनि कृपणास्त्व
रीत्यणी या अग्राह्यं तामकारइति साधवस्तात् दूरेपरिहरंति एवं तत्वं
बुभुत्सवोपिफलहेतुकर्मविशेषात् दूरे परिहरंतीत्यर्थः अथवाःवं
८ न् कर्मबुद्धिसाधनायोगात् दूरेणापकारकेत्तदुक्तफलदानद्वारेणेत्यादिक
मेसाधयतिसाधितं च ति त्यादिकर्मबुद्धिं साधयतीति यस्मात्तस्मात्तेफ
लहेतवश्चित्तशुद्ध्यादिभिरदृष्टलाभसाधकाः पुरुषाः कृपणाः पतन्तु बुद्धिरेव
त्यर्थः यथाकथंचिदपि साधितेति त्यादिभिर्बुद्धिसिद्धेरिति भावः ततेदेना ४९
वतास्यैवं येन निष्कामं कर्म कर्तव्यमिति उपदिश्य तस्य प्रयोजनं दर्शी
यन्नुपसंहरतिहरिः ४९ ॥ ४९॥

32

भाषाअनुवाद

जितनेकाम्यकर्महैंसबकोनिकृष्टकहेनकारेकहतेहैं अवसायात्मि
काबुद्धिकेद्वारा कियेजोकर्मयोग उनकानामबुद्धियोग और वहज्ञा
नसाधनकाउपायहै निष्कामबुद्धियोगकीअपेक्षासब काम्यकर्मअत्य
न्त अपकृष्टजोकाम्यकर्मऐसाजानउहरानोहे धनंजयबुद्धिशब्दवाच्य
कहेज्ञान तिसकोआश्रयकरि निष्कामकर्मयोगरूप भक्तियोगका
अनुष्ठानकरो चिन्तनीयापालनकरनेवाले ईश्वरहीकोबुद्धिका
आश्रयकरो कर्मफलकेअभिलाषीजोनर सोकृपण औदीनहैं
श्रुतिमेकहाहैकिहेगार्गिइसअक्षरस्वरूप ब्रह्मकोनजानि जोसं
सारसे लोकान्तगामी होतेहैं वेइकृपण अर्थात निकृष्टहै इससे
बुद्धिकहेज्ञान उसमेआश्रय लेउ ४९ ॥

दोहा

हे अर्जुन बहुदूर अरे बुद्धियोगसे कर्म बुद्धिशरणकों
लेहु कृपण फलहेतपर्म ॥४९॥

323

बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते तस्मा
द्योगाययुज्यस्वयोगःकर्मसुकौशले ५०॥

शांकरभाष्यं

समत्वबुद्धियुक्तःसन् स्वधर्ममनुतिष्ठन् यत्फलंप्राप्नोति त
च्छृणुबुद्धीति बुद्धियुक्तःसमत्वकर्मविषयया बुद्ध्यायुक्तोबुद्धियु
क्तःसजहाति परित्यजति इहास्मिन्लोकेउभेसुकृतदुष्कृते पुण्य
पापेसत्वशुद्धिज्ञानप्राप्तिद्वारेण यतःतस्मात्समत्वबुद्धियोगाय
युज्यस्वघटस्वयोगोहि कर्मसुकौशलं स्वधर्माख्येषु कर्मसु वर्त
मानस्ययासिद्ध्यसिद्ध्योःसमत्वबुद्धिरीश्वरार्पितचेतस्तया तत्कौ
शलंकुशलभावस्तद्धि कौशलं यद्बन्धनस्वभावान्यपिकर्माणि
समत्वबुद्ध्यास्वभावात् निवर्तन्ते तस्मात् समत्वबुद्धियुक्तोभवत्वं ५०॥

आनन्दगिरिकृतटीका

पूर्वोक्तसमत्वबुद्धियुक्तस्य स्वधर्मानुष्ठाने प्रवृत्तस्यकिंस्यादित्या
शंक्याह समत्वेति बुद्धियुक्तःस्वधर्माख्ये कर्मन्यनुतिष्ठन्निति शेषः
बुद्धियोगस्य फलवत्वेफलितमाह तस्मादिति पूर्वार्धंव्याचष्टे
बुद्धीत्यादिना ननुसमत्वबुद्धिमात्रान्नपुण्यपापनिवृत्तिर्युक्तापर
मार्थदर्शनवतस्तन्निवृत्तिप्रसिद्धेरिति तत्राहसत्वेति उत्तरार्धंव्या
चष्टेतस्मादितिस्वधर्ममनुतिष्ठतो यथोक्तयोगार्थंकिमर्थं मनोयो
जनीयमित्याशंक्याह योगोहीति नहियथोक्तयोगसामर्थ्यादेव
दर्शितफलसिद्धेरनास्था स्वधर्मानुष्ठानेप्रामेत्याशंक्याह स्वधर्माख्ये
ष्विति ईश्वरार्पितचेतस्तया कर्मसु वर्तमानस्यानुष्ठाननिष्ठस्यया
यथोक्ताबुद्धिस्तत्तुकौशलमितियोजना कर्मणांबन्धस्वभावत्वात्
तदनुष्ठाने बन्धावहःस्यादित्याशंक्य कौशलमेव विशदयति तद्धी
ति समत्वबुद्धेरेवंफलत्वेस्थितेफलितमुपसंहरतितस्मादिति ५०

स्वामिकृतटीका

बुद्धियोगयुक्तंप्रशंसन्नाह बुद्धियुक्तइति सुकृतंस्वर्गादिप्रापकं दुः
कृतंनिरयप्रापकंतेउभेइहैवजन्मनिपरमेश्वरप्रसादेनजहातित्यजति

गी॰ तस्माद्योगायतदर्थायकर्मयोगाययुज्यस्वघटस्व यतोयोगःकर्म
टी॰ सुकौशलेयद्बंधकानामपितेषामीश्वराराधनेनमोक्षपरत्वसंपाद
हि॰ नचातयैसएवयोगः ५० ॥

पिशाचभाष्यं

समत्वबुद्धियुक्तस्तत्कर्मचाचरन्निष्टमफलंप्राप्नोतितेन बुद्धि
युक्तःसमत्वबुध्यायुक्तःजहातिइहअस्मिंल्लोकेउभेसुकृतदुष्कृते
पुण्यपापेसत्वशुद्धिज्ञानप्राप्तिद्वारेणतस्मात्समत्वबुद्धियोगाययुज्य
स्वघटस्वयोगःकर्मसुकौशलंस्वधर्माख्येषुकर्मसुवर्तमानस्यया
सिध्यसिध्योःसमत्वबुद्धिरीश्वरार्पितचेतस्तातयेतत्कौशलंयद्बं
धस्वभावान्यपिकर्माणिसमत्वबुध्यास्वभावान्निवर्त्तन्तेतस्मात्स
मत्वबुद्धियुक्तोभवत्वं ५० ॥

रामानुजभाष्यं

बुद्धियोगयुक्तःकर्मकुर्वाणउभेसुकृतदुष्कृतेनादिकालसंचिते
नेनैवयहेतभूतेजहातिइति तस्मादुक्तायबुद्धियोगाययुज्यस्वयोगः
मु कर्मसुकौशलंकर्मसुक्रियमाणेषुकौशलंतदेवयुज्यतइतियोगस्य इ
र्थः ५० ॥ ५० ॥

अभिनवगुप्तटीका

उभेइतिपरस्परव्यभिचारंदर्शयतितस्मात् यथाहिसुकृतदुःकृ
त तेनस्पृशतस्तथाकरणमेवपरमंकौशलमितिभावः ५० ॥

परमार्थप्रपाटीका

अथध्यात्वेमपंमतत्राहबुद्धियुक्तइतिबुद्धिर्विज्ञानंतेनयुक्तोज्ञानी
पुरुषःस्वर्गप्रापकंतथादुःकृतंमधमयोनिप्रापकंतेउभेजहा
तित्यजति अकृतिरपिपापमकरवमित्यतः कल्याणमकरवमित्युभे
...पतेनेस्मरतः साध्वसाधुनीतेसुकृतासुकृतेतेनपतइति भा
ष्यंमतःज्ञानोत्पत्त्यनंतरंमरणेसमापमकरवमकार्षमितितथाकल्या
णंसुकृतमकरवमितियतेउभेसाध्वसाधुनीसुकृतदुःकृतेयुमतःमु
क्तःसन्नतरतिउल्लंघयति तथापनेनवज्ञातितेपुरुषेकृतानाकृते
कृतेवासुकृतेवासाध्वसाधुनीतपतः नाकामतः तस्माद्धीतेकुरु

नः सुकृतदुष्कृते सुकृतदुष्कृते फलदानाय समर्थे न भवत इत्यर्थः त
स्मात्त्वं योगाय परमेश्वराराधनाय युज्यस्व घटस्व अथ योगस्य स्व
रूपमाह योगः कर्मसु कौशलं । बंधजनकेषु कर्मसु अबंधजन
कत्वसंपादकत्वं कौशलं ५० ॥

वनमालीटीका

एवं बुद्धियोगाभावे दोषमुक्त्वा तत्सत्त्वे गुणमाह बुद्धीति इह कर्मसु
बुद्धियुक्तः समत्वबुद्धियुक्तो जहाति त्यजति उभे सुकृतदुष्कृते पुण्यपा
पे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यस्मादेवं तस्मात्त्वं बुद्धियोगाय युज्य
स्व उद्युक्तो भव यस्मादीदृशः समत्वयोगो भगवदर्पितचेतसस्तदाराध
नेतिः कामकर्मसु प्रवर्तमानस्य कौशलं पटुत्वं हेतूनामपि कर्मणां
वेयनिहृत्वैकपरमात्मनोदाविर्भावरूपमोक्षपर्यवसायित्वं तत्कौ
शलं पूर्वभावः तदीयगमत्कारस्वोर्गयोरपि विनाशेनापदेशादि
तिरूपेण नयथा पुष्करपलाशमापो न लिप्यते न तथैषीकातूलमग्नौ प्रो
तं प्रदूयेत तथा पंते चास्य कर्माणि तानि न स्पृशेपापवरइति श्रुत्या च कर्मनू
पाविद्याया भगवज्ज्ञानेन नाशो बोध्यते न च पुण्यं स्वर्गादिफलदं न शप
तिनत्नभगवदाराधनरूपत्वेन कामकर्मसु तत्तेतानादिफलं दुष्कृत
स्य सर्वस्यैव नाशो निष्टत्वात् न च देहांतरे भक्तयोरेव नाशः प्रारंभ
कयोस्तु भोगादेव नाशः नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति
श्रुतेः प्रारब्धाभिप्रायत्वादिति ५० ॥

कृष्णमवैजयंतीटीका

ननु बुद्धियुक्तस्यैव पुरुषस्य किं फलं स्यादित्यपेक्षायामाह बुद्धियु
क्त इति यस्माद्बुद्धियोगयुक्तः स नु पुरुषः इहास्मिन्नेव जन्मनि उभे सु
कृतदुष्कृते अनंतजन्मसंचिते ऊर्ध्वाधोगतिप्रापके पुण्यापुण्ये ज
हाति त्यजति तस्माद्धेतोस्त्वं योगाय निष्कामकर्मयोगाय युज्यस्व युक्तो
भव ननु पुण्येन पापमपनुदतीति त्वनोसुकृतेन दुष्कृतस्यैव ना
शः स्यात्तेन न केनापि सुकृतस्य बुद्धियुक्तस्तूभे सुकृतदुष्कृते ज
हातीति कथमुपपद्यते इत्याशंकायामाह योगः कर्मसु कौशलमि

नियोयंभगवत्परिचर्य्यारूपोयोगः कर्मयोगस्तदेव शुभाशुभमिश्रिते
षुकर्मसुमध्येयामेवभगवन्नामिप्रतिवंधकानिभवंतितेषांसर्वे
षामपिनाशेकौशलेकुशलत्वेतत्सभावः कौशलंचानर्थमगतेस
योगाविघ्नविनाशः तिवतरशिरोमणिर्भवतीत्यर्थः यद्वाकुशलेते
मेतदेवकौशलंत्तेमरूपस्वार्थेऽणत्तेमरूपस्यभगवतः प्राप्तिसाधन
त्वेनास्यापित्तेमरूपत्वंभवतीत्यर्थः ५० ॥

मधुसूदनीटीका

एवंबुद्धियोगाभावेदोषमुक्त्वातद्भावेगुणमाह इहकर्मसुबुद्धियु
क्तः समत्वबुद्ध्यायुक्तोजहातिपरित्यजतिउभेसुकृतदुःकृतेपुण्य
पापेसत्वशुद्धिज्ञानप्राप्तिद्वारेण यस्मादेवंतस्मात्समत्वबुद्धियो
गायतदुपायायघटस्वयुक्तोभव यस्मादीदृशःसमत्वबुद्धियोगई
श्वरार्पितचेतसःकर्मसुप्रवर्तमानस्यकौशलंकुशलभावः यद्ब
धहेतूनामपिकर्मणांतदभावोमोक्षपर्यवसायित्वंतन्महत्कौश
लं समत्वबुद्धियुक्तःकर्मयोगःकर्मान्यापिसन्दुष्टकर्मतयेक
रोतीतिमहाकुशलःतत्तत्कुशलोयतः येननोपिसन्दुष्टजाती
यदुष्टत्वंनकरोतीतिव्यतिरेकोत्रध्वनितः अथवाइहसमत्व
बुद्धियुक्तेकर्मणिकृतेसतिसत्वशुद्धिद्वारेणबुद्धियुक्तःपरमात्म
साक्षात्कारवान्सन्जहात्युभेसुकृतदुःकृते तस्मात्समत्वबुद्धि
फलायकर्मयोगायघटस्व यस्मात्कर्मसुमध्येसमत्वबुद्धियु
क्तःकर्मयोगःकौशलंकुशलोदुष्टकर्मनिवारणचतुरइत्यर्थः ५०॥

सदानंदीटीका

समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठति पुमांस्तस्यफलंयत्स्यात
दत्रहरिणोच्यते समत्वप्रज्ञयायुक्तःसत्वशुद्ध्यात्मवोधतःजहा
तिपुण्यपापेद्वेसमूलेसफलेकृते २ जीवन्नेवपुमान्मुक्तीभूतोभव एष
निवोधवान् यस्मादेवंततःसाम्यबुद्धियोगायसर्वथा ३ उयु
क्तोभवयोगोसौवर्तमानस्यकर्मसु मोक्षपर्यवसानत्वादतिदक्षोय थि
तोमतः ४॥ ५० ॥

किंच बुद्धीति बुद्धियुक्तः समत्वयुक्तः योगाय समत्वबुद्धियोगाय
युज्यस्व घटस्व योगः सिद्ध्यसिद्ध्योः समत्वबुद्धिः कर्मसु बंधकेष्व
पि कौशलं बंधनिवर्तकत्वसंपादनं ननु बुद्धियुक्तः कर्मभिर्दुष्कृतं
त्यजतु धर्मेण पापमपनुदतीति श्रुतेः सुकृतेन सजातीयत्वात्ते प
दुष्परिहरमिति कथमनेन सुकृतदुष्कृते जहातीत्युच्यते सत्वशुद्धि
ज्ञानोत्पत्तिद्वारेत्यभिप्रायः अर्वाञ्चस्तु दुष्कृतत्यागमङ्गीकृत्या
भ्युपेत्य फलत्यागात् सुकृतत्यागोऽपि कर्मयोगिनो भवति दुष्कृ
तफलवन्मोक्षप्रतिबंधकत्वं फलस्यानुत्पादात् यत्त्वापस्तं
बेनोक्तमाम्रवृक्षनिदर्शनेन नांतरीयकं सुकृतफलमुक्तं तेन तत्फलत्वे
नोपपद्यते नांतरीयकत्वादेव तस्मात्फलद्वारा मोक्षस्य प्रतिबंधके
त्व क्रियमाणेऽप्येवं सुकृतदुष्कृते कर्मयोगी जहाति ज्ञानी तु संचितेऽपि
जहातीति तयोर्विशेष इत्यर्थः ५० ॥

ज्ञानेदी टीका

बुद्धियुक्तःज्ञानसमन्वितकर्मकर्ताउभेसुकृतदुष्कृतेजहाति
रागद्वेषाभ्यांविनाप्रवृत्तेस्तयोःफलेननसंबध्यते तस्माद्योगा
यज्ञानकर्मणोःसमुच्चयाययुज्यस्वयोगीभवयोगःज्ञानसमुच्च
यएवकर्मसुकौशलंकर्तुःप्रवीणता ५० ॥

+ अतएवविलक्षणस्यज्ञानिनःस्वरूपंप्रति रामकंठी टीका पादयितुमाह +

+ इहात्मैवपरमेश्वरएकंतत्त्वंसएवचस्वमायामहिम्नाज्ञेयभावा
पादनेनसर्वस्यकार्यजातस्यैकःकर्तापारमार्थिकःविचित्रंच
दंकार्यंनिर्मिमाणःस्वेच्छामात्रव्यतिरिक्तंनतस्योपादानमपेक्ष
तेनापिसहकारिणं नचेदमित्यमवभासमानमपिकार्यंचिन्मा
त्रस्वरूपत्वादतिरिक्तंविकारलेशंकिंचिदर्पयितुंप्रभवति न
दैवंविधनित्यनिरतिशयैश्वर्ययुक्तमेकंतत्त्वमात्मत्वेननिष्प्र
पंचपयाप्रतिपत्त्यायःप्रत्यवमृशति सबुद्ध्यापरमेणबोधेन
सम्यग्ज्ञानेनयुक्तःसंबद्धइहोच्यते सैदंविधइहापदेशमा
नेकर्मयोगेधिकृतःकुर्वन्नपिकर्माणिस्वस्वभावानुप्रवेशात्सर्वे
समत्वेनपश्यन्निदंस्वर्गादिसुखफलहेतुत्वात्सुकृतंसत्कर्मेदं
दुःखहेतुत्वात् दुष्कृतंदुष्कर्मेत्यनुत्पन्नविवेकज्ञानैकविध
मदर्शिभिःपरिकल्पितभेदंसुकृतदुष्कृतेद्वेअपिजहातित्यज
तिनतस्ययोगिनःसर्वसमत्वसमाहितस्यक्रियमाणमपिक
र्मसुकृतदुष्कृतलक्षणंभेदंजनयतीत्यर्थः एवमनेनश्लोका
र्थेनतत्त्वज्ञानवान्नियतंकर्मकुर्यादेव नचतत्रापारमार्थिकंस
दसद्विकल्पमारोपयेदित्युपदिष्टंभवति यतएवंतस्मात्त्वंयथो
क्ततत्त्वज्ञानाभिनिविष्टःसन्समाधयेयुज्यस्वयोगायस्वकर्मा
नुष्ठानद्वारेणयुक्तोभव यतःकर्मसुक्रियमाणेषुयत्कौशल
युक्तंज्ञाननिष्ठत्वेनसाधकारित्वंसएवयोगः समाधिरिहमान्यः
[illegible] ५० ॥

लास्मिकी [illegible] टीका

प्रत्यगात्मबोधेसमाहितःजनानिकर्माणिकुर्वन्नपि प्रत्यस्तम
यबोधवतउक्तसुनयाकर्मानुष्ठानमहिमानमाह बुद्धीति ईश्वरा
भावानुप्रवेशादुभेपुण्यपापेसम्यग्बुद्ध्यंस्वयोगायसमाधानाय

बुद्धेःप्रत्यगात्मबोधे
युक्तःसमाहितः इह
जन्मनिकर्माणिकुर्व
न्नपि

४ त्यजतिनतुकर्मकुलाणिव तत्त्वनिष्ठस्यकर्माणि
पुण्यपापानिसंचयरु प्रयान्तिनैवलिप्यन्ति
क्रियमाणानिवाधुनेति तस्मात्

गी॰ स्वस्वरूपमत्त्वमर्थस्वरूपाययुज्यस्वघटस्वकर्मानुष्ठानद्वारेण
टी॰ युक्तोभव यतःकर्मसुक्रियमाणेषुकौशलंबोधनिष्ठत्वंयो॰
हि॰ गःनान्यःकेवलंनिरोधलक्षणः ५॰ ॥

पंचोलीटीका

समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठन् यत्फलंप्राप्नोतितदाह
बुद्धियुक्तइति बुद्धियुक्तःसमत्वविषययाबुद्ध्यायुक्तःइहस्मि॰
स्मिंल्लोकेउभेसुकृतदुःकृतेपुण्यपापेजहातिपरित्यजतित॰
स्मात्योगायसमत्वबुद्धियोगाययुज्यस्वघटस्वयोगःसमत्व
बुद्धिःकर्मसुकौशलंबंधकमपिकर्मसमत्वबुद्धियुक्तंविमु॰
क्तिहेतुरिति ५॰

रसवीरसमिद्धोधिनी॥

बुद्धियुक्तइति एवंचमदर्पितयापूर्वोक्तलक्षणयाबुद्ध्यायुक्तस्यपु
ण्यपापसंबंधोनास्तीति ततोहेतोर्योगायस्वोचितकर्मविषये
यत्कौशलमुयोगरूपंतदर्थंयुज्यस्वसन्नद्धोभवेति ५॰

मधुभाष्य॥

बुद्धियुक्तंइति सुकृतमप्यप्रियंमानुष्यादिफलंजहाति नद्वद्
स्फलमुपासनादिनिमित्तं नद्दास कर्मन्नीयते अविदित्वास्मि
ल्लोकेजुहोति यजतेतपस्तप्यते बहूनिवर्षसाहस्राण्यंतवदे
वास्यतद्भवतीत्यादि श्रुतिभ्यः अतकर्मन्तयश्रुतिरज्ञानिविष
या सर्वत्र उभयत्नयश्रुतिरनिष्टविषया नहीष्टपुण्यन्नयेकिंचि
त्प्रयोजनं नवेष्टनाप्तोज्ञानिनोयुक्तः इष्टाश्चैकविद्विषयाः स
यदिपितृलोककामोभवतिसंकल्पादेवास्यपितरः समुत्तिष्ठ
ति प्रजापतेः सभांवेश्मप्रपद्ये यशोहम वामिब्राह्मणानांवी
भिर्वीयानेवां त्रसाद्यवात्मनोयद्यत्कामयतेतत्तत्सृजते कामा
भिकामसृष्ट्यनुसंचरन् सएकथाभवतीत्यादि श्रुतिभ्यः बहू

तेप्यात्मसुखस्य तु नरिष्टत्वात्कर्मसाध्यत्वेन विरोधः अनुभव
प्राप्तिश्चेष्वरप्रमाणसाध्युतेस्य नच शरीरपातनात्सुवर्गमेतत
मतत्रपर्यैति एतमानंदमयमात्मानमुपसंक्रम्येत्याद्यु
नरत्र श्रवणात् नचैकीभूतएवब्रह्मसुत्तमः मनस्यादिप
देशाने किन्तु दुःखतरंभवेदित्यादिनिंदनान्मोक्षधर्मे परि
ह्राये पृथग्भोगाभिधानाच्च सूकादीनां पृथक् पृष्ठेश्च जगा
द्यापारवर्ज्यमित्याद्येश्वर्यमर्यादोक्तेश्च दुःखज्ञानमपाप्ति
त्यममस्तायुत्पर्यमागतांइति च उपाधिनाशेनापाश्च प्रतिबिं
बस्य नचैकीभूतस्य पृथग्ज्ञानेमानंपश्यामः आत्मदुःखीना
समिति ज्ञानविधाहेष्वस्य अनेन रूपेणेति च भेदाभावा
त् नच प्रतिबिंबस्य बिम्बकालोके पश्यामः उपाधिनाशे
मानेवा मन्नस्यादिपरे ज्ञानइति दुःखात्मकलोके यावद
समाविवादिष्वुपाधिनित्यत्वाभिधानाच्च अतोन्यवचनं
प्रतीयमानमप्यौपचारिकं दृष्टश्चते भगवतोभिन्नानु
रूपेन प्रतिपन्नस्वेवासपकथेत्यादिषु भेदेन प्रतीयते विरो
धे तद्युक्तिमतामेव बलवत्त्वं दुःकथयत्योगोक्ताः मन्नस्यादी
त्यादयः अतोजले जलैकीभाववदेकीभावः अंकच यथो
दकमुदकमुद्धं यथानयद्गत्यादौ तत्राप्यन्योन्यात्मकेष्व
संभवः अस्तिवेषत्समृद्वेपिहारि मद्वत्वादन्यत्र दृष्टिः ता
एवायोदतोनस्यसरुष्टिः सांसितबतइति मद्वकोमेसम
र्योनांभेदज्ञानाच्च नचैतस्मात्सर्वंत्येतेप्रसम्मानाद्यःस्वराः
यत्तेपदंदिवेकल्प्यमितिनिषेधाच्चनारदीये सविवाहश्रुति
स्मृषः कृतोमोक्षधर्मेषुबलवांश्च सविचारोनिर्णयोवाक
माद्यात् अतोयत्रनान्यत्पश्यतीत्याद्यपिनद्वयीनसत्तादिवा
दि अन्यथाकथमेषयोदिःस्यात् नचतन्मयामयमित्युक्त
म् अन्यथाकथंतत्रैवसपकथेत्यादिस्यात् नचतद्वैमारीः

…स्येत्यादिविशेषः वैलक्षण्यात् छरीराणां अभौतिका
निछिन्नानि नित्यापार्थिवनिर्मितानीश्वरमायया न तथा चो
क्तं शरीरं जायते तेषां सोऽप्याकलयेवत् इति नारायणश्रु
तकल्पे वदंति च लौकिकदेहवैलक्षण्येऽभावमाह अप्रहृष्ट
मना नेदं सुखदुःखं वा सत्यादि निरुक्तभावाच्च नता
निशरीराणि तथा हि श्रुतिः अशरीरीतच्छरीरमभवदिति
न हि तानि शरीराणि विभवंति सर्गेऽपि नोपजायंते प्रलयेन व्य
थंति चेति वचनात् प्रयोगाच्च अतीन्द्रियाश्च नाशवाश्चातिष्ठं
शतगंधिनः देहेंद्रियासुहीनानां वैकुंठपुरवासिनामित्या
दिस्मृतेः देहे शेव नवैषामन्या गौणी मुक्तिः बहूनामपि मुक्तेन
यावच्छेतं न गच्छति योगी तावन्न मुक्तः स्यादेष शास्त्रस्य नि
र्णय इत्यादिस्मृतिवाक्यस्य नरुन्यमुक्तिनिषेधात् येत्वेवंभ
गवंतं प्रविशंति तेऽपि पश्चात्तेनैव यांति योग्यत्वे चात्र विव
क्षितं युधिष्ठिरप्रश्न इन्तरनिंदनाच्च सायुज्यवशदर्शनात् न
उक्तेश्च भुंजते पुरुषसाप्ययायादेव पुरुषाद्यः तथा मुक्ता
वुस्मायां वा स्वान्भोगान् सभुंजते इति नारायणष्टकल्पक
ल्पे अतो निष्टस्येव वियोगः सोऽस्य च सर्वात्मना अद्वःख
सर्वदुःखविवर्जिताः अशोकमहिमानं तवयत्रगत्वा न शो
चतीत्यादिश्रुतिभ्यः विशेषवचनाभावाच्च येषां त्वीषद्
प्रयतते न सायुज्यं प्राप्ताः सामीप्याद्येवनेषां अतः प्रारब्ध
कर्मशेषभावात् त् दुःखं सायुज्यं गच्छति नत्वोक्तं सकर्षण
दयः स्वाधिकारादनंतरं प्रविशंति परं देवं विष्णुनास्य अस्त
प्राय इतिव्याससयोगे अतो निष्टस्य सर्वात्मना वियोगः पर
श्च सर्वमिच्छामि परश्च सजनताहदेनेत्यादिना अस्मादि मि
राप्रिप्राथिनत्वात् नमो वलस्तूपाः किं विदर्थिकवा सरव कविन
मरने वे मनमानेदवा श्रुतोगिचरं मदादि त्यादेश्च असदादिप
दादप्पथिक नमसर्वसं चमोक्ष इति सिद्धं अतो योगाद्यभ्युच्छज्ञा
नोपायापत्तिक मैच्छमलम् नष्टपापमाह ५०॥

बुद्धियुक्त इति बुद्धेस्तत्त्वज्ञानस्य साधनत्वेन संबंधियस्य तं योगः तद्यस्मि
न्निति बुद्धियुक्तः पुमान् यतः इह मानुष्यदेहे उभे सुकृते नेविधाद्वयमा तदुष्कृ
पत्त्रं कर्ममात्रं कर्मयोगोऽत्रैव यावृथा जहाति तस्माद्योगाय कर्मयोगाय
कर्मयोगं कर्तुं युज्यस्व घटस्व समर्थः अंतनोऽर्जुनं निंदन् कर्मयोगं स्तौति यो
ग इति कर्मसु समत्वयोगो यः पूर्वोक्तं कुशलमिति भेदेन कर्मधर्मिभा
वेन किं वक्तव्यं कौशलमेव योगः यः कर्माण्येव सतन्दुष्टकर्मत्वं करोति
तेन चेतनः सत्त्वसज्ञानी यदुष्टनिग्रहे शोकमोहादिभाग्भवसीति
प्रथमाभिसंधिः ननु किं बुद्धिद्वारा सर्वकर्मनाशमात्रमेव कर्मयोग
स्य फलं नयास्सति सर्वस्वहानिरापत्तेस्याशंकामपनुदन्नर्जुनजि
ज्ञासितं निश्चितश्रेयउपयोगित्वं तस्य दर्शयति देवकीनंदनः ५०॥

भाषाअनुवाद

पूर्वजोकहाकि सुखदुःख आदिमे समान बुद्धि होकर स्वधर्मको
करैतो बुद्धियोगयुक्त होनेसे क्याहोताहै सोई बुद्धियोगकी श्रेष्ठता कहते
तेहैं किसुकृतजोपुण्य स्वर्गआदिका देनहार औदुःकृतजो पापनर
कवासप्राप्तिकरनेकासाधन इनदोनोंको बुद्धियोगयुक्त पुरुषइसी ज
न्ममे भगवानकी कृपासे परित्यागकरतेहैं तिससे अर्जुनतुम बु
द्धियोगरूप निष्कामकर्मकरो जिससेयोगकर्मके बीचमे कौशल
कहे चातुर्यहै अर्थात् सकलकर्मबन्धनहोनेके कारणहै तौभी ई
श्वरकीआराधनासेमुक्तिप्राप्तिकरना चातुर्यहै इसीकोयोगकहते
सोबुद्धियोगयुक्तहोउ ५० ॥ ५० ॥

दोहा ॥

बुद्धिवान त्यागतजगतदै शुभअशुभ इहलोय तातेयोगमे
युक्तहो योगहि कुशल कर्ममे होय ५० ॥

33

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्म
बन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

शांकरभाष्यं

यस्मात्कर्मजमिति कर्मजं फलं त्यक्त्वेति व्यवहितेन सम्बन्धः इ
ष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबु
द्धियुक्ताः सन्तो हि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणो ज्ञानि
नो भूत्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धो जन्मबन्धस्तेन विनि
र्मुक्ताः जीवन्त एव जन्मबन्धात् विनिर्मुक्ताः सन्तः पदं परमं विष्णो
र्मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितमित्यर्थः अथवा बुद्धियो
गाद्धनंजयेत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतः संप्लुतोदक
स्थानीया कर्मयोगजा सत्वशुद्धिर्दर्शिता साक्षात् सुकृतदुष्कृत
प्रहाणादिहेतुत्वश्रवणात् ॥ ५१ ॥

आनन्दगिरिकृतटीका

समत्वबुद्धियुक्तस्य सुकृतदुष्कृतत्यागेऽपि कथं मो
क्षः स्यादित्याशंक्याह यस्मादिति समत्वबुद्ध्या यस्मात्कर्मानुष्ठी
यमानं दुरितादि त्याजयति तस्मात्परम्परया मोक्षः सिद्ध्यतीत्य
र्थः मनीषिणो हि ज्ञानातिशयवन्तो बुद्धियुक्ताः सन्तः स्वधर्माख्यं
कर्मानुतिष्ठन्तस्ततो जाते फले देहप्रदे तं हित्वा जन्मलक्षणाद्ब
न्धाद्विनिर्मुक्ता वैष्णवं पदं सर्वसंसारसंस्पर्शशून्यं प्राप्नुवन्तीति श्लो
कोक्तमर्थं श्लोकयोजनया दर्शयति कर्मजमित्यादिना इष्टो देहो
देवादिलक्षणोऽनिष्टो देहस्तिर्यगादिलक्षणस्तत्प्राप्तिरेव कर्मणो
जातं फलं तद्यथोक्तं बुद्धियुक्ता ज्ञानिनो भूत्वा तत्फलादेव परित्यज्य
बन्धविनिर्मुक्तिपूर्वकं जीवन्मुक्ताः सन्तो विदेहकैवल्यभाजो भवन्ती
त्यर्थः बुद्धियोगादित्यादौ बुद्धिशब्दस्य समत्वबुद्धिरर्थो व्याख्यातः
सम्प्रति परम्परां परिहृत्य सुकृतदुष्कृतप्रहाणहेतुत्वस्य समत्वबु
द्धावसिद्धेः बुद्धिशब्दस्य योग्यमर्थान्तरं कथयति अथवेति अनवच्छि
न्नवस्तुगोचरत्वेनानवच्छिन्नत्वं तस्याः सूचयन् बुद्ध्यन्तराद्विशेषं दर्शय

गी॰ नित्सर्वेन इति असाधारणं निमित्तं तस्यानिर्दिशति कर्मजेति यथोक्त
गी॰ बुद्धिशास्त्रार्थत्वे हेतुमाह साक्षादिति जन्मबन्धविनिर्मोकादिरूपदि
हि॰ शास्त्रार्थः ५१ ॥ ५१ ॥

स्वामिकृतटीका

कर्मणां मोक्षसाधनप्रकारमाह कर्मजमिति कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्म कुर्वाणा मनीषिणो ज्ञानिनो भूत्वा जन्मरूपेण बन्धेन विनिर्मुक्ताः सन्तः अनामयं सर्वोपद्रवरहितं विष्णोः पदं मोक्षाख्यं गच्छन्ति ५१ ॥

पिशाचभाष्य

इतश्च फलसंगं त्यक्त्वा स्वधर्मे बुद्धियुक्तत्वमास्थापितं सुदुर्लभत्वाद्गमितं
कर्मफलं॰ तत्कर्मफलं त्यक्त्वा बुद्धियुक्ता ज्ञानिनः मनीषिणो मननशीलाः जन्म
नो बन्धो जन्मबन्धः तेन विनिर्मुक्ताः जीवन्त एव जन्मबन्धनिमित्तातीता सन्तः पदं वैष्णवं मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितमित्यर्थः ॥ ५१ ॥ ५१ ॥

रामानुजभाष्य

बुद्धियुक्ताः कर्मजफलं त्यक्त्वा जन्मबन्धविनिर्मुक्ताः अनामयं पदं गच्छन्ति हि प्रसिद्धमेतत्सर्वासूपनिषत्स्वित्यर्थः ५१ ॥

अभिनवगुप्तटीका

योगबुद्धियुक्ताः कर्मणां फलं त्यक्त्वा जन्मबन्धं त्यजन्ति अतश्च सत्तामवाप्नुवन्ति ५१ ॥ ५१ ॥

परमार्थप्रपाटीका

अथ कौशलेन कृता नो कर्मणां मोक्षसाधनत्वमाह कर्मजमिति व्यवसायात्मिकबुद्धियुक्ता मनीषिणो ज्ञानिनः कर्मजं फलं
यित्वा त्यक्त्वा रणवद्गगणं अनामयं सर्वोपद्रवरहितं पदं गच्छन्ति किं भूताः जन्मबन्धविनिर्मुक्ताः कर्मजफलेहि पुनः जन्मबन्धोरूपं तेन तस्मादिशेषेण निर्मुक्ताः ५१ ॥

वनमालीटीका

उःकृतमात्रस्यापि फलकस्य कृतस्य च त्यागान्मरा फलप्राप्तिर्भव

ल्प॰

तीत्याह कर्मजमिति समत्वबुद्धियुक्ताः कर्मजं फलं स्वर्गादिकं त्य
क्त्वा स्वर्गादिकामनां विहाय विहितं कर्म कृत्वा परमेश्वराय सम
र्प्य बुद्धियुक्ताः शास्त्रजन्यपरोक्षपरोक्षज्ञानिनो भूत्वा तत्तद्द्वारा
मनीषिणो परोक्षज्ञानिनो भूत्वा जन्मादिरूपबंधात् संसाराद् ॐ४
नितरां निर्मुक्ताः संतः अनामयं पदं श्रीवैकुंठाख्यं अभिव्यक्तपूर्णा
नंदस्वरूपं वा श्रीहरिलोकविशेषविग्रहविशेषेण स्थितं ब्रह्म अथ
नामयमनश्वरं गच्छंतीति बहुवचनेन मुक्तो भेदो गच्छतिना लो
कविशेषप्रतिगमनं चेति सिद्धं ५१ ॥

ऊमुमवैजयंतीटीका

ननु सर्वेषामपि सुकृतेनैव सुखं भवति तस्य त्यागाद् परस्तदधिकः
को वा लाभो भविष्यतीत्यपेक्षायामाह कर्मजमिति मनीषिणः निष्का
मश्रीकृष्णभजनेनैव सर्वं भवबंधनिवृत्तिर्भवतीत्यनुरूपायै रिति
वं रूपाध्यवसायात्मिका मनीषा बुद्धिर्विद्यते येषां ते तथा अत एव
बुद्धियुक्ताः सिद्ध्यसिद्ध्योः समत्वबुद्धिविशिष्टाः जन्मबंधविनिर्मुक्ताः
संतः जन्म स्थूलदेहस्य प्राप्तिर्बंधो लिंगदेहस्य वर्तनाभ्यां विशेषेण निर्मु
क्ताः संतः कर्मजं सुकृतकर्मोद्भवमपि सुखभोगादिरूपं फलं त्यक्त्वा
इहामुत्र च सुखादेः तृष्णिसुत्वनिःस्पृहेण तत्परित्यज्य अनामयं आम
यो जन्ममरणादिरूपो रोगस्तद्रहितं पदं वैकुंठं मम स्थानं गच्छंति य
द्गत्वा चतुर्मुखादिलोकसुखमपि निरयतुल्यं मत्वा तत्रापारा
नंदाकूपारे मग्नाः सन्तो मद्भक्ताः पुनः सांसारिकानि तु सुखं नानु
भवंतीत्यभिप्रायः ५१ ॥

मधुसूदनीटीका

ननु दुष्कृतहानमपेक्षितं न तु सुकृतहानं पुरुषार्थभ्रंशापत्तेरित्याशंक्य
न४ तत्फलत्यागे परमपुरुषार्थफलमाह समत्वबुद्धियुक्ता हि यस्मा
त्कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्माणि कुर्वाणाः सत्त्वशु
द्धिद्वारेण मनीषिणस्तत्त्वमस्यादिवाक्यजन्यात्ममनीषावंतो भवंति
तादृशाश्च संतो जन्मात्मकेन बंधेन विनिर्मुक्ताः विशेषेण निःशेषतया
लक्षणेन निरवशेषमुक्ताः पदं पदनीयमात्मतत्त्वमानंदरूपं ब्रह्म

गी॰ नामयमविद्यातत्कार्यात्मकरोगरहितमभयं मोक्षाख्यं पुरुषार्थं ग
टी॰ च्छंत्यभेदेन प्राप्नुवंतीत्यर्थः यस्मादेवं फलकामनां त्यक्त्वा समत्वबु
दि॰ द्ध्या कर्माण्यनुतिष्ठंतस्ते कृतांतःकरणशुद्धयस्तत्त्वमस्यादिवा
क्यप्रमाणोत्पन्नात्मतत्त्वज्ञानतत्कार्याः संतः सकलानर्थनिवृत्ति
परमानंदप्राप्तिरूपं मोक्षाख्यं विष्णोः परमं पदं गच्छंति तस्मात्त्वम
पि यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे इत्युक्तेः श्रेयो निश्चित्य सदैवंविधं क
र्मयोगमनुतिष्ठेति भगवतोभिप्रायः ५१ ॥

सदानंदीटीका

ननु सर्वस्य समत्वपापहानमपेक्षितं पुण्यहानेन कस्यापि पुरुषार्थ
त्वयोन्यथा १ मैवं जन्मपदं पुण्यहेयत्वेन विवक्षितं ननु धीशोधकं
पुण्यमनुष्ठेयं तदीश्वरार्पितं २ तत्फलत्यागसंसिद्धौ कर्ममात्रं विनश्यति
यतः समत्वधीयुक्ताः संत्यक्त्वा कर्मजं फलं ३ ईश्वराराधनार्थं च कुर्वा
णाः कर्म केवलं धीशुद्धिद्वारतो वेदवाक्यजन्यात्मधीयुतः ४ संतो
जन्माख्यबंधेन विनिर्मुक्ताः सुशोभनः आत्मतत्त्वपदं ब्रह्मानंदं मायादि
वर्जितं ५ पुरुषार्थं विमोक्षाख्यं प्राप्नुवंतीह तादृशाः त्वमप्ये
तादृशो भूत्वा गच्छ विष्णोः परं पदं ६ ॥ ५१ ॥

नीलकंठीटीका

एतदेवाह कर्मजमिति बुद्धियुक्ता समत्वबुद्धियुक्ताः क्रियमा
णकर्मजं फलं त्यक्त्वा मनीषिणो मनोनिग्रहसमर्था भूत्वा जन्म
बंधेन रूपेन मुक्ताः संतोऽनामयं निरुपद्रवं पदं मोक्षाख्यं गच्छंति ५१॥

आनंदीटीका

मनीषिणो बुद्धियुक्ता ज्ञानसंयुक्तकर्मकर्तारः कर्मजं फलं त्य
क्त्वा तत एव कर्मणो बंधकत्वाभावात् कर्मबंधादिदं शरीरं कृता
नां कर्मणां फलभोगार्थं भाविनः शरीरस्य ग्रहणं तथापि कृतानां
फलभोगार्थं परस्य ग्रहणमितीत्यस्माद्बलाद्धेयाबंधः संसारल
स्माद्विनिर्मुक्ता अनामयं पदं गच्छन्ति ५१ ॥

+ एतमेवार्थं हेतूपन्यासपूर्वं विपरीतमा रामकंठीटीका

+ यस्मात्कर्मजमतत्त्वज्ञैः क्रियमाणात्कर्मणोऽवश्यंभावि सुखदुःखा
त्मकं फलं सर्वदा सर्वतो निरभिकांक्षस्यात्मनिष्ठत्वात् अत

भिसंधानेनत्यक्त्वाविहायफलाभिसंध्यनुष्ठीयमानकर्मप्रति
बद्धाज्जन्मनःपुनर्भवलक्षणाद्बन्धनादस्मात्तेआविर्मुक्ताःसंतो
निर्विघ्नतयानामयमनित्यसुखादिसंकल्पदोषरहितपदं
पारमार्थिकस्वरूपप्रतिष्ठात्मकंधामगच्छंतिप्राप्नुवंति यतः
त्वंबुद्धियुक्तोयोगाययुज्यस्वेतिपूर्वेणसंबन्धः [illegible]
[illegible]
[illegible]
[illegible] ५१ ॥

लासिकी [illegible] टीका

एनमेवार्थं [illegible]हेतूपन्यासपूर्वंविवरीतुमाह कर्मजमिति दुः
खौघात्मकंफलंप्राप्तमनिष्टतयात्यक्त्वानिरभिलाषत्वात् निर
भिलाषबुद्धियुक्ताबुद्धावात्मबोधयुक्ताःप्रवहिताःसंतःमो
क्षाख्यंप्राप्नुवंति सर्वोपद्रवशून्यंप्रविघातत्क्वाद्यात्मकरोगरहि
ते यतस्त्वंबुद्धियुक्तोयोगाययुज्यस्वेतिपूर्वेणसंबन्धः+ ५१ यदाकर्मयोग
प्रतिष्ठांप्राप्स्यामीत्यपेक्षायामाह+ ॥

पंचोलीटीका

कर्मणांमोक्षसाधनत्वप्रकारमाह कर्मेतिहियस्मात्बुद्धियुक्ता :
समत्वबुद्धियुक्ताःकर्मजंकर्मभ्योजातंइष्टानिष्टमिश्रलक्षणंफ
लंत्यक्त्वामनीषिणोज्ञानिनोभूत्वाजीवतएवजन्मबंधविनिर्मु
क्ताःसंतःअनामयंसर्वोपद्रवरहितंमोक्षाख्यंपदंविष्णोःपरमं
पदंगच्छंति ५१

श्रणवीरसमिद्धोधिनी॥

कर्मजमितिकर्मस्वस्ववर्णाश्रमाचारोचितं तत्रदत्रस्यपुण्यादिकं
हिंसाप्रायत्वान्नरकादिफलकंयद्यप्याभासते तथापिबुद्धियुक्ता
मनीषिणः ईश्वराज्ञैषावयंकर्तव्येतीश्वरार्पणमनीषयातद
नुष्ठानेदग्धीकृतनिःश्रयात्तत्फलंत्यक्त्वानामयंपदंदुःखहीनंस्वर्गा
दिकंस्थानंगच्छंतीतिभावः ५१॥

मधुभाष्य ॥

कर्मजमिति कर्मजं फलं त्यक्त्वा कामनपेक्षाय समत्वबुद्धि युक्ताः सम्यक्ज्ञानिनो भूत्वा पदं गच्छंति सम्यग् कर्मज्ञा तस्मा यनंतन्मोक्षसाधनमिति भावः किंपत्पर्यंतमेव मयं कर्त्तव्या नि मम बुद्धैव कर्माणीत्यत आह ५१ ॥

333

कर्मजमिति बुद्धियुक्ताःपदंगच्छंतीत्यन्वयः बुद्धियुक्ता इति पूर्ववत्
पदमितिपद्यते प्राप्यते तत्वमस्यादिवाक्यैस्तेनांतः करणपरि
णामेनेतिपदमानंदरूपंब्रह्मगच्छंतितादात्म्येन प्राप्नुवंतीत्यर्थः
नकेवलंतदानंदरूपत्वादिष्टंकिंत्वनिष्टपरिहारात्मकमपीत्या
हानामयमितिनास्त्यामयः सविलासाविद्यातदभावात्मकमित्यर्थः
ननुकिंयोगमात्रसाध्यकोपवर्गः नेत्याहमनीषिणइ
ति योगजन्मप्रशस्तज्ञानसंपन्ना इत्यर्थः ननुसत्यपिसंसारे किंज्ञा
नपदंसाधनंनेत्याह जन्मेति जन्मैवबंधस्तेनविशेषेणात्यंतिक
त्वलक्षणेननिर्मुक्ता इत्यर्थः ननुकाम्यकर्मानुष्ठानाज्ज्ञानोत्पत्तौबंधोभ
विष्यतीत्याशंक्याह कर्मजंफलंत्यक्त्वेति पूर्वमेवत्यक्तत्वा
दित्यर्थः एवंचकाम्यकर्मत्यक्त्वाकर्मयोगमनुतिष्ठतस्तेनशुद्धांतः
करणस्यहृदयस्यतत्वमस्यादिप्रमाणैरत्रैवात्मज्ञानंविदग्धस
विलासाविद्यामोक्षपुरुषार्थंगच्छंतमेवंविधंकर्मयोगमनुति
ष्ठेतिभगवतोभिप्रायः ननुकर्मयोगमनुतिष्ठतोमेकियता
वासमयेनसत्वशुद्धिःस्यादित्याशंक्यानात्रसमयनियमः स
त्वशुद्धेस्तुमनः सात्विकत्वात्प्रसन्नोपीत्याशयेनाह

334

भाषाअनुवाद

सुखदुःखआदिमेसमताबुद्धिभी भये औरसहितदुःखन कर्मके फलको परित्यागकियोभी अर्थात्निःकामकर्मकियेसेभी फेरि मोक्ष कैसे होगी इसशंकापरकर्मको मोक्षकी साधनताहैयहकहते कि कर्मकेफलकी अभिलाषा छोड़िकरि केवलईश्वराराधनार्थ कर्मकरतेहुये बुद्धिमानमनुष्यज्ञानीहोके जन्मरूपबन्धनसे छूटिकरि सकलउपद्रवसेरहितजो विष्णुपद जिसकोमोक्षकहतेतिसकोसहजसेमेपावतेहै ५१ ॥

दोहा

कर्मनको फलत्यागके बुद्धियुक्त मुनिलोक जन्मबंध छु
टिजातहै जिहपद दुखन शोक ५१

335

यदातेमोहकलिलं बुद्धिर्व्यतितरिष्यति त॰
दागंतासिनिर्वेदं श्रोतव्यस्यश्रुतस्यच ५२

श्रीशंकरभाष्यटी॰

योगानुष्ठानजनितसत्वशुद्धिजा बुद्धिःकदाप्राप्यतइत्युच्य॰
ते यदेति यदा यस्मिन्कालेतेतव मोहकलिलं मोहात्मक
मविवेकरूपंकालुष्यं येनात्मानात्मविवेकबोधं कलुषीकृ॰
त्यविषयं प्रत्यंतःकरणंप्रवर्तते तत्तेतव बुद्धिर्व्यतितरिष्य॰
ति व्यतिक्रमिष्यति अतिशुद्धभावमापत्स्यतइत्यर्थः तदा ।
तस्मिन्काले गंतासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुत
स्यच तदा श्रोतव्यंश्रुतंच तेनिष्फलं प्रतिपद्यतइत्यभिप्रा
यः ५२ ॥

श्रीआनंदगिरिकृतटीका

यस्मिन्कर्मणि क्रियमाणे परमार्थलक्षणा बुद्धिरुद्देश्यतया श्रू॰
यते तस्मात्कर्मणः सकाशादितरत्कर्म तथाविधोद्देश्यभूत
बुद्धिसंबन्धविधुरमतिशयेन निकृष्यते ततश्च परमार्थबुद्धि
मुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यं परिच्छिन्नफलानुद्दि
श्य तदनुष्ठाने कार्पण्यप्रसंगात् किंच परमार्थबुद्धिमुद्देश्य
माश्रित्य कर्मानुतिष्ठतः करणशुद्धिद्वारा परमार्थदर्शनसि
द्धौ जीवत्येव देहे सुकृतादि हित्वा मोक्षमधिगच्छति तथा
च परमार्थदर्शनलक्षणयोगार्थं मनोमाराधितव्यं योगाश्रा
हितं परमार्थदर्शनमुद्देश्यतया कर्मस्वनुतिष्ठता नेष्यत
मिष्यते यदिच परमार्थदर्शनमुद्दिश्य तद्युक्ताः संतः समार॰
भेरन् कर्माणि तदा तदनुष्ठानजनितबुद्धिशुद्ध्या ज्ञानिनो
भूत्वा कर्मजं फलं परित्यज्य निर्मुक्तबन्धनामुक्तिभाजोभव
न्तीत्येवमस्मिन् पक्षे श्लोकत्रयाक्षराणि व्याख्यातव्यानि यथो
क्तबुद्धिप्राप्तिकाले प्रश्नपूर्वकं प्रकटयति योगेति श्रुते श्रो॰

नवेहहेषु इष्टव्यमित्यादौ फलाभिलाषप्रतिबन्धान्नोक्ता बुद्धि
रुद्देष्यतीत्याशंक्याह यदेति विवेकपरिपाकावस्था कालशब्दे
नोच्यते कालष्यस्य दोषपर्यवसायित्वं दर्शयन् विशिनष्टि ये
नेति तदनर्थरूपं कालुष्यं तवेत्यन्वयार्थं पुनर्वचनं बुद्धिशु
द्धिफलस्य विवेकस्य प्राप्त्या वैराग्यप्राप्तिं दर्शयति तदेति प्र॰
ध्यात्मशास्त्रातिरिक्तं शास्त्रं श्रोतव्यादिशब्देनगृह्यते उक्तं वैरा
ग्यमेव स्फारयति श्रोतव्यमिति यथोक्तविवेकसिद्धौ सर्व
स्मिन्नात्मविषये नैष्कल्यं प्रतिभातीत्यर्थः ५२ ॥

स्वामिकृत टी॰

कदा तत्पदमहं प्राप्स्यामीत्यपेक्षायामाह यदेति द्वाभ्यां मोहो
देहादिष्वात्मबुद्धिस्तदेव कलिलं गहनं विडुरित्यभिधानं तत॰ केषे
श्वायमर्थः एवं परमेश्वराराधनेन क्रियमाणे यदा तत्प्रसादेन त
व बुद्धिर्देहाभिमानलक्षणं मोहमयं गहनं दुर्गं विशेषेणाति
तरिष्यति तदा श्रोतव्यस्य श्रुतस्य चार्थस्य निर्वेदं वैराग्यं गन्तासि
प्राप्स्यसि तयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीत्यर्थः ५२

पिशाचभाष्यम् टी॰

योगानुष्ठानजनितसत्वशुद्धिः कदा प्राप्यत इत्यत्राह यदेति
यदायस्मिन्काले ते तव मोहकलिलं मोहात्मकमविवेकका क
लुष्यं तेनात्मानात्माविवेककलुषीकृतविषयाभ्यंतःकर
णं प्रवर्तते तद्बुद्धिर्व्यतितरिष्यति शुद्धभावमापद्यत इत्य॰
र्थः ५२ ॥

रामानुजभाष्यं टी॰

उक्तप्रकारेण कर्मणि वर्तमानस्य तवाल्पानिर्हृतकल्मष
स्य ते बुद्धिर्यदा मोहकलिलं प्रत्यल्पफलसंगहेतुभूतं मोह
रूपं कलुषं व्यतितरिष्यति तदा श्रोतेऽस्य तस्त्वेत्याज्यतयाश्रु
तस्य फलादेरितः पश्चाच्छ्रोतव्यस्य च कृते स्वयमेव निर्वेदं गं

तासिगामिष्यसि ५२ ॥

अभिनवगुप्तकृतटी॰

तत्र च योगबुद्धिप्राप्त्यवसरे तत्त्वस्फुटमेवेदमभिज्ञानं श्रोतव्यस्य॰
स्य श्रुतस्याभिलष्यमाणस्यागमस्योभयस्यापि निर्वेदभाक्त्वम् अ
नेन चेदमुक्तम् अविद्यापदनिपतितप्रमातॄन्ग्राहकशास्त्रश्र
वणसंस्कारविप्रलम्भमहिमायं यत्तु बाह्यानेऽजलत्वयादिदो॰
पदर्शनम् न तु तथा शासनबद्धमानविगलनेन विगलिष्यती
ति ५२ ॥

परमार्थप्रपा टी॰ ॥

अथ कदा परमात्मानं प्राप्स्यामीत्याह यदेति ते बुद्धिर्यदा मोहकलिलं व्यतितरिष्यति मोहो देहा
त्मबुद्धि स्तदेवं कलिलं गहनं दुरतिक्रमत्वात् ते बुद्धिस्तदतिशेष्यत
रिष्यति उल्लंघयिष्यति तदा श्रोतव्यस्य श्रु
तस्य च फलोपधानस्य निर्वेदं वैराग्यं
गन्तासि प्राप्स्यसि तदुक्तं पा
तञ्जले भोगापवर्गौ बु
द्धिकृतौ बुद्धावेव वर्त
मानौ कथं पुरुषे
व्यपदिश्येते स
हितत्फलस्य

भोक्तेति यथा विजयः पराजयो वा योधेषु वर्तमानः स्वामिनि
व्यपदिश्यते स हि तत्फलभोक्तेति बुद्धिरेव पुरुषार्थापरि

गी॰
टी॰
द्वि॰

समाप्तिर्बंधः तदर्थव्यवसायो मोक्षइति ५१ ॥

वनमाली टीका

ननूक्तयोगो न साक्षाज्ज्ञानहेतुः किंतु श्रवणादिकमेव आ-
त्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेः सत्य-
मदृष्टद्वारा सत्त्वशुद्धिमुत्पाद्य श्रवणादीनां उपकरोति
तदा कियत्कालमनुष्ठेयमत आह यदेति यदा ते
बुद्धिरंतःकरणं मोहकलिलं देहगेहादावहं
ममेत्यन्यथा ज्ञानरूपं दोषं मत्प्रसादा-
द्व्यतितरिष्यति नाशयिष्यति तदा महत्तः
श्रोतव्यस्य श्रुतस्य च वेदादेः
निर्वेदं नितरां लाभं गं-
तासि प्राप्स्यसी-
त्यर्थः
५२

श्रोतव्यः ५२

ऊरुमवैजयंतीटीका

नन्वेवंभूताव्यवसायात्मिका बुद्धिर्मम कदा भविष्यतीत्यपेक्षायां
श्लोकद्वयेनाह यदेति यदा यस्मिन्काले यस्यामवस्थायां वा मदुक्त
प्रकारेण स्ववर्णधर्मोचितकर्म कुर्वतः फलाभिलाषरहितेन शुक
षोत्तमाराधनरूपकर्मणा त्यक्तदग्धकिल्बिषस्य ते तव बुद्धिर्मोहक
लिलं शरीरेषु तत्संबन्धिषु चात्मीयरूपो यो मोहस्तदेव कलिलं अ
गाधापारपंकं व्यतितरिष्यति विशेषेणातिशयेन तरिष्यति त
दाश्रुतस्य पूर्वं श्रवणपथागतस्य स्वर्गादिफलस्य श्रोतव्यस्य चैहामु
ष्मिकफलश्रवणार्हस्य मोक्षपर्यंतस्यापि निर्वेदं वैराग्यं त्वं गंतासि
गमिष्यसि देहाद्यनात्मवर्गेषु अहंममरूपाभिमानाभावं कृत्वा परदाफ
लविषये विरक्तिलक्षणः तत्पतितदैव तव बुद्धिर्मदेकनिष्ठिका भविष्य
तीति भावः ५२॥

मधुसूदनीटीका

न ह्येतावता कालेन सत्वशुद्धिर्भवतीति कालनियमोस्ति किंतु य
दा यस्मिन्काले ते तव बुद्धिरंतःकरणं मोहकलिलं व्यतितरिष्यति ।
अविवेकात्मकं कालुष्यमहमिदं ममेदमित्याद्यज्ञानविलसितम
तिगहनं व्यतितरिष्यति रजस्तमोमलमपहाय शुद्धभावमापत्स्य
त इति यावत् तदा तस्मिन्काले श्रोतव्यस्य श्रुतस्य च कर्मफलनि स
र्वेदं वैतृष्ण्यं गंतासि प्राप्तासि परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो
निर्वेदमायादिति श्रुतेः निर्वेदेन फलेनांतःकरणशुद्धिं ज्ञास्यसीत्य
भिप्रायः [illegible]
[illegible] ५२

सदानंदीटीका

एवं मे कुर्वतः कर्मचित्तशुद्धिः कदेति चेत् न कालनियमस्तत्र श्रूयतां
भोः समाहितः । यस्मिन्काले निकालुष्यमविवेकात्मकं मलं अहंम

एवं कर्म कुर्वतः अंतःकरण
शुद्धिः [illegible]

मेदमित्येवमाद्यविद्याविजृंभणं २ अत्यंतगहनेतीतंतवांतःकरणं
यदा शुद्धिमापत्स्यते तत्तदा राजसतामसमलं ३ तस्मिन्काले समस्त
स्य श्रोतव्यस्य श्रुतस्य च फलस्य कर्मणां सम्यगेव तत्त्वं यास्यसि स्वयं ४
५ तेन निर्वेदफलेनैव धीशुद्धिं तास्यसीति च ५ ५२ ॥

नीलकंठीटीका

कदा मनीषिणो भवंतीत्यत आह यदेति तेन च मोहः इष्टानिष्टवियोग (संयोग) जपरितापजन्यवैचित्यं तदेव कलिलमिव कलिलं कालुष्यं बुद्धिगतं बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति बुद्धिः प्रसन्ना भविष्यति तदा श्रोतव्यस्य शास्त्रभागस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि अयं भावः मलिनायां बुद्धौ असकृद्गृहीतस्यापि शास्त्रार्थस्यास्फुरणात् श्रोतव्यश्रुते च हर्षे व तदतश्शुद्धायामपि बुद्धौ सकृत्शास्त्रार्थस्फुरणात् तयोर्वैयर्थ्यामित्युभययथापि तत्र निर्वेदः अंततः प्रसन्नायां बुद्धिनिग्रहीतं योग्या भवतीति श्रवणादिकं त्यक्त्वा ध्याननिष्ठ एव भवेदिति ५२॥

अत्र क्रममाह यदेति

आनंदीटीका

म॰ मोहस्तानमेव कलिलं चित्तकालुष्यमनादिजन्माभ्यस्तमनात्मनि देहादावात्मज्ञानं लं च यिष्यति तदा श्रोतव्यस्य श्रावयिष्यमाणस्योपदेशस्य श्रुतस्य श्रुतपूर्वस्य निर्वेदं श्रवणेच्छाविरहं गंतासि कृतार्थत्वात् ५२

\+ यदा चैतत्परमेश्वरवागर्हं तत्वज्ञानेन शक्रमपि क गिलिम **रामकंठीटीका** नलिश्शतिष्ठंनतिष्ठआति तदान्वया
शाधिलोन्मोहननभविनव्यम् यतः कर्मणैतत्तास्यसीत्याह +

\+ यदा यस्मिन्काले स्योपदिष्टस्य ज्ञानस्योपपन्नत्वमात्रप्रतिपत्त्या मोहकलिलमनादिजन्माभ्यस्तदेहाद्यात्मप्रत्ययस्वरूपमज्ञानकर्दमं व्यवतरिष्यति विपर्ययत्वप्रतिपत्त्यालंघयिष्यति तदैवं श्रुतमिदं श्रोतव्यमिति संशयाविष्टजनोचितयोर्नानाशास्त्रविषययोः श्रोतव्यश्रुतयोर्निर्वेदं विरागं गंतासि [illegible] [illegible] ५२ ॥

लासिकी ब्रह्मयमी टीका   यदातेबुद्धिरंतःकरणं

कदा कर्मयोगप्रतिष्ठां प्राप्स्यामीत्यपेक्षायामाह यदेति मोह
मेव देहाद्यात्मप्रत्ययमेव कलिलं गहनं विशेषेण तरिष्यति न
दा श्रोतव्यस्यार्थस्य श्रुतस्य चार्थस्य निर्वेदं निश्चितत्वस्य निश्चित
तया वैराग्यं प्राप्स्यसि अविद्यापदपतितप्रमात्रानुग्राहकत्वा
च्छास्त्रस्येति तरिष्यति + ५२ ॥ गडकं कृत्वा निर्वेदयथा प्रस्तेनेन तत्र मस्य नाहीरेण प्रयोजनम्
तत्त्वज्ञस्य तथादिविन शास्त्रेण प्रयोजनम् +

पंचोलीटीका

योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा प्राप्यते इत्याह यदा
इति यदा ते तव बुद्धिः मोहकलिलं मोहात्मकं अविवेककालुष्यं
व्यतितरिष्यति अतिक्रमिष्यति तदा तस्मिन्काले श्रोतव्यस्य अध्येत
व्यस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि अध्येतव्यमधीतं च निष्फलं प्र
तिभास्यति ५२

रणवीरसमिहोधिनी॥

यदाते इति तेतव बुद्धिर्मोहकलिलं कलत्रयादिदोषदर्शनं यदा त्वं
त्यजिष्यति तदा एवं श्रुतमिदं श्रोतव्यमिति संप्रयाविष्टजनोचित
योः श्रोतव्यश्रुतयोर्विरागं गमिष्यसीति स्वयमेव निःसंपाद्य स्वी
यकर्मानुष्ठाने प्रवृत्तो भविष्यसीति भावः ५२॥

मधुभाष्य॥

यदेति निर्वेदं नितरां लाभः प्रयोगात् तस्माद्धास्त्रगः पांडित्यं
निर्विद्येत्यादि न हि तत्र वैराग्यमुपपद्येत तथा सति पांडित्या
दिति स्यात् न च तानि ना भगवन्महिमादिश्रवणे विकर्मवं
ति आत्मारामादि हि तनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं
भक्तिमित्थंभूतो गुणो हरिरिति वचनात् अनुष्ठानाद्वस्तुकादी
नां न च तेषां फलं नास्ति तथैवमदनत्त्वस्वत्वात्तेषां मानिहीति
त्वनुभूतां तव पादपद्मध्यानाद्भवजनकथाश्रवणेन वा स्यात्
मा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्प

ततोविमानादित्यादिवचनात् तेषामप्युपासनादिफलस्य
साधितत्वात् तारतम्यापत्तेश्च तथाहि यदितारतम्यंनस्या
त् नास्तिकिंविगणयंत्यपितेप्रसादनेकास्यतांमेस्त्वदयं
तिकेचित् एकत्वमप्युत्पद्यमानंनदृष्टान्तोतिमुक्तिमप्यनि
च्छतामपिमोक्षपदफले नमिच्छतामपिसंभवतित्रप्रतीका
दीनामिति कथमनिच्छतांसत्तिरुपपन्नास्यात् वचनाच्च य
थाभक्तिविशेषोविद्यतेपुरुषोत्तमे तथामुक्तिविशेषोपि
ज्ञानिनांलिंगभेदने योगिनांभिन्नलिंगानामाविर्भूतस्वरू
पिणांसाम्यानांपरमानंदतारतम्यमस्त्येवेति तत्वामतिंप्र
थिष्यंतिमुक्तावपिकथंचन मद्भक्तियोगाज्ज्ञानाभ्याससर्वानति
प्राप्स्यसीतिच ज्ञानावचनेनप्रापुर्यविषयं दुःखाभावविष
यंच तथाचोक्तम् दुःखाभावापत्तौलिंगभेदाः समाप्तताः
तथापिपरमानंदोज्ञानभेदात्तुभिद्यत इतिनारायणसहिताव
कल्पे अतोनवैराग्यंश्रुत्यादावत्रविवक्षितम् नचसंकोचे
मानंकिंचिदुपमानंइतरत्रप्रयोगे मदर्द्धिः प्रवर्त्तीयस्यश्रु
तस्यचवेदादेः फलंप्राप्स्यसीत्यर्थः तदेवंस्पष्टयति ५४॥

भाषा अनुवाद

जो कहो कि कब हम उस विस्नु पदको पावेंगे तो दो श्लोकसे क
हते हैं कि मोह जो देहादिक मे आत्मबुद्धि अर्थात् आत्मास्वरूप जो
जानै है सो देह है ऐसा जो दृढ विश्वास सोई दुरवगाह अज्ञान
गहन बनहै सो जब इस पूर्व कथितरूप परमेश्वर की आराधना
करनेसे भगवत की कृपासे तुमारीबुद्धि देह अभिमानरूप मोह
मय अगम्यकानन कहे बनके अच्छी तरह से पार होगी अ
र्थात् देहाभिमान छूटेगा तब विस्नु पदरूप मुक्ति प्राप्त होगी और
जो अर्थ सुना चाहते हो और सुनिचुके हो तिस सब मेवैराग्य उ
त्पन्न होगी अर्थात् वह सब तुछकरके किसी कामका नहीं यह
जानि सको गे फेरि और उसबातको न पूछोगे ५२ ॥ ॥

दोहा

जबहि मोह विलोभको बुद्धितरैगीतेरि तब विचारको पा
पहैं सुनहि सुनातिहकेरि ५२॥

भाषा अनुवाद

जो कहो कि कब हम उस विस्नु पदको पावें गे तो दो श्लोकसे कहते हैं कि मोह जो देहादिक मे आत्मबुद्धि अर्थात् आत्मास्वरूप जो जाने है सो देह है ऐसा जो दृढ विश्वास सोई दुरवगाह अज्ञान गहन वनहै सो जब इस पूर्व कथितरूप परमेश्वर की आराधना करने से भगवत की कृपासे तुमारीबुद्धि देह अभिमानरूप मोह मय अगम्यकानन कहे वनके अच्छी तरह से पार होगी अर्थात् देहाभिमान छूटेगा तब विस्नु पदरूप मुक्ति प्राप्त होगी और जो अर्थ सुना चाहते हो और सुनिचुके हो तिस सब मेवैराग्य उत्पन्न होगी अर्थात् वह सब तुच्छकरे किसी कामका नहीं यह जानि सको गे फेरि और उसवातको न पूछोगे ५२ ॥ ॥

दोहा

जबहि मोह विछोभको बुद्धितरेगीतेरि । तब विचारको पा
पहैं सुनहि सुनातिहकेरि ५२॥

340.

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३

शांकरभाष्यं

मोहकलिलात्ययद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यामीति चेत् तच्छृणु श्रुतिविप्रतिपन्नेति श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबंधः प्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानाप्रतिपन्ना अध्यात्मशास्त्रव्यतिरिक्तशास्त्रेष्वित्यर्थः श्रुतिविप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धिर्यदा यस्मिन् काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता सती समाधौ समाधीयते चित्तमस्मिन्निति समाधिरात्मा तस्मिन्नात्मनीत्येतदचला तत्रापि विकल्पवर्जितेत्येतद्बुद्धिरन्तःकरणं तदा तस्मिन् काले योगमवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि ५२

आनंदगिरिकृतटीका

बुद्धिशुद्धिविवेकवैराग्यसिद्धावपि पूर्वोक्तबुद्धिप्राप्तिकालो दर्शितो न भवतीति शंकते मोहेति प्रागुक्तविवेकादिमतो बुद्धेरात्मनि स्थैर्यावस्थायां प्रकृतबुद्धिसिद्धिरित्याह तच्छृण्विति एवं कालविशेषाख्यं वस्तु तच्छब्देनगृह्यते बुद्धेः श्रुतिविप्रतिपन्नत्वं विशदयति । अनेकेति नानाश्रुतिविप्रतिपन्नत्वमेव संक्षिपति विक्षिप्तेति उक्तं हेतुद्वयमनूद्य वैराग्यपरिपाकावस्था कालप्राप्त्यर्थः निश्चलत्वं विक्षेपराहित्यं अचलत्वं विकल्पशून्यत्वं विक्षेपो विपर्ययो विकल्पः संशय इति विवेकः विवेकद्वारा जाता प्रज्ञा प्रागुक्ता बुद्धिः समाधिस्तत्रैव निष्ठा ५३॥

स्वामिकृतटीका

गी·
टी·द्वि·

341

ततश्च श्रुतिविप्रतिपन्नेति श्रुतिभिर्वैदिकलौकिकार्थश्रवणैर्विप्र-
तिपन्ना इतस्ततः पूर्वं विक्षिप्ता सती तव बुद्धिर्यदा समाधौ स्थास्यति समा-
धीयते चित्तमस्मिन् इति समाधिः परमेश्वरस्तस्मिन्निश्चला विषयान्तरै-
रनाकृष्टा अत एव अचला अभ्यासपाटवेन तत्रैव स्थिरा च सती तदा योगं
योगफलं तत्त्वज्ञानमवाप्स्यसि ५३ ॥

पिशाचभाष्यं

तदा तस्मिन् काले गन्तासि प्राप्तासि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य
च तदा श्रोतव्यं श्रुतं निष्फलं प्रभातीत्यर्थः मोहकलिलात्ययद्वारेण
लब्धात्मविवेकप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यामि
त्यत्राह श्रुतीति श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबंधप्रका-
शनश्रुतिभिः श्रुतैः प्रवृत्तिविप्रतिपन्ना नानाप्रतिपन्ना विक्षिप्ता सती ते
तव बुद्धिर्यदा यस्मिन्काले स्थास्यति निश्चला विक्षेपचलनवर्जिता समा-
धौ समाधीयतेऽस्मिन्निति समाधिरात्मनीत्येतत् अचला तत्रापि विक-
ल्पवर्जितेत्येतद्बुद्धिरन्तःकरणं तदा योगमवाप्स्यसि ५३ ॥

रामानुजभाष्यं

योगे त्विमां शृण्वित्यादिनोक्तस्यात्मयाथात्म्यज्ञानपूर्वकस्य विधिविशे-
षसंस्कृतकर्मानुष्ठानस्य तल्लक्ष्यभूतं योगाख्यं फलमाह श्रुतीति श्रु- ति
तिः श्रवणं मत्तः श्रवणेन विशेषतः प्रतिपन्ना सकलेतरविसजातीयनि-
त्यनिरतिशयसूक्ष्मात्मविषया स्वयमचलैकरूपा बुद्धिः कर्मा-
नुष्ठानेन विमलीकृते मनसि यदा निश्चला स्थास्यति तदा योगमात्मा-
वलोकनमवाप्स्यसि एतदुक्तं भवति शास्त्रजन्यात्मज्ञानपूर्वककर्मयो-
गः स्थितप्रज्ञताख्यज्ञाननिष्ठामापादयति ज्ञाननिष्ठारूपा स्थितप्रज्ञ-
ता योगाख्यमात्मावलोकनं साधयति ५३

अभिनवगुप्तकृतटीका स्पष्टोऽर्थः

तत्र च योगबुद्धिमाश्रयतस्तेन च सारदेनेदमभिज्ञानं श्रोतव्यस्य श्रुत-
स्याभिज्ञानस्य गमनं स्यात् श्रुतिनिर्वेदभाक्त्वम् अनेन चेदमुक्तं

अविद्यायाः प्रविपतितं समावबुद्धात्मकरणात् श्रवणसंस्कारविमलं भम
द्विमार्गे एतदास्याः गलितत्वाद्दोषदर्शनं मन्ततया शास्त्रं नवङ्
मानविगलनेन विगलिष्यतीति ५२ ॥

परमार्थप्रपाटीका

अथैतदेव परमेश्वरप्राप्तिनिमित्तमित्याह श्रुतीति श्रुतिः रोचनार्था
फलश्रुतिस्तत्र विप्रतिपन्नात्यक्ता यदा एवं विधा ते बुद्धिः समाधौ सम्यगा
धीयते चित्तं यस्मिन्निति समाधिः परमेश्वरस्वरूपं तस्मिन्निश्चला कृतनि
श्चयातन्नपरवाचला अविक्षेपा सती यदा स्थास्यति स्थिता भवति तदा यो स्थि
गं तत्त्वानिर्ध्यं अवाप्स्यसि ५३ ॥ स्थो

वनमालीटीका

तदेवं तेन तव बुद्धिः श्रुतिभिर्नानाफलश्रवणैर्विचारितनानार्थैर्विप्रति
य पन्नाऽनेकसंशयविपर्ययवती न वितिष्ठा प्राकृस्थिता यदा यां नरूपक मदा
र्मयोगेन शुद्धा सती विक्षेपं परित्यज्य समाधौ सदनंतशगालये मयि
निश्चला जाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिता अचला सुषुप्तिमूर्छा
स्तब्धीभावादिरूपचलनरहिता सती स्थास्यति लयविक्षेपदोषौ विहा
य समाहिता भविष्यतीति यावत् यद्वा निश्चला संभावनाविपरीतभाव
नारहिता अचला दीर्घकालादरनैरंतर्यसत्कारसेवनैर्विजातीयप्रत्य
यादूषिता सती निर्वातप्रदीपवदनंतशगालये मयि स्थास्यतीति यो
जनात् तदा योगं पूर्णानंदघनिर्मलनादिनामत्साम्यरूपं यदा पश्यः
क्म पश्यते रुक्मवर्णं कर्तारमीशं तदा विद्वान्पुण्यपापे विधूय निरंजनः
परमं साम्यमुपैतीति श्रुत्युक्तमवाप्स्यसीत्यर्थः ५३ ॥

ऊरुमवैजयंतीटीका

ननु निर्वेदेनैव किं भविष्यतीत्यपेक्षायां तत्फलमाह श्रुतीति श्रुतिविप्र
तिपन्नाः श्रुतयः श्रवणानि तैरनेकराजसतामसमारिष्टान्यार्थानां श्र
वणैर्विप्रतिपन्ना अतिचंचलायास्तव बुद्धिः सर्वमभूत्साक्षाद्विरक्तानी
निश्चला मदन्यदेव भावमापनादिराहित्येन मदेकविषयिकाऽचलासा
ती समाधौ समाधीयते मनो यस्मिन्निति समाधिः सर्वेश्वरोऽहं तस्मिन्न

गवतिमयियदायदिस्यास्यतिस्थिराभविष्यतितदातदिते योगंनिष्काम
कर्मानुष्ठानसाध्यंमत्स्वरूपावलोकने ऽवाप्स्यसिप्राप्स्यसिवेदा
न्तादिसच्छास्त्रोदितात्मज्ञानपूर्वकेमदाराधनरूपनिष्कामकर्मानुष्ठाने
नांतःकरणशुद्धिद्वारास्थितप्रज्ञताभिधेयेज्ञानेभवतितस्मादात्मदर्श
नेततोमतत्स्वरूपावलोकनमितिभगवदभिप्रायः ५३ ॥ ॥

+ अंतःकरणशुद्धेर्वंज्ञाननिर्वे दस्यकदाज्ञानप्रा मधुसूदनीटीका प्तिरित्यपेक्षायामाह +

+ तेतवबुद्धिःश्रुतिभिर्नानाविधफलश्रवणैरविचारिततात्पर्यैर्विप्र
तिपन्नाऽनेकविधसंशयविपर्यासवत्त्वेनविक्षिप्ताप्राक्यदायस्मि
न्कालेशुद्धिजविवेकजनितेनदोषदर्शनेननैर्वेद्यपरित्यज्यसमा
धौपरमात्मनिनिश्चलाजाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिताऽचला
लय॰ सुषुप्तिमूर्छास्तब्धीभावादिरूपलयलक्षणचलनरहितासतीस्थास्यति
वि॰ लयविक्षेपलक्षणौदोषौपरित्यज्यसमाहिताभविष्यतीतियावत् अ
थवानिश्चलाऽसंभावनाविपरीतभावनाविरहिता अचलादीर्घका
लादरनैरंतर्यसत्कारसेवनैर्विजातीयप्रत्ययादूषितासतीनिवातप्र
दीपवदात्मनिस्थास्यतीतियोजना तदातस्मिन्कालेयोगंजीवपरमा
त्मैक्यलक्षणंतत्त्वमस्यादिवाक्यजन्यमखंडसाक्षात्कारंसर्वयोगफल
मवाप्स्यसि तदापुनःसाध्यांतराभावात्कृतकृत्यःस्थितप्रज्ञोभविष्य
सीत्यभिप्रायः [illegible]
[illegible]
[illegible] ५३ ॥

सदानंदीटीका

धीशुद्धेवंपरिप्राप्तेवैराग्येसकदाऽमम आत्मज्ञानोदयश्चैवमपेक्षायां
वचःशृणु १ अविचारिततात्पर्यैरनेकश्रवणैस्तव धीःसंशयविपर्यासै
र्विक्षिप्ताप्रागनेकधा २ यस्मिन्कालेविशुद्धोत्थविवेकजनितेनच इहा
मुत्रफलेदोषदर्शनेनसमन्विता ३ सत्काविक्षेपसंदेहतत्त्वेपतविनिश्च
ला जाग्रत्स्वप्नमनोराज्यवर्जिताचलरूपिस्थिता ४ अचलास्तब्धमिम
र्छादिलयशून्यासतीस्वयं यदाऽसंभावनात्मकाविपरीतमतिस्तथा ५

निदिध्यासनसंपन्नातेबुध्यास्यतिनिश्चला तस्मिंकालेपरात्मैकयोगं
वेदांतवाक्यजं १ अखंडस्वात्माकारावृत्तिसर्वयोगफलंपरं अवाप्स्यसि
स्थितप्रज्ञःकृतकृत्योभविष्यसि २ ५३ ॥

नीलकंठीटीका

ननुबुद्धिप्रसादोपिकेनलिंगेनज्ञेयइत्यतआह श्रुतिभिर्नानाविध
शास्त्रश्रवणैर्विप्रतिपन्नाआत्मानित्योऽनित्योवानित्योपिकर्ताऽकर्ता
वाकर्ताप्येकोऽनेकोवेत्येवमादिसंशयग्रस्तासतीयदाअसंभाव
नाविपरीतभावनानिरासपूर्वकंश्रुतितात्पर्यविषयीभूतेब्रह्मण्यद्वैते
निश्चलापुनःकुतर्कैरनाकंपनीयानिर्विचिकित्सापरोक्षनिश्चयवती
भूतासमाधौनिर्विकल्पकेप्रत्यगात्मनिअचलालयविक्षेपशून्यासं
स्यतिस्थिराभविष्यतितदायोगंविवेकप्रज्ञांप्राप्स्यसि निश्चलसमाधि
लाभएवबुद्धिप्रसादलिंगमितिभावः ५३ ॥

आनंदीटीका

श्रुतौउपदेशान्तरश्रवणेविप्रतिपन्नानिर्विमनात्रिश्येतानिश्चलावल
बुद्धिरपिविकल्पैरकंपितासमाधौस्थास्यतिसमर्हितेनतःकरणोस्थिति
प्राप्स्यतियोगंज्ञानकर्मसमन्वयात्स्वात्मयुक्तिप्राप्स्यसि अथवासमा
माधाविक्षेपलक्षणंध्यानधारणासमाधिसंज्ञेसंयमआभ्यंतरेयोगा
गेवस्यमार्गेयदाबुद्धिर्मनोनिश्चलंस्थास्यतितदायोगमष्टांगविज्ञाय
निर्विशेषंसंयमेयोगमाप्स्यसीत्यपिस्त्रिनम् (समाधावचलाबु
द्धिःस्थास्यतीतिभगवद्वचनेनप्रासावसरःश्रनैर्ज्ञानावरणापग २५
ना मेसमत्वनाजित्वासेज्ञेनइवाच ५३

रामकंठीटीका

नतश्रुतिश्रुयादिदंश्रुतमिदंश्रोतव्यमिति,
विक्षिप्तविचिकित्साविहतयाश्रुतिर्नीशास्त्रश्रवणेनस्यामनुपारे ना
यताद्विप्रतिपन्नाप्रतिकूलासतीनवमतिःप्रज्ञानिश्चिता यथाकाम
ज्ञानतिहृतमंदेहा अनपवाचलाविकल्पैर्मलवद्भिरप्रकंप्यासती
स्थास्यति अस्मिन्समाधौस्थितिंप्रतिष्ठांलप्स्यतेतदानेनकर्मयोगयथो

गी॰ टी॰ हिं॰ ऽं योगं कर्मसमाधिलक्षणं मा श्रस्यसि प्रतिपत्स्यसे सं प्राप्स्यसे
[illegible]
[illegible] ५३॥

लासिकी [illegible] टीका

तथा श्रुतिभिर्नानालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्ना विक्षिप्ता सती यदा समाधावात्मसमाधाने निश्चला विक्षेपरहिता सती अचलालयरहिता च बुद्धिः स्थास्यति प्रतिष्ठां लप्स्यते तदा योगं यथोक्तं कर्मसमाधिलक्षणं ध्यानेनवाप्स्यसि ५३ ॥

पंचोलीटीका

मोहकलिलात्ययद्वारेण लब्धात्मविवेकजां प्रज्ञां कदा कर्मयोगजफलं अवाप्स्यसि तच्छृणु इत्याह हे अर्जुन श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबंधप्रकाशनवाक्यश्रवणैः विक्षिप्ता सती ते तव बुद्धिः यदा यस्मिन्काले निश्चला स्थिरीभूता विक्षेपचलनवर्जिता सती समाधौ आत्मनि अचला तत्रापि विकल्पवर्जिता स्थास्यति तदा योगं विवेकप्रज्ञां प्राप्स्यसि ५३

रामवीरसमिद्धोयिनी॥

श्रुतीति श्रुतिः संशयोत्पादकं नानाशास्त्रश्रवणं तत्र विप्रतिपन्ना तु पारेयवान्प्रतिकूला निश्चला निहतसंदेहत्वात्समाधिनिश्चया अचला बलवद्भिरपि विकल्पैरप्रकंप्या सती ते बुद्धिश्च समाधौ स्थास्यति समाधिशब्देनात्र यत्नविधाभिधीयते तत्र स्थिरीभविष्यति तदा योगं योगः सन्नद्धनोपाय ध्यानसंगतिर्बुद्धिरि(त्यनेन वचसा समाधिस्थ यत्नविधा निष्ठस्य कर्मयोगिना वाच)युक्तिस्थित्यनुपासनाच्छ गादिसंयान रूपां उक्तिमवाप्स्यसीत्यर्थः ५३॥

श्रुतिविप्रतिपन्नेति पूर्वं श्रुतिभिर्वेदैर्विप्रतिपन्ना विक्षिप्ता
ती यदा वेदार्थानुकूलेन तत्त्वनिश्चयेन विपरीतवासनाभिरपि
निश्चला भवति तदा च समाधावचलः ब्रह्मप्रत्यक्त्वदर्शने
न भेदरहिता उ नादरवपि परमानंदमयत्वात् तदा योगमवाप्स्य
सि उपायफलं हि भवसीत्यर्थः स्थितप्रज्ञाता नेयस्य सः स्थि
तप्रज्ञः भाष्यते ऽनयेति भाषा लक्षणमित्यर्थः उतो लक्षण
मनुवदति लक्षणांतरं पृच्छामीति ज्ञापयितुं समाधिस्य
स्यति कं ब्रह्मणमीप्सं कं वर्तयतीति केशव तथा हि
कक्तिः कृतार्थ द्विविधो भुक्तेरण केला भयाया या हिरण्यगर्भः
कः प्रोक्तश्चेमः प्राकरप एव च स्वरूपादिना वर्तयतीति नेयतः के
भावो भवतीति वचनात्तत्र किमासीत किं प्रत्यासीत न
चाक्षिनो जानातीति तल्लक्षणादिकम् जानंति सर्वेजनानो देवर्षि
यत्तथैव च तथापि धर्मोत्पत्ति वार्तायै उभयविनये ने ते
उपायः प्रतीयंते इतरयो कृत्स्न बुद्धिनामिति वचनात् गमनादिप्र
वृत्तिनीत्यभिसंधिपूर्वविक्रमनादिप्रवृत्तिवदितियानि प्रेत्या
दिनादर्शयिष्यन् लक्षणप्रश्नमतस्त्वाद एवं परमानंदस्य सः
किमर्थं प्रवृत्तिं करोतीति प्रश्नाशयः प्रारब्धकर्मणो यतिरोदि
तब्रह्मणो वासनया प्रायोस्मा भिसंधिपूर्वकागमनादिप्र
वृत्तिः संभवतीत्याशयवान्यादिदृशति प्रायः सर्वान् प्रजाहाति
सूकादीनामपीषदर्शनात् तत्पादमक्ति मिक्षुतिस्तुतिन
त्तत्वदर्शिनः स्तुके त्वामिच्छंति यत्नवित्वा दीनामायस्तेरम्प
ते तदाभिभूतं तेषां ज्ञानं तथोक्तं श्राधिकादिकपुंसां तु ह
दृक्कर्मचकारणात् उद्भवाभिभवौ ज्ञानेन तोन्येभ्यो विलक्ष
णा इति अतएव वैलक्षिण्यादनधिकारिणामायस्तादिवेद
क्तिनते ज्ञानिनः इत्यवगंतव्यं नचात्र समाधिं कुर्वतो लक्षणं

च्यते यः सर्वत्रानभिस्नेह इति स्नेहनिषेधात् नहि समाधिंकु
र्वतस्तस्य शुभाशुभप्राप्तिरस्ति अतः प्रज्ञानात् समाधेः संप्रज्ञा
ते वा विशेषः तथापि न तत्रैवेति नियमः कामादयो न स्यु
रित्याति विलिमचेत सांज्ञानि नाज्ञानमपि ऋतमलानादेवसं
श्रयादितिस्तेन मनोगतादिकामाः अतस्तस्यैव न हि कदना
नोत्पत्तौ युक्तं हननं तेषामिति दर्शयति मनोगतानिति वि
शेषश्चोच्यते रसोप्यस्य परं दृष्ट्वा निवर्तत इति न चैतदृष्ट्वा
त्मसमीपं युक्तं च वैशेष्यात् आत्मनापरमात्मना परमात्म
न्येव स्थितः स त्वात्मा स्थितस्मिन् स्थितस्य तत्समाधेरेव तुष्टि
र्भवति विषयांस्तु परित्यज्य तमेस्थितिमततस्तत्त्वतः देवाद्रव
तिवैवदृष्टिनो न्यथा तु कथं च नेत्युक्तं नानाशुणागमकल्पे प्र
तो नात्मा जीवः नदेवस्य यत्नुतरैस्त्रिभिः श्लोकैः एतान्येव
ज्ञानोपायानि तूच्योक्तं तद्देहजिताह्रिभिः साध्यस्तानि नांचन
लक्षणमिति शोभनाध्यासो रागः रसोरागस्तु यथारुचिः
शोभनाध्यासस्तु चतत इत्यभिधानात् सर्वत्रानभिस्नेहः स्वावशु
भाशुभप्राप्यनाशत्तिनंदति न द्वेष्टि न चैतल्लक्षणं ज्ञानमर्थ
स्ततोपि भवतीत्याहोत्तरश्लोकैः निराहारत्वेन विषयभो
गसामर्थ्याभाव एव भवति इतरविषयाकांक्षाभावो वा र
साकांक्षादिनिवर्तते सत्यपरोक्षज्ञानादेव निवर्तत
इत्यादि ५७॥

भाषा अनुवाद

इसी प्रकार लौकिक कहे लोक की वार्त्ता औ वैदिक कहे वेद की बातैं अनेकप्रकार की श्रवण करते करते पूर्वसे विक्षिप्त कहे भ्रमित जो तुमारी बुद्धि सो जब समाधिमे स्थिर होगी अर्थात् अच्छीतरह लगाया जाय चित्त जिसमे सो समाधि कहे परमेश्वर तिस ईश्वरमे और विषयों को छोडि अभ्यास करते करते स्थिरा होय जब अचल रूपसे स्थिर होगी तब तुम योग का फल जो तत्वज्ञानसो पावोगे ५३ ॥

दोहा

तेरि श्रुतिसों चंचला निश्चल जब स्थित होय बुद्धि अचल
समाधिमे तब तूं प्रापहिं योग ५३॥

345

अर्जुनउवाच स्थितप्रज्ञस्यकाभाषासमाधिस्थ
स्यकेशव स्थितधीःकिंप्रभाषेतकिमासीतव्रजे
तकिं ५४ ॥

ॐ शांकरभाष्यं

प्रश्नबीजं प्रतिलभ्यार्जुनउवाच लब्धसमाधिप्रज्ञस्य लक्षणबु
भुत्सया स्थितप्रज्ञस्येतिस्थितप्रज्ञस्य स्थिताप्रतिष्ठिताहमस्मि प
रंब्रह्मेति प्रज्ञायस्यसस्थितप्रज्ञस्तस्य स्थितप्रज्ञस्यकाभाषा किं
भाषणंवचनं कथमसौ परैर्भाष्यते समाधिस्थस्य समाधौस्थित
स्य केशवस्थितधीः स्थितप्रज्ञस्स्वयंवाकिंप्रभाषेत किमासीत ।
व्रजेत किंकिंभाषणं व्रजनंवातस्यकिंकथमित्यर्थः ५४ ॥

आनंदगिरिकृतटीका

संन्यासिनो ज्ञाननिष्ठातत्प्राप्तिवचनं प्रश्नबीजं श्रुत्वार्जुनस्या
भिप्रायमाह लब्धेतिलब्धा समाधावात्मनि समाधानेनवाप्रज्ञा
परमार्थदर्शनलक्षणा येन तस्येति यावत् ननु तस्य भाषा तत्का
र्यान्तरोपेतो भविष्यति किमित्यसौ विजिज्ञास्यते तत्राह कथमि
ति ज्ञाननिष्ठस्य लक्षणविवक्षया प्रश्नमवतारयन् तन्निष्ठसाधन
बुभुत्सया विशिनष्टि समाधिस्थस्येति तस्यैवार्थोक्तिर्यो श्रुत्वेतिस्थि
तधीरिति ५४ ॥

स्वामिकृतटीका

पूर्वश्लोकोक्तस्यात्मतत्त्वज्ञस्य लक्षणं जिज्ञासुरर्जुनउवाच स्थितेति
स्वाभाविकेसमाधौस्थितस्यातएवस्थितानिश्चलाप्रज्ञाबुद्धिर्यस्यत
स्यकाभाषाभाष्यतेऽनयेतिभाषालक्षणमितियावत् केनलक्ष
णेनस्थितप्रज्ञउच्यतइत्यर्थः तथास्थितधीःकथंभाषणमासनं
व्रजनंचकुर्यादित्यर्थः ५४ ॥

गी०
टी० द्वि०

विष्णुभाष्यं

अवाप्तयोगस्य लक्षणबुभुत्सयार्जुन उवाच स्थितप्रज्ञस्येति स्थिता
प्रतिष्ठिताहमस्मि परं ब्रह्मेति प्रज्ञा यस्य तस्येति का भाषा भाषणमवच
नं कथमसौ भाष्यते समाधिस्थस्य समाधौ स्थितस्य केशव स्थितधीः
स्थितप्रज्ञः किं प्रभाषेत किमर्थं स्वरूपं भाषेत किमासीत कथं वा आसी
त व्रजेत किं कथं वा गच्छेदित्यर्थः ५४ ॥

रामानुजभाष्यं

एवमुक्तः पार्थो निःसंगकर्मानुष्ठानरूपकर्मयोगसाध्यस्थितप्रज्ञता
या योगसाधनभूताया रूपं स्थितप्रज्ञस्यानुष्ठानप्रकारं च पृच्छति समा
धिस्थस्य स्थितप्रज्ञस्य का भाषा को वाचकः शब्दः तस्य स्वरूपं कीदृश
मित्यर्थः स्थितप्रज्ञः किं च भाषादिकं करोति ५४ ॥

अभिनवगुप्तकृतटीका

यदास्थास्यति बुद्धिरित्यनेन वचसा समाधिस्थस्य योगिनो यः स्थित
प्रज्ञशब्दस्तद्वाचक उक्तस्तस्य का भाषा किं प्रवृत्तिनिमित्तं भाष्यते ये
न निमित्तेन शब्दैरर्थ इति हृत्वा योगिनः स्थितप्रज्ञाख्यस्य किंरूपा वा
चकोन्वर्थो नवाद्य एकः प्रश्नः यद्यपि रूढौ प्रवृत्तिर्नास्ति तथाप्यन्व
र्थता लभ्यमपि स्वरूपलक्षणनिमित्तनिरूपणेन स्फुटीकर्तुमेव
त प्रश्नः स्थितधीरिति शब्दपदार्थकोर्थपदार्थकश्च तत्र स्थिरधीशब्दः किं
प्रयोगलक्षणमेवार्थमाह आहोस्वित्पर्यायमपीति द्वितीयः प्रश्नः स च
स्थिरधीर्योगी किमासीत किमभ्यसेत् क्वास्य स्थैर्यं स्यादिति तृतीयः
अभ्यसेन्न वा किमाश्रयादिति चतुर्थः ५४ ॥

परमार्थप्रपाटीका

अथ समाधौ स्थिरबुद्धेः स्वरूपमर्जुनः पृच्छति स्थितप्रज्ञस्येति भाष्यते स्थि
प्रोच्यतेऽनेनेति भाषा स्थितप्रज्ञः प्रमानकैर्लक्षणैरुच्यत इत्यर्थः त
था समाधिस्थस्य च किंलक्षणः स्थितप्रज्ञः समाधिस्थो वा कैर्लक्षणै
र्वोद्धव्यः न तु परबुद्धेरप्रत्यक्षत्वात्कथं दर्शनमात्रेण स्वरूपं ज्ञायत इति

चेन्नर्हि प्रतिबुद्धिमतामाकारैरेव मनोगतं ज्ञायते यतः उदीरितोऽर्थः
पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति नोदिताः अनुक्तमप्यूहति प
ण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः इत्युक्तत्वात् अथ व्यवहारे
णावान्तरलक्षणं पृच्छति स्थितधीः किं प्रभाषेत कथं वदति किमासी
त कथमासीत कथमासीनो भवति कथं वा व्रजेन गच्छतीति प्रश्नार्थः ५४

वनमालीटीका

पान्येव जीवन्मुक्तानां लक्षणानि तान्येव मुमुक्षूणां मोक्षोपायभू
तानीति मत्वार्जुनः स्थितप्रज्ञलक्षणं पृच्छति ज्ञाततत्वस्यार्जु
नस्य नरावतारस्यापि लोकोपकाराय प्रश्नः स्थिता निश्चलानन्तसुगु
णालये भगवति प्रज्ञा यस्य स स्थितप्रज्ञो व्याहृतवान् समाधिस्थोऽव्यु
त्थितचित्तश्चेति तस्य का भाषा कर्मणि षष्ठी भाष्यतेनेयति भाषा ल
क्षणं समाधिस्थः स्थितप्रज्ञः कैर्लक्षणैरन्यैर्व्यवह्रियत इत्यर्थः सव्
युत्थितचित्तः स्थितधीः स्वयं किं प्रभाषेत स्तुतिनिन्दादावभिनन्दनद्वे
षादिलक्षणं किं कथं प्रभाषेत सर्वत्र संभावनायां लिङ् तथा किमा
सीत व्युत्थितचित्तनिग्रहाय कथं बहिरिन्द्रियाणां निग्रहं करोति तन्नि
ग्रहाभावकाले च किं व्रजेत कथं विषयान् प्राप्नोति तत्कर्तृकभाष
णासनव्रजनानि मूढजनविलक्षणानि कीदृशानीत्यर्थः समा
धिस्थस्यैको व्युत्थितस्य त्रय इति चत्वारः प्रश्नाः केशवेति संबोधयन् स
र्वान्तर्यामितया सर्वदा प्रत्यक्षेण सर्वज्ञानवत्वादिना त्वमेवैतादृशो व
क्तुं समर्थोऽसीति सूचयति ५४॥

ज्ञसमवैजयन्तीटीका

एवं तिःकामकर्मयोगसाध्यामात्मावलोकनसाधनभूतां भग
वद्बुद्धिं तां स्थितप्रज्ञतां श्रुत्वार्जुनस्तत्स्वरूपजिज्ञासया स्थित
प्रज्ञावतः पुरुषस्याचरणानीति पृच्छति स्थितप्रज्ञस्येति समाधि
स्थस्य पूर्वोक्तलक्षणसमाधौ स्थितस्य स्थितप्रज्ञस्य स्थितात्मस्व
रूपे स्थितनिश्चला प्रज्ञा बुद्धिर्यस्य तस्य तथा तस्य का भाषा कः शब्द

गी॰ ह्वाच कोभवतिकेनशब्देनतस्यस्वरूपंज्ञायतेइत्यर्थः स्थितधीःस्थि
टी॰ हि॰ तानिश्चलाधीर्यस्यसःस्थिरबुद्धिःपुरुषःकिंप्रभाषेतकथंभाषणं
करोति किमासीतकथमासनंकरोतिकिंव्रजेतकथंव्रजनंकरोति
केशवेतिसंबोधनेनकोब्रह्मात्मकस्तद्ईशस्स्वामीयस्यतत्केशमना
त्मस्मिन्वसतीतिकेशवः कोब्रह्माईशोयस्यतत्केशंब्रह्मांडंयतस्मिन्
वसतीतिवेतिबुध्यस्वमनोवृत्युपलक्षितानांसर्वेषामचेतनानामंत
र्यामीसर्वज्ञस्त्वमस्यतत्त्वव्यतिरेकःकोप्यादृशोशब्देनज्ञानासितन्मेव
ज्ञानासितंमावदेतिसूचितम् ५४

+ एवंलब्धावसरःस्थितप्रज्ञलक्षणंज्ञातुमर्जुनउवाच यान्ये मधुसूदनीटीका वहिर्जीवन्मुक्तानांलक्षणानितान्येव
उत्कृष्टणंमोक्षोपा
यभूतानीतिमन्वा॰ स्थितानिश्चलाःहंब्रह्मास्मीतिप्रज्ञायस्यसस्थितप्रज्ञोऽवस्थाद्वयवान्
वानः + समाधिस्थोव्युत्थितचित्तश्चेत्यतोविशिनष्टिसमाधिस्थस्यस्थितप्रज्ञस्य
काभाषाकर्मणिषष्ठीभाष्यतेऽनयेतिभाषालक्षणंसमाधिस्थःस्थित
प्रज्ञःकेनलक्षणेनान्यैर्व्यवह्रियतइत्यर्थः सतुव्युत्थितचित्तःस्थितधीः
स्थितप्रज्ञःस्वयंकिंप्रभाषेत स्तुतिनिंदाभिनंदद्वेषादिलक्षणंकिंकथं
प्रभाषेत सर्वत्रसंभावनायांलिङ्॰ तथाकिमासीतव्युत्थितचित्तनिग्रहा
यकथंवहिरिंद्रियाणांनिग्रहंकरोति तन्निग्रहाभावकालेचकिंव्रजेत
कथंविषयान्प्राप्नोति तत्कर्तृकभाषणासनव्रजनानिमूढजनवि
लक्षणानिकीदृशानीत्यर्थः तदेवंचत्वारःप्रश्नाःसमाधिस्थस्थितप्रज्ञे
एकः व्युत्थितेस्थितप्रज्ञेत्रयइति केशवइति केशवःइतिसंबोधयन्स
र्वांतर्यामितयात्वमेवेतादृशंरहस्यंवक्तुंसमर्थोसीतिसूचयति [illegible] ॥५४

सदानंदीटीका
उपलब्धार्जुनःप्रश्नवीजंसर्वहितायच तत्त्वज्ञलक्षणंज्ञातुंप्रोवाच
श्रीहरिंप्रति १ यान्येवजीवन्मुक्तानांलक्षणानिभवंतिहि तान्येवात्र
मुमुक्षूणांमोक्षोपायात्मकान्यपि ब्रह्मैवास्मीतिधीर्यस्यनिश्चलास्थि
तधीर्हिसः समाधिस्थस्यषष्ठीयंकर्मण्येवनकर्त्तरि २ समाधिस्थाव्युत्

स्थितस्य स्थितप्रज्ञो हि धीर्योच्यते तदायमर्केन विज्ञेन ज्ञायते सोऽर्जुनेनेति ५
समाधिस्थस्य का भाषा लक्षणं भाष्यते नया अनुस्थितो सौ स्थितप्रज्ञः
किं प्रभाषेत वा ह्रयं ५ स्तुतिनिंदादिविषयान् शङ्कानन्तविलक्षणान्
किमासीत कथं वित्तनिरोधार्थं विनिग्रहे ९ इंद्रियाणां करोत्येष व्यव
हारे कथं व्रजेत् विषयान् कथमाप्नोति सा रव्यारौगतानस्तधीः ७
लक्षणं भाषणं स्थानं व्रजनं चैव चतुर्थकं चत्वारि कोहशान्यस्य भिन्ना
न्यत्रेभ्य इत्यलं ८ पवे प्रश्ना हि चत्वारः समाधिस्थस्य चाग्रिमाः अनुस्थि
तस्य त्रयः प्रोक्ताः स्थितप्रज्ञस्य भागशः ९ तमेवैतादृशं ग्रन्थे रहस्यव
क्तुमर्हसि सर्वान्तर्यामिभावेन सर्वसामर्थ्यवान् हरिः १० आकर्ण्यन् को
प्यवेत्येवं सूचयत्यर्जुनः सुधीः ११ ५४ ॥

नीलकंठीटीका

लब्धसमाधेः स्थितप्रज्ञापरनाम्नो लक्षणानि वुभुत्सुरर्जुन उवाच
स्थितप्रज्ञस्येति स्थिता प्रत्यगात्मनि प्रतिष्ठिता प्रज्ञा यस्य तस्य स्थित
प्रज्ञस्य समाधिस्थस्य समाधौ स्थितस्य का भाषा भाषणं वचनं कथ
मसौ परैर्भाष्यते इत्येकः प्रश्नः स्थितधीः स्थितप्रज्ञः अव्युत्थितः स
न् किं प्रभाषेत कथं वदति कथमासीत कथं वा व्रजति विषयान् भुंक्ते इ
ति प्रश्नत्रयम् ५४ ॥

आनंदीटीका

+ अथ नेतदा मतिः स्थास्यतीति भगवद्वचनं श्रुत्वा स्थितप्रज्ञस्य समस्तकल्मषत्यागजिज्ञासुरर्जुन उवाच +

+ का भाषा संज्ञा किं प्रभाषेत किमर्थं वक्ति किमासीत केन व्यापारे
णा तिष्ठति किं व्रजेत् किं प्राप्नुयात् एतद्वोत्तरयितं भगवानुवाच ५४

रामकंठीटीका

हे भगवन् केशव कर्मसु किल कौशलं योग उक्तो निश्चलप्रज्ञता च
स्थितप्रज्ञता तेऽद्वैविध्यास्य स्थितप्रज्ञस्य का भाषा कथमसौ भा
ष्यते किमस्य व्याख्यानं विरुद्धमिवास्य चेष्टितम् यतो वाङ्मनःकाये
स्त्रिभिर्व्यापारयन् कर्माणि यते नास्तिस्तापि चेष्टानासोपपद्यंते कि
मसौ भाषते भाषणं क्रियां वा करोति एतत् नास्येकतत्त्वनिश्चलप्रज्ञ

गी॰ नाज्ञाषणांवचनकर्मोपपद्यतेकिमसौव्रजेत् गमनक्रियोपलक्षितं
टी॰ कायव्यापारमाचरेत् सोप्यस्यसर्वंचेष्टोपपद्यते उत आसीनवाङ्
६२ नमप्रचारपरिहारेणानैर्यवहृत्यातिष्ठेत् सोप्यस्यकर्मकौशल्लक्ष नः
णेयोगेवर्तमानस्योभयकर्मनिवृत्यात्मिकानोपपद्यते इतिस्वरूपा
नवधारणात्कास्यभाषेत्यकमेतत्प्रश्नत्रयमविवक्षितकर्मक
क्रियामात्रविषयंवेदितव्यमथयस्यसर्वेसमारंभा इत्यादौबुद्धिम
त्वहेतोक्तस्यस्थितप्रज्ञस्यस्वरूपमश्रुतायमपिदृश्यपिगमनात्स
म्यगनवधारितमिदानींकेनाप्यंशेनविशेष्यवनस्यमानमव
धारयेत्यर्जुनेनोपपित्तंभगवानाह ५४ ॥

लाक्षिकी [illegible] टीका

यदातेमतिःस्यात्सतीतिप्रश्नबीजंलब्ध्वास्थितप्रज्ञस्यलक्षणंवुभु
त्सयार्जुनउवाच । स्थितानिश्चलाविकल्परहिताकाप्राज्ञाप्रात्म
विषयोबोधोयस्यसस्थितप्रज्ञोवस्याहृदयवान् समाधिस्थोवु॰
स्थितश्चेतिसमाधिस्थस्यस्थितप्रज्ञस्यकाभाषा भाष्यतेनयेति
भाषालक्षणंकिम् सएवव्युत्थितचित्तःस्थितप्रज्ञःस्वतिनिंदा किंप्रभाषेत
रागद्वेषादिलक्षणंकथंप्रभाषेत सर्वत्रसंभावनायांलिङ् ।
किमासीतकथंबहिरिंद्रियाणांनिग्रहंकरोति किंव्रजेतकथं
विषयान्प्राप्नोति प्रज्ञविलक्षणानितस्यभाषणासनव्रजना
निकीदृशानीत्यर्थः ५४ ॥

पंचोलीटीका

प्रश्नबीजंप्रतिलभ्यलब्धसमाधिप्रज्ञस्यलक्षणंवुभुत्सया॰
अर्जुनमाह स्थितःप्रज्ञसोति अहमस्मिपरब्रह्मेतिप्रज्ञाप्रति
ष्ठितायस्यसस्थितप्रज्ञःतस्यकाभाषाकथमन्यैर्वाच्यःसमाधौ
आत्मनिस्थितस्यचकाभाषास्थितधीःस्थितप्रज्ञःकिंवाकिंकि
मासीततस्यआसनंकथंव्रजनंवाकथं ५४

रत्नवीरसमिद्धेयिनी॥

स्थितप्रज्ञस्येति यदात्मन्यात्मनि तुष्टिरित्यनेन वचसा समाधिस्थस्य यत्नविधानिष्ठस्य कर्मयोगिनो वाचकोयः स्थितप्रज्ञ शब्द उक्तस्तस्य का भाषा भाष्यते येन निमित्तेन सा ईरर्थ इति कृत्वा किं प्रवृत्तिनिमित्तं यत्नविधानिष्ठस्य स्थितप्रज्ञशब्दः किं रूढ्या वाचकः अन्वर्थतया वेत्येकः प्रश्नः स्थितधीरिति शब्दपदार्थ कोर्थपदार्थकश्च तत्र स्थितधीशब्दः किं प्रयोगलक्षणमेवार्थमाह आहोस्विदन्यत्तत्र स्यादिकमपीति द्वितीयः प्रश्नः स च स्थितधीः किमासीत किंमभ्यस्येत कास्य स्थैर्यं स्यादिति तृतीयः प्रश्नः अभ्यास्यश्च किमाश्रयादिति चतुर्थः प्रश्नः ५४॥

मधुभाष्य

५४॥

भाषा अनुवाद

पूर्व श्लोकमे कहा जो आत्मतत्वज्ञानी का लक्षण सो जानने
की इच्छा करि अर्जुन पूछते हैं कि हे केशव अनायास लभ्य स
माधि मे स्थितजो निर्मल बुद्धि स्थित प्रज्ञ पुरुष उसका क्या ल
क्षण है अर्थात् कैसे उसको जानै तात्पर्य यह है कि कैसे लक्ष
ण होनेसे किस आचरण से स्थिरप्रज्ञ होता है सोई पूछते कि ।
ज्ञानी कैसे बोलते बैठते और कैसे चलते फिरते रहते है ५४

अर्जुनवाक्य दोहा॥

क्या भाषा स्थित प्रज्ञ की कुल समाधि स्थित जोय भाषें का
स्थितबुद्धि है किम बैठें चलें सोय ५४॥

35°

श्रीभगवानुवाच प्रजहाति यदा कामान् सर्वान् पा
र्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्त
दोच्यते ५५ ॥

शांकरभाष्यं

स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छति यो ह्यादित एव संन्यस्य
कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञ
स्येति प्रजहातीत्यारभ्याध्यायपरिसमाप्तिपर्यंतं स्थितप्रज्ञलक्षणं ।
साधनं चोपदिश्यते सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि या
नि तान्येव साधनान्युपदिश्यंते यत्नसाध्यत्वात् यानि यत्नसाध्यानि
साधनानि लक्षणानि भवंति तानि श्रीभगवानुवाच प्रजहातीति
प्रजहाति प्रकर्षेण जहाति परित्यजति यदा यस्मिन् काले सर्वान्
समस्तान् कामान् इच्छाभेदान् हे पार्थ मनोगतान् मनसि प्रवि
ष्टान् हृदि प्रविष्टान् सर्वकामपरित्यागे तुष्टिकारणाभावाच्छरीरधा
रणनिमित्तशेषे च सत्युन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्तेत्यत उच्यते
आत्मन्येव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यलाभनिर
पेक्षस्तुष्टः परमार्थदर्शनामृतरसलाभेनान्यस्मादलं प्रत्ययवान्
स्थितप्रज्ञः स्थिता प्रतिष्ठितात्मानात्मविवेकजा प्रज्ञा यस्य स स्थि
तप्रज्ञो विद्वांस्तदोच्यते त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारा
मः आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः ५५

आनंदगिरिकृतटीका

प्रश्नोत्तराणि व्याख्याय वाक्यार्थमाह स्थितप्रज्ञस्येति प्रतिवचनम
वतारयितुं पातनिकां करोति यो हीति हिशब्देन कर्मसंन्यासकार
णीभूतविरागतामस्यतिः सूच्यते आदितो ब्रह्मचर्यावस्थायामिति ।
यावत् ज्ञानमेव योगो वात्मभावप्रापकत्वात्तस्मिन्निष्ठापरिसमाप्ति

गी॰ स्तस्यामित्यर्थः कर्मैव योगस्तेन कर्माण्यसंन्यस्य तन्निष्ठायामेव प्रवृत्त
टी॰ द्वि॰ इति शेषः ननु तत्कथमेकेन वाक्येनार्थद्वयमुपदिश्यते द्वैधार्थे वाक्य
भेदान्न लक्षणमेव साधनं कृतार्थलक्षणस्य तत्स्वरूपत्वेन फलत्वे।
साधनत्वानुपपत्तेरिति तत्राह सर्वत्रैवेति यद्यपि प्रकृतार्थस्य ज्ञानिनो ल
क्षणं तद्रूपतया फलत्वेन साधनत्वमधिगच्छति तथापि जिज्ञासो
स्तदेव प्रयत्नसाध्यतया साधनं सम्पद्यते लक्षणं चात्र ज्ञानसामर्थ्यलब्ध
मनूद्यते न विधीयते विदुषो विधिनिषेधागोचरत्वात्तेन जिज्ञासोः साध
नानुष्ठानाय लक्षणानुवादादेकस्मिन्नेव साधनानुष्ठाने तात्पर्यमित्य
र्थः उक्तेऽर्थे भगवद्वाक्यं संवादयति यानीति लक्षणानि च ज्ञानसाम
र्थ्यलभ्यान्ययत्नसाध्यानीति शेषः स्थितप्रज्ञस्य का भाषेति प्रथमप्र
श्नस्योत्तरमाह प्रजहातीति कामत्यागस्य प्रकर्षो वासनाराहित्यं का
मानामात्मनिष्ठत्वं कैश्चिदिष्यते तदयुक्तं तेषां मनोनिष्ठत्वश्रुतेरि
त्याशयवानाह मनोगतानिति आत्मन्येवात्मनेत्याद्युत्तरभागानिरस्य
न्नयमनुवदति सर्वकामेति तर्हि प्रवर्तकाभावाद्विदुषः सर्वप्रवृत्तेरु
पशान्तिरिति नेत्याह शरीरेति उन्मत्तस्त्वनुन्मत्तो विवेकविरहितबुद्धि
म॰ भ्रमभागी प्रकर्षेणामदत्तमभवन् विद्यमानमपि विवेकं निरस्यन् भ्रा
न्तवद्व्यवहरन् प्रमत्त इति विभागः उत्तरार्द्धमवतार्य व्याकरोति उ
च्यत इति आत्मन्येवेत्येवकारस्यात्मनेत्यत्रापि संबन्धं द्योतयति हेतौ
वेति बाह्यलाभनिरपेक्षत्वेन तुष्टिमेव स्पष्टयति परमार्थेति स्थितप्र
ज्ञपदं विभजते स्थितेति प्रज्ञाप्रतिबन्धकसर्वकामविरामावस्था त
देति निर्दिश्यते उक्तमेव प्रपंचयति त्यक्तेति आत्मानं जिज्ञासमानो वै
राग्यद्वारा सर्वैषणात्यागात्मकं संन्यासमासाद्य श्रवणाद्यावृत्त्या त
ज्ज्ञानं प्राप्य तस्मिन्नेवासक्तो विषयवैमुख्येन तत्फलभूतां परितु
ष्टिं तत्रैव प्रतिलभमानः स्थितप्रज्ञव्यपदेशभागित्यर्थः ५५ ॥

स्वामिकृतटीका

अत्रैव साधकस्य यानि ज्ञानसाधनानि तान्येव स्वाभाविकानि सिद्धलक्ष
णानि अतः सिद्धस्य लक्षणानि कथयन्नेवान्तरङ्गानि ज्ञानसाधनान्याह।

ह यावदध्यायसमाप्तिस्तत्र प्रथमप्रश्नोत्तरं प्रजहातीति द्वाभ्यां श्रीभगवा
नुवाच मनसि स्थितान् सर्वान् कामान् यदा प्रकर्षेण जहाति त्यागे हेतुः
आत्मन्येवास्मिन्नेव परमानन्दरूपे आत्मना स्वयमेव तुष्ट इति आत्मारा
मः सन् यदा तुच्छविषयाभिलाषांस्त्यजति तदानेन लक्षणेन मुनिः स्थि
तप्रज्ञ इत्युच्यत इत्यर्थः ५५ ॥

पिशाचभाष्यं

स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छते स्थितप्रज्ञस्येत्यारभ्याध्याय
परिसमाप्तेः स्थितप्रज्ञस्य लक्षणं साधनं चोपदिश्यते सर्वत्राध्या
त्मशास्त्रे लक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वा
त् यानि यत्नसाध्यानि लक्षणानि सर्वत्राध्यात्मशास्त्रे विधीयन्ते अतस्ता
८ न्येव साधनानि भगवानुवाच प्रजहातीति प्रकर्षेण जहाति परित्यज
ति यदा कामानिच्छाभेदान् हे पार्थ मनोगतान् मनसि प्रविष्टानात्मन्ये
व प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यलाभनिरपेक्षस्तुष्टः पर
मार्थदर्शनामृतरसलाभेनान्यस्मिन्नलंप्रत्ययवान् स्थितप्र २४
ज्ञः स्थिता प्रज्ञा आत्मानात्मविवेकजा प्रज्ञा यस्य सः स्थितप्रज्ञो वि
द्वानुच्यते त्यक्तपुत्रवित्तलाभसन्यासी आत्माराम आत्मक्रीडोवान्
स्थितप्रज्ञ इत्यर्थः ५५ ॥

रामानुजभाष्यम्

ह्निशिषोषकथनेन स्वरूपमभिव्यक्तं भवतीति इति विशेष उच्यते।
आत्मन्येवात्मना मनसात्मैकावलम्बनेन तुष्टः तेन तोषेण तदति
रिक्तान् सर्वान् मनोगतान् कामान् यदा प्रकर्षेण जहाति तदायं स्थि
तप्रज्ञ उच्यते ज्ञाननिष्ठाकाष्ठेयं ५५ ॥

अभिनवगुप्तकृतटीका

अर्जुनेन कृतं

एतदेव प्रश्नवत् पृष्टं क्रमेणानिर्णीयते श्रीभगवान् स्थिताद्रूपाप्रज्ञाय
स्य दीप्यमानित्यसात्त्वं वृद्धिं ते सति विषयविक्षेपकत्वस्य कामरूपस्याभ
मस्य निवृत्तत्वात् योगिनो यः स्थितप्रज्ञ इत्याहेत्यर्थः स चेत्थं प्रकारस्त्वेकः
प्रश्नो निर्णीतः ५५ ॥

परमार्थप्रपाटीका

गी॰ टी॰ हि॰

तत्रभगवानक्रमेणोत्तरयतिप्रजहातीतियावदध्यायसमाप्ति हेपार्थम
नोगतान् सर्वान्कामान्प्रजहातिप्रात्यंतिकत्वेनवाप्रकर्षेणजहातितर्हिना
हिनिरालंबमनःस्यात्शक्नोतीत्याह आत्मनेति आत्मन्यानंदघनेआत्म
नात्वयैवतुष्टः आत्मस्वरूपानुभवेनतुष्टः अतएवलब्धानंदेभ्योनिवृत्तः
एतादृशोयदातदा [illegible]तप्रज्ञइत्युच्यते अत्रप्रज्ञाशब्देनविज्ञानेपवंस्थि
[illegible]रीभूतविज्ञानोजीवन्मुक्तइत्यर्थः श्रुतिरपियदासर्वेप्रमुच्यंतेका
मायस्यहृदिश्रिता अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुतइति अत्रै
वदेहेब्रह्मानंदमनुभवतिशेषंस्पष्टार्थं ५५

वनमालीटीका

कामान्कामादीन्मनोगतान् अविद्यासहकृतस्वामिनादिसंबंधेनजी
वेवर्तमानान् प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेनतत्रोत्तरेअव
योक्तान्सर्वान्प्रकर्षेणातिःशेषतयाजहातिहानेहेतुमनोगतान्य
त्रैवमनसिकामादयउत्पद्यंतेतत्रैवप्र[illegible]लाकारकामादिविरोधिनीवि
त्तिरुत्पन्नेतिभवतितेषांनाशःज्ञानस्यकामादिनाशकत्वेतत्रसोऽप्यस
परंदृष्ट्वानिवर्ततइतिसंप्रतिवक्ष्यति ननुस्थितप्रज्ञस्यस्वप्रकाशेऽ
लिंगगम्यः संतोषविशेषःप्रतीयते ससर्वकामत्यागेकथंस्यादिति।
तत्राहआत्मन्येवपरमानंदस्वरूपेणतत्रगतालयेऽपिमनसि स्वादावि
र्भूतपरमानंदस्वस्वरूपेवाआत्मनामनसासंतुष्ट इतोऽन्योलाभोनास्ती
तिसर्वत्रैवातितृप्तः यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदिश्रिताः अथमर्त्यो स्य॰
ऽमृतोभवत्यत्रब्रह्मसमश्नुतइतिश्रुतेः तथाचसएवंविधलक्षणा स्थितप्रज्ञा
दिशब्दैर्भाषितइतिप्रथमप्रश्नोत्तरम् ५५ ॥

ऊसमवैजयन्तीटीका

ज्ञाननिष्ठस्यापरपर्यायस्यस्थितप्रज्ञस्यस्वरूपंतज्ज्ञानसाधनंचेतः
प्रभृत्यध्यायान्तेनग्रंथेनाह तत्रचादौतस्याधिकमूनंहन्तीतिनाधिक
मूनस्वरूपत्वस्य पूर्वपूर्वस्मादुत्तरोत्तरगावरत्वेनचतुर्विधत्वंचतुर्भिःप्र
जहातीत्यादिभिर्भगवानुवाच प्रजहातीति हेपार्थयदायस्मिंकाले
वस्थायांवाआत्मनाकामसंकल्पवर्जितेनमनसाआत्मन्येवस्वस्वरूपेप
वा [illegible]स्ययोगस्यचक्रेदयापवकारस्तेनदेहापत्यकलत्रादयः सर्वेप्राकृ

३२५

तभोगावाप्तेस्तुष्टः संतुष्टः सन् पुरुषो मनोगतान् राजसतामसा
दिगुणात्रवर्णितानां ब्रह्मलोकेंद्रादिलोकगतभोगानां श्रवणेन मना
ग्भिलाषान् सर्वान् कैवल्यपर्यंतानपि समस्तान् कामान् प्रजहाति प्र
कर्षेण त्यजति तदासौ पुरुषः स्थितप्रज्ञउच्यते ज्ञाननिष्ठाऽसौमा
कथ्यते पार्थेति संबोधनेन यथा निष्कामा न पक्षिनीर्यपतिव्रताऽश्र
याभर्तारातयैव वैशाख्यमेव धर्मादीनां तापसपुत्रपिशिरादीन् त्यक्त्वा भो
गकामांस्त्यक्त्वा स्वस्मिन्नेव संतुष्टा सती स्थितप्रज्ञा भवत् यथा तस्तत्व
मपि मद्वाक्येनैव मत्प्राप्त्यर्थमेव सर्वान् प्राकृतविषयकामान् मनोगता
न् कामान् जहासि चेत् स्थितप्रज्ञो भविष्यसीति सूचितम् ५५ ॥
+ एतेषां चतुर्णां प्रश्नानां क्रमेणोत्तरं भगवानुवाच यावद मधुसूदनी टीका ध्यायसमाप्ति +
+ कामान्कामसंकल्पादीन् मनोहत्निविशेषान् प्रकर्षेण कारणबाधेन
यदा प्रजहाति परित्यजति सर्ववृत्तिशून्य एव यदा भवति स्थितप्रज्ञ
स्तदोच्यते समाधिस्थित इति शेषः कामानामनात्मधर्मत्वेन परित्या
गयोग्यतामाह मनोगतानिति यदि ह्यात्मगताः स्युस्तदा न त्यक्तुं
शक्येरन् वह्न्यौष्ण्यवत् स्वाभाविकत्वात् मनसस्तु धर्मा एते ततस्तत्परि
त्यागेन परित्यक्तुं शक्या एवेत्यर्थः ननु स्थितप्रज्ञस्य मुखप्रसादलिं
गगम्यः संतोषविशेषः प्रतीयते स कथं सर्वकामपरित्यागे स्यादित्य
तस्राह आत्मन्येव परमानंदरूपेण न तु अनात्मनि तुच्छे आत्मना स्वप्रका
शचिद्रूपेणाभासमानेन न तु वृत्त्या तुष्टः परितृप्तः परमपुरुषार्थ
लाभात् तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति तथा च समाधिस्थः
स्थितप्रज्ञ एवंविधैर्लक्षणैर्वाचिभिर्भाष्यत इति प्रथमप्रश्नस्यो
त्तरम् ५५ [illegible]
[illegible]
[illegible] ५५ ॥

सदानंदीटीका

एषां चतुर्णां प्रश्नानां क्रमेणाहोत्तरं हरिः कामानित्यकल्पनयात्संम

प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेन तत्त्वान्तरे पञ्चधा प्रपञ्चितान् सर्वान्निरवशेषान्

नोहन्यात्मकान्यदा १ सर्वाकारणावाधेनजहातितानशेषतः सर्व
कामविनिर्मुक्तोयदाभवतिनिश्चलः २ स्थितप्रज्ञःसमाधिस्थस्तदायं
प्रोच्यतेमुनिः कामाश्चनात्मधर्मास्त्यक्तुंयोग्याश्चशेषतः ३ यद्येतेस्या
त्मधर्माःस्युस्त्यक्तुंशक्याःकथंतदा वह्न्यौष्ण्यवत्स्वभावत्वात्स्वभावोदु
रतिक्रमः ४ मनोधर्मायतस्तेतत्त्यक्तुंशक्याःस्वभावेनते तन्निरोधेन
तेसर्वेनिरुद्धाःसंतिवैयथा ५ तस्मादेनतथात्मकास्तद्धर्माःस्युर्मने
धात्मकाः ननुस्थितधियस्तर्हिसंतोषःकिंनिबंधनः कामत्यागेभ
वेदित्याकांक्षायामाहकेशवः आत्मन्येवपरानंदेनतुनात्मनितुच्छ
के ७ आत्मनास्वप्रकाशत्वात्स्वसमानेनवित्ततः परितुष्टःसदानंदरू
रूपार्थैकलाभतः ८ स्थितप्रज्ञःसमाधिस्थएवंलक्षणवाचिभिः
शब्दैर्भाष्यतइत्याद्यप्रश्नोत्तरमुदाहृतम् ९ ५५ ॥

नीलकंठीटीका

एतेषांक्रमेणउत्तराण्याहभगवान् प्रजहातीत्यादिना अत्रयान्येवकृ
तार्थलक्षणानितानिज्ञानसाधनानीतिमत्वाउपदिश्यंतेस्थितप्रज्ञ
लक्षणानितेषामकृतार्थेषुयत्नसाध्यत्वात्कृतार्थेषुस्वाभाविकत्वा
त् यथोक्तंउत्पन्नात्मप्रबोधस्यत्वद्वेष्टृत्वादयोगुणाः भवंत्ययत्नतस्त
स्यनतुसाधकरूपिणः इति यदाययोगीसर्वान्स्थूलसूक्ष्मकारणश
रीरभोग्यान्कामान्काम्यमानान्विषयान्प्रकर्षेणसमूलंजहाति
त्यजति कीदृशान्कामान्मनोगतान्मनस्येवसंकल्पविकल्पा
त्मकेस्थितान्नतुबहिः यथोक्तमक्षपादाचार्यैः दोषनिमित्तंरूपाद
योविषयाःसंकल्पकृताइति तत्रस्थूलानांकामानांत्यागएकांतसेव
नमात्राद्भवतीतिसत्यपीयानेव विलीनकरणग्रामस्यसमनस्कस्यजा
ग्रद्वासनामयाःस्वप्नेयेकामाःस्फुरंतितेषामपित्यागोभगवद्ध्यानादि
रूपसद्वासनाभ्यासबलेनभवति येनपरसंहृतकरणस्यसंप्रज्ञातस
माधिकालेदिव्याःकामाःसंकल्पमात्रोपनतादहरविद्यादिषुप्रसिद्धा
स्तेषामपित्यागोसंप्रज्ञातसमाध्यभ्यासबलेनभवति एवंत्रिविधान्
कामानुत्पन्नानात्मन्येवात्मनैकरसेआत्मनास्वेनैवस्वरूपानंदेनतुष्टो

वाह्यविषयनिरपेक्षोयदाभवतितदायंस्थितप्रज्ञइत्युच्यते ५५ ॥

श्रीधरीटीका

कामान्वाह्यार्थविषयान्ज्ञानात्संकल्पान्यदात्यजतिआत्मन्येवपर
४ मात्मस्वरूपेपवात्मनांतःकरणेनतुष्टःपरमात्मज्ञानैकप्रवणःत
दास्थितप्रज्ञउच्यते ५५ ॥

रामकंठटीका

इहाखिलसर्वरहस्यानामुपदेशइतेस्मिन्विज्ञानेकश्चिदेवलतेष
कोजन्मसहस्रपरिशीलितपर्यवभासैकात्मनापरामृष्टरजस्तमो
मयमलतयासत्वमात्रशेषतेसति सम्यग्जातस्वरूपप्रत्ययमर्षया
गप्रवृत्तश्चरमजन्माधुकृषणातिशयोपिकारी यस्तथाविधावसरोपजा
तानुजिघृक्षापरमेश्वरप्रेषिताभ्यांसततसहचरीभ्यांभक्तिश्रद्धाभ्यांदत्त
दृढहस्तावलंभोयथोक्तज्ञाननिःश्रेणीस्थिरनिवेशितपदःपरमका
रुणासमापत्तिप्रतिविम्बरूपंपरमेधामाधिरोढुमध्यवसितःयस्तुदि
श्यात्मतत्त्वमेवाहंतयाव्यपदिशन् वक्ष्यति मनुष्याणांसहस्रेषुकश्चिद्य
ततिसिद्धये यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतइति तथावहूनां
जन्मनामन्तेज्ञानवान्मांप्रपद्यतेइत्यादि तादृशस्यमनपरेदमाचरतिदा त४
स्थितप्रज्ञोभवतिकिमाचरति यदामनोगतान्संकल्पवर्तिनःकामान
नलज्ञानुष्ठेयकर्मफलभूतान्स्वर्गादीन्प्रजहाति प्रकर्षेणत्यजति मना
गपितान्नसंकल्पयतिनतुकर्माणिप्रजहाति कथमेतत्संभवतिकर्मा
व४ णिकरोति फलंचप्रजहाति इत्येतदुपपादयितुंविशेषणमाह आ
त्मन्येवात्मनातुष्टइति सर्वःकश्चित्खलुविदधिकारिणोतोषप्रीतिम
नुभवति किन्त्वयामसर्वेणाकेनचिदनित्येनप्राप्येनसुखसाधनभूते
नवस्तुनाप्राप्तेनानित्यमेवतोषमाप्नोति अयंतयोगीसततसन्निहि
तानस्तमितचित्प्रकाशात्मनापरमया भावनाज्ञानवधानमिवस्था
पितनतंदानन्दस्वसंपूर्णास्वमहिमनाखिलवस्तुस्पृहाविच्छेदकावि

गी॰ गा मात्मन्येवनिहितविस्मृतेनमहानिधानेनैवघुनः प्रत्युदितस्मृति।
टी॰ वशात्प्रतिलब्धेनात्मनैवसत्येनस्वभावेननिरुत्तरेणलाभेनलब्धस
हि॰ न्तुष्टान्तरः एवंविधवाचाचेकपं प्रार्थनीयानुत्पादविनाशधर्मकान्कामा
न्कथंनप्रजह्यात् यदावेत्थं भूतः सन्कामान् सर्वकर्माणिकुर्वन्नपिप्र
जहाति तदास्थितप्रज्ञोयथोक्तस्वभावलब्धप्रतिष्ठबुद्धिर्भवतीति
[illegible] ५५ ॥ ॥

लासिकी [illegible] टीका

नदेवंचत्वारःप्रश्नाःसमाधिस्थस्यस्थितप्रज्ञेएकः व्युत्थितस्थितप्रज्ञे
त्रयइतिएतेषांचतुर्णांप्रश्नानांयावदध्यायसमाप्तिक्रमेणश्रीभग
वानुवाच प्रेति प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेनपंच
धोक्ताप्रकर्षेणनिरवशेषतयायस्मिन्कालेजहाति चित्तवृत्तिरू
पवयदाभवति समाधिस्थःस्थितप्रज्ञस्तदोच्यते कामाना(म्)
नात्मधर्मतयाशक्यत्यागतामाह मनोगतानिति मनोधर्मा(प)
वैते नत्वात्मधर्माःअतस्त्यक्तुंशक्याइत्यर्थः ५५ ॥ इतिशून्यत्वेनहेतुःप्रतिष्ठित

(margin: कामान्संकल्पभेदान् , मनोवृत्तिविशेषान् , नाम्)

इत्याह आत्मन्येवपरमानंदरूपेणलब्धेदेहादौआत्मनेवन•

मनोवृत्त्यानुपयुक्तः तथाचश्रुतिः यदासर्वेप्रमुच्यन्ते कामायेस्यहृदिस्थिताः अथमर्त्योमृतोभवत्यत्रब्रह्मस मश्नुतेइति एवंसमाधिस्थस्थितप्रज्ञलक्षणदाहृत्याथप्र प्रश्नस्योत्तरमुक्तम

पंचोलीटीका

यत्नसाध्यत्वात्यानियत्नसाध्यानिसाधनानिलक्षणानिच
भवंतितानिभगवानाह प्रजहातीति हेपार्थयदामुनिःसं
न्यासीमनोगतान्मनसिस्थितान्सर्वान्कामान्इच्छाभेदान्
प्रजहातिआत्मन्येवप्रत्यगात्मनिःआत्मनापरमात्मनापरमा
त्मदर्शनामृतलाभेनतुष्टःतदास्थितःप्रज्ञउच्यते ५५

रणवीरसमिद्धोधिनी॥

एतत्प्रश्नचतुष्टयंचक्रमेणनिर्णीयते भगवता तत्रादौकाभाषे
तिप्रश्नंसमर्थयतिप्रजहातीत्येकेनसर्वान्मनोगतान्कामान्नच
श्रेयोनुपपश्यामि हत्वास्वजनमाहवे इत्यादिरूपान्संकल्पान्यस्त
त्यजति आत्मनास्वयमेवक्लिन्नसंपाद्यत्वादन्यनिरपेक्षयैव आ

त्मन्येव आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म चेत्यमरासना
तु प्रकृतिरूपे प्रयत्ने धृतौ वा तुष्टः तदा स्थितप्रज्ञ उच्यते स्थिताप्र-
ज्ञा प्रज्ञा यया लोक निश्चयात्मिका बुद्धिरस्येति व्युत्पत्त्या द्वष्ट्या कर्म
योगिनो वाचकतयायः स्थितप्रज्ञमाहुः स चेत्थं प्रयुक्त इत्येकः प्रश्नः
समर्थितः ५५॥

मधुभाष्य

५५॥

भाषा अनुवाद

श्रीभगवान् बोले कि हे अर्जुन सुनो जिनको साधक लोग
ज्ञान साधन के निमित्त यत्नपूर्वक साधना करते हैं वेई सिद्धके
स्वाभाविक कहे स्वभाव सिद्ध लक्षण हैं इससे अब सिद्धके ल
क्षण कहने के अनन्तर ज्ञानके साधन अध्याय की समाप्ति पर्य्य
न्त कहते है तिनमे से प्रथम दो श्लोकसे पहिली प्रश्नका उत्तर कर
ते है कि हे अर्जुन मुनिजन मनोगत सकल कामना जब अच्छी
तरहसे त्याग करते है कि अपने परम आनंदरूप आत्मामे जो रमे
सो आत्माराम अर्थात् आप अपने आत्म सुख मे संतुष्ट होते हैं
तिससे जब दुष्ट विषय अभिलाष छोड़ते है तब उसी लक्षण
सेमति स्थितप्रज्ञ कहे जाते हैं ५५ ॥

दोहा

तजैं पार्थ जब कामना मनमे गतहै जोय आपहि आपमें
तुष्टहै स्थितमतिकहो सोय ५५॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

शांकरभाष्यं

किंच दुःखेष्विति दुःखेष्वाध्यात्मिकादिषु प्राप्तेषु नोद्विग्नं न प्रक्षुभितं
दुःखप्राप्तौ मनो यस्य सोयमनुद्विग्नमनाः तथा सुखेषु प्राप्तेषु विग
तास्पृहा तृष्णा यस्य नाग्निरिवेन्धनाद्याधाने सुखान्यनुवर्द्धते स वि
गतस्पृहः वीतरागभयक्रोधः रागश्च भयंच क्रोधश्च वीता विगता रा
गभयक्रोधा यस्मात् स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञो मुनिः
संन्यासी तदोच्यते ५६॥

आनंदगिरिकृतटीका

लक्षणभेदानुवादद्वारा विविदिषोरेव कर्तव्यान्तरमुपदिशति किं
चेति ज्वरशिरोरोगादिकृतानि दुःखान्याध्यात्मिकानि आदिशब्देना
धिभौतिकानि व्याघ्रसर्पादिप्रयुक्तान्याधिदैविकानि चातिवातवर्षा
दिनिमित्तानि दुःखानि गृह्यंते तेषूपलब्धेष्वपि नोद्विग्नं मनो यस्य मत
येति संबंधः नोद्विग्नमित्येतद्व्याचष्टेन प्रक्षुभितमिति दुःखानामुक्ता
नां प्राप्तौ परिहारासमर्थस्य तदनुभवपरिभावितं दुःखमुद्वेगस्तेन स
हितं मनो यस्य न भवति स तथेत्याह दुःखप्राप्ताविति मनो यस्य नो
द्विग्नमिति पूर्वेणा संबंधः सुखान्यपि दुःखवत् त्रिविधानीति मत्वात
यथोक्तेषु प्राप्तेषु सत्स्वपि यो विगतास्पृहा तृष्णा यस्य स विगतस्पृह
इति योजना अज्ञस्य हि प्राप्तानि सुखान्यनुविवर्द्धते तृष्णा विदुषस्तु
नैवमित्यत्र वैधर्म्यदृष्टान्तमाह नाग्निरिवेति यथा हि दारुसेन्धनादे
रभ्याधाने वह्निर्विवर्द्धते तथाज्ञस्य सुखान्युपगतान्यनु विवर्द्धमाना
पि तृष्णा विदुषो न तान्यनु विवर्द्धते नहि वह्निरदारूपगतमपि दा
रु विवृद्धमधिगच्छति तेन जिज्ञासुना सुखदुःखयोस्तयोरुद्वेगौ न
कर्तव्याविस्यर्थः रागादयस्तेन कर्तव्या न भवंतीत्याह वीतेति अनु
भूताभिनिवेशो विषयेषु रंजनात्मकस्तृष्णाभेदो रागः परेणापकृता

श्री॰ गी॰ टी॰ हि॰ स गात्रनेत्रादिविकारकारणं भयं क्रोधस्तु परवशीकृत्यात्मानं स्वप
रापकारप्रवृत्तिहेतुर्बुद्धिवृत्तिविशेषः नन्वेतैरिति मुनिरात्मविदित्यंगी
कृत्याह सन्न्यासीति स्वाव दुःखादिविषयतत्त्वादेरागादेश्चाभवावस्था त
देत्युच्यते ५६

स्वामिकृतटीका

किंच दुःखेष्विति दुःखेषु प्राप्तेष्वपि अनुद्विग्नमक्षुभितं मनो यस्य सः सुखे
षु विगता स्पृहा यस्य सः तत्र हेतुः वीता अपगता रागभयक्रोधा यस्मा
त्तत्र रागः प्रीतिः स मुनिः स्थितधीः स्थितप्रज्ञ उच्यते ५६

पैशाचभाष्यम्

किंच दुःखेष्विति दुःखेष्वाध्यात्मिकादिषु अनुद्विग्नमप्रक्षुभितं मनो
यस्य सोऽनुद्विग्नमनाः तथा सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य ना
ग्निरिवेंधनाद्याधानेन सुखान्यनुवर्तते स विगतस्पृहः वीतरागभयक्रो
धः रागश्च भयं च क्रोधश्च विगता यस्मात्स वीतरागभयक्रोधः स्थि
तप्रज्ञः मुनिर्मननशीलस्तदोच्यते ५६॥

रामानुजभाष्यम्

अतंरनिष्पन्नतोर्वाचीनास्वरूपविष्टावस्थोच्यते प्रियविश्लेषादिदुःख
निमित्ते उपस्थिते अनुद्विग्नमनाः न दुःखी भवति सुखेषु विगतस्पृहः प्रि
येषु सन्निहितेष्वपि निःस्पृहः वीतरागभयक्रोधः अनागतेषु स्पृहा रा
गस्तद्रहितः प्रियविश्लेषाप्रियागमनहेतुदर्शननिमित्तं दुःखं भयं त
द्रहितः प्रियविश्लेषाप्रियागमनहेतुभूतचेतनान्तरगतदुःखहेतुः
स्वमनोविकारः क्रोधस्तद्रहितः एवंभूतो मुनिरात्ममननशील
स्थितधीरुच्यते ५६॥

अभिनवगुप्तकृतटीका

सुखदुःखयोर्यस्य रागद्वेषराहित्यात्तृप्तिः स मुनिरेव स्थिरप्रज्ञो नान्यः ५६

परमार्थप्रपाटीका

अथान्यदाह दुःखेष्विति दैवात्प्राप्तेषु दुःखेषु अनुद्विग्नमनाः नोद्वि
ग्नं क्षोभं प्राप्तं मनो यस्य स तथा तथैव प्राप्तेषु सुखेषु विगतस्पृहः।

घस्य

अनादरः अत्रप्रयासंभवेदेतमाह वीतरागा इति स्पष्टम् ५६ ॥

वनमालीटीका

किंप्रभाषेतेत्यस्योत्तरमाह दुःखेष्विति द्वाभ्यां दुःखेषु ज्वररोगादिहेतु
केष्वाध्यात्मिकेषु व्याघ्रादिहेतुकाधिदैवेषु प्रारब्धपापकर्मप्रापितेषु
नोद्विग्नं तत्परिहारात्समर्थतयानव्याकुलं मनो यस्य सः अविवेकिनो
हि दुःखप्राप्तौपि दुःखं मां कोमे दुःखमीदृशं निराकुर्यादित्यनुतापात्म
कस्तामसश्चित्तवृत्तिविशेष उद्वेगो जायते तथा सुखेषु सत्वगुणा
हेतुकचित्तवृत्तिविशेषेषु त्रिविधेषु प्रारब्धपुण्यप्रापितेषु विगत
स्पृहः आगामितज्जातीयसुखस्पृहारहितः सुखानुभवकाले त
ज्जातीयसुखस्य कारणं यथमेमत्तु तृष्णाय वृथैव तदाकांक्षारूपा ता
मसी चित्तवृत्तिः आर्तिरूपा स्पृहा न हि कारणं विना कार्योत्पत्तिः सा
त्वाविवेकेनएव रागो विषयेषु रंजनात्मकश्चित्तवृत्तिविशेषः सत्वे
त्पत्राव्यभिनिवेशरूपः आगामिपनिष्टज्ञानजन्यं दुःखं भयं एवं राग
विषयविनाशके समुपस्थिते तद्विवारणासामर्थ्ये मात्मनो मन्यमा
नस्याभिज्वलनात्मकश्चित्तवृत्तिविशेषः क्रोधः ते सर्वे विगता यस्मा
त्तमः सतादृशो मुनिः स्थितधीरुच्यते तस्य जीवन्मुक्तस्य देहे विना
प्रारब्धकर्मवशात् कदाचिद्रोगादिकं समुपस्थितमपि अविद्यासहा
कृतस्वामित्वादिसंबंधेन प्राणिवज्जीवेन वर्तते तत्संबंधघटिकापा
देहादावहंममेत्यभिमानहेतोरविद्याया मत्प्रसादान्नाशात्परंहृदं
प्रामस्तत्स्थितिमिवोदासीनः परं परप्रत्यनुभवप्रकटनेन शिष्य
शिक्षार्थमनुद्वेगनिस्पृहत्वादिवाचः प्रभाषते एवं ब्राह्मोपि मुमु
क्षुर्दुःखेनोद्विग्नः सुखेन प्रहृष्टेन रागभयक्रोधरहितः प्रभवेदिति भा
वः ५६॥

ज्ञानमवैजयन्तीटीका

ज्ञाननिष्ठस्य निरतिशयज्ञाननिष्ठामुक्तेदानीं तस्याचरणमाह
दुःखेष्विति दुःखेषु राजसतामसादिकर्मजनिताध्यात्मिकादित्रिवि
धनिमित्तेषु सत्त्वे फलवियोगादिजन्येषु वा अनुद्विग्नमनाः अव्या

गी॰
टी॰ द्वि॰

ङलविन्नः सर्वेषु सात्त्विककर्मस्वेवात्मात्मीयवर्गीयारोग्यजनिते
सुखान्यादिलाभनिमित्ते सुखे वा विगतस्पृहः विगता स्पृहा सक्तिर्यस्य
सः अतएव वीतरागभयक्रोधः विशेषेणातीता रागभयक्रोधा य
स्मात्सः अत्रैव धातोर्गतिरूपार्थ एव दृश्यते न तु प्राप्तिरूपार्थः प्रकर
णविरोधात् एवंभूतो यो मुनिरात्मस्वरूपमननस्वभावः संस्थितधीः स्थि
तप्रज्ञ उच्यते कथ्यते सर्वस्याः अवस्थायाः सकाशादियमवस्थाऽवरा
यतस्तस्यामवस्थायामात्मस्वरूपावलोकनेविनात्मेषांशरीरसुखदुः
खादीनांभानमेवनस्यादन्नतुतेषांभानेस्यात्किंतुतेषांसक्तिर्नस्यादिति
विवेकः ५९॥

\+ इदानीं सुस्थितचित्तस्य स्थितप्रज्ञस्य भाषणोपवेशन मधुसूदनीटीका गमनानि मूढजनविलक्षणानि व्याख्येयानि तत्र किं भाषेत तस्योत्तरमाह द्वाभ्यां +

दुःखानित्रिविधानिशोकमोहज्वरशिरोरोगादिनिमित्तान्याध्यात्मिका दु॰
नि व्याघ्रसर्पादिप्रभवान्याधिभौतिकानि अतिवातातिवृष्ट्यादिहे
तुकान्याधिदैविकानि तेषु दुःखेषु रजःपरिणामसंतापात्मकचि
त्तवृत्तिविशेषेषु प्रारब्धपापकर्मप्रापितेषु उद्विग्नं दुःखपरिहाराक्षम नो॰
तया व्याकुलं न भवति मनो यस्य सोऽनुद्विग्नमनाः अविवेकिनो हि दुः
दुः॰ खप्राप्तौ सत्यामहो पापोऽहं धिङ्मां दुरात्मानं मम तादृशं दुःखभागिनः को
मे दुःखमीदृशं निराकुर्यादित्यनुतापात्मको भ्रान्तिरूपस्तामसः चि
त्तवृत्तिविशेष उद्वेगाख्यो जायते यश्च पापानुष्ठानसमये स्यात्तदा
तन्निवृत्तिप्रयोजको दुःखकारणस्यापि किमिति मम दुःखं जाय
त इत्यविवेकजभ्रमरूपत्वान्न विवेकिनः स्थितप्रज्ञस्य संभवति दुः
खमात्रं हि प्रारब्धकर्मणा प्राप्यते न तु तदुत्तरकालीनो भ्रमोऽपि ननु
दुःखान्तरकारणत्वात् सोऽपि प्रारब्धकर्मान्तरेण प्रापित इति चेन्न
स्थितप्रज्ञस्य भ्रमोपादानाज्ञाननाशेन भ्रमासंभवात् तज्जन्यदुःख
प्रापकप्रारब्धाभावात् यथाकथंचिद्देहयात्रामात्रनिर्वाहकप्रार
ब्धकर्मफलस्य च भ्रमाभावेऽपि बाधितानुवृत्त्योपपत्तेरिति विस्तरे
णाग्रे वक्ष्यते तथा सुखेषु सत्त्वपरिणामरूपप्रीत्यात्मकचित्तवृत्ति

प्रतिबंधकत्वेन सफलः स्यात् भोगकाले तु भवत्कारणे सति कार्यस्योच्छेत्तुमशक्यत्वात्

विशेषेषु त्रिविधेषु प्रारब्धपुण्यकर्मप्रापितेषु विगतस्पृहः आगामित
ज्जातीयसुखस्पृहारहितः स्पृहा हि नाम सुखानुभवकाले तज्जातीयसु
खस्य कारणं धर्ममननुष्ठायैव तदाकांक्षारूपा तामसी चित्तवृत्तिर्भ्रा
न्तिरेव सा चाविवेकिन एव जायते न हि कारणाभावे कार्यं भवितुमर्हा
ति अतो यथा सति कारणे कार्यं मा भूदिति दुःखाकांक्षारूप उद्वेगो विवेकि
नो न संभवति तथैवासति कारणे कार्यं भूयादिति दुःखाकांक्षारूपात
स्यात्मिका स्पृहापि नोपपद्यते प्रारब्धकर्मणः सुखमात्रप्रापकत्वात्
हर्षात्मिका वा चित्तवृत्तिः स्पृहाशब्देनोक्ता सापि भ्रान्तिरेव अहो धन्यो
ल्यमु ऽहं यस्य ममेदृशं सुखमुपस्थितं को वा मया तुल्यो भुवने केनोपायेन ममेदृ
शं सुखं न विच्छिद्येतेत्येवमात्मिका फलतात्पर्यरूपा तामसी चित्तवृत्तिः प्र गल्प:
तथैवोक्तं भाष्ये नाग्निरिवेन्धनाद्याधाने यः सुखान्यनु विवर्धते स विगत
स्पृह इति वस्तुतस्तु न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियमिति ।
सापि न विवेकिनः संभवति भ्रान्तित्वाभावात् तथा वीतरागभयक्रो
धः रागः शोभनाध्यासनिबंधनो विषयेषु रंजनात्मकः चित्तवृत्तिवि
शेषोऽत्यन्ताभिनिवेशरूपः रागविषयस्य नाशके समुपस्थिते तन्निवा
रणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकः चित्तवृत्तिविशेषो भयं
एवं रागविषयविनाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो म
न्यमानस्याभिज्वलनात्मकः चित्तवृत्तिविशेषः क्रोधः ते सर्वे विपर्यय
रूपत्वाद्विगता यस्मात् स तथेदृशो मुनिर्मननशीलः संन्यासी स्थितप्र
ज्ञ इत्युच्यते एवंलक्षणः स्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थं
मनुद्विग्नत्वनिस्पृहत्वादिवाचः प्रभाषत इत्यन्वयः उक्तः एवं चान्योऽपि मुमु
क्षुः दुःखे नोद्विजेत् सुखे न प्रहृष्येत् रागभयक्रोधरहितश्च भवेदित्यभिप्रा
यः ५६ [illegible] ॥

सदानंदीटीका

अथ स्थितचित्तस्य स्थितप्रज्ञस्य भाषणं आसनं गमनं चैतत्त्रयं सूत्रवि
लक्षणं । आद्यं यत्तत्त्रयस्य व्याख्यातं सम्यगुच्यते शोकमोहज्वरादौ।

गी॰ निदुःखान्याध्यात्मिकानिवै २ आधिभौतिकदुःखानिव्याघ्रसर्पादिजा
टी॰ द्वि॰ निच अतिवातातिवृष्ट्यादिदुःखंस्यादाधिदैवकं ३ तेषुदुःखेषुरजसःप
रिणामात्मकेषुच प्रारब्धकर्मणामेषुव्याकुलंयस्यनोमनः ४ भ्रांतिका
र्यनुयातेषुमोहेगमभजतेषुयः देहाभिमानिनोदुःखेप्राप्तेसत्यामहोवत
पापिष्ठोहंवधिष्ण्यास्यादीदृशोदुःखभागिनं कामेदुःखेनिराकुर्यादिस्पृ
हेगोभिजायते ६ पापानुष्ठानसमयेयद्येवंस्यान्नहाननः प्रतिबंधेनपाप
स्यसफलःस्याज्ज्ञात्मनः ७ भोगकालेहृषीकेगोमस्पृहस्येवनतद्विदः न
ष्याह्वविभ्रमतस्यपरिणामात्मकेषुच ८ प्रारब्धकर्मणामेषुत्रिविधेषु
गतस्पृहः [highlighted], सुखानुभवकालेहिमूढानामविवेकिनां ९
तृष्णाकोलाविनाथंमतज्ज्ञानोयस्तवस्यच स्थितप्रज्ञस्यचभ्रांतेरभा
वात्तामसोभ्रमः १० नैवास्यतःस्पृहाभूयःस्वात्मन्येवस्थितःसुधीः अ
नात्मन्यात्मधीरेवकारणंसकलभ्रमे ११ शोभनाध्यासजोरागोविष
येरंजनात्मकः अत्यंताभिनिवेशात्माचित्तवृत्तिविशेषकः १२ तद्वैव
रस्यदुर्दैवान्नाशकेप्रत्युपस्थिते तन्निराकरणेशक्तोयदिहिंसेनतद्वधस्तते
तन्निवारणसामर्थ्यमन्यमानस्यचात्मनः चित्तवृत्तिविशेषःस्यात्क्रोधो १२
भिज्वलनात्मकः १४ तेविपर्ययरूपत्वाद्गुणाभावविगतायतः एतादृशो
मुनिर्धीरःस्थितप्रज्ञउदाहृतः १५ एवंसशिष्यशिक्षार्थमनुद्वेगादि
कागिरः स्वानुभूतिप्रकाशेननिर्मलात्माःप्रभाषते १६ एवंस्वेचदुः
खेचनरुष्येनोद्विग्नेनच रागक्रोधादिशून्यःस्यादित्येकाशयोहृदेः १७ ५६ ॥

नीलकंठीटीका

दुःखेषुशस्त्रपातादिषुदुःखसाधनेषुप्राप्तेष्वपिअनुद्विग्नमनाअचंच
लमनाः वदतीव यस्मिन्स्थितोनदुःखेन गुरुणापिविचाल्यतइति
सुखेषुसुखसाधनेषुस्रक्चंदनादिषुप्राप्तेष्वपिविगतस्पृहोनिर्हेतिक
त्वाद्भवति अतएववीताःरागभयक्रोधायस्मात्सततथानहितस्मा
[highlighted]मवस्थायांरागादयोदुःखादयोवामेभवेतिएवंविधःसमाधिस्थःस्थित
धीःस्थितप्रज्ञउच्यते ५६ ॥

आनंदीटीका

अनुद्विग्नमना निर्विकारचित्तः रागः विषयेषु स्पृहा भयं प्राप्तेषु विषयेषु अपगमाशङ्कात्रासः क्रोधः अपगतेषु चित्तज्वलनं ते यस्य अपगताः स वीतरागभयक्रोधः मुनिः [illegible] ५६ ॥

रामकंठीटीका

+ सामान्येन स्थितप्रज्ञलक्षणमुक्त्वा तदेव विशेषतो वक्तुमाह +

+ इष्टकर्मफलभूतेषु सुखदुःखेषु प्राप्यमानेषु प्राप्तेषु वा द्विप्रकारतया सर्वप्रा
प॰४ णिनां विकारहेतुत्वमायाते य उक्तलक्षणः स्थितप्रज्ञः प्राप्यमाणे
षु सत्सु दुःखेष्वनुद्विग्नमना निर्भयचित्त एव भवति सुखेषु प्राप्यमाणे
षु विगतस्पृहो निवृत्ताभिलाषो भवति यथोक्तपरिपूर्णात्मस्वरूपलब्ध
प्रतिष्ठत्वात्सर्वसाम्यसमाधिसमापन्नत्वादेव वीतरागभयक्रो
धो रागः सुखविषयोऽभिलाषस्तथा भयं सुखप्रतीघातहेतोः शोकप्र
तीकारासमर्थस्तथा क्रोधः शोकप्रतीकारस्तथाविधप्रतिरोधः एते वी
ता विगता यस्य तथाविधः स्थितप्रज्ञ उच्यते ([illegible] ५६ ॥

+ प्राप्तेषु दुःखेष्वाध्यात्मिकादिष्वनुद्विग्नमनित्यमात्मप्रतिष्ठत्वादक्षुभितं मनो यस्य सः सुखेषु विगतस्पृहो निवृत्ताभिलाषः वीतरागो रंजनात्मको भयं क्रोधो यस्य स मुनिर्मननशीलः +

लाभिकी [illegible] टीका

इदानीं तु स्थितस्थितप्रज्ञः किं प्रभाषेतेत्यस्योत्तरमाह द्वाभ्यां दुःखे
ति स्वात्मपरामर्शेनात्मजन्यो योगी स्थितप्रज्ञ इत्युच्यते ५६ ॥

पंचोलीटीका

प्रथमप्रश्नस्योत्तरं तत्र किं प्रभाषेतेत्यस्योत्तरमाह द्वाभ्यां दुः
खेष्वाध्यात्मिकादिष्वनुद्विग्नमनाः अक्षुभितमनाः सुखेषु विग
तस्पृहः वीतरागभयक्रोधो मुनिः स्थितधीः उच्यते ५६

[illegible]

अथ स्थितधीः किं प्रभाषेतेति द्वितीयं प्रश्नं समर्थयति दुःखेष्व
नुद्विग्नमना इत्यारभ्य हरंति प्रसभं मनः इत्यंतैः पंचभिः श्लोकैः समाधि

तजयासिद्धिरूपेषु दुःखेषूद्वेगरहितः संभावितजयासिद्धिरूपेषु
सुखेषु चास्पृहः अतएव वीतरागभयक्रोधः क्रोधशब्देनात्र द्वेषो
लक्ष्यते तथाच वीतोरागउक्तस्पृहा प्रीतिः भयेन द्वेषेन क्रोधो द्वे
षस्त्रयस्य सोदितस्माद्धिभेति सततं द्वेष्टीति यद्वा रागः पुत्रमित्रा
दिविषयः स्नेहः प्रह्वातिनिरोधकः भयं मदा बलेभ्यः परेभ्यः स
काशाज्जातं कथमहं सुहृत्स्वेवं पश्चात्तापितास्मीत्येवंरूपस्त्रासो
वा क्रोधः सर्वेषां बुद्ध्यादीनां विक्षेदको शुद्धमार्गः कथं हितः स्या
दिति द्वेषः एतत्त्रयेण रहितो वीतरागभयक्रोधः एवं विधश्च मुः
निर्मौनी नरके निपतं वा सो भवतीत्यनुस्मृतमेत्येवंप्रकारानेक
विधविकल्पोत्थापकवाक्यालापे मंदादरेण न मौनं स्थितः कर्म
योगी एव स्थितप्रज्ञो नान्यः ५६

मधुभाष्य

५६॥

भाषा अनुवाद

लक्षण कहने के बहाने से जिज्ञासु अर्जुन को और जो करना चाहिये सो उपदेश करते हैं कि जिनका मन दुख पड़ने से उद्विग्न अर्थात् घबड़ायन और सकलसुख की स्पृहा करै इच्छा करें सुख दुख में समान रहैं सो वीतराग अर्थात् विषय प्रीति रहित एवं भय औ क्रोधशून्य स्थितप्रज्ञ कहे स्थिर बुद्धि मुनि कहावते हैं ५ ९

दोहा

दुखविषैंनविक्षोभमन सुखमहिं वांछानांहि बिनाराग
भयक्रोध जो स्थितमति मुनि कहतांहि ५६॥

361

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७

शांकरभाष्यम्

किंच यः सर्वत्रेति यो मुनिः सर्वत्र देहजीवितादिष्वप्यनभिस्नेहः स्नेहवर्जितः तत्तत् प्राप्य शुभाशुभं तत्तच्छुभमशुभं वा लब्ध्वा नाभिनंदति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यत्यशुभं च प्राप्य न द्वेष्टि इत्यर्थः तस्यैवं हर्षविषाद वर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति ५७

आनंदगिरिकृतटीका

तत्र भेदानुवादद्वारा विविदिषोरेव कर्त्तव्यांतरमुपदिशति किंचेति। विवेकवतो विदुषो विवेकजन्या प्रज्ञा कथं प्रतिष्ठां प्रतिपद्यतामित्याशंक्याह यः सर्वत्रेति ननु देहजीवनादौ स्पृहा शुभाशुभप्राप्तौ हर्षविषादौ विदुषो विविदिषोश्चावर्जनीयौ इतिप्रज्ञास्थैर्य्यं कुतः सिद्धिस्तत्राह योमुनिरिति तत्तदिति शोभनत्वेनाशोभनत्वेन वा प्रसिद्धं प्रतिनिर्दिश्यते तदेव विभजते शुभमिति विषयेष्वभिष्वङ्गाभावः शुभादिप्राप्तौ हर्षाद्यभावश्च प्रज्ञास्थैर्य्ये कारणमित्याह तस्येति ५७॥

स्वामिकृतटीका

कथं भाषेतेत्यस्योत्तरमाह य इति यः सर्वत्र पुत्रमित्रादिष्वप्यनभिस्नेहः स्नेहशून्यः अत एवापितान्तं तत्तच्छुभमनुकूलं प्राप्य नाभिनंदति न प्रशंसति अशुभं प्रतिकूलं प्राप्य न द्वेष्टि न निंदति किंतु केवलमुदासीन एव भाषते तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः ५७॥

पैशाचभाष्यम्

किंच य इति यो मुनिः सर्वत्र स्वदेहजीवनादिष्वनभिस्नेहः अभिस्नेहवर्जितस्तत्तत्प्राप्य शुभाशुभं तत्तच्छुभाशुभं लब्ध्वा न हृष्यति न द्वेष्टीत्यर्थः तस्यैवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा यस्यास्ति तस्य तस्मादेवं नित्यतृप्त वितृष्णो लाभः समाप्तो आत्मारामः प्रतिष्ठितः ५७

रामानुजभाष्यम्

ततोर्वाचीनदशाप्रोच्यते यः सर्वत्रप्रियेष्वनभिस्नेहः उदासीनः प्रियसं
२५ श्लेषविश्लेषरूपशुभाशुभंप्राप्यनाभिनंदन्द्वेषरहितः सोपिस्थितप्रज्ञः ५७

अभिनवगुप्तकृतटीका

युक्तंचैतत् यतः शुभाशुभप्राप्तौनस्याक्षात्कारितायोनभवतः ५७ ॥

परमार्थप्रपाटीका

अन्यथापदयाह यः सर्वत्रेति यः सर्वत्रदेहादिविषयेषु अथवासर्वाव[illegible]स्था
स्वपिअनभिस्नेहः स्नेहशून्यः अथतदेवाहनाभिनंदतीति तत्कुभा[illegible]शु
भप्राप्यक्रमेण[illegible]नाभिनंदति[illegible]भंप्राप्यनप्रशंसतिअशुभंप्राप्यनानि
ंदतिकेवलमुदासीनस्तिष्ठति तस्यप्रज्ञाप्रतिष्ठितेत्यर्थः ५७ ॥ त्रि

वनमालीटीका

सर्वेषुदेहजीवनादिष्वपियोनभिस्नेहः यस्मिन्सत्यन्यदीयहानिवृद्धी
स्वस्मिन्नारोप्येतेसतादृशोन्यविषयकः प्रेमापरपर्यायस्त[illegible]मसो
हतिविशेषः स्नेहस्तद्रहितोनभिस्नेहः परमानंदरूपेसर्वांतर्यामिनि
शरणागतानिर्हारादेवैतन्मात्रेणास्यसानुभूत्पदाधिनिमपि स
र्वथाभिस्नेहवान्भवेदेव प्रारब्धकर्मप्रापितशुभंसद्वेहत्तंविषयंप्राप्य
नाभिनंदति अशुभंदुःखहेतुंप्राप्यनद्वेष्टि अनंतरमयादृश्यैवनानिंदति ए
वंविवालकाभावात्तस्यानभिस्नेहस्यहर्षविषाद शून्यस्यमुनेःप्रज्ञा
परमात्मतत्त्वविषयिकाप्रतिष्ठितापलपर्यवसायिनी एवंमुमुक्षु
रप्यतादृशःस्नेहादिरहितोभवेदितिभावः अत्र[illegible]प्रशंसादिरूपावाचा
नभाषतइतिव्यतिरेकःउक्तः पूर्वपद्ययापद्यद्वयेनार्वाचीनावस्थाना
वस्योक्ता ५७ ॥

उत्तमवैजयन्तीटीका

इदानींततोप्यवरामवस्थामाह यइतियः पुरुषः सर्वत्रप्रीतिविषय
स्थानेषुस्वतन्त्रमित्रादिषु अनभिस्नेहः स्नेहरहितः सन् तत्तत्तेषुतेषु
प्रियेषुअप्रियेषुचशुभाशुभंप्राप्य प्रियेषुपुत्रकलत्रादिष्वालिंगनेन
शुभंनिजभाग्योत्कर्षरूपंमंगलंप्राप्यनाभिनंदतिआनंदेनप्राप्नोति अ

प्रियेषु व्यालव्याघ्रादिषु मिलनेनाशुभं तु भागपहीनत्वरूपामंगलं च
प्राप्य न द्वेष्टि व्यालादिषु द्वेषं न करोति तस्यैवंभूतस्य प्रज्ञा बुद्धिः प्रति
ष्ठिता स्थिरा भवति एवंभूतोपि पुरुषः स्थितप्रज्ञो भवतीत्यर्थः ५७॥

मधुसूदनीटीका

किंच सर्वेषु देहजीवनादिष्वपि यो मुनिरनभिस्नेहः सर्वप्रकारेण तद्रहि
तोऽनभिस्नेहः भगवति परमात्मनि तु सर्वथाभिस्नेहवान्भवेदेव ।
अनात्मस्नेहाभावस्य तद्दृष्टत्वादिति द्रष्टव्यं तत्तत्प्रारब्धकर्मणापादि[?]
पितं शुभं सुखहेतुं विषयं प्राप्य नाभिनंदति हर्षविशेषपुरःसरं न प्रशं
सति अशुभं दुःखहेतुं विषयं प्राप्य न द्वेष्टि अंतरसूयापूर्वकं न निंद
ति अत्र सुखहेतुर्यः स्वकलत्रादिः स शुभो विषयस्तद्गुणकथ
नादिप्रवर्तिका धीवृत्तिः प्रीतिरूपाभिनंदः स च तामसः तद्गुणकथ
नादेः परप्ररोचनार्थत्वाभावेन व्यर्थत्वात् एवमसूयोत्पादनेन दुःख
हेतुपरकीयविद्याप्रकर्षादिरेन सोऽशुभो विषयस्तन्निंदादिप्रवर्तिका
अप्रीतिरूपा धीवृत्तिर्द्वेषः सोपि तामसस्तन्निंदाया निवारणार्थत्वाभा
वेन व्यर्थत्वात् तावभिनंदद्वेषौ प्रीत्यप्रीतिरूपौ तामसौ कथमप्रीतेऽशुद्धसत्त्व
देऽस्थितप्रज्ञे संभवेतां तस्माद्विचालकाभावात्तस्याऽनभिस्नेहस्य हर्ष
विषादरहितस्य मुनेः प्रज्ञा परमात्मतत्त्वविषया प्रतिष्ठिता फलपर्य
वसायिनी स स्थितप्रज्ञ इत्यर्थः एवमन्योपि मुमुक्षुः सर्वत्रानभिस्ने
हो भवेत् शुभं प्राप्य न प्रशंसेत् अशुभं प्राप्य न निंदेदित्यभिप्रायः अत्र
च निंदाप्रशंसादिरूपा वाचो न प्रभाषते इति व्यतिरेकउक्तः [illegible]
[illegible]
[illegible] ५७
[illegible] ५७ ॥ ॥

सदानंदीटीका

४ यस्मिंस्त्वन्यदीये देहादिगेहादौ वृथात्मनि आरोप्येते न मोहरूपास्नेहः
प्रेमापराभिधः १ देहे विजकलत्रादौ स्नेहशून्यः सन्तादृशः सुखहेतुं शु
भं तत्तद्विषयं प्राप्य कर्मणा २ न प्रशंसति हर्षेण दुःखहेतुं तथाशुभं

यस्मिन्स्वान्यदीये देहानि
रुद्धौ स्वस्मिन्नारोप्येते सता
दृश्येत्यविषयः प्रेमापराप
र्याय स्तामसो वृत्तिविशेषः
स्नेहः ४०

गी॰ टी॰ द्वि॰

विषयं प्राप्य नाप्यथा हर्षं कैनेव नाभिनंदति ३ अज्ञस्य सुखहेतुर्यः सक
लत्रादिके शुभः तद्गुणाख्यापनोक्तकाथीर्हतिरभिनंदनः ४ तथास्व
दीयविद्यादिप्रकर्षान्तजनं प्रति अशुभो विषयस्तस्य तन्निंदादिप्र
वर्तिका ५ धीर्हतिर्भ्रांतिरूपास्यात् द्वेषः सोऽत्र नतनामसः तावुभौ रा
पं॰२ शुद्धसत्वेऽस्मिन्संभवेतां कथं मुनौ ६ तस्माद्धि चालकाभावात्स्वज्ञातस्या
त्मगोचरा प्रतिष्ठा निश्चलो प्राप्ता फलपर्यवसायिनी ७ स्थितप्रज्ञः स्व
तिनिष्ठकस्यापि वृनभाषते एवं सुसत्वस्योपि निःस्नेहः सकलेभ
च॰ वेत ८ न प्रशंसेत् शुभप्राप्यन निंदेद्शुभेगतः ९ ५७ ॥

नीलकंठीटीका

स्थितधीः किं प्रभाषेतेत्यस्योत्तरमाह यः सर्वत्रेति सर्वेषु पुत्रदारदे
हजीवनादिषु अनभिस्नेहः अनभिस्नेहवान् हि पुत्रदारादिषु विका
लेषु सकलेषु वा अहमेव विकलः सकलोऽस्मीति दैन्यदर्पौ यतः पूर्व
परानुसंधानरहितो जल्पति अयं तु न तथेति भावः तथा शुभं
प्राप्य नाभिनंदति सेतं हृष्टो भूत्वा शुभप्रापयितारं न प्रशंसति तथा अ
शुभं प्राप्य न द्वेष्टि दुःखी भूत्वा अशुभप्रापयितारं न निंदति यस्तस्य प्र
ज्ञा प्रतिष्ठिता ५७ ॥

आनंदीटीका

स्नेहश्चित्तासक्तिः सर्वत्र दारपुत्रादौ तद्रहितोऽनभिस्नेहः शुभं प्राप्य
नाभिनंदति न स्तूयति अशुभं प्राप्य न द्वेष्टि येनोपायभूतेन कर्म
णा स्थितप्रज्ञत्वं प्राप्यते तन्मुखेनाह ५७ ॥

+ एवं प्राप्यमानसुखदुःखनिर्विकारतया तं प्रतिपाद — रामकंठीटीका — यितुमाह +

रामकंठीटीका

+ योगी तत्तदनंतभेदं सुखसाधनभूतं दुःखसाधनभूतं वा सुखात्मकं
दुःखात्मकमेव वा शुभाशुभं प्राप्य नाभिनंदति न द्वेष्टि तथा कः स्थितप्र
ज्ञस्य लक्षणमुक्तप्राप्तसुखदुःखस्य निर्विकारतया लक्षणं तोभंस्रय
ति यतः सर्वस्मिन्वस्तुन्यनभिस्नेहः स्नेहः ममसर्वस्वमेतेन विना मम
पृ॰ सर्वदुःखकारणमित्यभीष्टवस्तुषु अनुरागोऽभिस्नेहः स यस्य नास्ति स
तथोक्तः तथा शुभं प्राप्य न द्वेष्टि न तत्प्रतिषेधप्रयत्नलक्षणं तोभमुप

याति यएवंविधःमानयोरपिप्रियाप्रिययोर्नित्यनिर्विकारस्यात्ममात्र स्तुमवस्थितस्तुष्टिस्तस्यप्रतिष्ठिताप्रज्ञाव्यते [illegible] ५७
[illegible] स्थिताइ्यप्रज्ञात्मा

[illegible]नारि की टीका

योक्तुस्थानेपिसर्वत्रश्रत्रमित्रविषयादिष्वनिःस्नेहः तत्तत्प्राप्य शुभमशुभं प्राप्य नप्रशंसति नत्तद्वेष्टि तस्यप्रज्ञाप्रतिष्ठितास्थितप्रज्ञ स्पष्टार्थः

स्पष्टार्थः ५७ ॥

दिष्वनिःस्नेहः तत्तत्प्राप्य शुभमशुभं प्राप्य नप्रतिकूलं न प्राप्य नद्वेष्टि तस्य स्तुत्यादिरूपावाचानभाषते इ तिअतिरेकउक्तः अथ किमासी तेनपस्यात्तरमाह यद्भिः ५७ ॥

पंचोलीटीका

यःसर्वत्रदेहेजीवानादिष्वपिअनभिस्नेहःस्नेहवर्जितःयतत् शुभंप्राप्यनअभिनंदति अशुभंप्राप्यनद्वेष्टितस्यमुनेःप्रज्ञा विवेकजाबुद्धिःप्रतिष्ठिता ५७

रणवीरसमिद्दोधिनी॥

युक्तंचैतद्यतः सर्वत्रसर्वेषुपाञ्चमिश्रोदासीनेषु आत्मनिवयस्य जीवननैरपेक्ष्यं किंतुइदमेवस्वधर्माचारोचितकर्तव्यतानि अयत्नस्यशुभाशुभप्राप्तावाह्लादतापौनभवतः द्वयोरेकतरस्य जयसिद्धेरन्यतरस्यनदसिद्धेर्युद्धेनियतत्वात् ५७

मधुभाष्य॥

५७॥

364

भाषाअनुवाद

अर्जुनने पूछाथा कि तत्वज्ञानी किस प्रकारसे बात करते हैं
उस प्रश्नका उत्तर कहते हैं कि समस्त पुत्र मित्र धन धाम आदि
कमे जिसको स्नेह कहे प्रीति नहीं है और शुभ प्राप्ति होनेसे
सुखी औ अशुभ लाभ होनेसे दुःखित भी न होय है अर्थात् स्तुति
औ निन्दामे राग द्वेष कहे प्रीति विरोध हीन है केवल उदासके स
मान अर्थात् उदासीन ऐसे होबात करते हैं उन्हीकी प्रज्ञा प्रतिष्ठि
त हैं वेई स्थिरबुद्धि मुनि हैं ५७॥

दोहा॥

स्नेहरहित जो सर्वमहिपाय शुभाशुभ कोय नहि हरषै न
द्वेष तिनकी मति स्थित सोय ५७॥

365

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः इन्द्रि
याणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८

शांकरभाष्यम्

किंच यदा संहरत इति यदा संहरते सम्यक् उपसंहरते चायं ज्ञाननि
ष्ठायां प्रवृत्तो यतिः कूर्मोऽङ्गानीव सर्वशः यथा कूर्मो भयात् स्वान्यङ्गा
न्युपसंहरति सर्वतः एवं ज्ञाननिष्ठ इन्द्रियाणीन्द्रियार्थेभ्यः सर्वविषये
भ्य उपसंहरते तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यम् ५८ ॥ ॥

आनन्दगिरिकृतटीका

जिज्ञासोरेव कर्तव्यान्तरं सूचयति किंचेति इन्द्रियाणां विषयेभ्यो वैमु
ख्यमस्य प्रज्ञास्थैर्यकारणत्वादादौ जिज्ञासुना तदनुष्ठेयमित्याह य
देति मुमुक्षुणा मोक्षहेतुं प्रज्ञां प्रार्थयमानेन सर्वेभ्यो विषयेभ्यः स
र्वाणीन्द्रियाणि विमुखानि कर्तव्यानीति श्लोकव्याख्यानेन कथयति
यदेत्यादिना उपसंहारः स्ववशतापादनं तस्यैव सम्यक्त्वमतिदृढत्वं
श्रयामिति प्रकृतस्य यतिग्रहणं आवर्तयति ज्ञाननिष्ठायामिति इ
न्द्रियोपसंहारस्य प्रलयरूपत्वं व्यावर्त्य संकोचात्मकत्वं दृष्टान्तेन दर्शय
ति कूर्मश्चेति दृष्टान्तं व्याकरोति यथेति दार्ष्टान्तिके योजयन् ज्ञाननिष्ठा
यं तत्र प्रवर्तयति एवमिति इन्द्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थै
र्ये हेतुरित्युक्तमुपसंहरति तस्येति ५८ ॥

स्वामिकृतटीका

किंच यदेति यदा चायं योगी इन्द्रियार्थेभ्यः शब्दादिभ्यः सकाशादिन्द्रिया
णि संहरते प्रत्याहरति अनायासेन संहारे दृष्टान्तः अङ्गानि करचरणा
दीनि कूर्मो यथा स्वभावेनैवाकर्षति तद्वत् ५८ ॥

पिशाचभाष्यम्

किंच यदेति यदा संहरते सम्यगुपसंहरति अयं ज्ञाननिष्ठायां प्रवृत्तो
मुनिः कूर्मोऽङ्गानीव यथा कूर्मो भयात् स्वाङ्गान्युपसंहरति सर्वशः सर्वदि
ति एवं चाभ्यस्य इन्द्रियाणीन्द्रियार्थेभ्यः सर्वविषयेभ्यः उपसंहरति तस्य

प्रज्ञाप्रतिष्ठितास्यादित्यतआह ५८ ॥

रामानुजभाष्यम्

ततोर्वाचीनदशायांयदेंद्रियाणींद्रियार्थान्स्प्रष्टुमुद्युक्तानितदैवकूर्मो
ऽंगानीवेंद्रियार्थेभ्यः सर्वतः प्रतिसंहृत्यमनआत्मन्येवस्थापयतिसो
पिस्थितप्रज्ञः ५८ ॥

अभिनवगुप्तकृतटीका

तथास्यपाचकवयोगरूढिंत यदायदाकिलायमिंद्रियाणिसंहरते
आत्मन्येवकूर्मइवांगानिक्रोडीकरोति विषयेभ्योविषयात्रिवार्य त
दातदास्थिरप्रज्ञः यद्वेंद्रियार्थेभ्यः प्रभृतिइंद्रियाण्यात्मनिसंहरते।
विषयेंद्रियादिकंसर्वमात्मसात्कुरुते [illegible]
योस्थिरप्रज्ञशब्देनप्रवर्तते उच्यते ५८॥

परमार्थप्रपाटीका

किंचयदेति योगीइंद्रियार्थेभ्यः शब्दादिभ्यः सकाशाद्यदाइंद्रियाणि
संहरतेप्रत्याहरतितदातस्यप्रज्ञाप्रतिष्ठितेतिविद्धि अथापरिपक्वमन
सः इंद्रियाकर्षणेऽभ्यासप्रयासोभवतितथानस्यनवेतिस्वभावोपाय
नेंद्रियाकर्षणेदृष्टांतमाह यथाकूर्मःकच्छपःअंगानिकरचरणादी
निस्वभावेनैवकर्षतितथा इहलौकिकात्मस्वभावानुभवेस्वभ्यासेभरव
स्ततएवेंद्रियनिवृत्तिः ५८

वनमालीटीका

किमासीतेत्यस्योत्तरंषड्भिःवक्तुंतत्रप्रारब्धकर्मवशाद्व्युत्थानेनविक्षि
प्तानींद्रियाणिपुनरनायासेनोपसंहृत्यसमाध्यर्थमेवस्थितप्रज्ञस्या
पवेशनमितिदर्शयितुमाह अयंच[illegible]स्थितःसर्वशःसर्वाणींद्रिया
णींद्रियार्थेभ्यःशब्दादिभ्यःचपुनरर्थंयदासंहरतेपुनरुपसंहरति
तत्रदृष्टांतःकूर्मोऽंगानीवतदातस्यप्रज्ञाप्रतिष्ठितेति ५८ ॥

उत्तमवैजयन्तीटीका

तस्मादवगमवस्थायांस्मरणेनेनाहयदेतिसंहरतेकूर्मःकमठोमत्स्या
दीनाग्रहणेवस्वमरणभयाद्वाऽयतः सर्वशोंगानिहस्तपादशिरांसि

संहरते सम्यगाभ्यंतरमाकर्षति तद्वदयं योगी च पुनर्यदा यस्मिन्काले इंद्रि
यार्थेभ्यः पंचेंद्रियविषयेभ्यः शब्दादिभ्यः सकाशात् इंद्रियाणि ज्ञानकर्मा
त्मकानि स्वस्वविषयान् गृहीतुमपक्रामंति तन्निविषयरूपदेश एव संसारप
तनभयात्संहरते स्ववशं करोति तदा तस्यापि पूर्वस्य प्रज्ञा प्रतिष्ठिता भव
श्री॰ ति सोपि ज्ञाननिष्ठो भवतीत्यर्थः ५८ ॥

द्विः श्लोकैः नत्रच प्रारब्धकर्मवशात् व्युत्थानेन विति
शब्दादिभ्यः मानींद्रियाणि पुनरुपसंहृत्य
समाध्यर्थमेव स्थितप्रज्ञ
स्योपवेशनमिति दर्शयि
तुमाह +

+ इदानीं किमासीतेति प्रश्नस्योत्तरं वक्तुमारभ्यते भगवानुष

मधुसूदनीटीका

+ अयं व्युत्थितः सर्वशः सर्वाणींद्रियाणि इंद्रियार्थेभ्यः सर्वेभ्यः चः पुनरर्थे
यदा संहरते पुनरुपसंहरति संकोचयति अत्र दृष्टांतः कूर्मोंगानीव तदा तस्य
प्रज्ञा प्रतिष्ठितेति स्पष्टम् पूर्वश्लोकाभ्यां व्युत्थानदशायामपि सकलतामस
तद्वृत्त्यभाव उक्तः अधुना तु पुनः समाध्यवस्थायां सकलवृत्त्यभाव इति विशे
षः [illegible]
[illegible] ५८ ॥

सदानंदीटीका

किमासीतेति प्रश्नस्य वक्तुमनन्तरमीश्वरः षड्भिरारभते श्लोकैः सर्वमंगल
हेतवे १ विजितयानेंद्रियाणि व्युत्थानेनातिक्रमेण समस्तानींद्रियार्थे
भ्यः शब्दादिभ्यो यदा स्वयं २ संकोचयति धैर्यात् कूर्मोंगानीव सर्वशः स
माधिकाले तस्यास्ति प्रज्ञा सम्यक्प्रतिष्ठिता ३ एवं श्लोकद्वये प्रोक्तो व्युत्था
ने समयेप्यनेः सर्वतामसवृत्तीनामभावस्तत्त्वदर्शनात् ४ पुनः समाध्या
वस्थयां सफलो महात्मनः समस्तवृत्त्यभावोत्र विशेषोयं विचार्यतां ५८ ॥

नीलकंठीटीका

किमासीतेत्यस्योत्तरमाह यदेति इंद्रियार्थेभ्यः शब्दादिविषयेभ्यः प्रार
ब्धकर्मवशेन व्युत्थितोपि योगी द्वैतदर्शनाद्विद्विग्नः सन् निरोधसंस्कारप्रा
बल्यात् शीघ्रमेव समाधिमनुतिष्ठत्येवेत्यर्थः शेषं स्पष्टम् ५८ ॥ ॥

आनंदीटीका

स्पष्टं इंद्रियाणामिंद्रियार्थेभ्यः संहारः विषयाणामग्रहणात् गृहीतेषु
वानासक्तेरिति पद्यद्वये उत्तरमेवपतं समर्पयति ५८॥ ॥ ॥ ॥

रामकंठीटीका

एवं प्रतिष्ठितप्रज्ञत्वं येन कर्मणोपायभूतेन निष्पद्यते तद्धानपि स्थितप्रज्ञ एवेति प्रतिपादयितुमाह ॥

गी॰ टी॰ डी॰

वशब्दोऽतिरेके यदा पुनरयं योगी सर्वतः सर्वेभ्यः इंद्रियार्थेभ्यः शब्दादिभ्य इंद्रियाणि श्रोत्रादीनि संहरति व्यतिरेचयति स्वभावतश्छिदार्करश्मिरूपाणि तन्निष्ठान्येव करोति कश्च कूर्मः कच्छपो यथा स्वावयवान्स्वशरीरनिष्ठान्करोत्येव तदा स्थितप्रज्ञ उच्यते [illegible]

[illegible]

[illegible] ५८॥

लौकिकी टीका

[illegible] व्यतिरेके यदा पुनरयं मुमुक्षुः सर्वविषयेभ्य इंद्रियाणि प्रत्या[illegible] हृत्यासीत स स्थितप्रज्ञ इति पिंडार्थः अनायासेन संहारे दृष्टान्तः कूर्मोंगानीवेति ॥५८

पंचोलीटीका

इदानीं किमासीतेति प्रश्नस्योत्तरं वक्तुमारभते भगवान् षड्भिः श्लोकैः यदा इत्यादिना आह च अपरं यदा अयं मुनिः ज्ञाननिष्ठायां प्रवृत्तः सर्वशः सर्वेभ्यः इंद्रियार्थेभ्यः विषयेभ्यः इंद्रियाणि चक्षुरादीनि संहरते उपसंहरते क इव कूर्मोंगानीव यथा कूर्मो भयात् स्वांगानि सर्वशः सर्वतः उपसंहरते तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ५८

रसिकरंजनी

न चास्य पाचकवद्योग हानिरित्याह यदेति इंद्रियार्थेभ्य इति ल्यप् लोपे पंचमी यदा यदा किलायं रूपादीन्विषयान्विहाय तद्वत्प्रोत्येति यावत् इंद्रियाणि हस्तपादादीनि संहरेत आत्मन्येव कूर्मोऽङ्गानि क्रोडीकरोति स्वाचारोचितप्रकारेण तस्य रागाणि विदधाति तदा स्थितप्रज्ञ इत्यर्थः ५८

मधुभाष्य

५८॥

भाषा अनुवाद

जिज्ञासू को और क्या करना योग्य हैं सो सूचन करावते कहते हैं कि और पूर्व कथित योगी जब इंद्रियार्थ जो नानाप्रकार विषय तिनसे सर्व इंद्रियों को अनायास करे सहजमे लौटावे अर्थात फेरलेय इसमे दृष्टांत कहते कि जैसे कूर्म कहेवकछुआ अपने मुख कर वरण अनायास समेटि लेता तैसेही योगी विषयोंसे इंद्रियोंको जब बटोर ले सकै तब उस ज्ञानी कीबुद्धिस्थिरहै ५८

दोहा

जब हि संकोचें विषयसें इंद्रियकोदृढ जीव कमठ अंग।
जिमिसर्वसें ताकी मति दृढ सीव ५८॥

368

विषयाविनिवर्तंते निराहारस्यदेहिनः रस
वर्जंरसोऽप्यस्य परंदृष्ट्वानिवर्त्तते ५९ ॥

शांकरभाष्यम्

तत्र विषयाननाहरत आतुरस्यापि इंद्रियाणि निवर्त्तंते कूर्मांगा
नीव संह्रियंते न तु तद्विषयो रागः स कथं संह्रियत इत्युच्यते विषया इ
ति यद्यपि विषयोपलक्षितानि विषयशब्दवाच्यानींद्रियाण्यथवा वि
षया एव निराहारस्य अनाह्रियमाणविषयस्य देहिनः कष्टेन तपसि ।
स्थितस्य मूर्खस्यापि निवर्तंते देहिनो देहवतः रसवर्जं रसो रागो विषयेषु
यः तं वर्जयित्वा रसशब्दो रागे प्रसिद्धः स्वच्छंदतः स्वरसेन प्रवृत्तो रसिको
रसज्ञ इत्यादिदर्शनात् सोपि रसो रंजनरूपः सूक्ष्मोऽस्य यतेः परं परमार्थ
तत्त्वं ब्रह्म दृष्ट्वोपलभ्याहमेव तदिति वर्तमानस्य निवर्तते निर्बीजं विषय
विज्ञानं संपद्यते इत्यर्थः नासति सम्यग्दर्शने रसस्य उच्छेदः तस्मात् स
म्यग्दर्शनात्मिकायाः स्थैर्यं कर्तव्यमित्यभिप्रायः ५९ ॥

आनंदगिरिकृतटीका

इंद्रियाणां विषयेभ्यो वैमुख्येपि तद्विषया रागानुवृत्तौ कथं प्रज्ञाला
भः स्यादिति शंकते नन्विति व्यवहारभूमिः सप्तम्यर्थः विषयाननाहर
तस्तदुपभोगविमुखस्येत्यर्थः रागस्यानुपसंह्रियते न तर्हि प्रज्ञालाभः
संभवति रागस्य तत्परिपन्थित्वादिति मत्वाह स कथमिति रागनिवृत्त्यु
पायमुपदिशन्नुत्तरमाह उच्यत इति विषयोपभोगपराङ्मुखत्वं ज्ञा
नो विषयपरावृत्तिस्तत्परावृत्तिः प्राप्तस्तेत्याशंक्याह यद्यपीति निराहा
रस्येत्यस्य व्याख्यानमनाह्रियमाणविषयस्येति यो हि विषयप्रवणो
न भवति तस्यैतत्मिके तपसि क्लेशात्मके व्यवस्थितस्य विद्याहीनस्या
पीन्द्रियाणि विषयेभ्यः सकाशाद्यद्यपि संह्रियन्ते तथापि रागोवा
शिष्यते स च तत्त्वज्ञानादुच्छिद्यत इत्यर्थः रसशब्दस्य माधुर्यादि षड्
विधरसविषयत्वं निषेधति रसशब्द इति वृद्धप्रयोगमन्तरेण कथं प्र
सिद्धिरित्याशंक्याह स्वरसेनेति स्वेच्छयेति यावत् रसिकः स्वेच्छाप्रव

नाप्यैतैरसक्तो विवक्षितोपि तत्कालेन ज्ञानेनेत्यर्थः कथं तर्हि तस्य निवृ
त्तिस्तत्राह सोपीति दृष्टिमेवोपलब्धिप्राप्यां स्पृहयति अहमेवेति
रागापगमे सिद्धमर्थमाह निर्बीजमिति ननु सम्यग्ज्ञानमन्तरेण
रागो नापगच्छति चेत्तदपगमादृते रागवतः सम्यग्ज्ञानोदया ।
योगादितरेतराश्रयतेति नेत्याह नासतीति इंद्रियाणां विषयपारव
श्येपि विवेकद्वारा परिह्रियते स्थूलो रागो व्यावर्त्यते ततश्च सम्यग्ज्ञानोत्प
त्त्या सूक्ष्मस्यापि रागस्य सर्वात्मना निवृत्त्युपपत्तेर्नेतरेतराश्रयतेत्यर्थः
प्रज्ञास्थैर्यस्य सफलत्वे स्थिते फलितमाह तस्मादिति ५८ ॥ ॥

स्वामिकृतटीका

ननु नेंद्रियाणां विषयेष्वप्रवृत्तिः स्थितप्रज्ञस्य लक्षणं भवितुमर्हति
जडानामातुराणामुपवासपराणां च विषयेष्वप्रवृत्तेरविशेषात् त
त्राह विषया इति इंद्रियैर्विषतदनुभवो विनिवर्ततेयाणामाहरणं ग्रहण
माहारः निराहारस्येंद्रियैर्विषयग्रहणमकुर्वतो देहिनो देहाभिमानि
तदनुभवो विनिवर्त्तते, नोऽज्ञस्य विषया विनिवर्तन्ते इत्यर्थः किंतु रसवर्जं रसो रागोभिलाषस्तं
न निवर्तत इत्यर्थः रसोपि रागोपि परं परमात्मानं दृष्ट्वास्य स्थितप्रज्ञ
स्य सतो निवर्तते नश्यतीत्यर्थः यद्वा निराहारस्योपवासपरस्य विषयाः
प्रायशो निवर्तन्ते क्षुधासंतप्तस्य शब्दस्पर्शाद्यपेक्षाभावात् परं तु रस
वर्जं रसापेक्षा तु न निवर्तत इत्यर्थः शेषं समानम् ५९ ॥

पिशाचभाष्यम्

विषयेति उपलक्षितानि विषयशब्दवाच्यानि इंद्रियाणि निराहार
स्य अनाह्रियमाणविषयस्यातुरस्य कष्टतपा रसवर्जं रसो रागः रसि
को रसज्ञ इति प्रयोगदर्शनाद्रागं वर्जयित्वा स्थितप्रज्ञलक्षणं त्वेतेषा
मेवेंद्रियाणां विषयेभ्यो व्यावृत्तिरभिमता कथं तर्हि विषयेभ्यो रागस्य
निवृत्तिरिति चेत् रसोप्यस्य यतेः परं परमात्मानं दृष्ट्वा उपलभ्य अहमेव
तदिदं मत्तरति निवर्तते निर्बीजरागं संपद्यत इत्यर्थः नासति सम्यग्द
र्शने रागस्योच्छेदस्तस्मात्सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्त
व्यमित्यभिप्रायः ५९ ॥

रामानुजभाष्यम्

एवंवस्तुविषयाज्ञाननिष्ठापूर्वैपूर्वोत्तरोत्तरनिष्ठादिकाइदानींज्ञाननि
ष्ठायादुःप्रापतोतत्साप्तुपयांसाहइंद्रियाणामाहाराविषयाःनिराहा
रस्यविषयेभ्यप्रत्याहृतेंद्रियस्यदेहिनोविषयाविनिवर्तमानारसवर्जं
विनिवर्तंतेरसोरागःविषयरागोननिवर्ततइत्यर्थः रसोरागोप्यात्म
स्वरूपंविषयेभ्यःपरतरंसुखतरंदृष्ट्वानिवर्तते ५९ ॥

अभिनवगुप्तकृतटीका

ननुतपस्विनोपिकथंस्थिरप्रज्ञाद्भूतेप्रवर्तते

यद्यप्याहार्यैरूपादिभिर्विषयैःसंबंधोस्यनास्तितथापितस्यविषया
श्रेतरूपरागागनस्यपरागलक्षणोरसेवर्जयित्वानिवर्ततेतेनासोस्य
द्रष्टुःरसंकेचिदास्वादमफलादिकमाहुः योगिनस्तुपरमेश्वरदृ
ष्टेनान्तरपरागोनभवति अतस्तत्त्वपश्चिनोनासौनिवर्तते ५९ ॥

परमार्थप्रपाटीका

ननुप्रायोपवासस्यजडस्यरोगाभिभूतस्यकस्यापिप्राकृतस्यशब्दादयोवि
षयाविनिवर्तंतएवएवंतस्यतथानिवृत्तविषयस्थितप्रज्ञस्यकोविशे
षइत्याहविषयाइति निराहारस्यप्रायोपवासस्ययस्यकस्यापिदेहिनो
देहाभिमानवतोजीवस्यविषयाः अप्राप्याःसंतएवविनिवर्ततेपरंतु
रसवर्जंरसोरागोभिलाषस्तत्तद्विषयापेक्षानतद्वर्जंयद्यपिदुःसाध्य
तेनविषयेभ्योनिवृत्तिरस्तितथापिविषयेभ्योविनत्वमितिस्वकल्पोस्ति
अस्यस्थितप्रज्ञस्यतुपरंपरमात्मानंदृष्ट्वाविषयाभिलाषोनिवर्ततइ
तिमहान्विशेषइत्यर्थः ५९॥

वनमालीटीका

ननुमूढस्यापिरोगादिनाविषयेभ्यइंद्रियोपसंहरणंसंभवतीत्यतआ
ह विषयेति निराहारस्यदेहाभिमानवतोमूढस्यापिरोगिणःशब्दाद
योनिवर्तंतेकिंतुरसवर्जंरसोरागोननिवर्ततइत्यर्थः अस्यतुस्थितप्र
ज्ञस्यपरमात्मानंसाक्षात्कृत्यरसोपितद्रसास्वादरागोपिनिवर्ततेय
स्मान्निरतिशयसौंदर्यादिरूपपरमात्मदर्शनंविनानसरागविषयोच्छेद

स्तस्मात्सरागविषयोच्छेदकस्योक्तदर्शनस्य स्थितप्रज्ञारूपस्य स्थैर्यं
महता यत्नेन संपादयेदिति भावः ५९ ॥

...वैजयन्तीटीका

एवं ज्ञाननिष्ठस्य यतेर्दीनिष्ठामुक्त्वेदानीं तस्यात्मावलोकनेनैवेन्द्रिय
विषयविजयो भवतीत्याशयेनाह विषया इति निराहारस्य शब्दादी
न्विषयानाहरतीति समन्तादाहरतीति यानि तान्याहाराणि श्रोत्रादीनि वा
ह्येन्द्रियाणि निर्गतान्याहाराणि यस्मात्तथाभूतस्येन्द्रियहीनस्य रोगिण
इह तव वधिरत्वान्धत्वादिलक्षणालक्षितस्य देहिनो देहवतः पुरुषस्य वि
षयाः शब्दादयो विनिवर्तन्ते विशेषेणातिनिवृत्तिं प्राप्नुवन्ति ग्राहकाणाम
भावेन ग्राह्याणामप्यभावः इति नियमात् किंतु रसवर्जं रसो रागस्तं व
र्जयित्वा ते निवर्तन्ते विषयाभिलाषो न नश्यतीत्यर्थः अस्यात्मज्ञान
निरतस्य रसोऽपि विषयरागोऽपि परं विषयसुखेभ्योऽधिकतरं सुखरूप
मात्मतत्त्वं दृष्ट्वा मनसैवानुद्रष्टव्यमित्यादिशास्त्रविचारद्वारा निरी
क्ष्य निवर्तते उपरमति यथाजन्मदरिद्रो लक्ष्मीपतिं प्राप्य काष्ठादिवि
क्रयात्लब्धात्यल्पद्रव्यसुखादुपरमति तथा निरतिशयानन्दमयमात्मा
नं निरीक्ष्यात्यल्पविषयसुखादुपरमं प्राप्नोतीत्यर्थः ५९ ॥ ॥ ॥

+ नन्वमूढस्यापि रोगादिवशाद्विषयेभ्य इन्द्रियाणाम् उपसंहरणं भवति तत्र कथं तस्य प्रज्ञाप्रतिष्ठितेत्युक्तं अत आह ।+

मधुसूदनीटीका

+ निराहारस्येन्द्रियैर्विषयाननाहरतो देहिनो देहाभिमानवतो मूढ
स्यापि रोगिणः काष्ठतपस्विनो वा विषयाः शब्दादयो निवर्तन्ते किंतु र
सवर्जं रसस्तृष्णा तं वर्जयित्वा अज्ञस्य विषया निवर्तन्ते न तद्विषयो राग
स्तेन निवर्तते इत्यर्थः अस्य तु स्थितप्रज्ञस्य परं पुरुषार्थं दृष्ट्वा तदेवाह
मस्मीति साक्षात्कृत्य स्थितस्य रसोऽपि क्षुद्रसुखरागोऽपि निवर्तते अ
पिशब्दाद्विषयाश्च तथा च यावानर्थ इत्यादौ व्याख्यातं एवं च सरागवि
षयनिवृत्तिः स्थितप्रज्ञलक्षणमिति न मूढे व्यभिचार इत्यर्थः यस्मा
न्नासति परमात्मसम्यग्दर्शने सरागविषयोच्छेदः तस्मात्सरागविष
योच्छेदिकायाः सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं महता यत्नेन

संपादयेदित्यभिप्रायः [illegible]
[illegible]
[illegible] ५९ ॥

सदानंदटीका

ननु मूढजनस्यापि रोगादिवशतः स्वयं विषयेभ्यो ह्युपरतिरिंद्रिया
णां भवत्यतः १ प्रज्ञाप्रतिष्ठिता तस्येति कथमुक्तमिहेति चेत् आतुरस्यें
द्रियैर्भोगाननाहरतः अप्रग्रहात् २ आहारयो निवर्तंते यद्वा काष्ठतप
स्विनः विषयेषु निवृत्तेषु ततस्तान निवर्तंते ३ स्थितप्रज्ञस्य धीरस्य
साक्षात्कृत्य परं पदं तदेवाहमिति स्वात्मपदे नित्यं स्थितस्य च ४ ।
तज्ज्ञाने देहरागोपि विषयैः सह नश्यति एवं रागनिवृत्तिस्तु नात्मविदो कथं
यतः ५ समूलरागोच्छेदस्तत्साक्षात्कृतेर्मतिः तस्मात्तमपि
तत्वैकसाक्षात्कारे यत्नस्वभोः ६ ५९ ॥

नीलकंठीयटीका

ननु विषयेभ्य इंद्रियाणां निवृत्तिश्चेत् स्थितप्रज्ञताहेतुस्तर्हि रोगिमू
र्छालयग्रहावेशादावपि साक्षीति सर्वोपि स्थितप्रज्ञः स्यादित्याशंक्याह
विषया इति सत्यं देहिनो देहाभिमानवतो मूढस्यापि रुग्णस्यादौ निराहार
स्येंद्रियैर्विषयाननाहरतोऽभुंजानस्य विषया विनिवर्तंत एव तथा
पि रसवर्जं रसो रागस्तद्वर्जं निवर्तंते तदापि सूक्ष्मरूपेण रागोस्त्येव रा
गमूलस्यात्माज्ञानस्यादाहाद्वा सोऽस्थितप्रज्ञ इत्यर्थः अस्येव तु नः प
रं दृष्ट्वा आत्मानं साक्षात्कृत्य निराहारस्य शब्दादीनगृह्णतो रसोपि नि
वर्तते मूलाज्ञानदाहादित्यस्ति समाधेः समाधिस्थस्यैव महान् विशेष
इति भावः प्रांचस्तु रोगिणः काष्ठतपस्विनो वा मूढस्यापि विषयाननाह
रतो रसवर्जं विषया विनिवर्तंते सोऽपि परं दृष्ट्वा स्थितस्य रसोपि निवर्तत इति ग्रह
व्याचख्युः ५९ ॥

आनंदटीका

गी॰
टी॰
हि॰

आक्रियते इत्याहारो विषयग्रहणं तस्मान्निर्गतस्योपवासादिना
विषयग्रहणमकुर्वतः रसो विषयाभिलाषस्तद्वर्जं विनिवर्तते निराहा
रस्य विषयाभिलाषस्तिष्ठत्येवेत्यर्थः परं दृष्ट्वा वक्ष्यमाणप्रकारेण सं
यमवतानेन परमेश्वरं ब्रह्मसाक्षात्कृत्वास्य रसो विषयाभिलाषो निवर्त
ते [illegible] ५९॥

+ अथो विषयेभ्य इन्द्रियसंहारः किं शब्दाद्यग्रहणेन वा किं वा ग्राह्यमाणेष्वपि शब्दादिष्वपि निर्विकारत्वे नात्रोक्त इति पक्षद्वयसंभावनायां पूर्वपक्षोक्ते यं प्रतिपादनं पूर्वमुत्तरमेव पक्षं समर्थयितुमाह +

रामकंठीटीका

अभ्युपगम्येदमुच्यते अस्त्येतत् निराहारस्य शास्त्रविहितानपि शब्दादी
ननाहरतस्तानाहरतः परिहरतो विषयाइष्टाः शब्दादयो विनिवर्तन्ते प्र
त्यासत्त्यभावात्तत्कार्यं रागादिकं नारभन्ते किं तु रसवर्जं तद्विषयं रसम
भिलाषं रागाख्यं क्लेशं वर्जयित्वा स हि तदानीमप्यसमन्तनुर्वा वर्तते परम
नैष्ठिकस्य रसोऽपि निवर्तते नाम परं प्रकृष्टं समाप्येयं वस्तु दृष्ट्वा साक्षा
त्कृत्य यदैष योगी यदा परतत्त्वं विषयपरिहारसमाधिक्रमेणापश्यति त
दा तत्त्वं दृष्टवतस्तस्य रसोऽपि जातो निवर्तते इति क्रान्तं निष्टान्तत्वेन व्याख्ये
य [illegible] ५९॥

लासिकी टीका

ननु यदि विषयेष्वप्रवृत्तिरेव स्थितप्रज्ञलक्षणं तर्हि ज्ञानामातुरो
पवासपरतपस्विनां विषयेष्वप्रवृत्तेरविशेषत्वमाह विषया इति
किं तु रसवर्जं रसोऽभिलाषो रागस्तु न निवर्तते इत्यर्थः स तदानीमप्र
मत्तनुर्वा वर्तते परं परमात्मानं दृष्ट्वा मनःसाक्षात्कारवतो रसो रा
गोऽपि निवर्तते न श्रूयतीत्यर्थः ५९ ॥

निराहारस्येन्द्रियैर्विषयग्रहणमकुर्वतो देहिनो देहाभिमानिनो तस्य विषया निवर्तन्ते तदनुभावो निवर्तते इत्यर्थः

विषयानेनाह हरत: आतुरस्यापि इंद्रियाणि निवर्तंते न तु तद्वि
षयो रागः स कथं संक्षियते तत्राह विषयेति निराहारस्य अनुप
भुज्यमानविषयस्य देहिनः रसवर्जं विषयरागं वर्जं विषया विनिव
र्तंते अस्य देहिनः रसोपि परं परमार्थतत्वं दृष्ट्वा निवर्तते ५९

रणवीरसमिह्रोधिनी॥

ननु मूढ विमुखस्य तत्रस्य तपस्विनो पि कथं न स्थितप्रज्ञता हो
वाच कः अत्यार्थं वादाह विषया इति आहरंति प्रहरंत्यस्मिन्निति आ
हार इति भक्षयति वीरानिति वा व्युत्पत्त्याहारपदेन मूढमभिधीय
ते ततश्च निराहारस्य मूढविमुखस्य विषयाः देषा विषयो नूपव
र्तेन मित्युपवासनादेषा विषयास्तु उपनिवर्तंते समागं रागस्यो विनि
वर्तते परैराक्रमणात् तत्तलयात तस्तुरवं च किंतु रसवर्जं राग स्तु
न विगलतीति सजीवनापपे ता स्वयमेत्याग पूर्वं वैमुख्यात् अ
तएव प्रज्ञास्थैर्याभावात्तु नासौ स्थितप्रज्ञः रागद्वेषरहितेन स्वोचिते
कर्मणि प्रवृत्ति मत्वं हितत्लक्षणं येषामर्थे कांक्षितं नो राज्यं भोगाः
सुखानि चेत्यादिकमेव हि मूढ स्पर्शसुख तात्पर्यनेत्र येन हेतुत्वेन
दर्शितं आपि पुनरर्थे अस्य कर्मयोगिनस्तु रसः परं दृष्ट्वा स्वधर्मा
चरणमेव परं पुरुषार्थसाधनमिति निश्चित्य विगलति स्वजनादि
स्नेहत्यागेन बुद्धस्य हृतस्य प्रज्ञास्थैर्यमिति तात्पर्यं ५९॥

मधुभाष्य

विषया इति इंद्रियाणि न पंत्याशु निराहारा मनीषिणः वर्जयित्वात्
रसनाम सोरस्येश्रव हंत इति वचनाद्भगवते रसशब्दस्य रागवाचि
त्वाच्च अपरोक्षज्ञानरहितज्ञानिनोपि साधारण यत्नवतोपि मनो ह
रंती द्रियाणि पुरुषस्य मार्गीताभिमानिनः कोशेषकतः प्रमाथीति
प्रथमपीलानि पुरुषस्य तदर्थमाकान्येवेत्यत आह ५९॥

372

भाषा अनुवाद

जो कहो कि इंद्रियों की विषय मे अप्रवृत्ति होना यह स्थित प्रज्ञ का लक्षण न होसकेगा क्यों कि जड़ आतुर औ उपवास करने वाले मनुष्योंकी इंद्रीभी विषयमे नही प्रवृत्त होतीहै तो इनसे औ ज्ञानीसे फेरि क्या विशेष कहे अन्तर है इन को भी स्थितबुद्धि मानि कहना उचित है तिसपर कहते हैं कि हां आहार नकरनेसेनिराहार पुरुष को यद्यपि विषयों का इंद्रिय द्वारा ज्ञान नही होता सत्य है परतौभी उसकी विषयों मे अभिलाषा नही जाती अर्थात् विषयकी वासना मनमे बनीरहती है और स्थित प्रज्ञ पुरुषके परमात्म दर्शन हेतसे विषय की लालसा निवृत्तहो जाती अच्छी तरहसे अभिलाष सहित विषय वासना नाश होती है और जड़ आतुर जैसे विषयों के अज्ञ तैसे आत्माको भी नही जानते तो वे स्थिर बुद्धि कैसे होसकते हैं और रस कहे राग जो प्रीतिसो स्थित प्रज्ञा की आपसे आप निवृत्त होतीहै ५९ ॥

दोहा

विषयनिवर्तत जीव के निराहार के होय विषयराग छूटेंतवे
देष निरसपरकोय ५९ ॥

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इं
द्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६०

शांकरभाष्यम्

सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदाविंद्रियाणि स्ववशे
स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमाह यततइति यततः प्र
यत्नं कुर्वतोपि हि यस्मात् अपि कौंतेय पुरुषस्य विपश्चितो मेधाविनो
पीति व्यवहितेन संबंधः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि वि
षयाभिमुखं हि पुरुषं विक्षोभयंत्याकुलीकुर्वंत्याकुलीकृत्य च हरंति
प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनो यतस्तस्मात् ६०

आनंदगिरिकृतटीका

श्लोकांतरमवतारयति सम्यग्दर्शनेति मनसः स्ववशत्वादेव प्रज्ञा
स्थैर्यसंभवे किमर्थमिंद्रियाणां स्ववशत्वापादनमित्याशंक्याह ननु
विवेकवतो विषयदोषदर्शिनो विषयेभ्यः स्वयमेवेंद्रियाणि व्यावर्त
ते किं तत्र प्रज्ञास्थैर्यं चिकीर्षता कर्तव्यमिति तत्राह यततो हीति वि
षयेषु भूयो दोषदर्शनमेव प्रयत्नः हिशब्दस्य यस्मादर्थस्य समनंतरे
संबंधं वदति अपिशब्दस्य प्रयत्नं कुर्वतोपीति संबंधं हित्वा संबंधा
न्तरमाह पुरुषस्येति प्रमथनशीलत्वं प्रकटयति विषयेति विक्षोभ
स्याकुलीकरणस्य फलमाह आकुलीकृत्येति प्रकाशमेवेत्युक्तं वि
शदयति पश्यत इति विपश्चितो विदुषोपि प्रकाशमेव प्रकाशशब्दित
विवेकाख्यविज्ञानयुक्तमेव मनो हरंतींद्रियाणीति संबंधः हिशब्दार्थम
नूद्य तस्मादिंद्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेण संबंधमा
भिसंधायाह यतस्तस्मादिति ६० ॥

स्वामिकृतटीका

इंद्रियसंयमं विना तु स्थितप्रज्ञता न संभवति अतः साधकावस्थायां
तत्र यत्नः कर्तव्य इत्याह यततो ह्यपीति द्वाभ्यां यततो मोक्षे प्रयतमा
नस्यापि विपश्चितो विवेकिनोपि मन इंद्रियाणि प्रसभं बलाद्धरंति यतः

महान्

गी॰
टी॰ हि॰

प्रमाथीनि प्रमथनशीलानि क्षोभकानि ६०॥

पैशाचभाष्यम्

तस्य च सम्यग्दर्शनस्थैर्यस्योपायमाह यततो ह्यपीति यततः यतमानस्यापि पुरुषस्य विपश्चितः मेधाविनोऽपि मनः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि प्रसभं हरंति ६०॥

रामानुजभाष्यं

आत्मदर्शनेन विना विषयरागो न निवर्तते अनिवृत्ते विषयरागे विपश्चितो यतमानस्यापि पुरुषस्येंद्रियाणि प्रमाथीनि बलवंति मनः प्रसह्य हरंति एवमिंद्रियजय आत्मदर्शनाधीनः आत्मदर्शनमिंद्रियजयाधीनमिति ज्ञाननिष्ठा दुःप्राप्या ६०॥

अभिनवगुप्तकृतटीका

ययस्मात्तस्यापि तपस्विनो मन इंद्रियैर्ह्रियते अथवा यत्नस्य सयत्नस्यापि योगिनां च मन एव जेतव्यमिति द्वितीयो निर्णीतः ६०॥

परमार्थप्रपाटीका

एवं विस्तरेण व्यवहारस्य स्थितप्रज्ञस्य दशामुक्त्वेदानीमभ्यासादि पूर्वरूपवतो दशामाह ह्यपि कौंतेयेन यततइत्यादि यततः आत्मप्राप्त्यर्थं प्रयत्नं कुर्वतोपि विपश्चितः आत्मानात्मविवेकवतः पुरुषस्य इंद्रियाणि चक्षुरादीनि अनादिविषयवित्तिमत्तया प्रमाथीनि क्षोभकाणि आत्माभिमुखमपि मनः प्रसभमकस्माद्धरंति विषयवित्तिमंतं कुर्वंति ६०

वनमालीटीका

तत्र प्रज्ञास्थैर्यं वा स्यान्न वेंद्रियनिग्रहो मायाधर्मो हेतुः तदभावाभावे प्रज्ञादर्शनादिति तन्निग्रह आवश्यक इत्यत्र सदंतेन गणालयमंतर्यामिणां परमकारुणिकं मामनाश्रित्य स्वयत्नेनैवेंद्रियजये प्रवर्तमानस्यानर्थो भवतीत्याह यतत इति हे कौंतेय यततः भूयो भूयो विषयदोषदर्शनात्मकं यत्नं कुर्वतो विपश्चितो विवेकिनोपि पुरुषस्य मनः क्षणमात्रं निर्विकारं कृतमपींद्रियाणि हरंति विकारं प्रापयंति ननु विरोपि निर्विवेकमतिकथं तत्र आगमित्यत्राह प्रमाथीनि प्रमथन

घ्नीत्वानि श्रुतिबलीयस्त्वाद्विवेकोपमर्देन तन्मार्गाणि अतः प्रमथ्य बला
त्कारेणापश्यत एव विपश्चितः स्वामिनि विवेके चरत्के सति विवेकप्रज्ञा
प्रविष्टमपि मनस्ततः प्रच्याव्य स्वविषयाविष्टं तेन हरन्तीत्यर्थः हि प्रसि
द्धोयमर्थः लोके यथा प्रमाथिनो दस्यवः प्रमथ्य पतिं रक्षकं चाभिभू
य तयोः पश्यतोरेव धनं हरन्ति तथेन्द्रियाण्यपि विषयसंनिधानेन मनो
हरन्तीति ६० ॥

ऊतमवैजयन्तीटीका

नन्विन्द्रियाणां विषयेभ्यो निवृत्तिरेवैव फलसिद्धिर्भवति विषयरागस्या
निवृत्तौ समस्याका वा नतिस्तन्निवृत्तये चात्मदर्शनमपि किमर्थं कर्तव्यमि
त्याशंक्य विनात्मावलोकनेन विषयरागस्यानिवृत्त्यभावस्तदभावे इन्द्रि
यविजयस्याप्यभावस्ततोपि पुनर्विषयाविर्भावो भवतीत्याशयेनाह य
ततइति द्वाभ्याम् यततइति हे कौन्तेय हि यस्मादपि निश्चये यततः विष
येभ्यः पुनः पुनरिन्द्रियनियमने यतमानस्य यतो विपश्चितो निजज्ञानिला
भविवेकवतः पुरुषस्य शत्रुदमने सामर्थ्यवतः एवंभूतस्यापि ज्ञानिनः
प्रमाथीनि प्रकर्षेण मनसो मथनस्वभावकानीन्द्रियाणि प्रसभं हठान्म
नो हरन्ति रागयुक्तानीन्द्रियाणि विषयेषु मनः आकर्षन्ति रागवन्मनस्त
इन्द्रियाणीत्येवमिन्द्रियमनसोरन्योन्यं विषयेषु विकर्षणाकर्षणे नो भ
योर्विषयप्रवृत्तिरेव भवति न तु निवृत्तिः अतः आत्मदर्शनेन विषयराग
स्य निवृत्तौ सत्यां स्वमेवेन्द्रियमनोविषयाः सर्वे निवर्तन्ते इत्यभिप्रायः कौ
न्तेयेत्यनेन मद्गुरुणा विजिताखिलकर्णायाः पतिदेवतायाः कुन्त्याः पुत्रो
मदङ्गस्त्वमस्यतस्तवेन्द्रियविजयो मदाश्रयणान्नातिसुलभो भवतीति सू
चितम् ६० ॥

+ तत्रप्रज्ञास्थैर्याय बाह्येन्द्रियनिग्रहो मनोनिग्रहस्य मधुसूदनीटीका साधारणे कारणं तदभयाभावे प्रज्ञानाशदर्शनादि

+ हे कौन्तेय यततः भूयो भूयो विषयदोषदर्शनात्मकं यत्नं कुर्वतोपि बहु तिवक्तुं बाह्येन्द्रियनिग्रहाभावे प्रथमं दोषमाह +
ङितः करणादनुदात्तेतो नावश्यकमात्मनेपदमिति ज्ञानात्परस्मैप
दमविरुद्धं विपश्चितः अत्यन्तविवेकिनोपि पुरुषस्य मनः तत्क्षणमात्रेण
विकारं कुर्वन्त्यपीन्द्रियाणि हरन्ति विकारं प्रापयन्ति न तु विरोधिनि विवे

गी॰ वेसमतिक्रांतोविकारप्राप्तिस्तत्राह प्रमाथीनिप्रमथनशीलानिअति
टी॰ बलीयस्त्वाद्धिवेकोपमर्दनक्षमाणि अतः प्रसभंप्रसह्यबलात्कारेण
हि॰ प्रयत्नस्येवविपश्चितिः स्वामिनिविवेकेसतिसर्वप्रमाथित्वादेवेंद्रिया वरदके॰
णिविवेकजप्रज्ञायांप्रविष्टमनस्ततः प्रच्याव्यस्वविषयाविष्टेनहृ
नै॰ रंतीत्यर्थः हिशब्दःप्रसिद्धिद्योतनार्थइति प्रसिद्धोह्ययमर्थोलोकेयथाप्र
माथिनोदस्यवः प्रसभमेवपालितेयनरक्षकंचाभिभूयतत्पश्यतःपश्य
तोएवधनंहरंति तथेंद्रियाण्यपिविषयसन्निधानेमनोहरंतीति
[illegible] ६० ॥

सदानंदीटीका

प्रज्ञास्थैर्यपरोहेतुःसेंद्रियस्यांतनिग्रहः तदभावेपराहानिःप्रज्ञाया
इतिकथ्यते १ भूयोभूयोपिभोगेषुदोषदृष्टिंप्रकुर्वतः सम्यग्विवे
किनोप्येतन्मनःस्थितमपित्वरां २ विकारंप्रापयंत्येतानींद्रियाणिप्र
स्तुयतत प्रयत्नस्यैवबलात्कारात्स्वामिन्यपिविपश्चिति ३ लोभका
इ॰ तिबलीयस्त्वांविवेकेसतिरत्नके प्रविष्टतानिविच्याव्यविवेकजम
तोमनः ४ विषयाविष्टमामर्षात्हरंत्येवेंद्रियाणदःयथाप्रमाथि
नश्चौराःप्रसह्यपतिनोधनं ५ हरंत्येवंमनःस्वस्वविषयेषींद्रियाणि
व ६ ६० ॥

नीलकंठीटीका

किंच क्रमादेतिद्रियाणिश्रांतानिस्वयमेवलीयंते समाहितेनतनानि
कूर्मेणांगानीवस्वेच्छयासंह्रियंते एतच्चात्यंतायासंसाध्यमित्याह
४ यततइति विपश्चितःशास्त्राचार्योपदेशवतोयततोपिसमाधिमित
ध्यर्थंयतमानस्यापिपुरुषस्यइंद्रियाणिकर्तृणिमनःप्रतीचिस्थिरी
क्रियमाणकर्मीभूतंहरंतिविषयप्रवणंकुर्वंति यतःप्रमाथीनि
यथाबहवश्चौरावनेएकंपुरुषंप्रमथ्यतस्यवित्तंहरंति एवंइंद्रियाणि
यततोमनोहरंति यतःप्रसभमतिप्रयत्नेनप्रमथनशीलानि ६० ॥

आनंदीटीका

नहिनिश्चयेयत्नस्यापिप्रज्ञायोगाभ्यासेनकृतयत्नस्यापि एवंचेत्किंका

+ एवंविषयपरिहारपरमसमाधेः परामपि काष्ठां प्राप्तस्य सत्क्षोभकत्वं प्रतिपादयन्नयोग्यानां पूर्वमनिषिद्धविषयेसेवात्मकं मनोक्षोभं समाधिं सिद्धांतीकुर्वन्नाह +

यीमित्याह ६० ॥

रामकंठीटीका

+ यद्यस्मात्तस्यापि विषयानाहरण समाहितस्यापरतत्त्वदर्शनयोग्यतामपि प्राप्तस्य विदुषो विपश्चितो ज्ञानविज्ञानजागरूकस्यापि इंद्रियाणि प्रमाथीनि प्रमथनशीलानींद्रियाणि प्रसभं प्रसह्यैव कंचित्कालं लेशं लब्ध्वा मनश्चित्तं हरंति लब्धादपि समाधिफलादपकर्षंति विषयाभिमुखतां नयंति श्रूयते हि यथा विश्वामित्रपराशरप्रभृतयो योगिनश्चिरादपि इंद्रियैः कामान्प्रति प्रवर्तनेन प्रमथितचित्ताः समाहितचित्ता अपि विषयाभिमुखा इंद्रियाणि मनश्च समाधेः प्रच्याव्य विषयेषु नयंतीति तस्मादिंद्रियाणि निग्रहीतव्यानि समाहितैः सर्वदेत्यर्थः ६० ॥ ॥

लालाकीटीका

इंद्रियजयं विना ज्ञाननिष्ठा न सिध्यतीत्याह यततो हीति । सर्वस्वं हरंति विषयाभिमुखं कुर्वंति हि प्रसिद्धो प्रसिद्धमेवैतत् ६० ॥

यततः प्रयतमानस्य प्रत्यवस्थासु रूपि अनुदातेत्त्वलक्षणमात्मनेपदमनित्यं ज्ञापकात् विपश्चितः सदसद्विवेकिनः पुरुषस्य पश्यन्तमपि मनो हृत्वा इन्द्रियाणि प्रमाथीनि दस्यव इव प्रमथनशीलानि क्षोभकाणि प्रसभं बलात्कारेण मनो मननात्मकं चित्तमेव

पंचोलीटीका

आत्मप्रज्ञाचिकीर्षोः इंद्रियाणामयमने दोषमाह यतत इति हे कौंतेय हि यस्मात् यततोऽपि यत्नं कुर्वतोऽपि विपश्चितः मेधाविनः पुरुषस्य प्रमाथीनि प्रमथनशीलानि इंद्रियाणि प्रसभं हठात् मनो हरंति ६०

रसवीरससिद्धांयिनी ॥

यतत इति हि यस्माद्धि विपश्चितः सिद्धासिद्ध्योर्यतनस्याव्यवस्थितत्वात् निश्चित्वानस्य अतएव यततोऽपि प्रयत्नस्यापि पुरुषस्य प्रकर्षेण मथितुं शीलं येषां तानींद्रियाणि मनो बलात्कारेण हरंति निश्चयाच्च्यावयंति चक्षुरादिवृंदप्राबल्ये स्वदोषं तन्तुः प्रज्ञावादे बोधितस्यात्

कर्मयोगिनावमनपवर्जेतव्यमितितात्पर्यं मनसोजयश्चानिश्चय
दार्ढ्यं इतिद्वितीयोनिर्णीतः ६०॥

मध्वभाष्य

६०॥

भाषा अनुवाद

इंद्रियोंका संयम किये विना अर्थात् विषयों से रोकने के विना स्थित प्रज्ञकहे परमात्मा मे अचल बुद्धिहोती नहीं इससे प्रथम साधन की अवस्था मे इंद्रीयोंको स्वाधीन करने के अर्थ वश यत्न करना चहिये यह कहतेहैं कि हे कौंतेय कुंतीनन्दन अर्जुन मोक्षके हेत प्रयत्न करते हुये विवेकी विचारवान ज्ञानी पुरुषके भी मनक ये प्रबल प्रमाथी कहे क्षोभ करने वाली इंद्री हरणाकरलेतीहैं ६० ॥

दोहा

यत्नकरतभी पुरुषके कुंतिसुत बुधकेहि महाप्रबल इं
द्रिय सबे हरकर मन हरलेहि ६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे
हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ॥

शाङ्करभाष्यम् ॥

तानीति तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः
समाहितः सन्नासीत मत्परोऽहं वासुदेवः सर्वप्रत्यगात्मा परो य
स्य स मत्परः नान्योऽहं तस्मादित्यासीतेत्यर्थः एवमासीनस्य
यतेर्वशे हि यस्येन्द्रियाणि वर्त्तन्ते अभ्यासवशात् तस्य प्रज्ञा
प्रतिष्ठिता ६१ ॥

आनन्दगिरिकृतटीका ॥

इन्द्रियाणां स्ववशत्वसम्पादनानन्तरं कर्तव्यमर्थमाह ता
नीति एवमासीनस्य किं स्यादिति तदाह वशे हीति समाहि
तस्य विक्षेपविकलस्य कथमासनमित्यपेक्षायामाह मत्
परइति परापरभेदशङ्कामपाकृत्यासनमेव स्फोरयति नान्यो
ऽहमिति उत्तरार्द्धं व्याकरोति एवमिति हिशब्दार्थं स्फुटयति
अभ्यासेति परस्मादात्मनो नाहमन्योऽस्मीति प्रागुक्तानुसन्धा
नस्यादरेण नैरन्तर्य्येण दीर्घकालानुष्ठान सामर्थ्यादित्यर्थः
अथवा विषयेषु दोषदर्शनाभ्यास सामर्थ्यादिन्द्रियाणि संय
तानीत्यर्थः ६१ ॥

स्वामिकृतटीका ॥

यस्मादेवं तस्मात् तानीति युक्तो योगी तानि इन्द्रियाणि संयम्य
मत्परः सन् आसीत यस्य वशे वशवर्त्तीनि एतेन कथमासीतेति
प्रश्नस्य वशीकृतेन्द्रियः सन्नासीतेति उत्तरमुक्तं भवति ६१ ॥

पिशाचभाष्यम् ॥

यस्मादेवं तस्मात् तानि सर्वाणीन्द्रियाणि वशीकृत्य युक्तः समा
हितस्सन्नासीत मत्परः अहं वासुदेवः सर्वप्रत्यगात्मा परः प्रधानं
यस्य स मत्परः नान्योऽहं तस्माद्वासुदेवादित्युपासीतेत्यर्थः यते
एषः वशे हि यस्येन्द्रियाणि वर्त्तन्ते अभ्यासबलात् तस्य प्रज्ञा प्रति
ष्ठिता ६१ ॥

रामानुजभाष्यम् ॥

सर्वस्यदोषस्यपरिजिहीर्षयाविषयानुरागवियुक्ततयादुर्जया
नीद्रियाणिसंयम्यचेतसःशुभाश्रयभूतेमयिमनोवस्थाप्यसमा
हितआसीतमनसिमद्विषयेसतिनिर्दग्धाशेषकल्मषतयानि
र्मलीकृतंनिःशेषविषयानुरागमलरहितंमनइंद्रियाणिस्व
वशानिकरोतिततोवश्येंद्रियंमनआत्मदर्शनायभवति उ
क्तंचयथार्चिष्मानुद्धतशिखःकक्षंदहतिसानिलः तथाचित्तस्थि
तोविष्णुर्योगिनांसर्वकिल्बिषमितितदाहवशेहीति ६१ ॥

अभिनवगुप्तकृतटीका ॥

यएवंमनसेंद्रियाणिनियमयतिनत्वप्रहृत्यासएवस्थिरप्रज्ञः
सचमत्परएवासीतमामेवचिदात्मानंपरमेश्वरमभ्यसेत् ६१ ॥

परमार्थप्रपा ॥

तस्माच्चमनोनिग्रहव्यतिरेकेणनामेंद्रियनिग्रहोमहेचसंभव
ति एवंतानिसर्वाणिसंयम्यअंतरिंद्रियनिग्रहेणस्वाधीनानिकृत्वा
मत्परःसन्मदाश्रयवर्तित्वेनयुक्तःसन्नासीनोनिएवमनेनापि
प्रकारेणेंद्रियाणियस्यवशेभवंति तस्यप्रज्ञाप्रतिष्ठितेत्यर्थः अ
नेनाकिमासीतेतिप्रश्नस्यवशीकृतेंद्रियःसन्नासीतेत्युत्तरमुक्तंभ
वति तदुक्तमथर्वोपनिषत्सु यस्तुविज्ञानवान्भवत्ययुक्तेनमन
सासह तस्येंद्रियाण्यवश्यानिदुष्टाश्वाइवसारथेः यस्तुविज्ञान
वान्भवतियुक्तेनमनसासह तस्येंद्रियाणिवश्यानिसदश्वाइव
सारथेरितिस्पष्टार्थेयंश्रुतिः ६१ ॥

वनमाली टी॰ ॥

मामाश्रित्ययेहींद्रियजयाययतंतेतेनायासेनेंद्रियाणिवशीकु
र्वंतीत्याह तानीतितानिसर्वाणींद्रियाणिज्ञानकर्मसाधनानि
संयम्यसम्यक्वशीकृत्ययुक्तःसमाहितमनाःसन्नासीत अमा
थिनांकथंवशीकरणंतत्राह मत्परः अहंसर्वेश्वरोनंतगुणा
लयपरउत्कृष्टःसर्वस्वतयोपादेयोयस्यसमत्परःएकांतमद्भ
क्तइत्यर्थः तथाचोक्तं नवासुदेवभक्तानामशुभंविद्यतेक्वचि
दिति यथाहिलोकेबलवंतंराजानमाश्रित्यदस्यवोनिगृह्यंते

यथा
राजाश्रितोयमितिज्ञात्वाचतेस्वयमेवतद्वशाभवंति तथै
वभगवंतंसर्वान्तर्यामिणमाश्रित्यतत्प्रभावेनैवदुष्टानींद्रियाणि
निगृहीतानिभवंति इंद्रियवशीकारेफलमाह वशेहीति किमा
सीतेत्यस्योत्तरमुक्तं ६१ ॥

उत्तमवैजयन्तीटी॰ ॥

तस्मात्तानीति सर्वाणिबाह्याभ्यन्तराणि नानि पूर्वस्परेणविषयरागो
न्मादकानिइंद्रियाणिसंयम्यविषयेभ्यः सम्यग्उपरमंकृत्वामत्पर
अहमेव सर्वेश्वरः परोयस्मात्सतथामदनन्यभक्तस्तन्मुक्तः व
शीकृतेंद्रियामनाः ज्ञानयोगयुक्तः सावधानः सन्नासीततिष्ठे
त् एतदुक्तंभवति यथान्यदेवभक्तानांरावणकंसहिरण्यकशिपुरा
दीनामिंद्रियैः शत्रुभिश्चपराजयमरणादीन्यनेकामंगलानि न
भवंति तथाममभक्तानांयुष्मदादीनांभवंतियतोमच्चित्तानांम
देकाधीनयोगक्षेमानांहृद्यन्तर्यामिरूपेणवहिर्यामिरूपेणच
स्थितः सर्वेश्वरोहमेवाशुभानींद्रियाणिशत्रूंश्चनाशयामि तथा
८१ चोक्तं यथार्चिष्मानृद्धशिखः कक्षंदहतिसानिलः तथाचित्त
स्थितोविष्णुर्योगिनांसर्वकिल्बिषमिति नवासुदेवभक्तानाम
शुभंविद्यतेक्वचिदित्यादिप्रमाणमिति नन्वेंद्रियसंयमेकृतेयो
गिनः किंफलंस्यादित्यपेक्षायामाह वशेहीति हीतिनिश्चयेयस्य
योगिनः इंद्रियाणिवशेस्वाधीनेभवंतितस्यप्रज्ञाप्रतिष्ठिता
सोपिस्थितप्रज्ञउच्यतेइत्यर्थः ६१ ॥

मधुसूदनीटी॰ ॥

एवंतर्हितत्रकः प्रतीकारइत्यतआह तानींद्रियाणिसर्वाणिज्ञा
नकर्मसाधनभूतानिसंयम्यवशीकृत्ययुक्तः समाहितः निगृही
तमनाः सन्नासीतनिर्व्यापारस्तिष्ठेत प्रमाथिनोकथंस्ववशीक
रणमितिचेत्तत्राह मत्परइति अहंसर्वात्मावासुदेवएवपरम
उत्कृष्टउपादेयोयस्यसमत्परः एकान्तमद्भक्तइत्यर्थः तथा
चोक्तं नवासुदेवभक्तानामशुभंविद्यतेक्वचिदिति यथाहिलो
केबलवन्तंराजानमाश्रित्यदस्यवोनिगृह्यन्तेराजाश्रितोयमि
तिज्ञात्वाचतेस्वयमेवतद्वश्याभवंति तथैवभगवंतंसर्वान्

योमिनमाश्रित्यतत्प्रभावेनैवदुष्टानीन्द्रियाणिनिगृह्णानित्थन
स्त्वभगवदाश्रितोयमितिमत्वा तानितद्वश्यानिभवंतीतिभावः
यथाचभगवद्भक्तेमहाप्रभावत्वंतथाविस्तरेणाग्रेव्याख्यास्यामः
इंद्रियवशीकारेफलमाह वशेहीतिस्पष्टं तदेतद्वशीकृतेंद्रियः
सन्नासीतेति किमासीतेतिप्रश्नस्योत्तरमुक्तंभवति ६१

सदानंदी टी॰ ॥

एवंतर्हिप्रतीकारःकस्तत्रेत्यतआहतं तानीन्द्रियाणिधीकर्म
साधकान्यखिलान्यपि १ समाहितोवशीकृत्यनिगृह्णीतमना
स्त्वसन् निर्व्यापारतयातिष्ठेन्मांसमाश्रित्यमत्परः २ वासुदेवो
हमेवशेषयस्योपादेयश्चांतरः सचास्यकांतमद्भक्तोवशीकर्तुं
त्तमोत्तिले यथाराजानमाश्रित्यनिगृह्णंतेहिदस्यवःराजाश्रि
तोयमित्येवंज्ञात्वावश्याभवंतिते ४ भगवंतंतथाश्रित्यतत्प्रभा
वेणसर्वशः निगृह्णानींद्रियाण्येवंतोभक्तान्यपियोगिनः ५
कृत्स्नाश्रितोयंमत्वेत्यस्वयंवश्यानिसंतिवै माहात्म्यंभगवद्भ
क्तेःस्फुटंचाग्रेभविष्यति ६ इंद्रियाणांवशीकारेफलमाहर
मापतिः वशेहीतिस्पष्टमिदंकिमासीतेतिपृच्छतः ७ उत्तरं
प्रोक्तमित्येतदतःकृत्स्नंयतेःशृणु ८ ६१ ॥

नीलकंठी टी॰ ॥

यद्यप्येवंतथापितानिनियंतव्यान्येवान्यथास्थितप्रज्ञत्वस्यैवा
सिद्धेरित्याह तानीति संयम्यवशीकृत्ययुक्तःसन्नद्धःमत्परःअ
हमेवसर्वेषांप्रत्यगात्मापरःस्रगादिभ्योवाह्येभ्योदेहेंद्रियादि
भ्यश्चांतरेभ्यश्चउत्कृष्टःप्रियतमोयस्यसमत्परःसन्नासीत हि
यस्मात्वशेश्राज्ञायां शेषंस्पष्टं ६१ ॥

२ आनंदी टीका

यद्यस्मात्स्यापिविषयानास्वादसमाहितस्यसतातदर्शनयोग्यताम
पिप्राप्तस्यविदुषोविपश्चितोज्ञानविज्ञानजागरूकस्याप्यात्मानंप्रणयरा
ति प्रमथनशीलानींद्रियाणिप्रसभंप्रसह्यैवकालतेलेशलद्धा
भूमिमिंद्रियाणि लब्धादपिस्थानाद्वस्यवर्षंति विषयाभिमुखत्वं

रुंधते अथवेंद्रियशब्दादिविषयप्रतिषेधयोगनिष्ठायोगिनश्चिरादपि
इंद्रियैःकामान्प्रतिप्रवर्तनेन प्रमाथितचित्तः यतएवमयंमच्छलोविषय
परिहारसमाधिस्ततस्तानींद्रियाणिमनसायथोक्तज्ञाननिष्ठेनचेता
सासंयम्यात्मवशानिकृत्वायुक्तोयथोक्तलक्षणेस्वात्मनत्वेसमाहितः
सर्वास्ववस्थासुतदेकनिष्ठःमत्परः शास्त्रानिषिद्धशब्दादिग्रहणप्र
वृत्तेंद्रियनिष्ठएवासीतयस्मात् यथोक्तेनक्रमेणयस्ययोगिनःइंद्रिया
णिवशेविधेयत्वेवर्तंते तस्यप्रतिष्ठितालब्धनिश्चलस्थितप्रज्ञोच्यते अ
त्रायंदृष्टांतः कश्चिद्गारुडिकस्तादृशःसंभवतियोमंत्रप्रभावेनभुजगा
न्प्रतिषेद्धुमलं सयदातादृङ्मंत्रोपासनशैथिल्यलक्षणंप्रमादमातिष्ठति
तदातेक्ष्विडान्विषिणोभुजगास्तंव्यापादयन्त्येव कश्चित्तुगारुडशास्त्र
रहस्यवेदित्वात्तादृशातिशययुक्तोभवति येनतैरेवभुजगैःस्रग्दाममभि
रिवक्रीडति तंचतेकदाचिदभिभवितुंप्रभवंति एवंयोगीकयाचित्तु
च्छयाकंचित्कालंविषयान्परिहृत्यसमाधिमभ्यस्यति तस्यमनागप्यवधा
नविच्छेदात्तेलब्धावकाशाविषयाःचित्तंप्रमथ्नन्त्येव यस्तुयथोक्तपार
मार्थिकेस्वात्मन्येवसदासुव्यवस्थितःसविषयैःक्रीडन्नपिनकदाचिद्बाधि
तुंशक्यः यथोक्तं वसन्विषयमध्येपिनवसत्येवबुद्धिमान् संवसत्येवदु
र्बुद्धिरसत्स्वविषयेष्वपि अथकुर्मांगानीवेत्युपमाननिर्देशाद्विषयेभ्यो न्यत्तत्र्यव
तेनमेवेंद्रियाणांसंहारःसंयमोयस्यभोगष्वेव तेप्रतिपादयन्प्रतिष्ठितप्र
ज्ञत्वस्य श्लोकपंचकेनसबलेलक्षणमाह ६१

रामकंठीका टी

युक्तःअभ्यस्ताष्टांगयोगःतानींद्रियाणिसंयम्यमनसैवनिगृह्यवशीकृ
त्यनत्वनिराहारतयातत्परःतेषामिंद्रियाणांसंयमपरएवासीततत्रैवाव
हितचित्तोनतुनिरपेक्षःहियस्मादयसेंद्रियाणिवशेतस्यप्रज्ञाप्रतिष्ठिता
अत्रमत्परइत्यपिपुस्तकपाठदर्शनात् अहंवासुदेवएवपरउपास्यायस्ये
तिवाख्यायामीश्वरप्रणिधानाद्वेतियोगशास्त्रसूत्रार्थावेत्यापरमेश्वरा
भिध्यानमात्रेणापींद्रियवशीकारोजायतेइत्यर्थः ६१

तात्पर्यटीका

यथामन्दमंत्राभ्यासंगारुडिकंक्ष्विडान्विषिणोभुजगाव्यापादयितुमुद्य
च्छंति गाढाभ्यस्तमंत्रस्तुवशीकृतास्तैःस्रग्दाममभिरिवक्रीडति तथोक्त
तु यथोक्तं वसन्विषयमध्येपिनवसत्येवबुद्धिमान् संवसत्येवदुर्बुद्धिर

तएवंततःता
सर्वाणींद्रिया
संयम्य वशीकृ
त्वाभ्या
ततप्रवृत्त्या
आत्मतत्त्वेस
हितः। मत्परो
मेव विदात्मानं
मेश्वरं भक्त्या
तः आसीत स
भ्यसेत् युक्तमेवं
नहि राजाश्रि
तिदस्यवःप्रभ
वशीकारफ
नाह वशेहीति

सक्तविषयेष्वपि ६१ ॥

पंचोलीटीका

युक्तः समाहितचित्तः तानि सर्वाणि इंद्रियाणि संयम्य वशीकृ-
त्य मत्परः मत्परायणः तिष्ठेत हि यस्मात् यस्येंद्रियाणि वशे यद-
धीनानि वर्तंते तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ६१

रणवीरसमिद्धोधिनी॥

अथ किमासीतेति रतीयं समर्थयति तानि सर्वाणीत्यारभ्य स-
र्वांतिमाप्नोति न कामकामीत्यंतैरेकादशभिः यानि वा वश्यक-
र्तव्यान्मनः प्रच्यावयंति तानि सर्वाणि संयम्य स्ववशे विधाय म-
त्पर आसीत पिपर्ति पालयति पूरयति कर्मफलानि वेति परः अ-
हमेवेश्वरः परः पारगं फलदातावयस्येति मां परायणमाश्रित्य
मय्यीश्वरेऽर्पितकर्मफलश्च स्वकर्मणि निष्ठावान्स्यात् यतः स्वा-
यत्तेंद्रियस्य स्वकर्माचरणे स्थैर्यं भवतीति ६१

मधुभाष्य

तानीति बद्धयत्नवतः प्रकाम्यतोऽयत्नं कुर्यादित्याशयः युक्तः
मयि मनो युक्तः अहमेव परः सर्वस्मादुत्कृष्टो यस्य स मत्परः
फलमाह वशे हीति रागादिदोषकरणमाह परिहार्यश्च
कहुयेन संमोहोऽकार्येच्छा तथाहि मोहश्चाज्ञानार्थे उक्त उपगी
तास्तु मोहसंज्ञितं अधर्मलक्षणं वेवतीयत पापकर्म च इति
तथा वान्यत्र संमोहोऽधर्मकामिनेति स्मृतिविभ्रमः प्रतिषे-
धादिस्मृतिविनाशः बुद्धिनाशः सर्वात्मनाऽदोषबुद्धिनाशः
विनश्यति नरकायनर्थं प्राप्नोति तथा शुक्लम् अधर्मकामिनः
प्राप्ते विस्मृतिर्जायते यदा दोषाद्दोषे तत्काले स च नरकं प्रतिप-
द्यत इति इंद्रियजयफलमाह नराभ्यां श्लोकाभ्यां विषयानतु

भवन्नपि विधेयआत्मामनोयस्यसजितात्मेत्यर्थः प्रसा
दंमनःप्रसादं कथंप्रसादमात्रेणसर्वदुःखहानिः प्रस
न्नचेतसोहिबुद्धिपर्यवतिष्ठति ब्रह्मापरोक्षेणबुद्धिःस
म्यक्स्थितिंकरोति प्रसादोनामप्राप्योविषयागतिः प्र
सादाभावेदोषमाहनेत्राभ्यांश्लोकाभ्यां नहिप्रसादाभा
वेयुक्तश्चित्तनिरोधः अयुक्तस्यचबुद्धिःसम्यक्ज्ञानंना
स्ति तदेवोपपादयति नचायुक्तस्येति शांतिर्मुक्तिः प्रां
तिर्मोक्षोघनिर्वाणमित्यभिधानात् कथमयुक्तस्यभा
वनानभवति इत्यतआह ६१॥

रामचंद्रसरस्वतीकृतटीका ॥

तानिति तानींद्रियाणिसर्वाणिज्ञानकर्मसाधनरूपानिसंयः
म्य स्ववशेविधाययुक्तःकर्मयोगपरःआसीतिष्ठेदित्यर्थः नन्व
वेंद्रियाणिकथंवशीकर्तुंशक्यंते तत्राहमत्परः अहमेवपर
उत्कृष्टोनियंतायस्येतिमत्परः विपत्तेईश्वरोदंडकर्तेतिभिया
तत्संयमःसुलभइतिभावः तद्वशीकारेफलमाह वशेइति
स्पष्टं नन्विंद्रियाणिमनःक्षोभमात्रेकारिण्यानिचेत्सनसिसं
तविषयाः वासेयोगंतनकारिण्यानिसाधकइत्यतआह ॥ ६१

दोहा

तिन सभहिकों बसकरें युक्त धारणे मम होय इंद्रियजाके
बसरहें ताकी मति दृढ सोय ६१॥

382

भाषा अनुवाद

इंद्रियोंको स्वाधीन करना यह कहि करि फेरि क्या करना उचितहै सो कहतेहै कि तो सब इंद्रियों का संयम करिके युक्त योगी मेरेमे तत्परहो रहे अर्थात् आत्मामे निष्ठा करि बैठे यह कहि ज्ञानी कैसे स्थिति करते इस प्रश्नका उत्तर दिया अर्थात् जिसके इन्द्रीगण वशहै उसकी प्रज्ञा कहे बुद्धिप्रतिष्ठितहै ६१ ॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ६२ ॥

शांकरभाष्यं

अथेदानीं पराभविष्यत् सर्वानर्थमूलमिदमुच्यते ध्यायत इति ध्यायतश्चिंतयतो विषयान् शब्दादि विषय विशेषान् आलोचयतः पुंसः पुरुषस्य संग आसक्तिः प्रीतिः तेषु विषयेषूपजायते उत्पद्यते संगात् प्रीतेः संजायते समुत्पद्यते कामः तृष्णा तस्मात्कामात् कुतश्चित् प्रतिहतात् क्रोधोभिजायते ६२ ॥

आनन्दगिरिकृतटीका ॥

समनन्तरं श्लोकद्वयतात्पर्यमाह अथेति पुरुषार्थोपायोपदेशानन्तर्यमथशब्दार्थः तन्निष्ठत्वराहित्यावस्थां दर्शयति इदानीमिति पराभविष्यतो महान्तमनर्थं गमिष्यतो विवेकविज्ञान विहीनस्येति यावत् सर्वानर्थमूलं विषयाभिध्यानं तस्य तथात्वमनुभवसिद्धमिति वक्तुमिद मित्युक्तं विषयेषु विशेषत्वमारोपित रमणीयत्वं प्रीतिरासक्तिरिति साधारणासक्तिमात्रमुच्यते तृष्णेत्युद्रिक्ता शक्तिरुक्ता प्रतिबन्धेन प्रणाशेन वा प्रतिहतिः ६२

स्वामिकृतटीका ॥

बाह्येंद्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे दोषमाह । ध्यायत इति द्वाभ्यां गुणबुद्ध्या विषयान्ध्यायतः पुरुषस्य तेषु संगआसक्तिर्भवति आसक्त्या च तेष्वधिकः कामो भवति कामाच्च केनचित्प्रतिहतात्क्रोधो भवति ६२ ॥

पिशाचभाष्यम् ॥

अथेदानीमात्मनाशस्य मूलमुच्यते ध्यायतश्चिंतयतः शब्दादिविषयान्संगः प्रीतिस्तेषु शब्दादिषु विषयेषूपजायते उत्पद्यते संगात्प्रीतेः संजायते समुत्पद्यते कामस्तृष्णा कामात्कुतश्चित्प्रतिहतात्क्रोधोभिजायते [illegible] कार्याकार्यविवेकः [illegible] विभ्रमः [illegible] ६२

गी॰
टी॰
द्वि॰

रामानुजभाष्यम् ॥

एवमप्रवश्यमनः स्वीयगौरवेणेन्द्रियजये प्रवृत्तो विनष्टो भव-
तीत्याह अनिरस्तविषयानुरागस्य हि मय्यनिवेशितमनसः इन्द्रि-
याणि संयम्यावस्थितस्यापि अनादिपापवासनया विषयध्या-
नमवर्जनीयं स्यात् ध्यायतो विषयान्पुंसः पुनरपि सङ्गोऽतिवृद्धो
जायते सङ्गात्संजायते कामः कामो नाम सङ्गस्य विपाकद-
शा पुरुषो यां दशामापन्नो विषयाननुभूय स्थातुं न शक्नोति स
कामः कामात्क्रोधोऽभिजायते कामे वर्तमाने विषये चासंनिहिते सन्निहि-
तान्पुरुषान्प्रति क्रोधो भवति ६२ ॥

अभिनवगुप्तकृतटी॰ ॥ उपक्रमे ६२ ॥

परमार्थप्रपाटीका ॥

एवं बाह्येन्द्रियसंयमाभावे दोषमुक्त्वा अधुना मनःसंयमाभावे
दोषमाह ध्यायत इति द्वाभ्यां विषयान्ध्यायतः पुंसः पुरुष-
स्य तेषु विषयेषु सङ्गश्चासक्तिर्भवति ततः सङ्गात्कामस्तैर्वि-
षयैरवश्यं भवितव्यमिति तदर्जने त्वादरो भवति तत्र केनचि-
दन्तराये कृते क्रोधो भवति ६२ ॥

वनमाली टीका ॥

ननु मनोबाह्येन्द्रियप्रवृत्तिद्वारानर्थहेतुत्वे निगृहीतबाह्येन्द्रि-
यस्य तत्त्वात्तदेष्टारगवन्मनस्यनिगृहीतेपि न कापि क्षतिः
बाह्येन्द्रियोगाभावेनैव कृतकृत्यत्वादतो युक्तश्चासीतेति व्यर्थ-
मित्याशङ्क्यानिगृहीतबाह्येन्द्रियस्यापि युक्तत्वाभावे सर्वानर्थ-
प्राप्तिमाह ध्यायत इति द्वाभ्यां निगृहीतबाह्येन्द्रियस्यापि शब्दा-
दीन्विषयान्ध्यायतः मनसा पुनः पुनश्चिन्तयतः पुंसस्तेषु विष-
येषु सङ्गश्चासक्तिर्जायते सङ्गात्ममेदं भवत्विति इच्छा जायते कामा-
त्कुतश्चित्प्रतिहन्यमानात्तत्प्रतिघातकविषयकः क्रोधो जा-
यते ६२ ॥ उत्तमवैजयन्ती टीका ॥

एवमपि बाह्येन्द्रियाण्येव स्ववशीकृत्य यदि मनसः संयमं न क-
रोति तर्ह्यपि बहुतरदोषाविष्टत्वेन पुमान् विनष्टो भवतीत्या-
ह ध्यायत इति द्वाभ्याम् ध्यायत इति यद्यपि स्ववशीकृतज्ञान

कर्मात्मकेन्द्रियस्य दूरीकृतविषयाभिनिवेशस्य मत्परस्य यो॰
गिनो निर्दोषत्वमस्ति तथाप्यनन्तजन्माभिशयाभ्यस्तविषया
तिमलिनीकृतस्वरूपेण मनसा विषयान् शब्दादीन् ध्यायतः
पुंसः पुरुषस्य तेषु संगः सुह्रोहमेतेनैव जीवामि सुखी भवा
मि नान्यथेत्येवमतिशयचिंतनरूपरति विशेष उपजायते उ
त्पन्नो भवति तस्मात्संगात्कामः॥ इदं सर्वं जगन्ममैवाधीनम
स्त्वितीच्छाविशेषः संजायते॰ तस्माच्च कामात्क्रोधः यद्वस्तु का
मसुत्पादयति तस्य वस्तुनो यः कश्चिद्विघातको भवति तं पुरु
षं प्रति क्रोधोऽभिजायते कामएव स्वपरिणामेन क्रोधरू
पेणोत्पद्यत इत्यर्थः ६२ ॥

म्पउत्पद्यते॰

मधुसूदनी टीका

द्वा॰ ननु मनसो बाह्येन्द्रियप्रवृत्तिद्वारानर्थहेतुत्वं निगृहीतबाह्येन्द्रियस्यात
स्यात्तद्दंष्ट्रोरगवन्मनसो निगृहीतेपि न कापि क्षतिः बाह्यविषया

न

भावेनैव कृतकृत्यत्वादतो युक्तमासीतेति व्यर्थमुक्तमित्याश
क्य निगृहीतबाह्येन्द्रियस्यापि युक्तत्वाभावे सर्वानर्थप्राप्तिमाह
द्वाभ्यां निगृहीतबाह्येन्द्रियस्यापि शब्दादीन्विषयान् ध्यायतो
मनसा पुनः पुनश्चिंतयतः पुंसस्तेषु विषयेषु संगश्चासंगः म
मात्यंतसुखहेतव एवेत इत्येवं शोभनाध्यासलक्षणः प्रीतिवि
शेष उपजायते संगात्सुखहेतुत्वाज्ञानलक्षणात्संजायते का
मः ममैते भवंत्विति तृष्णाविशेषः तस्मात्कामात्कुतश्चित्प्र
तिहन्यमानात्तत्प्रतिघातकविषयः क्रोधोऽभिज्वलनात्माभि
जायते ॥ ६२ ॥

सदानंदी टीका ॥

नन्विंद्रियवशीकारे जाते स्वांतविनिग्रहः स्वतः सिद्धः किमर्थं
तदासीतेति पृथक् श्रमः १ इंद्रियद्वारतोनर्थकरं नैव स्वतो म
नः उतवातदंष्ट्रोरगवदनिरोधे स्य का क्षतिः २ मैवं मनोनि
रोद्धव्यं सर्वानर्थकरं यतः निगृहीतेंद्रियस्यापि मनसा वि
षयान्प्रियान् ३ पुंसश्चिंतयतस्तेषु शोभनाध्यासहेतुकः
प्रीतिभेदोयच्चासंगो ममैते सुखहेतवः ४ इत्येवं जायते त॰

स्मात्संगात्कामः प्रजायते भवंत्वेतेममेत्येवंतृष्णाभेदस्ततोपिच
कुतश्चिद्धन्यमानात्प्रतिघातकगोचरः क्रोधोभिज्वलनात्मा
स्यजायतेक्रोधयतस्ततः १ ६२ ॥

नीलकंठी टीका ॥

यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टतितामाहुः परमांगतिमितिश्रुतौइंद्रियमनोबुद्धीनांनिग्रहेपरमपदप्राप्तिरित्युक्तं तत्रउपसंहृतकरणस्यबाह्यान्शब्दादीनगृह्णतोमनोमात्रेणवास्थितस्ययोगिनोमनसोऽनिग्रहे किंस्यादित्याह ध्यायतइतिद्वाभ्यां विषयान्शब्दादीन्ध्यायतश्चिंतयतः पुंसः पुरुषस्यतेषुशब्दादिषुसंगः संबंधोजायते बाह्यार्थेभ्यो निगृहीतान्यपिइंद्रियाणिमनोदोषात्पुनर्बाह्यार्थान्गृह्णंतीत्यर्थः ततः संगात्कामस्तस्मिन्विषयेऽभिलाषः संजायते कामात्कुतश्चिद्धेतोः प्रतिहतादभिज्वलनात्माक्रोधोभिजायते ६२ ॥

रामकंठीटीका

इहात्वेत्वविंत्यपरमेश्वरमायामुषितसज्ञानतयाशरीरमात्रमात्मत्वेनप्रतिपन्नस्यसंसारिणः सतः पुंसः सन्निहितमपिशब्दाध्येयंनिरुपमानंनिजानन्दस्वयासागरमत्यस्वात्मानमविमृषतोदुःखैकपरिमांनित्यकृतिमस्वसाधनस्पृहतयाशब्दादीन्विषयान्ध्यायतः सततंचिन्तयतः तेषुसंगोनिविडनिमग्नमानसत्वमुपजायते उत्पद्यतेतस्मात्तथाविधात्संगात्कामस्तद्विषयोभिलाषोरागाख्यः क्लेशः संजायतेसमुद्भवति ६२

आनंदी टीका

इंद्रियाणांप्रमाथित्वंदर्शयति निगृहीतबाह्येंद्रियस्यापिमनसोनिग्रहाभावाद्विषयांश्चिन्तयतस्तेषुसंगोजायते संगात्कामः कथमेतान्प्राप्स्यामीतितृष्णाप्रामेषवर्षण ६२

लासिकी वल्लभीटीका

नपरमिंद्रियवशीकारंविनास्थितप्रज्ञत्वासंभवोयावद्दोषप्रसक्तिरपीत्याह ध्यायतइति ध्यायतोविमृशतोनत्वात्मानम् स्पष्टार्थः ६२ ॥ पुरुषस्यतेषुसंगप्रासक्तिर्भवति संगात्कामोभिलाषोजायते कामात्केनचित्प्रतिहतात्क्रोधोभवति ॥

पंचोलीटीका

विषयान् शब्दादीन् ध्यायतः आलोचयतः पुंसः पुरुषस्य तेषु विषयेषु संगः आसक्तिः उपजायते संगात् आसक्तेः प्रीतेः कामः तृष्णाः उपजायते कामात् अभिलाषात् कुतश्चित् प्रतिहतात् क्रोधोभिजायते ६२

मराठीअर्थसिद्धोधिनी॥

ननु आरब्धपुरुष विरक्तस्य विषयत्यागे सति प्रज्ञास्थैर्यं कथं विरुद्धत्य येवेति कुतो नासो स्थितप्रज्ञ पाङ्गेन व्यवह्रियते ॥ त्याशंक्य न केवलमस्य प्रज्ञास्थैर्याभावएव यावदुभयलोकभ्रष्टता सर्वथा प्रणायोपीत्याह ध्यायतइतिद्वाभ्यां ध्यात्वाहि विषयास्त्यज्यंते ग्रहीतस्येवहित्यागात् ध्यानकालएवच संगादयोमनउपरंजयंति इति विषयत्यागः कथमपिन सिद्यतीति कथंतस्य प्रज्ञास्थैर्यमितिसमुदायार्थः प्रज्ञत्यागस्त्वेवं विषयान्ध्यायतस्त्यागपूर्वकाले दुःखदायित्वं विवेचयतः पुंसस्तेषु विषयेषु संगउपरागउपजायते उपरंजनबीजवत्वाच्च कालांतरे कामः संजायते तस्मात्क्रोधः तस्माच्च कार्याकार्याविवेकरूपः संमोहः तस्माद्बुद्धेः कर्मनिष्ठानुकूलायास्तत्कालप्राद्दिग्याम तेनाशः ततश्च मरणप्रायतिउभयतो भ्रंशयतीति स्वधर्मपरधर्मवनास्य स्थैर्यमिति स्वधर्माचरणमेव श्रेयःसाधनमिति भावः ६२॥

मधुभाष्य॥

386

रामचंद्रसरस्वतीकृतटीका ॥

ध्यायत इति द्वाभ्यां संगः रुचिरः किलैते विषया इत्येवं लक्ष्म-
णकामप्रभिर्भाव्य इत्येवरूपः कामप्रहितो क्रोधः स च प्रसिद्धः
संमोहः कार्याकार्यविवेकविरहः स्मृतिविभ्रमो वस्त्वत्रमेधा
न चलनं बुद्धिनाशः पेकात्म्याकारमंतोवृत्तिनिलयः ततो
नाशोधिकारच्युतेरिति तदेवं बाह्येंद्रियव्यापाराभावेपि चेत
सि विकृतेः नर्थं प्रदर्श्यपि चेतसि वशे सत्यपि प्रविरुद्धे बाह्येंद्रिय
व्यापाराभावेपि चेतसि विकृतेः नर्थं प्रदर्श्य चेतसि वशे सत
पि प्रविरुद्धे बाह्येन्द्रियव्यापारेगुणमाह ॥ ६२ ६३ ॥

आनंदी टीका

इहात्वल्वचिंत्यपरमेश्वरमायाप्रवृत्तितमज्ञानतया शरीरपातमात्मत्वे-
ननुतिपनस्य संसारिणः सतः पुंसः स्वनिद्धिनमपि सुखप्रत्ये यं निरुपमा
ननिजानंदस्वयासागरस्वस्वात्मानविमृश्यतोऽङ्गः स्वेकपरिमानि
त्यनिह्यतिमस्त्वस्तायनस्पृहतया शब्दादीन्विषयान्ध्यायतः सततं चि
न्तयतः ते सु संगो निविडनिमनमानसत्वं उपजायते उत्पद्यते तस्मात्तः
प्यादिया त्संगात्कामस्तद्विषयोऽभिलाषो रागात्मकः क्लेशः संजायते स उ
द्भवति ६२

भाषा अनुवाद

वाह्य इन्द्रिय कहे बाहर की इंद्रियोंके नवश रहने मे जो दोष सो देखाय अब अवशी भूत जो मन तिसका दोष देखावतेहै कि बुद्धि के द्वारा रूपादिक विषयों को ध्यान करते हुये पुरुषका मन उन विषयों मे आसक्त होता अर्थात् विषय सङ्ग होताहै और सङ्गसे अधिक अधिक कामना उत्पन्न होतीहै फेरि जो कामना किसी प्रकारसे नष्टहोय तो क्रोध प्रकट होताहै अर्थात् कामसे क्रोध होयहै ६२ ॥

दोहा

विषय ध्यानसें पुरुषकों तामे संगजाय संग उपजावें
कामकों काम क्रोध प्रगटाय ६२॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३

शांकरभाष्यम् ॥

क्रोधाद्भवति संमोहः संमोहोऽविवेकः कार्याकार्ये विषयवि
भ्रमो भवतीति संबध्यते क्रुद्धो हि संमूढः सन् गुरुमप्याक्रोश
तू ति संमोहात् स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारज
नितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अ
नुत्पत्तिस्ततः स्मृतिभ्रंशात्तु बुद्धेर्नाशः कार्याकार्यविषय
विवेकायोग्यता अन्तःकरणस्य बुद्धेर्नाश उच्यते बुद्धिना
शात्प्रणश्यति तावदेव हि पुरुषो यावदन्तःकरणं तदी
यं कार्याकार्यविषयविवेकयोग्यं तदयोग्यत्वे नष्ट एव पु
रुषो भवत्यतः तस्यान्तःकरणस्य बुद्धेर्नाशात्प्रणश्यति पु
रुषार्थायोग्यो भवतीत्यर्थः ६३

आनन्दगिरिकृतटीका ॥

क्रोधस्य संमोहहेतुत्वमनुभवेन द्रढयति क्रुद्धो हीति आ
क्रोशत्यधिक्षिपति तदयोग्यत्वमपेरर्थः संमोहकार्यं कथ
यति संमोहादिति स्मृतेर्निमित्तनिवेदनद्वारा स्वरूपं निरू
पयति शास्त्रेति क्षणिकत्वादेव तस्याः स्वतो नाशसम्भवात्
संमोहाधीनत्वं तस्येत्याशङ्क्याह स्मृतीति स्मृतिभ्रंशेपि क
थं बुद्धिनाशः स्वरूपतः सिद्ध्यति तत्राह कार्येति ननु पुरु
षस्य नित्यसिद्धस्य बुद्धिनाशेपि प्रणाशो न प्रकल्प्यते तत्रा
ह तावदेवेति कार्याकार्यविवेचनयोग्यान्तःकरणाभावे
सतोपि पुरुषस्य करणाभावादप्रागततत्त्वविवेकविवक्षया
नष्टत्वव्यपदेशः तदेतदाह पुरुषार्थेति ६३ ॥

स्वामिकृतटीका ॥

किंच क्रोधादिति क्रोधात्संमोहः कार्याकार्यविवेकाभावः त
तः शास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो विचलनं विभ्रंशः ततो
बुद्धेश्चेतनाया नाशः वृक्षादिष्विवाभिभवस्ततः प्रणश्यति

मृततुल्योभवति ६३ ॥

क्रोधाद्भवतिजायतेसंमोहः पिशाचभाष्यम् कार्याकार्यविवेकःसंमोहात्स्मृतिविभ्रमःशास्त्रा+
+र्योपदेशजातसंस्कारजनितायास्मृतेर्भ्रंशः उत्पत्तिनिमित्तभ्रं
शेसत्यामनुत्पत्तिस्तस्यास्मृतेर्भ्रंशात् बुद्धिनाशःकार्याकार्य
विवेकलक्षणायाबुद्धेर्नाशः बुद्धिनाशात्स्वयंप्रणश्यतिपल
वाद्धिपुरुषोयावत्कार्याकार्यविवेकस्तन्नाशेनष्टएवपुरुषो
भवति ॥ ६३ ॥

रामानुजभाष्यम् ॥

क्रोधाद्भवतिसंमोहःकृत्याकृत्यविवेकशून्यतातयासर्वंक
रोतीतिततस्त्वप्रारब्धेइंद्रियजयादिकेप्रयत्नेस्मृतिभ्रंशोभ
वति स्मृतिभ्रंशाद्बुद्धिनाशआत्मज्ञाना‍यव्यवसायःकृत
स्तस्यनाशात्पुनरपिसंसारेनिमग्नेनष्टोभवति ६३ ॥

अभिनवगुप्तकृतटीका ॥

तपस्विनोविषयत्यागएवविषयग्रहणेपर्यवस्यति ध्यात्वाहि
तेत्यज्यतेध्यानकालएवसंगादयउपजायन्ते इत्यनुपायो
विषयत्यागःस्थितप्रज्ञस्य ६३ ॥

परमार्थप्रपाटीका ॥

क्रोधात्संमोहःकार्याकार्यविचाराभावस्तस्मात्स्मृतिविभ्रमः
शास्त्राचार्योपदेशःकीदृशोहंकिंकरोमीतिनस्मरति तस्मा
द्बुद्धिनाशस्तस्मात्प्रणश्यतिलोकनिंदास्पदत्वेनजीवन्मृतव
त्पोभवतिएवमनेनप्रथमतोविषयानुस्मृतिःपरिहार्येत्युक्तं
उक्तंचलोकएषविषयानुरंजनेदुःखगर्भमपिमन्यतेसुखं
आमिषंवडिशगर्भमप्यहोमोहतोग्रसतियद्वदंडजइति ६३ ॥

वनमालीटीका ॥

क्रोधाद्भवतिसंमोहःकार्याकार्यविवेकाभावरूपःसंमोहा
त्स्मृतिविभ्रमःशास्त्राचार्योपदिष्टभगवदनुसंधानस्यविभ्रं
शोनाशःबुद्धिनाशात्प्रणश्यतिश्रीहरिधाम्नःप्रच्युतःसन्सं
सारेपततीत्यर्थः यस्मादेवंमनसोनिग्रहाभावेनिगृहीतबा
ह्येंद्रियस्यापिपरमानर्थप्राप्तिस्तस्मान्महताप्रयत्नेनमनो

निगृह्णीयादित्यभिप्रायः ६३ ॥

कुसुमवैजयन्ती टीका ॥

ततः किमत आह क्रोधादिति क्रोधात्सकाशात्संमोहः कर्तव्या
कर्तव्यज्ञानशून्यरूपो भवति संमोहात्स्मृतिविभ्रमः शास्त्रो
पदिष्टमत्प्राप्तिसाधनरूपमदाराधनात्मककर्मानुष्ठाने या
स्मृतिः स्मरणं तस्य विभ्रमः विस्मरणं भवति स्मृतिभ्रंशाद्बुद्धि
नाशः पूर्वोक्तव्यवसायात्मिकाया मत्प्राप्त्यंतरंगोपायाया
बुद्धेर्नाशाद्दर्शनं भवति बुद्धिनाशात्प्रणश्यति मदनन्यवि
षयाया बुद्धेर्नाशाद्धेतोरन्यदेवविषया बुद्धिरुत्पद्यते तस्याः
सकाशात्प्रणश्यति प्रणष्टो भवति संसारचक्रे पुनःपुनर्घ
टीयंत्रवत्पर्यायो भ्रमणं प्राप्नोतीत्यर्थः ६३ ॥

मधुसूदनी टीका ॥

क्रोधाद्भवति संमोहः कार्याकार्यविवेकाभावरूपः संमो
हात्स्मृतिविभ्रमः स्मृतेः शास्त्राचार्योपदिष्टार्थानुसंधानस्य
विभ्रमो विचलनं विभ्रंशः तस्माच्च स्मृतिभ्रंशाद्बुद्धेरैकात्म्या
कारमनोवृत्तेर्नाशः विपरीतभावनोपचयदोषेण प्रतिबं
धात् उत्पत्तिरुत्पन्नायाश्च फलाऽयोग्यत्वेन विलयः बुद्धि
नाशात्प्रणश्यति तस्याश्च फलभूताया बुद्धेर्विलोपात्प्रणश्य
४ ति सर्वपुरुषार्थायोग्यो भवति यो हि पुरुषार्थायोग्यो जातः स
मृत एवेति लोके व्यवह्रियते अतः प्रणश्यतीत्युक्तं यस्मादे
वं मनसो निग्रहाभावेन निगृहीतबाह्येंद्रियस्यापि परमानर्थ
प्राप्तिस्तस्मान्महता प्रयत्नेन मनो निगृह्णीयादित्यभिप्रायः
अतो युक्तमुक्तं तानि सर्वाणि संयम्य युक्त आसीतेति ६३ ॥

सदानंदी टीका ॥

कार्याकार्यविवेकस्याभावः संमोह उद्भवेत् येनायं गुरुमित्रा
दीन्यथाक्रोशति मूढधीः संमोहाज्जायते तस्मात्स्मृतेर्भ्रंशो
ऽनर्थदः १ शास्त्राचार्योपदिष्टार्थानुसंधानस्य विभ्रमः त
तो ब्रह्मैक्याधीवृत्तेः प्रतिबंधो विपर्ययात् २ बुद्धेर्नाशस्ततस्त

स्याविलोपादेवपूरुषः पुमर्थायोग्यतापन्नोस्तनएवेतिकथ्य
ते ३ यस्मादेवंहिमनसोनिग्रहाभावतःपुमान् स्तनत्वस्याभ
वेत्तस्माद्यतस्वास्यविनिग्रहे ४ यतोयुक्तंमयोक्तंतदासीतेति
पुरातन ५ श्रीमत्कृष्णपदारविंदमूरभौहृत्तिवद्गुरुमरी श्र
द्धाभक्तियुतंमनोनवरतंयावत्प्रविष्टंनहि तावल्लोभक
शीलतांप्रतिपदंनाह्नाजहातिस्विकांचांचल्यंप्रजहातितत्र
निरतंचेतःस्वयंत्वाधिदं ६ ६३ ॥

नीलकंठी टी·॥

ततःक्रोधात्संमोहःकार्याकार्यविवेकाभावोभवति ततःस्मृ
तिविभ्रमःशास्त्रानुसंधानस्यविभ्रंशरूपंचलनंभवति स्मृ
तिभ्रंशात्बुद्धिनाशःशास्त्रार्थस्यनिश्चितस्यापितिरोधानंभ
वति तस्मिंश्चशास्त्रजेपरोक्षज्ञानेपिनष्टेपुरुषोनश्यतिपुरु
षार्थायोग्योभवति योहिताहशःसनष्टएवेतिलोकेवदंति
६३ ॥

रामकंठी टीका १

तस्माच्चतत्प्रतिहृत्लेपुवस्तुषुक्रोधःद्वेषाख्यःक्लेशप्रकारोभिजायते
प्रभवति ततस्तस्मैसंमोहःआत्मानात्मादिवस्तुविवेकविरहात्मकमज्ञानं
न्म प्रभवतिमोहाख्यःक्लेशउत्पजतीत्यर्थः ततश्चस्मृतिर्विभ्राम्यति स्वस्वस्मृ
तेश्चमात्मानमस्पृशतीस्वरूपलोपमिवाप्नोति ताहशाच्चतस्माद्बुद्धिःप
रमार्थनिश्चयात्मकंज्ञानंनश्यतितिरोभवति तस्माच्चहेतोःपुरुषःस्वा
त्मस्वरूपप्रतिष्ठाभावलक्षणंनाशमुपगच्छतीति संसारिणंपुरुषमुदि
श्याप्रतिष्ठितबुद्धित्वस्यहेतुपरम्परांप्रतिपाद्येदानीमनुजिहृक्षालक्षण
क्लिष्यमाणमन्देहतिरस्करिणीतिरोधानतया प्रकाशमानयथोक्तस्व
स्वभावप्रकाशस्यप्राप्तप्रबोधस्यमुमुक्षोःप्रतिष्ठितप्रज्ञत्वस्यकारणक्र
मंप्रतिपादयितुमाह ६३ २

आनंदी टीका

विनश्वरत्वेनक्रोधःचित्तज्वलनंक्रोधात्संमोहःकार्याकार्यविचाराभावः
संमोहात्स्मृतिविभ्रमःशास्त्राचार्योपदेशानुसंधानाभावःस्मृतिनाशा

द्बुद्धिनाशः बुद्धेःशास्त्रस्यपरमार्थनिश्चयस्यनाशःबुद्धिनाशात्प्रणश्य
तिसमुपादेयंस्थितप्रज्ञत्वंनाप्नोतीत्यर्थः ६३

लासिकी [illegible] टीका

क्रोधात्संमोहः

कार्याकार्यविवेकाभावः ततस्तु शास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो
विभ्रंशः ततोबुद्धेःपरमार्थनिश्चयात्मकस्यबोधस्यनाशस्तिरोभा
वः ततःप्रणश्यतिपुरुषार्थान्मोक्षाख्याद्भ्रश्यति ६३ ॥

पंचोलीटीका

क्रोधात्संमोहश्चअविवेकोभवतिसंमोहात्शास्त्रसंस्कारजनि-
तायाःस्मृतेर्विभ्रंशोभवतिस्मृतिभ्रंशात्कार्यविषयायाःबुद्धेः
नाशोभवतिबुद्धेर्नाशात्प्रणश्यतिविवेकविज्ञानरहितोनष्टप-
वभवति ६३

रणवीरसमिद्धोधिनी॥

स्पष्टार्थः ६३

मधुभाष्य॥

६३॥

391

भाषा अनुवाद

और क्रोध मोहका हेतुहै इसको दृढ करतेहै कि क्रो।
धसे अर्थात् उसके द्वारा मोह होताहै अर्थात् काज अका
जका विचार नही रहता फेरि संमोह होनेसे शास्त्र और
आचार्य्य तथा गुरुका दिया जो उपदेश कहे शिक्षा अर्थ
सो विचलित अर्थात् भूल जायहै और स्मृतिभ्रंश होनेसे ।
कहे उपदेश भूल जानेसे बुद्धिकी चेतना चली जातीहै
अर्थात् बुद्धि नष्ट होतीहै बुद्धिनाश होनेसे जडके समा
न होय फेरि वह मनुष्य मुर्देकी तुल्य हो कर नष्ट हो
ताहै ६३ ॥

दोहा

क्रोधहुंसेसंमोह ह्वै संमोहस्मृति विकलाय स्मृतिभ्रंश
मतिनाशहै बुद्धिनाश नाशहोजाय ६३॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् । आ-
त्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४ ॥

शांकरभाष्यम् ॥

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानमथेदानीं मोक्षकारण-
मिदमुच्यते रागद्वेषेति रागद्वेषवियुक्तैः रागश्च द्वेषश्च रागद्वेषौ
तत्पुरःसरा हीन्द्रियाणां प्रवृत्तिः स्वाभाविकी तत्र यो मुमुक्षुर्भव-
ति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिन्द्रियैर्विषयानवर्जनीयांश्च-
रन्नुपलभमानः आत्मवश्यैरात्मनो वश्यानि वशीभूतानि तै-
रात्मवश्यैर्विधेयात्मेच्छातो विधेय आत्मान्तःकरणं यस्य सोऽयं प्र-
सादमधिगच्छति प्रसादः प्रसन्नता स्वास्थ्यं ६४ ॥

आनंदगिरिकृतटीका ॥

विषयाणां स्मरणमपि चेदनर्थकारणं स्मृतं तर्हि भोगस्तेन
जीवनार्थं भुञ्जानो विषयाननर्थं कथं न प्रतिपद्यत इत्याशंक्य
वृत्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह सर्वानर्थस्येति अन-
र्थमूलकथनानन्तर्यमथशब्दार्थः परिहर्तव्ये निर्णीते सति त-
त्परिहारोपायजिज्ञासां दर्शयति इदानीमिति रागद्वेषपूर्विका
प्रवृत्तिरित्यत्रानुभवदर्शनार्थो हिशब्दः शास्त्रीयप्रवृत्तिव्यासेधा-
र्थं स्वाभाविकीत्युक्तं तत्रेत्यधिकृतानधिकृतस्य प्रयोगो वर्जनी-
यानशनपानादीन् देहस्थितिहेतूनिति यावत् इन्द्रियाणां
विषयेषु प्रवृत्तिस्तु नियमानुपपत्त्या वर्जनीयेष्वपि स्यादि-
त्याशंक्याह आत्मेति अन्तःकरणाधीनत्वेपीन्द्रियाणां तदनि-
यमात्तेषामपि नियमानुपपत्तिरित्याशंक्याह विधेयात्मेति ६४

स्वामिकृतटीका ॥

ननु इंद्रियाणां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वात्
अयं दोषो दुष्परिहर इति स्थितप्रज्ञत्वं कथं स्यादित्याशंक्याह रागे-
तिद्वाभ्यां रागद्वेषरहितैर्विगतदर्पैरिंद्रियैर्विषयांश्चरन् उपभुंजा-
नोपि प्रसादं शान्तिं प्राप्नोति रागद्वेषराहित्यमेवाह आत्मनो मन-
सो वश्यैर्विधेयो वशवर्ती आत्मा मनो यस्येति अनेनैव कथं व्रजेत ।

गी॰
टी॰
द्वि॰

भुंजानोऽतस्य चतुर्थप्रश्नस्य स्वाधीनैरिंद्रियैर्विषयानधिगच्छतीत्यु
त्तरमुक्तं भवति ६४ ॥

पिशाचभाष्यम् ॥ मू॰

अथेदानीं मोक्षकारणमुच्यते रागद्वेषेति रागद्वेषश्च रागद्वेषौ त
त्पूर्विकाहीद्रियाणांप्रवृत्तिः स्वाभाविकी ताभ्यां वियुक्तैरिंद्रियै
रात्मवश्यैर्विषयांश्चरन्नुपलभमानो योगी आत्मवश्यैः स्वाधीनै
र्विधेयआत्मा अंतःकरणं यस्य सोऽयं विधेयात्मा प्रसादं स्वास्थ्यमधि
गच्छति प्राप्नोति ६४ ॥

रामानुजभाष्यम् ॥

उक्तेन प्रकारेण मयि सर्वेश्वरे भावयेन्यस्तमना निर्दग्धकल्म
षो रागद्वेषवियुक्तैरिंद्रियैर्विषयांश्चरन्विषयान्तिरस्कृत्य वर्तमा
नो विधेयात्मा विधेयमना प्रसादमधिगच्छति निर्मलान्तःकर
णो भवतीत्यर्थः ६४ ॥

अभिनवगुप्तकृतटीका ॥ नास्ति

[illegible] ६४ ॥

परमार्थप्रपाटीका ॥

अथैतत्कर्तुमसमर्थोऽपि तरतीति ब्रजेत किमस्योत्तरमाह रागद्वे
षेति रागद्वेषवियुक्तैरिंद्रियैर्विषयांश्चरन् प्रसादमधिगच्छति रा
गप्रीति रामक्तिर्द्वेषश्च ताभ्यां वियुक्तैरुदासीनैरिंद्रियैर्विषयान्भुं
जानः अथ रागद्वेषवियुक्तत्वे हेतुमाह आत्मवश्यैरिति आत्मा
वश्यो येषां तानि सर्वत्रात्मभावनायुक्तानि तैर्विधेयः परिनि
ष्ठित आत्मा मनो यस्य स तथाभूतः प्रसादं शांतिमधिगच्छतीत्यर्थः
तदुक्तं अग्निसंगाद्यथा लोहमग्नितामुपगच्छति आत्मसंगात्त
थागच्छत्यात्मतामिंद्रियादिकमिति ६४ ॥

वनमाली टीका ॥

मनसि निगृहीते तु बाह्येंद्रियाणां निग्रहाभावेऽपि न दोषः राज्ञि
निगृहीते हि प्रजाः स्वयमेव वशीभवन्ति यथा तथा मनसि नि
गृहीते इंद्रियाणि स्वयमेव वशीभवंतीति वदन् किं ब्रजेतेत्यस्यो
त्तरमाह रागेत्यष्टभिः स्वस्य विधेयं वशीभूतमात्मा मनो यस्य स आ

गी॰ चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यतामधिगच्छति रागद्वेषप्र
टी॰ युक्तानींद्रियाणि दोषहेतुत्वं नाम प्रतिपद्यंते मनसि स्ववशे तु न रागद्वे
द्वि॰ च॰ षौ तयोरभावे तु तदधीनेंद्रियप्रवृत्तिः प्रवर्जनीयतयात्र विषयोप
५ लंभेन दोषमाहतीति नबुद्धिव्याघात इति भावः एतेन विषया
न॰ णां स्मरणमपि चेदनर्थकारणं हंत तर्हि भोगः तेन जीवनार्थं वि
षयान् भुंजानः कथमनर्थं न प्रतिपद्येतेति शंका निरस्ता स्वाधी
नैरिंद्रियैर्विषयान् प्राप्नोति चेत् किं वर्जनेनेति प्रश्नस्योत्तरमुक्तं भव ति॰
ति ६४ ॥

सदानंदी टी॰ ॥

निगृहीते तु मनसि विनेंद्रियविनिग्रहं दोषो नेति वदन्नाह वर्जे
नेत्यस्योत्तरं १ वशीकृतमनायस्तु स्वाधीनैरिंद्रियैश्चरन् वि
युक्तैर्द्वेषरागाभ्यां शब्दादिविषयांस्तथा २ चित्तस्य स्वच्छतां ब्रह्म
साक्षात्कारैकयोग्यतां संप्राप्नोति ततश्चित्तं निरोद्धव्यं प्रयत्नतः ३
६४ ॥

नीलकंठी टी॰ ॥

ननु विषयान ध्यायतोपि योगिनो व्युत्थाने प्रमाणस्वाभाव्यादिंद्रि
याणां विषयेषु संगोऽपरिहरस्ततश्चोक्तरीत्या तस्यापि नाशप्र
सक्तिरित्याशंक्याह रागद्वेषेति विधेयात्मा किंकरीकृतमनास्तु
आत्मवश्यैर्मनोऽधीनैरिंद्रियैः स्वामिनश्चित्तस्य किंकरीकृतस्य का
मक्रोधहीनत्वात्स्वयमपि रागद्वेषविमुक्तैर्विषयान् पथि पतित
तृणादीनीवानास्थया चरन् पश्यन्नपि भुंजानस्तत्र कामायन्नुद॰
यात् प्रसादं संकल्पविकल्पपंकलेपप्रक्षालनेन मनसः स्वाच्छ्य
मधिगच्छति मनसः स्वाच्छ्यमेव प्रत्यगात्मनः स्वाच्छ्यं तस्य तद्गु
णसारत्वात् अजितमनस्कमिव जितमनस्कं विषयसंगो न बा
धतेऽतो मनोजयोऽवश्यं कर्तव्य इत्यर्थः ६४ ॥

रामकंदीटीका

आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छतीति आत्मवश्यैर्विधेयात्मा तु॰

आत्मवश्यैः स्वाधीनैः रागद्वेषाभ्यां विमुक्तै रहितैरिंद्रियैः श्रोत्रादिभिः
र्विषयान् शब्दादीननिषिद्धांश्चरन्नुपलभमानः प्रसादं चित्तस्य स्वछ
तां परमात्मसाक्षात्कारयोग्यतामधिगच्छति रागद्वेषप्रयुक्तानि हीं
द्रियाणि दोषहेतुस्तानि अपर्यंते मनसि स्ववशे तु न रागद्वेषौ तयो
रभावे च न तदधीनेंद्रियप्रवृत्तिः प्रारब्धवशाद्देहनिर्वाहाय विष
योपलंभो न दोषाय भवेत् निषिद्धाचारस्य रागाद्यधीनस्य प्राकल्पक
नयात्र स्वभाव एव तन्मतो न चलतीति भावः अतो किं व्रजे
तेत्यस्योत्तरमुक्तं ६४

जह्नमैवेजयन्तीटी॰ ॥

यस्माद्विषयाशक्तेंद्रियमना विषयान्ध्यायन् सन् विषयजन्यसं
गादिकबुद्धिनाशांतेभ्य उत्तरोत्तरपरिणामभूतेभ्योऽतिप्रबलत
रेभ्य षट्प्रकारदोषेभ्यः सकाशात्तस्मात्प्रणष्टो भवति तस्मा
न्मनःसाक्षिविषयासक्तिं विहाय रागादिरहितैरिंद्रियैर्यथेष्टं विष
यभोगान् कुर्वाणोऽप्येतैर्दोषैर्न नष्टो भवति किंतु मन्निष्ठभुद्धि
र्भवतीत्याह रागेतिद्वाभ्यां रागद्वेषविनिर्मुक्तैः शब्दः संगकामादिदो
षनिरसनपर्यायएवंभूतो भवति तेन विषयसंगादयो दोषा नाभिभ
वंतीत्यर्थः आत्मवश्यैर्मद्विषयेन मनसा वश्यानि वशीभूतानि
तथा तैः अत एव रागद्वेषवियुक्तैः इष्टेषु वस्तुनि रागोऽनिष्टे द्वेषस्ता
भ्यां सकाशाद्वियुक्ताः विगताः यो रागाद्येषां तेन तथा तैः रागद्वेषवि
वर्जितैरिंद्रियैर्विषयान् शब्दादीन् चरन् गच्छन् भक्तन् वा विषया
न् भुंजानः सन्नपीत्यर्थः विधेयात्मा स्ववशीभूतमनाः प्रसादं अं
तष्करणशुद्धिमधिगच्छति प्राप्नोति ६४ ॥

मधुसूदनी टीका ॥

६४ योऽस्य असमाहितचेताः सर्वाणींद्रियाणि निरुध्यापि रागद्वेषदुष्टेन म
घन् नसा विषयान् चिंतयन् पुरुषार्थाद्भ्रष्टो भवति विधेयात्मा तु शब्दः पू
र्वस्माद्व्यतिरेकार्थः वशीकृतांतःकरणस्तु आत्मवश्यैर्मनोधीनैः
स्वाधीनैरिति वा रागद्वेषाभ्यां वियुक्तैर्विरहितैरिंद्रियैः श्रोत्रादिभि
र्विषयान् शब्दादीनानिषिद्धांश्चरन्नुपलभमानः प्रसादं प्रसन्नतां

मनसि निग्रहीते तु बाह्ये
न्द्रियनिग्रहाभावेऽपि न दो
ष इति वदन् किं व्रजेतेत्य
स्योत्तरमाह प्रसाद ॥

गी॰ चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यतामधिगच्छति रागद्वेषप्र
टी॰ युक्तानींद्रियाणि दोषहेतुत्वेनोपपद्यंते मनसि स्ववशे तु न रागद्वे
द्वि॰ वनः षौ तयोरभावे तु तदधीनेंद्रियप्रवृत्तिः प्रवर्जनीयतया तु विषयोप
त लंभेन दोषमाहतीति न शुद्धिर्व्याघातं इति भावः एतेन विषया
न णां स्मरणमपि चेदनर्थकारणं कुतस्तर्हि भोगः तेन जीवनार्थं वि
षयान् भुंजानः कथमनर्थं न प्रतिपद्येतेति शंका निरस्ता स्वाधी
नैरिंद्रियैर्विषयान् प्राप्नोतीति चेत् किं व्रजेतेति प्रश्नस्योत्तरमुक्तं भव ति
ति ६४ ॥

सदानंदी टी॰ ॥

निगृहीते तु मनसि विनेंद्रियविनिग्रहं दोषो नेति वदन्नाह व्रजे
तेत्यस्योत्तरं १ वशीकृतमना यस्तु स्वाधीनैरिंद्रियैश्चरन् वि
युक्तैर्द्वेषरागाभ्यां शब्दादिविषयांस्तथा २ चित्तस्य स्वच्छतां ब्रह्म
साक्षात्त्वैकयोग्यतां समाप्नोति ततश्चित्तं निरोद्धव्यं प्रयत्नतः ३
६४ ॥

नीलकंठी टी॰ ॥

ननु विषयानध्यायतोपि योगिनो बुभुत्यानेप्रमाणस्वाभाव्यादिंद्रि
याणां विषयेषु संगोऽवश्यं विहरणं तच्चोकरीत्या तस्यापि नाशप्र
सक्तिरित्याशंक्याह रागद्वेषेति विधेयात्मा किंकरीकृतमनास्तु
आत्मवश्यैर्मनोऽधीनैरिंद्रियैः स्वामिनश्चित्तस्य किंकरीकृतस्य का
मक्रोधहीनत्वात्स्वयमपि रागद्वेषवियुक्तैर्विषयान् पथि पतित
तृणादीनीवानास्थया चरन् पश्यन्नपि भुंजानस्तत्र कामाद्यनुद
यात् प्रसादं संकल्पविकल्पकलेपप्रक्षालनेन मनसः स्वाच्छ्य
मधिगच्छति मनसः स्वाच्छ्यमेव प्रत्यगात्मनः स्वाच्छ्यं तस्य तद्गु
णसारत्वात् अजितमनस्कमिव जितमनस्कं विषयसंगो न बा
धतेऽतो मनोजयो विशेषतः कर्तव्य इत्यर्थः ६४ ॥

रामकंदी टीका

आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छतीति आत्मवश्यैर्विधेयात्मा तु॰

मान् विधेयः प्रत्यवमर्षविषयभूतत्वात्स्वाधीन आत्मा स्वभावो यस्य स तादृ
शः पुरुषः आत्मवश्यैस्तादृशस्य तस्यात्मनः स्वशक्तितया प्रतिपाद्यमान
त्वाद्विधेयैस्तदधीनप्रवृत्तिस्थितिसंहृतिभिरिंद्रियैर्वाह्याभ्यंतरैः करणैः किरणै
रिवार्कः पदार्थान्विषयांश्चरन्गच्छन्प्रसादं सत्वादिकलंकसंपर्काभावरूपं वै
शद्यमधिगच्छति प्रतिलभते अत एव कीदृशैरिंद्रियैर्विषयांश्चरन् रागद्वेष
विमुक्तैः रागद्वेषौ हि विषयमात्रध्यानसंप्रसक्तस्याविस्तृतस्यात्मनः प्रसोदित
यान्प्रतिप्रवर्तमानेष्विंद्रियेषु परिस्फुरतः यस्य तु सर्वतः परिपूर्णत्वान्नित्यनिर
भिलाषस्वरूपप्रत्यवमर्षपूर्वकः सर्वज्ञानक्रियाव्यवहारः तस्य रागद्वेषाभ्यां
विमुक्तानींद्रियाणि स्वस्वविषयमभिप्रवर्तंत इति तादृशैरिंद्रियैर्विषयांश्चरन्प्र
सादमधिगच्छतीत्युक्तं ६४

आनंदीटीका

इंद्रियवशीकारेगुणानाह विधेयो वश्यस्तु माहित आत्मान्तःकरणं यस्य प्र
सादं सत्वादिवांछारूपपंकसंपर्काभावं ६४ विषयध्यानसक्तस्याविस्तृतात्मनो विषयप्रवर्तेंद्रिये
षु रागद्वेषौ स्तः अनीदृशात्तु प्रकृतो रागद्वेषमुक्तैरिंद्रि

लासिकी [illegible] टीका यैरात्मवश्यैः

एवं सर्वानर्थमूलानामपि विषयाणां मुक्तोपभोगमोक्षकारणमिति स्वाधीनैः स्वभावतः सद्भिर्वि
वदान्किं वजेनेत्यस्योत्तरमाह यावदध्यायसमाप्ति प्रत्यवमर्षेन वश्यः षयानुपभुंजानः विधेया
त्मा विधेयः

प्रसादं आत्मा स्वस्वभावो यस्य सत्त्वादिसंपर्ककलंकाभावं प्राप्नोति + ६४ तदुक्तं शिवोपनिषदि
ग्राह्यग्राहकसंबन्धे सामान्ये सर्वदेहिनां योगिनां तु विशेषोऽयं संबन्धे सावधानतेति +

पंचोलीटीका

सर्वानर्थस्य मूले विषयाभिध्यानमुक्त्वा अथेदानीं मोक्षकारणमि
दमुच्यते रागद्वेषेति तु पुनः विधेयात्मा वश्यचित्तः रागद्वेषविमुक्तैः
रागद्वेषरहितैः आत्मवश्यैः आत्मना वशीकृतैः इंद्रियैः श्रोत्रादिभिः
अप्रार्थितान् विषयान् चरन् उपलभमानः प्रसादं स्वास्थ्यमधिगच्छ
ति ६४

रामावीस्वामिकृतटिप्पणी॥

रागद्वेषेति अयं भावः इदमादेनं दंतव्यं इति रागः अयं परकीयो वधयं
दंतव्य इति द्वेषस्ताभ्यां वर्द्धितैरपि तु आत्मवश्यैः स्वायत्तैरिंद्रियैः श्रवणा
दिभिर्विषयान्प्रतिपन्नभूतान्संमुखायातानपहार विषयीभूतान् चर
न् वध्यतया जानन् प्रसादं मोदकालुष्याभावं प्राप्नोति यतो विधेयात्मा

नियमितमनाः मनसोनियमनेहिसर्वाणींद्रियाणि नियमिता॰
निभवंतीति ६४॥

मधुभाष्य

६४॥

भाषा अनुवाद

जो कहो कि चिरकालसे विषयमें निमग्न स्वभाव कहे विषय में आसक्त इन्द्रियगणका विषयसे रोकना जो असाध्य अति कठिनहै तो पूर्व उक्त दोष निवारण कैसे हो सकेगा इससे स्थितप्रज्ञ होनाभी असंभव अति उर्घटहै इस शंका परक हतेहै कि राग कहे प्रीति और द्वेष जो विरोध तिनसे रहि तहोके अर्थात् इनको छोडके और अभिमान त्याग करि के सब इंद्रियोंके द्वारा विषयोंका भोग करनेसे भी शान्ति प्राप्ति होतीहै तो राग द्वेष रहित कैसे होय सो कहतेहै। कि मनके आधीन कहे वशीभूत सब इंद्रियेहै और इंद्रिय वशकारी मनको जो मनुष्य अपने वशकर राखेहै उसके फेरि और राग द्वेषादिक रहते नही इस कहनेसे अर्जुन की चौथी प्रश्न जो है कि स्थितप्रज्ञ कैसे गमन करैहै उस का उत्तर दिया कि स्वाधीन इंद्रियगण राखि विषयोंमे ग मन करै अर्थात् इंद्रीजितहो विषयभोग करै जिस हेतु आत्मवश इंद्रिय द्वारा विषय भोग करता हुआ आत्मा। सुखी रहताहै ६४ ॥

दोहा

रागद्वेषबिन विषयको इंद्रिय सों करे भोग इंद्रियमन बस
जाहिके सो प्रसादलहैं लोग ६४॥

398

प्रसादेसर्वदुःखानां हानिरस्योपजायते प्र
सन्नचेतसोह्याशु बुद्धिःपर्यवतिष्ठते ६५

शांकर भाष्यं ॥

प्रसादेसति किं स्यादित्युच्यते प्रसादइति प्रसादे सर्वदुःखा
नां आध्यात्मिकादीनां हानिर्विनाशोस्य यतेरुपजायते किं
च प्रसन्नचेतसः स्वच्छान्तःकरणस्य हि यस्मादाशु शीघ्रं
बुद्धिःपर्यवतिष्ठते आकाशमिव परि समन्तात् अवतिष्ठते
आत्मस्वरूपेणैव निश्चलीभवतीत्यर्थः एवं प्रसन्नचेतसोऽव
स्थितबुद्धेःकृतकृत्यता यतस्तस्माद्रागद्वेषवियुक्तैरिन्द्रियैः
शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तं समाचरेदिति वाक्यार्थः ६५

आनंदगिरिकृत टी०॥

तथापि नानाविधदुःखाभिभूतत्वान्न स्वास्थ्यमास्थातुं शक्य
मित्याशयेनपृच्छति प्रसादइति श्लोकार्द्धेनोत्तरमाह उच्य
तइति सर्वदुःखहान्याबुद्धिस्वास्थ्येपि प्रकृते प्रज्ञास्थैर्यं ।
कथं सिद्धमित्याशंक्याह प्रसन्नेति बुद्धिप्रसादस्यैवफला
न्तरमाह किंचेति तस्माद्बुद्धिप्रसादार्थं प्रयतितव्यमिति
शेषः श्लोकद्वयस्यातरोक्तमर्थमुक्त्वा तात्पर्यार्थमुपसंहर
ति एवमिति युक्तःसमाहितो विषयपारवश्यशून्यःसन्नि०
ति यावत् ६५ ॥

स्वामिकृत टीका ॥

प्रसादेसति किंस्यादित्यत्राह प्रसादइति प्रसादेसति सर्वदुः
खानांनाशः ततश्चप्रसन्नचेतसोबुद्धिः प्रतिष्ठिताभवतीत्य
र्थः ६५ ॥

पिशाचभाष्य टी०

प्रसादेसति किंस्यादित्यत्रोच्यते प्रसादेप्रसन्नतायांसत्यांस
र्वदुःखानामाध्यात्मिकाधिभौतिकाधिदैविकानांहानिर्नाशः
आध्यात्मिकानिजन्मजरामरणेनदंतरेपरिपतितवातपि०

गी॰
टी॰
हि॰

त्श्लेष्मसंक्षोभजनिताविकाराः आधिभौतिकानिभूतानामि
तरेतरंवध्यवधकभावेनजनितानिदुःखानिशास्त्रग्रह
णादीनिआधिदैविकानिवातातपवर्षतत्प्रतिबंधजनिता
निदुःखानिग्रहग्रहणादीनिआधिदैविकानिवातातपव
र्षतत्प्रतिबंधजनितानिदुःखानिएतेषामाध्यात्मिकादीनां
दुःखानांहानिर्नाशोऽस्ययोगिनःप्रजायते किंचप्रसन्नचे
तसःस्वस्थांतःकरणस्याशुशीघ्रंबुद्धिःपर्यवतिष्ठति आका
शमिवात्मैकत्वग्राहिणीपरितःसमंतादवतिष्ठते आत्मस्व
रूपेणैवनिश्चलाभवतीत्यर्थः ६५ ॥

रामानुजभाष्य टी॰

अस्यपुरुषस्यमनसःप्रसादेसतिप्रकृतिसंसर्गप्रयुक्तसर्वदुः
खानांहानिरुपजायतेप्रसन्नचेतसःआत्मावलोकनात्विवि
क्तदोषरहितंतदानीमेवहिविविक्तात्मविषयाबुद्धिर्मेऽपिप
र्यवतिष्ठतेअतोमनःप्रसादेसर्वदुःखहानिर्भवत्येव ६५ ॥

अभिनवगुप्तकृत टी॰ नास्ति

स्पष्टार्थम् ६५ ॥ ॥

परमार्थप्रपा टी॰

अथतेनकिंस्यादित्याह प्रसादइति अस्यपुरुषस्यप्रसादेजा
तेसतिसर्वदुःखानांहानिर्जायते एवंसर्वदुःखातिगत्वेनप्रस
न्नमनसःआशुशीघ्रंबुद्धिःपर्यवतिष्ठतिस्थिरानिश्चलाभवति
तदुक्तंविज्ञानामृतनिर्झरावनिरविस्वानंदपूर्णोदयेरूर्मिः
शाश्वतस्तुप्रसादसदनेभूतानुकंपाश्रयः निर्वाणामृतदीप्र
दीपकलिकावैरपभाग्पास्पंदंदधातीतपदावलंबरसिका
स्थानास्थितिस्तद्विदां ६५ ॥

वनमाली टी॰

प्रसादेसतिकिमित्यतआह प्रसादइति चित्तस्यप्रसादेस्वच्छत्व
रूपेसतिसर्वदुःखानामाध्यात्मिकादीनांहानिर्नाशोऽस्योपजा
यतेहियतःप्रसन्नचेतसोऽपत्तेराशुशीघ्रमेव बुद्धिरनंतसद्गुण

लयेमय्येवपर्यवतिष्ठते स्थिराभवति प्रसादेसतिमय्येवबुद्धिप
र्यवस्थानेनततोमदापरोक्ष्यंततोमत्तमहाप्रसादस्ततोविद्या
निवृत्तिस्ततःसर्वदुःखनाशपूर्वकपरमानंदावाप्तिरूपोमो
क्षइतिभावः ६५ ॥

उत्कर्षवैजयन्ती टी॰ ॥

प्रसादादपिकिंफलंभवतीत्यपेक्षायामाह प्रसादइति ब्रह्म
ज्ञाननिष्ठस्ययोगिनोविषयमलरहितस्यचित्तस्यप्रसादेशु
द्धेसतिसर्वदुःखानांप्राकृतदेहादिसंबंधजनितानांसर्वेषां
दुःखानांहानिर्विनाशःउपजायतेभवति मनसएवप्रसा॰
देकुतोदुःखहानिरित्यत्राह हियस्मात्प्रसन्नचेतसोनिर्मल
चित्तस्यपुरुषस्यबुद्धिरात्मदर्शनविषयासतीपर्यवतिष्ठते
सर्वेश्वरेमय्येवनिश्चलातिष्ठति तस्मान्मनःप्रसादएवदुःखहा
निर्भवति नन्वितरेषामिंद्रियाणांनिर्मलत्वेयतस्तेषामपि
मनसःशुद्धिद्वारेवशुद्धिर्भवतीत्यभिप्रायः मनएवमनुष्या
णांकारणंबन्धमोक्षयोःबंधनेविषयासक्तमुक्तंनिर्विषयं
स्मृतमितिवचनमप्यत्रसंधेयं ६५ ॥

प्रसादमधिगच्छतीत्युक्तंतत्र
प्रसादेसतिकिंस्यादित्युच्य
ते ॥

मधुसूदनी टी॰

चित्तस्यप्रसादेस्वच्छत्वरूपेसतिसर्वदुःखानामाध्यात्मिकादी
नामज्ञानविलसितानांहानिर्विनाशोऽस्ययतेरुपजायते
हियस्मात्प्रसन्नचेतसोयतेराशुशीघ्रमेवबुद्धिर्ब्रह्मात्मैका
कारापर्यवतिष्ठते परितःसमंतादवतिष्ठतेस्थिराभवति
विपरीतभावनादिप्रतिबंधाभावात् ततश्चप्रसादेसतिबुद्धि
पर्यवस्थानेनतत्त्वज्ञानेनाज्ञाननिवृत्तिः ततस्तत्कार्यसकल
दुःखहानिरितिक्रमेणापिप्रसादेयत्नाधिकायसर्वदुःखहा
निकरत्वकथनमितिनविरोधः [illegible]
[illegible] ६५ ॥

सदानंदी टी॰ ॥

चित्तस्यस्वच्छतायांत्वभ्रांतिज्ञानेकजन्मनो ह्याध्यात्मिकादिदुः

गी॰ खानांसर्वेषांजायतेक्षयः १ यस्माच्छीघ्रंयतेतस्यप्रसन्नमनसो
टी॰ मतिः ब्रह्मात्मैक्यस्वरूपाकारासमंतादवतिष्ठते २ अतःसर्व
द्वि॰ प्रयत्नेनमुमुक्षुर्मत्परायणः वशीकृत्यमनःस्वीयंतिष्ठेद्ब्रह्म
हृदयेमयि ३ ६५ ॥

नीलकंठी टीका ॥

किंच चित्तस्यप्रसादेहिअस्यपुंसःसर्वदुःखानांकाममूलकानां कामाभावात्हानिःपरिहारोजायते कामानुदयेहेतुमाह प्रसन्नेति हियस्मात्प्रसन्नचेतसःपुंसोबुद्धिर्ब्रह्मात्मैकानि॰ श्चयः आशुशीघ्रंपर्यवतिष्ठतेदृढाभवति तस्मिंश्चसतिप्रा प्याभावान्नकामोदयइत्यर्थः ६५ ॥

आनंदी टीका

एवंप्रसादेप्राप्तेसति अस्यपुंसःसर्वेषांदुःखानामाध्यात्मिकादी नांहानिःक्षयउपजायतेहियस्मात्प्रसन्नचेतसोबुद्धिराशुपर्यव तिष्ठतेपरितोव्याप्नोति ६५ ॥

रामकंठी टीका

एवंविधेचनिसर्गनिर्मलस्वरूपाभिव्यक्तिलक्षणेप्रसादेसति रा गादिक्लेशनिबन्धनानांसर्वेषामध्यात्मिकादिदुःखविकारभौति कानांदुःखानांहानिःपरिक्षयोऽस्यपुंसउपजायते यतोयथोक्त क्रमेणप्रसन्नेनीरागद्वेषकलंकचेतोयस्यतादृशस्यपुंसआशु प्रसादसमनन्तरमेवबुद्धिःप्रज्ञापर्यवतिष्ठते परितःसमंता त्सत्यस्वात्मनिनिर्विकल्पांप्रतिष्ठांलभते यतएवंतस्मात्कारणा द्यस्यमुमुक्षुकस्यसर्वतःसर्वेभ्यःस्वविहितेभ्योदुःखहेतुभ्यश्चेंद्रि॰ यार्थेभ्योविषयेभ्योदुःखहेतुभ्योद्वेषविरहितत्वेन स्वविहित ष्वपिनीरागतयाप्रसक्तान्येवनिगृहीतानिनियमितानिबाह्या भ्यन्तराणीन्द्रियाणितस्यतथाविधस्यप्रत्यासन्नपरमेश्वरसायु ज्यस्यप्रज्ञाबुद्धिःप्रतिष्ठास्वात्मनिलब्धस्थितिः ततस्मादयःप्रत त्नप्रयत्नलक्षणःसमाधिनिरुद्धान्यनुपहतरागद्वेषमयमल त्वात्सहजानिकार्यकराण्येवनिगृहीतानीन्द्रियाणिमन्येत अ तएवंसमस्तसंसारविरुद्धविलक्षणंप्रबुद्धस्यहृत्प्रतिपाद॰

यित्वमाह ६५ ॥

लासिकी [illegible] टीका

प्रसादेसति किंस्यादित्यतआह प्रसादेइति प्रसादेस्त्वादिले
पाभावेसति निर्विरलंवामतिर्णं प्रत्यगात्मनिपर्यवतिष्ठते ६५ लभू

सर्वेषांत्रिविधानांदुःखानांहानिःनाशो स्यउपजायते प्रसन्नचेतसोऽलिंतःकर
णस्याशुबुद्धिर्निश्चयात्मिकाप्रत्यगा **पचोलीटीका** त्मनिपर्यवतिष्ठते

प्रसादेसतिकिंस्यादित्याह प्रसादइति प्रसादेचेतसःअस्यय
तेदुःखानांआध्यात्मिकादीनांहानिर्विनाशउपजायते किंच
हियस्मात्प्रसन्नचेतसःस्वच्छांतःकरणस्यबुद्धिर्विवेकजाप्र
ज्ञाआशुशीघ्रंपर्यवतिष्ठतेआत्मस्वरूपेणेवानिश्चलीभवति ६५

रामवीरसिंहोयिनी॥

प्रसादफलमाह प्रसादेइति निगदव्याख्यातमेतत्॥ ६५॥

मधुभाष्य॥

६५॥

399

भाषा अनुवाद

इस प्रकार शांति प्राप्त होने पर फिरि क्या होताहै सो कहतेहै कि शांति लाभ होनेसे सब दुःख नाशहो जातेहैं फेरि इस शान्त चित्त पुरुषके सुन्दर बुद्धि स्थिर होती है ६५ ॥

दोहा

भय प्रसन्न यहजीवकेदुखहोतहैनाश चितप्रसन्नके
होतहिं सिघ्रबुद्धि दृढ वाश ६५

नास्तिबुद्धिरयुक्तस्य नचायुक्तस्यभावना
नचाभावयतःशान्ति रशांतस्यकुतःसुखं ६६

शांकरभाष्यं टी॰

सेयंप्रसन्नता स्तूयते नास्तीति नास्ति नविद्यते नभवतीत्यर्थः
बुद्धिरात्मस्वरूपविषया अयुक्तस्यासमाहितान्तःकरणस्य
नचायुक्तस्येति नचास्य अयुक्तस्यभावना आत्मज्ञानाभिनि-
वेशः तथाच नास्त्यभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः
शांतिरुपशमोनविद्यते अशांतस्यकुतःसुखं इंद्रियाणांहि
विषयसेवातृष्णातो निवृत्तिर्यातत्सुखं नविषयविषयातृ
ष्णादुःखमेव हि सा न तृष्णायांसत्यां सुखस्यगन्धमात्रमपि
उपपद्यतइत्यर्थः ६६ ॥

आनंदगिरिकृतटीका ॥

किंपुनःसत्वशुद्ध्यैव यथोक्तबुद्धिःसिध्यति नेत्याह सेयमि
ति असमाहितस्यापि बुद्धिमात्रमुत्पद्यमाने प्रतिभातीत्याशं
क्य विशिनष्टि आत्मस्वरूपेति नहि विक्षिप्तचित्तस्यात्मस्वरू
पविषया बुद्धिरुदेतुमर्हतीत्यत्र हेतुमाह नचेति आत्मज्ञाने
शास्त्राचार्यतोजाते सततसंतानानुकरणं साक्षात्कारार्थम
भिनिवेशोभावनेतिचोच्यते नचासौ विक्षिप्तबुद्धेःसिध्यती
मा ति हेत्वर्थं विवृणोति आत्मज्ञानेति भावनाद्वारासाक्षात्
काराभावेपिकाक्षतिरित्याशंक्याह नचेति असमाहितस्य
भावनाभावादितियावत् आत्मन्यापाततोज्ञाने श्रवणाद्या
वृत्तिरूपं सततमननं तन्वानोस्यापरोक्षबुद्ध्यभावेनानर्थनि
वृत्तिःसिद्धतीत्याह उपशमइति अनिवृत्तानर्थस्य परमान
न्दसागराद्विभक्तस्य संसारवारिधौनिमग्नस्य सुखाविर्भावो
नसंभवतीत्याह अशान्तस्येति तथापि विषयसेविनोवैष
यिकंसुखं संभवतीत्याशंक्याह इंद्रियाणांहीति तस्माद्
यस्य शास्त्रप्रसिद्धमानुभविकञ्च सुखत्वमिति वक्तुंहिशा

गी॰ टी॰ द्वि॰

हः विषयसेवान्तस्यापि विषयोपभोगद्वारा सुखमुपलब्ध-
मित्याशंक्याह दुःखमेवेति तत्रापिहि शब्दोऽनुभवावद्योतीति न ३४
देव स्पष्टयति नेत्यादिना ६६ ॥

स्वामिकृत टी॰

इंद्रियनिग्रहस्यास्थितप्रज्ञतासाधनत्वंव्यतिरेकमुखेनोपपाद-
यति नास्तीति अयुक्तस्यावशीकृतेंद्रियस्यनास्तिबुद्धिःशास्त्रा
चार्योपदेशाभ्यामात्मविषयाबुद्धिःप्रज्ञैव नोत्पद्यतेऽतस्तस्याः
प्रतिष्ठिततावार्त्ताऽतइत्यत्रआह नचायुक्तस्यभावनाध्यानं
भावनयाहिबुद्धेरात्मनिप्रतिष्ठाभवति सचायुक्तस्ययतोना
स्ति नचाभावयतःआत्मध्यानमकुर्वतःशांतिरात्मनिचित्तो
परतिःअशांतस्यचकुतःसुखंमोक्षानंदइत्यर्थः ६६ ॥

पिशाचभाष्ये टी॰

नास्तिबुद्धिरयुक्तस्येति नविद्यतेसंयमसत्त्वाबुद्धिरात्मस्वरूप
विषयाअयुक्तस्यअसमाहितस्य नचायुक्तस्यभावनाआत्मज्ञा
नाभिनिवेशोभावना नचाभावयतःशांतिःअभावयतःआ
त्मज्ञानाभिनिवेशशून्यस्यशांतिरुपशमोनविद्यते अशांत-
स्यानुपरतेंद्रियस्यकुतःसुखं इंद्रियाणांविषयतृष्णातोनिवृ
त्तिस्सुखंनतु तृष्णासादुःखमेवहितृष्णायांसत्यांनसुखस्य
गंधमात्रमप्युपपद्यते ६६ ॥

रामानुजभाष्ये टी॰

मयिसन्यस्तमनोरहितस्यप्रयत्नेनेंद्रियदमनेप्रवृत्तस्यक
दाचिदपिविविक्तात्मविषयाबुद्धिर्नभवति अतएवतस्यतद्भा
वनानसंभवति विविक्तात्मानमभावयतोविषयस्पृहाशां
तिर्नभवति अशांतस्यविषयस्पृहायुक्तस्यकुतोनित्यनिरति
शयसुखप्राप्तिः ६६ ॥

अभिनवगुप्तकृत टी॰ नास्ति
स्पष्टार्थम् ६६ ॥

परमार्थप्रपा टी॰

इंद्रियनिग्रहस्यास्थितप्रज्ञतासाधनत्वंव्यतिरेकमुखेनोपपाद
यति नास्तिबुद्धिरिति अयुक्तस्यावशीकृतेंद्रियस्यबुद्धिर्नी॰
त्ययेतेच परेनयाबुध्याअयुक्तस्यभावनाआत्मभावनापिनास्ति
तथाअभावयतः ब्रह्मभावनावर्जितस्यसुखमात्मसुखेनास्ती
त्यर्थः ६६ ॥

वनमाली टी॰

उक्तमेवार्थंव्यतिरेकमुखेनद्रढयति नास्तीति अयुक्तस्याजित
चित्तस्यबुद्धिर्ब्रह्मापरोक्षंनभवति नतुथानादेवब्रह्मपरोक्षंस्या
न्नत्वाह॰ायुक्तस्येति चित्तैकाग्रतारहितस्यभावनाध्यान
मपितस्यादेव नचाभावयतोभावनारहितस्यशांतिर्मन्निष्ठा अ
शांतस्यमटनिष्ठस्यसुखंवैकुंठवासेभिन्नेमात्तरूपंकुतः ६६ ॥

जत्तमवैजयन्ती टी॰

नतुफलमूलादिभोजनोपवासगिरिगह्वराभ्यंतरादिजनशून्य
देशनिवसनादिभिरनेकसाधनकदंबैरिंद्रियविजयेकृतेसति
मनःस्वयमेवनिर्विषयंभवति किमर्थंतस्यशुद्धयेत्वयिभग
वतियुक्तत्वमित्याशंकायामाह नास्तीति अयुक्तस्यअपिनयु
क्तमनसःपुरुषस्यबुद्धिरात्मस्वरूपदर्शनविषयानास्तिनभ
वतिअपुनरयुक्तस्य आत्मबुद्धियुक्तरहितस्यतस्यभावनाआ
त्मविषयाचिंतानभवति अभावयतआत्मचिंतारहितस्यशा
न्तिस्तुविषयेभ्यउपरतिस्तुनभवति अशान्तस्यविषयोपराम
रहितस्य सुखंप्रकृतिसंबन्धध्वंसपूर्वकमात्मस्वरूपलाभा
नन्तरंमत्सान्निध्यानंदलक्षणंमोक्षःकुतोभवति नकुतश्चि
दपीत्यर्थः तस्मान्मत्स्वरूपयुक्तेनैवमनसेंद्रियाणिनिर्विष
याणिभवंति नान्यैःसाधनैः यदिकेवलैर्यमनियमादिसाध
नबलैरिंद्रियविजयाययोगीप्रवर्तते तर्हि ऋषिशृंगसौभर्या
दिवत्स्वयमेवेंद्रियैःपराजितोभवतीत्यभिप्रायः ६६ ॥

+ इममेवार्थंव्यतिरेकमुखेनद्रढयति + मधुसूदनी टी॰

+ अयुक्तस्याजितचित्तस्यबुद्धिरात्मविषयाश्रवणमननाख्यावेदां

गी. नविचारजन्या नास्ति नोत्पद्यते तद्बुद्ध्यभावेन चायुक्तस्य भाव
टी. नानिदिध्यासनात्मिका विजातीयप्रत्ययानंतरसजातीयप्रवाह
द्वि. प्रत्ययवाहरूपा सर्वत्र नञो नास्तीत्यनेनान्वयः न चाभावयत
श्चात्मानं शांतिः सकार्याविद्यानिवृत्तिरूपा वेदांतवाक्यजन्याब्र
ह्मात्मैक्यसाक्षात्कृतिः अशांतस्यात्मसाक्षात्कारशून्यस्य कुतः
सुखं मोक्षानंद इत्यर्थः [illegible]
६६ ॥

सदानंदी टीका

व्यतिरेकमुखेनेमं दृढयत्यर्थमीश्वरः युक्तोऽजितचित्तस्य बुद्धि
र्वेदांतवाक्यजा १ नोत्पद्यते स्य तद्बुद्ध्यभावेनास्यैव भावना
निदिध्यासनरूपायाः शांतिहेतुः स्थिरात्मिका २ निदिध्यासन
शून्यस्य नास्त्यविद्यापरिक्षयः साक्षात्कारः परात्मैक्यतत्त्वसा
नंदकारणं ३ तत्साक्षात्कारशून्यस्य मोक्षानंदकुतो भवेत्
अतश्चित्तनियम्यास्तु यतः स्वानंदसिद्धये ४ ६६ ॥

नीलकंठी टीका

समनस्कानामिंद्रियाणामनिग्रहे दोषउक्तः बुद्धेरपर्यवस्था
नेको दोष इत्यत आह नास्तीति अयुक्तस्य श्रवणमननयोरना
सक्तस्य बुद्धिर्ब्रह्मात्मैक्यनिश्चयो नास्ति प्रमाणविषयासंभा
वनायाः प्रमेयविषयासंभावनायाश्चानिरासात् तथा अयुक्त
स्य असमाहितमनसः भावना ब्रह्माकारांतःकरणवृत्तिप्रवा
हो नास्ति मनसश्चांचल्येन बुद्धेरपि चांचल्यात् अभावयतो ध्या
नमकुर्वतः शांतिः सर्वदुःखोपरमश्च नास्ति चेतसोऽनवस्थित
त्वेन दुःखावश्यंभावात् अशांतस्यानुपरतसर्वदुःखस्य सुखं
प्रत्यगद्वयानंदात्मकं कुतः न कुतश्चित् दुःखित्वादेव आद्यं अ
युक्तस्येति पदं युजिर्योगे इत्यस्य रूपं द्वितीयं युज समाधावित्य
स्मा स्य तद्बुद्धेः पर्यवस्थानमावश्यकं ६६ ॥

आनंदी टीका

अयुक्तस्य योगाभ्यासहीनस्य ज्ञानकर्मसमुच्चययुक्तिहीनस्य
च बुद्धिः स्वरूपबोधसम्यग्ज्ञानेनास्ति न जायते एवमयुक्त
स्य भावना श्रद्धाफलावरूपं भावनिश्चयो नोत्पद्यते अभावय
तः अश्रद्दधतः शांतिर्विषयोपरतिर्नास्ति अशांतस्य विषयाभि
लाषिणः कुतः सुखम् ६६ ॥

रामकंदी टीका

अयुक्तस्यासमाहितस्य निश्चयात्मा नमतिरस्ति स्पष्टोर्थः ६६ ॥ अयुक्तस्य भावनात्मविषयं ध्यानं च नास्ति अभावयतो भावनामकुर्वतः शांतिश्चित्तोपरतिर्न अशान्तस्य अनुपरतचित्तस्य कुतः सुखं मोक्षानंदरूपमर्थः ॥

लालसिंघी टीका

बोधवतोपि अन्यवमशो हीनस्य तत्त्वार्थभावव्यतिरेकेना
ह नेति बुद्धिरात्मनिश्चयात्मिका नास्ति अभावं प्राप्नोति ६६

पंचोलीटीका

अयुक्तस्य योगरहितस्य बुद्धिः आत्मस्वरूपविषया नास्ति च पु
नः अयुक्तस्यासमाहितचित्तस्य भावना आत्मज्ञानाभिरुचि
र्नास्ति च पुनः अभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः
शांतिर्न भवति अशांतस्य उपशमरहितस्य सुखं कुतः त्रि
लोक्यां सत्यां संन्याससुखस्य गंधमात्रमपि नोपपद्यते इत्य
र्थः ६६

रसावीरसमिद्धोथिनी॥

नास्तीति युक्तात्मा देहादिनादेहना स्वधर्मोपन्नमनसः प्र
च्यवने ततस्तस्यात्मा तेन योगइति सिद्धं तेन ततश्चत इदि
तस्य बुद्धिकलं तु तामास्ति न स्थिरी भवति भावनास्मृति
श्च नास्ति अप्रसन्नेश्योपणामाभावः अशांतस्य च सुखं नास्ति
संपाद्याविष्टत्वेन दोलायमानत्वात् ६६॥

मधुभाष्य ॥

६६॥

भाषा अनुवाद

इंद्रियों का निग्रह कहे काबू रखना जो स्थित प्रज्ञ पुरुष
का साधन सो विपरीत कहे उलटी रीतिसे कहतेहै कि
अवशीकृत इंद्रिय मनुष्यके शास्त्र और आचार्यके उपदे
श से आत्मज्ञान होनेके योग्य बुद्धि उत्पन्न नही होतीहै
तो स्थितप्रज्ञ होना दूरबातहै इहां भावना का अर्थ ध्या
नहै सो ध्यानके द्वारा बुद्धि आत्मा मे प्रतिष्ठित कहे स्थि
त होतीहै परन्तु जो इंद्रियगण वशन करि सकै उस
को यह ध्यान कहांहै इसीसे वह आत्माके ध्यानका अन
धिकारीहै तो फिर उसको शांति नही होती अर्थात् (
आत्मामे चित्तयुक्त नही होता और अशांत पुरुष को
सुख कहे परम आनंद कहांसे होसके गा ६६ ॥

दोहा

योगयुक्त बिन बुद्धि नहिं स्मृतियुक्त बिन नाहि स्मृतिरहित
शांति नहि रहित शांति सुख काहि ६६॥

इंद्रियाणांहिचरतां यन्मनोऽनुविधीयते त
दस्यहरतिप्रज्ञां वायुर्नावमिवांभसि ६७ ॥

शांकरभाष्यटी॰

अयुक्तस्यकस्माद्बुद्धिर्नास्तीत्युच्यते इंद्रियाणामिति इंद्रि॰
याणांहि यस्माच्चरतांस्वविषयेषु प्रवर्तमानानां यन्मनो
ऽनुविधीयते अनुप्रवर्तते तदिंद्रियविषयविकल्पनेनप्रवृ
त्तंमनोऽस्य यतेर्हरति प्रज्ञामात्मनात्मविवेकजां नाशयति
कथं वायुर्नावमिवांभस्युदके जिगमिषतां मार्गादुद्धृत्यो
न्मार्गे यथावायुर्नावं प्रवर्तयत्येवमात्मविषयां प्रज्ञांहृत्वा
मनोविषयां कल्पनांकरोति ६७ ॥

आनंदगिरिकृतटी॰ ॥

आकांक्षाद्वारा श्लोकांतरमुत्थापयति अयुक्तस्येति विहि
तप्रचेतसो भावनाभावे साक्षात्कारलक्षणाबुद्धिर्नभवतीति
हेत्वन्तरेणसाधयति इंद्रियाणामिति यत्पदोपात्तं मनस्त
त्पदेनापिदृश्यते इंद्रियाणांश्रोत्रादीनां विषयःशब्दादयस्ते
षांविकल्पनं मिथ्याविभज्यग्रहणं तेनेतियावत् दृष्टान्तव्या
करोति उदकइति यस्मात्तस्मादयुक्तस्य नोत्पद्यते बुद्धिरि
तियोजना ६७ ॥

स्वामिकृतटीका ॥

नास्तिबुद्धिरयुक्तस्येत्यत्रहेतुमाह इंद्रियाणामिति इंद्रिया
णामवशीकृतानांस्वैरंविषयेषुचरतांमध्येयदेवैकमिंद्रि
यंमनः अनुविधीयते अवशीकृतंसत्इंद्रियेणसहगच्छति
तदेवेंद्रियमस्यमनसःपुरुषस्यवाप्रज्ञांबुद्धिंहरतिविषय
विक्षिप्तांकरोति किमुतवक्तव्यंबहूनिप्रज्ञांहरंतीतियथा
प्रमत्तस्यकर्णधारस्यनावंवायुःसमुद्रेसर्वतःपरिभ्रमयति
तद्वत् ६७ ॥ ६७ ॥ ६७ ॥

गी·
टी·
द्वि·

405

पिशाचभाष्यं टी·

अन्तुपरेनेंद्रियस्यतस्मात्तोनिवृत्तिस्तुवेनास्तिकस्मादित्यत्राह
इंद्रियाणांहियस्माच्चरतांविषयेषुवर्तमानानांयन्मनोनुवि
धीयते अनुवर्ततेतदस्यहरतिप्रज्ञांहरतितदिंद्रियविष
यविकल्पनेप्रवृत्तंमनः अस्ययतेर्हरतिप्रज्ञांआत्मानात्मवि
वेकजांवायुर्नावमिवांभसि उदकेजिगमिषतांमार्गादुद्धृ
त्यउन्मार्गेयथावायुर्नावंप्रवर्तयति एवमात्मविषयांप्रज्ञां
इंद्रियाणुविधायिमनोविषयाभिमुखींकरोति ६७ ॥

रामानुजभाष्यं टी·

पुनरप्युक्तेनप्रकारेणेंद्रियनियमनमकुर्वतोनर्थमाह इं
द्रियाणांविषयेषुचरतांविषयेषुवर्तमानानांवर्तमनुयन्म
नोनुविधीयते पुरुषेणानुवर्त्यते तन्मनोस्यविविक्तात्मप्रव
प्रवां णवतींहरति विषयप्रवणांकरोतीत्यर्थः यथांभसिना
यमानांनावंप्रतिकूलोवायुर्हरति ६७ ॥

अभिनवगुप्तकृत टी· नास्ति

~~[illegible]~~ ६७ ॥

परमार्थप्रपा टी· ॥

अथनास्तिबुद्धिरयुक्तस्येत्यत्रहेतुमाह इंद्रियाणामिति वि
षयेषुस्वैरंचरतामिंद्रियाणांमध्येएकमिंद्रियंयन्मनः अनुतदनु
गतमेवविधीयतेप्रेर्यते तदस्यपुरुषस्यप्रज्ञांहरति तथाचैक
स्यमनसःसंयमेकृतेसर्वेषांसंयमः कृतएवस्यादित्यर्थः अथ
प्रज्ञाहरणेदृष्टांतमाह वायुरिति अस्मावधानकार्योधाराधि
ष्ठितांनावंवायुर्यथेतस्ततोभ्रामयतितद्वत् ६७ ॥

वनमाली टी·

नन्वयुक्तस्यकुतोनश्रवणादितस्ताहृगबुद्धिरित्यतआह इंद्रि
याणामितिचरतांविषयेषुवर्तमानानामवशीकृतानामिंद्रि
याणांमध्येयदेकमपींद्रियमनुलक्षीकृत्यमनोविधीयतेप्रव

र्तते कर्मकर्तरि लकारः तदिंद्रियमपि मनसाऽनुहृतम् अ-
स्यायुक्तस्य प्रज्ञां ब्रह्मविषयकं प्रत्ययं हरति अपनयति यदे-
कमपींद्रियं प्रज्ञां हरति तदा सर्वाणि हरंतीति किमु वक्तव्य-
मस्मिन्विपरीतो वायुर्नावमिव ६७ ॥

ऊभमवैजयन्ती टी॰

वर्ति॰

यदि योगिनो मनो बाह्येंद्रियाणामनुभवति तर्हि तस्य महान-
नर्थो भवतीत्याह इंद्रियाणामिति विषयेषु चरतां गच्छतामिं-
द्रियाणां श्रोत्रादीनां वागादीनां च अनुयच्छति येनान्मतेन योगि-
नाऽनुरुध्येण यन्मनो विधीयते वत्स्यते तन्मनः अस्यानुरुध्यस्य प्र-
ज्ञामात्मविषयां बुद्धिं हरति विषयेषु आकर्षतीत्यर्थः दृष्टांतः य-
था मदिरामत्तस्यासावधानस्य कर्णधारस्य अम्भसि महार्णवे
स्वकीयमार्गे गच्छन्तीं नावं वायुः स्वत्यन्तिहृलो महान्वातो हर-
ति इतस्ततो भ्रमयति तद्वन्नानाविषयेषु [illegible] मनो बुद्धीभ्र-
म[illegible]तीत्यर्थः ६७ ॥

+ अयुक्तस्य कुतो नास्ति बुद्धिरित्यत आह +

मधुसूदनी टी॰

+ चरतां स्वविषये वर्तमानानामवशीकृतानामिंद्रियाणां मध्ये
यदेकमपींद्रियमनुलक्ष्यीकृत्य मनो विधीयते प्रेर्यते प्रवर्तते इ-
ति यावत् कर्मकर्तरि लकारः तदिंद्रियमेकमपि मनसाऽनुसृ-
तमस्य साधकस्य मनसो वा प्रज्ञामात्मविषयां शास्त्रीयां हरति
अपनयति मनसस्तद्विषयाविष्टत्वात् यदेकमपींद्रियं प्रज्ञां
हरति तदा सर्वाणि हरंतीति किमु वक्तव्यमित्यर्थः दृष्टान्त-
स्तु स्पष्टः अम्भसीव वायोर्नौकाहरणसामर्थ्यं न भवतीति सूच-
यितुमम्भसीत्युक्तं एवं दार्ष्टान्तिके अम्भःस्थानीये मनः चाञ्च-
ल्ये सत्येव प्रज्ञाहरणसामर्थ्यमिंद्रियस्य न तु भूस्थानीये मनः
स्थैर्ये इति सूचितं [illegible] ६७ ॥

सदानंदी टी॰ ॥

अयुक्तस्य कुतो नास्ति बुद्धिरित्यत्र उच्यते स्वैरं प्रवर्तमानानां-

गी॰ टी॰ द्वि॰

इंद्रियाणांप्रमाथिनां १ विषयेषुचरतांमध्येयद्येकमपिहींद्रि
यं मनोनुलक्षीकृत्यैवसाधकस्यप्रवर्तते २ मनसानुमतं
तत्प्रज्ञामात्मैकगोचरां साधकस्यापनयतिशास्त्रीयांविष
याहृतं ३ यद्येकमपितांप्रज्ञांविद्रुधाहरंतीद्रियं किंतुवा
च्यंतदासर्वाणींद्रियाणिहरंतीतिता ४ नौकाहरणसामर्थ्य
मंभस्येवनतुस्थिलेतो वायोस्तथेंद्रियस्यापिवांचल्येमनसः
सति ५ प्रज्ञाहरणसामर्थ्यंमनःस्थैर्येंनास्यतत् इतिसूच यि॰
यितुंप्रोक्तमंभसीतिपदेत्विह ६ ६७ ॥

नीलकंठी टी॰ ॥

तदभावेदोषमाह इंद्रियाणांहीति हियस्मातइंद्रियाणांच
रतांस्वस्वविषयेप्रवर्तमानानां कर्मणिषष्ठी यत्रागादिक
लुषितंमनः तान्यनुलक्षीकृत्यविधीयतेप्रवर्त्यते कर्मक
र्तेरिलकारःप्रवर्ततइत्यर्थः ततइंद्रियानुसारिमनः अ
स्यसाधकस्यप्रज्ञामात्मतत्वविषयांबुद्धिंहरति तस्यामनो
नुसारित्वात् दृष्टांतःस्पष्टार्थः अन्येतुइंद्रियाणांमध्येयदिं
द्रियमनुलक्षीकृत्यमनःप्रवर्ततेतदिंद्रियंअस्यसाधकस्य
मनसोवाप्रज्ञांहरतीतियोजयंति आत्मविषयांप्रज्ञांहृत्वा
मनोविषयविषयांकरोतीतिभाष्यमप्यालोचनीयं ६७ ॥

आनंदी टीका

एतत्सर्वमुपसंहरति ६७ ॥

रामकंठी स्पोटी॰

स्पष्टोर्थः ६७

लासिकी टी॰ कर्मभूतंमनआत्ममननात्मकमनुविधीय

इंद्रियाणां अत्रहेतुमाह विषयेषुस्वैरंविहरतांमध्येयदेकमिंद्रियंतेनु
करोति स्वस्वरूपंत्यक्त्वा तन्मात्रस्वरूपविषयविमर्शात्मकतांग
+मस्य च्छति तदेवेंद्रियंपुरुषस्यआत्मनिश्चयरूपतांबुद्धिंहरति वि
षयवित्तिमांकरोति ६७ ॥ किंपुनःकथंबहूनिप्रज्ञांहरन्तीति यथाप्रम
त्तस्यकर्णधारस्यनावंवायुःसमुद्रेपरिभ्रामयतितद्वत् ॥

पंचोलीटीका

अयुक्तस्य कस्मात् बुद्धिर्नास्तीत्याह इंद्रियाणांहीति हियस्मात् यन्मनः इंद्रियाणां चरतां स्वविषयेषु प्रवर्तमानानाम् अनुविधीयते अवशीकृतं सत् इंद्रियैः सह गच्छति तन्मनः अस्ययते इंद्रियविषयविकल्पनप्रवृत्तं सत् प्रज्ञाम् आत्मानात्मविवेकज्ञां हरति क इव वायुरिव यथा वायुः अंभसि उदके जिगमिषतान् मार्गाद् उद्धृत्य उन्मार्गे नावं प्रवर्तयति एवम् आत्मविषयां प्रज्ञां हृत्वा मनो विषयां करोति ६७

रणवीरसमिद्धोपिनी॥

अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्यत्र हेतुमाह इंद्रियाणामिति चरतां स्वस्वविषये प्रवर्तमानानामिंद्रियाणां चक्षुरादीनां यन्मनोनुविधीयते अनुप्रवर्तते तदिंद्रियविषयसंकल्पनेन प्रवृत्तं मनो स्यायुक्तस्य कर्मयोगिनः प्रज्ञां प्रारभ्यमाणेऽर्थे निश्चयात्मिकां हरति अन्यविषयां करोति कथं वायुर्नावमिवोदके जले जिगमिषतो मार्गाद् उद्धृत्योन्मार्गे यथा वायुः प्रवर्तयत्येवं प्रारभ्यमाणविषयां बुद्धिं हृत्वा मनो विपरीतविषयां करोति तस्मान्मनोनियमनमेव कार्यं यथा स्वार्थान्न प्रच्यवेतेति तात्पर्यम् ६७॥

मधुभाष्य

इंद्रियाणामिति अनुविधीयते क्रियते नन्वीश्वरेणेंद्रियाणाम तु बुद्धिज्ञानमिति वक्ष्यमाणत्वात् प्रज्ञां प्रज्ञानं उत्पन्नाद् अपि निवारयतीत्यर्थः उत्पन्नस्याप्यभिभवो भवतीत्यर्थः तस्मात्सर्वात्मनो निग्रहीतेंद्रियप्रवृत्तानीति निगमयति ६७ ॥

भाषाअनुवाद

इंद्री वश किये विना तत्वज्ञान नही होता इसका का
रण कहतेहै कि अवशीकृत इंद्रिय विषाधीन भोगी (
पुरुषकी इंद्रियोंके बीच जब एक इंद्रीके साथ मन धा
वताहै अर्थात् उसके आधीन हो विषय पर चला तो
फिर वह मन पुरुषकी बुद्धि हरिके उसको विषयमें
वेक्षिप्त करताहै तब सब इंद्री इकट्ठे हो प्रज्ञा को ह
रन करतीहै तो और क्या कहै फेरि वायु जैसे जलमें
नावको इधर उधर नचावतीहै तैसे यह मन इंद्रियों
के साथ विक्षिप्त हो जहां तहां मारामारा भ्रमता फि
रता इस पुरुष को खराब करता है ६७ ॥

दोहा

इंद्रियअपले विषयकोभोगें तहांजनजाए सो याकी म
तिहरतहै ज्यौंजल नावहि वाए ६८ ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इं
द्रियाणींद्रियार्थेभ्य स्तस्य प्रज्ञा प्रतिष्ठिता ६८

शांकरभाष्यं ।

यतोऽहीन्नुपपन्नस्तस्यार्थस्यानेकधोपपत्तिरुक्ता तं चार्थमुपपा
द्योपसंहरति तस्मादिति इंद्रियाणां प्रवृत्तौ दोषा उपपादिता
यस्मात्तस्मात् यतेः यस्य यतेः हे महाबाहो निगृहीतानि सर्वशः
सर्वप्रकारैर्मानसादिभेदैरिंद्रियाणींद्रियार्थेभ्यः शब्दादिभ्य
स्तस्य प्रज्ञा प्रतिष्ठिता ६८ ॥

आनंदगिरिकृतटी० ॥

यततो हीत्यादिश्लोकाभ्यामुक्तस्यैवार्थस्य प्रकृतश्लोकाभ्या
मपि कथ्यमानत्वात्पुनरुक्तिरित्याशंक्य परिहरति य
ततो हीत्यादिना ध्यायतो विषयानित्यादीनामुपपत्तिवच
नमुन्नेयं तच्छब्दापेक्षितार्थोक्तिद्वारा श्लोकमवतारयति ।
इंद्रियाणामिति असमाहितेन मनसा यस्मादनुविधीयमा
नानींद्रियाणि प्रसह्य प्रज्ञामपहरन्ति तस्मादिति योजना ६८

स्वामिकृतटीका ॥

इंद्रियसंयमस्य स्थितप्रज्ञत्वे साधनत्वं लक्षणत्वं चोक्तमुपसं
हरति तस्माद्यस्येति तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः लक्ष
णत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्या इत्यर्थः महाबाहो
इति संबोधयन् महति वैरिनिग्रहे समर्थस्य तवात्रापि साम
र्थ्यं भवेदिति सूचयति ६८ ॥

पिशाचभाष्य टी०

यततोऽप्यपीत्युपपन्नस्तस्यानेकविधोपपत्ति रुक्तानस्यार्थस्यु
क्तानस्यार्थमुपपाद्योपसंहरति तस्मादिति यस्यैव योगिनो
परमात्मनि नित्यशुद्धबुद्धमुक्तस्वभावे सर्वगते अयमह
मस्मीति प्रज्ञा प्रतिष्ठिता स संयमयोगी ६८ ॥

रामानुजभाष्यं ॥

तस्मादुक्तेनप्रकारेणशुभाश्रये मयि निविष्टमनसो यस्येन्द्रियाणीन्द्रियार्थेभ्यः सर्वशो निगृहीतानि तस्यैवात्मनि प्रज्ञा प्रतिष्ठिता भवति ६८ ॥

अभिनवगुप्तकृत टी.

यस्तु मनसो नियामकः स विषयान्सेवमानोपि न क्रोधादिकल्लोलैरभिभूयते इति स एव स्थितप्रज्ञो योगीति तात्पर्यम् ६८

परमार्थप्रपा टी.

अथोपसंहरन्नाह तस्मादिति भो महाबाहो यस्मादेवं तस्मात्कारणाद्यस्य पुरुषस्य सर्वशः सर्वाणीन्द्रियाणीन्द्रियार्थेभ्यो निगृहीतानि आकर्षितानि भवंति तस्य प्रज्ञा प्रतिष्ठिता ६८

वनमाली टी.

तस्मादिंद्रियनिग्रहादेव ज्ञानी भवतीति नियममाह तस्मादिति यत एवं निगृहीतेन्द्रियस्यैव प्रसादः प्रसन्नचेतस एव बुद्धियुक्तिमत एव तत्त्वज्ञानं तत्त्वज्ञानवत एवापरोक्षज्ञानसाधनं ध्यानं तस्माद्यस्य पुंसः इंद्रियनिग्रहस्तस्यैव करीत्यापरोक्षं यामोहत्तद्भगवत्प्रसादकारणापरोक्षज्ञानं भवतीत्यर्थः ६८ ॥

ऊत्तमवैजयन्ती टी.

यस्मादनेकसाधनसम्पन्नस्य योगिनो मत्स्वरूपयुक्तविरहितेमनो बाह्येन्द्रियाणां विषयप्रवणत्वं कृत्वा शुद्धेरात्मदर्शनविप्लवं तानयति तस्मादिति तस्मात्कारणात् हे महाबाहो यस्य पुरुषस्येन्द्रियार्थेभ्यः स्वस्वविषयेभ्यः सर्वतः सर्वाभ्यन्तराणीन्द्रियाणि मद्युक्तेन मनसा निगृहीतानि स्ववशीभूतानि भवंति तस्य मच्चित्तस्य पुरुषस्य प्रज्ञा बुद्धिः प्रतिष्ठिता तत्स्वरूपे प्रकर्षेण स्थिता भवंति महाबाहो इति संबोधनेन श्रीमन्नारायणमानसोद्भवो बाहुपर्यावनसम्पन्नानीलादिगणसीमायोद्धारति यत्पादयोपि शुश्रूषुः सोर्वशपि यद्दिशुराणसहायरूपभुजा रहितस्यतवेन्द्रियहोभकनीनाभवन् हरीहनीत्तमदंगस्पर्शश्रुद्धातस्करणस्य मत्सहायकस्य तवेंद्रिय

विजयेकश्चिदपिप्रयासोनभवतीतिध्वनितम् ६८ ॥

मधुसूदनी टी॰ ॥

द्रियस्यादेवं सर्वशः सर्वाणिसमनस्कानिहेमहाबाहोइतिसंबोधय
न्सर्वशत्रुनिवारणक्षमत्वादिंद्रियशत्रुनिवारणेपित्वंक्ष
मोसीतिसूचयति स्पष्टमन्यत् तस्येतिप्रसिद्धस्यैवपराम साधकस्य
र्शः इंद्रियसंयमस्यास्थितप्रज्ञंप्रतिलक्षणत्वमुमुक्षुंप्रति
साधनत्वस्यचोपसंहरणीयत्वात् तदेवंमुमुक्षुणाप्रज्ञास्थै
र्यायप्रयत्नपूर्वकमिंद्रियसंयमः कर्तव्यइत्युक्तं [illegible]
[illegible] ६८ ॥

सदानंदी टी॰

यस्मादेवंततोयस्यसचित्तानींद्रियाणिच निगृहीतानिसर्वा
णितस्यप्रज्ञाप्रतिष्ठिता १ निवातकवचादीन्योहतवांस्त्वंजित
वानसि महाबाहोसमर्थस्त्वमिंद्रियारिनिवारणे २ ६८ ॥

नीलकंठी टी॰

यततोह्यपीत्यत्रोपक्रांतमर्थंबहुधाउपपाद्यउपसंहरति
तस्मादिति यस्मादिंद्रियार्थानेमनोमनोनुगाचप्रज्ञातस्मा॰
त्हेमहाबाहोयस्ययतेःइंद्रियाणिसर्वशःसर्वप्रकारेणस्व
कारणेनमनसासहितानीतियावत् इंद्रियार्थेभ्यःशब्दा॰
दिभ्योनिगृहीतानिभवंति तस्यप्रज्ञाप्रतिष्ठितेतिविद्धि ६८

धानंदी टीका

स्पष्टार्थः ६८

रामकंठी टीका

स्पष्टार्थः ६८ ॥ ॥ तस्माद्यस्यसर्वशः मनस्कानीन्द्रियाणि

लासिकी [illegible] टीका [illegible] निगृहीतानि

तदेतदुपसंहरति तस्मादिति विषयेभ्यो[illegible]नी
तस्य प्रज्ञा प्रति ष्ठिता भवती त्यर्थः तिनत्वप्रवृत्त्या हेमहाबाहोइतिसंबोधयन्वैरिनिग्रहेसमर्थस्य
तवस्वैरचारीन्द्रियनियमनेपिसामर्थ्यंभवेदितिसूचयति त
थोक्तम् प्रसंख्यात्मभावानां विषयानवगृह्णतां विज्ञापरमा त

र्थानांजीवतामेवमुक्तेनेति ६८ ॥

पंचोलीटीका

यततोह्यपीतिउपन्यस्तस्यार्थस्यानेकयाउपपत्तिःउक्तापत्ता
वतार्थमुपपाद्यउपसंहरति तस्मादितिइंद्रियाणांप्रवृत्तौदो
षउत्पादितोयस्मात्तस्मात्हेमहाबाहोअस्ययतेःइंद्रियाणि
सर्वशइंद्रियार्थेभ्यःविषयेभ्यःनिगृहीतानितस्ययतेःप्रज्ञा
विवेकजाबुद्धिःप्रतिष्ठिता ६८

रणवीरसमिद्धोयिनी॥

एवमुक्तमर्थमनेकयोपपाद्योपसंहरति तस्मादिति इंद्रिया
ननुवर्तमानोमनोयस्मात्प्रज्ञांविक्षेपयति तस्माद्यस्येंद्रिया
णींद्रियार्थेभ्योनियमितानि तस्यस्वविषयेप्रज्ञा प्रतिष्ठिता ६८

मधुभाष्य

तस्मादिति उक्तंलक्षणंपिंडीकृत्याह ६८॥

भाषा अनुवाद

इंद्रियोंका संयम करना स्थिरप्रज्ञ पुरुषका साधन औ र यही उसका लक्षणहै यह जो पूर्व कहि चुके सोई ॥ अब फेरि कहते कि हे महाबाहो अर्जुन जो इन सब इं द्रियों को विषयोंसे शान्त राखि सके उसकी प्रज्ञा प्र तिष्ठितहोतीहै महाबाहु संबोधनसे यह जनाया कि तुम वैरियोंके निग्रह करनेसे समर्थ हो इससे अवश्य इंद्रियोंको वश करि सकोगे ये इंद्री पुरुषकी परम श त्रुहै शत्रुको जय करने बिना बडी हानिहै यह इसका भावार्थहै ६८ ॥

दोहा

तातें तोहि अर्जुन समसें वशकारलीन इंद्रिय इंद्रिय विष
यसें ताकी मति आसीन ६८॥

यानिशासर्वभूतानां तस्यांजागर्तिसंयमी ।
यस्यांजाग्रतिभूतानि सानिशापश्यतोमुनेः ६९

शांकरभाष्यटी०

योयंलौकिकोवैदिकश्चव्यवहारः सउत्पन्नविवेकज्ञानस्यस्थि
तप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौनिवर्ततेःविद्यायाश्च ।
विद्याविरोधादित्येतमर्थंस्फुटीकुर्वन्नाह यानिशेति
यानिशारात्रिःसर्वपदार्थानामविवेककरी तमःस्वभावत्वा ।
त् निशासर्वेषांभूतानांसर्वभूतानां किं तत्परमार्थतत्वं स्थितप्र
ज्ञस्य विषयोयथानक्तंचराणामहरेव सदन्येषांनिशाभवति
तद्वन्नक्तंचरस्थानीयानां अज्ञानिनां सर्वभूतानां निशेवनि
शा परमार्थतत्वागोचरत्वादतद्बुद्धीनां तस्यां परमार्थतत्वल
क्षणायां अज्ञाननिद्रायाःप्रबुद्धोजागर्तिसंयमी संयमवान्
जितेंद्रियोयोगीत्यर्थः यस्यां ग्राह्यग्राहकभेदलक्षणायामः
विद्यानिद्रायां प्रसुप्तान्येवभूतानि जाग्रतीत्युच्यंते यस्यांनि ।
शायां प्रसुप्ताइव स्वप्नदृशःसानिशा अविद्यारूपत्वात्परमा
र्थं पश्यतोमुनेरतःकर्माण्यविद्यावस्थायामेवचोद्यन्ते
नविद्यावस्थायां विद्यायांहि सत्यामुदितेसवितरिशार्वरमिव
तमःप्रणाशमुपगच्छत्यविद्या प्राग्विद्योत्पत्तेरविद्याप्रमाण ।
बुद्ध्यागृह्यमाणाक्रियाकारकफलभेदरूपासती सर्वकर्महे ।
तुत्वं प्रतिपद्यते नाप्रमाणबुद्ध्या गृह्यमाणायाःकर्महेतुत्वो
पपत्तिः प्रमाणभूतेन वेदेन मम चोदितंकर्तव्यं कर्मेतिहि
कर्मणि कर्ता प्रवर्तते नाविद्यामात्रमिदंसर्वंनिशेवेति यस्य
तु पुनर्निशेवाविद्यमात्रमिदंसर्वंभेदजातमितिज्ञानं तस्यात्म
ज्ञस्य सर्वकर्मसंन्यासएवाधिकारो नप्रवृत्तौ तथाच दर्श
यिष्यति तद्बुद्धयस्तदात्मानइत्यादिना ज्ञाननिष्ठायामेव त

स्याधिकारः तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्तेरनुपपत्तिरिति
चेन्न स्वात्मविषयत्वादात्मविज्ञानस्य न ह्यात्मनः स्वात्मनि प्रवर्तक
प्रमाणापेक्षता आत्मत्वादेव तदन्तत्वाच्च सर्वप्रमाणानां प्रमा·
णत्वस्य न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहा
रः संभवति प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यं प्रमाणं निवर्तयदे
देव चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे लोके च·
वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य तस्मान्नात्म
विदः कर्मण्यधिकार इति सिद्धं ६९ ॥

आनंदगिरिकृतटीका

आत्मविदः स्थितप्रज्ञस्य सर्वकर्मपरित्यागेऽधिकारस्तद्विपरी·
तस्याज्ञस्य कर्मणीत्येतस्मिन्नर्थे समनन्तरश्लोकमवतारयति
योयमिति अविद्यानिवृत्तौ सर्वकर्मनिवृत्तिश्चेत्तन्निवृत्तिरेव
कथमित्याशंक्याह अविद्यायाश्चेति स्फुटीकर्तव्यं बाह्याभ्यंतर
करणानां पराक्प्रत्यक्प्रवृत्तिवत्तथाविधे दर्शने च मिथो वि
रुध्येते पराग्दर्शनस्यानाद्यात्मावरणाविद्याकार्यत्वादात्मदर्श
नस्य च तन्निवर्तकत्वात् तत आत्मदर्शनार्थमिन्द्रियाण्यर्थेभ्यो
निगृह्णीयादित्याहेति योजना सर्वप्राणिनां निशा पदार्थावि·
वेककरीत्यत्र हेतुमाह तमःस्वभावत्वादिति सर्वप्राणिसा·
धारणीं प्रसिद्धां निशां दर्शयित्वा तामेव प्रकृतानुगुणत्वेन प्र
श्नपूर्वकं विघटयति किं तदित्यादिना स्थितप्रज्ञविषयस्य प
रमार्थतत्वस्य प्रकाशैकस्वभावस्य कथमज्ञानं प्रति निशात्व
मित्याशंक्याह यथेति तत्र हेतुमाह अगोचरत्वादिति अत
द्बुद्धीनां परमार्थतत्वातिरिक्ते द्वैतप्रपंचे प्रवृत्तबुद्धीनामप्रति
पन्नत्वात्परमार्थतत्वं निशेवाविद्यमानमित्यर्थः तस्यामित्यादि
व्याचष्टे तस्यामिति निशावल्लक्षायामवस्थायामिति यावत्
योगीति ज्ञानी कथ्यते द्वितीयार्द्धं विभजते यस्यामिति प्रसु·

मानो जागरणं विरुद्धमित्याशंक्याह अहमाइवेति परमा॰
ति र्थतत्वमनुभवतीनिहताविद्यस्य संन्यासिनोद्वैतावस्थानिश
त्यत्र हेतुमाह अविद्यारूपत्वादिति परमार्थावस्थानिशत्य
विदुषांविदुषान्तु द्वैतावस्थानयेति स्थितेफलितमाह अत
इति अविद्यावस्थायामेव क्रियाकारकफलभेदप्रतिभानादि
त्यर्थः विद्योदयेपि तत्प्रतिभानाविशेषात् पूर्ववमिव कर्मा
णि विधीयेरन्नित्याशंक्याह विद्यायामिति अविद्यानिहंतो
बाधितानुवृत्त्या विभागभानेपि नास्तिकर्मविधिर्विभागा
भिनिवेशाभावादित्यर्थः अविद्यावस्थायामेवकर्मणोत्पत्ति
व्यक्तीकरोति प्रागिति विद्योदयात्पूर्वं बाधकाभावाद
बाधिताविद्या क्रियादिभेदमापाद्य प्रमाणरूपयाभ्रान्त्या
यतोऽप्रत्य कर्महेतुर्भवति क्रियादिभेदाभिमानस्य तद्धे॰
तुत्वादित्यर्थः नविद्यावस्थायामित्युक्तंप्रपंचयति नाप्रमा॰
णेति उत्पन्नायांचविद्यायां अविद्यायाःनिहतत्वात् क्रिया
दिभेदभानमप्रमाणमिति बुद्धिरुत्पद्यते तयाप्रमाणाय
थोक्तविभागभागिन्यप्यविद्या नकर्महेतुत्वंप्रतिपद्यते बा॰
४ धितत्वेनाभासतया तद्धेतुत्वायोगादित्यर्थः विद्याविद्यावि
भागेनोक्तमेवविशेषं विवृणोति प्रमाणभूतेनेति यथोक्ते
नवेदेनकामनाजीवनादिमतोममकर्मविहितं तेनमया
तत्कर्तव्यमितिमत्वानः सन्कर्मण्यधिक्रियते तत्प्रतिपा
दनविशेषवादिनोवेदस्य प्रवर्तकत्वादित्यर्थः सर्वमेवेदम
विद्यामात्रंद्वैतं नित्यैवेति मत्वानस्तु नप्रवर्तते कर्मणीति
व्यावर्त्यमाह नाविद्येति विदुषोनकर्मण्यधिकारश्चेत्तस्या॰
धिकारस्तर्हि क्वेत्याशंक्याह यस्येति तस्य ज्ञाननिष्ठस्य फल
भूतसंन्यासाधिकारे वाक्यशेषं प्रमाणयति तथाचेति अ
वर्तकंप्रमाणंविधिस्तदभावेकर्मस्वविदुषोज्ञाननिष्ठाया

मपि प्रवृत्तेरनुपपत्तेराश्रयणीयो ज्ञानवतोपि विधिरिति शं
कते तत्रापीति किमात्मज्ञाने विधिमपेक्षते किंवात्मानाद्यः
तस्य स्वरूपविषयस्य यथाप्रमाणप्रमेयमुत्पत्तेर्विध्यनपेक्ष
त्वादित्याह न स्वात्मेति न द्वितीयइत्याह नहीति प्रवर्तक
प्रमाणशाहितस्य विधेः साध्यविषयत्वादात्मनश्चासाध्यत्वादि
तिहेतुमाह आत्मत्वादेवेति आत्मतज्ज्ञानयोर्विध्यनपेक्षत्वेपि
ज्ञानिनो मानमेयव्यवहारं प्रतिनियमार्थं विध्यपेक्षास्यादि॰
त्याशंक्याह तदन्तत्वाच्चेति सर्वेषां प्रमाणानां प्रामाण्यस्यात्म
ज्ञानोदयावसानत्वात्तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वा
न्न तत्प्रतिनियमाय ज्ञानिनो विधिरित्यर्थः उक्तमेव व्यक्ती॰
करोति नहीति धर्माधिगमवदात्माधिगमेपि किमिति निय
योक्तो व्यवहारो न भवतीत्याशंक्याह प्रमातृत्वे हीति तन्नि
वृत्तौ कथमद्वैतज्ञानस्य प्रमाणमित्याशंक्याह निवर्तयदे
वेति निवर्तयदद्वैतज्ञाने स्वयं निवृत्तेर्न प्रमाणमित्यत्र दृ
ष्टान्तमाह स्वप्नेति आत्मज्ञानस्य विध्यनपेक्षत्वे हेत्वन्तरमा
ह लोके चेति व्यवहारभूमौ हि प्रमाणस्य वस्तुनिश्चयफ
लपर्यन्तत्वे सति प्रवर्तकविधिसापेक्षत्वानुपलंभाद्वैतज्ञा
नमपि प्रमाणत्वान्न विधिमपेक्षते रज्ज्वादिज्ञानवदित्यर्थः
आत्मज्ञानवतस्तन्निष्ठाविधिमन्तरेण ज्ञानमाहात्म्येनैव सि
द्धत्वात्तस्य कर्मसंन्यासेधिकारो न कर्मणीत्युपसंहरति त
स्मादिति ६९ ॥

स्वामिकृतटीका ॥

नन्वेवं न कश्चिदपि प्रबुद्धइव दर्शनादिव्यापारशून्यः सर्वात्म
नानिगृहीतेंद्रियो लोके दृश्यते अतो संभावितमिदं लक्षणमि
त्याशंक्याह यानिशेति सर्वेषां भूतानां यानिशा निशेव निशा
आत्मनिष्ठा आत्माज्ञानध्वांतावृतमतीनां तस्यादर्शनादितांव

वहाराभावात् तस्यामात्मनिष्ठायांसंयमीनिःस्पृहीतेंद्रियोजा
गर्तिप्रतिबुध्यते यस्यांतुविषयनिष्ठायांभूतानिजाग्रतिप्रतिबु
ध्यंते साचात्मानत्वंपश्यतोमुनेःनिशातस्यांदर्शनादिव्यापारस्त
स्यनास्तीत्यर्थः एतदुक्तंभवति यथादिवांधानामुलूकादीनां
रात्रावेवदर्शनंनतुदिवसेएवंब्रह्मज्ञस्योन्मीलितात्तस्यापिब्रह्म
ण्येवदृष्टिर्नतुविषयेष्वतोनासंभावितमिदंलक्षणमिति ६९

पिशाचभाष्यटी॰

यानिशारात्रिःसर्वपदार्थानामविवेककारणीसर्वभूतानांनि
शेतिसर्वप्राणिव्यवहारागोचरब्रह्मस्वरूपमुच्यते तस्यांजागा॰
र्तिप्रबुद्धवानात्मेयस्यांसर्वभूतानिजाग्रतिप्रबुध्यंते यस्यांव्य
वहरंतिसाचअविद्यानिशापरमार्थस्वरूपंब्रह्मपश्यतोमुनेर्यो
गिनः ६९ ॥

रामानुजभाष्यटी॰

एवंनियतेंद्रियस्यप्रसन्नमनसःसिद्धिमाह याआत्मविषया
बुद्धिःसर्वभूतानांनिशानिशेवाप्रकाशिकातस्यामात्म॰
विषयायांबुद्धाविंद्रियसंयमीप्रसन्नमनाजागर्तिआत्मानम
वलोकयन्नास्तइत्यर्थः यस्यांशब्दादिविषयायांबुद्धौसर्वा
णिभूतानिजाग्रतिप्रबुद्धानिभवंतिसाशब्दादिविषयाबुद्धिरा
त्मानंपश्यतोमुनेर्निशेवाप्रकाशिकाभवति ६९ ॥

अभिनवगुप्तकृतटीका

योगीचसर्वव्यवहारान्कुर्वाणोपिलोकान्तरइतिनिरूपयता
परमेश्वरेणसंक्षिप्यास्यस्वरूपंकथ्यते यासर्वेषांभूतानां॰
निशामोहिनीमाया तस्यांतुनिर्जागर्तिकथं इयंहेयेति य
स्यांचदशायांलोकोजागर्तिनानाविधांचेष्टांकुरुतेसातुने
रात्रिः यतोसौव्यवहारेप्रतिबद्धः एतदुक्तंभवति येयंमा॰
याखलुतस्यामोहकत्वंनामरूपंसत्वेनतत्त्वाभासनंचतत्र

गी.
टी.
हि.

लोकः शास्त्रस्वरूपमस्या अपरामृष्टैव द्वितीयस्मिंरूपेनिव
इस्टनिरालेः योगी तु तद्विपरीतः तद्वीयं मोहकत्वेन तदुन्मू
लनाय प्रवृत्तिस्वस्वेतत्रतां तु नाद्रियेत पश्यन्नप्यज्ञानी
मिथ्याज्ञानोपघातात्स्वस्वेतत्रतानादरः पश्यतएवसारात्रि
रितिविवेक अविद्यायांचावयन्ते योगी यत्र सर्वोविमूढः अविद्यायांतु बुद्धो यत्र जनः
प्रबुद्ध इत्यपि चित्रम् ६९

परमार्थप्रपा टी.

अथविमृश्य पराहृतेंद्रियस्यास्थितिमाह यानिशेति सर्वा
णिभूतान्यात्मानेनज्ञानेति अतआत्मविषयकाज्ञानरूपाते
षांभूतानांरात्रिः यथोलूकानांदिनमेवरात्रिः एवंतस्यारा
त्रौसंयमीपराहृतेंद्रियोयोगीजागर्तिउद्बुद्धोभवतितथा
तस्याजाग्रदृश्यायांभूतानिजाग्रतिस्वव्यवहारेजंवंतिसापश्य
तआत्मदृष्टेर्मनेमननशीलस्यनिशाभवति तत्रत्यव्यवहा
राभावात् तदुक्तं आत्मानंदिस्फुरतिसर्वशरीरभाजांतेषां
निशाभवतिसावेल तत्रमो यी जागर्तिजाग्रतियत्रते
व्यवहारजातेतत्रसुखस्थिरधियः क्षणदास्यसातत्रइति एवंस
कलेंद्रियपराहृतित्वमेवास्थितप्रज्ञत्वमित्यर्थः यद्वासर्वभू
तानांसर्वदेहिनांयासकलेंद्रियोपरमरूपानिशासुषुप्तिः
तत्रात्माकारांतःकरणवृत्तौसत्यामपिआत्मानेनविंदंति अ
थतस्यांतुर्यावस्थायांपरिणतायांसंयमीआत्मनिष्ठः अमात्
जागर्तिआत्मात्रस्वबोधानुभववान्भवति देवेष्टतन्मिथुनेप
रमोक्षेयआनंदसाम्यादेवविन्त्यप्यालोकयेत् तएवतदेवते
मिथुनेनप्रियेणयाआसमईयतीतिश्रुतेः याशिष्टेपि निद्रा
देजागरणास्यांतेयोभावउपपद्यते तंभावंभावयन्नाद्वाद
ह्यानंदमश्नुतेइति अथयस्यांजाग्रदवस्थायांभूतानिजाग्र
तिस्वव्यापारेजंवंतिसाव्यवहारमपश्यतआत्मदृष्टेःसुषुप्तस्य
निशादृश्यप्रपंचास्फुरणात् ६९ ॥

वनमाली टी·

एवंमुमुक्षुणाप्रयत्नेनेंद्रियनिग्रहः कर्तव्यः ज्ञानिनस्तुस्वाभावि
कइत्याह येतिसुज्ञानांसर्वभूतानांयाभगवद्विषयकास्थिरप्र
ज्ञातिशेवनिशायस्यामज्ञानांनिगाढनिद्रायामिवशेरतेसंयमी
जितचित्तेंद्रियः जागर्तिसम्यगपरोक्षेणपरमेश्वरंपश्यतीत्यर्थः
यस्यांविषयभोगरूपायांज्ञानापेक्षयानिशायांभूतानिपरमेश्व
रविमुखानिजाग्रतिमुनेः परमेश्वरमननशीलस्यनिशातस्यां
सनिद्रातीत्यर्थः यथाकाकस्यरात्र्यंधस्यदिनमुलूकस्यदिवां
धस्यनिशारात्रौपश्यतस्तोलूकस्यपदिनेरात्रिरेवसाकाकस्यत
थाज्ञाज्ञयोः ६९ ॥

मवैजयन्ती टी·

नन्विंद्रियाणामिंद्रियार्थेभ्यः संयमनंकृत्वापियोगीतदनंतरंकिं
फलंमाप्नोतीत्यपेक्षायांतस्यात्मदर्शनपूर्विकांब्रह्मविषयिणीं
बुद्धिंस्तौतीमाह यानिशेत्यादिभिस्त्रिभिः यानिशेतिसर्वभूतानां
सर्वेषांसर्वेश्वरेश्वराद्भगवतोमत्तः सकाशादितरान्देवानात्म
मत्वेनमन्यमानानांजीवेश्वरयोः स्वरूपायाथार्थ्यज्ञानेनतयो
र्भेदमज्ञानकल्पितमितिवदतांशास्त्राचार्यादिकंसर्वंजगन्मि
थ्येतिप्रजल्पतांपरिछिन्नबाह्यानांभूतानांनित्यबद्धजीवानांया
निशाकुहूकुहूराभ्यांयुक्तातिमहान्धकारवतीनि[illegible]वतेषांस्वप
रस्वरूपाप्रकाशिकाऽन्यदेवभावसाधनादिरूपाःनिमित्तभग
वद्भक्तिविशिष्टाभवास्थितिलक्षणात्मदर्शनपूर्विकापरमात्म
विषयिणीयाबुद्धिः सैवनिशेत्युच्यतेतस्यांहरिविमुखजनमोह
कारिण्यांकृष्णविषयिण्यांबुद्धौसंयमीशीघ्रंस्वर्गादिरूपशब्दा
दिविषयपदेभ्योविधिशिवेंद्रादिदेवेभ्यःसकाशात् बाह्यान्तः
ष्करणवृत्तीनांभगवत्स्वरूपविग्रहगुणशक्तिलीलादिषुवि
षयेषुसंयमः सम्यगुपरमोयमौविद्यतेयस्यतथासः विस्वन·
न्यभक्तः जागर्तिस्वस्वरूपमेश्वरेणसहस्वाभाविकभिन्नाभिन्न

रूपत्वं पश्यन् तद्विनो विनिद्रः संतिष्ठति संयमीत्येकवचनेनैवं
भूतस्य हरिभक्तस्यातिदुर्लभत्वं दर्शितं यस्यां कस्मिंस्तरानेकामरभ
क्तिमत्यां भगवदनन्यरतिरहितजनानन्दकारिण्यां अयथार्थे
नात्मपरमात्मतत्वविषयिण्यामनिश्चिततत्वयथार्थायां बुद्धौ भू
तानि कस्य भक्तिविरहितानि भूतपग्रमर[illegible]गण श्रद्धावति
जागर्ति कर्दुरादिरजनीचरवद्विनिद्राणि संतिष्ठति सा बुद्धिः
आत्मानात्मपरमात्मस्वरूपयाथात्म्येन पश्यतः मुनेर्भगवत्स्व
रूपगुणलीलादिमाहात्म्यावगंतुस्तत्स्वरूपगुणादिमनन
स्वभावस्य वा कस्यैकनिष्ठस्य संयमिनः निशा निरतिशयाति
निबिडजलदवृन्दसंघटितामावास्याविशिष्टातिशयान्धकार
वतीतमिस्रेवाप्रकाशिका भवति संयमी निद्रानिलक्षणमा
त्मदर्शनपूर्विकां भगवत्प्राप्त्युपायभूतां केवलां कस्य विषयिणीं
बुद्धिं विनान्यां संसारप्रापिकां प्रवृत्तिलक्षणां नानादेवविषयि
णीं बुद्धिं न जानातीत्यभिप्रायः ६९ ॥

+ स्थितप्रज्ञस्य तत्त्वतः सिद्धरूपत्व सर्वेन्द्रियसं **मधुसूदनी टी॰** ॥ यमइत्याह +

+ या वेदांतवाक्यजनितसाक्षात्काररूपाहं ब्रह्मास्मीति प्रज्ञा स
मत्तानां र्वभूतानां निशेव निशा तामस्य अप्रकाशरूपत्वात् तस्यां ब्रह्म
विद्यालक्षणायां सर्वभूतनिशायां जागर्ति अज्ञाननिद्रायाः
प्रबुद्धः सन्सावधानो वर्तते संयमी इंद्रियसंयमवान् स्थितप्र
बुद्धाः ज्ञ इत्यर्थः यस्मात्तु द्वैतदर्शनलक्षणायामविद्यानिद्रायां प्रसु
प्तान्येव भूतानि जाग्रति स्वप्नवत् व्यवहरंति सा निशा न प्रका
शते आत्मतत्वं पश्यतो परोक्षतया मुनेः स्थितप्रज्ञस्य यावद्धि
न प्रबुध्यते तावदेव स्वप्नदर्शनं बाधपर्यंततत्वं द्रुमस्य तत्वज्ञा
नकालतत्रभ्रमनिमित्तः कश्चिद्व्यवहारः तदुक्तं वार्तिकका
रैः कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते शुद्धे वस्तुनि सिद्धे
च कारकव्यापृतिरिति तथा च यस्य विपरीतदर्शनं तस्य न
वस्तुदर्शनं विपरीतदर्शनस्य वस्तुदर्शनजन्यत्वात् [illegible] यस्य च

तिस्तथा काकोलूकनिशेवायं संसारो ह्यात्मवेदिनः या निशा सर्वभूतानामित्य
वोचत्स्वयं ४

वस्तुदर्शनेनतस्यनविपरीतदर्शनंविपरीतदर्शनकारस्यवस्तु ७४ वस्तुदर्शिनस्य
दर्शनेनबाधितत्वात् तथाचश्रुतिः यत्रवाअन्यदिवस्यात्त
त्रान्योन्यत्पश्येत् यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदि
तिविद्याविद्ययोर्व्यवस्थामाह यथाकाकस्यरात्र्यंधस्यदिनघू
लूकस्यदिवांधस्यनिशारात्रौपश्यतस्तूलूकस्यपहिनेरात्रि
रेवसाकाकस्येतिमहदाश्चर्यमेतत् अतस्तत्वदर्शिनःकथ
माविद्यकक्रियाकारकादिव्यवहारःस्यादितिस्वतःसिद्धए
वतस्येंद्रियसंयमइत्यर्थः
६९ ॥

सदानंदी टीका ॥

एवंभगवताप्रज्ञास्थैर्यायेंद्रियसंयमः कार्यप्रयत्नतःशा
स्त्राचार्याभ्यामुपदेशितः १ उत्पन्नेतत्वविज्ञानेक्षीणेज्ञानेसकार्य
के इंद्रियाणामविनाशोस्वतःसिद्धोस्तिसंयमः २ इत्याहभ
गवान्विसृष्टब्रह्मनिष्ठाप्रदर्शनात् वेदांतवाक्यजाप्रज्ञाहंब्रह्मा
स्मीतियाहढा ३ अज्ञान्प्रत्यप्रकाशत्वादज्ञानांरजनीवया
ब्रह्मविद्यास्वरूपिण्यांतस्यांजागर्तिसंयमी ४ जितेंद्रियोजि
तमनाःस्थितप्रज्ञउदारधीः प्रबुद्धोऽज्ञाननिद्रातःसावधान
सवर्तते ५ ग्राह्यग्राहकरूपायानिशाविद्यातमोमयी प्रज्ञ
आन्येवभूतानियस्यांव्यवहरंतिवै ६ स्वप्नवत्सानिशातस्य
ब्रह्मतत्वंप्रपश्यतः स्थितप्रज्ञस्यविदुषोभेदहग्व्यावभास
ते ७ प्रबुध्यतेनयावद्धिनावत्स्वप्नस्यदर्शने प्रबुद्धस्यपुनः
स्वप्नोबाधितोभ्रमकालिकः ८ बाधपर्यंततादृष्टासकार्य
स्यभ्रमस्यच साक्षात्कृतेपरेतत्वेनभ्रमोनचतत्कृति ९ सम्
लभ्रांतिबाधाच्चतदुक्तंवार्तिकेस्फुटं कारकव्यवहारेहिशु
द्धंवस्तुनवीक्ष्यते १० शुद्धेवस्तुनिसिद्धेवकारकव्याहतिस्त
था काकोलूकनिशेवायंसंसारोज्ञात्मवेदिनः ११ यानिशा

गी॰ सर्वभूतानामित्यवोचत्स्वयं हरिः विपरीतदृशो नास्ति सम्य
टी॰ ग्वस्तुनिरीक्षणं १२ वस्तुदर्शनजायस्माद्विपरीताद्दृशेव सा
द्वि॰ सम्यग्वस्तुदृशो नास्ति विपर्ययनिरीक्षणं १३ सम्यग्दृशावा
धितत्वात्मस्थूलस्य भ्रमस्य हि उलूकस्य दिवांधस्य यथा काक
दिने निशा १४ रात्र्यंधस्य च काकस्य यथोलूकदिने निशा
तथाज्ञस्य निशा वर्त्ति निष्ठा ब्रह्मविदो मुनेः १५ तथा ब्रह्मवि
दो मूढनिष्ठा रात्रिर्विवादिता ग्रतस्तत्त्वदृशो नास्ति क्रियाका
रकलक्षणः १६ व्यवहारो सम्मितो ज्ञानतः सवितेंद्रियसंयमः
चित्तस्य स्वात्मनिष्ठत्वादेषणात्रयमुज्झतः तस्याप्यतिलुप्तता
ध्यानमर्यादा नैव प्रवर्तते इत्युक्तं श्रीवसिष्ठेन रघुनाथं प्रतिस्फु
टम् १७ ॥

नीलकंठी टी॰ ।

यदा पंचावतिष्ठंत इत्युदाहृतश्रुतेस्तामाहुः परमां गतिमि
त्येतच्चतुर्थं पादं व्याचष्टे या निशेति सर्वेषां भूतानामज्ञानां
या निशेव निशा यस्यां मध्यंदिने उलूका इवांतरा ग्रंथ्याप्र
व सर्वे प्राणिनो भवंति तस्यां तस्मिन्प्रत्यग्ज्योतिषि संयमी इं
द्रियमनोबुद्धीनां निग्रहणशीलो योगी जागर्ति इंद्रियादी
नां दृक्शक्तिलोपेपि प्रत्युपरतदृक्शक्तिरेवास्ते तथा च
श्रुतिः न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति
यस्यामविद्याख्यायां निशायां क्रियाकारकादिद्वैतस्य सप्रव
र्तिकायां सर्वाणि भूतानि जाग्रति निशीथे उलूका इव स्व स्व व्या
पारे प्रवर्तंते सा अविद्या पश्यतो मुनेः आत्मदर्शनवतो यो
गिनः प्रारब्धकर्मणा विदेहकैवल्यप्रतिबंधात् लेशतोनुव
र्तमाना व्युत्थानकाले व्यवहरतोस्य गाढांधकारवती निशे
व क्लेशकरी भवति प्रतिरुद्धमार्गा हि योगिनः वाय्व्यवहा
रादुद्विजंते नरा इव गाढांधकारे संचारात् यथोक्तं योगभा

षे प्रतिमात्रकल्पो हि विद्वाननल्पदुःखलेशेनाप्युद्विजत
इति प्रथवार्तिकानि कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्य
ते शुद्धे वस्तुनि सिद्धे च कारकव्याप्टतिस्तथा काकोलूक
निशावायं संसारोऽज्ञात्मवेदिनोः या निशा सर्वभूतानामि
त्यवोचत्स्वयं हरिरिति बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशा
चवत् बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवदिति नदे
वं किमासीनेत्यस्योत्तरं यदा संहरते चायमित्यादिना एतदं
तेन ग्रंथेन स्थितप्रज्ञः सदा समाधिमनुतिष्ठन्नुपरमो गातिश
याल्लइत्युक्तं ६९ ॥

आनंदी टीका ।

स्थितप्रज्ञस्य योगेन जगद्विलक्षणां हतिमाह सर्वभूतानामन
वस्थितबुद्धीनां या विद्या तत्त्वज्ञानात्मिका निशा तत्संचारादेर्विष
योनात्मिन्हत्वाय स्यां विद्यायां न प्रविचरन्ति तस्यां विद्यायामेवस
र्वभूतनिशायां संयमी संयतदेहेंद्रियजातः स्थितप्रज्ञो जागर्ति
विगतमोहनिद्रा लेयस्यामविद्यायां संसारव्यवहारहेतौ भूतानि
न्हप्ताः जाग्रति स्वबुद्धःबोदिकामनयानतत्कर्मकरणव्यग्रबुद्ध
यः विनिद्रतासावधानतामनुभवन्ति सेयमविद्यात्मिका रात्रिः
पश्यतः परमार्थतत्त्वमालोकयतः मुनेः स्थितप्रज्ञस्य रात्रिः संचा
रस्याविषयः सर्वमिदं विस्तृत्याभिनवग्रसपादैः ग्रन्यालोचनैः
ग्रंथांतरसंक्रमितवाच्यस्य वा अस्यादाहरणं व्याख्यातं तथाचमो
हापायेऽपि ६९ ॥ + यानिशा सर्वभूतानामविद्यास्तमयात्मिका परोबोधः पराशान्तिस्तत्रासौ समसाधितः
यस्मिन्जाग्रति भूतानि ह येऽस्मिन्नुःखदायिनि तत्रासौ सततहृमस्त
शयनोसौ तवी +

रामकंठी टीका

सर्ववस्तुप्रकाशकस्वरूपप्रकाशनिरूपणरूपा हतिरेवेह संसा
रिणः प्रतिनिशा शब्देनोक्ता तद्विषयत्वेन हि सर्वभूतान्यनुभिवि
४२ तद्दृग्शक्तित्वोप्रसुप्तानि तिष्ठन्ति एवंविधायां सर्वभूतानां निशात
स्यां तद्विषये संयमी यथोक्तप्रकारेण निगृहीतसर्वेंद्रियः प्रबुद्धो
जागर्ति प्रविकस्वतस्वभावनिर्मलविज्ञानमयविलोचनविभा
व्यमानानामेवाविर्भूतचान्विगतमोहनिद्रा भासे यस्यां तु प्रतिक्षण
विनश्वरसुखदुःखसाधनभूतविषयग्रहणोन्मुखमात्रव्यग्रसम
ग्रेंद्रियग्रामा यां संसारव्यवहारहेतौ सर्वभूतानि समस्तप्राणभूतो

गी॰ टी॰ हि॰

जाग्रति तावन्मायावहितत्वात् विनिद्रितामिवानुभवंति
मातादृशीवृत्तिः पश्यतः सदसत्पदार्थसार्थपरमार्थमालोक
यतोमुनेः संयमिनः प्रबुद्धस्यरात्रिनिशातामुनितस्यनिरवधा
नधानत्वात् [illegible] १६ ॥

त्यासश्रीवल्लभमी टीका ^सर्वेषांभूतानामात्मज्ञानधीनाहर्नमतीनां^

ग्रतःसंमाविग्रुक्तस्यविलक्षणांप्रबुद्धस्यवृत्तिमाह येति याह
नित्यात्मनिष्ठारूपानिशेवनिशास्फुटार्थप्रकाशिका परमार्थ
भूतायाग्रहन्तायाविद्यमानायादेहादिषुनिमग्नतया तेषाम
स्फुटत्वेनभासनात् तस्यांसंयमी उक्तविधयानिगृहीतेंद्रियः
प्रबुद्धोजागर्तिस्फुटं परमार्थंपश्यति यस्यांवृत्तौविषयनिष्ठा
रूपायांनिशायांभूतानिजाग्रतिस्फुटमर्थान्पश्यंति सामुनेर्म
ननशीलस्यात्मनिसमाहितस्यपश्यतोदर्शनादिव्यापारकुर्व
तएवनिशास्फुटतया विषयावभासनात् यथामधुपानेक्षी
वस्य ^१६ ॥ तदुक्तंमोक्षोपायेश्रुतेनश्रुतवनयानिष्टन्वहिर्हीनेपरोपिसन् परिश्रांततयानित्यं
निद्रालुरिवलक्ष्यतेइति^

पंचोलीटीका

योयंलौकिकोव्यवहारःसउत्पन्नविवेकज्ञानस्याश्थितप्रज्ञस्य
अविद्याकार्यत्वादविद्यानिवृत्तौनिवर्त्ततेअविद्याधाऽऽविद्याविरो
धान्निवृत्तिःइत्येतमर्थंस्फुटीकुर्वन्नाह तथाचविद्याविद्ययोःविरो
धात्तद्विषययोर्भिन्नविषत्वमाह यानिशेतिसर्वभूतानांयस्मिन्प
रमार्थतत्वेमोहमयीसर्वपदार्थानांअविवेककरीतमःस्वभावानि
शाः तस्यातास्मिन्परमार्थतत्वेसंयमीजागर्तियस्यां अविद्यालक्ष
णायांनिशायांभूतानिःजाग्रतिपरमार्थतत्वंपश्यतोमुनेःसानिशा १६

रणवीरसमिद्बोधिनी॥

कर्मयोगीचसर्वव्यवहारान्कुर्वाणोपिलोकोत्तरइति निरूपयता
परमेश्वरेणमतिप्याख्यसंरूपंकथ्यते यानिशेति सर्वेषांभूतानां

भूताविष्टामामिव निश्चयाभावाद्दोलायमानानामकर्मयोगिनां
यानिशा निशेव मोहिनी अयं गुरुरयं पिता,यं पितामहो,यं भ्राता
यं सुतो यं सुहृद्बन्धुरहं तव एतान्हत्वा सुखमिच्छामि पापकर्मकारितया।
निरयभाजश्च वैतान्विना त्वराज्यमप्यस्थिते जिजीविषाभावाद्वा
त्यं तत्क्षेशपार्थस्यामेत्यादिरूपा इंद्रियावविधीयमानमनोवृत्तिः
आरभ्यमाणस्ववर्णाश्रमाचारोचितकर्मणः सकाशान्निवृत्तिर्नि
मित्तीभावसाधर्म्यात् आरभ्यमाणस्वधर्माचरणविषयप्रवृत्तिवि
स्मारणेनेतरानुभवजनकत्वात्कश्मलोत्पादनसाधर्म्याद्वा निशा
यामपिहि लोकोदिनव्यवहारात्स्यभूताविष्टत्यनिद्रापरवशा
भावात्स्वामिके व्यवहारमनुभवति तस्यां मनोवृत्तौ संयमी सम्य
ग्यच्छति नियच्छति सर्वाविरहणातिंद्रियनीति संयमी साधुनिग्र
हो यतः कर्मयोगी जागर्ति स्वधर्माचरणे दृढनिश्चयत्वेन कश्मल
परवशत्वाभावात्ततो निवृत्तेः यस्यां तु नहेतौ स्वधर्मभूतयुद्धादित्याग
पूर्वपरधर्मभूतभिक्षावरणाद्यभिनिवेशरूपायां लोको जागर्ति।
विविधं संकल्पते सा वृत्तिरस्तु नेजोषमनारियतस्य व्यवहारतस्तरस्ये
तियावत् निशेव निशा स्वामिक तुल्याभासते मिथ्येवायं गुर्वादि।
हननिमित्तकाकिल्विषभ्रमइति यद्वा तत्र वृत्तौ मनसः प्रवेशा।
द्रानात् यतः पश्यतः संगत्वायातान्गुर्वादीन्हननोद्यतान्पश्यतः
यद्वा पश्यतः स्वधर्माचरणे धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न वि
द्यते अत्यारम्भलभं ते युद्धमीदृशमित्यंतेन ग्रंथेन प्रतिपादितमामु
ष्मिकं शोभनं फलं तदनाचरणे च अथचेत्त्वमिमं धर्म्यमिमारभ्य
ततोऽदुःखतरं नु किमित्यंतेन ग्रंथेन प्रतिपादितमैहिकामुष्मिको
भयानिष्टं च जयेपराजये वा सति हतो वेति पद्योक्तासुभयलोकेपि
स्वाभीष्टसिद्धिं विवेचयतः इति मिथ्यात्वाभासेदतः पश्यतएव व
सारात्रिरितिविदं तस्मादिंद्रियपरवशत्वयास्वधर्मानिवृत्तिरूपां
वृत्तिं विहाय तत्प्रवृत्तिरूपां प्रवृत्तिमातिष्ठ लोकोत्तरः कर्मयोगीतित
थैवास्य स्थैर्यमितिसमुदायार्थः ॥६९॥

मधुभाष्य

यानिशेति यासर्वभूतानांनिशापरमेश्वरस्वरूपलक्षणा य
स्यांतुसुप्तानीवनकिंचिज्जानंति तस्यामिंद्रियसंयुक्तोज्ञानी
जागर्तिसम्यगपरोक्षेणपश्यतिपरमात्मानमित्यर्थः यस्यां
विषयलक्षणायां भूतानिजाग्रतितस्यांनिशायामिवसुप्तः
प्रयोनजानाति मत्तादिवत् गमनादिप्रवृत्तिः तदुक्तम् देहं
नतत्त्वचरमं देहोपिदैववशगइतिस्थितप्रज्ञोमननशीलोमुनिः
पपपतइत्यस्यसाधनमाह तेनविषयानुभवप्रकारमाह ६९

जो सन्देह करो कि निद्रागत कहे सोये मनुष्यके समान
देखना सुनना बोलना चलना या परस करना आदि इंद्रि
यों के व्यापार से रहित कहे इंद्रीजित तो कोईभी पुरुष इ
स संसारमे नही देख पड़ताहै तो स्थित प्रज्ञका लक्षण जो
कहा सो असंभव अर्थात् कोई भी स्थिर बुद्धि नहीहै इस
पर श्रीभगवान कहते है कि अज्ञान रूप अन्धकार से आ
हत कहे घेरे सकल मनुष्यों को आत्मनिष्ठा कहे आत्मज्ञा
न तत्वज्ञान रूप विषयमें दर्शन आदि कोई व्यापार न रह
नेसे जन्तुवों को जो निशा कहे रात्रि अर्थात् दर्शनादि
व्यापार शून्य अवस्था तद्रूप आत्मनिष्ठा कहे तत्वज्ञान अव
स्था रात्रिहै जिसमे विषयी विचारों को कुछ नही सूझता
सोये पुरुषके समान शिथिल पडेहै कोई इंद्री भी कुछ
काममे नहीहै यही आत्मनिष्ठा रूप निशा सब जीवोंकी
जानो इससे संयमी कहे इंद्री जित जागतेहै अर्थात् त
त्वज्ञान का अनुभव करते और स्वस्वरूप को देखते आ
नन्द पावतेहै । और जो विषय निष्ठा कहे विषयोंका
ज्ञान जिसमे सब प्राणी जागते अर्थात् विषयी जन विष
यो मे बोधयुक्त हो दर्शनादि व्यापार करते स्वमकी ऐसी
संपतमे मगनहै सोई मुनि जो तत्वज्ञानी है उनको रात्रि
तुल्यहै अर्थात् इस विषय मोह रूप रात्रिमे उनको कुछ
नही सूझता सोये नरके समान अचेतहै अर्थात् ब्रह्ममे
दृष्टिहै और विषय देखते नही सोई कहा कि जो निशा
सब भूतकहे प्राणियों की है उसमे मुनिजन जागते औ
र जो ज्ञानियों की रात्रि उसमे प्राणीसब जागते है जैसे
उल्लू आपतो और चमगादर छुछुन्दर आदि जीव और जो

गी॰ टी॰ हि॰

वोंकी राति और इनका दिनहै अपना सब व्यापार करते खु
शीसे हूमते रात भर तैसेही जानो ६९ ॥

दोहा

जो यहराति सभजीवकों ताम हि योगी जाग जाम हि जगत
जीव सभमुनिको सो निशाभाग ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापःप्रविशं
तियद्वत् तद्वत्कामायंप्रविशन्तिसर्वे सशा
न्तिमाप्नोतिनकामकामी ७० ॥

शांकरभाष्य टी.

विद्वषस्त्यक्तैषणस्यस्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्नत्वसंन्या
सिनः कामकामिनइत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन्ना
ह आपूर्येति आपूर्यमाणमद्भिरचलप्रतिष्ठं अचलतयाप्र
तिष्ठा अवस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रमापःसर्वतोगता
ाःप्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तंयद्वत् तद्वत्का
माविषयसन्निधावपिसर्वतइच्छाविशेषायं पुरुषंसमुद्रमि
वापोऽविकुर्वन्तः प्रविशन्तिसर्वे आत्मन्येव प्रलीयन्तेनस्वा
त्मवशंकुर्वन्ति सशान्तिंमोक्षंप्राप्नोति नेतरःकामकामीका
म्यन्तइतिकामाः विषयास्तान्कामयितुंशीलंयस्यस काम
कामी नैव प्राप्नोतीत्यर्थः ७० ॥

आनंदगिरिकृत टी.

नन्वसंन्यासिनामपि विद्यावतां विद्याफलस्यमोक्षस्य लब्धुं
शक्यत्वात् किमिति विदुषःसंन्यासोनियम्यते तत्राह विदुष
इति प्राप्ततत्त्वज्ञानवतो विवेकवैराग्यादिविशिष्टस्यैषणाभ्यः
सर्वाभ्योव्युत्थितस्य श्रवणादिद्वारासमुत्पन्नसाक्षात्कारवतो
यत्यस्य संन्यासिनो मोक्षोनान्यस्य विषयतृष्णापरिभूतस्य
१ इत्येतद्दृष्टान्तेन प्रतिपादयितुमिच्छन् रागद्वेषविप्रमुक्तैस्त्व
इतिश्लोकोक्तमेवार्थंपुनराहेतियोजना अद्भिःसमुद्रस्यसम
न्तात् पूर्यमाणत्वेवृद्धिह्रासवती नदीयास्थितिरापतेदित्या
शंक्याह अचलेति नहि समुद्रस्योदकात्मकंप्रतिनियतरू
पं कदाचिद्विवर्द्धते ह्रसतेवातेन नदीयास्थितिरेकरूपैवे
त्यर्थः तत्तद्देशाद्वापःसमुद्रान्तर्गच्छन्ति तर्हि तस्यवि

गी० क्रियावत्वादप्रतिष्ठा स्यादित्याशंक्याह स्वात्मस्थमिति इच्छाविशे
टी० षाः विषयाणां सन्निधौ विदुषि निर्विकारे प्रविशन्तोपि सन्निधा
हि० नेतस्मिन्प्रविशन्तो विकारमापादयेयुरित्याशंक्याह विषये
ति प्रवेशं विघटयति सर्वत इति योऽकाम इत्यादिश्रुतेर्विषय
विमुखस्य निष्कामस्य मोक्षो न कामकामुकस्येत्याह सशान्ति
मिति ७० ॥

स्वामिकृत टी०

४ नन्वविषयेष्वभावे कथमसौ तानभुंक्ते इत्यपेक्षायामाह
आपूर्यमाणमिति नानानदीभिरापूर्यमाणमपि अचलप्रतिष्ठ
मनतिक्रान्तमर्यादमेव समुद्रं पुनरप्यन्या आपो यथा प्रविश
न्ति तथा कामा विषया यं मुनिं अन्तर्दृष्टिं भोगैरविक्रियमाणमेव
प्रारब्धकर्मभिराक्षिप्ताः सन्तः प्रविशंति स शान्तिं कैवल्यं प्राप्नोति
न तु कामकामी भोगकामनाशीलः ७० ॥

पैशाचभाष्ये टी०

एवमविद्याविद्याभेदाद विदुषः सर्वकर्माणि विदुषस्सर्वनि
वृत्तिः स्वभावात्सकलकर्मसंन्यास एव विदुषस्त्यक्तैषणस्य
स्थितप्रज्ञस्य यतेरेव मोक्षः न कामकामी न इत्येवमर्थं दृष्टान्ते
न प्रतिपादयिष्यन्नाह आपूर्यमाणमद्भिरचलप्रतिष्ठं अच
ला प्रतिष्ठा यस्य स तमचलप्रतिष्ठं समुद्रमापः प्रविशंति य
द्वत् यथा तद्वत् तथा कामा यं प्रविशंति परमात्मज्ञानेनैव रा
गद्वेषभ्यामकम्पमाने स शान्तिं मोक्षलक्षणं प्राप्नोति न काम
कामी कामान् कामयत इति कामकामी ७० ॥

रामानुजभाष्य टी० ॥

यथात्मनैवापूर्यमाणमेकरूपं नादेया आपः प्रविशंति आसा
नू० मेताप्रवेशेऽप्रवेशे च समुद्रो न कंचन विशेषमापद्यते एवं
यं सं० सर्वे कामाः शब्दादिविषया यं मिनं प्रविशंति तदिंद्रियगोचर
तां प्राप्नुवन्ति स शान्तिमाप्नोति शब्दादीन्द्रियगोचरतामापन्ने ष्टि०
ष्वपि आत्मावलोकनतृप्त्या यो न विकारमाप्नोतीत्यर्थः स एव

शांतिमाप्नोतिनकामकामीशब्दादिभिर्योविक्रियतेसकदाचि
दपिनशांतिमाप्नोति ७० ॥

अभिनवगुप्तकृत टी॰

अतएवयोगीनकामार्थंबहिर्धावति अपितुइंद्रियधर्मतयात्
विषयाअत्रप्रविशंते नतरंगयंतिनदीवेगाइवोदधिम् एवं
तत्त्वीयोनिर्णीतः ७० ॥

परमार्थप्रपा टी॰

अथेंद्रियपरावृत्तिरुक्तास्तेनाह आपूर्यमाणमिति॥ सपुरुषः
शांतिंशमत्वमवाप्नोति सकः सर्वेकामाः सर्वेविषयायं
प्रविशंतिपराहतास्तेभवंतितत्तत्किंवत् यद्वदापोनामनदी॰
प्रवाहाः समुद्रंप्रविशंतिकिंभूतं आपूर्यमाणमप्यबहिर्निःसा
र्यमाणेभूदकेप्युपक्षीणं तथाप्यनंतैर्घासमर्थ्यासत्रप्रवाहैर्य
केपिअचलप्रतिष्ठं अनुल्लंघितमर्यादं एवंप्रकृतेपिविषय
वृत्तिषुबहिर्निसृतास्वपिस्थितप्रज्ञत्वादनुपक्षीणेऽनः प्र॰
विष्टास्वपिअहंनिरहंतैर्मिथ्यात्वाभिमानशून्यमित्यर्थः एवंवि
धएवात्मतत्त्वभाक् परंतुनकामकामीभोगकामनाशीलः ७०

वनमाली टी॰

ननुवाक्यार्थानुसंधानेविनाज्ञाननिष्ठत्वेनापिकथंविक्रम
नादिकं विषयानुभवस्तुदृश्यमानःकथंस्यात् तस्यनियत
साधनसाध्यस्यानुसंधानंविनानुदयादित्याशंक्यतस्यविष
यानुभवप्रकारमाह आपूर्यमाणमिति नदीभिरापूर्यमा॰
णंसंतंवृष्ट्यादिप्रभवाअपः सर्वाःआसमुद्रंप्रविशंतिकी
दृशमचलप्रतिष्ठं अनतिक्रांतमर्यादं अचलानांमैनाका
दीनांप्रतिष्ठायस्मिंस्तंतिवातिगंभीरंयद्वत् येनप्रकारेण
निर्विकारत्वेनतद्वत् तेनैवनिर्विकारत्वप्रकारेणयंस्थित
प्रज्ञंनिर्विकारमेवसंतःकामाःअन्यैःकाम्यमानाःशब्दाद्याः
अवर्जनीयतयाप्रारब्धकर्मवशात्प्रविशंतिनतुविकर्तुंशक्नु
वंति सशांतिंसर्वलौकिकालौकिककर्मविक्षेपनिवृत्तिमाप्नो

गी॰ ष्ठांचाप्नोतिनकामकामीकाम्यान्विषयान्कामयितुंशीलं
टी॰ यस्यसकामकाम्यतः शांतिंनाप्नोति ७० ॥
हि॰

ऊतमैवजयन्ती टी॰

नन्वेवंभूतःसंयमीकोवाभवतियस्येदृशीबुद्धिरथचेदृग्बुद्धि
युक्तोयःसःकिंवाफलमाप्नोतिइत्याशंकायांसदृष्टान्तेनाह
आपूर्यमाणमिति यद्वद्येनप्रकारेण अनेकनदनद्यादिसंब
न्धिनामहत्त्वेगवत्तराआपोजलानि आपूर्यमाणं निजा
परिमितनीरनिकायैरेवअस्खलत्तटमभिव्याप्यपूर्यमाणं
परिपूर्णमित्यनेनास्यतरनद्यादिजलाभिलाषानपेक्षत्वमुक्तं
अतएवअचलप्रतिष्ठमचलानादेयजलौघैरक्षुभिताप्रति
ष्ठास्थितिर्यस्यतथाभूतमित्यनेनास्यागाधत्वमतिविस्तार॰
त्वंचोक्तं समुद्रंसमुद्रंदजलविषयेनयस्यतेमहज्जलराशि
वेनप्रविशंतिसर्वाभ्योदिग्भ्योविशन्त्यपितनक्षोभयन्तीत्य
र्थः तद्वत्तेनैवप्रकारेणसर्वेकामाःकाम्यन्तइतिकामाःश
ब्दादयोविषयाब्रह्मादेवान्तरविषयकाःसाधनफलस
म्बन्धादिरूपाःसर्वेप्राकृतवस्तुमात्रविषयकाःसमस्ताःका
माःआपूर्यमाणंदेहगेहादौसर्वस्मिन्प्राकृतवस्तुन्यहंममे
तिभावेदेहान्तेरशुभावेहित्वान्मावलोकनोयुक्तेनकौसेक
भक्तियुक्तेनमनसैवआसमन्तात्सर्वेन्द्रियविषयभोगभ्यः
पूर्यमाणंत्वप्रिमितमितिज्ञतायतःचलप्रतिष्ठचलाचल॰
क्ष्मीविषयेयस्यसचलोविष्णुः अस्यासौचलश्चाचलःसश्चप्र
तिष्ठतेःअक्षराणामकारोस्मिइत्येवंवदमानाच्चतस्य॰
मासहितस्यविष्णोःप्रतिष्ठाप्रकर्षेणस्थितिर्यस्मिन्सतेलः
क्ष्मीनिवासनिवासभूतमित्यनेनास्यरमासहितविष्णुनिवा
सत्वेनान्यदेवादीनांब्रह्मादिप्राकृतविषयाणांचवासना॰
हितान्तःकरणत्वंनिरतिशयानंदसम्पूर्णत्वंचोक्तंसतद्रू
पेक्षण्ययमर्थोज्ञेयः नतुविष्णोःप्रतिष्ठान्तुसर्वेष्वपिभूतमा
त्रेष्वपिविषयेनतुकेवलेविष्णुभक्तिमत्स्वेवसर्वव्यापनशीलं॰

त्वादतः सर्वाणिभूतानिसंयमिनः कथंनसुः कथंवैकोविरुद्धभक्त
एवसंयमीत्याशंकायांयमैवघटनेतेइतिश्रुत्यैकेनद्वितीयान्तेन
यच्छब्दार्थेनसहसंयमीत्यस्यपदस्याभेदार्थंदर्शयन्नाह यमिति
यंविस्तारत्रयसहभाजनंसंयमिनंप्रविशंतिप्रकर्षेणविशन्तिन
कामायस्येंद्रियसन्निकर्षेतांप्राप्यवंत्यपियन्मनसिविक्रियांना
त्पादयन्ति सएवसंयमीकृत्स्नभक्तः शान्तिंभगवत्साम्यापत्ति
रूपांमुक्तिमाप्नोति नकामकामीकामान्शब्दादिविषयान्का
मयितुंशीलंयस्यतथासः यद्वाकामानांकामवतांब्रह्माद्ये
कदेवानांकामास्तन्नामीक्षाविद्येतेयस्यसः पुरुषः शान्तिंना
प्नोतियतः सकामकामिनींबुद्धिं[illegible]नेभिन्नानेकदेवविषयि
काऽनेककामनयासकलीभावेप्राप्तासतीसात्मपरमात्मत
त्वविचारेसमर्थाभवति ब्रूतोयंकामकामीस्वस्वरूपदर्शना
भावेनशान्तिंनाप्नोतीतिभावः ७० ॥

\+ एतादृशस्यस्थितप्रज्ञस्यसर्वविक्षेपशान्ति मधुसूदनी टीका । रूपार्थसिद्धेतिसदृष्टान्तमाह +

\+ सर्वाभिर्नदीभिरापूर्यमाणेसंतेवृष्ट्यादिप्रभावाप्यपिसर्वाआपः
समुद्रंप्रविशंतिकीदृशमचलप्रतिष्ठमनतिक्रान्तमर्यादंप्र
वलानांमैनाकादीनांप्रतिष्ठायस्मिन्नितिगांभीर्यातिशयउक्तः व॰
यद्वयेनप्रकारेणनिर्विकारत्वेनतद्वत्तेनैवनिर्विकारत्वप्रका
रेणयंस्थितप्रज्ञंनिर्विकारमेवसंतेकामाः प्रवृत्तलोकैः काम्यमा
नाः शब्दाद्याः सर्वेविषयाः प्रवर्जनीयतयाप्रारब्धकर्मवशात्प्र
तद्वितं॰ विशंतिनतुविकल्पेशक्नुवंति समुद्रस्थानीयः स्थित
प्रज्ञः शान्तिंसर्वलौकिकालौकिककर्मविक्षेपनिवृत्तिंबाधिता
नुवृत्त्याः विद्याकार्यनिवृत्तिंचाप्नोतिज्ञानबलेननकामकामी
काम्यान्विषयान्कामयितुंशीलंयस्यसकामकाम्यःज्ञः शान्
तिंप्राप्नोतिनाप्नोतिअपितुसर्वदालौकिकालौकिककर्मः
विक्षेपेणमहतिक्लेशार्णवेमग्नोभवतीतिवाक्यार्थः एतेनज्ञा
निनएवफलंभूतोविद्वत्संन्यासस्तस्यैवचसर्वविक्षेपनिवृत्तिरू

याज्ञीवन्मुक्तिर्देवाधीनविषयभोगेपिनिर्विकारेतस्मादिकमुक्तं
वेदितव्यं ७० ॥

सदानंदी टी.

७ तदेवंसर्वविक्षेपनिवृत्तिस्तस्यधीमतः उक्ताधुनाकामशांतिः
सदृष्टांतानिरूप्यते १ आपूर्यमाणंसर्वाभिर्नदीभिरपिसागरं
हर्षवृद्धिप्रभवाआपःप्रविशंतियथाखिलाः २ स्वतनिक्रांत
मर्यादंतिष्ठतेनिर्विकारतः धीरंतेनप्रकारेणस्थितप्रज्ञमव
स्थितः ३ निर्विकारतयासंतंकाम्यमानाअपीतरैः शब्दाद्या
विषयाःसर्वेयदिप्रारब्धकर्मणा ४ प्रविशंतिनतच्चित्तंविक
र्तुंशक्नुवंतिते समुद्रार्णवतल्पायःस्थितप्रज्ञोविचक्षणः
सर्वलौकिकविक्षेपनिवृत्तेज्ञानतेजसा अविद्याकार्यमाभा
समपित्यक्तासनेष्टिकी ६ शांतिमाप्नोतिमूढस्तुकामका
मीनशांतिभाक् काम्यान्कामयितुंशीलंयस्यसंसारिणः
सच ७ सदाक्लेशार्णवेमग्नोभवतीत्याशयोहरेः ८ । ७० ॥

नीलकंठी टी.

य[illegible]कैं[illegible]तदा[illegible]
[illegible]पादयोर्नष्टः वामितिराति सर्वेषांभूतानांमश्रान्त्यानिशेवानि
[illegible]यंस्तामत्यांतेनउलूकाद्दवानंदापूर्णायाएवसर्वेषांप्राणिनांभवं
ति तस्यांतस्मिन्यस्मेयानिषुसंयमीइंद्रियमनोबुद्धीनांनिग्रहण
शीलोयोगीजागर्तिइंद्रियादीनांदृक्शक्तिलोपेपिद्रष्टुरपतत्
[illegible]कैवाले तथाचश्रुतिः नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्य
तेविनाशित्वादिति यस्यामविद्याख्यायांनिशायांक्रियाकारका
दिरूपंसमप्रवर्तिकायांसर्वाणिभूतानिजाग्रतिनिशीथेउलूका
इव[illegible]तिष्ठंति सापविद्यापश्यतोमुनेः[illegible]
[illegible]योगिनःप्रारब्धकर्मणादिदृक्षैवसम्प्रतिबंधात्लेशतोज्ञ
[illegible]कालेपवदृश्यतोसमगाढांधकारवतीनिशा
प्रबलाज्ञकारीभवति श्रुतिश्च[illegible]हियोगिनःवासुव्यवहारा
दृष्टिमेतेनयाप्युवगाढ[illegible] यथामेयोगभाष्ये ।

[illegible]
नत्त्वमनहानियदाकामान् इंद्रियाणींद्रियार्थेभ्यो निगृहीतानी
त्यादिना सकलविषयाणां ग्रहणे तेभ्य इंद्रियादीनां प्रत्याहर
णमुक्तं तेन तेषामात्मनः पृथक्सत्वमस्तीति सिद्धं नचैनद्युना
नास्ति किंचेतन्यादिरूपत्वात्तेषां बाधात्तत्त्वदस्तीति वाच्यं इहेति
प्रतीत्यैव तन्निषेधात् नहि इह भूतले घटो नास्तीत्युक्ते घटस्य
स्वरूपं निषिध्यते किंतु तस्य भूतलसंबंधमात्रं तस्मात्कामानां
पृथक्सत्वमस्त्यतो नाद्वैतसिद्धिरित्याशंकां सदृष्टांतं परिहर
ति आपूर्यमाणमिति प्रविशंतीभिरद्भिरापूर्यमाणमप्यचल
प्रतिष्ठमनुद्रिक्तं वृद्धिहीनत्वात् एवं निर्गच्छंतीभिरद्भिरिच्यमा
नमप्यचलप्रतिष्ठमविकं ह्रासहीनत्वादित्यपि बोध्यं एवंविध
समुद्रं यद्वत् आत्मप्रभवा आपः प्रविशंति तद्वत् यं पुरुषं कामैरा
पूर्यमाणं हीयमानं वाप्यचलप्रतिष्ठं निर्विकारं वृद्धिह्रासहीनत्वा
त् आत्मप्रभवाः सर्वे कामाः प्रविशंति स एव शांतिमोक्षमाप्नोति
कदुःखोपरमं प्राप्नोति न तु कामकामी विषयार्थी अयं भावः कू
टस्थादात्मनः सर्वस्योत्पत्तिस्तत्रैव लय इति सर्वश्रुतिस्मृतिप्र
सिद्धं तेन कामानां ग्रहणे तेभ्य इंद्रियाणां प्रत्याहरणे समर्थमा
णं न तेषां परमार्थतः पृथक्त्वं साधयति बहुप्रमाणविरोधा
त् किंतु पारमेऽप्रसिद्धं पृथक्सत्वमभिप्रेत्य ग्रहणादिकमुक्तं
प्रविलापनं त्वेवमेव व्याख्येयं यथाग्नेयपथिकृतेष्टाकपालं नि
र्वपेदित्यादौ निर्वपतिना याग उच्यते न तु श्रौतार्थमात्रं तद्वदि
हापि ज्ञेयं नेह नानास्तीत्यपीह परिदृश्यमाने प्रपंचे आत्माति
रिक्तं नाना किमपि नास्तीत्येवंपरतया व्याख्येयं तथा च आत्मै
वेदं सर्वं ब्रह्मैवेदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादयः श्रुतिवादाः सं
गच्छंते आत्मनि कल्पितस्यास्य तत्रैव निषेधेनान्यत्रसत्त्वाद्युप
पत्तेर्न कामानां पृथक्त्वमस्तीति युक्तमेव समुद्रदृष्टांतः य
था समुद्रात्पृथग्गंगायाः सत्त्वमस्तीति तत्र कार्यकारणसत्ता
तिरिक्तसत्ताया अभावात् वाचारंभणं विकारो नामधेयमिति
कार्यस्य वागालंबनमात्रत्वश्रवणादित्यन्यत्र विस्तरः ७० ॥

गी॰ टी॰ द्वि॰

हृदयेऽवस्थानम् उपमान **आनंदी टीका** निदर्शनेन स्थितप्रज्ञस्वरूपमाह +

आपो नानादिग्गतगंगत सविद्रूपा समुद्रं नाभिरापूर्यमाणम् पार
अचलप्रतिष्ठमपरित्यक्तपूर्वावस्थं निश्चकंपां गंभीरं निजस्व॰
त्तिस्थं यथा प्रविशन्ति सावेगमागताश्च पितस्मिन्नेव लीयन्ते
तद्वद्यास्थितप्रज्ञं सर्वे कामाः प्रविशन्ति याः प्रसंगागतस्रवो॰
दिहेतुभिर्विषयैः भुक्तैरपि क्षोभं विना विकारं नेतुं न शक्यन्ते स
एव शांतिमाप्नोति न तु कामकामी अप्राप्तपरिहृतेन्द्रियग्रा॰
ह्योऽपि मनसा कामान्विषयान्कामयमानः शांतिं नाप्नोति
अयं तात्पर्यं ज्ञानसमुच्चितेन कर्मणैव मुक्तिः न तु कर्मसंन्या
सेन ७० ॥

रामकंठी टीका

समुद्रः उपमानिशयः शांतिं सकलविकल्पकल्लोलक्षोभप
रित्यागस्थितिमित्तवितन्त्रितामधिगच्छति प्राप्नोति कोऽसौ यं
कामा विषयास्तद्वत्प्रविशन्ति निरभिलाषमेवावगाहन्ते कथं
१द्रि यथा समुद्रं नानागन्तवागत सविद्रूपा आपः कीदृशं नाभिराप
र्यमाणं भ्रियमाणमपि अचलप्रतिष्ठं निश्चकं पापारगंभीरं नि॰
जावस्थानं अनेनोपमानेन सन्यासति सामर्थ्यात्स्वधमानेद्र
पिस्त्रवादिहेतुभिः शब्दादिभिर्यः क्षोभं प्रापयितुं न शक्यते स एव शां
नतु तिमुच्यते यस्तेषु सन्निहितेषु शांतः यथाक्रमं विकारहेतौ
सति विक्रियन्ते येषां न चेतांसि त एव धीरा इत्यत एवाह न का
मकामी शांतिमाप्नोति [illegible]
[illegible] ७० ॥

लासिवी [illegible] टीका

नन्वस्फुटतया पूर्वप्रकाशितन्ड्वतेः स्त्रवड्ः स्वादिभिर्विक्रिया
स्यात्तस्यैतदुपमाननिदर्शनेन तत्स्वरूपमाह आपूर्यमाणमि
ति भोगैरविक्रियमाणमेवं योगी त्वभिलाषेण न बहिर्धावति
अपि त्विन्द्रियपथमनुयातान्विषयाननुप्रविशन्तो न तरंगयन्तीत्य
र्थः ७० ॥

+ प्रारब्धकर्मभिराक्षिप्ताः सन्तः प्रविशन्ति स शान्तिं मोक्षाख्यां प्राप्नोति न तु कामकामी विषयाभिलाषुकः

नानानदीभिरापूर्यमाणमप्यचलप्रतिष्ठमनतिक्रान्तमर्यादमेव समुद्रं प्रविशन्त्यापो यथा प्रविशन्ति तथा कामा यं मुनिमन्तरेण इति

पंचोलीटीका

विदुषः स्वकैषणास्यस्थितप्रज्ञस्य यतेः एवमोक्षप्राप्तिः नत्वसंन्यासि
नकामकामिनः इत्येतमर्थं दृष्टांतेन प्रतिपादयिष्यन्नाह आपूर्यमा
णइति अद्भिः आपूर्यमाणमचलप्रतिष्ठमचलतया अवस्थितं समु
द्रं यद्वत्प्रविशंति तद्वत्सर्वे कामाः सर्वे मनोरथाः यं यतिं प्रविशंति आ
त्मन्येव लीयंते स शांतिं मोक्षं प्राप्नोति न कामकामी विषयकामना॰
युक्तः न प्राप्नोति ७० ॥

रणवीरसमिद्धोधिनी ॥

अतएव आपूर्यमाणमिति आपो नदीवेगाः समुद्रं यद्वत्प्रविशं
ति अंतर्लीना भवंति प्रवेशप्रकारं विशेषणद्वारेणाह आपूर्य
माणं आसमंतात्पूर्यत इति न कश्चिद्देशो यस्य स यत्र न प्रविशंति
नित्यं तेषां प्रवहनस्वाभाव्यात् तथा सत्यपि अचलप्रतिष्ठं वेला
रूपा मर्यादा प्रतिष्ठा ततो नोत्तरंगयति एवं कामाः अन्यथाप्र
तिपन्नाः गुरुरयं न हंतव्य इत्यादिरूपा मनोधर्माः संकल्पा यं प्र॰
विशंति स्वभावात्स्वेपंकं वैति परं तत्रैवांतर्भवंति न स्वनिश्चया
च्चालयंति स एवं कर्मयोगी योगीयांतिं दुःखनिवृत्तिं प्राप्नोति न पुनः
कामकामी काम्यंत इति कामाः पुत्रादयः तान्कामयितुं संकल्प
यितुं शीलमस्येति ताच्छील्ये णिनिः ताच्छील्यं च तत्स्वभावता त
थाचायमर्थः स्वभावस्यानिवृत्तेर्यः कामानेव संकल्पयति कथ
मेतान्हन्मीति न तु प्रारभ्यमाणां क्रियां निर्वर्तयति निश्चयदार्ढ्या
भावात्स कथं शांतिभाग्भवेदिति यद्वा नकामकामीत्येकं पदं तत्र
त्यस्य देहत्रगर्भविशेषणं कं सुखं न कं नकं दुःखं न समासः तद
समंतात्लीनाति दूरीकरोतीति नकामः स्वर्गः तं कामयतीति क्ष
त्रियस्य संमुखं युद्धमाणत्यागादवश्यं भाविनी स्वर्गप्राप्तिरिति॰
हतीयो निर्णीतः ७० ॥

मनुभाष्य

आपूर्यमाणम् इति यो विषयैरापूर्यमाणोप्यचलप्रतिष्ठो भवति
नोत्सेकं प्राप्नोति प्रलयं च करोति स मुक्तिं प्राप्नोतीत्यर्थः एतदे
न च प्रलयं करोति न चाभावं गच्छति न हि समुद्रः सरित्प्रवेशा
प्रवेशनिमित्तौ वृद्धिशोषौ बहुतरौ प्राप्नोति प्रलयं च करोति स
मुक्तिं प्राप्नोतीत्यर्थः एतदेव प्रपंचयति ७०॥

भाषा अनुवाद

जो कहो कि विषयमें दृष्टि विना फेरिवे ज्ञानी विषय भोग कैसे करतेहै इस आशयमे कहतेहै कि जैसे नद नदी नारीके जल प्रवाहकेजोरसे अचल समुद्रमे जाय प्रवेश करते पर समुद्रकी इच्छा नही तैसेही विषय सब अदृष्ट करि पूर्वकर्मके अनुसार भोग इच्छा हीन मुनिके अंतःकरण में अदृष्टके जोरसे कर्मके द्वारा विषय प्रवेश करते परन्तु तिनके द्वारा ही अर्थात् विषय भोग करते भीवे कैवल्य मुक्ति पावतेहै और कामके कामी भोग कामना । शील कहै विषय स्वभाव नही होतेहै ७० ॥

चौपई॥

पूर्णअचल प्रतिष्ठत होई प्रविशेजलसमुद्रज्योसोइ त्यों
समकामलिप सोशांति पावें विषयीजीवसुखनिकनपा
वें ७०॥

विहायकामान्यःसर्वान् पुमांश्चरतिनिस्पृहः
निर्ममोनिरहंकारः सशांतिमधिगच्छति ७१

शांकरभाष्यं

यस्मादेवं तस्मात् विहायेति विहाय परित्यज्यकामान् यः
४५ संन्यासीसर्वानशेषतःकार्त्स्नेन चरति जीवनमात्रचेष्टाशेषः
पर्यटतीत्यर्थः निस्पृहः शरीरजीवनमात्रेपिनिर्गतास्पृहाय
स्य सनिस्पृहःसन् निर्ममइति ममत्ववर्जितः शरीरजीव॰
नमात्राक्षिप्तपरिग्रहेपि ममेदमित्यभिनिवेशवर्जितः निर॰
हंकारो विद्यावत्त्वादिनिमित्तात्मसंभावनारहितइत्यर्थः
सएवंभूतःस्थितप्रज्ञोब्रह्मवित्शान्तिं सर्वसंसारदुःखोपर
मत्वलक्षणांनिर्वाणाख्यामधिगच्छति प्राप्नोति ब्रह्मभूतो
भवतीत्यर्थः ७१ ॥

आनंदगिरिकृतटी॰

यदिगृहस्थेनापि मनसासमस्ताभिमानंहित्वा कूटस्थब्रह्मा
त्मत्वेनपरिभावयता ब्रह्मनिर्वाणमाप्यते शांतं तर्हि मोक्षा
दिविडम्बनमेवेत्याशंक्याह यस्मादिति शब्दादिविषयप्रव
णस्य तत्तदिच्छाभेदभागिनो नमुक्तिरिति व्यतिरेकस्योक्त
त्वात् पूर्वोक्तमन्वये निगमयितुमनंतरं वाक्यमित्यर्थः
अशेषविषयत्यागे जीवनमपि कथमित्याशंक्याह जीव
नेति सम्भवद्रागद्वेषादिकेदेशे निवासव्यावृत्त्यर्थं चरती
त्येतद्व्याचष्टे पर्यटतीतिविहाय कामानित्यनेनपुनरुक्तिं
परिहरति शरीरेति निस्पृहत्वमुक्त्वा निर्ममत्वात्पुनर्वद
न्कथंपुनरुक्तिमार्थिकींनपश्यसीत्याशंक्याह शरीरजीव
नेति सत्यहंकारे ममकारस्यावश्यकत्वान्निरहंकारंव्याक
रोति विद्यावत्त्वादीति सशान्तिमाप्नोति इत्युक्तमुपसंहर
ति सएवंभूतइति संन्यासिनो मोक्षमपेक्ष्यमाणस्य सर्व॰

गी॰ कामपरित्यागादीनि श्लोकोक्तानि विशेषणानि यत्रसाध्यानि
टी॰ तत्साध्यानि फलस्तु कैवल्यमित्यर्थः ७१ ॥
द्वि॰ स्वामिकृत टी॰

यस्मादेवंतस्माद्विहायेति प्राप्तान्कामान्विहायत्यक्त्वोपेक्ष्या
प्राप्तेषुचनिःस्पृहः यतोनिरहंकारः अतएवतद्भोगसाधनेषु
निर्ममः सन्नत्रदेहेष्विभूत्वायश्चरति प्रारब्धवशेनभोगान्भुंक्तेय
त्रक्वापिगच्छतीतिवासशांतिंप्राप्नोति ७१ ॥

पिशाचभाष्ये टी॰

यस्मादेवंतस्मात् विहायेति चरतिशरीरजीवनमात्रमेवचे-
ष्टते निस्पृहः शरीरजीवनमात्रेपिनिर्गतास्पृहायस्यसनिस्पृ-
हः उपेक्षकः निर्ममः शरीरादौममेदमितिबुद्धिरहितः निरहं-
कारः विद्यावत्त्वादिनिमित्तेनात्मसंभावनारहितः सशांतिम
विद्योपरमलक्षणामधिगच्छति ७१ ॥

रामानुजभाष्ये टी॰

काम्यंतइतिकामाःशब्दादयोविषयाःयःपुमान्शब्दादीन्स-
र्वान्विषयान्विहायतत्रनिस्पृहःममतारहितश्चअनात्मनिदे-
हेआत्माभिमानरहितश्चरतिसआत्मानंदृष्ट्वाशांतिमृगच्छति ७१

अभिनवगुप्तकृत टी॰

सयोगीसर्वकामसंन्यासित्वाच्छांतिरूपंमोक्षमेति ७१ ॥

परमार्थप्रपा टी॰

अथतदेवप्रकटयति विहायेति यःपुमान्साधितपुरुषार्थः
सर्वान्कामान्विषयान्विहायतृणोपमान्कृत्वानिस्पृहःसंचरति
अथनिस्पृहत्वमेवाह निर्ममइति विषयेषुसत्स्वपिममताभि
मानशून्यःपराहतेषुनिरहंकारः अहंकृतवानस्मीतिअभावाशू
न्यः एवंविधोयोनिस्पृहःसएवशांतिमधिगच्छतिनान्यः ७१ ।

वनमाली टी॰

एतदेव प्रपंचयति विहायेति सर्वान्बाह्यान्गृहक्षेत्रादीन्
आंतरान्मनोराज्यरूपान् वासनामात्ररूपांश्चपथिगच्छतस्तृ
णस्पर्शतुल्यान्कामांस्त्रिविधान्विहाय यः शरीरजीवन- का°
मात्रे निःस्पृहः सन्यतो निरहंकारो देहेंद्रियादावहं ममेति
धीशून्यः निर्ममो देहयात्रामात्रार्थेपि प्रारब्धकर्माक्षिप्ते कौ
पीनाच्छादनादौ ममेदमिति धीशून्यः सन्यः प्रमान्चरति
प्रारब्धकर्मवशाद्भोगान्भुंक्ते स एवंभूतः स्थितप्रज्ञः सर्वसं
सारदुःखोपरमरूपां शांतिं प्राप्नोतीत्यर्थः तदीदृशं व्रजने
स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं परिसमाप्तम् ७१ ॥

अथ मैवजयन्ती टी॰

यस्मात्कारणात्कामकामी स्वस्वरूपदर्शनात् शांतिं नाप्नोति त
स्माद्यः सकलान्कामांस्त्यजति स एव शांतिं प्राप्नोतीत्याह वि
हायेति श्रीकृष्णकृपासहकृतेन निजकर्मणा लब्धान्सर्वा
न्कामान्शब्दादिविषयान्क्रमेणतरदेवलोकादिप्राप्तिका
मान्वा सर्वान्प्राकृतरूपान् विहाय परित्यज्य निस्पृहः अ
लब्धविषयेषु या स्पृहाकांक्षा तद्रहितः ननु लब्धानां परि
त्यागोऽलब्धानां स्पृहारहितइति ज्ञतो भवतीत्यपेक्षायामाह
तद्गर्भितौ विशेषणावाह निर्ममो निरहंकार इति यतो हेतो
निर्ममः यो ममकारास्पदेषु लब्धेषु तत्तद्विषयेषु मत्स्वइदं व
स्तु ममैव नान्यस्येत्येवंभावशून्योस्ति अतस्तस्य तेषां परित्या
गे नातिकष्टो भवति यतश्च निरहंकारः योऽहंकारास्पदे स्व
शरीरेपीदं शरीरमहमेव चेतनरूपात्मनोन्यदिदं न भवती
ति बुद्धिरहितो भवत्यतो हेतोस्तस्य लब्धेषु देहसम्बन्धिरू
पेषु कलत्रपुत्रादिषु स्पृहाशून्यत्वं संभवत्येव एवंभूतः सन्
यः पुमान् पुरुषः चरति विषयान्भुनक्ति विषयेषु गच्छति
वा स संयमी पुरुषः शांतिं संसारान्निवृत्तिमधिगच्छति प्रत्ये
नैप्राप्नोति विषयभोगानुपकुर्वाणोपि तेषु मनाशक्तत्वेना

गी.
टी.
द्वि.

नैषां भूतानामतिप्रबलैरपि तैरसावनभिभूयमानः सन्नात्मा
वलोकनपूर्विकया [illegible]कभक्तिनिष्ठिकयो ब्रह्मापरमनि
वृत्तिं प्राप्नोतीत्यभिप्रायः ७१ ॥

मधुसूदनी टी. ॥

यस्मादेवं तस्मात्प्राप्तानपि सर्वान्बाह्यान्शब्दस्पर्शादीनन्तरा
न्मनोराज्यरूपान्वासनामात्ररूपांश्च पथि गच्छतस्तृणस्पर्श
वदल्पान् कामांस्त्रिविधान्विहायोपेक्ष्य शरीरजीवनमात्रेऽपि नि
स्पृहः सन्नयतो निरहंकारः शरीरेन्द्रियादावहमित्यभिमान
शून्यः विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इति वा प्रतो
निर्ममः शरीरयात्रामात्रार्थेऽपि प्रारब्धकर्माक्षिप्ते कौपीना
च्छादनादौ ममेदमित्यभिमानवर्जितः सन्नयः प्रमांश्चरति
प्रारब्धकर्मवशेन भोगान्भुंक्ते यादृच्छिकतया यत्र क्वापि
गच्छतीति वा स एवंभूतः स्थितप्रज्ञः शान्तिं सर्वसंसारदुः
खोपरमलक्षणमविद्यातत्कार्यनिवृत्तिमधिगच्छति ज्ञान
बलेन प्राप्नोति [illegible]नदीदृशं ब्रजनं स्थितप्रज्ञस्येति चतु
र्थप्रश्नस्योत्तरं परिसमाप्तं [illegible]
[illegible]
[illegible]
[illegible] ७१ ॥

मदानंदी टी.

यस्मादेवमतः प्राप्तानपि बाह्याञ्शब्दादिकान् वासनामा
त्ररूपांश्च मनोराज्यात्मकानपि १ पथि प्राप्तं तृणस्पर्श
वदल्पत्वात्त्रिविधानपि उपेक्ष्य देहयात्रायामपि यो निःस्पृ
हो मुनिः २ देहाद्यहंकृतेः शून्यः स्वश्लाघादिविवर्जितः ३
तादात्म्याध्यासशून्यत्वात्संसर्गाध्यासवर्जितः ४ शरीरया
त्रामात्रार्थे प्राप्ते प्रारब्धकर्मणा ममेदमिति तत्रापि ममत्वाभि
मानविवर्जितः ५ भोगान्प्रारब्धवशतो भुंक्ते भोक्तृत्वमंतरा ६

अथव्रजेत किमिति चतुर्थप्रश्नंसमर्थयति विहायेत्यादिद्वाभ्यां
यः सर्वान्कामान्पूर्वोक्तलक्षणान्संकल्पात्मकान् निःस्पृहः फला
भिसंधिरहितः सिद्ध्यसिद्ध्योःसमः इति यावत् निर्ममः ममतारहि
तः सत्संबंध्ययं वधानदं इति संकल्परहितः निरहंकारः ईश्वर
एव कर्तेति स्वात्मन्यनारूपाभिमानः वक्ष्यति च मय्येवैते निह
ताः पूर्वमेव निमित्तमात्रं भव सव्यसाचि इत्यादि चरति स्वधर्मे
प्रवृत्तो भवतीति स शांतिमानंदमाप्नोति ७१॥

मधुभाष्य

विहायेति कामान्विषयान्निस्पृहतया विहाय यश्चरति भक्त
यति भक्तयामीत्यहंकारममकारवर्जितश्च मद्दिष्टमान् स
एव मुक्तिमधिगच्छतीत्यर्थः उपसंहरति ७१॥

त्यर्थःज्ञानेतत्साधनेकर्मसत्वशुद्धिश्चतत्फले तत्फलेज्ञान
निष्ठेवेत्यध्यायेस्मिन्प्रकीर्तितम् ७२ इतिश्रीमधुसूदनीटी॰
कायांद्वितीयोध्यायः २ ॥

सदानंदी टी॰

एवंचतुर्णांप्रश्नानामुत्तरव्याजतोत्रच तत्वविल्लक्षणान्यता
न्यायविलानिमुमुक्षूणां १ प्रकर्तव्यतयोक्तानिजीवन्मुक्त्यैक
सिद्धये स्तूयतेज्ञाननिष्ठयमधुनात्रोपसंहृतौ २ एषाचयेया॰
काब्राह्मीयाब्रह्माद्वैतैकगोचरा निष्ठाचकर्मसंन्यासपूर्वि
काज्ञानलक्षणा ३ एनांब्राह्मीस्थितिंप्राप्यःकोपिनविमु
ह्यति मोहहेतोरविद्यायाबाधितत्वात्रसंभवः ४ अस्यामेत
चवयसिस्थित्वामनसिनिश्चलो ब्रह्मात्मनिर्हेतिंनित्यामो॰
क्षाख्यामधिगच्छति ५ किंपुनर्वाच्यंब्रह्मचर्यादेवसंन्यस्ययः
पुमान् यावज्जीवंस्थितावस्यांब्राह्मीमेवावतिष्ठते ६ सया
तिब्रह्मनिर्वाणमित्यपराशयोहरेः ७ वैधोच्छ्रयात्मबोधेन
दत्तमतिमलोच्छेदनार्थंस्वधर्मे तज्जोशुद्धिंततोज्ञाःविलक
रणफलेज्ञाननिष्ठापरेष्टा योभक्त्यायशियायावदत्मलयशाः
श्रीपतिर्धर्मगोप्ता सश्रीकृष्णोऽखिलस्यभ्रमतिमिरहरोपात
भास्वान्ममांतः ८ ७२ ॥ इतिसदानंदीटीकायांद्वितीयोध्या
यः २ ॥

नीलकंठी टी॰

नीतिमाहितेतिकर्मयोगप्राप्यसांख्ययोगनिष्ठाफलेनस्तुवन्नुपसं
हरति एषेति एषास्थितप्रज्ञलक्षणप्रसंगात्कथिताब्राह्मीब्र
ह्मविषयेनाब्रह्मविद्वचनेब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः नैना
यंब्राह्मींस्थितिनिष्ठांप्राप्यनरोनविमुह्यति पुनर्मोहंनप्राप्नोति
अस्यामंतकालेपिस्थित्वेतिसकृज्ज्ञानापीयंफलवतीतत्पाप्त
नावच्छिराभ्यासस्यापेक्षाकं ब्रह्मसच्छतिप्राप्नोति किंलोकां
तरवत्तगतिप्राप्यंब्रह्मनेत्याह निर्वाणमिति निर्गतंवानंगम
नंयस्मिन्प्राप्यब्रह्मणितन्निर्वाणंतथाचश्रुतिः ननस्यप्राणाउत्क्रा

गी॰
टी॰
द्वि॰

मेत्यैवमसमवनीयंतेनब्रह्मैवसन्ब्रह्माप्येतीति गतिमंतरेणप्रा
णरूपोपाधिप्रविलयमात्रान्घटाका शस्यमहाकाशत्वप्राप्ति
वत् जीवस्यब्रह्मप्राप्तिमाह अंतकालेपीत्यपिशब्दात् योब्रह्म
चर्यादारभ्यावतिष्ठतिसब्रह्मनिर्वाणंकैमुतिकन्यायेनप्राप्नो॰
तीतिगम्यते अस्याध्यायस्यार्थःसंगृहीतोमधुसूदनश्रीपादैः
ज्ञानेतत्साधनेकर्मसत्वशुद्धिस्तुतत्फलं तत्फलंज्ञाननिष्ठे
वेत्यध्यायेस्मिन्प्रकीर्तिते इतिश्रीनीलकंठी टीकायांद्विती
योध्यायः २ ॥ ॥ ॥

आनंदी टीका

एतदध्यायार्थमुपसंहरति एषानैवाहंजातुनासमित्या
रभ्याध्यायांतेमोक्ता ब्राह्मीब्रह्मणःपरापरस्वरूपस्यपरमेश्व
रस्यसंबन्धिनीस्थितिर्नित्यानित्यवर्तनप्रकारः तथाब्राह्मी
स्थितिर्यथायुक्ताब्रह्मणिस्थीयतेसास्थितप्रज्ञताचतेश्लोके
नन्वयः हेपार्थएतांद्विप्रकारामेवब्राह्मींस्थितिंप्राप्य
विचार्यलब्ध्वाचपुरुषोनमुह्यति अनात्मन्यात्मभ्रमरूपमिथ्या
ज्ञानेनविषयभोगेनलोभंचनाप्नोति अस्यांब्राह्म्यांस्थितावंत॰
कालेपिस्थित्वानिर्वाणंप्रशांतंब्रह्मस्वरूपंतिप्राप्नोति अपिश
ब्दादयंवाक्यार्थः इयंस्थितिर्हिबहुतरप्रयाससाध्यापरमेश्व
रानुग्रहलभ्यावेतिअंतकालात्प्राक् हठतरश्चेतेंद्रियसंघाते
सर्वविमर्शासमर्थेदेहेसतिजातायामपिनिरंतराभ्यासक्रमे॰
णवापरमेश्वरानुग्रहेणांतकालेपिविकलेंद्रियभूतसंघाते
मरणावस्थासमयेप्यस्यांस्थित्वास्थितप्रज्ञतामधिगम्यनिःश्रे
यसमवाप्नोतीतिसिद्धम् ७२ इतिश्रीआनंदी टीकायांद्विती
योध्यायः २ ॥

समकंठी टीका

एषाविहायकामान्यःसर्वानित्यनेनग्रंथेनप्रतिपादिताब्रह्मणः
परस्यतत्वस्यपरमात्मसंज्ञकस्यसंबन्धिनीस्थितिः एतयाब्रह्म
णिस्थीयतेइतिविषयान्तरनिहननितयाप्रतिष्ठाक्रियतेअत

गेंद्वितीयेध्यायेस्मिन्हृदयइवगंभीरविमले गृहीतेगीतानांविवुधदयितानांप्रणयतः तदाश्लेषानंदा
मृतरसमहर्द्वैरसयतां सदावःसंभावोभवतुकृतकृत्यःकृतधियाम् ॥+

एवैनांप्राप्ययथोक्तेनक्रमेणस्वात्मीकारेणस्वीकृत्याभिषुक्तेन न
मुह्यति देहादिष्वात्मप्रत्ययरूपंवैचित्र्यंभजते यतोस्यामंतका
१म लेपिपरसमयेपिस्थित्वाविश्रम्यनिर्वाणंनानाविकल्पहानात्मप्रत्य
यास्तमयात्ब्रह्मपरंतत्वस्वभावमयंगच्छति तदेकात्म्यमापद्य
तइत्यर्थः ॥७२॥ इतिरामकंठीटीकायांद्वितीयोध्यायः २ ॥

~~[illegible]~~ वसवगमी टीका

अथैवंविधायाःसत्पुद्रावस्थायाःसंन्यासेनरमहिमानमाह एषेति
एषोक्तरूपाब्राह्मीस्थितिर्ब्रह्मज्ञानावस्थाएनांप्राप्यनमुह्यति दे
हाद्यात्मप्रत्ययंनभजते यतोस्यामवस्थायामंतकालेपिस्वल्प
समयेपि ईश्वरानुग्रहेणज्ञापितलक्षणमात्रंस्थित्वाब्रह्मनिर्वाणंपर
तत्वेलयंगच्छतिप्राप्नोतिइति ॥७२॥ इतिवसवगमीटीकायांद्विती श्री
योध्यायः ॥२॥ तथोक्तंविदर्केषुहिश्रीभगवदाशयज्ञेनस्वामिना ॥ ध्रात्वाजन्मप्रभृतिभवतःसेवनंतद्विलोके वाक्येनापरिमितफलंभुक्तिमुक्तिप्रकारंज्योतिर्मात्रःस्फुरति पथमितोजीवितोतेपिभास्वन्निर्वाणयुग्मवसिसन्तानेनकेनः समाप्यः ॥+

पंचोली टीका

सेषाज्ञाननिष्ठास्तूयते एषेति हेपार्थएषाब्राह्मीयथोक्तास्थितिःस
र्वसंन्यासब्रह्मस्वरूपेणावस्थानमित्येतत् एनांस्थितिंप्राप्यनविमु
ह्यतिमोहंनप्राप्नोतिअंतकालेपिअंतेवयस्यपिअस्यांयथोक्तायांब्रा
ह्म्यांस्थित्वाब्रह्मनिर्वाणंमोक्षंगच्छतिप्राप्नोतियःब्रह्मचर्या
देवसंन्यस्ययावज्जीवंब्रह्मण्येवावेतिसब्रह्मनिर्वाणंगच्छतितत्रकिं
वक्तव्यं ॥७२॥ इतिश्रीपंचोल्यांद्वितीयोध्यायः २

~~[illegible]~~वीरसमिद्धोधिनी ॥

एषेति वेदस्तत्वंतपोब्रह्मेत्यनुशासनात्ब्रह्मवेदः सएवात्रप्रक्रांत
त्वादनुवेदस्तद्विषयाब्राह्मी एषापूर्वोक्तलक्षणास्थितिर्निष्ठाएनां
प्राप्यनकश्चित्त्रिवर्गेष्वपिविमुह्यति अस्यांनिष्ठायांस्थित्वानि
श्चयंप्राप्यांतकालेपिशुद्धसत्वमवगाहमानःतत्पदंगच्छति य
दुक्तं द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ तथाचयोगयुक्तानां
तपस्विभिर्योह्यचिरेणलभ्यते प्रयत्नतःसत्रिभिरिष्यतेचया प्र
यातितामाशुगतिंमनस्विनोग्राम्यमेधेपशुतामुपागताइति ७

ति च तदर्थो निर्णीतः ७२ इति श्रीरामवीरसमिद्धोधिन्यां
गीताव्याख्यायां द्वितीयोऽध्यायः २॥

मधुभाष्य

एषेति ब्राह्मी स्थितिः ब्रह्मविषया स्थितिर्लक्षणे अन्तकालेप्य
स्यां स्थितः स्थित्वैव ब्रह्म गच्छति अन्यथा जन्मान्तरं प्राप्नोति
यं यं वापीति वक्ष्यमाणत्वात् ज्ञानिनामपि सति प्रारब्धकर्म
णि शरीरान्तरं युक्तं भोगेन त्वितरे क्षपयित्वा संति हि बहुशरीर
फलानि कर्माणि कानिचित् समस्तजन्मनि विप्रः स्यादित्यादे
र्दृष्टेश्च ज्ञानिनामपि बहुशरीरप्राप्तेः तथा चोक्तम् स्थितप्रज्ञोपि
यत्स्वर्गं प्राप्य रोहयपदं ततः साकर्षणात्ततो मुक्तिमगाद्धि तत्प्र
सादत इति गारुडे महादेवप्रभृतीनां तत्त्ववमुक्तिनिरूप्यत इ
ति च नारदीये निश्चितफलं च ज्ञानं तस्य तावदेव चिरं यद्भव
नार्चिषमेवाभिसंभवतीत्यादिश्रुतिभ्यः न च कार्यस्य स्वरूपेणा
तद्यथैषीकातूलं तद्यथा शुष्करूपलाभे ज्ञानाग्निः सर्वकर्मा
णीत्यादिवचनेभ्यः प्रारब्धेतरविरोधः प्रमाणाभावाच्च न च
तच्छास्त्रं प्रमाणं अनुपादकरणादानां सांख्ययोगजैनाद्भूतां
मतमालब्धये वेदरूपयंत्यत्वचेतस इति निंदनात् यत्तु स्म
तिस्तत्रापि वभक्तानां ज्ञानिपरत्वमेव नमस्यत्वं नहि तेषामपी
तरत्र यथा विरुद्धार्थप्रामाण्यं तथा चोक्तं सेवकाद्भ्रमदोषादो मो
हनशास्त्राणि कारय अतथ्यानि वितथ्यानि दर्शयस्व महाभु
ज प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु इति वाराहे कल्पि
तानि च मिश्राणि रुद्रो विलुप्त्रचोदितः वकारपापशास्त्राणि विष्णु
रूपवधास्तत्प्रचोदिताः दधीच्याद्याः इतराणि योज्यान्यन्या
विरोधत इति नारदीये अतो ज्ञानिनां भवत्येव मुक्तिः न चोक्तं

ज्ञानिनांकर्मयुक्तानांकायत्यागक्षणेयदा विष्णुमायातदाते
षांमनोवाश्यकरोतिद्वेतिगाकडे नवान्येषांतदास्मृतिर्भवति
बहुजन्मविपक्केनभक्तिज्ञानेनयेहरिं भजंतितस्यस्मृतिस्तेते दे
वोयाति नचान्यथेत्युक्तेब्रह्मैवैवतं निर्वाणमशरीरं कायोबा
णंशरीरंचेत्यभिधानात् एतद्धाणमवप्स्यतेति प्रयोगाच्च।
निर्वाणात्मप्रतिपादनमतींद्रियाइत्यादिवत् कथमन्य।
थासर्वपुराणादिप्रसिद्धाकृतिर्भवतउपपद्यते नचान्यरूप
वतउत्तमब्रह्म ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यतइति
भागवते भगवंतंपरंब्रह्मपरंब्रह्मजनार्दनः परमंयोमहद्ब्रह्म"
यस्मात्परमतीतोहमक्षरादपिचोत्तमः योसौवतींद्रियग्राह्यः
नास्तिनाशुपयस्मसमंनभूतंनभविष्यति नतत्समोस्त्यभ्य
कःउतोन्योइत्यादिभ्यः नचतद्ब्रह्मणोऽशरीरत्वादेतत्कल्प्य
तस्यापिशरीरश्रवणात् आनंदरूपममृतं यद्विभातिज्योतीः
दहरोस्मिन्नंतराकाशइत्यादिषु यदिरूपंनस्यात् आनंदमि
त्येवस्यात् नत्वानंदरूपमिति कथंहिरण्यरूपत्वस्यादरूपस्य
कथंचदहरत्वं दहरस्यस्यकेचित्त्वदेहेत्यादौरूपवानुच्यते
सहस्रशीर्षापुरुषः रुक्मवर्णंकर्तारं आदित्यवर्णंतमसः पर
स्तात् सर्वतःपाणिपादंतत् विश्वतश्चक्षुरित्यादिवचनात्
विश्वरूपाध्यायादेश्चरूपवानवसीयते अतिपरिपूर्णतमत्वा
नैश्वर्यवीर्यानंदशक्तिमांश्चभगवान् परास्यशक्तिर्विविधै
वश्रूयतेस्वाभाविकीज्ञानबलक्रियाच यःसर्वज्ञः आनंदब्र
ह्मणः एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंति अना
दिमध्यांतमनंतवीर्यंसहस्रलक्षामितकांतिकांतं मध्यनंतगु
णोनंतेगुणतोनंतविग्रहे विज्ञानशक्तिरहमासमनंतशक्तेः
तमेतमेवंविद्वान् आत्मानमनन्यंवसवेदविद्वान् अन्यतमो
मुकुंदलोकानामलोकेभगवत्पदार्थः ऐश्वर्यस्यसमग्रस्य अतो

वृपरिपूर्णेनेहत्वं ज्ञानं च सौभगं यच्चात्यद्भुतं सर्वं वा शक्तः क
र्तुमतः परंतादिभ्यः तानि सर्वाण्यन्योन्यस्वरूपाणि विज्ञानमा
नंदं ब्रह्म आनंदो ब्रह्मेति व्यजानात् सत्यं ज्ञानमनंतं ब्रह्म यस्य
ज्ञानमयं तपः समाभवत् प्रविष्टस्वाहा न तस्य प्राकृता मूर्तिर्मां
समेदोस्थिसंभवा न योगित्वादीश्वरत्वात्सत्यरूपोच्युतो विभुः
स देहः सर्वगो यस्मात् ज्ञानभाः सत्यविक्रमः ज्ञानः ज्ञानः सुखः
सुखः सर्वविभुः परमोक्षर इति पैंगिखिले देहोयं मे सदानंदो
नायं प्रकृतिनिर्मितः पौष्करे सर्वे चेतेन नारायणोस्य दे
हमित्यादि ब्रह्मवैवर्ते न देवलीलया वासौ परिच्छिन्नादिरूपेण
दर्शयति मायया [illegible] गर्भे वसेद्व्यान वापि वसुदेवतः न वा
पि मायया जातो न वापि जमदग्नितः नित्यानंदो ह्ययोप्येवं क्री
डते मोहयन्दर्शयन्नतिपाद्य न चैव शस्त्रास्त्रवनामयो स्वतो भुक्तेः
हिडः स्वं भगवान्वासुदेवः स्वर्गादेर्विजातः परमसत्त्ववति
थिर्वीर्यरूपोप्यबोध्यलोकानां दर्शयन्यामुनिश्चतस्तुनात्मप्रिया
र्थे जगाम सब्रह्मवंद्यचरणो जनमोहनाय स्त्रीसंगिनामिति
गतिं प्रथयञ्छ्वाय सर्वेश्वरोनित्यवीर्यापोयश्चदाधारयिः स्वयं रुद्र
वाक्यस्तं कर्तुमजितो जितवान्स्थितः योजितो विजितो भवत्या
गांगेयं न जयानद नवास्त्राघ्राद्यामास ककरणः कोपरस्तु नइन्द्रा
दिभ्यश्च स्कादे न तत्र सारनिरूप्यधर्माः यत्र वपनावरमेदो
वगम्यते न चास्ति तुहिमपेक्ष्यावरत्वं विश्वरूपमपेक्ष्यान्यत्र न
चावतारपरिपूर्णानि रूपाणि समान्यखिलरूपतः तथाप्यपेक्ष्यम
ज्ञानादृष्टितास्त्वपेपिहि परावरत्वं दर्शयेद्ब्रह्म भक्तानां विमोह
नमिति [illegible] न वाचाकिंचिदुपचरितादिवाच्यं अविरयथाज्ञः प
र्यवैविरथ्याबोलकम हेस्यात् नानादि रूपाणि परिपूर्णानि सर्वदा
नवाणुमात्रभिन्नानि तथाप्यज्ञानविमोहकानीत्यादेश्च नासदीये न
स्मात्सर्वरूपेणनंतगुणनित्यनिरस्तदोषं च नारायणोस्य परं च लाप
रोनलानामस्फुटीतीति वासिष्ठम् ॥ इति श्री[illegible]दानंदतीर्थभगवत्पादाचार्य
विरचिते श्रीमद्भगवद्गीताभाष्ये हितीयो[illegible]ध्यायः २॥

याहाक्तिकनयायत्रक्वापियातिसवाप्नुमान् ५ यएवंभू
तएवोत्रस्थितप्रज्ञउदारधीः शांतिंसकलसंसारदुःखा
भावोपलक्षितां ६ निर्वाणाख्यमवाप्नोतितत्त्वबोधबले
नैवेईदृशंव्रजनंतस्यस्थितप्रज्ञस्यकीर्तितम् ७ ॥ ७१

नीलकंठी टी० ॥ ५०३

प्रासंगिकीमाशंकांपरिहृत्यव्रजेतकिमित्यस्यप्रश्नोत्तरमाह
विहायेति एवंभूतान्त्रिविधान्कामान्विहाययःचरतिविष
यान्भुंक्तेनिःस्पृहश्चयतोनिर्ममः ममत्वाबाह्येष्विदंममभू
यादित्यन्यथनार्थस्पृहांकरोति निर्ममोपिकुतः यतोनिर
हंकारः नह्यहंकारशून्यस्यदेहादौममतादृष्टा तस्मादहं
कारप्रविलयात्शांतिमोक्षंप्राप्नोति अयंयःसर्वत्रानभिस्ने
हइतिसर्वत्रयच्छब्ददर्शनात्साधनविधिपरएवायंग्रंथः प्र
त्युतस्थितप्रज्ञस्यप्रकृतत्वात्तद्वादार्थोयच्छब्दोनर्थकः
प्राप्नोति लोकेपिहिपरस्वभावकथनेसएवंकरोतीतितच्छ
ब्दएवप्रयुज्यतेनतुयच्छब्दः विधौतुयएवंकरोतिसइदंप्राप्नो
तीतिद्वयोरपिप्रयोगोदृश्यते लक्षणकथनार्थत्वेपितत्रता
त्पर्याभावाद्विधावेवपर्यवस्यतीतिदिक् ७१ ॥

आनंदी टीका

एतदेवप्रकाशयति विहायेति कार्यमित्येवयत्कर्मनियतंक्रि
यतेतेनसंगंत्यक्त्वाफलंचैवेत्यष्टादशाध्यायेसिद्धांतानुगमे
नक्रियमाणएव कर्मणिफलासक्तिंत्यक्त्वानएवनिस्पृहः यः
पुमान्सर्वान्कामांश्चरति इंद्रियैराहरत्येवसएवनिर्ममःममे
दंभूयादिति ममतायानिष्क्रांतः तथाहिनिरहंकारः अहंक
र्ताभोक्तेत्यादिवासनाहीनः शांतिमधिगच्छति ७१ ॥

रामकंठी टीका

यःसर्वानशेषान्कामानिष्टांश्छब्दादिविषयानभिलाषान्मनसैव
विहायपरित्यज्येंद्रियैर्विषयांश्चरति अवगाहतेशान्तिमुक्तरू
पामधिगच्छतिप्राप्नोति कीदृशःसन् नित्यत्वमाद्ययचिन्मात्रप्र
तिलब्धात्मप्रत्ययत्वान्निःस्पृहः स्पृहातोविषयस्वलोलुपतया

निष्क्रांतस्तथा निर्ममः प्रतिनियतदेहेंद्रियादिषु भावेषु मम
मेदमिति ममत्वाभिमानान्निष्क्रांतस्तथा निरहंकारः देहबु
द्धिप्राणादिष्वात्मप्रत्ययरूपाद्बहिर्माहंकारादपि निष्क्रांतः इ
त्येतदुक्तं तथेनापवर्गमार्गप्रणवसम्बंधः प्रथमसहजभ
क्त्याद्यव्यभिचारिचिह्नसहितोपदेशयोगप्रबुद्धितया सद्गु
रूपदिष्टदेहदेहिव्यतिरेकज्ञाननिरंतराभ्यासवशाद्देहा
दिवर्गव्यावर्तमानात्मप्रत्ययस्याहंता सामान्यसंविद्रूपाद्वा
दहंप्रतीतेश्चिदेकरसेशुभरूपाणामंतर्बहिष्करणशक्तीनां
शाद्वचोदितेषु विषयेषु विहरणत्वमेव निग्रहं निरूतंपद
शमितेहं वेसिद्धांतीकृत्य समदशाध्यायप्रदर्शितपरमरह
स्योपदेशप्राणभूतार्थप्रतिपादकं द्वितीयमध्यायमुपसंह
न्नाह ७१ ॥

लासि[illegible]मी टीका

एतमेवाभिप्रायं समासेनाह विहायेति यः पुमान्स्वरूपप्र
तिष्ठो निरहंकारो विच्छिन्नदेहाद्यभिमानशून्यः नकेवलं निर
हंकारः यावन्निर्ममोपि देहादिषु ममताशून्यः तथा निस्पृहो
विषयेषु निरभिलाषः सर्वान्कामान्प्राप्तविषयान्विहाय योप
लब्धदेहस्थितिर्भूत्वाचरति भुंक्ते स शांतिं मोक्षमधिगच्छति ग्राह
केंद्रियग्राहकत्वेन सर्वान्भुंक्ते ऽकंचान्यत्र सम्यक्तबोध
विश्रांतोयालमात्रभवास्थितिः विषयानपिसोप्यस्याज्जीवन्मु
क्तस्तत्ववितइति ७१ ॥

पंचोलीटीका

यस्मादेवं तस्माद्यः संन्यासी पुमान् सर्वान्कामान् अशेषान्मनः
स्थान्विहाय परित्यज्य निःस्पृहः शरीरजीवनमात्रेपि निरभिलाषः
निर्ममो ममतारहितः निरहंकारः अभिमानरहितः सन् जीवनमा
त्रार्थचेष्टाशेषः पर्यटति स स्थितप्रज्ञः शांतिं निर्वाणमधिगच्छति
नदीहरो व्रजनं स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं ७१

भाषा अनुवाद

जब ऐसी अवस्थाहै तो जो प्राप्त विषयको त्याग करते या अनादरसे ग्रहण करते और अप्राप्तमे इच्छा रहित कहे । किसीकी अभिलाष नही रखते इससे उनके अहंकार नही है इसीसे भोग अभोग साधनमें ममता तथा स्नेह शून्य होकर आत्मामें दृष्टि राखि अदृष्ट वशते विषय भोग । करतेहै और कही भी जाय पर शान्तिको प्राप्त होतेहै अर्थात् जो सब कामना छोडि बेपरवाह अहं ममता ही न पुरुष भोग करै या कही जाय पर शान्ति तो पावते हीहै ७१ ॥

दोहा

सर्वकाम त्यागैं पुरुष जो विचरैं निस्पृह निर्मम निरहंका
र सो शांति प्राप्त अतिदीह ७१॥

438

एषाब्राह्मीस्थितिःपार्थ नैनांप्राप्यविमुह्यति
स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छ
ति ७२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्म॰
विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादे सां
ख्ययोगोनामद्वितीयोध्यायः २ ॥

शांकरभाष्य टी॰

सैषा ज्ञाननिष्ठा स्तूयते एषाब्राह्मीति एषा यथोक्ताब्राह्मी
ब्रह्मणिभवेयंस्थितिः सर्वकर्म संन्यस्य ब्रह्मरूपेणैवावस्था
नमित्येतद्धे पार्थ नैनां स्थितिं प्राप्य लब्ध्वा विमुह्यति नमोहं
प्राप्नोति स्थित्वास्यांस्थितौ ब्राह्म्यां यथोक्तायामन्तकालेपि अ
न्ते वयस्यपिब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मोक्षमृच्छति किमु
वक्तव्यं ब्रह्मचर्यादेव संन्यस्ययावज्जीवं यो ब्रह्मण्येवावति
ष्ठते सब्रह्मनिर्वाणमृच्छतीति ७२ ॥ इतिश्रीभगवद्गीताभा
ष्ये द्वितीयोध्यायः २ ॥

आनंदगिरिकृत टी॰

तत्रतत्र संक्षेपविस्तराभ्यां प्रदर्शितां ज्ञाननिष्ठां प्रथिकाधि
प्रवृत्त्यर्थत्वेन स्तौत्यनन्तरश्लोकमवतारयति सैषेति गृह
स्थःसंन्यासीत्युभावपि चेन्मुक्तिभागिनौ किंतर्हिकष्टेनसर्वै॰
षैव संन्यासेनेत्याशंक्य संन्यासिव्यतिरिक्तानामन्तरायसंभ
वादपेक्षितः संन्यासीमुमुक्षोरित्याह एषेति स्थितिमेवव्याच
ष्टे सर्वमिति नविमुह्यतीति पुनर्नञोत्रकर्षणमन्वयार्थं सं
न्यासिनोविमोहाभावेपिगृहस्थो धनदारापत्यादिनिमित्तेनप्राये
णविमुह्यतिविवक्षितःसन् परमार्थविवेकरहितोभवतीत्य
र्थः यथोक्ताब्राह्मीस्थितिः सर्वकर्मसंन्यासपूर्विका ब्रह्मनि॰

ष्ठा तस्यां स्थित्वा तामिमामात्मस्वरूपस्थितेऽर्थेऽपि भोगकृत्वेत्यर्थः अपि
शब्दसूचितं कैमुतिकन्यायमाह किमु वक्तव्यमिति तदेवं तत्त्वं
पदार्थौ तदैक्यं वाक्यार्थस्तज्ज्ञानादेकाकिनो मुक्तिस्तदुपाय
श्चेत्येतेषामेकैकस्य श्लोकैः प्राधान्येन प्रदर्शितमिति निष्ठाद्वय
मुपायोपेयभूतमध्यायेन सिद्धं ७२ इति श्रीआनंदगिरिकृतटी॰
कायां द्वितीयोऽध्यायः २॥

स्वामिकृत टीका

उक्तां ज्ञाननिष्ठां स्तुवन्नुपसंहरति एषेति ब्राह्मी स्थितिर्ब्रह्मज्ञान
निष्ठा एषा एवंविधा प्राप्तां परमेश्वराराधनेन विशुद्धान्तःकरणः पुमा
न्प्राप्य न मुह्यति पुनः संसारमोहं न प्राप्नोति यतः अन्तकालेऽप्य
न्त्यसमयेऽपि अस्यां क्षणमात्रं स्थित्वा ब्रह्मनिर्वाणमृच्छति प्राप्नो
ति [illegible] किं पुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा प्राप्नोतीति ७२
इति सुबोधनीटीकायां द्वितीयोऽध्यायः २॥

पैशाचभाष्य टी

सैषा ज्ञाननिष्ठा एषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः नैनां
स्थितिं प्राप्य लब्ध्वा विमुह्यति न मोहं प्राप्नोति स्थितास्यां ब्रह्मा
स्थितो यथोक्तायामन्तकालेऽपि अन्ते वयस्यपि ब्रह्मनिर्वाणं ब्र॰
ह्मनिर्वृतिं मोक्षमृच्छति गच्छति ७२॥ इति पैशाचभाष्ये द्वि॰
तीयोऽध्यायः २॥

रामानुजभाष्य ।

एषा नित्यात्मज्ञानपूर्विकाऽसङ्गकर्मणि स्थितिः प्राप्य न मुह्यति न
पुनः संसारमाप्नोति अस्यां स्थित्यां अन्तिमेऽपि वयसि स्थित्वा
ब्रह्मनिर्वाणमृच्छति निर्वाणमयं ब्रह्म सुखैकतानमभिगच्छ॰
तीत्यर्थः ७२ इति रामानुजभाष्ये द्वितीयोऽध्यायः २॥

अभिनवगुप्तकृत टी॰

एषा सा ब्रह्मसत्ताय स्याः क्षणमात्रं स्थित्वा वा स्थितिं प्राप्य शरीरमे

दान्परमेवब्रह्माप्नोतीतिप्रश्नद्वयंनिर्णीतमितिशिवम्
भ्रमार्थसंग्रहः अहोतुचेतसञ्छिन्नागतिस्त्यागेनयात्किल
आरोहत्यैवविषयाश्रयंत्वत्परित्यजेत् ७२ इतिश्रीभिन
वगुप्तेद्वितीयोध्यायः २ ॥ ॥ ॥

परमार्थप्रपा टी॰

एषोक्तलक्षणाब्राह्मीस्थितिः ब्रह्माकारेणावस्थितिरूपान्यः
त्वापनैनांप्राप्यनमुह्यति पुनर्मोहंनप्राप्नोति अस्यामंतकाले
देहावसानेक्षणंस्थित्वापिब्रह्मनिर्वाणमृच्छतिप्राप्नोति किं
पुनर्यावज्जीवमित्यर्थः अध्यायतात्पर्यं शोकेदेहात्मबुद्धया
त्वनुभवतिमत्स्वरूपेदेहातिरिक्तोदेहदृष्टैकआत्माविदिवपु
दि॰ पहतोहंत्वहंनस्फुरन्यः नस्यज्ज्ञानात्रशोकस्तदिहनिजमनःशु
द्धितःसाधुसिद्धोहदेशः सद्वितीयेश्रुआमिममवदत्सांख्ययो
गाधिकारे ७२ इतिपरमार्थप्रपाटीकायांद्वितीयोध्यायः २

वनमाली टी॰

उक्तमुपसंहरति एषेतिएषास्थितप्रज्ञलक्षणाजनकथिता
एषातेभिहितासांख्येबुद्धिरितिचप्रागुक्तास्थितिर्निष्ठासर्वका
म्यकर्मन्यासपूर्वकपरमात्मज्ञानरूपाब्राह्मीपरब्रह्मविषया
हेपार्थएतांस्थितिंप्राप्ययःकश्चिदपिपुनर्नविमुह्यतिमोहहे
भ्र॰ तुभूतायाविद्यायाभगवदुपदेशहेतुकतनुमहाप्रसादेननि
हतत्वात् अस्यांस्थितावंतकालेप्यंतेपिवयसिस्थित्वाब्रह्मणि
निर्वाणेनत्मस्वरूपंमोक्षंप्राप्नोतीत्यर्थः ७२ इतिवनमाली
टीकायांद्वितीयोध्यायः २ ॥

...मवैजयन्ती टी॰

पूर्वोक्तामात्मज्ञानपूर्विकां निष्कामकर्मनिष्ठामुपसंहरति
एषेति हेपार्थ एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृण्वि
न॰ त्यारभ्य विहायकामान्निःस्पृहैःश्लेषनमयायाकथितासाप्
षाईदृशविधाब्राह्मीब्रह्मावाप्तिकरीस्थितिः आत्मज्ञानयुक्ता
निष्कामकर्मनिष्ठाभवति स्थिरधीःपुरुषःएतांस्थितिंप्राप्य

नमुह्यतिप्रकृतिकार्येषुदेहगेहादिषुमोहंनप्राप्नोति अ
न्तकालेपिमरणसमयेपि अस्यांस्थितौस्थित्वानिर्वाणं अन
वधिकातिशयसुखस्वरूपंब्रह्मऋच्छति यद्वानिर्वाणंनिर्ग
तंवाणंगंधं यस्मिंस्तत्तथाप्रकृतेस्तत्कार्याणांचसम्बन्धग
न्धरहितं ब्रह्मणोनिर्वाणंब्रह्मनिर्वाणमप्राकृतवैकुंठाख्यं
ब्रह्मणोनिवासस्थानंयद्वा ब्रह्मविन्निर्वाणंप्रकृतिसम्बंधा
दिरहितंशुद्धात्मस्वरूपंप्राप्नोतीत्यर्थः तथाचात्रैववक्ष्यति
यद्गत्वाननिवर्तंतेतद्धामपरमंमम येप्राप्यनपुनर्जन्मदुः
खालयमशाश्वतं नाप्नुवंतीति केचित्तुकार्थकेनापिशेषेणा
यमर्थःसूच्यते तथाहि यदिप्राणत्यागात्प्रागीदृशपरि
मितेस्वल्पकालेपियःपुरुषोस्यांस्थितौतिष्ठतिसोपिब्रह्म
निर्वाणंगच्छति तर्हियस्तुजन्मारभ्यदेहान्तावधिमहत्यपिनसक
लात्मात्मीयादिवस्तुजातोमदाराधनपरोमदेकनिष्ठोनिखि
लोपायोपेयफलसम्बन्धादिरूपेणमामेवभजमानःसुमान
स्यांतिष्ठतिसतदृच्छतीतिकिमुवक्तव्यमितित्वंतुयत्पितृष्व
सुःपृथायाःपुत्रोसिअतोमत्प्रसादात्तवैषास्थितिःसुलभाभ
वतीतिसम्बोधनाभिप्रायः ७२ इति[illegible]वैजयन्तीटीका
यांद्वितीयोध्यायः २ ॥

+ तदेवंचतुर्णांप्रश्नानांउत्तरव्याजेनसर्वाणिस्थि संप्रतिकर्मयोगफलभूतासाज्ञाननिष्ठाफलेन **मधुसूदनी टी॰** तत्रस्थितलक्षणनिरूपणकर्मयोगतयाकथितानि लवत्रुपम हर ति+

+ एषास्थितप्रज्ञलक्षणव्याजेनकथिता एषातेभिहितासांख्ये
बुद्धिरितिचप्रागुक्तास्थितिर्निष्ठासर्वकर्मसंन्यासपूर्वकपर
मात्मज्ञानलक्षणाब्राह्मीब्रह्मविषयाहेपार्थ एनांस्थितिंप्रा
प्यःकश्चिदपिपुनर्नविमुह्यति नहिज्ञानबाधितस्याज्ञान
स्याज्ञानस्यपुनःसंभवोस्ति अनादित्वेनोत्पत्त्यसंभवात् अ
स्यांस्थितावंतकालेपिअंत्येपिवयसिस्थित्वाब्रह्मनिर्वाणंब्र
ह्मणिनिर्वाणंनिर्वृतिंब्रह्मरूपंनिर्वाणमितिवाऋच्छतिगच्छ
तिअभेदेन किमुवक्तव्यंयोब्रह्मचर्यादेवसंन्यस्ययावज्जीवम
स्यांब्राह्म्यांस्थितावतिष्ठतेसब्रह्मनिर्वाणमृच्छतीत्यपिश॰

भाषा अनुवाद

पूर्व कही हुई ज्ञाननिष्ठा की प्रसंसा करि कहतेहै कि हे
अर्जुन उक्त ब्रह्मज्ञान की निष्ठा ऐसीहै इसमे भगवतके
आराधनसे शुद्धचित्त पुरुष यह ब्रह्मनिष्ठा पाय करि और
संसार सागरमे मूढ नही होता देखो मरती बारभी एक
क्षणभर जो ब्रह्मनिष्ठामे मन थिर करते ब्रह्ममे लीन हो
ताहै तो बाल पनसे या बहुत दिनोंसे इस ब्रह्मनिष्ठा की ।
अभ्याससे इसमे मन थिर करि अन्तमे मुक्ति मिलेगी इसमे
फिरि कछु सन्देह बाकीहै सो हे पार्थ यह ब्राह्मी स्थितिहै
इसको प्राप्तहो फिरि मोह नही पावे अन्तकालमे भी इसमे
क्षणभर मनथिर करि मनुष्य निश्चय ब्रह्म निर्वाण पद ।
पावते है ७२ इति द्वितीयोऽध्यायः २॥

दोहा

पार्थ यह ब्राह्मी स्थिति ध्रुव मिलें होतनमोह अंतकालथि
त याहिमें निर्वाण ब्रह्म होय सोह ७२॥ इति श्री॥